Prakashika Series
No. 39

General Editor
Pratapanand Jha

श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यविरचितम्

# शिवज्ञानबोधभाष्यम्

सम्पादक

शरत चन्द्र स्वामी

राष्ट्रीय पाण्डुलिपि मिशन
॥ विज्ञानमुपास्व ॥
NATIONAL MISSION FOR MANUSCRIPTS

DK PRINTWORLD
Publishers of Indian Traditions

**Cataloging in Publication Data — DK**
Courtesy: D.K. Agencies (P) Ltd. <docinfo@dkagencies.com>

**Śivāgrayogin, author.**
Śivajñānabodhabhāṣyam / Śrīśivāgrayogīndrajñāna-
śivācāryaviracitam ; sampādaka, Ḍā.
Śarata Candra Svāmī.
pages cm – (Prakashika series ; no. 39)
In Sanskrit.
Added title page title: Śivajñānabodhabhāṣyam.
Commentary on Civañānapōtam of Meykaṇṭatēvar, treatise
on the doctrines of Śaiva-Siddhānta.
ISBN 9789380829586

1. Śaiva Siddhānta. 2. Meykaṇṭatēvar. Civañāṉapōtam. I.
Svāmī, Śarata Candra, editor. II. National Mission for
Manuscripts (India), publisher. III. Title. IV. Title:
Śivajñānabodhabhāṣyam. V. Series: Parkāshikā sīrīz ; no. 39.

LCC BL1281.845.S58 2019 | DDC 294.5513 23

ISBN: 13: 978-93-80829-02-9 (शृंखला के लिए)
ISBN: 13: 978-93-80829-58-6
प्रथम प्रकाशन वर्ष, 2019
©राष्ट्रिय पाण्डुलिपि मिशन

सर्वाधिकार सुरक्षित। इस प्रकाशन के किसी भी अंश या पूरे का प्रतिलिपिकरण, ऐसे यन्त्र में भण्डारण जिससे इसे पुनः प्राप्त किया जा सकता हो या स्थानान्तरण (किसी भी रूप में या किसी भी विधि जैसे इलेक्ट्रॉनिक, यान्त्रिक, फोटो-प्रतिलिपि, रिकॉर्डिंग या किसी अन्य तरीके से) कॉपीराइट धाारक एवं प्रकाशक की पूर्वलिखित अनुमति के बिना नहीं किया जा सकता।

*प्रकाशक*
राष्ट्रिय पाण्डुलिपि मिशन
11 मानसिंह रोड
नई दिल्ली – 110001
फोन : (011) 2338 3894, फैक्स : 2307 3340
इ-मेल – director.namanmi@nic.in
वेब – www.namami.org

*मुद्रक एवं प्रकाशक*
डी.के. प्रिंटवर्ल्ड (प्रा.) लि.
पंजीकृत कार्यालय : वेदश्री, एफ-395, सुदर्शन पार्क
मेट्रो स्टेशन : ई.एस.आइ. हॉस्पिटल, नई दिल्ली – 110015
दूरभाष : (011) 25453975, 25466019
ई-मेल : indology@dkprintworld.com
वेब : www.dkprintworld.com

Śrīśivāgrayogīndrajñānaśivācāryaviracitam

# Śivajñānabodhabhāṣyam

Editor
Sharath Chandra Swamy

राष्ट्रीय पाण्डुलिपि मिशन
॥ विज्ञानमुपास्व ॥
NATIONAL MISSION FOR MANUSCRIPTS

DK PRINTWORLD
Publishers of Indian Traditions

**Cataloging in Publication Data — DK**
Courtesy: D.K. Agencies (P) Ltd. <docinfo@dkagencies.com>

**Śivāgrayogin, author.**
Śivajñānabodhabhāṣyam / Śrīśivāgrayogīndrajñāna-śivācāryaviracitam ; sampādaka, Ḍā. Śarata Candra Svāmī.
pages cm – (Prakashika series ; no. 39)
In Sanskrit.
Added title page title: Śivajñānabodhabhāṣyam.
Commentary on Civañānapōtam of Meykaṇṭatēvar, treatise on the doctrines of Śaiva-Siddhānta.
ISBN 9789380829586

1. Śaiva Siddhānta. 2. Meykaṇṭatēvar. Civañāṉapōtam. I. Svāmī, Śarata Candra, editor. II. National Mission for Manuscripts (India), publisher. III. Title. IV. Title: Śivajñānabodhabhāṣyam. V. Series: Parkāshikā sīrīz ; no. 39.

LCC BL1281.845.S58 2019 | DDC 294.5513 23

ISBN 13: 978-93-80829-02-9 (series)
ISBN: 13: 978-93-80829-58-6
First published in India in 2019
© National Mission for Manuscripts, New Delhi

All rights reserved. No part of this publication may be reproduced or transmitted, except brief quotations, in any form or by any means, electronic or mechanical, including photocopying, recording, or any information storage or retrieval system, without prior written permission of the copyright holder, indicated above, and the publishers.

Published by:
National Mission for Manuscripts
Regd. Office: 11, Mansingh Road
New Delhi - 110001
Phones: (011) 2338 3894, Fax: 2307 3340
e-mail: director.namanmi@nic.in
Website: www.namami.org

and

D.K. Printworld (P) Ltd.
*Regd. Office: Vedaśrī*, F-395, Sudarshan Park
(Metro Station: ESI Hospital), New Delhi - 110015
*Phones*: (011) 2545 3975, 2546 6019
*e-mail*: indology@dkprintworld.com
*Website*: www.dkprintworld.com

Printed by: D.K. Printworld (P) Ltd.

# Foreword

Sanātana Dharma, per se Hinduism, has two main streams: Shaivism and Vaishnavism. Shaivism regards Lord Śiva as the Supreme Deity and the Ultimate Self, and its followers worship him accordingly. Shaivism thrives mostly in Kashmir according to the Pratyabhijñā philosophy and in south India following the Śaiva Siddhānta philosophy. Śaiva Siddhānta is one of the most ancient schools of Shaivism. Śaiva Siddhānta is mainly based on the Śaivāgamas, Upaniṣads, and ancient Tamil works such as the *Thirumurai* and the *Meykaṇder Śāstram* and their commentaries. There is no established information about the date of its origin, it is regarded as the most developed form of Shaivism. It claims to be the 'end of ends' with reference to other systems of Indian philosophy. Though Shaivism and Śaiva Siddhānta are widely penetrated in Kashmir and south India, it has a strong presence and following in north India as well. Some attribute its origin to the saints of Varanasi, while others contend that it was initiated as a monastic doctrine, which Tirumūlar adopted and popularized in due course.

Śaiva Siddhānta found its fillip in the north in Sadyojyoti, Bṛhaspati and Ugrajyoti in Kashmir. Their works revived Saivaite religion at the popular level and also became the substratum on which a well codified Śaiva Śiddhānta was based.

This volume is a critical edition of the *Śivajñānabodhabhāṣyam*, a commentary (*bhāṣyam*) written by Śivāgrayogin on the *Śivajñānabodham* of Meykaṇḍadeva. It is the most authentic and methodical work on Śaiva Siddhānta. Śivāgrayogin wrote three elaborate commentaries on the *Śivajñānabodham* such as *Laghuṭīkā*, *Vistṛtabhāṣyam*, and *Bṛhadṭīkā*. The first two are already published, and the last one is getting published in this volume.

This book, *Śivajñānabodhabhāṣyam*, a canonical work on Śaiva Siddhānta and critically edited by Dr. Sharath Chandra Swamy, is a mark of classical scholasticism in the Indian philosophical system.

We hope this publication would help the readers know more about Śaiva Siddhānta philosophy.

**Pratapanand Jha**
Director
National Mission for Manuscripts
New Delhi

# विषयानुक्रमणिका

*Foreword* vii
*Introduction* 1
उपोद्घातः 21
प्रश्नमाला 21
संशयबीजम् 24
शास्त्रावतरणिका 24
गुरुक्रमः 25
अनुबन्धचतुष्टयनिरूपणम् 25

**प्रथमसूत्रभाष्यम्**

प्रथमसूत्रम् 27
ईश्वरानुमानम् 27
अशरीरस्यापीश्वरस्य अधिष्ठातृत्वम् 29
मन्त्रात्मकदेहनिरूपणम् 29
अनुमानान्तरम् 30
तटस्थलक्षणम् 30
अनुमानप्रामाण्यम् 30
आगमप्रामाण्यम् 31
सर्वमार्गप्रामाण्यम् 32
आगमस्य सिद्धे प्रामाण्यम् 34
सूत्रशेषभाष्यम् 35
विस्तृतभाष्यम् 36
सकर्तृकत्वानुमानम् 36
स्वभाववादनिरासः 38
कालमात्रस्य हेतुत्वम् 40
कर्ममात्रस्य कारणत्वम् 41
कालादिमात्रस्य कारणत्वनिरासः 41
सिद्धसाधनम् 41
पक्षाक्षेपः 41
साध्यप्रतिक्षेपः 42
हेत्वाक्षेपः 42

| | |
|---|---|
| विरोधोद्भावनम् | 43 |
| सत्प्रतिपक्षत्वम् | 43 |
| बाधः | 44 |
| उपाधिः | 45 |
| प्रतिकूलतर्कः | 45 |
| अप्रयोजकत्वम् | 46 |
| सर्वज्ञत्वाद्याक्षेपः | 46 |
| ईश्वरैकत्वाक्षेपः | 46 |
| अर्थान्तरता | 46 |
| सिद्धसाधननिरासः | 47 |
| पक्षतावच्छेदकनिरुक्तिः | 47 |
| साध्यनिरुक्तिः | 48 |
| हेतुनिरुक्तिः | 48 |
| विरोधपरिहारः | 48 |
| प्रतिपक्षप्रतिक्षेपः | 49 |
| बाधपरिहारः | 50 |
| उपाधिनिरासः | 50 |
| प्रतिकूलतर्कनिरासः | 51 |
| अप्रयोजकत्वनिरासः | 51 |
| सार्वज्ञ्यादिसमर्थनम् | 51 |
| अनुमानाप्रामाण्यम् | 54 |
| अनुमानप्रामाण्यम् | 55 |
| शैवागमानामप्रामाण्यशङ्का | 57 |
| वेदस्य शिवप्रणीतत्वव्यवस्थापनम् | 67 |
| सर्वमार्गप्रामाण्यम् | 70 |
| लोकायतादीनां वस्तुन्यप्रामाण्यम् | 75 |
| सिद्धान्तशैवस्य कूर्मादिपुराणवचनविरोधपरिहारः | 82 |
| सिद्धे सङ्गतिग्रहाक्षेपः | 86 |
| चिच्छक्तेः प्रमाणत्वनिरूपणम् | 88 |
| वृत्तेर्यथार्थत्वनिरूपणम् | 90 |
| प्रामाण्यस्य स्वतो ग्राह्यत्वम् | 91 |

अप्राण्यस्य परतो ग्राह्यत्वम् 93
प्रमाण्यस्योत्पत्तौ परतस्त्वम् 93
प्रमाणविभागः 96
प्रत्यक्षनिरूपणम् 96
सन्निकर्षनिरूपणम् 98
अभावस्यानुपलब्धिगम्यत्वम् 98
अभावस्यैन्द्रियकत्वम् 99
अनुमाननिरूपणम् 100
उपमानादीनामन्तर्भावनिरूपणम् 100
शब्दप्रमाणनिरूपणम् 101
आकाङ्क्षा 101
योग्यता 102
आसत्तिः 102
शब्दस्य पृथक्प्रामाण्यप्रतिक्षेपः 102
शब्दस्य पृथक्प्रामाण्यव्यवस्थापनम् 103
सूत्रशेषार्थः 104
प्रळयप्रतिक्षेपः 104
प्रळयप्रतिष्ठापनम् 104
हिरण्यगर्भस्य जगत्कर्तृत्वम् 105
हिरण्यगर्भस्य जगत्कर्तृत्वनिरासः 106
नारायणस्य जगत्कारणत्वम् 106
नारायणस्य सर्वजगत्कारणत्वनिरासः 110
शिवस्यैव जगत्कारणत्वव्यवस्थापनम् 113

## द्वितीयसूत्रभाष्यम्

द्वितीयसूत्रम् 121
निष्कलादिनिरूपणम् 123
कुण्डलिनीनिरूपणम् 125
विस्तृतभाष्यम् 133
शिवस्योपादानत्वसमर्थनम् 133
उपादानत्वाक्षेपः 135

| | |
|---|---|
| निर्विकारश्रुतिबाधः | 136 |
| अनुमानबाधः | 137 |
| निरुपाधानत्वपक्षः | 138 |
| शून्योपादानकत्वम् | 138 |
| परमाणूपादानकत्वम् | 138 |
| प्रधानादिवादः | 139 |
| प्रकृतिपञ्चम्योपादानत्वसमर्थनम् | 139 |
| एकविज्ञानेन सर्वविज्ञानादिनोपादानत्वम् | 140 |
| निर्विकारश्रुतिबाधपरिहारः | 141 |
| अनुमानबाधोद्धारः | 142 |
| उपादानत्वेऽनुमानम् | 144 |
| अनुपादानकत्वपक्षनिरासः | 144 |
| शून्योपादानत्वनिरासः | 144 |
| परमाणूपादानत्वनिरासः | 145 |
| पुञ्जवादनिरसनम् | 146 |
| प्रधाननिरासः | 146 |
| केवलमायोपादानत्वनिरासः | 147 |
| शिवस्य परिणामित्वनिरासः | 147 |
| वृत्तिरूपमुपादानत्वम् | 148 |
| करणनिरूपणम् | 149 |
| शक्तित्वनिर्वचनम् | 150 |
| कर्मणि प्रामाण्यम् | 156 |
| व्यापारव्यवस्थापनम् | 156 |
| ध्वंसस्य व्यापारत्वनिराकरणम् | 157 |
| देवताप्रीतेर्व्यापारत्वनिरसनम् | 157 |
| दुरितापूर्वसमर्थनम् | 157 |
| कर्मविभागः | 158 |
| ईश्वरप्रवृत्तेः परार्थत्वम् | 159 |
| तत्त्वनिरूपणम् | 159 |
| बिन्दुव्यवस्थापनम् | 161 |
| शिवतत्त्वनिरूपणम् | 163 |

शक्तितत्त्वम् 164
सदाशिवतत्त्वम् 165
ईश्वरतत्त्वम् 165
विद्यातत्त्वम् 165
सत्कार्यवादः 168
कलातत्त्वनिरूपणम् 170
विद्यातत्त्वम् 171
रागतत्त्वम् 172
कालतत्त्वम् 176
नियतितत्त्वम् 178
पुंस्तत्त्वम् 180
प्रकृतितत्त्वम् 180
गुणतत्त्वम् 182
बुद्धितत्त्वम् 183
अहंकारतत्त्वम् 185
मनस्तत्त्वम् 186
इन्द्रियतत्त्वम् 190
आकाशतत्त्वम् 197
वायुतत्त्वम् 198
तेजस्तत्त्वम् 198
जलतत्त्वम् 198
पृथिवीतत्त्वम् 199
भूतानि 199
तत्त्वानां साधारण्यासाधारण्ये 200
पुर्यष्टकदेहः 201

**तृतीयसूत्रभाष्यम्**

तृतीयसूत्रम् 203
विस्तृतभाष्यम् 207
शून्यवादः 207
शून्यवादनिराकरणम् 207
शरीरात्मवादनिरासः 209

इन्द्रियात्मवादनिरासः 212

## चतुर्थसूत्रभाष्यम्

चतुर्थसूत्रम् 221
विस्तृतभाष्यम् 226

## पञ्चमसूत्रभाष्यम्

पञ्चमसूत्रम् 239
विस्तृतभाष्यम् 241

## षष्ठसूत्रभाष्यम्

षष्ठसूत्रम् 247
विस्तृतभाष्यम् 251

## सप्तमसूत्रभाष्यम्

सप्तसूत्रम् 255
परिशेषानुमानेन पतिपाशव्यतिरिक्तपशुस्थापनम् 255

## अष्टमसूत्रभाष्यम्

अष्टमसूत्रम् 257
विस्तृतभाष्यम् 263
मलपाकः 266
कर्मणैव मोक्षवादः 270
ज्ञानकर्मसमुच्चयः 271
कर्मप्राधान्यतत्समुच्चयनिरासः 272
श्रवणविधिविचारः 276
निर्वाणदीक्षाधिकारः 281
ज्ञानोपयोगः 292
शिष्यकर्म 302
उपदेशप्रकारः 303
दीक्षालक्षणम् 304

दीक्षाविभागः 304
अध्वा 307
नरकनिरूपणम् 308
शतकोटिविस्तारभूमिनिरूपणम् 310
प्रतिष्ठाकलातत्त्वानि 323
विद्याकलातत्त्वानि 325
शान्तिकलातत्त्वानि 326
शान्त्यतीतकलातत्त्वानि 327

## नवमसूत्रभाष्यम्

नवमसूत्रम् 331
विस्तृतभाष्यम् 335
शाब्दापरोक्षवादः 335
शाब्दापरोक्षनिराकरणम् 337

## दशमसूत्रभाष्यम्

दशमसूत्रम् 342
मलासंस्पर्शविचारः 342
विस्तृतभाष्यम् 347
चार्वाकमुक्तिनिरासः 347
सांख्यमुक्तिनिरासः 347
माध्यमिकमोक्षनिरासः 349
योगाचारमोक्षनिरासः 349
नैयायिकमोक्षनिरासः 349
प्राभाकरमोक्षनिरासः 350
आर्हतमोक्षनिरासः 351
भाट्टमोक्षनिरासः 352
मायावादिमोक्षनिरासः 352
सत्त्वभुक्तिमुक्तिनिरासः 352
क्षुद्रपक्षनिरासः 352
पाञ्चरात्रमुक्तयुपन्यासः 352

पाञ्चरात्रमुक्तिनिरासः 352
जीवस्याकर्तृत्वपक्षनिरासः 352
मुक्तावप्यस्वातन्त्र्यपक्षनिरासः 353
मलनिवृत्तिमात्रपक्षनिरासः 353
मुक्तस्य जगद्व्यापारपक्षनिरासः 354
मुक्तस्य शिवादाधिक्यपक्षनिरासः 354
साम्यपक्षनिरासः 354
उत्पत्तिसाम्यनिरासः 355
सङ्क्रान्तिसाम्यनिरासः 355
आवेशसाम्यनिरासः 357
अभिव्यक्तिसाम्यनिरासः 357
अभिव्यक्तपरानन्दशिवाभेदरूपसिद्धान्तमुक्तिनिरूपणम् 363

## एकादशसूत्रभाष्यम्

एकादशसूत्रम् 365
शिवभक्तेरन्तरङ्गसाधनत्वस्य शिवभक्तपूजादेः 365
बहिरङ्गसाधनत्वस्य च निरूपणम् 467

## द्वादशसूत्रभाष्यम्

द्वादशसूत्रम् 371
विस्तृतभाष्यम् 382

**श्लोकानुक्रमणिका** 425
**ग्रन्थग्रन्थकर्तृसूची** 451

# Introduction

India is well known as the land of spirituality and philosophy. From ancient times, numerous religions were born on this sacred land and formed culturally rich traditions. The principal religion of India, Hinduism or Sanātana Dharma, has a distinctive status among the world religions. It is also one of the oldest of the major religions of the world and its root can be traced back to prehistoric times.[1] Hinduism was gradually developed over thousands of years. Most forms of Hinduism are henotheistic. They recognize a single deity and view other gods and goddesses as manifestations or aspects of that Supreme God. All these sub-religions have supreme religious lenient faiths. Hinduism can be segmented into a number of major streams. The historical division of six *darśana*s is as Sāṁkhya, Yoga, Nyāya, Vaiśeṣika, Mīmāṁsā and Vedānta. The main divisions of Hinduism are Vaiṣṇavaism, Śaivaism, and Śāktism. Śaivaism and Vaiṣṇavaism are the two main streams of Śanātana Dharma. These two traditions have held sway over Hinduism. They also held a major role in influencing Indian thought for ages. Having numerous subsects under them, Śaivaism and Vaiṣṇavaism are the two great religious traditions of today's India.

Śaivaism has the spiritual traditions, which regard Lord *Ś*iva as the highest ultimate self and worship him accordingly. It is considered to be one of the primogenital sects of Hinduism, whose antiquity is said to be deep-rooted in the prehistoric traditions of ancient India. The origin of Śaivaism is difficult to determine, but its tradition can certainly be traced to the Vedas; it is often understood to be the oldest of the major Hindu traditions.

There are many subsects within Śaivaism. While they all

[1] Mircea Eliade and Charles J. Adams, 1987, *The Encyclopedia of Religion*, vol-15, p. 169.

acknowledge Lord Śiva as the Supreme Deity, they vary from one to another in respect of other facts, such as the methods of worship, nature of *Brahman*, nature of the individual soul, the relationship between *Brahman* and soul, the nature of realism and the means to liberation. These schools of Śaivaism primarily fall under one of the three schools of Vedānta philosophy, namely, 1. Advaita (monism), 2. Viśiṣṭādvaita (qualified monism), and 3. Dvaita (dualism). One of the main Śaivāgamas, the *Kāraṇāgama,* says Śaivaism has four main sects and they are: Śaiva (Śuddha Śaiva), Pāśupata, Soma and Lākula. Śuddha Śaivaism is of three kinds: Vāma, Dakṣiṇa and Siddhānta.[2] Of the few sects that survived the deviations of time, the following three are the most prominent – 1. Kashmir Śaivaism, 2. Siddhānta Śaivaism, and 3. Vīraśaivaism or Liṅgāyata.

## Śaiva Siddhānta

Kashmir and south India are the main two realms of the Śaivaism. Kashmir Śaivaism is commonly known as the "Pratyabhijñā" school. South Indian Śaivaism is called generally as the "Śaiva Siddhānta". The Śaiva Siddhānta owes origin to no single author. It is mainly based on the Śaivāgamas, Upaniṣads, ancient Tamil works, *Thirumurai*, and *Meykaṇḍa Śāstram* and its commentaries. The Śaiva Siddhānta School is one of the most ancient schools of Śaivaism. According to scholars, it has a history of more than 2000 years. Its roots can be traced back to both Kashmir and south India. It expanded its fame and established itself as a central sect of Śaivaism in the southern part of India.

Śaivaism and even Śaiva Siddhānta had a very strong presence and development in northern India, though now it appears to be more influential in southern Indian Tamil regions and Sri Lanka. According to scholars, the earliest Śaiva Siddhānta may be

[2] शैवं चतुर्विधं ज्ञेयं शैवं पाशुपतं तथा ।
सोमं लाकुलमित्येते चतुर्भेदाः प्रकीर्तिताः ।।
वामदक्षिणसिद्धान्तस्त्रिविधं शुद्धशैवकम् ।
मूलावतारतन्त्रादिशास्त्रं यद्वामशैवकम् ।।
स्वच्छन्दादीनि शास्त्राणि दक्षिणं शैवमुच्यते ।
कामिकादीनि तन्त्राणि सिद्धान्ता इति कीर्तिताः ।। – *Kāraṇāgama* 1.26-28

established somewhere in northern India[3] (may be in Varanasi). The genuine practice of Śaiva Siddhānta is uncertain. Some scholars say that it was initiated as a monastic doctrine adopted by Tirumūlar. Śaiva Siddhānta is a pure "Bhakti" tradition. The goal of this system is the ultimate liberation (*mokṣa*) from the cycle of rebirth, achieved through the worship of Lord Śiva. Śaiva Siddhānta believes Lord Śiva as its primary deity. Siddhānta means "the conclusion", which is reached after considering all other significant interpretations – "Śaiva Siddhānta means a system of Śaivaism, the doctrines of which are logically proved and are accepted as true".[4] The term Śaiva Siddhānta means "the final or established conclusions of Śaivaism". It is the formalized theology of the divine revelations contained in the twenty-eight Śaivāgamas. The term *siddhāntam* is made of a compound word, they are *siddha* and *antam*. *Siddha* means the establishment of truth and *antam* means the end. *Siddhāntam* means "an absolute intellectual finality". According to Gautama:

> सिद्धान्त नाम यः परीक्षकैः बहुविधं परीक्ष्य, हेतुभिः साधयित्वा स्थाप्यते निर्णयः स सिद्धान्तः।।[5]
>
> That which stands after many tests with reasons done by scholars and finally established is the Siddhānta.

Thus the *Kāmikāgama* explains the term Śaiva Siddhānta:

> कामिकादिशिवज्ञानं मूर्धा भगवतः सदा ।
> इतराणि महेशस्य हृत्कण्ठाद्यङ्गकानि वै ।।
>
> पूर्वपक्षतया तानि कथितानीह शम्भुना ।
> हेयोपादेयवर्तूनां निर्णये परमार्थतः ।।
>
> तत्सर्वमधरीकृत्य शैवसिद्धान्त ईरितः ।[6]

---

[3] Alexis Sanderson, 2006, *"The Lākulas: New Evidence of a System Intermediate between Pāñcārthika Pāśupatism and Āgamic Śaivism"*, Ramalinga Reddy, Memorial Lectures, *The Indian Philosophical Annual,* 24: 143-217.

[4] S.C. Nandimath, 2001, *Theology of the Śaivāgamas: A Survey of the Doctrines of Śaiva Siddhānta and Veeraśaivism*, Thiruvananthapuram: International School of Dravidian Linguistics, p. 80.

[5] *Nyāyasūtram* 1.26.

[6] *Kāmikāgama* 1.117-19.

The *Kāraṇāgama* also quotes Siddhānta as a kind of Śaivaism:

वामदक्षिणसिद्धान्तस्त्रिविधं शुद्धशैवकम् ।
मूलावतारतन्त्रादिशास्त्रं यद्वामशैवकम् ।।

स्वच्छन्दादीनि शास्त्राणि दक्षिणं शैवमुच्यते ।
कामिकादीनि तन्त्राणि सिद्धान्ता इति कीर्तिताः ।।[7]

Śrī Kaṇaṭhsūri also explains Siddhānta as:

आप्तोक्तिरत्र सिद्धान्तः शिव एवाप्तिमान्यतः ।[8]

The term Siddhānta is found in the *Tirumantiram* for the very first time.[9] Siddhāntam is the methodical way of life in Śaivaism. Śaiva Siddhānta is the philosophy of the Śaiva religion, which relates to the conventional conclusion of the ultimate truth.[10]

The history of Śaiva Siddhānta literature is divided into four phases.[11] They are:

*The first phase* (up to seventh century CE): The Vedas and the Śaivāgamas.

*The second phase* (seventh to tenth century CE): The Tamil devotional poets.

*The third phase* (eleventh to thirteenth Century CE): Systematic theologians in Sanskrit.

*The final phase* (thirteenth to eighteenth century CE): The systematic theologians in Tamil.

The first identified authority on Śaiva Siddhānta philosophy is Maharṣi Nandīnātha. He lived around 250 BCE in the present-day Kashmir. He was the author of the *Nandikeśvara Kāśikā*. It

7 *Kāraṇāgama* 1.26, 58.

8 *Ratnatraya*, *śloka* 10.

9 *Tirumantiram*, v. 1421.

10 "Our list of Indian schools also shows that Śaiva Siddhānta is not a single and a definite system of thought, but rather a tendency, within Śaivaism, which includes several distinct systems of thought; just as we might speak of a Vedāntic tendency which includes several systems differing on this point or on that." – H.W. Schomeru, 2000, *Śaiva Siddhānta*: *An Indian School of Mystical Thought*, tr. Mary Law, New Delhi: Motilal Banarsidass, p. 5.

11 Rohan A. Dunuwila, 1985, *Śaiva Siddhānta Theology*, New Delhi: Motilal Banarsidass, p. 47.

is a compilation of twenty-six Sanskrit verses. This text is well known as the foundation of the Śaiva Siddhānta school. After Nandīnātha, Tirumūlar is the main *ācārya* of this system. He was a Tamil Śaivaite mystic, writer and considered as one of the sixty-three Nāyanmār's and one of the eighteen *siddhā*s. His main work, the *Tirumantiram*, which contains more than 3000 verses, is one of the key texts of Tamil Śaiva Siddhānta Philosophy. The term *siddhāntam* was first used by Tirumūlar in this great work.[12] It is indicated here that the ultimate aim of Śaiva Siddhānta is to get rid of all impurities. For the first time Tirumūlar abridges the vast writings of the Āgamas and the Śuddha Siddhānta philosophy into the Tamil language. Tirumūlar, like Nandinātha, propounds a monistic theism in which Śiva is both the material and the efficient cause, immanent and transcendent. Śiva creates souls and world through production from himself, ultimately reabsorbing them in his oceanic being, as water flows into water, fire into fire, and air into air.

Other than literary source, one of the earliest datable evidences of the label is probably that in the sixth century CE Sanskrit inscription carved in the Kailāsanātha Temple of Kāñcīpuram. The tradition appears to be found in the inscriptions as early as sixth or seventh century CE with the Pallava king Rājasiṃha.[13] This inscription very significantly calls him as Śaiva Siddhāntin.[14] After the medieval times Śaiva Siddhānta flowered as a forceful Bhakti movement infused with insights on *siddhayoga*. After Tirumūlar, so many devotional saints such as Appār, Sundarār and Sambandhār carried out the work of making Śaiva Siddhānta as a popular religion in south India. Their works are called as the *Tevāram*. These saints moved from place to place and temple to temple, singing the glory

---

12 *"Having learned all that learned must be.*
*Having practised all yoga that has to be,*
*They, then, pursue the path of jñāna in graduation sure,*
*And so pass into the world of Formless Sound beyond;*
*And there, rid of all impurities,*
*Envision the Supreme, the Self-created;*
*They, forsooth, are the Śaiva Siddhānt is true."*

– *Tirumantiram,* v. 1421

13 S.C. Nandimath, 2001, *Theology of the Saivāgamas*, p. 80.

14 विदित बहुन्यायः .... शैवसिद्धान्तमार्गे श्रीमान् अत्यन्तकामः क्षतसकलमलो धूर्धरः पल्लवानाम्

– *South Indian Inscriptions*, vol. 1, no. 24

and the greatness of Lord Śiva and making Śaivaism a popular crusade. Māṇikkavācakar (also known as Māṇikyavācagar), who came after these great saints, also contributed significantly to the spreading of Śaiva Siddhānta. His work is the collection of devotional poems known as the *Tiruvācagam*. Appār, Sundarār, Sambandhār and Māṇikkavācakar are considered as the main four sages of this system. Their works were compiled into a single collection of verses named the *Tirumurai*, which is an authoritative source of Śaiva Siddhānta by Nambi Āṇḍār Nambi of the eleventh century CE.

Many *ācāryas* contributed significantly in spreading Śaiva Siddhānta in north India. Several north Indian inscriptions provide adequate evidences about the existence of this system.[15] Specially, two *siddhas*, Sadyojyoti and Bṛhaspati of central India (850 CE), are attributed with the systematization of this theology. Sadyojyoti, initiated by his *guru* from Kashmir, Ugrajyoti, propounded the Śaiva Siddhānta philosophical views as found in the *Rauravāgama*. He was succeeded by Rāmakaṇṭha I, Śrikaṇṭha Nārāyaṇakaṇṭha and Rāmakaṇṭha II. They wrote numerous treatises on Śaiva Siddhānta. Later, King Bhoja Paramāra of Gujarat (1018 CE) summarized the enormous body of the Siddhānta scriptural texts in one concise metaphysical treatise called the *Tattvaprakāśa*. Later the Siddhānta system was assimilated into the three monastic orders.[16]

Aghoraśiva of the twelfth century was another chief author of the Śaiva Siddhānta philosophy. He was the head of a monastery of the *Āmardaka* order in Cidambaram. Aghoraśiva is remembered for uniting Sanskrit and Tamil Siddhānta. He took up the task of uniting the Sanskrit Siddhānta tradition of the north with the southern Tamil Siddhānta. Strongly countering monist explanations of Śaiva Siddhānta, Aghoraśiva brought a change in the understanding of Śiva by reclassifying the first five principles

---

15 *Epigraphia Indica*, XXV: 175.

16 *Āmardaka*: It is founded by Rudraśambhu and identified with one of the Śaivaite sacred cities, Ujjain or Ujjayinī.
*Mattamayūra*: Purandara is the initiator and situated in the capital of the Cāḷukya dynasty in Karnataka.
*Madhumatteya*: Started by Pavanaśiva. Probably identical with the modern village Mahua of Terahi in central India.

(*tattvas*) – *nāda, bindu, sadāśiva, īśvara* and *śuddhavidyā* – into the category of *pāśa* (bond). He also initiated the Sanskrit rituals of the ancient Āgamic tradition into Śaiva Siddhānta. His colossal work the *Kriyākramadyotika* elucidates all aspects of the Śaiva Siddhānta ritual, including the daily worship of Śiva in temples, special rituals, initiation rites, funeral rites, festival rites, etc. Śaiva Siddhānta is a very rich philosophical system in temple traditions, religious festivals, sacred arts, spiritual culture, priestly clans, monastic orders, etc. All these cultural and religious traditions still flourish.

## Śivāgrayogīndrajñāna Śivācārya

Śrī Śivāgrayogīndrajñāna Śivācārya is the author of the present text *Śivajñānabodhabhāṣyam*. This is a on the colossal work Śaiva Siddhānta philosophy. Śrī Śivāgrayogin called himself as Ativarṇāśramī in his *Bhāṣyam*. In the colophon of his *Bhāṣyam*, he cites:

> श्री सूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक-
> श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये ...।।

As quoted in this colophon, he was the pontiff of a *maṭha* (monastery) situated in Sūryanār Kovil or Arkavanam[17] (temple of the God Sun). According to the Tamil traditions, Lord Śiva taught the Siddhānta to his main disciple deities – Skanda and Nandi.[18] As per the mythical beliefs, these two are the main ā*cārya*s of the Siddhānta school of Śaivism. They have established two *Guru-parampar*ā to spread the Siddhānta, known respectively as 1. the Skanda *paramparā,* and 2. the Nandī *paramparā*. Skanda taught Siddhānta philosophy to Vāmadeva. From Vāmadeva[19] this doctrine passed to Nīlakaṇṭha Śivācārya, who was shadowed by the inhabitant of a *maṭha* in the Maṇikarṇikā Ghāt in Varanasi, Śivamārga Prakāśa Deśika. He taught this ultimate knowledge to his disciple Śivāgrayogin (not the author of present text), who is also called as Śivakkoḷundu Śivācārya. He established a Śaiva *maṭha* in Arkavanam or Ādityapuram (Sūryanār Kovil in Tamil)

---

17 Near to Kumbhakoṇam (about 12 km).

18 *Siddhānta Sārāvalī*, Kriyāpāda, *Śloka* 6.

19 *Śaivaparibhāṣ*ā, ed. H.R. Rangaswamy Iyengar and R. Ramashastri, Mysore: Oriental Research Institute, 1950, p. 28.

near Tanjāvur in Tamil Nadu. His successor is the present text author Śivāgrayogīndrajñāna Śivācārya or Śivāgrayogin. The *guru-paramparā* of Sūrayanār Kovil Adhīnam or *maṭha* is:[20]

Lord Parama Śiva
↓
Skanda
↓
Vāmadeva
↓
Nīlakaṇṭha Śivācārya
↓
Viśvesvara Śivācārya
↓
Sadāśiva Śivācāryar
↓
Śivamārga Prakāśa Śivācārya (of Varanasi)
↓
Śivakkoḷundu Śivācārya (Śivāgrayogin)
↓
**Śivāgrayogīndrajñāna Śivācāraya**
**(Śivāgrayogin - Author of Present work)**
↓
Nandī Śivāgrayogin

*fig. 1*: *Guru-parampara* of Sūrayanār Kovil Adhīnam

The author Śivāgrayogin belongs to this Skanda *paramparā*. He was the second pontiff of Arkavanam (Sūryanār Kovil Adhīnam) *maṭha*. He was born in a brāhmaṇa family in Tuṇḍīradeśa or Toṇḍai Nāḍu. He became a very good scholar in Tamil and Sanskrit and also in Śaiva Siddhānta. He left his home in the quest of a *guru* to get ultimate enlightenment. He heard about the scholarliness of Śivakkoḷ**undu** Śivācārya, also known as Śivāgrayogīndra of Arkavanam. Later Śivāgrayogin became a disciple of him. The Śivakkoḷ**undu** Śivācārya was elated by his studiousness and he taught him the Śaivāgamas, Vedas and Śaiva Siddhānta. In later times, Śivakkoḷ**undu** Śivācāraya initiated him to the *nirvāṇa dikṣā* and initiated him as his successor.

The Śivāgrayogin became one of the prominent scholars of Śaiva Siddhānta of his time. The king of Tanjāvur supported him in preaching and spreading the Śaiva Siddhānta philosophy. There is

[20] Source: Śri Śivāgrayogigal Adhīnam Maṭha, Sooryanar Koyil, Tanjavur, Tamil Nadu.

an oral tradition about an interesting debate between Śivāgrayogin and Maṇavāla Mahāmuni (another name is Ramya Jāmātru), who was an eminent scholar of Vaiṣṇavaism. They both argued for seventeen days to establish their respected systems – Śaivism and Vaiṣṇavism. At last Śivāgrayogin won the argument and established the philosophy of Śaiva Siddhānta. After this incident the king of Tanjāvur built a *maṭha* in Thiruvīḷimalai near Kumbhakoṇam as per the guidance of Śivāgrayogin. Afterwards Śivāgrayogin lived there and preached Śaiva Siddhānta till his demise. By the reason of this place – Thiruvīḷimalai – he was also called as "Vīḷi Śivāgrayogin". After his death, his *samādhi* was built by the king in his honour.

Śivāgrayogin lived in the sixteenth century CE. In one of his very significant works the *Śaiva Saṁnyāsapaddhati*, Śivāgrayogin mentioned two rulers of his time: The Karnataka or Vijayanagara monarch Sadāśivarāya and the king of Tanjāvur, Cinna Seppayya Acyuta.[21] Those citations elucidate that Śivāgrayogin was the contemporary of them. The Karnataka king Sadāśivarāya ruled Vijayanagara from 1542 to 1570 CE. Cinna Seppayya Acyuta ruled Tanjāvur from 1549 to 1572 CE. The Vijayanagara kingdom was ruled by four families and Sadāśivarāya belonged to Tuḷuva *vaṁśa*. He was the last king of that family, who ruled Vijayanagara. Sadāśivarāya was the son of Raṅgarāya and brother of Acyutarāya. Tirumalāṁbā was the queen of Acyutarāya. She had a sister named Mūrtyaṁbā and Cinna Seppayya Acyuta was married to her. Tanjāvur was given to Cinna Seppayya Acyuta as a marriage present or dowry by the Vijayanagara kingdom. Cinna Seppayya Acyuta became the first Nāyaka family ruler of Tanjāvur. Hence it is certain that Śivāgrayogin lived in the latter half of the sixteenth

---

21 कर्णाटरमापतौ गजपतिप्राज्योपदानेकप-
स्फायद्दानमहापगालहरिकानाव्योपकण्ठस्थले ।
अश्वेशार्पितघोटनिष्ठुरखुरक्षुण्णारिराण्मण्डली-
कोटीरेन्द्रमणौ सदाशिवमहीराये मही रक्षति ।।

तस्याज्ञापरिपालके रिपुमहीपालाब्धिमन्थाचले
कन्याधेनुसहस्रभूरितिलराश्यन्नाग्रहारप्रदे ।
सह्योर्वीधरकन्यकासहचरीं भूदेवदेवाश्रयां
चोळक्ष्मां चिनचेप्पयाच्युतनृपे तञ्जापुरे शासति ।।

सदाशिवाचार्यदयानपायः शिवागमाम्भोकनधिकर्णधारा: ।
शिवाग्रयोगी जगदेकमान्यः सशैवसन्न्यासविधिं करोति ।।

century.

R. Ramashastri, the editor of Śivāgrayogin's *Śaiva Paribhāṣā*, points out another significant evidence in those verses, which are quoted in the *Śaiva Sannyāsapaddhati*. In the second *śloka* of the text, Śivāgrayogin quotes – रिपुमहीपालाब्धिमन्थाचले – this line indicates the year. As a rule in Sanskrit "अङ्कानां वामतो गतिः", after decoding, we will get "*ripu*-6, *mahīpāla*-8, *abdhi*-4 and *manthācala*-1". Therefore the time was 1486 Śaka *saṁvatsara* (1564 CE).[22] Several other scholars expressed same opinion about the time of Śivāgrayogin.[23]

## Works of Śivāgrayogin

Śivāgrayogin was not only a great scholar of Śaiva Siddhānta philosophy, but also a noble contributor to both Sanskrit and Tamil literatures. He has written totally five works in Sanskrit and six works in Tamil. The following are the Sanskrit works of Śivāgrayogin.

### ŚAIVA PARIBHĀṢĀ

This is an eminent work on Śaiva Siddhānta and another name of this text is the Ś*aivabhāṣa*. It explains the philosophy of Śaiva Siddhānta in a strong and simple way. The *Śaiva Paribhāṣā* has five *paricchedas* (chapters) and it is a commentary on the *Śivajñānabodha* of Meykaṇḍar. Śivāgrayogin interpreted the *sūtras* with the assistance of Śaivāgamas, particularly based on the *Pauṣkara* and the *Mṛgendra*. The text deals with the distinct philosophy of Śaivaism. It was first published by the University of Mysore.[24]

### ŚAIVA SANNYĀSAPADDHATI

From the ancient times, there was a huge dispute about the *Sannyāsapaddhati*, specifically in Śaivaism. The problem was, whether the people from *caturtha varṇa* (fourth *varṇa*) were authorized for *sannyāsa* or not? Here *caturtha varṇa* means the

---

22 *Śaivaparibhāṣā*, p. 11.

23 V.A. Devasenapathi, 1966, *Śaiva Siddhānta*, Madras: University of Madras, p. 9; S. Anavaratam Vinayaka Pillai, 1936, *Śivāgrayogin's Śivaneri Prakāśam*, Madras: University of Madras, p. 8.

24 Śaivaparibhāṣā. Ed. H.R. Rangaswamy Iyengar & R. Ramashastri, Oriental Reaserch Institute, University of Mysore, Mysore 1950.

followers of the Śaivāgamas, likewise the Smārtas. Śivāgrayogin wrote this text to prove that the fourth *varṇa* is also authorized for *sannyāsa*. Through his great scholarliness, he established this theory with the help of Āgamas. This text contains totally eight *paṭala*s and it gives a clear picture of the doctrines of all four *varṇa*s. It was published from Kuṁbhakoṇam.

### KRIYĀDĪPIKĀ

This text explains the rules and regulations for those who are initiated in Saiva *sannyāsa*. It is also called as the *Śivāgrapaddhati*. This text contains eight *paṭala*s. It explains *samaya* and *nirvāṇa dīkṣā* in detail, as well as it describes daily rituals for *sannyāsin*s. It was published from Chennai.

### ŚIVAJÑĀNABODHABHĀṢYAM: LAGHUṬĪKĀ AND BṚHADBHĀṢYAM

These are the present work.

The following are the Tamil works of Śivāgrayogin:

### ŚIVAJÑĀNASIDDHIYĀR (SVAPAKṢAM)

The *Śivajñānasiddhiyār* is a very famous work written by "Aruḷnandi Śivācāraya". This is a commentary of Śivāgrayogin on that text. This text has totally six commentaries by eminent scholars – Maraijñāna Deśikar, Śivāgrayogin, Jñāna Prakāśar, Śivajñānayogī, Nirambavaḷakiya Deśikar and Subramaṇya Deśikar. This commentary was written in the Maṇipravāḷa style. It was published from Chennai.[25]

### ŚIVAJÑĀNASIDDHIYĀR (PARAPAKṢAM)

This is the commentary of *parapakṣa* of the above text. Unfortunately, it is unavailable.

### ŚIVANERIPRAKĀŚAM

It was written by Śivāgrayogin as per the request of a lady disciple named Svānandā Nācchiyār (Śuvānta Nacchiyār). The text contains totally 215 beautiful Tamil verses. This text explains Siddhānta in illuminating ways. Śivāgrayogin's disciple and successor of his *maṭha*, Nandī Śivāgrayogin wrote a Maṇipravāḷa commentary on this text. *Śivaneriprakāśam* was published by the University of

---

25 Śivajñānabodhayantra Śālā, Madras, 1884.

Madras.[26]

SARVAJÑĀNOTTARAM

This is a Tamil commentary or translation of the *Sarvajñānottarāgama*. Unfortunately, it is not available.

DEVĪKĀLOTTARAM

This is also a Tamil commentary or translation of the *Devīkālottarāgama*. This text is also unavailable.

ŚRUTISŪKTIMĀLA VYĀKHYĀNAM

The *Śrutisūktimāla* was written by the well-known scholar Haradatta. Śivāgrayogin wrote a commentary on this text. Again, it is not available.

ŚIVAJÑĀNABODHABHĀṢYAM

Śaiva Siddhānta consists predominantly of:

1. The twenty-eight Śaivāgamas.
2. The collection of Śaivaite hymns known as the *Tirumurai* compiled by Nambi Āṇḍār Nambi (it contains the *Tirumantiram* of Tirumūlar; the *Tevāram* of Appār, Sundarār and Sambandhār, and the *Tiruvācakam* of Māṇikkavācakar).
3. The collection of the lives of Śaivaite saints, known as the *Periyapurāṇam*.
4. Meykaṇḍar's *Śivajñānabodham*.

The thirteenth century CE was an important landmark in the history of Śaiva Siddhānta. At that time, well-known Meykaṇḍar wrote the very prominent twelve-verse or *Śivajñānabodham*, also known as the *Meykaṇḍa Śāstram*. This text and subsequent works by other writers laid the foundation of the Meykaṇḍar Sampradāya (Tradition). Meykaṇḍadeva lived in the thirteenth century CE in Tiruveṇṇainallūr in Tamil Nadu. He was born in the tradition of Śaiva peasants. His father name was Acchyutakkaḷappāḷār. Aruḷnandī Śivācārya and various prominent scholars of the Siddhānta tradition were the disciples of Meykaṇḍar. His main work was the *Śivajñānabodham* and it is the most significant

26 *Śrī Śivāgrayogin's Śiva-Neri-Prakāśam,* ed. S. Anavarata Vinayakam Pillai, Madras: University of Madras, 1936.

work of the fourteen Śaiva Siddhānta literature.[27] Siddhāntins consider Meykaṇḍar's *Śivajñānabodham* as an essential work among the above texts. The *Śivajñānabodham* (Treatise on Śiva Wisdom) consisting of twelve *sūtras* describing the relationship between God, the soul and the world. The Meykaṇḍar Sampradāya admires it as their principal philosophical text and considers it as of pluralistic exposition. For others, it is monastic in character, the pluralistic explanations being introduced by later commentators.

Aruḷnandī Śivācārya, one of the chief disciples of Meykaṇḍar, and Umāpati Śivācārya further spread Śaiva Siddhānta. Aruḷnandī Śivācārya wrote a renowned work, called the *Śivajñāna-Siddhiyar*. The *Śiva-prakāśam* and the *Śataratna-Saṇgraha* were the prominent works of Umāpati Śivācārya. They promoted a pluralistic realism wherein God, the soul and the world are coexistent and without beginning. Lord Śiva is an efficient but not a material cause. They view the souls merging in Śiva as salt in water, an eternal oneness that is also twoness. This school's literature was so dominant that Śaiva Siddhānta is often erroneously identified as exclusively pluralistic. In truth, there are two interpretations, one monastic and another dualistic, of which the former is the original philosophical premise found in pre-Meykaṇḍar scriptures. The *Meykaṇḍa Śāstram* is the authoritative text of Śaiva Siddhānta. Views and concepts of Śaiva Siddhānta are described elaborately in the fourteen Meykaṇḍar texts.

The *Śivajñānabodham* contains twelve aphorisms taken from the Pāśavimocana *paṭala* of Jñānakāṇḍa of the *Rauravāgama*.

[27] 1. *Tiruvuntiār* by Uyyavanda Deva of Tiruviyalūr
2. *Tirukkaḷiṟṟupaḍiar* by Uyyavanda Deva of Tirukkaḍavūr
3. *Śiva-jñāna-bodham* by Meykaṇḍadeva
4. *Śiva-jñāna-siddhiār* by Aruḷnandi Śivācārya
5. *Irupāvirupatu* by Aruḷnandī Śivācārya
6. *Uṇmai-viḷakkam* by Manavācakam-kaḍanda Deva
7. *Śiva-prakāśam* by Umāpati Śivācārya
8. *Tiruvaruḷ-payan* by Umāpati Śivācārya
9. *Vinā-veṇba* by Umāpati Śivācārya
10. *Poṟṟiphroḍai* by Umāpati Śivācārya
11. *Koḍikkavi* by Umāpati Śivācārya
12. *Neñjuviḍutūtu* by Umāpati Śivācārya
13. *Uṇmai-neri-viḷakkam* by an unknown author
14. *Saṅkaṟpanirākaraṇam* by Umāpati Śivācārya

However the present published text of the *Rauravāgama* does not have these twelve *ślokas*. Though, some quotes authorize that those aphorisms belongs to this Āgama, renowned Sanskrit scholar Appayya Dīkṣita of the sixteenth century CE calls the *Śivajñānabodham* as Āgama in his *Śivārkamaṇidīpikā* commentary on the *Śrikaṇṭhabhāṣyam*.[28] The published text of *Rauravāgama* also quotes the *Śivajñānabodha Śāstram*:

भावना दीक्षया चैनं शुद्धं कृत्वा यथाविधि ।
शिवज्ञानबोधशास्त्रं दद्यात् पत्यादिचिन्तनम् ।।[29]

The following is the summary of the twelve aphorisms of Meykaṇḍar's treatise:

1. Evidences for the existence of God. Lord Śiva causes the world's dissolution and is its primal cause.
2. Evolution of the world and the relation of him with the world and the soul.
3. The existence of the soul and its evidences.
4. The soul as a distinct form and its relation to the sense organs.
5. The dependency of the soul on God and he helps the soul in attaining *mokṣa*.
6. The nature of matter and the real and the non-real. How they are different from God.
7. The real nature of the soul.
8. The soul obtaining real knowledge or *mokṣa*. Means to be used for attaining it.
9. The process of purification of the soul.
10. Eliminating threefold pollution, i.e. fetters of the soul.
11. The soul attaining enlightenment or union with Śiva.
12. Features of enlightened soul. Worship of the unseen and enigmatic Lord Śiva.

Several authoritative philosophers wrote commentaries on Meykaṇḍar's *Śivajñānabodham*. Śivāgrayogin's *paramaguru*

---

28 Appayya Dīkṣita, *Śivārkamaṇidīpikā* 2.1.16.
29 *The Rauravāgama*, French Institute of Pondicherry, vol. 3 (chapter 58).

Sadāśiva Śivācārya is the first commentator of the *Śivajñānabodham*. Śivāgrayogin, Nigamajñāna Deśika and Jñānaprakāśa Śivācārya are the other prominent interpreters of this text. Nigamajñāna Deśika belongs to the sixteenth century CE and he wrote the *Śivajñānabodhopanyāsa*. Nigamajñāna Deśika is one of the senior contemporaries of Śivāgrayogīn.[30]

The present work the *Śivajñānabodhabhāṣyam* is a *bhāṣyam* (commentary) written by Śivāgrayogin on the *Śivajñānabodham* of Meykaṇḍadeva. It is the most methodical, unequivocal and distinguished work on Śaiva Siddhānta. Śivāgrayogin wrote three elaborate commentaries on the *Śivajñānabodham*. They are:

*Laghuṭīkā*:[31] A simplified commentary of the *Śivajñānabodham.*

*Vistṛtabhāṣyam*:[32] Further explanation into the *Śivajñānabodham*.

*Bṛhadṭīkā*: The massive explanatory work on the *Śivajñānabodham*.

The Śaiva Siddhānta philosophy considers the three eternal beings – God, the soul and the bondage. These are called *pati, paśu* and *pāśa,* respectively. *Pati* means "Lord of the souls", who is none other than Lord Śiva. *Pāśa* means "bondage" and also materials of bondage. *Paśu* means that which is "under bondage or *jīva*". All worldly things known and perceived are included in these three categories. It also expounds spiritual matters involving the soul. What is God? Nature of God? Purpose of life? Reason of the creation? Who am I? Relationship between *jīva* and God? These are some of the major concerns addressed in this philosophy. The specialty of this system is that, it not only gives logical justifications, but also gives the faith and understanding about Lord Śiva.

Śivāgrayogin elaborately describes the fundamental philosophy of Śaiva Siddhānta in his *Śivajñānabodhabhāṣyam*. He discards all other theories of Indian philosophical schools with his great scholarliness. This is a massive and rich commentary on Meykaṇḍar's *Śivajñānabodham*, which contains twelve verses

---

30 *Śivajñānabodha Laghuṭīkā*, ed. T. Ganesan, Sri Aghorasivacarya Trust, Chennai, 2003, p. XX.

31 Critically edited and translated into English by T. Ganesan, published by Sri Aghorasivacarya Trust, Chennai in 2003.

32 Madras University Philosophical Series – 49, University of Madras, 1992.

of the *Rauravāgama*. The commentary has totally twelve chapters and every chapter is divided into two parts: *saṇgraha bhāṣyam* (brief commentary) and *vistṛta bhāṣyam* (extensive commentary). Śivāgrayogin was very conversant in Sanskrit philosophical literature. He quotes *śloka*s and other *pramāṇa*s from Vedas, Āgamas, Purāṇas and the various texts of Śaivism in the establishment of the Siddhānta. He quotes from near about fifty texts in his commentary. *Mṛgendrāgama, Pauṣkarāgama, Sūta Saṁhita, Ratnatraya, Jñānatilaka, Kūrma Purāṇa* and *Padma Purāṇa* are frequently mentioned by him. An overview of the contents of all the *sūtra*s of the *Śivajñānabodhabhāṣyam* is as follows.

**The First Sūtra**

In the first chapter of his *bhāṣyam*, Śivāgrayogin begins his commentary with the salutation to Lord Śiva and to his *guru-paramparā* – Viśveśvara Śivācārya, Sadāśiva Śivācārya and Śivāgrayogin. After greeting he begins his commentary with a series of questions (*praśnamālā*). This is one of the unique string of questions, containing almost all problems raised by Indian philosophical systems. Throughout the *bhāṣyam*, he clarifies those questions. We never get an instance of these type of series of questions on logical and philosophical glitches in any other Indian philosophical text. After the detail's of the creation of the universe, *jīva*, the necessity of the *jīva* and *Īśvara, mokṣa* (liberation), the cause of *mokṣa, guru*, causes of doubts and the *guru-paramparā* of Śaivaism are described. Subsequently the commentary of first aphorism begins. Here interpretation of Śiva or *Īśvara* and his creation, *taṭastha lakṣaṇa* are illuminated. Śivāgrayogin validates all the systems of Śaivaism and mainly authorizes the Āgamas as entities. The *āgama prāmāṇya, anumāna prāmāṇya, upādhi, anumānanirūpaṇa, upamāna* and *śābdanirūpaṇa* and Lord Śiva as the creator of the universe are also established in this chapter.

**The Second Sūtra**

This is the biggest chapter of the text. It deals with various issues of Siddhānta. Mainly the thirty-six *tattva*s (principles) are discussed here. The world endures evolution for the advantage of the souls. The whole procedure of creation is for the sake of the salvation of

the souls. The world is real and endless. The world of substance and souls forms the body of Lord Śiva. Śaiva Siddhānta scrutinizes the universe into thirty-six *tattva*s. These *tattva*s arise from *māyā,* the material cause of the world. From *śuddha māyā* the five pure principles arise. They are *Śiva-tattva, śakti-tattva, sadāśiva-tattva, īśvara-tattva* and *vidyā-tattva*. Lord Śiva functions through these five pure principles. In this chapter Śivāgrayogin discusses the relation between the *māyā* or *śakti* and Ś*iva*. The analysis of the *tattva*s is the main objective of this chapter.

**The Third Sūtra**

The third Sūtrabhāṣyam mainly contradicts the doctrines of Buddhism. Śūnyavāda Khaṇḍanam, Śūnyavāda and Vijñānavāda Nirāsa, Śarīrātma and Indriyātmavāda Nirāsa are the major topics of this chapter.

**The Fourth Sūtra**

This chapter is devoted to the description of the bondages or impurities. There are three impurities (*mala*s) or bondages; *āṇava-mala, kārma-mala* and *māyā-mala.* This chapter deals with the characteristics of *āṇava-mala* and the methods of eliminating that. It also describes *śaktisādhana* and *vibhutvasādhana* of *ātmā.*

**The Fifth Sūtra**

This chapter deals with *pāratantra* (dependency) of the souls. Souls are reliant on bodies, because they have bounded by *mala*s (impurities). It also defies *vikāritva* of Lord Śiva.

**The Sixth Sūtra**

In this chapter, the author states about three main interminable concepts of Śaivisam – *pati, paśu and pāśa* – and their features.

**The Seventh Sūtra**

This is the smallest chapter in this *bṛhadbhāṣyam* of Śivāgrayogin. It continues the discussion about the three concepts described in the sixth *sūtra*.

**The Eighth Sūtra**

This is one of the important chapters in this *bhāṣyam*. Enormous

subjects are discussed here. So many *siddhānta*s about *mokṣa* (liberation), *jñāna* or *karma* (knowledge or action), primarily the duties of a disciple, the verities of *upadeśa,* the characteristics and divisions of *dīkṣā*, the features of *naraka* (hell) and several worlds are described here. This *sūtra* also tells about *kalātattva*s such as *nivṛtti, śānti, pratiṣṭhā* and *vidyā*.

### The Ninth Sūtra

In this chapter the author primarily describes and rejects the Śābdaparokṣavāda. Here he gives the etymological meaning for the heart of a *Śiva pañcākṣarī mantra* – *śi* means Śiva, *vā* means energy of Śiva, *ya* means the individual soul, *na* means the impurities or *mala*s which cause bondage, *maḥ* means destruction of those *mala*s.

### The Tenth Sūtra

In this chapter, Śivāgrayogin denies the dogmas of *mukti* (liberation) of other Indian philosophical systems. He strongly objects concepts of various systems such as Cārvāka, Sāṁkhya, Mādhyamika, Yogācāra, Naiyāyika, Prābhākara, Ārhata, Bhāṭṭa and Pāñcarātra.

### The Eleventh Sūtra

In this chapter, the author describes the importance of worship. There are two types of worship a devotee can adopt for his/her salvation: *antaraṅga-pūjā* (inner worship) and *bahiraṅga-pūjā* (outer worship). Here both types of worship and their importance are described.

### The Twelfth Sūtra

This final chapter deals with the significance of the devotees of Lord Śiva. The procedures and importance to wear *rudrākṣa* and *bhasma* and the significance of the *mantra* are discussed here. Ultimately the text ends with the establishment of Śaiva Siddhānta as the supreme system to attain enlightenment and liberation.

### Details of Manuscripts

The *Bṛhadbhāṣya* of *Śivajñānabodhabhāṣyam* of Śivāgrayogin was published in Grantha script in 1920. Sri Krishna Shastri published

this text as per the instructions of Śrī Muttukumāra Deśikar, the pontiff of Śrī Sūryanār Koyil Ādhīnam or Śivāgrayogin Maṭha of Arkavanam and it was published from Śāradāvilāsa Mudrākṣara Śālā, Kumbhakoṇam in Tamil Nadu. This is the major source for editing the present work. Therefore, I have tried to edit this text with the help of two other commentaries of this text. 1. The *Laghuṭīkā* published in the Pandit Series, vol. XXIX from Benares Sanskrit College in 1907 and another edition, critically edited by T. Ganesan, published by Śrī Aghoraśivācārya Trust, Chennai in 2003. 2. The *Saṁgrahabhāṣyam* published by the University of Madras, under Madras University Philosophical Series – 49 in 1992. The editor of the *Grantha Script Book*, published from Kumbhakoṇam has given the *paṭāntara*s (recensions) in the Grantha text based on the presently unavailable manuscripts. I have also cited those recensions and the *ṭīkā* of Sri Krishna Shastri as it is and they were very helpful in the transcription and the critical editing of this text.

## Conclusion

Śivāgrayogin is one of the distinguished philosophers, born in Tamil Nadu. His texts about the Śaiva Siddhānata philosophy are of inordinate significance and his works give a clear interpretation of the Śaiva Siddhānta theory. The present work, the *Śivajñānabodhabhāṣyam,* is a mark of classical scholasticism in the Indian philosophical system. This text is considered as a canonical work on the Śaiva Siddhānta philosophy. Śivāgrayogin wrote three elaborate commentaries on the *Śivajñānabodham*. Among these commentaries the *Laghuṭīkā* and the *Saṁgrahabhāṣya* are already published. The *Bṛhadbhāṣya* till date remained unpublished. I hope, with the publication of this work, it will open the door for research possibilities in future.

**Dr. Sharath Chandra Swamy**

# उपोद्घातः

श्रीमच्चिदम्बरं नत्वा बालानां सुखबुद्धये।
व्याकरिष्ये शिवज्ञानबोधं गुरुनिदेशतः।।
विश्वेश्वरशिवाचार्यं सदाशिवगुरुं तथा।
शिवाग्रयोगिपादाब्जं[1] प्रणमामि दिने दिने।।
संक्षेपेणैव तत्रादौ व्याख्यायाथ सविस्तरम्।
व्याख्याति द्वादशश्लोकीं शिवाग्रः कृतिनां मुदे[2]।।

श्रीमतिविविधकुसुमसौरभलोभाकृष्ट[3]चञ्चरीकनिवहैरधः स्थितभास्करबिम्बतया छायारहितैरपि क्षोणीतलसंक्रान्तप्रतिबिम्बतया सच्छायैरिव लक्ष्यमाणैरनोकहनिवहैः परिगते, स्फायत्स्वप्रभाधवळितभास्वद्बिम्बतया अरविन्दबन्धावपि कटकोद्गत-दर्भाङ्कुरचर्वणाभिलाषोत्प्लुतहरिणहरिणाङ्कशङ्कामङ्कुरयति, अतिस्वच्छतया स्वनिवासिवृन्दारकवृन्दविलोक्यमानपाताळभुवनवृत्तान्ते, मेरुपृष्ठशिरश्शेखरायमाने, कैलासे, शुद्धमायास्वरूपवटवृक्षमूले, दिव्यसिंहासनाधिरूढं, वीरासनस्थं गङ्गाधरं चन्द्रचूडं पिशङ्गजटाकलापं त्रिनेत्रं रत्नखचितताटङ्कं नीलकण्ठं शुभ्रयज्ञोपवीतं त्रिशूलाग्निवरव्याख्यानमुद्रापाणिं भस्मोद्धूळितविग्रहं व्याघ्रचर्माम्बरधरं दिव्याभरणभूषितं हरिब्रह्मेन्द्रादिसेवितं सकलर्षिगणाभिवन्दितं विग्रहवद्भिर्वेदैः, शरीरिणीभिश्चतुष्षष्टिकलाभिः, मातृकाक्षरपङ्क्तिभिश्चस्तूयमानं[4] वेदान्तवेद्यं सच्चिदानन्दरूपं भगवन्तं श्रीकण्ठेश्वरं, गङ्गाधरो जटाखण्डेन्दुमण्डितः काळकण्ठः परशुमृगवेत्रक्षुरिकाधरो दिव्याम्बरपरिधानो दिव्याभरणभूषितः करुणानिधिरपरपरमेश्वरो भगवान् नन्दिकेश्वरः प्रदक्षिणत्रयपूर्वकं साष्टाङ्गं द्वादशवारं प्रणम्य,

देव देव जगन्नाथ सर्वज्ञकरुणानिधे।
निखिलागमसारार्थस्थित्युत्पत्तिलयेश्वर।।

ब्रह्मेन्द्रहरिवन्दितपादारविन्दभक्तवत्सलभक्तपराधीनपशुपाशविमोचक अद्वैतमुक्तिदायक अखिलजगद्गुरो स्वामिन् प्रसीद प्रसीदेति स्तुत्वा अनादिमलावृतचित्क्रियाशक्तीनां जननमरण-परम्पराकुलितचित्तानां अल्पायुषामतिविस्तृतापातप्रतीतपरस्परविरुद्धार्थानेकनिगमागमपुराणे-तिहासाद्यधिगमार्थालोचनासमर्थानां पशूनामनुग्राहायापृच्छत्।।

## प्रश्नमाला

भगवन् जगत् किमनादि। उत सादि। सादित्वेऽपि किं स्वाभाविकम्। अथवा सहेतुकम्।

---

[1] (टि) शिवाग्रयोगी पादाब्जमिति। अस्याचार्यस्याचार्योऽपि शिवाग्रयोगीति सुगृहीत नामधेयः।

[2] (पा) व्याख्यास्ये द्वादशश्लोकीं शिवाग्रोऽहं सतां मुदे।

[3] (पा) लोभाकुल

[4] (पा) स्फाय्यमानं

सहेतुकत्वेऽपि किं कालकर्मादिमात्रहेतुकम् आहोस्विच्चेतनहेतुकम्। चेतनहेतुकत्वेऽपि किं संसारिहेतुकम्। अथवा तत्तत्कल्पान्तमुक्तहेतुकम्। उत अनादिमुक्तहेतुकम्। अनादिमुक्तहेतुकत्वेऽपि किमनेकानादिमुक्तहेतुकम्। आहोस्वित्तादृशैकहेतुकम्। तादृशैकहेतुकत्वेऽपि तस्यानादिमुक्तस्य स्वरूपे[5] हिरण्यगर्भाद्यतिरेके च किं प्रमाणम्। किञ्च लक्षणम्। किञ्च नाम तस्य। हरस्य कर्तृत्वेऽपि किं जगन्निरुपादानम्। अथवा सोपादानम्। सोपादानत्वेऽपि किं शून्योपादानकम्।

अथवा परमाणूपादानकम्। आहोस्वित् प्रधानोपादानकम्। अथवा केवलमायोपादानकम्। उत केवलेश्वरोपादानकम्। आहोस्विन्मायाविशिष्टेश्वरोपादानकम्।

तथा जगत्सृष्टिः किं संघातरूपा। उत आरम्भरूपा। अथ विवर्तरूपा। उत परिणामरूपा। अथ कारणसमूहरूपा। उत वृत्तिरूपा। वृत्तिरूपत्वेऽपि, किं जगत्सृष्टिः कर्मनिरपेक्षेश्वराधीना। उत कर्मसापेक्षतदधीना। सापेक्षतदधीनत्वेऽपि ईश्वरः किं लीलया जगत्सृजति। अथवा स्वप्रयोजनमुद्दिश्य। उत परार्थमभिप्रेत्य।

परार्थत्वेऽपि, सृष्टिः किं करणनिरपेक्षत्वम्। उत तत्सापेक्षत्वम्। करणसापेक्षत्वेऽपि, किं देहव्यापारः करणम्। किं वेन्द्रियम्। उत अन्तःकरणम्। अथवा तद्धर्मेच्छासंरम्भबोधवृत्यादिकम्। आहोस्वित् कर्म। अथवा बिन्दुः। उत शक्तिः।

शक्तेः करणत्वेऽपि, सा किमनेका। उतैका। एकत्वेऽपि, सा किं शिवेन संयुक्ता। उत तस्मिन् समवेता। समवेतत्वेऽपि, किं जडरूपा। अथवा चौतन्यरूपा।

तथाऽपरो[6] जीवः किं शून्यः। उत देहः। अथवा प्राणवायुः। उतेन्द्रियाणि। आहोस्विदन्तःकरणवर्गः। अथवा आलयविज्ञानम्। आहोस्विदेभ्योऽन्यः। अन्यत्वेऽपि, किं जडः। उताजडः। अजडत्वेऽपि, किमकर्ता। उत कर्ता। कर्तृत्वेऽपि, किमणुः। अथ मध्यमपरिमाणः। अथवा विभुः। विभुत्वेऽपि, किमेकः। उतानेकः। अनेकत्वेऽपि, किं स्वतः किञ्चिज्ज्ञः। उत सर्वज्ञः।

सर्वज्ञत्वेऽपि, अवस्थापञ्चकोपपत्तिः किं ज्ञानाभावात्। उत मिथ्याज्ञानात्। अथवा तदवासनायाः। आहोस्वितनिर्वचनीयाविद्यावशात्। उताणवान्मलात्।

मलस्य हेतुत्वेऽपि, तत्किमद्रव्यरूपम्। अथवा द्रव्यरूपम्। द्रव्यरूपत्वेऽपि, मलात्मनोस्सम्बन्धः किं संयोगविलक्षणः। उत संयोगः। संयोगरूपत्वेऽपि, किं जन्यः। उताजन्यः। तथा मलः किं प्रतिपुरुषं भिन्नः। उताभिन्नः। अभिन्नत्वेऽपि, किमविचित्रशक्तियुक्तः। उत विचित्रशक्तियुक्तः। विचित्रशक्तियुक्तत्वेऽपि, किमनित्यः। उत नित्यः। तथा जीवः स्वतन्त्रः परतन्त्रो वा। पारतन्त्र्येऽपि, तन्निर्वाहक ईश्वरव्यापारः किं करणादिरूपः। उत सन्निधिमात्रम्। यदा सन्निधिमात्रं तदा सन्निधिः किं सामीप्यम्। उत शक्तिमात्रम्। अथवा कार्यौन्मुख्यविशिष्टा शक्तिः।

तथा तादृशश्शिवः किं प्रमाणवृत्यादिप्रकाश्यः। उत ज्ञानस्वरूपः। ज्ञानस्वरूपत्वेऽपि,

---

[5] (पा) मुक्तरूपे

[6] (पा) पररूपो

किं सर्वात्मनाऽदृश्यः। उत स्वरूपज्ञानप्रकाश्यः। स्वरूपज्ञानप्रकाश्यत्वेऽपि, स किं ज्ञानस्वरूपमात्रः। उत सुखरूपोऽपि।

यदा सुखरूपत्वं तदाऽपि कस्य स्वरूपज्ञानप्रकाश्यः। जीवस्वरूपज्ञानप्रकाश्यत्वेऽपि[7] तत्र किं प्रमाणम्। किमागम एव उत परिशेषोऽपि।

तथा पशुपाशयोः किं लक्षणम्। तथा मुक्तौ किं साधनं नास्ति। उत अस्ति। यदाऽप्यस्ति तदा तत्साधनं किं कर्ममात्रम्। उत ज्ञानमात्रम्। अथवा विकल्पेनोभयम्। आहोस्वित् समुच्चितम्। समुच्चयेऽपि किं साम्येन समुच्चयः। अथवाऽङ्गाङ्गिभावेन। यदा अङ्गाङ्गिभावेन तदाऽपि किं ज्ञानमङ्गम्। उत कर्म। कर्मणोऽङ्गत्वेऽपि किं तदारादुपकारकम्। उत सन्निपत्योपकारकम्।

तथा मुक्तिहेतुर्ज्ञानं किं पशुशिवयोर्भेदविषयम्। उत अभेदविषयम्। अभेदविषयत्वेऽपि तद्धेतुभूतागमाध्ययने किं त्रैवर्णिकानामेवाधिकारः। उत चतुर्णामपि वर्णानाम्[8]। यदा चतुर्वर्णानां तदा अपि किं स्त्रीशूद्रद्विजबन्धुत्वेन विशेषितानाम्। उत तेनाविशेषितानाम्। तदविशेषितानामधिकारेऽपि वैदिकवत् किं समयविशेषदीक्षासंस्कृतत्वमधिकारिविशेषण-कोटावनिविष्टम्। उत तत्र निविष्टम्। निवेशेऽपि अधिकारकोटिनिविष्टदीक्षायामपि किमविशेषितानामधिकारः। उत शक्तिनिपातादिविशेषितानाम्।

तथा आगमार्थविचाररूपे श्रवणे किं समयविशेषसंस्कृतत्वमात्रमधिकारः। उत निर्वाण-दीक्षासंस्कृतत्वमपि। तथा दीक्षायाः किं लक्षणम्। कियन्तो वा भेदाः। कुत्र वोपयोगः।

तथा कलातत्त्वभुवनवर्णपदमन्त्राणां कत्यवान्तरभेदाः। कीदृशी वा शुद्धिः। कथं वा शुद्धौ सत्यामपि तत्तत्भुवनजदेहाद्यनुत्पत्तिः। अध्वनां वा किं लक्षणम्। अध्वनां शुद्धमिश्राशुद्धव्यपदेशाः किन्निबन्धनाः।

तथा मुक्तिप्रदाता गुरुः किं विशिष्टो जीवः। उत शिवः। तथा साधनीभूतं ज्ञानं किं साक्षात्काररूपमेव। उत गुरूपदेशजन्यं शाब्दज्ञानमपि। शाब्दज्ञानस्यापि तत्त्वेऽपि किं तदुत्पत्त्यनन्तरक्षण एव परममुक्तिः। उत जीवन्मुक्तिव्यवधानेन। व्यवधानेऽपि किं जीवन्मुक्तस्य कर्तव्यमेव नास्ति। उतास्ति। तथा जीवन्मुक्तस्य देहावस्थानं किन्निबन्ध-नम्। वासनानिबन्धनत्वे तस्याः कुतो निवृत्तिः। तथा भोगेन प्रारब्धकर्मक्षये आगामिनां कर्मणां कथमनुत्पत्तिः।

तथा मुक्तिः किं देहविनाशः। उत प्रकृतिविवेकदर्शनेन पुरुषस्य स्वरूपमात्रे-णावस्थानरूपं कैवल्यम्। अथवा ज्ञानसन्ततिविच्छेदः। उतात्यन्तिको दुःखोच्छेदः। आहोस्वित्तथाविधो दुःखानूत्पादः। किं वा सन्ततोर्ध्वगमनम्[9]। अथवा नित्यसुखाभिव्यक्तिः। उतानिर्वचनीयाविद्यानिवृत्तिः। किं वा सत्वभुक्तिः। अथवा गाणाधिपत्यादिपदप्राप्तिः। उत परमात्मनि विलयः। किं वा परमशिवादाधिक्यम्। अथवा शिवसायुज्यम्। सायुज्यमपि किं

---

[7] (पा) जीवज्ञानस्वरूपप्रकाश्यत्वेऽपि

[8] (पा) चतुर्वर्णानां चतुर्वर्णानामपि

[9] (पा) सततोर्ध्वगमनम्

शिवगुणसंक्रान्तिसमुत्पत्तिसमावेशस्वीयसार्वज्ञाद्यभिव्यक्तीनां अन्यतमहेतुकं शिवसाम्यम्। अथवा परशिवात्मनाऽभिव्यक्तिः। इति प्रश्नमाला।।

## अथ संशयबीजम्

तथा मुक्त्युपाये साक्षात्कारे किमन्तरङ्गसाधनम्। किं वा बहिरङ्गसाधनम्। मम ह्यत्र त्वद्वाक्यैरेव सन्देहो जनितः। क्वचित्ब्रह्मण एवोपादानत्वस्य प्रतिपादनात्, क्वचिन्मायायास्तत्प्रतिपादनात्, क्वचित् शिवसाम्यस्य मोक्षत्वेन कथनात्, क्वचिदैक्यस्य तथात्वेन कथनात्, क्वचिद्दीक्षाया एव मोक्षहेतुत्वस्य बोधनात्, परत्र ज्ञानस्यैव तथात्वबोधनात्, क्वचित् शुद्धाध्वनि तत्त्वत्रयस्य, परत्र तत्त्वचतुष्टयस्य, अन्यत्र तत्पञ्चकस्याभिधानात्, अशुद्धाध्वनि च क्वचित्पुरुषतत्त्वसाहित्येनापरत्र तद्विनाकृतत्वेन तत्त्वानां गणनात्, तत्रैव क्वचित् अन्तःकरणानाञ्चतुष्टयस्य परत्र त्रित्वस्य कथनात्, क्वचित् भुवनस्य चतुर्विंशत्यधिकद्विशतसंख्यतया अपरत्र षट्त्रिंशदधिकद्विशतसंख्यतया प्रतिपादनात्, क्वचित् पदार्थत्रयस्य परत्र पदार्थषट्कस्याभिधानात्, तथा पाशानां क्वचित्त्रिविधत्वस्य क्वचिच्चातुर्विध्यस्यान्यत्र पञ्चविधत्वस्य प्रतिपादनात्, क्वचिदध्वद्वयस्यान्यत्र तत् त्रिकस्य परत्रैतद्विगुणस्य प्रतिपादनात्।

अतोऽस्य सन्देहस्य तत्तदधिकारानुसारोक्तपक्षान्तरपरित्यागेन[10] मुमुक्षुज्ञेयस्य पारमार्थिकरूपस्याभिधानेन[11] निवृत्तिः कर्तव्येति[12]।।

## शास्त्रावतरणिका

एवं विरुद्धार्थकवचनश्रवणजनितव्यामोहप्रवादागतवादिविप्रतिपत्तिभ्यामुक्तार्थेषु पतिपशुपाशस्वरूपलक्षणप्रमाणमुक्तितत्साधनेषु सन्दिहता[13] भगवता नन्दीश्वरेण प्रियतमेन भक्तेन मुख्याधिकारिणा शैवार्थनिर्णयं पृष्टः श्रीकण्ठनाथः कृपार्द्रहृदयः "साधु सम्यक् त्वया पृष्टं नहि त्वदृतऽन्यस्यैवं प्रष्टुमपि सामर्थ्यमस्ति, अतस्त्वत्सन्देहं[14] पारमार्थिकरूपप्रतिपादकेन[15] लघुनैव सन्दर्भेणापाकरिष्यामीति" प्रश्नानुमोदनपूर्वकं सन्देहनिराकरणं प्रतिज्ञाय तस्मै सकलनिगमागमस्मृतीतिहासपुराणन्यायानुगृहीतमुक्तसन्देहप्रश्नमालायामुक्तं परिशिष्टं पक्षं संग्रहवाक्यात्तामसाधिकारानुसारेण[16] उक्तपक्षान्तरपरित्यागेन वाद्यन्तरप्रतिपन्ननिगमाद्यननुगृहीतपक्षान्तरनिरासपूर्वकं शैवार्थनिर्णयत्वेन प्रतिपादयत् द्वादशसूत्रात्मकं शाक्तं शरीरं परिगृह्य कामिकाद्यष्टाविंशतिभेदभिन्नानागमान् निर्मितवतः[17] परमशिवादनुग्रहपूर्वकमधिगत्यानन्तेशेन स्वस्मै बोधितं रौरवतन्त्रान्तर्गतं

---

[10] (पा) परिसुतेन

[11] (पा) अभिधानात्

[12] (पा) तेन निवृत्तिः

[13] (पा) सन्दिहानाननुग्रहीतुं

[14] (पा) तत्सन्देहं

[15] (पा) प्रतिपादनेन

[16] (पा) तामसदेवमनुष्याधिकारानुसारेण

[17] (पा) विंशतिभेदमागमं निर्मितवतः

शिवज्ञानबोधाख्यं शास्त्रमुपदिशति।।

## गुरुक्रमः

स्त्रीपुन्नपुंसकादित्वादिति। अयञ्च गुरुक्रमो महौघसंज्ञितः। तथाहि – शास्त्रावतारो द्विविधः हौघः प्रातिसंहितश्चेति। तत्र महौघक्रमस्तावत् प्रत्येकमष्टाविंशतिसंहिता अधीतवद्भिर्विद्येशैः श्रीकण्ठादिक्रमेणावतारः[18]। यथा

**मालिनीविजये –**

सिसृक्षुर्जगतस्सृष्टेरादावेव निजेच्छया।
विज्ञानकेवलानष्टौ बोधयामास पुद्गलान्।। इति।

तथा **श्रीमन्मतङ्गे** च –

अनुष्टुप्छन्दसा पूर्वं निबद्धं कोटिसंख्यया।
सदाशिवेन देवेन ततोऽनन्तेन धीमता।।
भाषितं लक्षमात्रेण तदेवाहं तवाधुना।
वक्ष्ये संगृह्य संक्षेपान्मातङ्गं पारमेश्वरम्।।
सहस्राणां त्रयेणाथ पञ्चभिश्च शतैः परम्। इति।

श्रीमत्किरणादौ तु प्रातिसंहितो गुरुक्रमः कथितः। तथाहि – सदाशिवेन सृष्ट्यादौ स्वात्मना सृष्टिभ्यः प्रणवादिभ्यो दशभ्यः शिवेभ्यो यथासंख्यं तावत्संख्याकं शैवं कामिकादिकं तन्त्रमुदितम्। त्रैस्त्रिकलादिभ्यः[19] तथा सदाशिवतत्त्वाधोवर्तिभ्यो अनादिरुद्रादिभ्योऽष्टादशसंख्याकेभ्यो[20] यथासंख्यं तावत्संख्याकं रौद्रं विजयादिकं तन्त्रं कथितम्। तैरपि परमेश्वरादिभ्य इति। तदुक्तम् –

सृष्ट्यनन्तरमेवेशश्शिवान् सृष्ट्वा दशात्मजान्।
ज्ञानमेकं विभज्याशु तेषां तत्संख्ययाऽवदत्।।
कामिकं प्रणवाख्यस्य सुधाख्यस्य च योगजम्। इत्यादि।
रुद्रस्यानादिसंज्ञस्य विजयं तेन भाषितम्। इत्यादि च।

एतच्च शैवसन्यासपद्धतौ स्फुटतरमावेदितमस्माभिस्तत एवानुसन्धेयम्। उक्तस्य सर्वस्याप्यर्थस्य सूचकमुपसंहारगतं शैवार्थनिर्णयमिति विशेषणम्।।

## अनुबन्धचतुष्टयनिरूपणम्

अनेन च विशेषणेनास्य शिवज्ञानबोधस्य शैवार्थतत्त्वं विषय इत्युक्तं भवति।

---

[18] (पा) महौघक्रमस्तावत् श्रीमत्सदाशिवमुखादष्टाविंशतिसंहिता अधीतवतोनन्तेश्वरादधीत श्रीकण्ठादिक्रमेणावतारः।
(टि) सर्वासामपि विद्यानामेकैकस्मा अपि शिष्यायोपदेशक्रमेणावतारो महौघक्रमः। प्रातिस्वीकरूपेण तत्तद्विद्यायास्तत्तच्छिष्यायोपदेशक्रमेणावतारः प्रातिसंहितः।

[19] (पा) तैरपि हरादिभ्यः

[20] (पा) सङ्ख्येभ्यः

अर्थाच्च तत् ज्ञानकामोऽधिकारी। तन्निश्चयोऽव्यवहितं फलम्। यथायथञ्च प्रतिपाद्य प्रतिपादकभावकार्यकारणभावादयस्सन्बन्धा इत्यावेदितम्। व्यवहितप्रयोजनन्तु मोक्षरूपं दशमे वक्ष्यते। तत्रादिमसूत्रद्वयेन शिवस्वरूप[21]तत्तटस्थलक्षणप्रमाणतदुपयोगियुक्तिप्रतिपादनपूर्वकम् अणुस्वरूपप्रश्नपूर्वभाविनां प्रश्नानामुत्तरमुपवर्ण्यते। तत्र प्रथमम् अनुमानेन पतिपदार्थं शिवं साधयति।।

---

[21] (पा) स्वस्वरूप।

# प्रथमसूत्रभाष्यम्

## प्रथमसूत्रम्

**स्त्रीपुन्नपुंसकादित्वाज्जगतः कार्यदर्शनात्।**
**अस्ति कर्ता स हृत्वैतत्सृजत्यस्मात् प्रभुर्हरः॥**

स्त्री च पुमान्नपुंसकाञ्चादिप्रकारिसमानधर्म यस्य तत्स्त्रीपुन्नपुंसकादि। लोके समान-धर्मस्वेवादिमध्यान्तादिव्यपदेशादादिशब्देन समानधर्मत्वं लक्षितम्। समानश्चात्र धर्मः सन्निवेशविशेषवत्वम्। तनुकरणभुवनभोग्यात्मके जगति तन्वाः कर्तृभोक्तृकोटिनिविष्टत्वेन प्राधान्यात्तदात्मकस्य स्त्रीपुन्नपुंसकस्य ग्रहणम्। तत्रापि संस्थानभेदप्रदर्शनार्थं त्रितयोपादानमिति द्रष्टव्यम्। अथवा चैत्रादीन् भोजयेदित्यत्र तद्गुणसंविज्ञानबहुव्रीहिणा चैत्रतदितरसाधारणं निमन्त्रितत्वादिकमिव सर्वादीनीत्यत्र गणपरिपठिततत्वमिव च स्त्रीपुन्नपुंसकतदितरसाधा-रणसावयवत्वमुपस्थाप्यते। तेन सावयवत्वादित्यर्थः। अथवा स्त्रीपुन्नपुंसकादिभावेन नानाविधत्वादित्यर्थः। जडगतस्य नानाविधत्वस्य कार्यत्वेन व्याप्तत्वाज्जगच्छब्देन गच्छति नश्यतीति व्युत्पत्त्या शिवाद्यवनिपर्यन्तं कार्यजातमुच्यते। अथवा अस्मदादिप्रसिद्धकर्तृकभिन्नं कार्यं योग्यताबलादुपस्थाप्यते[1]। यथा घटपदेन छिद्रेतरो[2] घटो जलाहरणप्रस्थावे। यद्वा – देहाङ्कुरादिविशेष एव तेनोपस्थाप्यते। कार्यदर्शनात् कार्यत्वदर्शनादित्यर्थः दर्शनपदं हेतोः प्रामाणिकत्वद्योतनाय कर्ता च अत्र साधनाङ्गफलाद्यभिज्ञत्वे सति उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमान् तादृशज्ञानादिमात्रयुक्तो वा। अस्ति इति चैकत्वं विवक्षितम्। उपादेयगतत्वात्। स इत्यनेन च निगमागमस्मृतीतिहासपुराणादिषु प्रसिद्धिः परामृश्यते, यस्तु निगमागमादिभिस्सिद्ध इत्यर्थः॥

### ईश्वरानुमानम्

जगत्कार्यं, जडत्वे सति नानाविधत्वात्, संस्थानविशेषवत्वाद्वा, घटादिवत्। तदुक्तं **श्रीमत्पौष्करे** –

कार्यता चास्य विश्वस्य सभागत्वात्घटादिवत्। इति।

ततस्सर्वं कार्यं विवादाध्यासितं वा देहाङ्कुरादिकं वा साधनाङ्गफलज्ञानसाधन-चिकीर्षाकृतिमज्जन्यम् उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यं वा, कार्यत्वात्कुम्भादिवदिति कर्त्रनुमानम्। तदुक्तं **श्रीमत्पौष्करे** –

विवादाध्यासितं विश्वं विश्ववित्कर्तृपूर्वकम्।
कार्यत्वादावयोस्सिद्धं कार्यं कुम्भादिकं यथा॥ इति।

**श्रीमन्मृगेन्द्रे** च –

---

[1] (पा) उत्थाप्यते । दवस्थाप्यते।

[2] (टि) छिद्रेतरः अच्छिद्र इत्यर्थः।

अथोपलभ्य देहादिवस्तुकार्यत्वधर्मकम्।
कर्तारमस्य जानीमो विशिष्टमनुमानतः।। इति।

**मतङ्गे** तु –

"विश्वं हि क्रियाशक्त्यधिष्ठितकारणजन्यम्।

कार्यत्वात् घटव"दिति। क्रियाशक्तिरूपे धर्मोऽनुमिते तेन धर्म्यनुमीयते। जगत्कारण-धिष्ठात्री क्रियाशक्तिश्चेतनाश्रिता, क्रियाशक्तित्वात्, दण्डादिगोचरक्रियाशक्तिवदिति। तदुक्तम् – "धर्मेण साध्यते धर्मी" इति। कार्यपक्षककारणगोचरापरोक्षज्ञानचिकीर्षा-कृतिमज्जन्यत्वानुमानप्रदर्शनेनैव अर्थादुपादानपक्षकम् अनुमानं प्रदर्शितम्। तथाहि – जगदुपादानं मायादिरीश्वरस्यापरोक्षज्ञानचिकीर्षाकृतिविषयस्सन्कार्याय प्रवर्तते, अचेतनत्वे सति कार्यार्थं प्रवृत्तत्वान्मृत्पिण्डादिवदिति। तदुक्तं **श्रीमत्पौष्करे** –

अचेतनं जगद्विप्राश्चेतनप्रेरणं विना।
प्रवृत्तौ वा निवृत्तौ वा न स्वतन्त्रं रथादिवत्।।
योऽत्र प्रवर्तकश्शक्तस्सपतिः परिपठ्यत। इति।

अन्यत्राप्युक्तम् –

अचेतनस्य मायादेः प्रवर्तकतया पतिः।
सिद्धस्सर्वार्थवित्कर्ता व्यापकस्स तथोदितः।। इति।

**श्रीमत्पराख्ये** च –

कर्मचिद्रहितं तस्माद्योजकं[3] तदपेक्षते।
योजकस्समहेशानः स्वेच्छया बलवान्यतः।। इति।

न च वत्सविवृध्यर्थं प्रवृत्ते क्षीरे व्यभिचारः तस्यापि चेतनेन गवाऽधिष्ठितत्वात्। नाप्ययस्कान्तेन व्यभिचारः। तत्रापि योक्त्रधिष्ठितत्वसद्भावात्। उभयोरपि पक्षकोटिनिवेशसम्भवाच्च। तदुक्तं **श्रीमत्पौष्करे** –

नानैकान्तिकता हेतोः क्षीरे वत्सविवृद्धिदे।
चेतनेन गवा यस्मात् प्रवृत्तं वत्सवृद्धिदम्।।
मृताद्देहात् प्रवर्तेत प्रवृत्तञ्चेतस्वतः पयः।
न च प्रवर्तते तस्माच्चेतनापेक्षिता स्थिता।।
नाप्ययस्कान्तदृष्टान्तस्साधकोऽचित्प्रवर्तने।
अयस्कान्तोऽपि योक्तारमपेक्षैव प्रवर्तकः।।
किञ्च पक्षीकृतस्सोऽपि जडस्सन् यः प्रवर्तते।
स्वप्रवृत्तौ परापेक्षमचेतनमतस्स्थितम्।। इति।

न च मुक्ताधिष्ठेयत्वेनार्थान्तरता, एकस्यानादिमुक्तस्याधिष्ठतृत्वाङ्गीकार इष्टापत्तेः। भिन्नानामिदानीं मुक्तानामधिष्ठातृत्वे च गौरवात्, तेषां स्वतो मुक्त्यसम्भवेन

---

[3] (पा) तस्मादायोजकम्

मुक्तिदायकत्वेनेश्वरसिद्ध्यापत्तेश्च। तदुक्तं **श्रीमत्पौष्करे** –

विमुक्तास्तु हि कर्तारो भवेयुरिति चेन्मतिः।
किमादिमुक्तस्स्यात् कर्ताऽनादिमुक्तोऽथवा द्विजाः।।
अनादिमुक्तश्चेत्कर्ता सिद्धसाधनता तदा।
आद्यश्चेन्मुक्तिदस्तस्य कर्ता प्रागेव सिध्यति।।
अन्यथाऽयं कथं मुक्तो बद्ध एव सदा भवेत्।
न मोक्षं यान्ति पुरुषास्स्वसामर्थ्यात् कदाचन।।
मुक्त्वा प्रसादं देवस्य शिवस्याशिवहारिणः। इति।

अन्यत्राप्युक्तम् –

तेन स्वभावसिद्धेन भवितव्यं जगत्कृता।
अर्वाक्सिद्धेऽनवस्था स्यान्मोक्षो निर्हेतुकोऽपि वा।। इति।

## अशरीरस्यापीश्वरस्य अधिष्ठातृत्वम्

ननु कथं विदेहस्याधिष्ठातृत्वम्। न च अधिष्ठातृत्वसिध्यर्थमेव तस्य देहोऽपि कल्पनीय इति वाच्यम्। तस्य देहस्य अकार्यत्वाभ्युपगमे सावयवत्वस्य हेतोस्तत्रैव व्यभिचारापत्तेः। कार्यत्वेत्वनवस्था स्यात्। तस्मात्प्रथमसृष्टौ विदेहकर्तृकत्वमेवाङ्गीकरणीयम्। तदुक्तं **श्रीमत्पौष्करे** –

स देहस्यापि कर्तृत्वं सर्वत्रापि यदीष्यते।
तद्देहस्यापि कार्यत्वाद्व्याप्तं कर्त्रन्तरेण तत्।।
तस्य देहादयोऽप्येव नित्यवस्था न कुत्रचित्।
तत प्रथमसृष्टेस्तु प्रवृत्ताशेषशक्तिकः।।
कर्ता महेश एवेष्टस्समस्तोपाधिवर्जितः। इति।

मैवम्, विदेहत्वादधिष्ठातृत्वाभावोऽनुमीयते, अधिष्ठातृत्वेन देहसद्भावो वा। न द्वितीयः, तस्य त्वयैव निषिद्धत्वात्। प्रथमस्तु धर्मीग्राहकमानबाधितः। तथाऽपि देहं विना कथमधिष्ठानमिति सुहृद्भावेन प्रश्ने किमुत्तरमिति चेत्, अधिष्ठेय देहव्यतिरिक्तदेहहीनस्यापि स्वदेहाधिष्ठानवदिति ब्रूमः। तदुक्तं –

**श्रीमत्पौष्करे** –

अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथा। इति।।

## मन्त्रात्मकदेहनिरूपणम्

पञ्चमन्त्रात्मकदेहसद्भावाच्च। तदुक्तं **श्रीमन्मृगेन्द्रे** –

मलाद्यसम्भवात् शाक्तं वपुर्नैतादृशं विभोः।
तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः।।
ईशतत्पुरुषाघोरवामाजैर्मस्तकादिकम्। इति।।

## अनुमानान्तरम्

अथवा कार्यत्वं नोत्पत्तिमत्वं, किन्तु केनचित्पुंसा कर्तुं शक्यत्वम्। तथा च सावयवत्वहेतुककार्यत्वानुमितिरेव कर्तृगोचराऽपि। तदुक्तं **श्रीमत्पराख्ये** –

मूर्तास्सावयवा येऽर्थाः नानारूपपरिच्छदाः।
स्थूलावयवशिष्टत्वात् बुद्धिमद्धेतुपूर्वकाः।।
अतोऽस्ति बुद्धिमान्कश्चित् ईश्वरस्समवस्थितः। इति।

तस्य चैकत्वसिद्धिर्लाघवतर्कानुग्रहेण तथा चैकस्य सर्वजगत्कर्तृत्वेन **सर्वज्ञत्वमपि** सिध्यति। तदुक्तं **श्रीमन्मृगेन्द्रे** –

सर्वज्ञस्सर्वकर्तृत्वात् साधनाङ्गफलैस्सह।
यो यज्जानाति कुरुते स तदेवेति सुस्थितम्।। इति।

सर्वकर्तृत्वादेव स्थितिसंहारतिरोभावानुग्रहेष्वपि कर्तृत्वम्। एतावता च जगतोऽनादित्वं, सादित्वेऽपि स्वाभाविकत्वं, हेतुसापेक्षत्वेऽपि ईश्वरानपेक्षत्वं,[4] तत्सापेक्षत्वेऽपि कालेश्वरकर्मेश्वरसापेक्षत्वञ्च, चेतनसापेक्षत्वे चानेकेश्वरप्रवाहेश्वरसापेक्षत्वं, एकसापेक्षत्वे च सृष्ट्यादेस्स्वातन्त्र्येण हिरण्यगर्भाद्यपेक्षत्वमित्येते पक्षाः निराकृताः। अर्थादीश्वर एव पञ्चविधकृत्यकर्ता भवति।।

## तटस्थलक्षणम्

पञ्चविधकृत्यकारित्वमेव शिवस्य तटस्थलक्षणमित्यर्थादुक्तं भवति। तस्य च लक्षणस्य कालकर्मजीवहिरण्यगर्भविष्ण्वादिष्वतिव्याप्तिभ्रमोऽप्यर्थात्पराकृतो भवति। न च अनन्तेशादिष्वतिव्याप्तिः। असङ्कुचितकर्तृत्वस्य तेष्वभावात्, तेषां प्रयोज्यकर्तृत्वेन स्वतन्त्रकर्तृत्वाभावाच्च। तेषामीश्वरत्ववचनस्य तदभिव्यक्तशिवपरत्वात्, तेषां लक्ष्यकोटित्वेनातिव्याप्तिः[5]। ननु लाघवोपनयेन तस्य कर्तुरेकत्वं न सिध्यति। अनुमितावुपनीतभाननिषेधात्, अनेकतक्षकप्रासादादौ विपरीतदर्शनेन तादृश क्षित्यादौ हिरण्यगर्भादिबहुकर्तृकत्वस्यैवौचित्याच्च। अत एव न कर्त्रेकत्वान्तर्भावेन व्याप्तिरपि इत्याशङ्क्योक्तं स इति। नहीदमनुमानं स्वतन्त्रमित्युच्यते। किन्तु एकत्वाद्यावेदकनिगमागमादीनाम् अनुग्राहकमात्रमित्यतो नोक्तदोषः। अनेन निगमादय एव प्रमाणमित्यप्यर्थादुक्तं भवति।।

## अनुमानप्रामाण्यम्

नन्वनुमानं नाम प्रमाणमेव नास्ति। तद्धेतुत्वाभिमतस्य व्याप्तिग्रहस्यासम्भवात्। कतिपयस्थले सामानाधिकरण्यग्रहेऽपि स्थलान्तरे व्यभिचारशंकया अनिवृत्तेः। तर्कात्तन्निवृत्तौ तर्कस्यापि व्याप्तिमूलकत्वेनानवस्थापत्तेः। अत एव अनौपाधिकत्वनिश्चयात् व्याप्तिग्रह इति निरस्तम्। व्याप्तेर्यावत्साधनाधिकरणगर्भत्वेन तद्ग्रहे प्रत्यक्षस्यासामर्थ्याच्च। व्याप्तिग्रहस्य

---

4 (पा) ईश्वरपरानपेक्षत्वं

5 (टि) तेषां लक्ष्यकोटित्वे तेष्वभिव्यक्तशिवाभिप्रायेण लक्ष्यकोटित्व इत्यर्थः।

चानुमानिकत्वेऽनवस्थापत्तेः। अनुमानाप्रामाण्येन च तन्मूलकसंगतिग्रहसापेक्षस्य शब्दस्याप्यप्रामाण्यमिति।

मैवम् – अनुमानप्रामाण्यानङ्गीकारे प्रवृत्तिमात्रोच्छेदप्रसङ्गात् प्रवृत्तेः प्रवृत्ति-गोचरानागतविषयककार्यतानुमित्यादिजन्यत्वात्। एवं पर्वतादौ वह्न्यर्थिप्रवृत्तिश्च न स्यात्। अनुपलब्ध्या अभावनिश्चयेन सन्देहस्याप्ययोगेन सन्देहात् प्रवृत्तेरप्ययोगात्। न च व्याप्तिग्रहस्य कारणस्याभावेनानुमानप्रवृत्तिरेव न सम्भवतीति युक्तम्। अस्यैव त्वदीयवचनस्यानुमानप्रयोगरूपत्वेन स्वव्याहतेः, तर्कादिना व्यभिचारशङ्का निरासेन व्याप्तिग्रहस्योपपत्तेश्च। तर्कस्य स्वतस्सिद्धशङ्काविरहेण[6] व्याघाताधीनतद्विरहेण वा प्रवृत्युपपत्तेर्नानवस्था। अनागतादि[7]विषयके व्याप्तिग्रहे मनसश्चक्षुरादेर्वा सामर्थ्यस्य क्लृप्तत्वान्न तस्य प्रत्यक्षत्वानुपपत्तिः। अतो व्याप्तिग्रहस्योपपत्तेरनुमानं प्रमाणं, तत्प्रामाण्ये च तन्मूलकस्य सङ्गतिग्रहस्योपपत्तेर्निगमागमादिरपि प्रमाणम्।।

## आगमप्रामाण्यम्

नन्वस्तु निगमस्य[8] प्रामाण्यं, महाजनपरिग्रहस्य तन्निश्चायकस्यापौरुषेयतया निर्दोषत्वस्य तन्निर्वाहकस्य च सद्भावात्। आगमस्य[9] तु न वेदवदविगीतमहाजनपरिग्रहः, नाप्यपौरुषेयतया निर्दोषत्वं, तस्य शिवकर्तृकत्वेनैवागमेषु प्रतिपादनात्। अतो निश्चायकस्य निर्वाहकस्य चाभावान्न वेदवत्प्रामाण्यं, नापि स्मृत्यादीनामिव वेदमूलकत्वेन असाधारण[10]-धर्मप्रतिपादनात्, नापि विशिष्टप्रमातृमूलकत्वेन, अतीन्द्रियार्थे पुरुषाणां बुद्धेरनवतारात्, पुरुषाणां भ्रान्त्यादिसम्भवाच्च। **वासिष्ठलैङ्गे** – "पाञ्चरात्रं प्रशंसन्ती"त्यादिना तान्त्रिका-नुष्ठातॄन् प्रस्तुत्य –

आचरन्ति महामूढा युगान्ते समुपस्थितः।

इति तेषां मूढत्वेन निन्दाश्रवणात्प्रत्युताप्रामाण्यमवसीयते –

पाञ्चरात्रे च कापाले तथा कालामुखेऽपि च।
शाक्ते च दीक्षिता यूयं भवत ब्राह्मणाधमाः।।

इत्यादिना तन्त्रानुष्ठानस्य मिथ्याभिशापकुपितगौतमशापफलत्वकीर्तनात्। **पाद्मपुराणे वशिष्ठदिलीपसंवादे** –

आसीद्राजा चित्रनामा द्राविडे विषये पुरा।

इति प्रस्तुत्य चित्रनाम्नो राज्ञो वैदिकानुष्ठाननिरतस्य पाषण्डसंवादेन तत्परित्यागेन शैवतन्त्रानुष्ठानप्रवृत्तस्य,

---

6 (टि) स्वतस्सिद्धो यश्शङ्का विरहस्तेनेत्यर्थः।

7 (टि) अनागतादीत्यादि। ग्राह्यवर्तमानविषयके चक्षुरादेस्सामर्थ्यं क्लृप्तम्।।

8 (पा) वेदस्य

9 (पा) शैवागमस्य

10 (टि) असाधारणेति। वेदासाधारणदीक्षादिधर्मप्रतिपादनात्।

अविन्दन्नरके घोरे सन्तापं यातनात्मकम्।।

इत्यन्तेन नरकपातोत्कीर्तनाच्च। एवं **वासिष्ठलैङ्गे** –

पुरा शाण्डिल्यसंज्ञस्तु साहसी बुद्धिपूर्वकम्।
परदारान्समागम्य कृत्वा पापानि सन्ततम्।।
वासुदेवं कुमार्गेण पूजयामास सुव्रता।

इत्यारभ्य,

इति सञ्चोदिता ब्रह्मन् यमदूता यमेन तु।
चक्रुस्तथैव पापिष्ठमब्दानामयुतं सदा।।

इत्यन्तेन पाञ्चरात्रानुष्ठातुश्शाण्डिल्यस्य नरकपातः कीर्तितः। तस्मान्नागमानां प्रामाण्यम्। अस्तु वा प्रामाण्यं, तथाऽपि तत्र न सर्वेषामधिकारः। किन्तु शापनिरस्तवैदिकाद्यधिकाराणाम्[11]। **कौर्मे** –

सर्वे संप्राप्य देवेशं शङ्करं विष्णुमेव च।

इत्यारभ्य –

वेदमार्गपरिभ्रंशं करिष्यन्ति कलौयुगः।।

इत्यन्तेन षण्मुनिकृतशापकृतेन याजनाद्यनधिकारेण वृत्तिकर्शितानां वृत्त्यर्थं शङ्करमाधवाभ्यां निर्मितानि तन्त्राणीति प्रतिपादनात्। तस्मान्नालौकिके श्रेयस्साधने आगमानां प्रामाण्यमिति।

मैवम् – वेदवदेव विशिष्टपुरुषप्रणीतत्वेन प्रामाण्योपपत्तेः। तथाहि – वेदस्यापि नित्यत्वप्रयुक्तेन निर्दोषत्वेन न प्रामाण्यम्। उत्पत्तिविनाशादिप्रतीत्या वर्णमात्रस्यैवानित्यत्वात्। वर्णनित्यत्वेऽप्यानुपूर्व्या अनित्यत्वेन तद्विशेषयुक्तवर्णात्मनो वेदस्यानित्यत्वाच्च। तथा च परमाप्तशिवप्रणीतत्वेनैव वेदस्य प्रामाण्यम्। न च वेदेश्वरयोः परस्पराश्रयत्वं, विसदृशक्रियत्वात्। वेदो हि शिवस्य ज्ञापकः। शिवस्तु वेदस्योत्पादकः। तथाऽपि वेदप्रामाण्येश्वरनिश्चययोः परस्पराश्रयत्वम्। वेदप्रामाण्ये निश्चिते तेनेश्वरनिश्चयः। ईश्वरनिश्चये सत्येव च तदुक्तत्वेन वेदप्रामाण्यनिश्चय इति चेन्न। महाजनपरिगृहीतत्वेन निश्चितप्रामाण्यस्येश्वरकर्तृकत्वेन निर्वाहोपपत्तेः। अन्यथा तवाप्यपौरुषेयत्वप्रामाण्यनिश्चययोः परस्पराश्रयप्रसङ्गात्। अपौरुषेयत्वमपि निश्चितप्रामाण्येन वेदेन निश्चेयम्, अपौरुषेयत्वनिश्चयेन च वेदप्रामाण्यनिश्चय इति। अतो वेदस्यापि परमशिवप्रणीतत्वेन प्रामाण्यादागमानामपि तद्वदेव तेनैव प्रामाण्यनिर्वाहेन कोऽपि दोषः।।

## सर्वमार्गप्रामाण्यम्

नन्वेवं लोकायतादीनामपि शिवप्रणीतत्वेन प्रामाण्यं स्यादिति चेन्न। तेषामपि तत्तदधिकारिभेदेन प्रामाण्यस्याभ्युपगमात्। तदुक्तं **स्कान्दे** –

अथातस्सम्प्रवक्ष्यामि मार्गप्रामाण्यनिर्णयम्।

---

[11] (पा) शापग्रस्तपुरुषाणां वैदिकानधिकारिणाम्।

श्रद्धया संहिता यूयं शृणुध्वं मुनिपुङ्गवाः।।
वेदांश्च सर्वशास्त्राणि पुराणं भारतं तथा।
वेदाङ्गान्युपवेदांश्च कामिकाद्यागमानपि।।
कापालं लाकुळञ्चैव तयोर्भेदान्द्विजर्षभाः।
तथा पाशुपतं सोमं भैरवप्रमुखागमान्।।
तेषामेवोपभेदांश्च शतशोऽथ सहस्रशः।
विष्ण्वागमास्तथा ब्राह्मान्बुद्धार्हाद्यागमानपि।।
लोकायतं तर्कशास्त्रं बहुविस्तारसंयुतम्।
मीमांसामतिगम्भीरां सांख्ययोगौ तथैव च।।
अनेकभेदभिन्नानि तथा शास्त्रान्तराणि च।
निर्ममे शङ्करस्साक्षात् सर्वज्ञस्सङ्ग्रहेण तु।।
प्रसादादेव रुद्रस्य ब्रह्मविष्ण्वादयस्सुराः।
सिद्धविद्याधरा यक्षा राक्षसाद्यास्तथैव च।।
मुनयश्च मनुष्याश्च महाभागा द्विजोत्तमाः।
तान्येव विस्तरेणैव सङ्ग्रहेणैव वा पुनः।।
कुर्वन्ति तानि मानानि कथितानि मनीषिभिः।
अधिकारी विभेदेन नैकस्यैव तथा द्विजाः।।
तर्कैरेते हि मार्गास्तु न हन्तव्या मनीषिभिः।। इति।

तथा **भारते** च –

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
अतिप्रामाणान्येतानि न हन्तव्यानि हेतुभिः।। इति।

न च विरुद्धार्थानां कथं प्रामाण्यमुपपद्यत इति वाच्यम्। कर्तव्यविषयेऽधिकारिभेदेन व्यवस्थाविरोधपरिहारात्। वस्तुविरोधे तु प्रबलेन दुर्बलस्य बाधोपपत्तेः। न च सर्वेषामपि मार्गाणां ईश्वरप्रोक्तत्वाविशेषे कथं प्राबल्यदौर्बल्यमिति युक्तम्। अधिकारि-तारतम्येन शिवोक्तमपि वैदिकशैवातिरिक्तवामादिकमप्रमाणमेव। उपप्रणेतृतारतम्येन प्राबल्यदौर्बल्ययोरुपपत्तेः उपप्रणेतारो हि शिवप्रणीततत्तन्मार्गकथितमर्थं सङ्ग्रहेण विस्तरेण वा तद्युक्तविरोधेन यत्र प्रतिपादयन्ति तत्र तेषां वचनानां तात्पर्यभ्रान्त्यादिमूलत्वं कल्प्यते। यत्र तु न विरोधस्तत्र सर्वेषां प्रामाण्यम्। न च वामादीनामुपप्रणेतभावात्प्रमाणत्वं स्यादिति वाच्यम्। **शिवेनैव** –

अन्यानि चैव शास्त्राणि लोकेऽस्मिन्मोहनाय वै।
वेदवादविरुद्धानि मयैव कथितानि तु।।
वामं पाशुपतञ्चैव लाकुळञ्चैव भैरवम्।
न सेव्यमेतत् कथितं वेदबाह्यं[12] तथेतरत्।। इति।

---

[12] (पा) ब्राह्मं

वामादिनाम् असेव्यत्वस्य कथिततया **कौर्मे** प्रतिपादनात्। एवञ्च मार्गान्तराणाम् उपप्रणेतृसद्भावाद्वेदशैवागमविरोधे तात्पर्यभ्रममूलकतयाऽप्रामाण्यम्, अविरोधे प्रामाण्यञ्च। वेदशैवागमयोस्तु न केनापि बाधः। यत्रापि विरोधप्रतिभासस्तत्रापि यथा न परस्परविरोधो यथा च नान्तराळिकविरोधः तथा पूर्वोत्तरपरामर्शादिनाऽविरोधेन नयनं कार्यम्। नत्वेकस्यापि बाधः। अनयोस्त्वियान् भेदः। यदेकस्त्रै[13]वर्णिकाधिकारिको परश्चातुर्वर्णिकाधिकारिक इति।

ननु भवेदेवं शिवप्रणीतत्वेनागमानां प्रामाण्यनिर्वाहः, यदि तन्निश्चायको महाजनपरिग्रहस्स्यात्, स एव तु नास्तीत्युक्तमिति चेत्, शिवप्रतिष्ठाशिवार्चनादिषु सर्वेषामपि गीतप्रवृत्तेः, दीक्षायामपि श्वेतोपमन्युप्रभृतीनां परिग्रहश्रवणात्, इदानीन्तनेष्वपि ब्रह्मविद्यायामिव सर्वेषां मलपरिपाकाभावेन विरळप्रवृत्त्युपपत्तेः चित्रशाण्डिल्ययोर्नरकपातस्तु न तन्त्रानुष्ठानप्रयुक्त इति तस्यार्थः। किन्तु वैदिकपरित्यागप्रयुक्त इत्येव स्फुटं प्रतीयते। **कौर्मस्थमपि** च वचनं तथैवाश्रौतवामादिविषयकमिति मन्तव्यम्। एवं स्थिते यत् **भगवता व्यासेन चतुर्लक्षण्याम्** – "नानुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च रसनानुपत्तेश्च, नानुमान"मित्यादिना "पत्युरसामञ्जस्यात्" इत्यन्तेन सांख्याद्यागमानां प्रामाण्यनिराकरणं, तदपि वेदविरुद्धेवस्त्वंश एव, न क्रियांशेऽपि। तत्रापि न सिद्धान्तशैवागमस्य तन्निराकरणं, तदनुपलम्भात्। "पत्युरसामञ्जस्यात्" इत्येतत्तु निरूढपाशुपतस्यैव केवलनिमित्तेश्वरवादिशैवैकदेशिन एव वा निराकरणमिति न कोऽपि विरोधः॥

## आगमस्य सिद्धे प्रामाण्यम्

नन्वस्त्वागमानां प्रामाण्यं, तथाऽपि तत्कार्य एव, न सिद्धे। व्युत्पत्तिग्रहोपायस्य प्रवृत्त्यादेः कार्यैकगोचरत्वेन सिद्धेऽर्थे व्युत्पत्तिग्रहाभावादिति चेन्न। प्रवृत्यादिना शक्तिग्रहे चान्यलभ्यं कार्यांशं विहाय अनन्यलभ्ये घटाद्यंश एव तत्पदस्य शक्तिग्रहोपपत्तेः, "पुत्रस्ते जात" इत्यादौ सिद्धेऽपि व्युत्पत्तिग्रहदर्शनाच्च। प्रमाणं त्वस्मिन्मते तत्तदर्थावच्छिन्नचिच्छक्तिरूपाप्रमा। अर्थावच्छेदश्च संशयादिविनिर्मुक्तबुद्धिवृत्त्युपहितार्थकत्वम्। तदुक्तम् –

संशयादिविनिर्मुक्ता चिच्छक्तिर्मानमिष्यतः। इति।

न तु प्रमाकरणत्वं लक्षणं, दीपादिष्वतिव्याप्तेः। तदुक्तम् –

ननु न स्यात्कुतो मानं यत्तत्प्रमिति साधनम्।
सत्वदीपदृगादीनां प्रमाणत्वप्रसङ्गतः॥ इति।

साधनस्य मेयत्वेन मानत्वायोगाच्च। तच्चोक्तम् –

यन्मेयं न हि तन्मानं यतो मानेन मीयत। इति।

तत्र विषयावच्छेदलक्षणं प्रामाण्यं स्वप्रकाशया संविदा गृह्यते। बुद्धिवृत्तिगतं याथार्थ्यन्तु मनसा, तस्य स्वतो ग्राह्यत्वाच्च। स्वतो ग्राह्यत्वन्तु बाधानवतारकालीनस्वाश्रयगोचरयावल्लौकिकप्रत्यक्षग्राह्यत्वम्। नचैतदसिद्धं सामग्र्या एव तत्र

---

[13] (पा) वेदस्त्रै

मानत्वात्। यदा हि वर्तमानं ज्ञानं विषयी क्रियते तदा तदर्थावच्छिन्नमेव वर्तते। अर्थश्च विशेषणविशेष्यसम्बन्धादिरपीति तस्यापि ग्रहणमावश्यकम्। इयञ्च यथार्थबुद्धिवृत्तिर्न ज्ञानसामग्रीमात्रात्। विपर्ययादेरपि याथार्थ्यापत्तेः। किन्तु गुणादिविशिष्टात्। गुणश्च यथायथं भूयोऽवयवेन्द्रियसन्निकर्षादिः। यथार्थबुद्धिवृत्तिश्च प्रत्यक्षानुमानशब्दभेदेन त्रिविधा। तत्साधनान्यनुप्रमाणान्यपि तन्नामानि। तत्र प्रत्यक्षं त्रिविधं, इन्द्रियसापेक्षमन्तःकरणसापेक्षं निरपेक्षञ्चेति[14]। तदुक्तम् –

प्रत्यक्षं त्रिविधं प्रोक्तमक्षमानसचिद्वशाद्। इति।

तत्र निरपेक्षं चित्प्रकाशरूपं, तदपि द्विविधं, स्वसंवेद्यं स्वसंवेदनञ्चेति। तत्र स्वसंवेदनं स्वात्मगोचरं ज्ञानम्। स्वसंवेद्यं शिवगोचरं[15] ज्ञानम्। अन्तःकरणसापेक्षमपि ज्ञानं द्विविधम्– योगिज्ञानं प्राकृतसुखादिज्ञानञ्चेति। योगिज्ञानं नाम अतीतानागतवर्तमानसाक्षात्कारः। प्राकृतसुखज्ञानं नाम सुखदुःखानुभवानुसन्धानम्। अनुमितिस्तु लिङ्गादर्थप्रमितिः। लिङ्गञ्च व्याप्तिपक्षधर्मतोपेतम्। व्यप्तिश्च यावत्साधनाधिकरणे साद्यस्य वर्तनम्। लिङ्गञ्च त्रिविधम् – केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। एतेषाञ्चान्वर्थेन नाम्नैव लक्षणमुक्तम्। आप्तोक्तिश्शब्दः। आकांक्षाद्युपेतं वचनमुक्तिः, आकांक्षा च तत्तदन्वयानुकूलविभक्त्यादिसमभिव्याहारः। ज्ञाता चेयमुपयुज्यते। योग्यतात्वनन्वयनिश्चयविरहः। अग्निना सिञ्चतित्यादिकमपि तद्दशायां योग्यमेव। जलेन सिञ्चतीत्यप्यनन्वयभ्रमेऽयोग्यमेव। इयञ्च योग्यतास्वरूपसत्येवोपयुज्यते। आसत्तिः पदयोरव्यवधानेनोपस्थितिः। इयमपि योग्यतावदुपयुज्यते। अन्येषां तु उपमानार्थापत्त्यादीनामेतेष्वेवान्तर्भाव इति द्रष्टव्यम्।।

## सूत्रशेषभाष्यम्

नन्वेवमपि कथं तादृशश्शिव एवेत्यवधारणं, नारायणहिरण्यगर्भयोरपि तादृशयोस्संभवात्, तयोरपि श्रुत्यादिषु सृष्ट्यादिहेतुत्वश्रवणात्। तथा च ताभ्यामर्थान्तरम् उक्तलक्षणस्य तयोरतिव्याप्तिश्चेत्यत आह – **सहृत्वैतदिति**। अत्र हृत्वेति – "समानकर्तृकयोः पूर्वकाल" इति क्त्वार्थसमानकर्तृकत्वादेककर्तृकत्वं विवक्षितम्[16]। एतदिति जगत् परामृश्यते, प्रकृतत्वात्। सृष्टिग्रहणं स्थित्यादेरप्युपलक्षणम्। हरशब्देन योगरूढ्या संहर्ता शिव उच्यते। प्रभुः प्रभवनशीलो जगत्कर्ता महेशः। अयंभावः – अस्ति तावन्महासंहारः प्रळयः निगमागमानुमानादिसिद्धः। तस्मिन् काले यस्संहर्ता संहर्तृत्वेन तदुचितानावृतज्ञानक्रियाशक्तित्वेन स्वासाधारणशब्देनावधारितस्स एव सृष्ट्यादेरपि कर्तेति सर्वसम्मतम्। ईक्षत्यधिकरणन्यायात्, गतिसामान्याच्च। तादृशश्च शिव एव। तस्यैव **अथर्वशिखोपबृम्हणेन** "पुरा विष्ण्वादयो देवा" इत्यादिना **स्कान्देन श्वेताश्वतरोपबृम्हणेन**, "तमपृच्छंस्ततो देवा" इत्यादिना **लैङ्गपुराणस्थेन** वचनेन "ईश्वरश्चेतनः कर्ते"त्यादि**शान्तिपर्वस्थ** वचनेनान्यैश्च वचनैस्तदानीमुक्तरूपेण स्वशब्देनावधृतत्वात्। न तु हिरण्यगर्भनारायणौ। तत्र प्रमाणाभावात्।

---

14 (पा) उभयनिरपेक्षञ्चेति

15 (पा) परमात्मशिव

16 (टि) क्त्वार्थसमानकर्तृकत्वादिति। क्त्वाप्रत्ययप्रकृत्यर्थसमानकर्तृकत्वात्सृजत्यर्थस्य हरतिसृजत्योरेककर्तृकत्वं विवक्षितमित्यर्थः।

क्वचित्तयोस्तद्वचनस्य तदधिष्टातृशिवाभिप्रायकत्वात्, प्राकृतप्रळयपरत्वाद्वा। इममर्थं सिद्धवत्कृत्याह – **अस्मादिति।** शिवस्यैव संहर्तृत्वात्। हरस्संहर्ता। स एव प्रभुरिति। सूत्रतत्वादस्यार्थान्तरमपि विवक्षितम्। तथाहि – ननु शिवस्य सृष्ट्यादिपञ्चकृत्यकारित्वे समानेऽपि कथं संहारक्रियोपाधिकत्वेन हरशब्देनाभिधानमित्याशङ्क्याह – **हृत्वेति**। अत्र प्रत्ययार्थः पूर्वकालत्वं विवक्षितम्। तथा चायमर्थः – पूर्वं संहारः पश्चात्सृष्टिः। नह्यसंहृतस्यानाहितवासनस्य सृष्टिस्संभवति। असत्कार्यनिषेधात्। न च संहारस्य सृष्टिपूर्वकत्वनियमः।

असृष्टस्यापि प्रागभावपरमाणुश्यामिकामायामलसंबन्धादेस्संहारात्। तस्मात्संहारस्य प्राधान्येन निर्देशः। तेनाग्निष्टोमाद्यनेकयाजिनि सत्रप्राधान्येन सत्रयाजीति व्यपदेशवत् बहुपुरुषोपेते ग्रामे दीक्षितविद्वदादिप्राधान्येन दीक्षितग्रामो विद्वत्ग्राम इति व्यपदेशवच्च सृष्ट्यादिपञ्चकृत्ययोगिन्यपि। संहारप्राधान्येन हर इति व्यपदेशो युज्यते।

नन्वेतदिति सृजतीति च व्याहतम्। एतदिति सिद्धनिर्देशे सृजतीति सृष्ट्यनुपपत्तिः। सृजतीति सृष्टिनिर्देशे एतदिति सिद्धनिर्देशानुपपत्तिः। सृजेस्सिद्धकर्मत्वानुपपत्तेः। तथा चैतज्जगत्सृजतीति व्याहतमिति। मैवम्, सिद्धस्यैव वासनात्मनास्थितस्य स्थूलरूपेणाभि-व्यक्तिस्सृष्टिरित्यभ्युपगमेन दोषाभावात्। एवं संक्षेपेण व्याख्यातम्॥

॥ इति संग्रहभाष्यम् ॥

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यायते। संग्रहोक्तरीत्या नन्दीश्वरेण शैवार्थनिर्णयं पृष्टः श्री-कण्टेशश्शास्त्रप्रतिपाद्येषु पतिपशुपाशेषु पतिपदार्थस्य मुक्तिहेतुज्ञानविषयत्वेनाभ्यर्हितत्वात्प्रथमं पतिपदार्थं शिवमनुमानेन साधयति–**स्त्रीपुन्नपुंसकेत्यादिना** –

## सकर्तृकत्वानुमानम्

जगतः कर्तास्ति कार्यदर्शनात् इत्यन्वयः। यद्यपि, जगत्कर्तारं पक्षीकृत्यास्तित्वे साध्ये आश्रयासिद्धिः, हेतोश्च वैयधिकरण्यं, तथाऽपि जगत्सकर्तृकं, कार्यत्वादिति प्रयोगे तात्पर्यम्। ननु जगतः कार्यत्वे प्रमाणाभावादसिद्धो हेतुः। तथाहि – तत्र न तावत्प्रत्यक्षं प्रमाणं, प्रपञ्चप्राक्कोटेः प्रत्यक्षेणानुपलम्भात्। नाप्यनुमानं, तद्व्याप्य लिङ्गाभावात्। ननु तत्राचेतनत्वे सति अनेकत्वं लिङ्गमिति चेन्न। मायामहामाययोर्व्यभिचारात्। तयोरपि प्रत्येकमेकत्वान्नानेकत्वमिति न व्यभिचार इति चेन्न। सर्वेषामपि प्रत्येकमेकत्वेन पक्षेऽसिद्धेः, दृष्टान्ते साधनवैकल्याद्व्याप्तिग्रहानुपपत्तेश्च। अथ पृथिवीत्वादिकं कार्यवृत्ति, चेतनभिन्नानेकवृत्तित्वात् घटत्ववदिति चेन्न। मायामहामायान्यतरत्वादौ व्यभिचारात्। षट्त्रिंशत्तत्त्वविभाजकोपाधित्वे सतीति विशेषणीयमिति चेन्न। घटादिवृत्तित्वेन सिद्धसाधनात्। कार्यमात्रवृत्तित्वं साध्यमिति चेन्न। सहचारग्रहस्थलाभावात्। आत्मत्वं व्यतिरेकभूमिरिति चेन्न। असाधारण्याच्चेतनभिन्नेति पदवैयर्थ्यापत्तेश्च। पुरुषत्वे व्यभिचारवारणार्थं तदिति चेन्न।

भोक्तृत्वप्रयोजकस्य तस्यात्मभिन्नवृत्तित्वेन त्वयाऽङ्गीकृतस्य जन्यवृत्तित्वे न साध्यसत्वात्[17], तस्य चेतनभिन्नवृत्तित्वेन चेतनभिन्नपदाव्यावर्त्यत्वाच्च।

त्वदेकदेशिमते तु भोक्तरि पुंसि चेतनेऽपि तत्र तत्त्वव्यपदेशस्याभावेन हेतोरेवानवगमात्। तद्विनाकृतमेव[18] तर्हि हेतुरिति चेत्परं प्रतिविशेषणस्याप्रसिद्धेः। अप्रयोजकत्वाच्च। अस्तु तर्हि सावयवत्वं हेतुः। न अवयवपदस्य द्रव्यसमवायिकारणपरत्वे तज्जन्यत्वस्य हेतोस्साध्याविशिष्टत्वात्। एकदेशपरत्वे तु मले व्यभिचारात्। ननु सृष्टिप्रतिपादकानि मन्त्रार्थवादेतिहासपुराणागमादीनि प्रमाणमिति चेन्न। तेषां विधेयस्तवादिपरत्वेन स्वार्थे तात्पर्याभावात्। तदुक्तं **जैमिनिना** मुनिना – "विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति। ननु तत्र तात्पर्याभावेऽपि श्रुतिबोधितस्यानधिगतस्याबाधितस्यार्थस्यास्ति श्रुतिप्रमाणकत्वमिति चेन्न। तात्पर्यविषय एव श्रुतेः प्रामाण्यात्। तदुक्तमभियुक्तैः "यत्परश्शब्दस्सशब्दार्थ" इति। अन्यथा श्रुतेः प्रतीतार्थमात्रे प्रामाण्ये मीमांसाया वैयर्थ्यापत्तेः। तस्मात् प्रमाणाभावान्न जगतः कार्यत्वमिति।

अत्रोच्यते – जगत्सृष्टौ मन्त्रार्थवादागमादीन्येव प्रमाणम्। तेषां विधिशेषत्वेऽप्यतात्पर्यनि-बन्धन[19]प्रमाणान्तरविरोधतदधिगतार्थत्वयोरभावेन स्वार्थगोचरावान्तरतात्पर्यस्यांगीकारेऽप्य-विरोधात्। तदुक्तम् –

विरोधे गुणवादस्स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः।। इति।

अन्यत्राप्युक्तम् – "मन्त्रार्थवादेतिहासपुराणप्रमाण्यात्सृष्टिप्रळयावपीष्येते" इति। एवञ्च श्रुत्यागमादिसिद्धे कार्यत्वे अनुमानमप्याह – **स्त्रीपुन्नपुंसकेति**। स्त्रीपुन्नपुंसकादित्वात्सावयवत्वादित्यर्थः। यथा चायमर्थो लभ्यते तथा संग्रहे प्रतिपादितः। प्रयोगस्तु – पृथिव्यादिकं कार्यं सावयवत्वात्घटवदिति। न च पूर्वोक्तविकल्पग्रासः। अवयवशब्दस्यैकदेशपरत्वात्। ननु तथाऽप्येकदेशसंबन्धस्संयोगो वा समवायो वा जन्यजनकभावो वा संबन्धमात्रं वा। न प्रथमः, घटावयवसंयोगिन्यात्मनि व्यभिचारात्। न द्वितीयः, न्यायमते तन्तुत्वादौ व्यभिचारात्। न तृतीयः, साध्यविशेषात्। न चतुर्थः, आत्मादौ व्यभिचारादेवेति। मैवम् – एकदेशैकदेशिभावस्य विवक्षितत्वात्। न च मले व्यभिचारः। तस्य निरवयवत्वात्। "तदेकं सर्वभूतानामनादिनिबिडं महत्।" इति तस्य निबिडत्वोक्तिस्तु तिरोधायकशक्तिदार्ढ्यपरा, न तु घनावयवसंयोगपरा। तथात्वे तस्यापि

---

[17] (टि) साध्यसत्वादिति। तथा च व्यभिचाराभावात्तद्व्यावर्तकविशेषणवैयर्थ्यम्। दत्तेऽपि न व्यावृत्तिरित्याह – तस्येति। पुरुषत्वस्य चेतनवृत्तित्वमङ्गीकुर्वतां मते विशेषण-सार्थक्यमाशङ्क्याह त्वदेकदेशीति। हेतोरेवानवगमादिति। तन्मते पुरुषत्वे तत्त्वविभाजकोपाधि-त्वाभावादिति भावः।

[18] (टि) तद्विनाकृतं चेतनभिन्ने वृत्तित्त्वविनाकृतः। विशेषणस्याप्रसिद्धेः तत्त्वविभाजकोपाधि-त्वरूपविशेषणस्याप्रसिद्धेरित्यर्थः।

[19] (टि) अतात्पर्यनिबन्धनेति। तन्निबन्धने ये प्रमाणान्तरविरोधतदधिगतार्थत्वे तयोर्वपोत्खातहिमभैषज्यादा-विवास्मिन्विषयेऽभावेन।

कार्यत्वापत्तेः। ननु –

तेन प्रदीपकल्पेन तदाच्छन्नचितेरणोः।
प्रकाशयत्येकदेशं विदार्य तिमिरं घनम्।।

इति मलविदारणपूर्वकैकदेशाभिव्यक्तिप्रतिपादकवचनेन मलस्य सर्वात्मना विदारणे एकदेशाभिव्यक्त्यनुपपत्त्यैकदेशविदारणपरेण सावयवत्वमवगम्यत इति चेन्न। तत्तद्विषयावच्छिन्नात्मावारकमलशक्तिविदारणमात्रेणैवैकदेशाभिव्यक्त्युपपत्तेः। अस्तु वा मलस्य सावयवत्वं, तथाऽपि सन्निवेशविशेषस्यैव हेतूकृतत्वान्मलव्यतिरिक्तत्वे सतीति विशेषणाद्वा न व्यभिचारः। अथ सिध्यतु क्षित्यादेः कार्यत्वं, तथाऽपि साध्यमप्रसिद्धम्। अत्र दृष्टान्तीकृतस्य घटादेरपि स्वभावादेवोत्पत्तिसम्भवेन कारण-जन्यत्वे प्रमाणाभावेन तद्विशेषकर्तृजन्यत्वस्य दूरापास्तत्वात्। तथाहि – दण्डादेर्घटादौ कारणत्वे न तावत् प्रत्यक्षं प्रमाणं, दण्डादिसन्निकर्षे सत्यपि घटादिजनकत्वसन्देहात्। न च अन्वयव्यतिरेकज्ञान[20]रूपसहकारिविरहप्रयुक्तस्स इति वाच्यम्।

अन्वयव्यतिरेकमात्रस्य रासभदण्डरूपादिसाधारणत्वात्। नियमानन्यथासिद्धिगर्भस्य च[21] तस्य न ग्राहकत्वम्। तयोरेवाग्राह्यत्वात्। न च व्यभिचारान्यथासिद्धिशङ्काविरहसहकृतस्य तस्य ग्राहकत्वमिति वाच्यम्। शङ्कानिवर्तकस्याव्यभिचारानन्यथासिद्धिनिश्चयस्याभावे शङ्काविरहस्यैवा सिद्धेः। न च तर्कादेवशङ्कानिवृत्तिरिति वाच्यं, तर्कमूलभूतव्याप्तावपि व्यभिचारशङ्काया निवृत्त्यर्थं तर्कान्तरान्वेषणेऽनवस्थाप्रसंगात्, मूलभूतव्याप्त्यनङ्गीकारे च तर्कस्य प्रशिथिलमूलतयाऽऽभासत्वापत्तेः। न च तच्छंकानुदयसहकृतस्यान्वयव्यतिरेकज्ञानस्य सहकारित्वं, तदनुदयश्च कोट्याद्यनुपस्थित्या सुलभ एवेति वाच्यम्। तस्यापि रासभसाधारण्येन प्रमाणासहकारित्वस्योक्तप्रायत्वात्। नाप्यनुमानं तत्र मानं, तन्मानत्वस्योक्तन्यायेनाद्याप्यसिद्धेः। अनुमानाप्रमाण्यादेव च तन्मूलागमादेरपि प्रामाण्यमशक्यशङ्कम्[22]। अतो दृष्टान्तस्साद्ध्यविकल इति साध्यप्रसिद्धिरेवेति।।

## स्वभाववादनिरासः

मैवम्, दण्डो घटान्नियतपूर्वस्सन्नित्यादि प्रत्यक्षमेव तत्र मानम्। न च ग्राहकाभावः, व्यभिचारान्यथासिद्धिशङ्काविरहान्वयव्यतिरेकज्ञानसद्ध्रीचीनस्येन्द्रियस्यैव तत्र ग्राहकत्वात्। तथाऽपि दण्डं विनाऽपि घटो भविष्यतीति शङ्कायाः कस्समाधिरिति चेत् एवं शङ्कायां भोजनं विनाऽपि तृप्तिर्भविष्यतीति शङ्कायास्सुलभत्वेन तृप्त्यर्थं भोजनादौ प्रवृत्त्यनुपपत्तेः स्वक्रियाविरोधः। ननु सुहृद्भावेन व्यभिचारशङ्कानिवृत्त्युपायं पृच्छामीति चेत् – तर्कमेव तदुपायं ब्रूमः। तर्कश्चेत्थं प्रवर्तते – घटो यदि किञ्चिदुत्तरत्वनियतोत्पत्तिको न स्यात्तदा सोत्पत्तिको न स्यात्। मन्मते आत्मवत्, त्वन्मते खपुष्पवत्। नचैकस्योभयवादिसिद्धस्य

[20] (टि) अन्वयव्यतिरेकज्ञानेति। अन्वयव्यतिरेकसहचारज्ञानेत्यर्थः।

[21] (टि) गर्भस्य चेत्यत्र चस्त्वर्थे। तयोरेव नियमानन्यथासिध्योरेव। सहकृतस्य तस्येति। अन्वयव्यतिरेकसहचारज्ञानस्य।

[22] (टि) अशक्यशङ्कं सुदृढमित्यर्थः।

दृष्टान्तस्यात्राभावो दोषः। उभयसिद्ध[23]दृष्टान्तवत्त्वस्यैव लाघवेन प्रयोजकत्वात्।

यद्वा – एतत्कालोत्पत्तिको घटो यद्येतदुत्तरकालानुत्पत्तिकत्वे सत्येतदव्यवहित-पूर्वकालोत्पत्तिकोत्तरत्वव्याप्योत्पत्तिको न स्यात्, एतत् पूर्वकालवृत्तिस्स्यादेतत्पूर्व-कालोत्पन्नघटादिवदिति। न चास्मिन् तर्कद्वयेऽपि व्याप्यत्वाप्रसिध्या तद्घटितप्रतियोगिनोऽप्यप्रसिध्या तदभावरूपापादकाप्रसिद्धिरिति वाच्यम्। त्वन्मते प्रतियोग्युपस्थितिमात्रस्य प्रयोजकतयाऽसत्यपि व्याप्यत्वादौ भ्रमरूपोपस्थितिसम्भवात्। मन्मते तु प्रतियोगिप्रमायास्सत्वात्। न चोक्तानवस्था दोषः, तस्यानुमानप्रामाण्यसाधनावसरे निरसिष्यमाणत्वात्। कारणत्वेऽनुमानमपि प्रमाणम्।

ननु त्रिष्वनुमानेषु किमिह प्रमाणम्। न तावदन्वयि, क्वचिदपि कारणत्वग्रहेऽन्वयसहचारज्ञानाभावेन तस्यासम्भवात्। नापि व्यतिरेकि, साध्याप्रसिध्या व्यतिरेकव्याप्त्यग्रहेण तस्याप्यप्रवृत्तेः। उक्त हेतुभ्यामेव नान्वयव्यतिरेक्यपीति चेन्मैवम् – क्वचित्प्रत्यक्षेण कारण-त्वग्रहे तद्दृष्यन्तेन विप्रतिपन्नेऽन्यत्राप्यन्वयव्यतिरेकिणैव कारणत्वग्रहसम्भवात्। यद्वा – यथा घटे जलादिभेदप्रसिद्धौ सर्वा पृथिवी इतरभिन्ना गन्धवत्वात्, यदितरत्तन्नगन्धवदिति व्यतिरेकिणे तरभेदसिद्धिस्तथेहापि क्वचित्कारणजन्यत्वग्रहे सर्वं कार्यं सहेतुकमुत्पत्तिमत्वाद्यन्नैवं तन्नैवं, यथाऽऽत्मा, यथा वा खपुष्पमिति व्यतिरेकिणा तत्सिद्धिः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

अथेन्द्रियशरीरार्थैश्चिद्योगस्यानुमीयते।
निमित्तमागामिभावाद्यतो नागाम्यहेतुकम्।। इति।

यद्वा – दण्डाद्यवधिकोत्तरत्वाव्यभिचारित्वं, किञ्चिन्निष्ठात्यन्ताभावाप्रतियोगिधर्मविशेषत्वात्, शौक्ल्यवदित्यनुमानेन सामान्यप्रसिद्धं दण्डाद्यवधिकोत्तरत्वाव्यभिचारित्वं घटाद्युत्पत्तौ व्यतिरेकिणा साध्यते। घटाद्युत्पत्तिः दण्डाद्यवधिकोत्तरत्वव्याप्या, घटाद्युत्पत्तित्वाद्यन्नैवं तन्नैवमिति। न च साध्यप्रसिद्धिस्थले हेतोर्गमनेऽन्वयित्वमगमनेऽसाधारण्यमिति वाच्यम्। साध्यप्रसिध्याधिकरणस्य विशिष्यानिश्चयेन तत्र हेतुसद्भावासद्भावयोरनिश्चयात्। सपक्षवृत्तित्वनिश्चये ह्यन्वयित्वं तद्व्यावृत्तत्वनिश्चये चासाधारण्यं न तु वास्तवेन तदुभयसत्वमात्रेणेति। ननु कार्यं निर्हेतुकं पदार्थत्वादात्मवत्खपुष्पवदिति सत्प्रतिपक्षत्वं यथा तार्किकमते परमाणुतत्परिमाणादीनामकारणकत्वेऽपि क्वाचित्कत्वं, यथा वा त्वन्मते कर्तृशक्त्यादिनामहेतुकत्वेऽपि नियतदेशवृत्तित्वं कारणाङ्गीकर्तृणामपि कारणत्वाविशेषेऽपि पटादेस्तन्त्वादिदेशवृत्तित्वन्न तु वेमादिवृत्तित्वमिति देशनियमः, तथा कार्यस्याहेतुकत्वेऽपि स्वभावादेव नियतकालवृत्तित्वं स्यात्। तदुक्तम् –

नित्यसत्वाभवन्त्यन्ये नित्यासत्वाश्च केचन।
विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः।।
अग्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः।
केनेदं चित्रितं तस्मात्तत्स्वभावाद्व्यवस्थितिः।। इति।

---

[23] (टि) उभयसिद्धेति। उभयसिद्धदृष्टान्तवत्त्वमेव प्रयोजकं, गौरवादित्यर्थः। एतदव्यवहितपूर्वकालिकनाशान्तरज्ञायमानैतदुत्तरकालिकोत्पत्तिके व्यभिचारवारणाय हेतावेतदुत्तरकालानुत्पत्तिकत्वे सतीति विशेषणम्। कारणत्वे दण्डादेर्घटादिकारणत्वे।।

अप्रयोजकत्वाच्चेति चेन्मैवम्। पूर्वोक्तप्रतिकूलतर्कप्रतिघातेन प्रतिपक्षानुमानस्य दुर्बल-त्वात्। हेतुलक्षणावधिविधुराणां[24] कादाचित्कत्वस्वभावादर्शनेन विरोधेन हेतुं विना कादाचित्कत्वस्वभावस्यैवानिर्वाहादप्रयोजकत्वस्याप्ययोगात्। ननु हेतुरपि सदा तनो वा कादाचित्को वा। न तावदाद्यः, तत्सापेक्षस्य कार्यस्यापि सदातनत्वापत्त्या कादाचित्कत्वविरहेण हेतोरसिध्यपत्तेः[25]। नापि द्वितीयः। तस्यापि हेत्वनपेक्षत्वे तत्रैव व्यभिचारापत्तेः। तद्वदेव च कार्यस्यापि निर्हेतुकत्वेऽपि कादाचित्कत्वं स्यादित्यप्रयोजकत्वापत्तेश्च। हेतुसापेक्षत्वे तस्यापि हेतुजन्यत्वमेवमन्यस्यापीत्यनवस्थालक्षणप्रतिकूलतर्केण पुनरपि सत्प्रतिपक्ष इति चेन्मैवम् – अस्या अनवस्थाया मूलक्षयकारणत्वाभावेना दोषत्वात्। तदुक्तम् –

मूलक्षयकारीं प्राहुरनवस्थां हि दूषणम्। इति।।

## कालमात्रस्य हेतुत्वम्

नन्वेतावता दृष्टान्तीकृते घटादौ कारणमात्रसिद्धावपि कुलालादेर्न हेतुत्वमिति पुनरपि साध्यवैकल्यम्। तथाहि – कुलालादेरपि तत्तत्कालविशेषसहकृतस्य जनकत्वं, केवलस्य वा। न तावद्द्वितीयः, तत्तत्कालविशेषाभावे सत्यपि[26] कारणान्तरे कार्योत्पत्त्यदर्शनात्। न च तदसिद्धं, बीजविशेषादेस्तत्तत्कालविशेष एव सस्याद्युत्पत्तिदर्शनात्, पुष्पविशेषाणां तत्तदृतुविशेष एव निष्पत्तिदर्शनाच्च। न च घटे कालविशेषव्यतिरेकप्रयुक्तदुत्पत्तिविलम्भो न दृष्ट इति वाच्यम्। अद्योत्पद्यमानस्य घटस्य पूर्वेद्युरनुत्पादस्य कालविशेषव्यतिरेकप्रयोज्यत्वात्, तदा घटान्तरस्योत्पादेन तत्साधनदण्डादीनां सत्वेन तद्व्यतिरेकस्यासम्भवादेतत् घटोत्पत्तियोग्यस्तु कालस्तदा नास्तीति तद्व्यतिरेकस्य भवति कार्यव्यतिरेकप्रयोजकता। नापि प्रथमः। अवश्यकत्वेन कालस्यैव कारणत्वात्। न च कालसद्भावेऽपि दण्डाद्यभावे कार्योत्पत्तिर्न दृष्टेति वाच्यम्। तदा कालविशेष एव नास्तीति वक्तुं शक्यत्वात्। तदुक्तं **पौष्करे** –

नाकाले जायते कश्चिन्नकाले म्रियतेऽपि च।
चक्रादिवत्घटोत्पत्तौ तस्मात्कालः प्रवर्तकः।।
घटास्संजायमानोऽयं जातो नेतः पुरा क्वचित्।
सति मृद्दण्डचक्रादौ कुम्भकर्तरि सत्यपि।।
यत्तत्र कारणं कालः पदार्थानां प्रवर्तकः।
काले तु सति जायेरन् सर्वे भावाश्च सर्वदा।। इति।

**पुराणेऽपि** -

कालस्सृजति भूतानि कालस्संहरति प्रजा। इति।

तथा च – कालस्यैव घटादिजनकत्वेन कुलालादेस्तज्जनकत्वे प्रमाणाभावात् दृष्टान्ते

[24] (टि) हेतुलक्षणावधिविधुराणां कारणसामग्रीरूपपूर्वावधिविधुराणामात्माकाशादीनाम्।

[25] (टि) हेतोरसिद्ध्यापत्तेरिति। उत्पत्तिमत्वरूपहेतोरित्यर्थः।

[26] (टि) तत्तत्कालविशेषाभावे सत्यपीति। सत्यपि तस्मिन् या कारणेन कार्योत्पत्तिस्तस्याः कारणान्तरे बीजादावदर्शनादिति भावः।

साध्यवैकल्यम्। तद्वदेव क्षित्यादेरपि काल एव कारणमस्तु। अलं तत्सापेक्षेण चेतनेनापीति कालेश्वरपक्षः।।

## कर्ममात्रस्य कारणत्वम्

एवं तत्तदर्थप्रापकादृष्टाभावे सत्यपि पुरुषयत्ने कार्यनिष्पत्त्यदर्शनेन आवश्यककर्मविशेषस्यैव घटादिजनकत्वे कुलालादेर्न जनकत्वं, तथा क्षित्यादावपि कर्मनिरपेक्षस्येश्वरस्य कारणत्वे सर्वदा सर्वकार्योत्पत्तिप्रसङ्गेन सापेक्षस्य जनकत्वे वाच्ये तेनैव जगदुत्पत्तिसम्भवादीश्वरस्यापि जनकत्वाङ्गीकारो वृथेति कर्मेश्वरपक्षो वा कक्षी कर्तव्य इति।।

## कालादिमात्रस्य कारणत्वनिरासः

मैवम् – कालमात्रस्य जनकत्वे पटाद्यर्थिनां तन्त्वादौ प्रवृत्तिर्न स्यात्। अतस्तन्त्वादेरपि कारणत्वमेषितव्यम्। यदि तु कालव्यतिरेकात्कार्यव्यतिरेकस्तदा तस्यापि कारणत्वमस्तु। न तु क्लृप्तकारणभावस्य तन्त्वादेः कारणतात्यक्तुमुचिता। एवं कर्ममात्रस्यापि कारणत्वं निरसनीयम्। अतो घटादौ चेतनविनाकृतस्याचेतनस्य कार्यजनकत्वादर्शनान्न दृष्टान्ते साध्यवैकल्यम्। तद्वदेव चात्राप्यचेतनकारणाधिष्ठातुश्चेतनस्यावश्यकत्वान्न कालकर्ममात्रादन्यथासिद्धिः।।

## सिद्धसाधनम्

ननु जगच्छब्देन घटादेरपि ग्रहणात्तत्र च कुलालादिकर्तृकत्वस्य सिद्धतयांऽशतस्सिद्ध-साधनम्। न च सकर्तृकत्वाकर्तृकत्वविवादास्पदतया जगद्विशेषणीयमिति वाच्यम्। विवादस्य क्षितिस्सकर्तृका नवेत्येवमादिरूपत्वे सर्वेषां प्रत्येकं विशिष्यबुध्यनारोहेण तावत्गोचरविवादस्यैवासम्भवात्। घटादिव्यावृत्तेन क्षित्याद्यनुगतेन केनचिद्धर्मेणानुगतीकृतस्य विवादास्पदत्वे स एवाकारो[27] विशेषणमस्तु। किं विवादाध्यासितत्वेन तत्सव्यपेक्षेण। न च तादृशो धर्मस्सुवचनः।।

## पक्षाक्षेपः

न च क्षितिरेव पक्षः, वनद्रुमेणानैकान्त्यात्। न च तत्रापि कर्त्रभावानिश्चयेन नानैकान्त्यमिति वाच्यम्। व्यभिचारनिश्चयाभावेऽपि सन्दिग्धानैकान्त्यात्। न च साध्यभाववत्तया निश्चिते हेतुसंशय एव व्यभिचारसंशयः, न तु हेतुमत्तया निश्चिते साध्याभावसंशयोपि, पर्वतादौ पक्षे वह्न्यभावसंशयेन धूमानुमानादावपि सन्दिग्धानैकान्त्यप्रसङ्गे नानुमात्रोच्छेदादिति वाच्यम्। साध्याभाववद्वृत्तित्वसंशयत्वेनैव लाघवाद्व्यभिचारसंशयस्य प्रतिबन्धकत्वात्। न चानुमानमात्रोच्छेदः, पक्षीय संशयस्यानुमानानुकूलतया तत्भिन्नस्थल एव व्यभिचारसंशयस्य प्रतिबन्धकत्वेन दोषत्वाभ्युपगमात्। न च तवापि पक्षातिरिक्त इति विशेषणान्न लाघवमिति वाच्यम्। तदभावेऽपि पक्षतत्समगोचर[28]व्यभिचारसंशयसाधारणत्वे न विकासकत्वात्। न

---

[27] (टि) स एवाकारः – स एव धर्मः।

[28] (टि) पक्षतत्समगोचरेति। साध्याभाववद् वृत्तित्वसंशयत्वेन। तदभुयगोचरव्यभिचारिसंशयसाधा-रण्येन न तु पक्षातिरिक्तसाध्याभाववद् वृत्तित्वसंशयत्वेन पक्षात्मकसाध्याभाववद् वृत्तित्वसंशयत्वेन वा प्रातिस्विकरूपेण। विकासकत्वात् विकसनात्, कार्यकारित्वादिति यावत्।

च वनद्रुमादौ सकर्तृकत्वसाधनेन व्यभिचारसंशयनिवृत्तिरिति वाच्यम्। तस्मिन्ननुमाने क्षितौ सन्दिग्धानैकान्त्यपरिहाराय क्षितौ सकर्तृकत्वानुमानस्य पूर्वं प्रवृत्तौ वक्तव्यायामन्योन्याश्रयात्। तस्मान्न क्षितिरेव पक्षः। नापि शरीराजन्यं पक्षः, शरीररूपादिना सन्दिग्धानैकान्तिकत्वापत्तेः। नापि जन्यकृत्यजन्यं पक्षः, स्वर्गादिना[29] सन्दिग्धानैकान्तिकत्वात्। नन्वदृष्टाद्वारकत्वेन[30] कृतिर्विशेषणीया[31]। न चैवमपि मृदङ्गध्वनेः पक्षान्तर्भावो न स्यादिति वाच्यम्। तस्य मृदङ्गगोचरादृष्टाद्वारकास्मदादिकृतिजन्यतयाऽस्मत्कर्तृकत्वादिति। मैवम् – त्वन्मते,

> कर्तृशक्तिरणोर्नित्या विभ्वी चेश्वरशक्तिवत्।
> तमश्छन्नतयाऽर्थेषु नाभाति निरनुग्रहा।।

इति **श्रीमन्मृगेन्द्र**वचनानुसारेण जन्यकृतेरेवाप्रसिध्या तदजन्यत्वस्याप्रसिद्धत्वात्। न च कलाभिव्यक्तत्वं जन्यपदार्थ इति वाच्यम्। मां प्रत्यप्रसिध्यापत्तेः। किञ्च किं शुद्धस्याध्वनः पक्षता, अशुद्धस्य वा। नाद्यः, तस्यैव मन्मते असिद्धेः। न द्वितीयः, तस्य त्वयाप्यनन्तादिकर्तृकत्वस्वीकारेणाभिमतस्यासाधनात्। तस्मान्न पक्षनिर्वचनसम्भवः।।

## साध्यप्रतिक्षेपः

साध्यमपि सकर्तृकत्वं, न कर्तृसाहित्यमात्रं, घटादिकर्तृकुलालादिसाहित्येन सिद्धसाधनात्। नापि कर्तृजन्यत्वम्, अस्मदादिनाऽर्थान्तरात्। नाप्युपायगोचरकृतिजन्यत्वम् अदृष्टद्वारा ऽस्मदादिकृतिजन्यत्वेन सिद्धसाधनात्[32]। न चादृष्टाजनकेति कृतिर्विशेषणीया। भवदभिमतेश्वरकृतेरप्यदृष्टजनकत्वेन बाधात्। तस्मात्साध्यमपि दुर्निरूप्यम्।।

## हेत्वाक्षेपः

हेतुरपि कार्यत्वं, न कृत्यर्हत्वं, साध्याविशेषात्। नापि कादाचित्कत्वं, प्रागभावेनानैकान्त्यात्।

[29] (टि) स्वर्गादिनेति। स्वर्गादेरदृष्टद्वाराजन्यकृतिजन्यत्वेन पक्षबहिर्भावात्तेन सन्दिग्धानैकान्तिकतेति भावः। कृतिर्विशेषणीयेति। तथा च पक्षान्तर्भावान्नसन्दिग्धानैकान्तिकतेति शेषः। पक्षान्तर्भावो न स्यादिति। अत्रायमाशयः पूर्वपक्षिणः – मार्दङ्गिकस्तु मृदङ्गमभिमृद्नाति ततो मृदङ्गं ध्वनति। तद्ध्वनेर्मर्दनद्वारा मार्दंगिककृतिजन्यत्वमस्ति। तच्चादृष्टाद्वारकमेव। न च ज्योतिष्टोमादिनेव मृदङ्गमर्दनेनादृष्टञ्जायत इति वक्तुं शक्यं प्रमाणाभावात्। अथ च न मार्दङ्गिकस्य मृदङ्गध्वनिकर्तृत्वमस्ति। तर्हि मृदंगध्वानकाले मार्दंगिको ध्वनतीति व्यवहारापत्तेः। तथा च पक्षबहिर्भूते तस्मिन् सकर्तृकत्वसन्देहात् सन्दिग्धानैकान्तिकतेति। अदृष्टद्वारकास्मदादिकृतिजन्यतयेति। सिद्धान्ती तु अदृष्टाद्वारकजन्यकृतिजन्यत्वेऽस्मदादि कर्तृकत्वमावश्यकमेव, तस्यैव सकर्तृकत्वरूपत्वात्। न च मार्दंगिको ध्वनतीति व्यवहारापत्तिः। मृदङ्गमर्दनद्वाराऽस्मत्कृतिजन्यत्वेन साक्षात्तदजन्यत्वात्। साक्षात्तज्जन्यत्वस्यैव तादृशव्यवहारप्रयोजकत्वादति प्रतिक्षिपति मृदङ्गगोचरेशति। अत्रादृष्टद्वारके तिलेखकदोषादापतितमिति दृष्टव्यम्। अभिमतस्यासाधनादिति। अभिमता सिद्धेरित्यर्थः।

[30] (पा) अदृष्टद्वारकत्वेन

[31] (पा) विशेषाश्रया

[32] (टि) नाप्युपायगोचरेत्यत्रोपायपदस्य यथा कथञ्चित्साधनपरत्वमभिप्रेत्यादृष्टजनक-जीवीयकृतिविषयविहितकर्मणोऽप्युपायत्वमादाय सिद्धसाधनमुक्तम्। ईश्वरकृतेरपीति। सर्वजनिकाया अदृष्टजनकत्वस्याप्यावश्यकत्वादित्याशयः।

नापि प्राक्कालासत्वं, सर्वापेक्षया प्राक्कालस्याप्रसिध्या तत्रासत्वस्यापि वक्तुमशक्यत्वात्। तत्तत्प्राक्कालासत्वस्य चाननुगमात्, त्वया सत्कार्यवादस्याभ्युपगतत्वेन प्रागसिद्धेश्च[33]।।

## विरोधोद्भावनम्

किञ्च – विशेषविरुद्धोऽयं[34] हेतुः। तथाहि – यथा दर्शनबलप्रवृत्तया व्याप्त्या तावदसर्वज्ञश्शरीरी च कर्ता सिध्येत्, पक्षधर्मताबलेन च तद्विपरीत इति व्याप्तिपक्ष-धर्मतोपनेययोर्विरोधः। अपि च ज्ञानमनित्यमेव। इच्छाकृतिद्वारैव जनिका। कृतिरपि चेष्टाद्वारैव जनिका। ज्ञानेच्छादिकं शरीरावच्छिन्न एवात्मनीत्यादिबहुव्याप्तिविरोधान्न नित्यज्ञानादिसिद्धिः। त्वन्मते च ज्ञानादिकं मलावृतमेव। कृतिश्चेष्टारैव जनिका। ज्ञानादिकं शरीराद्यवच्छेदेनैवाभिव्यज्यते। कर्ता शरीर्येवेत्यादिबहुव्याप्तिविरोधान्नैवानावृतज्ञानादिसिद्धिः।

ननु व्याप्त्युपस्थितिरेव किं प्रतिबन्धकत्वेन विवक्षिता, उत पक्षधर्मतोपस्थिति-सहिताविरोध्यनुमितिसामग्रीत्वेन। नाद्यः, विरोधिव्याप्तिप्रतिसन्धानमात्रस्य पक्षधर्मतासहित मदीय व्याप्ति[35]प्रतिसन्धानापेक्षया दुर्बलत्वेनाप्रतिबन्धकत्वात्। न द्वितीयः। एवं हि तदा प्रयोगः – ईश्वरश्शरीरी, कर्तृत्वात्। तत् ज्ञानादिकं मलावृतं, ज्ञानत्वात्। ईश्वरकृतिश्चेष्टा-द्वारा जनिका, कृतित्वादिति। अत्र च ईश्वर तज्ज्ञानादीनामसिद्धावाश्रयासिद्धिः, सिद्धौ च धर्मिग्राहकप्रमाणबाध इति नानुमितिसामग्रीति। मैवम् – न वयं विरोधिव्याप्तिप्रतिसन्धानस्य विरोध्यनुमितिसामग्रीत्वेन प्रतिबन्धकतामाचक्ष्महे। येन दौर्बल्येन प्रतिबन्धकता न स्यात्। किं तर्हि, मलानावृतत्वं ज्ञानादौ विषयीकुर्वाणायां भवदभिमतानुमितौ विषयाभावावगाहिनस्सर्वत्र ज्ञानादौ मलावृतत्वादिकमवगाहमानस्य विरोधिव्याप्तिप्रतिसन्धानस्य साक्षात्प्रबन्धकत्वम्।।

## सप्रतिपक्षत्वम्

किञ्च – क्षित्यादिकमकर्तृकं शरीराजन्यत्वादात्मवदिति सत्प्रतिपक्षत्वम्।

[33] (टि) प्रागसिद्धेश्चेति। प्रागित्येतस्यासिद्धेश्चेत्यर्थः।

[34] (टि) विशेषविरुद्धोऽयमिति। विशेषे घटादौ यद्दृष्टमसर्वज्ञशरीरिकर्तृकत्वन्तद्विरुद्धस्य सर्वज्ञाशरीरिकर्तृकत्वस्य पक्षे पृथिव्यादौ तद्धर्मताबलेनानेन कार्यत्वहेतुना साधनीयत्वाद्विरुद्धोऽयं हेतुरित्यर्थः। नन्वनेन को वा दोष उद्भावित इति चेत् शरीरिकर्तृकत्वेन व्याप्यत्वासिद्धिर्वा पक्षेपि तत्सिद्ध्यार्थान्तरतावोद्भावयितुं शक्येति वेदितव्यम्। अथवा विशेषे साध्यविशेषे सर्वज्ञाशरीरिकर्तृकत्वादौ विरुद्ध असर्वज्ञशरीरिकर्तृकत्वव्याप्तत्वेन विरुद्ध इत्यर्थः।

[35] (टि) मदीय व्याप्तीति। ननु क्षित्यादिसकर्तृकं कार्यत्वात्घटवदिति न्यायप्रयोगः। तत्र कार्यत्वमुपादानगोचरापरोक्षज्ञानादिमज्जन्यत्वव्याप्यमित्युभयोरप्येकरूपमेव व्याप्तिज्ञानमिति कथं त्वदीयव्याप्तिप्रतिसन्धानं मदीयव्याप्तिप्रतिसन्धानमिति व्याप्तिं। प्रति प्रतिसन्धानभेदप्रसक्तिरिति चेत् उच्यते – उक्तरीत्या व्याप्तिज्ञानस्योभयसाधारण्येऽपि क्षित्यादिकं नासर्वज्ञेन शरीरपरिच्छिन्नेन च कर्तुं शक्यमित्यनुपपत्तिप्रतिसन्धानेनानुमितौ सर्वज्ञाशरीरकर्तृकत्वं भासत इति सिद्धान्तिना वक्तव्यम्। तथा च पृथिव्यादिवृत्तित्वेन कार्यत्वं सर्वज्ञकर्तृकत्वव्याप्यमिति सिध्यति। इदमेव पूर्वं पक्षधर्मताबलादित्युक्तम्। पूर्वपक्षिणस्तु यदाऽसर्वज्ञशरीरिकर्तृकत्वस्यानुपपत्तिप्रतिसन्धानं भवति तदा तस्योपस्थितस्य घटादौ दृष्टस्य सकर्तृकत्वत्वेन कार्यत्वव्यापकतया गृह्यमाणस्यापि असर्वज्ञशरीरिकर्तृकत्वत्वेन विशेषरूपेण कार्यत्वावच्छिन्नव्यापकतया ग्रहणावश्यं भावेन तेनानुमितिविरोध इत्यभिप्रायः। इदमेव पूर्वं व्याप्तिबलात् सिध्येदित्युक्तम्।

नचास्य व्यर्थविशेषणत्वेनातुल्यबलत्वम्। व्यर्थत्वं यदि प्रयोजनसामान्याभावः, तदाऽसिद्धिवारणरूपप्रयोजनसद्भावान्न व्यर्थत्वम्। अथ व्यभिचारवारणरूपप्रयोजन-विशेषाभावः, तदा स न दोष एव। नह्येकस्मिन् प्रयोजने सति प्रयोजनान्तराभावेन व्यर्थत्वम्। तदा हि व्यभिचारवारकस्याप्यसिद्धिवारणरूपप्रयोजनाभावेन व्यर्थत्वापत्तेः। व्यभिचारवारकविशेषणवत्येव व्याप्तिर्वर्तत इति चेन्न। निर्विशेषणेऽपि गोत्वादौ व्याप्तिसद्भावात्। व्यभिचारावारकविशेषणशून्य एव व्याप्तिरित्यपि न वाच्यम्। तादृश प्रमेयत्वादिमतिधूमादौ व्याप्तिसत्वात्। नीलधूमादिकं न व्याप्यं, व्यभिचारावारकविशेषण-वत्त्वादित्यत्र व्याप्तिघटकयोरव्यभिचारसहचारयोस्सत्वे तद्विरहसाधनस्य बाधितत्वाच्च। न च निरुपाधिकत्वरूपव्याप्तिविरह उपाधिस्साध्यः[36]।

स च धूमादिरेवेति वाच्यम्। तस्य वह्निरूपसाध्याव्यापकत्वात्, नीलधूमरूपसाधन-व्यापकत्वाच्च। अथ यद्रूपवत्तया ज्ञायमान एव यस्मिन्विशेष्ये यत्साध्यनिरूपित-व्याप्तिग्रहस्तद्रूपावच्छिन्नमेव तत्साध्यव्याप्यम्। प्रकृते च शरीरविशेषणं विनाऽपि जन्यत्वाभावत्वेनैवोपस्थितेऽकर्तृकत्वनिरूपितव्याप्तिराकाशादौ सुग्रहेति न शरीराजन्यत्वं व्याप्यम्। तथा च शरीराजन्यत्वादित्युच्यमाने व्यापत्वासिद्धिः। तत्परिहारार्थमजन्यत्वादित्येवोक्तौ स्वरूपासिद्धिः। तदुक्तम् – "एकामसिद्धिं परिहरतो द्वितीयासिध्यापत्ते"रिति।

नचैवं रूपादिषु पञ्चसु मध्ये रूपस्यैव ग्राहकत्वादित्यादावपि रूपादिषु पञ्चसु मध्य इति विशेषणं विनाऽपि व्याप्तिग्रहात्तद्रूपोपहितस्य न व्याप्यत्वमिति व्याप्यत्वासिद्धिस्स्यादिति वाच्यम्। तेन विशेषणेन विना हेतोरप्रसिद्धतया व्याप्तेर्ग्रहीतुमशक्यत्वात्। किञ्च रूपस्यैव व्यञ्जकत्वादित्यत्र रूपस्यैव व्यञ्जकद्रव्यत्वादित्यर्थः कथनीयम्। अन्यथा सन्निकर्षे व्यभिचारापत्तेः। तथा च रूपादिषु पञ्चसुमध्य इति विशेषणं हेतुप्रसिद्धिं संपाद्य द्रव्यपदकरणीयसन्निकर्षनिष्टव्यभिचारवारणे व्यभिचारसंपादनद्वारोपयुज्यत इति व्याप्तिग्राहकमेवेति तद्रूपावच्छिन्ने व्याप्तिर्युक्तेति। मैवम् – शरीरजन्यत्वलक्षणोपाधिक-धर्माभावस्य[37] प्रतियोगिघटकशरीरोपस्थितिमन्तरेण दुर्ग्रहतया तन्निष्ठव्याप्तेरपि शरीरविशेषण- मन्तरेण ग्रहाभावात् शरीरजन्यत्वाभावस्य व्याप्तिसम्भवात्। अन्यथा निर्धूमोऽयमार्द्रेन्धनप्रभववह्निरहितत्वादित्यादिप्रसिद्धानुमानभंगप्रसंगात्। न च शरीराजन्यत्वे साधने अजन्यत्वमुपाधिः, तस्य पूर्वसाधनव्यतिरेकत्वात्। तस्याप्युपाधित्वे सत्प्रतिपक्षमात्रोच्छेदापत्तेः।।

## बाधः

अङ्कुराद्युत्पत्तिस्थले कुलालादेरिव कस्यचिदपि कर्तुरनुपलंभेन बाधश्च। न च तस्यायोग्यत्वे नानुपलम्भसम्भवान्न बाध इति वाच्यम्। एवं तर्हि शशेऽपि पशुत्वेना[38]योग्यशृङ्गानुमानापत्तेः। अथ शृङ्गत्वस्य योग्यत्वव्याप्यतया तादृशस्य[39] चानुपलंभेन योग्यानुपलम्भबाधः तर्हि

[36] (टि) उपाधिस्साध्य इति। नीलधूमपक्षकानुमान इत्यर्थः।

[37] (टि) उपाधिकधर्माभावस्येति। उपाधिरूपधर्माभावस्येत्यर्थः।

[38] (पा) शशे पशुत्वेन

[39] (टि) तादृशस्य चेति। योग्यस्य चेत्यर्थः।

कर्तृत्वस्यापि शरीरित्वव्याप्यतया शरीरस्य चानुपलंभेन तद्विशिष्टकर्तुरप्यनुपलम्भबाध एव।।

## उपाधिः

किञ्च सकर्तृत्वे शरीरिकर्तृकत्वमुपाधिः। न चाभेदात् व्याप्यव्यापकभावायोगः, विशिष्टाविशिष्टभेदेन तदुपपत्तेः। यद्वा – शरीरजन्यत्वमुपाधिः। ननु शरीरपदस्य साक्षादधिष्ठेयपरत्वे ईश्वरेण साक्षादधिष्ठितमहामायादिजन्यत्वात् जगतस्साधन-व्यापकत्वं, चेष्टाश्रयान्त्यावयविपरत्वे च हस्तादिजन्ये साध्याव्यापकत्वमिति चेन्न। तत्पदस्य चेष्टाश्रयमात्रपरत्वात्। अथ शरीरजन्यत्वं सकर्तृकत्वव्यापकं तदा स्यात्यदि-कर्तृजन्यत्वावच्छेदेन शरीरजन्यत्वं भवेत्कर्तृजन्यत्वस्य च शरीरजन्यतावच्छेदकत्वे तत्ग्रहः[40] पूर्वं वाच्यः। कर्तृजन्यत्वञ्च जन्यत्वावच्छेदेनैव गृहीतमिति तद्व्याप्यजन्यत्वाव्यापकतया साध्याव्यापकत्वान्नोपाधिरिति।

मैवम् – घटत्वपटत्वाद्यवच्छेदेन गृहीतस्य कर्तृजन्यत्वस्य शरीरजन्यतावच्छेदकत्व-ग्रहसम्भवात्। अथवा शरीरजन्यतावच्छेदको घटाद्यनुगतो जातिविशेष उपाधिः। न च तादृशजातिविशेषे मानाभावः। घटगोपुरवालुकासंस्थानविशेषादौ शरीरिकर्तृकत्वानुमानस्य[41] तत्र मानत्वात् न च शरीरजन्यत्वाद्युपाधेरेव[42] लिङ्गात्तदनुमितिः[43]। तस्यैवानुमेयत्वात्। न च जातिविशेषसिद्धावपि सकर्तृकत्वस्य तत् व्याप्यताग्राहकमानाभावः। व्यभिचारज्ञानविरहसहकृतसहचारग्रहविशिष्टस्याध्यक्षस्यैव सत्वात्। जन्यत्वस्यापि सकर्तृकत्वव्याप्तिग्राहकमस्तीति चेत्तथाऽपि सन्दिग्धोपाधित्वस्य वक्तुं शक्यत्वात्। यद्वा – अनणुत्वमुपाधिः। सकर्तृकत्वेनोभयसम्मते घटादौ सर्वत्र तत्सत्वेन साध्यव्यापकत्वात्। त्वन्मते जालसूर्यमरीचिस्थ सूक्ष्मभागे मतान्तरे द्वयणुकादौ साधनाव्यापकत्वाच्च। ननु – विमतमकर्तृकमणुत्वादित्युपाधिव्यतिरेकेण साध्यव्यतिरेके साध्यमाने भागासिद्धिरसाधा-रण्यं चेति चेन्न। उपाधेर्हि न सत्प्रतिपक्षोन्नायकतया दूषकत्वं, सत्प्रतिपक्षे उपाध्यनुद्-भावनप्रसङ्गात्, अन्धकारो द्रव्यं, स्वातन्त्र्येण प्रतीयमानत्वादित्यादावश्रावणत्वादेरनुपाधि-त्व[44]प्रसङ्गाच्च। किन्तु व्यभिचारोन्नायकत्वेन। तच्च प्रकृतेऽपि कार्यत्वं सकर्तृकत्वस्य व्यभिचारि, तद्व्यापकव्यभिचारित्वात्। यद्यत् व्यापकव्यभिचारि तत्तत्व्याप्यव्यभिचारीति सम्भवति।।

## प्रतिकूलतर्कः

प्रतिकूलतर्कपराहतञ्च सकर्तृकत्वानुमानम्। तथाहि – यदीश्वरः कर्ता स्याच्छरीरी स्यात्,

---

[40] (टि) तत्ग्रहः शरीरजन्यत्वावच्छेदेन कर्तृजन्यत्वग्रहः।

[41] (टि) अनुमानस्येति। घटगोपुरादिशरीरिकर्तृकं कार्यत्वादित्यनुमानम्।

[42] (टि) न च शरीरजन्यत्वाद्युपाधेरेवेति। स्थापकानुमानोपाधेरेवेत्यर्थः। अस्याशंकितुर्जाति-विशेषावच्छेदेन शरीरजन्यत्वसिद्धावपि जन्यत्वावच्छेदेन तदसिद्ध्याक्षित्यादावशरीरिकर्तृकत्वं निरङ्कुशं सिध्यतीत्याशयः। तस्यैवानुमेयत्वादित्यस्य कार्यत्वावच्छेदेनेत्यादिः।

[43] (टि) तदनुमितिः जातिविशेषानुमितिः। तस्यैव तस्यापीत्यर्थः।

[44] (टि) अश्रवणत्वस्य स्वातन्त्र्येण प्रतीयमाने शब्दे साधनाव्यापकत्वम्। अनुपाधित्वप्रसङ्गा-दिति। अन्धकारो न दव्यं श्रावणत्वादित्यत्र स्वरूपासिद्धिसंभवादित्यर्थः।

मलावृतज्ञानादिकस्स्यात्, सुखदुःखादिभागी स्यात्, प्रयोजनवान् स्यादिति्। किञ्चेश्वरस्य किं सर्वकार्यानुकूल एक एव यत्नः, उत तत्तत्कार्यानुकूलाः भिन्नाभिन्ना यत्नाः। आद्ये कार्यवैचित्र्यानुपपत्तिः। द्वितीये तेषां नित्यत्वादेव परस्परविरुद्धसृष्टिसंहारयोर्युगपदुत्पत्त्यापत्तिः।।

## अप्रयोजकत्वम्

अदृष्टद्वाराऽस्मदादिकृत्यैव जगदुत्पत्तिसम्भवादप्रयोजकत्वञ्च। नचादृष्टद्वारकास्मदादि-कृतिमात्रात्घटादिनिष्पत्त्यदर्शनेनादृष्टाद्वारककृतिरेव कार्यहेतुरिति वाच्यम्। तावताऽपि घटादिलक्षणे कार्यविशेष एवादृष्टाद्वारिकाकृतिरस्तु कारणं, तथाऽन्वयव्यतिरेकानुविधानात्। कार्यमात्रे तु कृतिमात्रमेव कारणमित्यप्रयोजकत्वमेवेति।।

## सर्वज्ञत्वाद्याक्षेपः

किञ्चास्य क्षित्यादिकर्तुः कथं सार्वज्ञ्यं सिध्यति। पक्षधर्मताबलादिति चेत् तावताऽपि क्षित्यादितत्प्रयोजनतदुपायमात्रज्ञातृत्वं सिध्यति, न तु घटादितदुपायाद्यभिज्ञत्वमपीति। एवं विमते क्षित्यादावेवेश्वरस्य कर्तृतया सिद्धेरघटादिकर्तृत्वे मानाभावान्न सर्वकर्तृत्वमपि युक्तम्। किञ्चेश्वरस्य सर्वज्ञत्वांगीकारे विषयावच्छिन्नास्मदादिभ्रान्तिज्ञत्वेन भ्रान्तत्वापत्तिः। एवं सर्वकर्तृत्वे अस्मादाद्यनुष्ठीयमाने विहितनिषिद्धादावपि कर्तृत्वेन धर्माधर्म-स्वर्गनरकादिप्राप्तिरपि भवेत्।।

## ईश्वरैकत्वाक्षेपः

अपि च – क्षित्यादिकर्तुरैक्यं कुतस्सिध्येत्। नह्येकत्वमपि व्यापकतावच्छेदककोटिप्रविष्टम्। रथगोपुरादौ व्यभिचारात्। न च तत्राप्येकस्थपतीच्छानुवर्तने नैवान्येषां कर्तृत्वादेककर्तृकत्वमस्तीति न व्यभिचार इति वाच्यम्। तथापि भिन्नकर्तृकयो रथगोपुरयोर्व्यभिचारात्। न च तत्रापि प्रत्येकमेककर्तृकत्वमस्तीति वाच्यम्। तर्हि क्षित्यङ्कुरादिष्वपि प्रत्येकमेककर्तृत्वेनापि साध्यसिद्धिसम्भवेन क्षितिकर्तुरङ्कुरादिकर्त्रैक्यासिद्धेः। ननु येन विनाऽनुपपत्तिस्तावन्मात्रं सिध्यति। एवञ्च कर्तारं विना क्षित्यादिकार्यन्ननिर्वहतीत्येकः कर्ता सिध्यति। न तु नाना। तद्भेदं विनाऽपि कार्यस्य निर्वाहादिति चेत्, मा सिध्यतु भेदः। तदेकत्वमपि न सिध्येत्। तेन विनाऽनुपपत्त्यभावात्। कर्तारं विना ह्यनुपपत्तिः, न तु तदेकत्वं विनाऽपि। न च भेदे प्रमाणाभावादेकत्वसिद्धिः। एकत्वे प्रमाणाभावात्, भेदसिद्धेरपि सुवचत्वात्। न च लाघवादेकत्वसिद्धिः, तस्य व्यभिचारेणानुमितिमात्रहेतुत्वायोगात्, लाघवज्ञानजन्यानुमिति – हेतुत्वस्य चात्माश्रयनिरस्तत्वात्, रथगोपुरादौ सकर्तृकत्वानुमितेरपि लाघवसहकारेण तदेकत्वविषयकत्वापत्तेश्च। यदि च रथादिलक्षणं कार्यं नैकेन निर्मातुं शक्यमिति नैकत्वसिद्धिः, किन्तु भेदसिद्धिरेव, तदा सुतरां महीमहीधरादिलक्षणं कार्यमपि नैकेन कर्तुं शक्यमिति तन्नानात्वसिद्धिरेव स्यात्।।

## अर्थान्तरता

किञ्च – सकर्तृकत्वेऽपि क्षित्यादेः पूर्वसर्गान्तमुक्त एव भवतु कर्ता। एवं तस्मिन्नपि सर्गे

तत्पूर्वसर्गान्तमुक्त एव कर्ता। तस्य मुक्तिदायकोऽपि तत्तत्पूर्वसर्गमुक्त एव भवत्विति प्रवाहेश्वरपक्ष एव कक्षीकर्तव्यः। धर्मिकल्पनातो लघ्वी धर्मकल्पनेति न्यायेन सिद्धानामेव कर्तृत्वरूपधर्ममात्रकल्पने लाघवात्। नत्वतिरिक्त आत्मा तस्य कर्तृत्वञ्च कल्पनीयमिति पूर्वपक्षसंक्षेपः।।

## सिद्धसाधननिरासः

तत्रोच्यते – जगच्छब्देन कार्यमात्रं विवक्षितम्। न च घटादावंशतः सिद्धसाधनं, उद्देश्यायाः पक्षतावच्छेदकावच्छिन्ने सर्वत्र साध्यसिद्धेरनुदयेनां शतस्सिद्धसाधनानवकाशात्। न च पक्षतावच्छेदकाश्रये सर्वत्र साध्यसिध्यैव सिद्धसाधनाङ्गीकारेंऽशतस्सिद्धसाधन-मुच्छिद्येतेति[45] वाच्यम्। अनित्ये वाङ्मनसे इत्यादौ पक्षतावच्छेदकनानात्वस्थले वाक्स्वरूपपक्षतावच्छेदकावच्छिन्ने सर्वत्र साध्यसिद्धिसम्भवेन तत्रेवांशतस्सिद्धसाधन-स्य दोषत्वसम्भवात्। अस्तु वा पक्षतावच्छेदकाश्रये साध्यसिद्धिरनुमानफलं, तथाऽपि नांशतस्सिद्धसाधनं, सर्वकार्यत्वस्यैव पक्षतावच्छेदकत्वेन सर्वं कार्यं सकर्तृकमित्येवमाकारायास्तत्सामानाधिकरण्येन साध्यसिद्धेरभावात्। तथाऽपि घटस्य पक्षतावच्छेदकाश्रयत्वेन तत्र साध्यसिद्धौ कथं नांशतस्सिद्धसाधनमिति चेत् न। समुदितस्यैव पक्षतावच्छेदकाधिकरणत्वात्। घटो हि तावत्पक्षतावच्छेदकाश्रयैकदेशः, न तु तदाश्रय इति तत्र साध्यसिद्धावपि नांशतस्सिद्धसाधनम्। न चास्मिन् पक्षद्वये घटस्यापि पक्षकोटिनिक्षिप्तत्वाद्दृष्टान्तत्वानुपपत्तिरिति वाच्यम्। दृष्टान्तत्वे हि साध्यसाधन-वत्तया निश्चितत्वमेव प्रयोजकं, न तु पक्षातिरिक्तत्वं, विपक्षस्यापि तथात्वापत्तेः। तच्च प्रकृतेऽप्यस्त्येवेति दृष्टान्तत्वसम्भवात्।।

## पक्षतावच्छेदकनिरुक्तिः

अथवाऽदृष्टाद्वारकोपायगोचरप्रतिनियतविषयकृतिजन्यान्यत्वे सति जन्यत्वं घटाद्यात्मादिव्यावृत्तं पक्षतावच्छेदकम्। अत एव विप्रतिपन्नमात्रपक्षीकारेण **पौष्करे**ऽप्यनुमानं प्रयुक्तम् –

विवादाध्यासितं विश्वं विश्ववित्कर्तृपूर्वकम्।
कार्यत्वादावयोस्सिद्धं कार्यं कुम्भादिकं यथा।। इति।

तदवच्छिन्नश्चास्मन्मते शुद्धाध्वा। न च तस्य परमते असिद्धिः, उक्तरूपवत्वेनैव पक्षीकरणात्। यदि शुद्धाध्वत्वेन पक्षीक्रियते तदास्यादयं दोषः। परमते तु उक्तरूपवत्तया यत्सम्मतं पृथिव्यादि तस्यैव पक्षत्वमिति न कोऽपि दोषः। शब्दफूत्कारयोरपि पक्षबहिर्भावः। एवं ध्वंसोऽप्यस्मदाद्यकर्तृकः पक्ष एव। गङ्गास्पर्शोऽप्यदृष्टजनककृतिजन्यत्वेऽपि तदद्वारकोपायगोचरास्मदादिकृतिजन्यत्वात्पक्ष-बहिर्भूत एव। अदृष्टाद्वारकास्मदादिकृतिजन्यान्यत्वं वा पक्षतावच्छेदकं, केचित्तु, पृथिवी सकर्तृका न वा, जलं सकर्तृकं नवेत्याद्यनुगतनियामकानुगता लघ्वी विमतिरेव पक्षतावच्छेदिका, अत एव विमतामित्येव प्राचां प्रयोगः इत्याहुः। तन्न। पृथिवी सकर्तृका

[45] (टि) उच्छिद्येतेति। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्धेश्यत्वेऽपि सामानाधिकरण्येन साध्यासिद्धावपि सिद्धसाधनमित्येतदुच्छिद्येतेति भावः।

नवेति सन्देहं प्रति विमतम्। सकर्तृकमिति ज्ञानस्य भिन्नप्रकारत्वेनानिवर्तकतयाऽर्थान्तरापत्तेः। यद्वा – क्षितिरेव पक्षीक्रियते। न च पक्षातिरिक्तगोचरस्य व्यभिचारसंशयस्य दोषतयाऽङ्कुरे सन्दिग्धानैकान्त्यमिति वाच्यम्। पक्षपदस्य प्रतिज्ञाविषयपरत्वे पर्वत एव व्यभिचारसंशयेन तद्गोचरस्वार्थानुमानानुदयप्रसङ्गात्,[46] सन्देहविषयपरत्वेऽनुमानातिरिक्तसाधकमानाभावविशिष्टपरत्वे वाऽङ्कुरादेरपि तथात्वेन तदतिरिक्तत्वासिद्धेः। तथा च घटादौ निश्चितव्याप्तिकस्य कार्यत्वस्य यदि सन्देहविषयेऽङ्कुरादावपि दर्शनं तदा समूहालम्बनरूपैवानुमितिरुत्पद्यते[47]। अन्यथा क्षितिमात्रविषयेति न काप्यनुपपत्तिः। अत एव देहादिमात्रं पक्षीकृत्य **श्रीमन्मृगेन्द्रे**ऽनुमानमुक्तम् –

अथोपलभ्य देहादिवस्तुकार्यत्वधर्मकम्।
कर्तारमस्य जानीमो विशिष्टमनुमानतः।। इति।।

## साध्यनिरुक्तिः

साध्यमप्यत्रादृष्टाद्वारकोपायगोचरज्ञानचिकीर्षाकृतिमज्जन्यत्वमेव। न च क्षित्यादिजनकादृष्टस्येश्वरकृतिजन्यतया तदद्वारककृतिजन्यत्वं तत्र बाधितमिति वाच्यम्। यदवच्छिन्नं यज्जनयित्वैव यदवच्छिन्नं जनयति स तत्र तस्य व्यापारः। प्रकृते च कृतित्वरूपकारणतावच्छेदकावच्छिन्नस्य कुलालकृत्यादेर्जन्यत्वरूपस्वकार्यतावच्छेदकावच्छिन्नं घटं प्रत्यदृष्टमजनयित्वाऽपि जनकत्ववत्तादृशेश्वरकृतेः तादृशक्षित्यादिकं प्रति अदृष्टमज्जनयित्वापि जनकत्वान्नेश्वरकृतेरदृष्टं द्वारमिति न बाधः।।

## हेतुनिरुक्तिः

कार्यत्वमप्युत्पत्तिमत्त्वम्। न च घुणाक्षरे व्यभिचारः, घुणस्याक्षरगोचरचिकीर्षाभावेन चिकीर्षाजन्यत्वाभाववितिति वाच्यम्। घुणस्य यथेष्टसञ्चारगोचरचिकीर्षासत्वेन तज्जन्यत्वस्य तत्र सत्वात्, ईश्वरस्याक्षरचिकीर्षासत्वेन[48] तज्जन्यत्वाच्च।।

## विरोधपरिहारः

न च विशेषविरोधः, व्याप्तिपक्षधर्मतोपनेययोरविरोधात्। कर्तृत्वमात्रं हि व्याप्त्युपनेयं, न तु तस्य शरीरित्वासर्वज्ञत्वादिकमपि। तथाविधेन कर्त्रा कार्यत्वस्य व्याप्तेस्त्वया मया च क्षित्यादौ व्यभिचारेणाङ्गीकारात्। कर्तृमात्रस्य च पक्षधर्मतोपनेयाशरीरत्वाद्यविरोधित्वात्। न च यः कर्ता सशरीरीति कुलालादौ व्याप्तिदर्शनेन कर्तृत्वमात्रमप्यशरीरत्वविरोधीति वाच्यम्। कर्तृत्वस्याशरीरत्वविरोधित्वं हि न तदभावरूपत्वम्। किन्तु तदभावव्याप्यत्वं, तेन चेश्वरश्शरीरीकर्तृत्वात् इत्यनुमातव्यम्। न चेदमनुमानं सम्भवति। ईश्वरस्यासिद्धावाश्रयासिद्धेः। सिद्धौ चाशरीरित्वेनैव। सिद्धेर्धर्मिग्राहकमानबाधात्। कर्ता शरीरैव

[46] (टि) स्वार्थानुमानानुदयप्रसङ्गादिति। स्वार्थानुमाने प्रतिज्ञाया अभावेन पर्वतस्य तद्विषयातिरिक्तत्वादिति भावः।

[47] (टि) समूहलंबनरूपा पृथिव्यङ्कुरादिविषयिणी।

[48] (टि) नन्वक्षरस्य यथेष्टसञ्चारगोचरचिकीर्षाजन्यत्वेऽतिप्रसङ्गः इत्याशङ्क्याहेश्वरेति। तस्य कर्तुः ।।

ज्ञानं मलावृतमेवेत्यादिव्याप्तिज्ञानं कर्तृत्वज्ञानत्वाद्याश्रये सर्वत्र शरीरित्वं मलावृतत्वञ्चावगाहमानं साक्षाद्विरोध्यवगाहित्वेन प्रतिबन्धकमिति यदुक्तं तदपि न समीचीनम्। उक्तव्याप्तेरेव विपक्षे बाधकतर्काभावेनासिद्धेः। कार्यत्वस्य सकर्तृकत्वव्याप्तेस्तु सिद्धकार्यकारणभावभङ्गप्रसङ्ग एव विपक्षे बाधकस्तर्क इति न हेतौ व्याप्त्यसिद्धिः। अन्यथा वह्निरपर्वतीय एवेत्यादि[49]व्याप्तिप्रतिसंधानात् प्रसिद्धानुमितेरपि विलयप्रसङ्गात्। वस्तुतस्तु इयमनुमितिर्नेश्वर तत् ज्ञानादावशरीरित्वमलानावृतत्वगोचरा, अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारत्वात्। किन्त्वेतदनुमित्युदयानन्तरमन्यैवानुमितिस्तद्गोचरा। तत्र चेश्वरश्शरीरी तत्ज्ञानं मलावृतमित्येवमाकारं प्रतिबन्धकं ज्ञानं नास्त्येवेति न कोऽपि दोष इति।।

## प्रतिपक्षप्रतिक्षेपः

प्रतिपक्षानुमानमपि व्यर्थविशेषणत्वेन व्याप्यत्वासिद्धम्। यद्विशेष्यतावच्छेदकावच्छिन्ननिष्ठा यत्साध्यनिरूपिता व्याप्तिर्येन विशेषणेन विना गृहीतुं न शक्यते तत्सार्थकं, शरीरजन्यत्वप्रतियोगिकाखण्डाभावनिष्ठव्याप्तेस्तेन विशेषणेन विना[50]ऽशक्यग्रहत्वेऽपि विशेष्यतावच्छेदकावच्छिन्नजन्यत्वाभावनिष्ठव्याप्तेस्तेन विनाऽपि ग्रहणात्। ननु यद्व्यक्तिनिष्ठेत्येव युक्तं, न तु यद्विशेष्यतावच्छेदकावच्छिन्ननिष्ठेति। गौरवात्। अन्यथा अभावत्वावच्छिन्नसकारणकत्वाभाव[51]निष्ठव्याप्तेर्जन्यत्वं विनाऽपि गृहीतुं शक्यत्वेन जन्यत्वस्यापि वैयर्थ्यापत्तेरिति चेन्मैवम्। एतावता व्यर्थविशेषणत्वाभावेऽपि शरीरजन्यत्वे कर्तृजन्यत्वव्यापकताया उपाधिनिरासस्थले निरसिष्यमाणत्वेन तदभावस्याकर्तृकत्वव्याप्तौ मानाभावात्। अन्ये तु अकर्तृकत्वानुमानस्य प्रसिद्धकर्त्रभावविषयस्य पक्षधर्मताबलादप्रसिद्धकर्तृसाधकं स्थापनानुमानं प्रतिभिन्नविषयत्वेनाविरोधितया न प्रतिपक्षत्वमित्याहुः। तन्न। सामान्यलक्षणानङ्गीकर्तृमते समानप्रकारत्वेनैव विरोधितयाऽकर्तृकत्वानुमानस्य प्रसिद्धकर्त्रभावविषयकानुमितिसामग्रीत्वेऽपि कर्तृत्वोपहिताभावानुमितिसामग्रीत्वेन विरोधस्य सुवचतया प्रतिपक्षत्वसम्भवात्। सामान्यलक्षणाङ्गीकर्तृमते तु कर्तृत्वसामान्येनोपस्थितस्याप्रसिद्धस्यापि कर्तुरभावस्यानुमितौ भानसम्भवेन समानविषयतयाऽपि विरोधसम्भवेन प्रतिपक्षत्वात्। अन्यथा व्यक्तिसाधकानुमाने प्रतिसाधनोच्छेदापत्तेः। अजन्यत्वोपाधिप्रतिहतञ्च प्रत्यनुमानम्। न च तस्य पूर्वसाधनव्यतिरेकत्वेनोपाध्याभासत्वम्।

तथा सति – यागीय हिंसा अधर्महेतुर्न भवति अनिषिद्धत्वादिति स्थापनानुमानवादिना सा अधर्महेतुर्हिंसात्वादिति प्रत्यनुमानवादिनं प्रत्युद्भावितो निषिद्धत्वादिरप्युपाधिर्नभवेत्। यदि च पूर्वसाधनव्यतिरेकत्वं नानुपाधिताप्रयोजकं, किन्तु उपाधित्वाप्रयोजकम्, अन्यथा प्रतिपक्षोच्छेदापत्तेरित्युपाधिलक्षणलक्षितत्वेन निषिद्धत्वस्य पूर्वसाधनव्यतिरेकत्वेऽप्युपाधिता, तदा अजन्यत्वस्यापि तथात्वमस्तु। अतो न सत्प्रतिपक्षता।।

---

[49] (टि) वह्निरपर्वतीय एवेति। केषाञ्चिद्वह्निनामपर्वतीयत्वेन यथा न सर्वेषामपि तथात्वमिति न व्याप्तिः तथा प्रकृतेऽपि। तत्रानुमानात्। पूर्वं पर्वतीयत्वसन्देहवदत्रापि कर्त्रादावशरीरत्वादिसन्देहो वर्तत इति भावः।।

[50] (टि) तेन विशेषणेन विना-शरीररूपविशेषणेन विना।

[51] (टि) सकारणकत्वाभावेति। जन्यत्वाभावेत्यर्थः।

## बाधपरिहारः

नापि योग्यानुपलब्धिबाधः। परमात्मनोऽयोग्यत्वेन योग्यानुपलब्ध्यभावात्। कर्तुश्शरीरिता नियमेन शरीरानुपलब्ध्या तद्विशिष्टस्याप्यनुपलम्भबाध इति तु कर्तृत्वस्य शरीरित्वव्याप्तिनिरासेन निरस्तं वेदितव्यम्। न चैवं श्रृङ्गित्वस्यापि योग्यत्वनियतत्वे मानाभावेन योग्यानुपलब्ध्यभावेन पशुत्वेन शशेऽयोग्यं श्रृङ्गमपि सिध्येदिति वाच्यम्। श्रृङ्गित्वे पशुत्वस्याप्रयोजकतया व्याप्त्यभावेन तस्य तदसाधकत्वात्।।

## उपाधिनिरासः

यदप्युक्तं घटात्वाद्यवच्छेदेन गृहीते कर्तृजन्यत्वे तदवच्छेदेन शरीरजन्यत्वग्रहाच्छरीरजन्यत्वं कर्तृजन्यत्वव्यापकमिति भवत्युपाधिरिति, तदप्ययुक्तम्। अनुगतस्य जन्यत्वस्य सम्भवेऽननुगतस्य घटत्वादेरवच्छेदकत्वेन ग्रहासम्भवात्। न चैवं शरीरजन्यत्वेऽप्यनुगतस्य कर्तृजन्यत्वस्यावच्छेदकत्वसम्भवे घटत्वादेस्तथात्वं न युक्तमिति तस्यैवावच्छेदकत्वं स्यादिति वाच्यम्। घटत्वादेस्तदवच्छेदकत्वस्यावश्यकत्वात्। तथाहि – अनुपस्थितस्यावच्छेदकत्वग्रहासम्भवेन कर्तृजन्यत्वस्य पूर्वमुपस्थितिर्वाच्या। तत्र चावच्छेदकापेक्षायामनुगतजन्यत्वमेव बाधकाभावेनोपतिष्ठते। तथा च तदवच्छेदेन गृहीतस्य कर्तृजन्यत्वस्य शरीरजन्यतावच्छेदकत्वासम्भवेनागत्या घटत्वादेरेवावच्छेदकत्वं युक्तमिति।

किञ्च – कर्तृजन्यत्वे यदि जन्यत्वमवच्छेदकं तदवच्छेदेन गृहीतस्य कर्तृजन्यत्वस्य शरीरजन्यतावच्छेदकत्वासम्भवादननुगतमेव घटत्वादिकमवच्छेदकं, यदि तु शरीरजन्यत्वे कर्तृजन्यत्वमवच्छेदकं, तदा कर्तृजन्यत्वे जन्यत्वस्यावच्छेदकत्वासम्भवात् घटत्वादिकमेवावच्छेदकमित्युभयत्रानुगतावच्छेदकस्यासम्भवेन एकत्रानुगतस्यापरत्राननुगतस्य चावच्छेदकत्वे वाच्ये किं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं, शरीरजन्यत्वे तु घटत्वादिकमिति स्वीकर्तव्यम्, उत शरीरजन्यत्वे कर्तृजन्यत्वमवच्छेदकं, कर्तृजन्यत्वे घटत्वादिकमिति सन्देहे लाघवाज्जन्यत्वमेवावच्छेदकं, न तु कर्तृजन्यत्वं[52], गौरवात्। न च भिन्नविषयत्वान्नलाघवगौरवावतारः। एकस्मिन्नवच्छेद्येहीदमिदं वाऽवच्छेदकमिति विषये लाघवमवतरति, अवच्छेदभेदे तूभयमपि स्वस्वविषयेऽवच्छेदकं स्यात्। अविरोधात्। यथा मृज्जन्यतायां घटत्वं तन्मात्रजन्यतायां भूतत्वं चावच्छेदकमिति न लाघवावतार इति वाच्यम्।

विरोधस्यैव तदवतारप्रयोजकत्वात्, उभयत्रानुगतावच्छेदकासम्भवेन प्रकृतेऽपि विरोधस्य प्रदर्शितत्वात्। शरीरजन्यत्वस्योपाधित्वनिरासादेव च न शरीरिकर्तृकत्वमुपाधिः, नापि शरीरजन्यतावच्छेदको घटाद्यनुगतो जातिविशेष उपाधिः। शरीरजन्यत्वानुमानस्य घटत्वादिनैव लिङ्गेनोत्पत्य तादृशजातिविशेषस्यैवासिद्धेः। न च शरीरजन्यतावच्छेदकत्वेन तत्सिद्धिः। वह्निकार्येषु तद्रूपधूमादिष्विवाननुगतस्यैवावच्छेदकत्वसम्भवात्। अस्तु वा जातिविशेषः। तथाऽपि तस्य सकर्तृकत्वव्यापकत्वे विपक्षे बाधकतर्काभावेन साध्यव्यापकत्वाभावान्नोपाधित्वं युज्यते। जन्यत्वस्य तु कर्तृजन्यतावच्छेदकत्वेन गृहीततया कारणाभावे कार्यानुदयप्रसङ्गरूपविपक्षे बाधकतर्कसद्भावाद्व्याप्यत्वमिति। विपक्षे बाध–

---

52 (टि) न तु कर्तृजन्यत्वमित्यस्य शरीरजन्यत्व इत्यादिः।

कतर्काभावादेवानणुत्वमपि नोपाधिः। अणोरपि पक्षतया तदन्यत्वस्य पक्षेतरत्वरूपत्वाच्च।

## प्रतिकूलतर्कनिरासः

नापि प्रतिकूलतर्कपराघातः, तर्कस्येश्वर तज्ज्ञानादिपक्षकत्वे तस्यासिद्धावाश्रयासिद्धेः। सिद्धौ च धर्मिग्राहकप्रमाणबाधात्। यदि क्षित्यादिकं सकर्तृकं स्यात्, शरीरिकर्तृकं स्यात्, मलावृतज्ञानकर्तृकं च स्यात्, इति क्षित्यादिपक्षकस्य च तर्कस्य सकर्तृकत्वं प्रतिशरीरिकर्तृत्वस्य व्यापकता निरासेन प्रशिथिलमूलतयाऽऽभासत्वात्। यदप्युक्तम् –

किमीश्वरस्य सर्वकार्यानुकूल एको यत्नः।
उत तत्तत्कार्यानुकूलाभिन्नभिन्ना।।

इत्यादि, तदप्ययुक्तम्। एकस्यैव तत्तद्विचित्रादृष्टसहकारिवशेन विचित्रकार्यजनकत्वोपपत्तेः संहारहेत्वदृष्टाभावात्तत्पाकाभावादेव वा न सृष्टिसमये संहारोत्पादोऽपि।।

## अप्रयोजकत्वनिरासः

यदप्युक्तम्, अदृष्टाद्वारकत्वस्य विशेषसामग्र्यामेव हेतुतावच्छेदककोटिनिवेशसम्भवान्न सामान्यसामग्र्यामपि तत्कल्पनं युक्तमित्यप्रयोजकत्वमिति, तदप्ययुक्तम्। एवं सति पाण्डरधूमे पलालवह्निः कारणं, नीलधूमे कस्तूरिकाप्रभववह्निः, धूममात्रे वह्निमात्रमिति सामान्यसामग्र्यां वह्नित्वस्यापि जनकतावच्छेदकत्वे मानाभावात्प्रसिद्धानुमानमप्यप्रयोजकं स्यात्। यदि च यद्विशेषयोरिति न्यायेन वह्निविशेषस्य धूमविशेषजनकत्वमिति वह्निमात्रं धूममात्रे कारणमिति नाप्रयोजकता, तर्हि तेनैव न्यायेन घटेऽदृष्टाद्वारककुलालकृतिः कारणं, पटे तादृशकुविन्दकृतिरित्यदृष्टाद्वारककृतिविशेषस्य कार्यविशेषे घटादौ करणत्वेनादृष्टाद्वारककृतिसामान्यं कार्यसामान्ये जनकमितीहाप्यप्रयोजकत्वशङ्का न युक्ता।

सर्वकर्तृत्वसिद्धिरपि कार्यत्वस्य सर्वकार्यत्वस्य च पक्षतावच्छेदकत्वे युक्तैव। अदृष्टा-द्वारकास्मदादिकृतिजन्यान्यत्वे क्षितित्वे च पक्षतावाच्छेदके तत्सिद्धिरनुमानान्तरेण।।

## सार्वज्ञ्यादिसमर्थनम्

सर्वस्यापि च कार्यतदुपायान्यतररूपत्वेन कार्यमात्रे कार्यतदुपायाभिज्ञजन्यत्वे साध्यमाने सार्वज्ञ्यसिद्धिरपि युक्ता। कार्यविशेषपक्षत्वे तु सार्वज्ञ्यं पूर्ववन्मानान्तरगम्यमेव। न च सर्वज्ञत्वे विषयावच्छिन्नास्मदादिभ्रान्तिज्ञत्वेन भ्रान्तत्वापत्तिरिति पूर्वोक्तं युक्तम्। ज्ञानस्य भ्रान्तिविषयविषयत्वेऽपि भ्रान्तित्वाभावात्। तथाहि – किमिदं भ्रान्तित्वं यत्भ्रान्तिविषयत्वेनापाद्यते। न तावदसदर्थविषयकत्वं, तस्य भ्रमेऽप्यनङ्गीकारात्। खपुष्पमसदिति ज्ञानेऽतिव्याप्तेश्च। नाप्यसद्विषयकसत्वावगाहिज्ञानत्वं, सत्यसत्त्वज्ञाने शुक्त्यादौ रजतज्ञाने चाव्याप्तेः। नापि तदभाववद्विषयक तज्ज्ञानत्वं, वह्निप्रमायाऽपि वह्नित्वाभावव-द्वह्नित्वविषयकतयाऽतिव्याप्त्यापत्तेः। नापि तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वं, घटपटाविति समूहालम्बनप्रमायामतिव्याप्तेः। नापि तदभाववद्विशेष्यकत्वावच्छेदेन

तत्प्रकारकत्वम्। एतस्य भ्रान्तिलक्षणत्वेऽपि इदं रजतत्वेन जानामीति भ्रान्तिगोचरे ज्ञाने भ्रान्तिगतरजतत्वप्रकारकत्वप्रकारकेऽसत्वेन भ्रमविषयकत्वेनापादयितुमशक्यत्वात्। ईश्वरस्य विहितनिषिद्धादौ कर्तृत्वेऽपि मिथ्याज्ञानतद्वासनाद्यभावान्नधर्माधर्मादिः। तदाभावान्न स्वर्गनरकादिकमपि। एकत्वसिद्धिस्तु लाघवात्। न चानुमितौ लाघवोपस्थितजन्यतावच्छेदकं निर्वक्तुमशक्यम्। लाघवोपस्थितिसमानकालीन न सम्भवल्लघ्वर्थविषयकानुमितित्वस्यैव वा तथात्वात्। रथगोपुरादावपि बाधानवतारदशायामेककर्तृकत्वानुमितिरिष्टैव। सर्वस्यापि भूतभाविकार्यस्यैककर्तृकत्वसाधनादेव प्रवाहेश्वरपक्षोऽप्यनुपपन्नः। तन्मते तत्तत्सृष्टिकालीनस्यैव कार्यस्य तत्तत्कर्तृकतया सर्वस्यापि कार्यस्यैककर्तृकत्वानङ्गीकारात्।

ननु तथाऽपीयमनुमितिरयथार्था। अशरीरिविशेष्यकत्वावच्छेदेन कर्तृत्व प्रकारक-ज्ञानत्वात्, धर्माधर्मादिरहिते तज्ज्ञानात्वाद्वा। नचोपजीव्यबाधः, अनुमितिमात्रस्योपजीव्यत्वेन तद्यथार्थत्वस्यानुपजीव्यत्वेन तद्बाधेऽप्यविरोधादिति। मैवम् – अयथार्थत्वप्रयोजक-दोषाभावेनानुमानस्याप्रयोजकत्वात्। अन्यथा पर्वते वह्न्यनुमितिरयथार्था। उभयसिद्धवह्निमद्भिन्ने वह्निज्ञानत्वादित्यादिना प्रसिद्धानुमितेरप्ययथार्थत्वापत्तेः। ननु तथाऽपि कर्त्रैकत्वे किं प्रमाणम्। न तावल्लाघवं, तस्य प्रमाणत्वेनानङ्गीकारात्। नापि तत्सहकृतम्। प्रकृतानुमानम्। अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वेन एकत्वप्रकारकज्ञानजनने तस्यासामर्थ्यात्। न चोपनीतस्यापि भानसम्भवेन व्यापकतावच्छेदकमात्रप्रकारकत्वमसिद्धमिति वाच्यम्।

उपनीतांशे अनुमितिसामग्र्यभावेनानुमितिविषयत्वासम्भवात्। प्रत्यभिज्ञादिप्रत्यक्षे तु उपनीते तत्तादवुपनयस्यैव सन्निकर्षस्य सत्वेन प्रत्यक्षसामग्रीसत्वाद्युक्तं प्रत्यक्षविषयत्वम्। न चैवं पर्वतत्ववह्नित्वादेरप्यनुमितौ भानं न स्यात्, तद्व्याप्यज्ञानरूपानुमितिसामग्र्यभावात्, पर्वतत्ववह्नित्वा-द्युपस्थितिसहितवह्निव्याप्यवत्त्वज्ञानस्यैव तदनुमितिसामग्रीत्वेन भानाभ्युपगमेऽन्यस्याप्युपनीतस्य भानमविरुद्धमिति वाच्यम्। परामर्शस्य पक्षतावच्छेदकवत्तयोपस्थितपक्षविशेष्यक-साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकानुमितित्वावच्छिन्नानुमितिजनकस्वभावतया पर्वतत्ववह्नित्वादिगोचरज्ञानजनकत्वेऽपि तदन्योपनीतगोचरज्ञानजनकत्वस्यायुक्तत्वात्। उपनीत-धर्मप्रकारकत्वस्यापि जन्यतावच्छेदककोटौ निवेशे मानाभावात्।

किञ्च – यद्यद्गततयोपनीतं तद्विशेष्यकतत्प्रकारकत्वं वा कार्यता वच्छेदकं, उपनीतधर्मप्रकारकत्वमात्रं वा। नाद्यः। एकत्वस्य प्रमाणाभावेन कर्तृगतत्वेनानुपस्थित्यैकत्वप्रकारककर्तृगोचरानुमित्यनुपपत्तेः। नापि द्वितीयः। वह्न्याद्यनुमितावुपनीततार्णत्वादिविषयकत्वापत्त्या[53] तद्गोचरतार्णत्वादिसंशयानुपपत्तेः। ननु तार्णत्वमात्रोपस्थितौ तद्विषयकत्वमनुमितेरिष्टमेव। तद्विरोधिपार्णत्वाद्युपस्थितौ तु परस्परविरोधान्नैकस्याप्यनुमितौ भानमिति चेन्न। इहाप्येकत्वानेकत्वोपस्थितिसम्भवेनानुमितेः एकत्वविषयकत्वानुपपत्तेः। पार्णत्वाद्यनुपस्थितिमात्रेतार्णत्वादिनियतलिङ्गाभावेऽपि तस्योपस्थितिमात्रेणानुमितिविषयत्वस्यानुभवविरुद्धत्वाच्च। अनुमितेरुपनीत-मात्रविषयकत्वासम्भवेऽपि लाघवोपनीतविषयकत्वं स्यादेवेत्यप्यत एव निरस्तम्।

लाघवोपस्थितिसमानकालीनपरामर्शत्वस्य जनकतावच्छेदकत्वे तदुपस्थिति-

[53] (टि) तार्णत्वादिविषयकत्वापत्त्येति। सन्निकृष्टतार्णगृहप्रत्यक्षोपनीततार्णत्वविषयक-त्वापत्त्येत्यर्थः।

कालीनसम्भवल्लघ्वर्थविषयताकानुमितित्वस्य जन्यतावच्छेदकत्वे च मानाभावात्। रथादावपि सकर्तृकत्वानुमितेः कर्त्रैक्यविषयत्वापत्तेश्च। न च बाधकानवतारदशायां तदिष्टमिति वाच्यम्। तथा सति घटपटादौ नानैककर्तृकत्वसंशयानापत्तेः, संप्रतिपन्नानामेव[54] मुक्तात्मनां कर्तृत्वमात्रकल्पने लाघवेन तदतिरिक्तधर्मिकल्पनायामेव गौरवेण लाघवस्यैवासिद्धेश्च। अन्यथा रूपाद्युपलब्धिपञ्चकपक्षककरणजन्यत्वानुमानेन चक्षुराद्यतिरिक्तस्य सर्वानुगतस्यैकस्य करणस्य सिध्यापत्तेः। न च चक्षुरादिना सिद्धसाधनम्, अनुमानस्य लाघवसहकारेण सर्वानुगतैककरणगोचरानुमितिजनकतया तदसिध्या[55] सिद्धसाधनानवकाशात्। यदि च क्लृप्तानामेव चक्षुरादीनां जनकत्वसम्भवे लाघवमेव नास्तीत्युच्यते, तदा प्रकृतेऽपि तुल्यम्। तस्माल्लघ्वर्थविषयकत्वस्य जन्यतावच्छेदकत्वमानाभावात् घटादिषु नानैककर्तृकत्वे संशयानापत्तेर्धर्मिकल्पनात् इत्यादिन्यायेन लाघवस्यैवासिद्धेश्च न लाघवेन कर्त्रैक्यसिद्धिः। नापि क्षितिकर्ता अङ्कुरकर्त्रभिन्नः, अशरीरकर्तृत्वादङ्कुरकर्तृवदित्याद्यनुमानान्तरेण तत्सिद्धिः। अशरीरेण केनचित्कर्त्रा सृष्टशरीरस्यैव कस्यचित्क्षितिकर्तृत्वसम्भवेनासिद्धेः, शरीरिणामिवाशरीरिणामपि नानात्वसम्भवेनाप्रयोजकत्वाच्च। कर्त्रैक्यासिद्धेरेव च सर्वकर्तृत्वाभावान्न सर्वज्ञत्वमपि तस्य सिध्यति। सर्वकर्तृत्वसिद्धौ हि –

सर्वज्ञस्सर्वकर्तृत्वात् साधनाङ्गफलैस्सह।
यो यज्जानाति कुरुते स तदवेति सुस्थितम्।।

इति **मृगेन्द्रोक्तरीत्या** सर्वज्ञत्वं सिध्येत्। तदेव तु असिद्धमित्युक्तम्। कर्तुर्जगदुपादानत्वस्यैतदनुमानागम्यत्वाच्च। तस्मात्सर्वोपादानत्वसार्वज्ञ्यादिविशिष्टस्सर्वकर्तानानुमानगम्य इति। सत्यम् ईदृशश्शास्त्रेणैव बोध्यः। अनुमानन्तु संभावनाबुद्धिमात्रजनकम्। अत एव शास्त्रयोनित्वाधिकरणे जगज्जन्मादिकारणं ब्रह्मशास्त्रैकगम्यम् उत प्रमाणान्तरेणापीति संशये जगतस्सावयवत्वेन कार्यत्वात्स्वोचितकर्तृजन्यत्वानुमानेन सर्वज्ञत्वाद्युपेतस्य कर्तुरधिगमसम्भवान्नशास्त्रैकगम्यं ब्रह्मेति प्राप्यशास्त्रश्रवणमन्तरेण ब्रह्मणो बोधासम्भवस्य श्रुतिषु प्रतिपादनात्कार्यत्वेन कर्तृमात्रानुमानेऽपि विचित्ररचनरथगोपुरप्रासादादेर्बहुकर्तृकत्वस्य दर्शनेनैकत्वस्यासिद्धेरुपादानत्वस्य कथञ्चिदप्यसिद्धेश्च निमित्तोपादानशक्तियुक्तमेकं जगत्कारणं ब्रह्मशास्त्रैक गम्यमिति राद्धान्तितम्। अत एव च **सूतसंहितायामपि** परशिवं प्रकृत्याम्नायते – आम्नायान्तैकसंवेद्यमशेषक्लेशनाशनम्। इति।

**पराशरोपपुराणे**ऽप्युक्तम् –

धर्मेऽधर्मे शिवे चैव प्रमाणं वेद एव न। इति।

**शिवधर्मोत्तरेऽपि** – "शैवागमैश्शिवो वेद्य" इति पठ्यते। न चास्मद्वचनादागमवेद्यत्वमेव प्रतीयते, न प्रमाणान्तरगम्यत्वनिषेधोऽपीति वाच्यम्। शिवगतस्य शैवागमवेद्यत्वस्य लोकत एवावधारितत्वेनास्य वचनस्य मानान्तरागम्यत्व एव तात्पर्यात्। निगमागमप्रसिद्धत्वमेव हृदि निधायाह – **स इति**।।

---

[54] (टि) संप्रतिपन्नानां – उभयसम्मतानम्।

[55] (टि) तदसिध्या–चक्षुराद्यसिध्या।

## अनुमानाप्रामाण्यम्

नन्वनुमानाख्यं प्रमाणमेव नास्ति। तद्धेतुत्वाभिमतस्य व्याप्तिग्रहस्यासम्भवात्। तथाहि – व्याप्तिग्राहकं न तावत्प्रत्यक्षं, तस्य व्याप्तिनिश्चायकत्वे सन्निकृष्टे धूमादौ व्याप्तिसंशयानापत्तेः। न च भूयस्सहचारावसायरूपसहकारिविरहप्रयुक्तस्स इति वाच्यम्। तत्सत्वेऽपि व्याप्तिसंशयात्। न च तर्कस्य व्याप्तिग्रहसहकारिणो व्यतिरेकात्संशयः। तर्कस्यापि व्याप्तिनिश्चयमूलकत्वेनानवस्थापत्तेः। अनौपाधिकत्वग्रहरूपसहकार्यभावादपि न तत्संशयः। योग्योपाधिव्यतिरेकस्य योग्यानुपलब्ध्या सुग्रहत्वेऽप्ययोग्योपाधिव्यतिरेकस्याशक्यग्रहत्वेनो–पाधिसामान्यव्यतिरेकग्रहस्यैव असम्भवात्। यावत्साध्यव्यापकव्याप्यत्वरूपस्य यावत्साध–नाव्यापकाव्याप्यसाध्यसामानाधिकरण्यरूपस्य वाऽनौपाधिकत्वस्यातीतानागतादिघटित यावदर्थसहितत्वेन दुर्ग्रहत्वाच्च।

व्यभिचारशङ्काविरहसहकृतसहचारदर्शनमेव सहकारीति चेन्न। व्यभिचारशङ्काविरहः किमव्यभिचारनिश्चयाधीनः, किं वा तर्कायत्तः, किं वा कोटिद्वयोपस्थित्यादिविरहप्रयुक्तः। नाद्यः, अन्योन्याश्रयापत्तेः, अव्यभिचारनिश्चयात् व्यभिचारशङ्काविरहः, व्यभिचारशङ्काविरहाच्चाव्यभिचारनिश्चय इति। द्वितीयोऽप्यनवस्थापत्त्यैव निरस्तः। क्वचित्तर्कमूलभूतव्याप्तौ स्वक्रियाविरोधादेव न व्यभिचारशंकेति चेन्न। स्वक्रियायाः स्वप्रवृत्तिरूपाया विरोधिनिश्चयत्वविरहेणानिवर्तकत्वात्। तज्जनको निश्चयो निवर्तक इत्यपि न युक्तम्। पूर्ववृत्तित्वमात्रग्रहस्य तदजनकत्वात्, नियतपूर्ववृत्तित्वग्रहस्य च नियमरूपव्याप्तिविषयकत्वेन पुनरप्यनवस्थापत्तेः। नापि तृतीयः। साधारणस्य चक्षुरादिकरणस्य कोट्यनुपस्थितिप्रयुक्तव्यभिचारसंशयविरहमात्रेणाव्यभिचारग्राहकत्वे तत्प्रयुक्ते नैवाव्यभिचारसंशयविरहेण व्यभिचारग्राहकत्वस्याप्यापत्तेः। दूरादूर्ध्ववस्तुसन्निकर्षमात्रेण पुरुषत्वादिसंशयविरहेऽपि तन्निश्चयस्यानिष्पत्तेश्च।

यावत्साधनाश्रयवृत्तिसाध्यकत्वरूपायाव्याप्तेरतितानागतविप्रकृष्टसाधनाश्रयस्य प्रत्यक्षेणा–शक्यग्रहतया सहकारिसहस्रसन्निधानेऽपि ग्रहणायोगाच्च। ननु व्याप्तिर्न यावत्साधनाश्रयघटिता, किन्तु साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकाश्रयसाध्यसामानाधि–करण्यरूपा। सा च योग्ये वह्नित्वादौ घटत्वादिनिष्ठस्य स्मृतस्य योग्यस्य धूमादिसमानाधिकरणा–त्यन्ताभावप्रतियोगितावच्छेदकत्वस्यानुपलब्ध्या भावग्रहे शक्यग्रहेति चेत्, मैवम् – अनुपलब्धिमात्रं हि नाभावनिश्चायकम्। अन्धकारे घटाद्यभावनिश्चयापत्तेः। आलोकस्य घटाद्यभावग्रहणेऽपि सहकारितया तद्विलम्बादेव विलम्बेऽपि सूक्ष्मकेश–कीटादेरापततोऽनुपलब्धिमात्रेणाभावग्रहापत्तेः। सूक्ष्मवस्त्वभावग्रहत्वावच्छेदेन जिज्ञासा–देर्हेतुत्वेन तद्विरहादेव तद्विरहेऽपि वायौ रूपाभावावज्जलपरमाणौ पृथिवीत्वाभावस्य ग्रहापत्तेः। प्रतियोगिसत्वप्रसञ्जितप्रतियोगिकानुपलम्भविरहादेव सर्वत्र कार्यव्यतिरेकसम्भवे तत्र तत्र सहकार्यन्तरकल्पने मानाभावाच्च।

अतः प्रतियोगिसत्वप्रसञ्जितप्रतियोगिकानुपलब्धिरेवाभावग्राहिका वाच्या। सा च प्रकृते नास्ति। वह्नित्वे सहचारग्रहस्थलीयाभावप्रतियोगितावच्छेदकत्वाभावेऽपि

स्थलान्तरगताभावप्रतियोगितावच्छेदकत्वसद्भावेऽपि तस्य स्थलान्तरासन्निकर्षेण घटत्वे चत्वरगताभावप्रतियोगितावच्छेदकत्वस्य सतोऽपि चत्वरासन्निकर्षेणेवानुपलम्भसद्भावेन प्रतियोगिसत्वेनोपलम्भस्य प्रसञ्जयितुमशक्यत्वात्। अतो योग्यानुपलब्ध्यभावान्नान-वच्छेदकत्वघटितव्याप्तिनिश्चयः। अन्यथा सकृत्सहचारदर्शनमात्रेण व्याप्तिग्रहाद् व्याभिचारसंशयो न स्यात्। तस्मान्न बाह्यप्रत्यक्षेण व्याप्तिग्रहसम्भवः, नाप्यान्तरं प्रत्यक्षं तत्ग्राहकम् –

चक्षुराद्युक्तविषयं परतन्त्रं बहिर्मनः। इति।

अभ्युपगमेन तस्य बाह्येऽर्थे स्वातन्त्र्येण प्रवृत्त्यनुपपत्तेः। नाप्यनुमानम्। तस्यापि व्याप्तिग्रहणा-पेक्षत्वेनानवस्थापत्तेः। अनुमानाप्रमाण्यादेव तदधीनसङ्गतिग्रहमूलस्य शब्दस्यापि दूरापेतं तत्ग्राहकत्वमित्यतो व्याप्तिग्रहाभावान्नानुमानं प्रमाणम्। किञ्चानुमिति हेतुभूते वह्निव्याप्य-धूमवानयं पर्वत इति ज्ञाने पर्वतनिष्ठतया वह्नेरवगाहनेन सिद्धसाधनान्नानुमित्युदयसम्भवः। न च तेन पर्वतवह्निसंबन्धो विषयी क्रियत इत्यत्र किं मानमिति वाच्यम्। वह्निव्याप्य-धूमवानित्यस्य स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिवहन्यधिकरणाधिकरणकधूमवान् इत्येवमर्थकतया पर्वतनिष्ठधूमस्य वह्न्यधिकरणाधिकरणकत्वग्रहे वह्निपर्वतसंबन्ध-भानस्यावश्यकत्वात्। न चानुमानाप्रामाण्ये वह्न्यर्थिनो धूमदर्शनात्पर्वतादौ प्रवृत्तिर्नस्यादिति वाच्यम्। उत्कटैककोटिकसंशयेनैव तदुपपत्तेः। तस्मादनुमानस्यैवाप्रामाण्यान्नेश्वरेऽनुमानं प्रमाणम्। अनुमानाप्रामाण्येन तन्मूलसङ्गतिग्रहसापेक्षस्यागमस्याप्रामाण्यान्न तस्मिन्नागमोऽपि मानमिति।।

## अनुमानप्रामाण्यम्

अत्राभिधीयते – अनुमानप्रमाण्यानभ्युपगमे प्रवृत्तिमात्रोच्छेदप्रसङ्गेन तत्प्रामाण्यम-वश्याभ्युपेयम्। तथाहि – पाकादिप्रवृत्तिर्हि न निष्पन्नगोचरा। निष्पन्ने प्रवृत्तिवैयर्थ्यात्। किन्तु भाविगोचरा। तत्र च समानविषयं कार्यताज्ञानं जनकमित्यास्थेयम्। भिन्नविषयस्य जनकत्वेऽतिप्रसङ्गात्। भाविगोचरञ्च कार्यताज्ञानं न प्रत्यक्षात्सम्भवतीति तन्निष्पत्तिहेतुतयाऽनुमानसिद्धिः। पर्वतादौ वह्न्यर्थिप्रवृत्तये चानुमानप्रामाण्यं स्वीकरणीयम्। न च सन्देहेनान्यथासिद्धिः। वह्नेरुपलम्भे सद्भावनिश्चयेनानुपलम्भे चासत्भावनिश्चयेन त्वन्मते सन्देहस्यैवानुपपत्तेः। न च व्याप्तिग्रहासम्भवेन न तन्निर्वहतीति वाच्यम्। कस्यचित्कादाचित्क तदसम्भवस्याविरोधित्वात्। सर्वस्य सर्वदा च तदसम्भवस्य दुर्ज्ञानत्वात्। कारणाभावेन ज्ञायत इति चेत् न। तस्यैवानुमानरूपत्वेन[56] व्याघातापत्तेः। किञ्चानुमानाप्रामाण्यविषयकप्रत्यक्षस्याभावात्तत्रानुमानस्य प्रमाणस्योपन्यासे पुनरपि व्याघातः। तथाऽपि विरोधिन्या व्यभिचारशङ्काया अनिवृत्तौ कथं व्याप्तिग्रह इति चेन्न। प्रत्यक्षपरिदृष्टस्थले साद्ध्यसहचारग्रहेण साध्याभावसामानाधिकरण्यशङ्कायाः, स्थलान्तरविषयत्वार्थमनुमानप्रामाण्यापेक्षत्वेन तत्प्रतिक्षेपकत्वायोगात्। व्यभिचारशङ्काया व्याप्तिग्रहाभावेन व्याप्तिस्वीकारेण व्याघाताच्च। त्वन्मतानुसारेणैव त्वां प्रत्युच्यत इति न व्याघात

[56] (टि) तस्यैवानुमानरुपत्वेनेति। व्याप्तिग्रहो न संभवति। कारणाभावादित्यस्यैवेत्यर्थः।

इत्यपि न वाच्यम्। मन्मतानुसारेणापि व्याप्तिस्वीकारेणैव व्याप्तिग्रहप्रतिक्षेपस्यायुक्तत्वात्। व्याप्तिग्रहोपायस्तु व्यभिचारशङ्कानिवर्तकतर्कसद्ध्रीचीनं सहचारज्ञानमेव। न च तर्कस्यापि व्याप्तिग्रहापेक्षत्वेनानवस्थापत्तिः। बीजाङ्कुरवदनादित्वेनानवस्थाया अदोषत्वात्।

अन्ये तु तादात्म्यतदुत्पत्तिभ्यां[57] व्याप्तिग्रहेत्याहुः। तदयुक्तम्। तयोरननुगमेन व्याप्तिग्रहकारणत्वायोगात्। तदुभयरहितेऽपि रसादौ रूपादिव्याप्तिग्रहाच्च। तर्कसाहित्येऽपि वर्तमानमात्रग्राहिप्रत्यक्षस्य कथं सर्वोपसंहारप्रवृत्तव्याप्तिग्रहे सामर्थ्यमित्युक्तमिति चेन्न। व्याप्तिग्रहस्यानुभवसिद्धतया कार्यान्यथानुपपत्त्यैवातीतानागतविशेष्यकग्रहणे सामर्थ्याभावेऽपि तद्घटितव्याप्त्यादिग्रहणे सामर्थ्यस्य कल्पनीयत्वात्। वस्तुतस्तु अस्मन्मते व्याप्तिज्ञानं विकल्परूपतया मानसं, मनसश्चातीतानागतादिग्रहेऽपि सामर्थ्यमस्तीति न काप्यनुपपत्तिः। यदप्युक्तं पर्वतगते धूमे वह्निसामानाधिकरण्यरूपव्याप्तिभाने पर्वतवह्निसंबन्धावगाहनेन सिद्धसाधनान्नानुमानं मानमिति, तदपि व्याप्तावच्छेदकधूमत्वादिप्रकारकपक्षधर्मताज्ञानस्य जनकत्वाभ्युपगमेन निरस्तम्। अस्तु वा व्याप्तिप्रकारकपक्षधर्मता ज्ञानस्य हेतुत्वं, तथाऽपि न सिद्धसाधनं, व्याप्तिघटकतया परामर्शे पर्वतवह्निसंबन्धभानेऽपि पर्वतो वह्निमानित्येवमाकाराया: पर्वतविशेष्यकवह्निप्रकारकप्रतीतेरनुमानफलभूताया असिद्धेः।

नन्वेतावताऽनुमानप्रामाण्ये किं मानमुक्तं भवति। न तावत्प्रत्यक्षं, तथाविध प्रत्यक्षस्यादर्शनात्। नाप्यनुमानम्, तत्प्रमाणत्वस्याद्याप्यसिद्धेरिति चेन्मैवम्। पर्वतादौ वह्निप्रतिलंभे सति तज्ज्ञाने प्रमात्वग्रहस्य प्रत्यक्षेणैव सम्भवात्, धूमादिज्ञाने तत्कारात्वस्यापि तेनैव ग्रहसम्भवाच्च। यद्वाऽनुमानमेव तत्र मानम्। न च तत्प्रमाण-भावस्यासिद्धिः। अनुमानप्रामाण्यानुमितौ तद्धेतुभूतानुमानगतप्रामाण्यग्रहस्यानपेक्षिततत्वात्। न हि धूमज्ञानादिगतप्रामाण्यग्रहोऽपि वह्न्यनुमितावपेक्ष्यते। ननु तथापि सर्वत्रोपाधि-सम्भवान्नानुमानप्रामाण्यं युक्तम्। केवलान्वयिन्यन्वयव्यतिरेकिणि च पक्षेतरत्वसपक्षत्वादेरुपाधि-त्वात्। केवलव्यतिरेकिण्यपि सामान्यतोऽपि साध्याप्रसिद्धौ व्यतिरेकव्याप्तिग्रहासम्भवेन तदर्थं सामान्यतस्साध्यप्रसिद्धेरावश्यकतया साध्यप्रसिद्धिस्थलत्वस्य तथात्वात्। न च पक्षस्य साध्यप्रसिद्धिस्थलत्वव्यतिरेकानिश्चयेनसाधनाव्यापकत्वग्रहसम्भव इति वाच्यम्।

तथाऽपि सन्दिग्धोपाधित्वसम्भवात्। न च साधनाव्यापकत्वसन्देहे सत्प्रतिपक्षो-न्नायकत्वरूपदूषकता बीजविरहान्नोपाधित्वमिति वाच्यम्। शाकपाकजत्वादेरिव व्यभिचारसंशयाधायकत्वेन दूषकत्वसम्भवात्। न च पक्षेतरत्वादिव्यतिरेकेण पर्वतादौ वह्निव्यतिरेकानुमानेऽपि तदुपाधित्वापत्त्या तस्य स्वव्याघातकत्वेनानुपाधि-त्वमिति वाच्यम्। वह्निव्यापकपर्वतेतरत्वव्यतिरेकवान् पर्वत इति ज्ञानस्य वह्न्यभावव्यापक तद्व्यतिरेकवत्वज्ञानेन प्रतिरुद्धत्वेऽपि स्वेनैव व्याहत्यभावात्। स्वसजातीयव्याहतत्वेन दोषत्वेऽनुमानस्यापि स्वसजातीयव्याहतत्वेनाप्रामाण्यापत्तेः। तथा सर्वत्र प्रत्यनुमानसम्भवान्नानुमानप्रामाण्यं युक्तम्। केवलान्वयिन्यन्वयव्यतिरेकिणि च सपक्षत्वादिव्यतिरेकेण प्रतिपक्षसम्भवात्, केवलव्यतिरेकिण्यपि वस्तुत्वादिना तत्संभवात्। न

[57] (टि) तादात्म्य तदुत्पत्तिभ्यामिति। पृथिवी गन्धवत्वादित्यादौ तादात्म्यं, वह्निमान्धूमादित्यादौ तदुत्पत्तिः।

चानुमानयोरेकस्यानुकूलतर्काभावेन हीनबलत्वे परस्य निश्चायकत्वमिति वाच्यम्। द्वयोरपि लिङ्गयोस्स्वस्वसाध्यव्यापकत्वनिश्चयेन व्यापकाभावे व्याप्याभावप्रसङ्गस्य विषयपरिशोधकतर्कस्योभयत्र सम्भवादिति। मैवम् – धूमादिहेतौ वह्न्यादिव्यभिचारे अकारणक-कार्योत्पत्त्यादिकेन व्याप्तिग्राहकेण तर्केण व्याप्तिनिश्चयसत्वे पर्वतेतरत्वादिव्यतिरेकस्य वह्न्यभावव्यभिचारेऽनिष्टप्रसङ्गात्मकव्याप्तिग्राहकतर्काभावाद्व्याप्तिग्रहाभावादेव च विषयपरिशोधकतर्कस्याप्यप्रवृत्तिरिति। एवं वह्न्यादौ पर्वतेतरत्वादिव्यभिचार-शङ्कानिवर्तकतर्काभावेन पर्वतेतरत्वादेस्साध्यव्यापकत्वे मानाभावादुपाधित्वमपि निरसनीयमिति। अनुमानप्रामाण्यसिद्धौ च सङ्गतिग्रहसम्भवेन सिद्धं वेदशिवागमयोः प्रामाण्यम्।

## शैवागमानामप्रामाण्यशङ्का

अत्र केचित्मीमांसकं मन्या अश्रुतशिवनिश्वसितस्मृति[58]पुराणागमा अनधीत-**श्वेताश्वतरोपनिषत्तत्स्थ** च **शब्दोपबृम्हणसूतसंहिता अज्ञातबृहदारण्यक तदुपबृम्हणवायुसंहितामहाभारताः कूर्मपुराणादिष्वपि** स्वशङ्काबीजेष्वश्रुतसर्वदेशाः श्रुतप्रदेशेऽपि पूर्वापरपर्यालोचनाविधुरा अज्ञाततत्स्थ वृत्तिशब्दान्तरास्तस्य लौकिकार्थान्तरे मुग्धाः काकेभ्यो दधिरक्ष्यतामित्यत्रापि प्रकरणौचित्यादिभ्यः प्राप्तोपलक्षणत्वेऽप्यव्युत्पन्ना **वासिष्ठलैङ्गा**दिष्वपि निन्द्यांशानभिज्ञा वेदस्य नित्यतया प्रामाण्यं, तन्मूलतया च स्मृत्यादीनाम् आगमानां शैवादिचार्वाकान्तानामुभयविधाविधूरत्वात् स्मृतिपुराणादिषु च तेषां निन्दाश्रवणाच्चाविशेषेणाप्रामाण्यं, प्रामाण्येऽपि शप्तैकाधिकारिकत्वमाहुः।

तथाहि – अस्तु श्रुतिसिद्धया नित्यतया निर्दोषत्वेन महाजनपरिगृहीतत्वेन च वेदस्य प्रामाण्यं तन्मूलत्वेन स्मृत्यादीनामपि। स्थापितञ्च तथा प्रामाण्यं वेदादीनां प्रथमे तन्त्रे प्रथमाध्याये। शैवागमादीनान्तु न नित्यत्वं, तत्रैव तेषां शिवकर्तृकत्वाभिधा-नात्, वेदवन्नित्यत्वावेदकश्रुत्याद्यभावाच्च। नापि वेदवत्प्रामाण्यज्ञापकमहाजनपरिग्रहः। अतो न वेदवत् प्रमाण्यं तेषां, नापि स्मृत्यादिवत्तन्मूलकत्वेन। तत्र प्रमाणाभावात्, बहुशो वेदविरुद्धार्थकत्वाच्च। अत एव विरोधाधिकरणे तेषां, न वेदमूलकत्वमुक्तं **भट्टपादै**स्तस्माच्छाक्याद्यागमा एवात्रोदाहरणमिति अपसिद्धान्ताच्च। शैवागमेष्वेव तेषां क्वचित् क्वचित्वेदोल्लङ्घित्वकथनात्। **पौष्करे** –

सदाशिवोऽपि भगवान्नादरूपतया स्थितम्।
षट्पदार्थमयं ज्ञानं व्यनक्ति।।

इत्यादिनाऽऽगमानां सदाशिवसृष्टत्वमुक्त्वा,

अन्योऽपि मार्गो वेदादिः पशुपाशार्थदर्शकः।
स्वोक्ततत्त्वावधिव्याप्तिर्ब्रह्मविष्ण्वादिकर्तृकः।।

इत्यादिना वेदस्य ब्रह्मविष्ण्वादिकर्तृकत्वमुक्त्वा पुनस्तत्रागमानां वेदादाधिक्यं कथितम्।

---

[58] (टि) शिवनिश्वसितस्मृतीति। वेदस्य शिवनिश्वसितत्वप्रतिपादकस्मृतीत्यर्थः।

न देवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मना।
तथा रौद्रं न हरिणा न रुद्रेणा वा शिवात्मकम्।।
बाध्यमूर्ध्वोर्ध्ववैशिष्ट्यात्। इत्यत्र।

एवं "बुद्धितत्त्वे स्थिता बौद्धा" इत्यत्रापि। अतो न स्मृतिवद्वेदमूलकत्वेन प्रामाण्यः। नचोभयविधप्रामाण्यप्रयोजकाभावेऽपि मानान्तरगम्येऽर्थे विशिष्टतत्प्रमातृपुरुष-प्रणीतत्वेन तज्ज्ञपुरुषप्रणीततामात्रेण लौकिकवाक्यवत्तेषां प्रामाण्यनिश्चयस्संभवति। उक्तेऽस्मिन्नर्थे मानान्तरानवतारात्, भ्रान्त्यादिमूलत्वसम्भावनाया जागरूकत्वाच्च। आगमैः परस्परविरुद्धार्थकथनेन कस्यचिदप्यर्थस्य निश्चेतुमशक्यत्वाच्च। अतो न प्रामाण्यं शैवाद्यागमानाम्। एतच्च सर्वमुक्तं **सूतसंहितायां** सरस्वतीं प्रतीश्वरेण –

पाञ्चरात्रादिमार्गाणां वेदमूलत्वमास्तिके।
नहि स्वतन्त्रास्ते तेन भ्रान्तिमूला निरूपणे।। इति।

अपि च **कूर्मपुराणे** –

सर्वे संप्राप्य देवेशं शङ्करं विष्णुमेव च।
अस्तुवन् लौकिकैस्तोत्रैरुच्छिष्टा इव सर्वगौ।।
देवदेवौ महादेवौ भक्तानामार्तिनाशनौ।
का नो वृत्तिर्महादेवौ पापान्नस्त्रातुमर्हथः।।
तदा पार्श्वस्थितं विष्णुं संप्रेक्ष्य वृषभध्वजः।
किमेतेषां भवेत्कार्यं प्राह पुण्यैषिणामिति।।
ततस्स भगवान् विष्णुश्शरण्यो भक्तवत्सलः।
गोपतिं प्राह विप्रेन्द्रानालोक्य प्रणतान्हरिः।।
न वेदबाह्ये पुरुषे धर्मलेशोऽपि शङ्कर।
सङ्गच्छते यतो धर्मो वेदादेव हि निर्बभौ।।
तथाऽपि भक्तवात्सल्याद्रक्षणीया महेश्वर।
आवाभ्यां सर्व एवैते विप्रा वै नात्र संशयः।।
तस्माद्वै वेदबाह्यानां रक्षणार्थं यथायथम्।
मोहनानि च शास्त्राणि करिष्यावो वृषध्वज।।
एवं संबोधितो रुद्रो माधवेन मुरारिणा।
चकार मोहशास्त्राणि केशवोऽपि शिवेरिताः।।
सृष्ट्वा तानूचतुर्देवौ कुर्वाणास्तन्त्रचोदितम्।
पतन्तो निरये घोरे बहून्कालान्पुनः पुनः।।
जायन्ते मानुषे लोके क्षीणपुण्य च यास्ततः।
ईश्वराराधनबलात् गमिष्यथ सतां गतिम्।।
वर्तध्वमप्रमादेन नान्यथा निष्कृतिर्हि वः।
एवमीश्वरविष्णुभ्यां चोदितास्ते महर्षयः।।

आदेशं प्रत्यपद्यन्त शिरसाऽसुरविद्विषोः।
चक्रुस्तेऽन्यानि तन्त्राणि तत्तत्तन्त्ररतान् पुनः।।
शिष्यानध्यापयामासुर्दर्शयित्वा फलानि तु।
मोहयन्त इमं लोकमवतीर्य महीतले।।
मन्त्रौषधं समाश्रित्य दर्शयित्वा फलानि तु।
वेदमार्गपरिभ्रंशं करिष्यन्ति कलौ नराः।। इति।

अत्र हि दुर्वासो दधीचिगौतमकण्वभृगूपमन्युभिषड्भिर्मुनिभिर्ब्रह्मणा च वैदिककर्मण्यनधिकारित्वेन शप्ता मुनयः पृच्छकास्सर्वशब्देनोच्यन्ते। तत्र तेषां "कानोवृत्ति"रिति प्रश्ने वृत्तिशब्दश्रवणात् जीवनोपायप्रश्नः प्रतीयते। तत्र तस्य रूढत्वात्, शप्तानां याजनाद्यनधिकृतत्वेन तत्र प्रश्नस्यौचित्याच्च। तथा च तादृशान् प्रति "सृष्ट्वा तानूचतुर्देवा"वित्यादिना तन्त्रोपदेशप्रतीतेस्तन्त्राणां वृत्त्यर्थत्वं प्रतीयते। तत्प्रश्नानन्तरमेव –

मोहनानि च शास्त्राणि करिष्यावो वृषध्वज। इति।

संबोधनपूर्वकं[59] "सृष्ट्वा तानि"ति सृष्टिवचनात्तदानीमेव तदर्थसृष्टत्वञ्च प्रतीयते। अतः प्रामाण्येऽपि त एवाधिकारिणस्तत्र। "मोहनानि च शास्त्राणी"त्यादिना तन्त्राणां मोहकत्वकथनाच्च। वृत्त्यर्थत्वं मोहकत्वञ्च **कूर्मपुराणे वसिष्ठदिलीपसंवादे** –

नैव सन्ति विना शैवं प्रत्यक्षाः प्रत्ययादेशः।

इत्युक्तं दृष्टानग्निवृक्षदाहादिदशाश्चर्यहेतुत्वम्। तन्त्रार्थानुष्ठानेऽपि "मोहयन्त इमं लोक"मित्यनुष्ठातॄणां मोहकत्वश्रवणाच्च। अतो वृत्त्यर्थमेव तन्त्रशान्त्रं न श्रेयस्साधनांशेऽभीप्सिते प्रमाणमिति। किञ्च तदर्थस्य न श्रेयस्साधनत्वाभावमात्रं, प्रत्युत तदर्थानुष्ठानस्य नरकादिहेतुत्वमपि क्वचित्तदनुष्ठातुर्मूढत्वनिन्दया, क्वचित्तदर्थानुष्ठानस्य शापफलत्वोक्त्या, क्वचित्साक्षात्तस्य नरकपातश्रुत्या चावगम्यते। मूढत्वनिन्दा तावत् **वासिष्ठलैङ्गे** –

पाञ्चरात्रं प्रशंसन्ति केचित्भागवतं मुने।

भागवतमिति तन्त्रविशेषः।

केचित्कापालमिच्छन्ति केचित्पाशुपतं मुने।।
केचिद्बौद्धं प्रशंसन्ति केचिद्दैगाम्बरं मुने।
केचिल्लोकायतं ब्रह्मन्केचित् सोमं महामुने।।
लाकुलं केचिदिच्छन्ति तथा केचिच्च भैरवम्।
केचिद्वामं प्रशंसन्ति केचिच्छाक्तं तथैव च।।
शाम्भवं केचिदिच्छन्ति यामलं भुवि केचन।
अन्यानि यानि शास्त्राणि विरुद्धानि महामुने।।
स्वतः प्रमाणभूतेन वेदेन मुनिसत्तमाः।

---

[59] (पा) संकोचपूर्वकं
(टि) संकोचपूर्वकमित्यत्र संबोधनपूर्वकमिति स्थितञ्चेत् साधु। वृषध्वजेति, तदनन्तरमेवं संबोधित इति चारम्भात्।

तान्येव श्रद्धया युक्ताः परिगृह्य द्विजातयः।।
आचरन्ति महामूढा युगान्ते समुपस्थितः। इति।

शापफलत्वं **सूतसंहितायाम्** –

ब्राह्मणैश्च पुनस्सर्वैर्गौतमेन सुरक्षितैः।
विचार्यकार्यं संभूय स्वदेशगमनोद्यतैः।।
गौर्हता गौतमेनेति निर्घृणैः पुरुषाधमैः।
कृतो मिथ्याभिशापस्तु महामोहवशेन तु।।
तच्छ्रुत्वा समुनिश्श्रीमान् गौतमो मुनिसत्तमः।
महाक्रोधेन संयुक्तश्शशाप ब्राह्मणाधमान्।।

गौतमः –

महादेवस्य रूपे च महादेवस्य विग्रहे।
महादेवस्य भक्तौ च महादेवस्य नाम्नि च।।
महादेवस्य विज्ञाने महादेवपरिग्रहे।
महादेवस्य च स्थाने महादेवस्य कीर्तिषु।।
महादेवापदाने च महादेवाश्रयेषु च।
महादेवस्य चोत्कर्षे त्रिपुण्ड्रोद्धूळनेऽपि च।।
रुद्राक्षधारणे रुद्रलिङ्गस्यैव तु पूजने।
रुद्रालयदिदृक्षायां रुद्रयात्रादिकर्मसु।।
यद्यत्तु रुद्रसंबन्धि तत्र तत्रापि दुर्जनाः।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।।
शान्तिदान्त्यादिविज्ञानसाधनेषु द्विजाधमाः।
स्वाध्याये च जपे चैव तथा प्रवचनेऽपि च।।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।
नानाविधेषु दानेषु यज्ञेषु विविधेषु च।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।।
कृच्छ्रचान्द्रायणादौ च तथा चैवोपवासके।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।।
देवभक्ति तदास्तिक्ये योगाङ्गेषु यमादिषु।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।।
नित्यकर्माद्यनुष्ठाने तथा काम्यविवर्जने।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।।
श्रुतिस्मृतिपुराणोक्तेष्वर्थेषु सकलेषु च।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।।
स्वदारगमनेष्वेव परदारविवर्जने।

विष्ण्वादिदेवतास्सर्वा विशिष्टाश्शङ्करात्।। इति।।
भ्रान्तिविज्ञानसम्पन्ना भवत ब्राह्मणाधमाः।
शङ्खचक्रगदापद्मदण्डपाशङ्कुशादिभिः।।
अङ्किताश्श्रद्धया यूयं भवत ब्राह्मणाधमाः।
निहीनजातिनाम्ना तु रूपेणापि तथैव च।।
अङ्किताश्श्रद्धया यूयं भवत ब्राह्मणाधमाः।
वर्तुळाश्वत्थपत्रार्द्धचन्द्रशूलादिलिङ्गिनः।।
भवत श्रद्धया सार्द्धं ललाटे ब्राह्मणाधमाः।
मत्स्यविक्रयिणस्तद्वत्भवत ब्राह्मणाधमाः।।
पाञ्चरात्रे च कापाले तथा काळामुखेऽपि च।
शाक्ते च दीक्षिता यूयं भवत ब्राह्मणाधमाः।।
बौद्धे चाप्यार्हते चैव तथा पाशुपतेऽपि च।
शाम्भवे दीक्षिता यूयं भवत ब्राह्मणाधमाः।।
पाषण्डेषु तथाऽन्येषु मार्गेष्वश्रौतकेषु च।
श्रद्धया दीक्षिता यूयं भवत ब्राह्मणाधमाः।।
युष्माकं वंशजाताश्च सर्वे स्त्रीभिस्सह द्विजाः।
मयोक्तार्थप्रकारेण भवेयुर्ब्राह्मणाधमाः।।
बहुनोक्तेन किं साक्षाच्छिवे संसारमोचके।
तत्संबन्धिषु सर्वेषु श्रुतिस्मृत्युदितेषु च।।
युष्माकं वंशजातानां युष्माकञ्च विशेषतः।
श्रद्धाभावस्सदैवास्तु शापस्तीव्रः कृतो मया।।

सूतः –

एवं मुनीन्द्रेण कृते च शापे
द्विजाधमाश्चापि तदाज्ञयैव।
तथाऽभवंस्तत्कुलजाश्च सर्वे
स्वभावजो ह्येष मुनेः प्रभावः।।
श्रद्धाभावस्तेन जातो नराणां
साक्षाद्रुद्रे तस्य धर्मे च विप्राः।
तस्माद्विद्वांस्तद्विनाशाय साक्षात्
रुद्रं नित्यं पूजयेच्छ्रद्धयैव।।
त्रिपुण्ड्रमुद्धूळनमास्तिकोत्तम–
स्समाचरेन्नित्यमतन्द्रितस्सदा।
विशेषतश्शंकरवेदने रतो
भवेदशेषं कथितं मयाऽनघा।।

इत्यत्र विशिष्य पाञ्चरात्रानुष्ठानस्य ब्रह्मशापफलत्वं पापहेतुत्वञ्च **पराशरपुराणे** –

महापापवतां नृणां वेदसिद्धे महेश्वरे।
त्रिपुण्ड्रोद्धूळनादौ च प्रद्वेषश्च प्रजायते।।
वेदसिद्धेन मन्त्रेण त्रिपुण्ड्रं भस्मकुण्ठनम्।
नैव कुर्वन्ति मोहेन मनुष्याः पापकर्मिणः।।
ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुळं चतुरश्रकम्।
धारयन्ति ललाटे तु मनुष्याः पापकर्मिणः।।
त्यजन्ति सकलं कर्म सदा विद्युक्तमास्तिकाः।
निषिद्धं कर्म कुर्वन्ति मनुष्याः पापकर्मिणः।।
त्यजन्ति वेदं वेदोक्तं तथा स्मृतिपुराणकम्।
वेदाङ्गानि च मोहेन मनुष्याः पापकर्मिणः।।
पाञ्चरात्रे च कापाले पाषण्डेष्वपरेषु च।
दीक्षिताश्च भवन्त्येव मनुष्याः पापकर्मिणः।।
वेदमार्गपरिभ्रंशं वेदबाह्यपरिग्रहम्।
कुर्वन्ति स्वात्ममोहेन मनुष्याः पापकर्मिणः।।
यस्य स्यात्पितरि द्वेषश्शर्वे वा जगतां गुरौ।
उत्पत्तौ तस्य साङ्कर्यमनुमेयं विपश्चिता।।
पापानामपि बाहुल्यात् श्रौतं लिङ्गं न रोचते।
प्रत्युतभ्रान्तिविज्ञानादश्रौतं चोद्ध्र्वपुण्ड्रकः।।
ब्राह्मणाः क्षत्रियावैश्याश्शूद्राः कुर्वन्ति चापरे।
रुद्राधिक्यमविज्ञाय ब्रह्मनारायणौ पुरा।।
अहं ब्रह्मत्वहं चेति विभ्रान्त्याऽकुरुतां[60] रणम्।
क्रोधेन महता युक्तो ब्रह्मा सर्वजगत्पतिः।।
शशाप विष्णुं गर्भस्थो भवेत्यति विमोहितः।
त्वद्भक्ता ब्राह्मणास्साक्षात् त्रिपुंड्रे भस्मकुण्ठने।।
भवेयुर्विमुखा नित्यं वेदसिद्धे विमुक्तिदे।
त्रिशूले चतुरश्रे वा वेणुपत्रोपमे तथा।।
पुण्ड्रान्तरे रता नित्यं भवेयुस्तान्त्रिका द्विजाः।
आयुधैश्शङ्खचक्राद्यैस्त्वदीयैरङ्किता जनाः।।
अग्नितप्तैर्महामोहात् भवेयुश्चांसयोर्द्वयोः।
वेदसिद्धेन मार्गेण त्वदीयाराधने द्विजाः।।
त्वद्भक्ता विमुखा नित्यं भवेयुः परिमोहिताः।
त्वदीये पाञ्चरात्रे च तन्त्रे भागवते तथा।।
दीक्षिताश्च द्विजा नित्यं भवेयुर्निर्भया हरे।
श्रौतस्मार्तसमाचारे सद्यो मुक्तिकरे शुभे।।

---

[60] (पा) कुरुतो

त्वद्भक्ता विमुखा नित्यं भवेयुः परिमोहिताः। इति।

शैवागमार्थानुष्ठातुर्नरकपातः **पाद्मपुराणे वसिष्ठदिलीपसंवादे** –

आसीद्राजा चित्रनामा द्रामिडे विषये पुरा।
सोमान्वये महाधन्वी शूरस्सत्यपराक्रमः।।
पुरोधसं पुरस्कृत्य श्रौतं कर्म[61] चकार सः।
यज्ञा नानाविधास्तेन कृतास्सुबहुदक्षिणाः।।
नित्यं दानपरो राजा नित्यञ्चातिथिपूजकः।
ब्रह्मण्ये ब्रह्म चाधीते शास्त्रार्थ सुविशारदः।।
ब्रह्मविष्णुमहेशेषु समबुद्धिस्तथा रवौ।
गतः कौतूहलेनैव कदाचिज्जटिलालयम्।।
जटिलैर्वेदबाह्यैस्तैः पाषण्डैर्भस्मपाण्डरैः।
सार्धं तत्र कथा जाता राज्ञस्तस्य महात्मनः।।

पाषण्डा ऊचुः –

प्रभावश्श्रूयतां राजन् शैवधर्मसमुद्भवः।
छिन्नपाशः प्रमुच्येत श्वपचोऽपि च दीक्षया।।
दीक्षैव मोचिनी शैवी सर्ववर्णेषु सर्वदा।
न चात्र मानं मृग्यं हि शिवस्याज्ञां विना पुनः।।
किं दानैः किं व्रतैर्घोरैः किं वेदैश्च किमध्वरैः।
भस्मधारणमात्रेण गाणापत्यं दृढं भवेत्।।
जटी मुण्डी शिखी वाऽपि भस्मोद्धूळित विग्रहः।
शिवस्यानुचरो भूत्वा शिवेन सहमोदते।।
न भस्मसदृशं पुण्यं न भस्मसदृशं तपः।
जटाभिर्भस्मभिर्युक्तास्सर्वेऽपि शिवयोगिनः।।
अन्धाः कुब्जा जडा मूर्खा जटाभिरुपलक्षिताः।
अपि शूद्रादिवर्णा वा पूज्या एव न संशयः।।
विश्वामित्रः क्षत्रियोऽपि तपसा ब्राह्मणोऽभवत्।
चोर एव हि वाल्मीकिस्संजातोऽथ द्विजाग्रणीः।।
अतो नैव विचारोऽत्र कर्तव्यश्शिवपूजकैः।
तपसा जायते विप्रस्तस्माज्जातिर्न कारणम्।।
नैव सन्ति विना शैवं प्रत्यक्षाः प्रत्ययादशा। इति।

तत्तन्मन्त्रोद्घातप्रयोगबलादग्निज्वलनं, वृक्षमारणं, मारितस्य वृक्षस्य पुनर्जीवनं, संसारपातानां स्तोभेन देहपातनं, पतितस्य पुनरुत्थानं, तुलारोहेण प्रथमं गुरुत्वापादनेन महापातकज्ञापनं, पुनरारोहेण लघुत्वापादनेन महापातकाभावज्ञापनं, विषयसंहरणं, निर्जीवकरणं,

---

[61] (पा) धर्मम्

ग्रहोच्चाटनसंक्रमणविनाशनं, ज्वरोच्चाटनसंक्रमणविनाशनञ्चेति प्रधानभूता दशप्रत्यया: पुराणोक्ता:।

अत एव हि राजेन्द्र श्रेष्ठं शैवं हि दर्शनम्।
रहस्यं शैवमार्गेऽस्ति नान्यं देवं प्रपूजयेत्।।
यत्नेन तापसैर्विष्णुर्वर्जनीय: प्रयत्नत:।
वैष्णवीं प्रतिमां नैव पूजयेन्नाभिवादयेत्।।
विष्णुर्दर्शनमात्रेण शिवद्रोह: प्रजायते।
शिवद्रोहान्न सन्देहो नरकं यान्ति रौरवम्।।
तस्मान्न विष्णुनामापि श्रोतव्यं भवभीरुणा।
अतोऽपि वैष्णवो वध्यस्सर्वदेशेषु सर्वदा।।
शिवभक्तेन निश्शङ्कं शिवस्य प्रीतिमिच्छता।
शिवप्रीत्या न सन्देह: कैलासं याति मानव:।।
अयं धर्मोऽनवद्योऽपि नैव भस्मविधारणम्।
प्रकुर्वन्तीह राजेन्द्र ततस्ते संसरन्ति च।।
इत्थं नग्नप्रणीतांस्तान्वर्णयित्वा तदागमान्।
जटिलैर्मोहकैर्धूर्तैस्सभूपाल: प्रतारित:।।
श्रुत्वा तद्वचनं तेषां प्रविष्टस्तत्पथं नृप:।
त्यक्त्वा च वैदिकं कर्म निन्दन्वेदश्रुतिं द्विजान्।।
अग्निहोत्रगृहे शान्ताश्चाग्नयस्तस्य तत्क्षणात्।
विष्णुं निन्दति सोऽत्यर्थं वैष्णवान् द्वेष्टि सर्वदा।।
क्वासौ विष्णु: क्व कृष्णोऽसौ क्वास्ते केन च कीर्त्यते।
इत्थं न सहते विष्णुं स राजा दैवमोहित:।।
नारायणं भजन्ते ये तान् पीडयति सर्वदा।
न ब्राह्मणं न वेदांश्च वैदिकं कर्म न व्रतम्।।
न दानं मन्यते दातुं पाषण्डाश्रममाश्रित:।
अनीत्या चण्डदण्डश्च प्रजापीडां करोति स:।।
स्त्रैण: कामी तथा लुब्धश्चण्डकोपस्स पार्थिव:।
ददौ ग्रामान् गजानश्वान् हेमरत्नविभूषणम्।।
तेभ्यो जटिलदुष्टेभ्यस्तद्वाक्ये निरतोऽभवत्।
तदागमोत्थमत्यर्थं कुरुते कर्म चाखिलम्।।
उद्वहन् भस्म चाङ्गेषु शिरस्येकां जटां वहन्।
विष्णौ द्वेषस्ततस्तीव्रस्तस्य जज्ञे दुरात्मन:।।
य: पठेद्विष्णुनामापि तं निहन्ति च पार्थिव:।
अताडयच्च नित्यं स डिंडिमान् स्वपुरे तत:।।
योऽर्चयेद्दैवतं विष्णुं स दण्ड्यो वध्य एव न:।

तद्भयाद्वैष्णवा विप्राः प्रजाया वैष्णवी तथा।।
तद्देशं तु परित्यज्य प्रविष्टा जनतान्तरम्।
अवशिष्टाः प्रजा सर्वा द्रामिडास्तदनन्तरम्।।
काश्चिद्भयाज्जटाधारा भस्मोद्धूळितविग्रहाः।
संत्यज्य वैदिकं कर्म त्यक्त्वा चातिथिपूजनम्।।
त्यक्त्वा व्रतं तथा दानं कुमार्गनिरताऽभवन्।
न स्वाहा न स्वधा तत्र न देवः पूज्यते हरिः।।
विष्णुद्वेषश्च लोकेऽबूद्यथा राजा तथा प्रजाः।
उत्खाता वैष्णवाश्शैवे[62] प्रासादा यत्र ये स्थिताः।।
वैष्णव्यः प्रतिमास्सर्वाः प्रक्षिप्तास्सागरांभसि।
इत्थं भूपतिना तेन स्वधर्माच्च्यावितोभृशम्।।
निर्दयो निष्ठुरः क्रूरस्सञ्जातो द्रामिडो जनः।
ततः प्रभृत्य धर्मिष्ठास्तस्मिन् देशे द्विजोत्तमाः।।
न च वर्षति पर्जन्यो न गवां कुलवर्धनम्[63]।
नदी जलेन जीवन्ति सततं द्रामिडा जनाः।।
वृक्षानारोप्य वर्तन्ते ब्राह्मणावृत्तिकर्शिताः।
प्रयच्छन्ति करं राज्ञे ते द्विजा मानवर्जिताः।।
न गर्हन्ति प्रजास्तञ्च[64] चण्डीशस्य निवेदनम्।
च्युताचारोऽच्युतद्वेषी च्युताग्निश्च च्युतक्रियः।।
सोऽनुशास्ति जनं भूयः कालरूप इवापरः।
ततो बहुतिथौ काले स राजा पञ्चतां गतः।।
वैदिकेन विधानेन न लेभे चौर्ध्वदैहिकम्।
अथ किङ्करयूथेन पीड्यमानो भृशं तथा।।
अयः कीलमये मार्गे तप्ताङ्गारप्रपूरिते।
लोहतुण्डैश्चकाकौघैर्हन्यमानस्ततो भृशम्।।
वृकैर्दंष्ट्राकराळैश्च स्वभिर्घोरैश्च भक्षितः।
शृण्वन्क्रन्दितमन्येषां नृणां किल्बिषकारिणाम्।।
जगाम पार्थिवो लोकमन्तकस्य भयावहम्।
शृणु द्विजगतिं तस्य तस्मिन् काले सुदुस्सहाम्।।
निरयान्निरयं याति पर्यायेण स भूमिपः।
आदौ पपात तामिस्रे दारुणे भूरिदुःखदे।।
पुनश्चैवान्धतामिस्रे यत्र दुःखं निरन्तरम्।

---

62 (टि) वैष्णवाश्शैवे प्रासादा इति। शिवालयस्थ विष्णुप्रासादा इत्यर्थः।

63 (पा) वर्धते न गवां कुलम्

64 (टि) तञ्च राजानां चण्डीशस्य - भैरवस्य, निवेदनं – तत्कृतोपहारञ्च निन्दन्तीत्यर्थः।

ततो नरकमत्युग्रं महारौरवरौरवम्।।
नरकं कालसूत्रञ्च महारौरवमेव च।
पश्चान्मग्नस्स भूपालो दुष्करे दुःखमूर्च्छितः।।
सञ्जीवने महावीचौ तापने संप्रतापने।
पपातानन्तरं राजा दुःखाग्निक्लिष्टमानसः।।
सङ्गातञ्च सकाकोलं दुःखदं पूतिमूर्तिकम्।
लोहशङ्कुमृजीषञ्च पन्थानं शल्मलीं नदीम्।।
प्रविष्टोऽथ महाभीमं दुर्दर्शं दुर्गमं पुनः।
असिपत्रवचनञ्चैव लोहनारकमेव च।।
एवमेतेषु पापेषु पतित्वा पातकी नृपः।
अविन्दन्नरके घोरे सन्तापं यातनात्मकम्।। इत्यत्र।

पाञ्चरात्रानुष्ठातुः नरकपातस्तु **वासिष्ठलैङ्गे वसिष्ठं प्रति दक्षिणामूर्तिवचने** –

पुरा शाण्डिल्यसंज्ञस्तु ब्राह्मणः कश्चिदल्पवित्।
वेदवादं प्ररित्यज्य साहसी बुद्धिपूर्वकम्।।
परदारान् समागम्य कृत्वा पापानि सन्ततम्।
वासुदेवं कुमार्गेण पूजयामास सुव्रताः।।
ततो विश्वमयो विष्णुः प्रादुरासीत्स्वमायया।
तस्याग्रे सोऽपि तं दृष्ट्वा पूजां चक्रे पुनः पुनः।।
ततो मायी हरिर्ब्रह्मन् शाण्डिल्यं प्रत्यभाषत।

हरिः –

धिक्धिक् शाण्डिल्य दुर्बुद्धे साहसीत्वं मतो भृषम्।।
को वा वर्णाश्रमाचारं श्रौतं त्यक्तुं त्वया विना।
शक्तः पापबलात्त्यक्तो नास्ति ते निष्कृतिश्श्रुतौ।।
कुमार्गेणापि शाण्डिल्य कृता पूजा मम त्वया।
अतः कालेन महता वेदमार्गं गमिष्यसि।।
तस्मात्त्वं पाञ्चरात्रोक्तवर्त्मना श्रद्धया सह।
मामाराधय शाण्डिल्य ब्राह्मणांश्चापि भक्तितः।।
इत्युक्त्वा भगवान् विष्णुस्तत्रैवान्तरधीयत।
शाण्डिल्योऽपि पुरा ब्रह्मन्पाञ्चरात्रन्तु वैष्णवम्।।
परिगृह्य पुनर्विष्णुं पूजयामास भक्तितः।
पुनर्विष्णोः प्रसादेन वेदमार्गातिवर्तिनीम्।।
शाण्डिल्यस्संहिताञ्चक्रे वैष्णवीं महतीं मुने।
तस्यां चक्रुर्मुने दीक्षां पाषण्डाः पापयोनयः।।
स्थापितायान्तु शाण्डिल्यस्संहितायां ममार च।

वज्रदंष्ट्राः कराळास्याः क्रुद्धाः पाशाधरा मुने।।
शूलदण्डधराः क्रुद्धाः कुटिलाः कृष्णविग्रहाः।
निर्घृणास्सततं ब्रह्मन् यमदूता भयंकराः।।
बद्ध्वा पाशेन शाण्डिल्यं मार्गे दुष्कण्टके मुने।
अधोमुखोर्ध्वपादन्तं सर्वदाऽऽकृष्य मुद्गरैः।।
पीड्यान्धकूपे निक्षिप्य धर्मराजस्य सन्निधौ।
निधाय पीड्य पादैस्तं पश्येत्यूचुर्यमं प्रति।।
सोऽपि तं प्रेक्ष्य दुर्बुद्धिं यमराजो भयङ्करः।
प्राहतांस्तीक्ष्ण्यवाचा पीड्यतां मम सन्निधौ।।
इत्युक्ता यमराजेन शाण्डिल्यं यमकिङ्कराः।
मुद्गरैः खड्गशूलैश्च पीडां चक्रुर्महामुने।।
पुनश्चायमतिक्रुद्धो रक्तघूर्णितलोचनः।
इष्टानामप्यनिष्टानां साधनं मातृवत्सदा।।
प्राप्तये परिहाराय बोधयन्ती श्रुतिर्बलात्।
बुद्धिपूर्वं परित्यक्ताऽनेन साक्षाद्दुरात्मना।।
तस्मादेनं तु पापिष्ठं तत्पापविनिवृत्तये।
रौरवादिषु सर्वेषु नरकेषु क्रमेण तु।।
भोजयित्वा महादुःखान्यप्रसह्यान्यनेकशः।
आगच्छद्ध्वं सहानेन शाण्डिल्येन दुरात्मना।।
इति सञ्चोदिता ब्रह्मन् यमदूता यमेन तु।
तथैव चक्रुः पापिष्ठमब्दानामयुतं सदा।। इत्यत्र।।

तस्मादागमानां प्रामाण्यग्राहकनिर्वाहकयोरभावात् परस्परविरोधेनाशक्यनिश्चयत्वाच्च पुराणादिषु वृत्त्यर्थत्वनरकसाधनत्वादिप्रतीतेश्च न विशिष्टश्रेयस्साधने आगमानां प्रामाण्यमिति कथं शैवागमवेद्यत्वं शिवस्येति।

## वेदस्य शिवप्रणीतत्वव्यवस्थापनम्

अत्रोच्यते – महाजनपरिग्रहेण प्राप्तप्रामाण्यस्य वेदस्य न तावदपौरुषेयत्वेन नित्यतया निर्दोषत्वेन प्रामाण्यनिर्वाहः। स्वरूपेण प्रवाहरूपेण वा तस्य नित्यत्वे प्रमाणाभावात्। किन्तु न्यायानुगृहीतनिगमागमस्मृतीतिहासपुराणसिद्धेन परमाप्तपरमकारुणिकशिवप्रणीतत्वेनैव। एवमेव तादृशशिवप्रणीतत्वेनैव वेदमूलत्वं विना स्मृतीतिहासपुराणानां प्रामाण्यम्। एवञ्च शैवादीनां वेदानुसारिणां तद्बाह्यानामार्हतादीनां चागमानामपि तेनैव तुल्यत्वादविशेषेण प्रामाण्यमस्त्येव। एवं वेदादिलोकायतान्तानां मार्गाणामाप्तशिवप्रणीतत्वादविशेषेऽपि वेदस्तूत्तमः, तत्कल्पश्च शैवगम इति।

तथाहि – न तावद्वेदस्य स्वरूपेण नित्यत्वं, प्रमाणाभावात्। प्रत्युत श्रुतपूर्वो गकारः, इदानीं नास्ति, ककारस्तूत्पन्नः, शान्तः कोलाहल इति च प्रतीत्या

वर्णानामनित्यत्वेनानुपूर्विविशेषविशिष्टवर्णसमूहात्मकस्य तस्य सुतरामनित्यत्वात्। ननु स एवायं गकारो यः पूर्वेद्युश्श्रुत इति पूर्वापरगकारैक्यावगाहि प्रत्यभिज्ञानं नित्यत्वसाधकं वर्णानाम्। तत्र यद्यपि तेषु तारोऽयं गकारो मन्दोऽयं गकार इत्युत्कर्षापकर्षरूपतारत्वमन्दत्वविरुद्धजात्याक्रान्तत्वेन[65] भेदकधर्मयोगितया तारान्मन्दोऽन्य इति साक्षात्भिन्नत्वेन च ज्ञानमप्यस्ति, तथाऽपि गत्यभावे तयोरुत्कर्षादियोगित्वेनोभयसम्मतव्यञ्जकवाय्वादिविषयत्वकल्पनेन वर्णविषयत्वाभावात् नोक्तप्रत्यभिज्ञाबाधकत्वम्।

यद्वा – तावता तयोस्सर्वगकारैक्यावगाहि प्रत्यभिज्ञाबाधकत्वेऽपि तारेषु मन्देषु चैक्यावगाहि प्रत्येकप्रत्यभिज्ञाया न किञ्चित्बाधकम्। यद्यपि च प्रत्यभिज्ञानं न साक्षान्नित्यत्वसाधकं, घटादिष्वपि तत्प्रसङ्गात्। तथाऽपि तत्सिद्धेन नाशकत्वाभिमतविरोधि- गुणसन्निधानेऽप्यविनाशित्वलिङ्गेन वर्णानां नित्यत्वमिति। एवञ्चोत्पत्त्यादिप्रत्ययानामपि पूर्वोक्तानामुक्तरीत्या व्यञ्जकवायुविषयत्वमेवेति। मैवम् – एकस्या एवोक्तप्रत्यभिज्ञायास्तानेव शालीन्भुञ्जामहे ये मधुरायां भुक्ता इत्यादिवत् प्रतीतगत्वादिधर्मविषयत्वे सम्भवति नानेकासां प्रतीतीनामप्रतीतव्यञ्जकवाय्वादिविषयत्वकल्पनं गौरवादिति प्रत्यभिज्ञाया गत्वादिविषयत्वमेव। अतो न वर्णनित्यत्वम्। अपि तु पूर्वोक्तप्रत्यक्षेणानित्यत्वमेव। येषां मते शब्दाभावो न प्रत्यक्षः, अधिकरणप्रत्यक्षस्य संसर्गाभावप्रत्यक्षेऽपि तन्त्रत्वात्, तेषां मते कृतकत्वादिना तेषामनित्यत्वमनुमेयम्। अपि च – वर्णानां नित्यत्वेऽपि न त एव वेदाः। अतिप्रसङ्गात्। किन्त्वानुपूर्वीविशेषविशिष्टाः। आनुपूर्वी च तेषां न स्वतस्संभवति। प्रमाणाभावात्। अनङ्गीकाराच्च। किन्त्वकारोच्चारणानन्तरोच्चारितत्वं गकारस्य तदभिव्यक्त्यनन्तराभिव्यक्तत्वं वाऽऽगन्तुकोच्चारणाभिव्यक्तिगर्भं, तद्वि- शिष्टाश्चानित्या एवेति वेदस्यानित्यत्वमेव स्वरूपेण। नाऽपि प्रवाहरूपेणनित्यत्वं, तद्व्यवच्छिन्नपरतन्त्राद्व्यापकपरंपराधीनत्वम्। तच्च न सम्भवति। गतागामिप्रळयानामनन्तरमेव साध्यमानत्वात्। तस्मन्नोभयविधमपि तस्य नित्यत्वम्। नित्यत्वावेदकश्रुत्यादयश्चोक्तयुक्त्या वक्ष्यमाणयुक्त्या च मुख्यार्थासम्भवात्सर्गभेदेऽपि नियतानुपूर्वीकत्वपरा अर्थैक्यपरावेति।

नन्वेवं कथं वेदप्रामाण्यनिर्वाहः। उक्ताप्तोक्तत्वेऽपि प्रमाणाभावात्। ननु वेदस्स्वार्थयथार्थज्ञानवत्प्रणीतः, वाक्यत्वात् **काळिदासादि**वाक्यवदित्यनुमानं प्रमाणमिति चेत्, अध्यापकेन सिद्धसाधनात्। ज्ञाने च शब्दानधीनत्वविशेषणे आधुनिकवेदव्यक्तिविशेषे शिष्योपाद्यायोच्चारिते बाधः। शिष्यस्य ज्ञानाभावात्। उपाध्यायज्ञानस्य च पूर्ववेदजन्यत्वात्। सर्गाद्यकालीनवेदपक्षीकारे चाश्रयसिद्धिः, स्मृतौ व्यभिचारश्च। मन्वादिभिर्वेदादेवार्थं बुद्ध्वा स्मृतेः प्रणयनात्। शुकबलादिवाक्ये सर्वथा व्यभिचाराच्च। आवश्यकानुपूर्वीस्मरणादेव वाक्यरचनोपपत्तेरर्थज्ञानस्य तत्राहेतुत्वेनानुपूर्वीस्मरणस्य चार्थज्ञानं विनाऽपि सम्भवेन चाप्रयोजकत्वाच्च। अतो नानुमानं तत्र प्रमाणमिति।

मैवम् – वेदस्सजातीयोच्चारणानपेक्षस्वार्थयथार्थज्ञानवदुच्चारितजातीयः, प्रमाण- वाक्यत्वात्, **काळिदास**वाक्यवदित्येवानुमानम्। आधुनिकवेदश्च तादृशाद्यवेदसजातीय एव।

---

[65] (टि) तारत्वमन्दत्वविरुद्धजातीति। तारत्वमन्दत्वरूपविरुद्धजातीत्यर्थः। तयोः प्रत्यययोः।

स्मृतिप्रणेतुश्च ज्ञानं विजातीयवेदानुपूर्व्यपेक्षमेव। शुकादिवाक्यानाञ्च संवादिनामीश्वरप्रणीतत्वेन पक्षसमत्वम्। अतो नोक्तबाधादिदोषः। असंवादिनान्तु तेषां यद्यपि शिवप्रणीतत्वं न सम्भवति। तस्य भ्रमाभावात्। तथाऽपि तेषु प्रमाणत्वगर्भहेत्वगमनान्न व्यभिचारः। नाप्यप्रयोजकत्वम्, ईदृशस्य महार्थस्य महत **ऋग्वेदा**देरर्थज्ञानं विना केवलादृष्टादेव शुकादिवत्स्मरणासम्भवात्, महाजनपरिग्रहादेव प्रतारणादिशङ्काया निरस्ततात्वाच्च। अतोऽनुमानेन वेदस्याप्तोक्तत्वम्। एवं **श्वेताश्वतरबृहदारण्यक**मूलकाभ्याञ्च "अङ्गानि वेदाश्चत्वार:" इति **वायव्यसंहिताया** "वेदांश्च धर्मशास्त्राणी"ति **सूतसंहिताया** च तस्य तदवगम्यते। तदेवं स्थितमेतदुक्तश्रुत्यादिबहुप्रमाणविरोधान्न वेदस्य स्वरूपेणाध्येतृप्रवाहरूपेण वा नित्यत्वं किन्तु श्रुत्यादिभिश्शिवप्रणीतत्वमेवेति।

अत्र च प्रणयने द्विविधं मतन्नित्यत्वं, यथा पूर्वस्मृत्यनुसारेण पूर्वोत्तरसर्गेष्वनाद्येकानुपूर्वीकत्वमेव। वेदस्य प्रणयनन्तु पूर्वसर्गसिद्धानुपूर्वीविशिष्टस्य वासनात्मना स्थितस्याभिव्यक्तिमात्रम्। न स्वतन्त्राभिनवरचनोत्पादनं **काळिदासा**दिवदित्येकम्, अपरन्त्वभिनवरचनोत्पादनमेव प्रणयनं **काळिदासा**दिवत्, नित्यत्वन्तु पूर्वापरसर्गेष्वर्थैक्यमेवेति। तत्र मतद्वयेपि न वेदस्य पौरुषेयत्वप्रयुक्तप्रामाण्यम्। एकत्र स्वातन्त्र्याभावादेव, अपरत्र तु परमाप्तप्रणीतत्वादिति। एतच्च सर्वमुक्तं **सूतसंहितायां यज्ञवैभवे उत्तरखण्डे** –

श्रुतिस्सनातनी शम्भोरभिव्यक्ता न संशयः।
शङ्करेण प्रणीतेति प्रवदन्त्यपरे जनाः।।
यदा साऽनादिभूतैव तदा मानमतीव सा।
स्वतश्चपरतो दोषो नास्ति यस्या द्विजर्षभाः।।
स्वतो दोषो न शब्दस्य विद्यते सूक्ष्मदर्शने।
अस्ति चेत् व्यवहारस्य लोके लोपः प्रसज्यते।।
परतश्च न दोषोस्ति परस्याभावतो द्विजाः।
स्वतो दुष्टोऽपि शब्दस्तु मानमेवाप्तसङ्गमात्।।
इति वार्तापि वार्तैव मुनीन्द्रास्सूक्ष्मदर्शने।
स्वतो दुष्टः कथं मानं भवत्यन्यस्य सङ्गमात्।।
यत्संबन्धेन यो भावो यस्य प्रज्ञा प्रसिध्यति।
स तस्य भ्रान्तिरेव स्यान्न स्वभावात्कथञ्च न।।
जपाकुसुमलौहित्यं बिभर्ति स्फटिको भृशम्।
तथाऽपि तस्य लौहित्यं भ्रान्तिरेव न वास्तवम्।।
वह्निजार्कजलौहित्यमिष्टकायान्न वास्तवम्।
लौहित्यन्तेजसोऽशंस्तु नेष्टकाया निरूपणे।।
अन्यस्यान्यत्र धर्मस्तु प्रतीतोतिभ्रमो मतः।
आप्तापेक्षा तु शब्दस्य प्रामाण्यस्य न सर्वथा।।
अनाप्तयोगाच्छब्दस्य प्रामाण्यं मुनिपुङ्गवाः।
स्वतस्सिद्धं तिरोभूतं तन्नाशाय हि केवलम्।।

यदा सा शङ्करेणोक्ता तदापि श्रुतिरास्तिका:।
प्रमाणं सुतरामाप्ततम एव महेश्वर:।।
सर्वदोषविहीनस्य महाकारुणिकस्य च।
सर्वज्ञस्यैव धीरस्य कथं दोष: प्रकल्प्यते।।
सर्वदोषविशिष्टस्य निर्घृणस्य दुरात्मन:।
अल्पज्ञस्यैव मर्त्यस्य दुष्टताऽस्ति हि सत्तमा:।।
यस्य स्मरणमात्रेण स मलो निर्मलो भवेत्।
ब्रूत सत्यं तपो निष्ठा: कथं न मलिनो भवेत्।।
अत: पक्षद्वयेनापि वेदो मानन्न संशय:।

इत्यन्तेन अत्र च पक्षद्वये दोषाभावेऽपि वस्तुसिद्धान्तस्तत्रैवोदित: -

वेदोऽनादिश्शिवस्तस्य व्यञ्जक: परमार्थत:।
अभिव्यक्तिमपेक्ष्यैव प्रणेतेत्युच्यते शिव:।। इति।

एवं तावत्परमाप्तशिवप्रणीतत्वेनैव वेदस्य प्रामाण्यमिति सिद्धम्। एवमेव स्मृतीतिहासपुराणादीनामपि वेदमूलत्वं विनैव तादृशशिवप्रणीतत्वेनैव प्रामाण्यम्।।

## सर्वमार्गप्रामाण्यम्

एवञ्च तं तुल्यत्वाद्वेदानुसारिणां शैवादीनान्तत्बाह्यानाञ्च शाक्यादीनामविशेषेणैवोभयविधानामप्यागमानान्तादृशशिवप्रणीतत्वेन प्रामाण्यम्। अस्ति हि तावत्तेषामपि सर्वेषामाप्तप्रणीतत्वे उक्तमनुमानम्।

**वायुपुराणमपि बृहदारण्यकोपनिषद**र्थप्रतिपादकमितिहासपुराणादीनामपि शिवप्रणीतत्वं वेदवदावेदयति –

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तर:।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश।।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात्।
अर्थशास्त्रं परं तस्माद्विद्या ह्यष्टादशस्मृता:।।
अष्टादशानमेतासां विद्यानां भिन्नवर्त्मनाम्।
आदिकर्ता कविस्साक्षात् शूलपाणिरिति श्रुति:।।
स हि सर्वजगन्नाथस्सिसृक्षुरखिलं जगत्।
ब्रह्माणं विदधे साक्षात्पुत्रमग्रे सनातनम्।।
तस्मै प्रथमपुत्राय ब्रह्मणे विश्वयोनये।
विद्याश्चेमाददौ पूर्वं विश्वसृष्ट्यर्थमीश्वर:।।
लब्धविद्येन तेनापि प्रजासृष्टिं वितन्वता।
प्रथमं सर्वशास्त्राणां पुराणं ब्रह्मणास्मृतम्।।
अनन्तरन्तु वक्त्रेभ्यो वेदास्तस्य विनिर्गता:।
उत्पत्तिस्सर्वशास्त्राणां तन्मुखादभवत्तत:।। इति।

अपि च –

यश्चतुर्वेदविद्विप्रः पुराणं वेत्ति नार्थतः।
तं दृष्ट्वा भयमाप्नोति वेदो मां प्रतरिष्यति।।
इतिहासपुराणाभ्यां वेदं समुपबृम्हयेत्।

इत्यादिवचनात्साधारणशब्दादिभिस्सामान्यतस्सूचिते श्रुतावर्थविशेषे विशिष्यानिश्चिते इतिहासपुराणाभ्यां निश्चयः। प्रकृतेऽपि **श्वेताश्वतरोपनिषत्स्थ** वेदशब्दोत्तरं च शब्दोपबृम्हणेन सामान्यतश्च शब्दसूचितसमुच्चेतव्यविशेषनिश्चायकेन **सूतसंहितास्थ यज्ञवैभवखण्डे द्वाविंशाध्यायेन महाभारतवचनेन** च वेदवेदानुसारि तद्बाह्यानां वेदादिलोकायतान्तानां सर्वेषामपि मार्गाणां शिवप्रणीतत्वं निश्चीयते। तत्त्वेन सर्वेषां प्रामाण्याञ्च यथा –

अथातस्संप्रवक्ष्यामि मार्गप्रामाण्यनिर्णयम्।
श्रद्धया सहिता यूयं शृणुध्वं मुनिपुङ्गवाः।।
वेदांश्च सर्वशास्त्राणि पुराणं भारतं तथा।
वेदाङ्गान्युपवेदांश्च कामिकाद्यागमानपि।।
कापालं लाकुळञ्चैव तयोर्भेदान् द्विजर्षभाः।
तथा पाशुपतं सोमं भैरवप्रमुखागमान्।।
तेषामेवोपभेदांश्च शतशोऽथ सहस्रशः।
विष्ण्वागमांस्तथा ब्राह्मान्बुद्धार्हाद्यागमानपि।।
लोकायतं तर्कशास्त्रं बहुविस्तारसंयुतम्।
मीमांसामतिगंभीरां सांख्ययोगौ तथैव च।।
अनेक भेदभिन्नानि तथा शास्त्रान्तराणि च।
निर्ममे शङ्करस्साक्षात्सर्वज्ञस्संग्रहेण तु।।
प्रसादादेव रुद्रस्य ब्रह्मविष्ण्वादयस्सुराः।
सिद्धविद्याधरा यक्षा राक्षसाद्यास्तथैव च।।
मुनयश्च मनुष्याश्च महाभागा द्विजोत्तमाः।
तान्येव विस्तरेणैव संग्रहेणैव वा पुनः।।
कुर्वन्ति तानि मानानि कथितानि मनीषिभिः।
अधिकारिविभेदेन नैकस्यैव सदा द्विजाः।।
तर्कैरेते हि मार्गास्तु न हन्तव्या मनीषिभिः। इति।

**महाभारते** च –

साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
अतिप्रमाणान्येतानि न हन्तव्यानि हेतुभिः।। इति।

अत्र "प्रसादादेव रुद्रस्ये"त्यनेन पुराणेषु स्मृत्यागमादीनां ब्रह्मादिसृष्टत्वकथनस्य गतिरुच्यते। अनेनैव शिवागमेष्वपि तच्छ्रुतेर्गतिरुक्तैवेति नापसिद्धान्तोऽपि। एवञ्च

स्मृत्यादीनामभियुक्तैर्वेदमूलकत्वोक्तिरपि तेषां शिवोदीरितत्वावेदकश्रुत्या बाध्यत इति ध्येयं, यद्वा – तेषां प्रामाण्यपरासेति। अधिकारिविभेदेनेत्यस्यायंभावः। आर्हतादिलोकायतान्तम्। शास्त्रं बाह्यं वेदानुसारिशास्त्रञ्चान्योन्यं विरुद्धमेव प्रतीयते। नन्वेकदेशोऽप्यविरुद्धः कश्चिदस्ति। तथाहि **लोकायते** –

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मकुण्ठनम्।
बुद्धिपौरुषहीनानां जीविका यत्र निर्मिता।।
न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिनः।।

इत्यादिना सर्ववैदिककर्मनिषेधः। एतच्च सर्वमन्येषामपि बाह्यानामनुमतमेव। एवं वेदादिष्वपि "सच्छास्त्रमधीयीते"त्यादिना[66]ऽऽर्हतादिधर्मनिषेधः। एवं वेद तदनुसारिष्वप्यन्योन्यनिषेध-स्तत्र तत्र श्रूयते। एवं वेदेष्वेव कर्मब्रह्मकाण्डयोरन्योन्यनिषेधः। शाखाभेदेऽपि चोदितानुदितहोमनिषेधः। अत एवाधिकारिभेदेनेत्युक्तम्। न तु वेदाविरुद्धकर्मास्त्विति। एवञ्चाप्तोक्तत्वाविशेषाद्वेदादिलोकायतान्तेषु मार्गेषु सर्वत्र विरुद्धेषु क्रियांशेषु सात्विकराजसतामसतदुत्कृष्टाद्यधिकारितारतम्येन ग्रहणाग्रहणवदुदितानुदितहोमवद्वा व्यवस्थितविकल्प एव, न तु सर्वात्मना बाधः। अन्यथा मार्गान्तरापेक्षया शाखान्तरापेक्षया वा विरोधे वेदस्यापि प्रामाण्यं न स्यादिति। तदुक्तं **पुरुषार्थप्रबोधे** –

परस्परविरुद्धत्वेऽप्येतेषां सर्ववर्त्मनाम्।
पुंविशेषान् समुद्दिश्य प्रामाण्यं केन वार्यते।।
प्रामाण्यं सर्वमार्गणामेकमुद्दिश्य यो वदेत्।
व्याहतं तद्वाक्यमेव न मद्वाक्यं न संशयः।।
प्रामाण्यं सर्वमार्गाणां पुंभेदेनापि नैव चेत्।
तर्हि कस्यापि मार्गस्य प्रामाण्यं नैव विद्यते।।
मार्गा वेदविरुद्धा ये तेषामेव प्रमाणता।
स्वप्नेऽपि वेदमार्गस्य नैव चेदप्रमाणता।।
समाना वेदमन्त्राणां परस्परविरुद्धता।
अतोऽप्रमाणता वेदमार्गस्य न भवेत्कथम्।।
वेदानामप्रमाणत्वं वेदमार्गबहिष्कृताः।
वदन्ति तान्त्रिका एव सर्वथा वैदिका न चेत्।।
तर्हि तन्त्राप्रामाणत्वं तन्त्रसम्बन्धवर्जिताः।
वदन्ति वैदिका एव सर्वथा न तु तान्त्रिकाः।।
विचित्रानन्तरकर्माधीनाधिकारिविभेदतः।
लोकायतादिवेदान्तमार्गाणामस्तु मानता।।
तथाऽपि वेदो मार्गाणामुत्तमस्सर्वसाधकः।
तत्प्राप्तिहेतवस्त्वन्य इति चेन्नेति को वदेत्।। इति।

---

[66] (पा) नासच्छास्त्रमधीयीतेत्यादिना

अनेन मार्गाणां परस्परविरोधादशक्यनिश्चयत्वमप्युक्तं परिहृतम्। उक्तनिन्दादिवाक्यानामपि विशुद्धसत्वनिर्विशेषब्रह्मविद्यायोग्यकेवलतन्त्रानुचितप्रकृतमहर्षिविषयत्वमप्यर्थात्[67] सामान्यत उक्तं भवति। विशिष्याप्युत्तरत्र परिहारं वक्ष्यामः। एवञ्चास्मिन्पक्षे औदुम्बरी सर्ववेष्टनमपि श्रौतेन स्पर्शेन व्यवस्थया विकल्प्यत एव, न तु सर्वात्मना बाध्यते। एवञ्च यदुक्तं **शबरस्वामिना** "गुरुणा च विरोधे श्रौतेन स्मार्तस्य बाधः तस्याप्रमाणत्वा"दिति, तदप्यनाद्यधिकारि[68]भेदाभिप्रायेण, तच्छाख्यभिप्रायेण वा स्मृतेर्वेदमूलत्वमङ्गीकृत्य न्यायप्रकटनमात्रं वा। निराकृतञ्च तदपि **भट्टपादैः**। यदप्युक्तं **भट्टपादै**स्तस्माच्छाक्याद्यागमा एव अत्रोदाहरण मिति तदपि तद्वदेव। यद्वा स्वरूपांशवाक्ये विरोधे इतरेषां बाध्यत्वस्याधि-कारिभेदापेक्षया प्ररोचकत्वस्य वा वक्ष्यमाणत्वादभिप्रायेण वा तद्वचनम्। एवं सर्वमार्गाणां प्रामाण्यमुक्त्वा तद्दार्ढ्याय तदर्थानुष्ठानस्य तत्र तत्रोपयोग उक्तः। **तत्रैव** –

येन केन प्रकारेण जनैरेभिरुपासितः।
तत्तन्मार्गानुगुण्येन साधकत्वमुपैति सः।।
तत्प्रसादात्क्रमान्मार्गान्विशिष्टानेति मानवः। इति।

अत्र मनसि ब्रह्मदृष्टिवत् चार्वाकादिमतेऽपि राजव्यक्तौ ईश्वरदृष्टिकरणात् स उपासित इत्यर्थः। विशिष्टानिति, वाद्यन्तरोक्तदेहादिविलक्षणोत्तरोत्तरात्मज्ञानरूपानित्यर्थः। अत एवान्यत्रापि मार्गान्तरज्ञानादेर्ज्ञान एवोपयोग उक्तः –

वेदमार्गजनितन्तु वेदनं
दोषहीनमति शोभनं सदा।
अन्यमार्गजनितं हि वेदनं
वेदमार्गरुचितकारणं क्रमात्।। इति।

तथा **भागवतेऽप्येकादशस्कन्धे** – "वैदिकस्तान्त्रिको मिश्र" इत्यादिना तान्त्रिका कर्मणोऽपि ज्ञानोपोगित्वमुक्तम्। लोकायतादिवेदान्तानामुत्तरोत्तरोत्कर्षः[69]। नन्वेवं लोकायतादिवैदिकान्तेषु धर्मेषूपकारतारतम्याभावान्महाजनपरिग्रहतारतम्याद्याकस्मिकं स्यादिति चेत्, अत एव विशेषादुपप्रणेत्रादिगौरवतारतम्याच्च तेषु तारतम्यमुन्नेयम्। तदेव तारतम्यं तेषु **सूतसंहितायां यज्ञवैभवखण्डे** सर्वज्ञेन करुणाब्धिना स्कन्धेन कथितमृषिभ्यः कावषेयेभ्यः –

शृणुध्वमृषयस्सर्वे महाभाग्यसमन्विताः।
वदामि संग्रहेणाहं युष्माकं धर्ममुत्तमम्।।
स्वमनीषिकयोत्पन्नो निर्मूलो धर्मसंज्ञितः।
श्रद्धया सहितो यस्तु सोऽपि धर्म उदाहृतः।।
निर्मूलोऽपि स्वबुद्ध्यैव कल्पितोऽपि महर्षयः।
देवताराधनाकारो धर्मः पूर्वोदिताद्वरः।।

---

[67] (टि) महर्षि विषयत्वमपीति। महर्ष्यपेक्षमपीत्यर्थः।

[68] (टि) तदपि बाध्यत्वमपि।

[69] (टि) इतीदं विषयसूचिकात्वेन ज्ञेयं न तु ग्रन्थान्तर्गतम्।

देवताराधनाकारान्निर्मूलाद्बुद्धिकल्पितात्।
धर्मश्श्रेष्ठस्समाख्यातस्समूलो धर्म आस्तिकाः।।
समूलेषु च धर्मेषु बुद्धागमसमन्वितः।
धर्माच्छ्रेष्ठ इति प्रोक्तो मया वेदार्थपारगाः।।
बुद्धागमोदिताद्धर्मादार्हतागमचोदितः।
धर्मश्श्रेष्ठो इति प्रोक्तो धार्मिकत्वविशारदैः।।
आर्हागमोदिताद्धर्मात् प्राजापत्यागमोदितः।
धर्मश्श्रेष्ठ इति प्रोक्तस्सर्वधर्मार्थवेदिभिः।।
प्राजापत्यागमप्रोक्ताद्धर्माद्वेदविदां वराः।
मया श्रेष्ठ इति प्रोक्तो धर्मो विष्ण्वागमोदितः।।
विष्णवागमोक्ताद्धर्माच्च वेदवेदाङ्गपारगाः।
शैवागमोदिता धर्मो वरिष्ठो नात्र संशयः।।
शैवागमोगदितोधर्मो द्विधा पूर्वमुदीरितः।
अधस्स्रोतोद्भवस्त्वेक ऊर्ध्वस्रोतोद्भवः परः।।
अधस्स्रोतोद्भवाद्धर्मादूर्ध्वस्रोतोद्भवो वरः।
कामिकादिप्रभेदेन स भिन्नोऽनेकधा द्विजाः।।
अधस्स्रोतोद्भवाद्धर्मो बहुधा भेदितस्तथा।
ऊर्ध्वस्रोतोद्भवा धर्मात्स्मार्तधर्मा महत्तराः।।
स्मार्तेभ्यश्श्रौतधर्माश्च वरिष्ठा मुनिसत्तमाः। इति।

अधस्स्रोतोद्भवादिति। वामपाशुपतादिगारुडाद्यागमा अत्रैवर्णिकाधिकृता अधस्स्रोतसः। ते हि पञ्चमन्त्रतनोस्सदाशिवभट्टारकस्य नाभेरधोभागादुत्पन्ना अधस्स्रोतस उच्यन्ते। यद्वा – तादृशसदाशिवानुगृहीतेभ्यः केभ्यश्चित् शिवेभ्यस्तदुत्पद्यन्ते। तेषामूर्ध्वस्रोतः कर्तृसदाशिवानुगृहीतत्वादधस्त्वम्। ऊर्ध्वस्रोतश्शब्देन च तस्य सदाशिवस्येशानतत्पुरुषाघोरवामाजाख्येभ्यः पञ्चभ्यो वक्त्रेभ्यस्तत्कार्यकारिणीभ्यः शक्तिभ्यो वोत्पन्नाः **कामिकादिवातुळान्ता** अष्टाविंशत्यागमा बहुशाखा उच्यन्ते। ऊर्ध्वस्रोतोद्भवाद्धर्मात्स्मार्ताधर्मा इत्यत्रोर्ध्वस्रोतोद्भवोऽयं धर्मो द्विविधः। तत्रैकस्त्रैवर्णिकाधिकारश्श्रौतस्मार्तव्यामिश्रागमिकक्रियार्जितः। तथाहि **श्रीमत्पराख्ये** –

दीक्षा कार्याहि सर्वेषां तच्छक्तिविधियोगिनाम्।
त्रयाणामपि वर्णानां न तु शूद्रान्त्यजातिषु।। इति।

त्रैवर्णिकानामविशेषणदीक्षा विधीयते। एतच्च यथा तथोत्तरत्राष्टमसूत्रे प्रतिपादयिष्यामः। **सर्वज्ञानोत्तरे** च –

यस्मिन्वर्णे स्थितो दीक्षां प्राप्तो देहिशिवात्मिकाम्।
तत्रैव संस्थितो दीक्षां वर्णधर्मञ्च पालयेत्।।

इति वर्णधर्मसमुच्चयो विधीयते।

यो यस्मिन्नाश्रमे तिष्ठन्प्राप्तो दीक्षां शिवात्मिकाम्।
स तस्मिन्नेव सन्तिष्ठन् शिवधर्मञ्च पालयेत्।।

इति **मृगेन्द्रा**दावाश्रमधर्मस्समुच्चीयते। तथा **मृगेन्द्र** एव क्वचिद्वर्णाश्रमधर्मं निरूप्य –

इति वर्णाश्रमाचारान्मनसाऽपि न लङ्घयेत्।

इति त्रैवर्णिकस्य केवलसिद्धान्ततान्त्रिकत्वं निषिध्यते। तथा च सोमयाजिनो विशेषविहिताग्नीषोमीयसहिताभ्यामिव दर्शपूर्णमासाभ्यां शिवदीक्षायुक्तस्य विशेष-विहितशैवसन्ध्यावन्दनादिसहिताभ्यां श्रौतस्मार्ताभ्यामेकमपूर्वं जायते। अपरस्तु स्त्रीसच्छूद्रा-धिकारिकः केवलतान्त्रिकः। तथाहि –

अमद्यपास्तु ये शूद्राश्शैवाचारक्रियादराः।
शिवभक्ताश्च ये तेषां दीक्षा कार्याऽन्यथा न हि।।

इति शूद्रप्रतिषेधस्य प्रतिप्रसवादस्ति स्त्रीसच्छूद्रयोरप्यधिकारो दीक्षायाम्। तेषाञ्च वेदश्रवणाध्ययनार्थज्ञानप्रतिषेधान्न वैदिककर्मण्यधिकारः। तत्र द्वितीयापेक्षया केवलस्मार्तस्य तन्त्रमिश्रितस्य स्मार्तस्य चोत्तमत्वं प्रतिपाद्यते। तस्यापि स्मार्तत्वात्। एवमुत्तरत्रापि केवलश्रौतस्य तन्त्रव्यामिश्रितस्य श्रौतस्य चोक्तस्मार्तापेक्षयोत्तमत्वं बोध्यते, तस्यापि श्रौतत्वात्। यद्वा – केवलतन्त्रधर्मापेक्षया केवलस्मार्तस्य तदपेक्षया च केवलश्रौतस्य चोत्तमत्वमत्र बोध्यते। तन्त्रमिश्रयोस्तु तयोरुक्तयोरतुल्ययत्नविकल्पितसाधनेषु ग्रहणाग्रहणादिषु ग्रहणादियुक्तस्येव यत्नाधिक्येनाधिक्यं स्थितमेव।।

## लोकायतादीनां वस्तुन्यप्रामाण्यम्

नन्वधिकारिभेदेन क्रियांशे परिहारेऽपि विरोधस्य वस्तुस्वरूपांशे तस्य न परिहारः। न हि वस्तुनि विकल्पस्सम्भवति। तथाहि - ईश्वरस्वरूपे जगत्कारणे बन्ध-हेतौ परममुक्तौ तत्साधनज्ञानादौ जीवस्वरूपे च विरोधस्तत्र तत्र मार्गेषु प्रतीयते। तथाहि – सांख्यादावीश्वर एव नास्तीति। न्यायवैशेषिकपाञ्चरात्रादौ सोऽस्ति। स तु जीवादुत्कृष्टः कल्याणानन्तगुणो भिन्नश्चेति। शैवेषु चाधस्स्रोतस्तु तथा। ऊर्ध्वस्रोतस्स्वपि महौघक्रमे **श्रीकण्ठनाथेन**र्षिदेवेभ्य उपादिष्टेषु जीवतुल्योऽनावृतगुणो भिन्नश्चेति। नन्दीशदेवीस्कन्दगणेशेभ्य उपादिष्टेषु च **रुरुतन्त्रदेवीकालोत्तरज्ञानतिलकसुप्रभेदादिषु** स्मृतीतिहासपुराणवेदान्तेषु च निर्विशेषचित्सुखाब्धिश्शिवो जीवगतानन्यत्वप्रतियोगीति एवं जगत्कारणेऽपि परमाणुप्रधानकेवलमायेश्वरमायाविशिष्टेश्वरभेदेन। बन्धहेतावपि केवलकर्मानादिवासनामलमायादिभेदेन। एवं मुक्तावप्यात्मनाशादिशिवाभिव्यक्तिपर्यन्तेन वक्ष्यमाणेन भेदेन। तदुपायेऽपि चतुर्विधवासनादिकेवलशिवतादात्म्यज्ञानपर्यन्तभेदेन। एवमात्मादिष्वपि भूतसंघातादिभेदेन। एतेषां कालभेदेनापि यथा व्यवस्था न सम्भवति, तथा तत्र तत्रोत्तरत्र वक्ष्यते। तथा च कथं तत्र व्यवस्थेति।

सिद्धान्तशैवस्य वस्त्वंशेऽपि वेदतुल्यत्वं अत्रोच्यते[70]। वेदस्य तावदीश्वरं विनोपप्रणेतारो

---

[70] (टि) सिद्धान्तशैवस्य वस्त्वंशेऽपि वेदतुल्यत्वं इतीदं विषयसूचिकारूपम्।

न श्रूयन्ते। अतोऽसम्भवितदोषत्वाद्वेदोऽधिकबलः। सिद्धान्तशैवस्यापीश्वरव्यतिरिक्त उपप्रणेता न श्रूयते। इन्द्रादीनान्तु संप्रदायप्रवर्तकत्वमात्रमेव। यदि च क्वचिच्छाखाभेदस्य[71] संग्राहकत्वं प्रमाणबलादवसितं तदा सप्रकरणमेव भविष्यति नागमः, वेदार्थसंग्राहककल्पसूत्रादिवत्। तथा च सिद्धान्तशैवागमोऽपि वेदतुल्य एव। उक्तं च **वायुसंहितायां** सिद्धान्तशैवागमस्य श्रौतत्वेन श्रुतिसमत्वम् –

शैवागमोऽपि द्विविधश्श्रौतोऽश्रौतश्च स स्मृतः।
श्रुतिसारमयश्श्रौतस्स्वतन्त्र इतरो मतः।।

इत्यारभ्य –

श्रुतिसारमयोऽन्यस्तु शतकोटिप्रविस्तरः।
परं पाशुपतं यत्र व्रतं ज्ञानञ्च कथ्यते।। इत्यन्तेन।

तथा **कूर्मे**ऽपि –

गुह्याद्गुह्यतमं सूक्ष्मं वेदसारं विमुक्तयः। इत्यादिना।

नचैवं वामादेरपीश्वरप्रणीतत्वेनोपप्रणेत्रन्तराभावेन च वेदतुल्यत्वापत्तिः। तस्य तथात्वेऽपि शिवेनैव वामादेरश्रौतत्वशिष्टाग्राह्यत्वयोस्तत्रैव **कूर्मे** सिद्धान्तशैवश्रौतत्वप्रसङ्गेन कथनात् –

अन्यानि चैव शास्त्राणि लोकेऽस्मिन् मोहनाय वै।
वेदवादविरुद्धानि मयैव कथितानि तु।।
वामं पाशुपतञ्चैव लाकुळञ्चैव भैरवम्।
न सेव्यमेतत्कथिमं वेदबाह्यं तथेतरत्।। इति।

तस्मात्सिद्धान्तशैवागमो वेदतुल्य एव। कथं तर्हि तयोर्भेदः। फलतो न कथञ्चित्। उक्तञ्च तथा **श्रीकण्ठाचार्यैः** "पत्युरसामञ्जस्या"दित्यत्र भाष्ये "वस्तुनि निगमागमयोर्विशेषं न पश्याम" इति। यदि सर्वात्मना न भेदः किमर्थं तर्हि द्वयं निर्ममे। अस्तीयान् भेदः। एकस्त्रैवार्णिकाधिकारः यथा वेदः। उक्तं च तस्य त्रैवर्णिकाधिकारत्वं षष्ठप्रथमे। अपरस्तु चतुर्थसाधारणाधिकारः यथा शैवागमः। तत्र हि आचार्यकविधिर्विद्यां विनाऽनुपपन्नस्तामाक्षिपति। आगमाध्ययने विधिश्चाक्षरावाप्तेः स्वतः फलत्वाभावात् फलमाकांक्षन् फलवदर्थावबोधरूपां विद्यां फलत्वेन स्वीकरोति। तदध्ययनं च शैवदीक्षायुक्तस्यैव। दीक्षा च चातुर्वर्णिकी। एतच्च यथायथ चाऽन्तराळजातीनां नाधिकारः यथा वासनस्त्रीशूद्रशप्तद्विजबन्धुनियतस्तथा वक्ष्यते। तथा च चतुर्थसाधारण्यर्थं पृथक् निर्माणमस्यागमस्य।

इदमप्युक्तं तत्रैव **श्रीकण्ठाचार्यैः** "इयानेव भेदः, वेद एकस्त्रैवर्णिकाधिकारोऽपरस्तु साधरणाधिकार" इति। अन्ये तु नित्यताश्रुतेरत्यन्त[72]परोक्षार्थता परिहाराय वेदगतानुपूर्वीनैयत्यमेव सर्गभेदेऽपि लक्षणीयं नन्वर्थैक्यम्। अत्यन्तपरोक्षार्थतापत्तेः।

---

[71] (टि) यदि च क्वचिदिति। क्वचित् ग्रन्थविशेषे शाखाभेदात्संग्राहकत्वं प्रमाणबलादवसितं। यदि तदा स प्रकरणमेवेत्यर्थः।

[72] (टि) अत्यन्तपरोक्षार्थतेति। अत्यन्तविप्रकृष्टार्थतेत्यर्थः।

तथा च सर्गभेदेप्येकानुपूर्वीक[73] एव वेदः। शैवागमस्य च तथात्वेन किञ्चित्प्रमाणम्। पूर्वकल्पसदृशसृष्टिश्रुतिस्तु वेदेऽधिकनित्यता श्रुत्यनुसारेणार्थसाम्यपरेति। अयमप्येतयोर्भेदोऽस्तीति वदन्ति। तथा च सिद्धान्तागमः फलतो वेदकल्प एव। पाञ्चरात्रादीनाञ्चागमानां य एवास्मिन् लोके प्रथन्ते तेषामेव विष्ण्वादिभिरुपप्रणीतत्वं श्रूयते। ते चेश्वरापेक्षया न्यूनज्ञानैश्वर्या इति प्रतिपादयिष्यते। एवञ्चार्वाकादिविष्ण्वन्तानां मनुष्यदेवतद्विशेषाणां मार्गप्रणेतृणामन्योन्यं पूर्वापेक्षयोत्तरेषां ज्ञानैश्वर्याधिक्यं श्रुतिस्मृतिन्यायसिद्धम्। तथा च पूर्वेषां भ्रान्तिसम्भवादुत्तरोत्तरागमेन पूर्वपूर्वस्योक्तेश्वरस्वरूपादौ बाधः कल्प्यते। तदुक्तं **सूतसंहितायाम्** –

पाञ्चरात्रादिमार्गाणां वेदमूलत्वमास्तिके।
न हि स्वतन्त्रास्ते तेन भ्रान्तिमूला निरूपणे।। इति।

एतद्वचनं विरुद्धविषयमेव[74], तत्रापि 'योंऽश' इत्युत्तरश्लोकेनाविरुद्धांशे[75] प्रामाण्यस्य समर्थनात्। **यज्ञवैभवेद्वाविंशेऽप्युक्तम्** –

एकरूपपरामुक्तिस्ततस्तद्विषयाकृतिः।
एकरूपाभवेनैव नानारूपा भविष्यति।।
वेदान्ते शङ्करस्साक्षान्निर्विशेषाद्वयात्मना।
उक्तो मार्गान्तरेनैवं ततो विद्यास्तु वेदजाः।।
अतो मार्गान्तरे जाता मतयो मतिमत्तामः।
अविद्या नैव विद्यास्स्युरिति[76] सम्यङ्निरूपणम्।।
तस्मान्मार्गान्तराणान्तु प्रामाण्यं वेदवित्तमाः।
मुक्तेरन्यत्र नात्रैव। इति।।

अत्र मुक्तिग्रहणं मुक्तेश्वरस्वरूपादेरप्युपलक्षणम्। लोकायतादीनामपि सोपानक्रमेणार्थवत्त्वम्। यद्वा – चार्वाकाद्यागमस्थमपि वाक्यं साक्षादर्थाद्वेश्वरोक्तमेव। तत्र प्रथममीश्वर एवातितामसं मन्दमतिं बाह्यान् पुत्रादीनात्मत्वेनाभिमन्यमानं लौकिकसुखमेव परमपुरुषार्थत्वेन मन्यमानमधिकारिणं प्रति पुत्रादीनामनात्मत्वं दुःखव्यामिश्रलौकिकसुखस्यापरमपुरुषार्थत्वञ्च प्रतिपाद्य तस्य बुद्धिस्थैर्याय सूक्ष्मार्थग्रहणासमर्थतया स्थूलदेहमात्मानं देहनाशाञ्च परमपुरुषार्थमुपदिशति। पुनस्तदुक्तधर्मानुष्ठानप्रसादितेश्वरस्य किञ्चिद्विमलीकृतमनसो देहात्मादावुपजनितानुशयस्य[77] देहाद्यात्मत्वादिनिराकरणाय बुद्धागममुपदिशति। एवमुत्तरत्रापि सोपानक्रमेणोपदेश इति कल्प्यते। विरोधपरिहारायावश्यकल्प्ये सोपानक्रमे लोकायतादीनां विशिष्टपरिग्रहतारतम्येनोत्तरोत्तरशास्त्रस्य पूर्वपूर्वनिराकरणमुखेन प्रवृत्तेश्चोक्तसोपानक्रमस्यैव कल्पयितुं युक्तत्वात्। उक्तञ्चेदमपि **सूतसंहितायां यज्ञवैभवेद्वाविंशे** –

---

[73] (टि) एकानुपूर्वीकः सदृशानुपूर्वीक इत्यर्थः। तथा चानुपूर्व्याश्शब्दधर्मत्वेन तत्साजात्यलक्षणाया अर्थैक्यलक्षणापेक्षयाऽस्ति सन्निकृष्टत्वमिति भावः।

[74] (टि) विरुद्धविषयमेवेति। वेदविरुद्धेश्वरस्वरूपादिविषयकमेवेत्यर्थः।

[75] (टि) अविरुद्धांशे – तत्तदधिकार्युचितानुष्ठानांशे।

[76] (पा) स्यादिति

[77] (टि) उपजनितानुशयस्य – उपजनितसन्देहस्येत्यर्थः।

ईश्वरस्य स्वरूपे च बन्धहेतौ तथैव च।
जगतः कारणे मुक्तौ ज्ञानादौ च तथैव च।।
मार्गाणां ये विरुद्धांशा वेदान्ते न विचक्षणाः।
तेऽपि मन्दमतीनाञ्च महामोहावृतात्मनाम्।।
वाञ्छामात्रानुगुण्येन प्रवृत्ता न यथार्थतः।
दर्शयित्वा तृणं मर्त्यो धावन्तीं गां यथाऽग्रहीत्।।
दर्शयित्वा तथा क्षुद्रमिष्टं पूर्वं महेश्वरः।
पश्चात्पाकानुगुण्येन ददाति ज्ञानमुत्तमम्।। इति।

नन्वेवं किमर्थं कल्प्यते। अप्रामाण्यमेव वेदविरुद्धानां कल्प्यतामित्याशङ्क्य **तत्रैवोक्तम्** –

तस्मादुक्तेन मार्गेण शिवेन कथिता अमी।
मार्गा मानं न चामानं मृषावादी कथं शिवः।।
महाकारुणिको देवस्सर्वज्ञो निर्मलः खलु। इति।

तस्माद्वेदशैवागमविरोधेन पाञ्चरात्रान्तानां बाध्यत्वमुपचरितार्थत्वं वा तेषामपि पूर्वस्योत्तरेण तथात्वमिति श्रुतिसिद्धान्तशैवागमयोस्सर्वोत्तमत्वं तयोश्च समत्वमिति।

ननु श्रुतिशैवागमयोरपि विरोध उक्तः, तयोस्समत्वे कथं तस्य परिहार इति चेत् भवेत्तेषामिदं चोद्यं येऽनधीत **देवीकालोत्तराद्या** देवर्षीणामुपदिष्टेष्वागमेष्वेव शैवागमपर्यवसानं मन्यमानास्तत्राप्यद्वैतादिपदमन्यथाव्याकुर्वाणास्स्वप्रयोजनेऽप्यद्वैते पापवशाद्द्वेषिणः "पुंसि वेदविदस्स्थिता" इति प्ररोचना वाक्येन मोहिताः, ये तु वयं **देवीकालोत्तरा**द्यनुसारेणैतेऽप्यागमा मन्दमतीन्प्रतिप्ररोचका उपासनापरा अद्वैतमेव परमार्थ अखण्डानन्दशिवाभिव्यक्तिरेव मुक्तिः, ज्ञानमेव मुक्तिसाधनमित्यास्थितास्तेषां नायं दोष इति। एतच्च यथा तथाऽष्टमसूत्रे प्रतिपादयिष्यामः। तस्माद्वेदस्याप्तशिवप्रणीतत्वेनैव प्रामाण्यं, स्मृत्यादीनामपि शिवप्रणीतत्वेनैव प्रामाण्यं, न वेदमूलकत्वेन। कामिकाद्यागमानां वेदानुसारिणां वेदबाह्यानाञ्च शाक्यादीनां शिवप्रणीतत्वविशेषेण तत्तदधिकारिणं प्रति प्रामाण्यमस्त्येव। तत्र क्रियांशे विरोधेऽप्यधिकारिभेदेन व्यवस्थैव। वस्तुस्वरूपांशे तु वेदशैवागमापेक्षया पाञ्चरात्रान्तानां बाध्यत्वं, तेषामन्योन्यबाध्यत्वं, गौणोपदेशत्वं वा कल्प्यते। वेदशैवागमौ त्वविरुद्धौ तुल्यौ। एवं तद्धर्मावप्युत्तमाविति।

अथवेतिहासपुराणादीनां वेदमूलत्वेन प्रामाण्यम्। बहुशस्तथैव स्मृत्यादिषु प्रसिद्धेः। पाञ्चरात्रादीनामपिविष्ण्वादिप्रणीतत्वमेव साक्षात्। तथैव तत्र प्रसिद्धेः। एवं तेषामपि प्रामाण्यं तत्प्रणेतृणां ज्ञानैश्वर्ययुक्तत्वात्। तदनुसारेण **बृहदारण्यमूलकवायुपुराण-सूतसंहितादिक**मप्यन्यथा व्याख्यायते। तथाहि – ऋगादिशब्दैर्वेदशब्देन च तत्रस्थ मन्त्रभाग उच्यन्ते। ऋगादिशब्दानां मन्त्रेष्वपि प्रसिद्धेः। इतिहासशब्देन च वेदस्थमेव शौनश्शेफादिप्रसिद्धोपाख्यानमुच्यते। पुराणशब्देन च तत्रस्थं सृष्टिवाक्यम्। धर्मशास्त्रशब्देन विधिवाक्यादि। मीमांसाशब्देन चोस्तृज्यादिमीमांसा तत्रस्थैव। व्याख्यानोपव्याख्यानशब्दाभ्याञ्च यज्ञोपवीतीप्रसृतादिपदव्याख्यानम्। वेदाङ्गशब्देन च तत्रस्थमेवावभ्रंशनिषेधादिवाक्यं

दर्शादिवाक्यं संवर्गादिपदनिर्वचनमित्याद्युच्यते। विष्ण्वागमादिशब्देनापि तत्तदृचस्तत्तत्ब्राह्मणं वा तत्रस्थमेव वाक्यमुच्यते। एवं बुद्धागमादिशब्दैरपि गौणात्मादिवाक्यं तत्रस्थमेव पञ्च-कोशनिरूपणाद्युच्यते। एवं पदान्तराणामपि वेदस्थवाक्यपरत्वमूह्यम्। एवञ्च वेदप्रणे-तृत्वमेवेश्वरस्य **बृहदारण्यमूलकवायुपुराणसूतसंहिता**सूक्तं भवति। व्याकृतञ्चैवं कैश्चित्। अस्मिन्नपि पक्षे शैवागमादीनामीश्वरप्रणीतत्वमेव, तेषां पाञ्चरात्रादीनामिव कर्त्रन्तरास्मरणे न शैवागमानित्यस्यान्यपरतया व्याख्याने बीजाभावात्, स्थलान्तरेऽपि विशिष्योक्तत्वाच्च। यथा –

अष्टादशपुराणानां कर्ता सत्यवती सुतः।
कामिकादिप्रभेदानां यथा देवो महेश्वरः।। इति।

तथा चास्मिन्नपि पक्षे सुतरां श्रुतितुल्या एव शैवागमा इति। इतरेषां वस्तुविरोधे परिहारस्तु पूर्ववदुन्नेयः धर्माणामुत्तरत्वञ्च पूर्ववदेव। तदेवमुक्तं सर्वमर्थजातं सिद्धान्तशैवागमसिद्धमेव श्रुतिस्मृतीतिहासपुराणादिभिस्समर्थितामिति न प्रयासवैयर्थ्यम्। न वा बाह्यागमानामपि प्रामाण्यसाधने मीमांसकादिवदपसिद्धान्ताशङ्काऽपि वदन्तु नाम प्रकृतितत्त्वान्तपर्यवसिताश्चार्वाकादिपाञ्चरात्रान्तामार्गिणस्तदुपरिस्थिततत्त्वभुवनादीनामपरिज्ञानात् तत्प्रतिपादकशैवागमस्याप्रामाण्यं, यस्तु सर्वज्ञस्तत्तत्परिज्ञातांशाभिज्ञश्शिवः परमाप्तस्स कथं तत्परिज्ञातांऽशे[78] तत्बाधितमुक्तिशिवस्वरूपव्यतिरिक्ते तेषामप्रामाण्यं वदेत्। तथाहि **श्रीमत्सर्वज्ञानोत्तरे** बुद्धाद्यागमानां प्रामाण्यमङ्गीकृत्योपयोगोऽप्युक्तो,

ज्ञानचर्यान्वितो बुद्धो बुद्धितत्त्वमवाप्नुयात्। इत्यारभ्य।

तथाऽन्यत्रापि –

बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वेवार्हतास्थिताः।
स्थिता वेदविदः पुंसि अव्यक्ते पाञ्चरात्रिकाः।। इत्यादि।

एवं सर्वसिद्धान्तशैवागमपारीणेन **श्रीमद्रौरववृत्तिविवेके रामकण्ठाचार्येण** सर्वागमप्रामाण्योपयोगौ कथितौ –

परस्परविरोधेन प्राप्तबाधाममानताम्।
सर्वागमानामाहुर्ये तत्प्रतिक्षेप उच्यते।।
शक्तितत्त्वे तदद्वैतमुक्तिमिच्छन्ति ये स्थिताः।
विद्येशतत्त्वे पूर्वे तत्प्रेर्यमीश्वरमेव ये।।
मन्त्रेशं शुद्धविद्यायां ये सर्वज्ञमनीश्वरम्।
मायायां ये स्वचिद्धीनं संक्रान्तगुणमीश्वरम्।।
ते स्थिता मुक्तिभेदोऽयं शुद्धोऽयं पशुदृक्कुतः।
पशौ ब्रह्मत्वमाहुर्ये चिद्विवर्ता न निर्मलान्।।
तत्रैव ये प्रपञ्चान्ये क्रियाशक्तौ परा हि वाक्।
अव्यक्ते येऽप्युपादानं गुणानां ब्रह्म चात्मनाम्।।

---

[78] (टि) तत्तत्परिज्ञातांशे – तत्तदधिकारिभेदेन तत्तदागममात्रपरिज्ञाततत्तदसाधारणांश इत्यर्थः।

तत्रैव कारणं तेषां ये तु नारायणाभिधम्।
गुणपृष्ठे गुणेभ्यो ये विवेकोक्तिबलान्तरम्।।
गुणेषु येऽप्यनेकान्तस्याद्वादामूलवृत्तिषु।
बुद्धौ भ्रान्त्या पुंमांसस्ते ज्ञानादिगुणशालिनम्।।
बुद्धिवृत्तौ क्षणध्वंसिज्ञानमात्रन्तु ये भ्रमात्।
अहं कृतौ तु तद्वृत्तिप्राणमात्रं भ्रमेण ये।।
मनसीन्द्रियवृत्तौ ये हेतुमात्रं भ्रमान्नरम्।
इन्द्रियेष्विन्द्रियाण्येव ज्ञत्वादात्मेति ये विदुः।।
तन्मात्रेष्वाप्यमाहुर्ये ब्रह्मभूताण्डकारणम्।
हिंसा मैथुनतस्सिद्धा पिशाचादिपदे स्थिताः।।
भूतेषु येऽपि चैतन्यं प्राप्यं भूतात्मकं विदुः।
इत्थं प्रत्यागमं येन भिन्नं प्राप्यं व्यवस्थितम्।।
सर्वागमानां तेनोक्तं प्रामाण्यमविरोधतः। इति।

एवं **परामोक्षनिरासकारिकास्वपि** द्रष्टव्यम्। एवं क्रियांशे मार्गाणां प्रामाण्यमुक्त्वा वस्त्वंशे पूर्वस्योत्तरबाध्यत्वमपि तात्पर्यतदुक्तं **सर्वज्ञानोत्तरे** –

न पुंभिरार्षकं वाक्यं दैविकं नार्षकैस्सदा।
न देवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मना।।
न शैवं वैष्णवेनापि बाध्यते तु कदाचना। इति।

**श्रीमन्मृगेन्द्रेपि**[79] –

पञ्चमन्त्रतनुः श्रीमान् सकळः परिपठ्यते।
सुप्रसन्नेन्द्रियग्रामस्सर्वज्ञस्सर्वगोचरः।।
योगी योगेश्वरस्स्वामी स्वतन्त्रः पशुपाशहा।
तस्योक्तिः पौरुषैस्स्थूलैः पुराणैर्न च बाध्यत।। इति।

अन्यत्रापि –

आप्तोक्तिरत्र सिद्धान्तश्शिव एवाप्तिमान्यतः।
न ताभ्यां सदृशः कश्चित् श्रेयसोऽस्ति विधायकः।।
सिद्धान्त एव सिद्धान्तः पूर्वपक्षास्ततः परे।
आगमाश्शिव एवैकश्शिवोऽन्ये त्वशिवा मताः।।
सांख्यादीन्यप्रमाणानि शास्त्राणि मति भेदतः।
असर्वज्ञप्रणीतानि बालोन्मत्तादिवाक्यवत्।। इति।

अत्र बाधग्रहणमुक्तगौणोपदेशत्वस्याप्युपलक्षणम्। तथा –

सृष्टिकाले महेशानः पुरुषार्थप्रसिद्धये।

---

[79] (पा) मतङ्गेपि

विधत्ते विमलं ज्ञानं पञ्चस्रोतोपि लक्षितम्[80]।।

इत्यत्र ज्ञानपदस्य **बृहदारण्यकाद्यनुसारेण** वेदादिसर्वशास्त्रपरत्वात्सर्वमार्गाणां शिवप्रणीतत्वमुक्तम्। अत्र मार्गाणामुत्तरोत्तरात्बाधक्रमकथनेन तत्तद्धर्माणामप्युत्तरोत्तरोत्तमत्वमप्यर्थात्। कथितं भवति। एवञ्च वेदशैवागमयोरीश्वरप्रणीतत्वात् पाञ्चरात्रवदुपप्रणेत्रभावाच्च तुल्यत्वमेव। यत्तु –

पुराणं बाध्यते वेदैरागमैश्च तदुक्तयः।

इति वेदस्यागमबाध्यत्वमुक्तम्, तत्कलादिसृष्ट्यादावपि वेदानुक्ते आगमानुसारेण वियदधिकरणन्यायादुभयोरप्यविरोधनयः कर्तव्य इत्येवं परम्। अन्यत्रागमे "वैदिकीन्तु पुरस्कृत्ये"ति वैदिकधर्मपुरस्करणस्योक्तत्वात्। "वेदात्सारं समुद्धृत्ये"ति क्वचिदागमार्थस्य वेदार्थत्वेनौत्कृष्ट्य कथनाच्च। एतच्च सर्वं सर्वश्रुतीतिहासपुराणागमानुसाराद्वस्तुगतिमनुरुन्धानेनोक्तम्। वस्तुतो वेदस्य मीमांसकमतानुसारेण नित्यत्वेन प्रामाण्येऽपि नास्माकं क्षतिः। तत एवागमानामपि प्रामाण्यं भवतु। तेषामीश्वरप्रणीतत्वश्रुतिरपि वेदवदेवार्थवादो भवतु। तदुक्तं **सिद्धार्थसमुच्चये** –

नित्यत्वेनागमानां प्रामाण्यमिति केचित्। इति।

यद्वा**ऽथर्वशिखादि**स्थितशिवतद्धर्माद्युपबृम्हणत्वेन वेदोपबृम्हणानां स्मृतिपुराणादीनामिव तेषां प्रामाण्यं भवतु। तदप्युक्तं "वेदात्सारं विमुक्तय" इति। अत्र पक्षे शैवागमस्य स्वातन्त्र्यवचनमश्रौतवामाद्यभिप्रायम्। तदुक्तं **वायव्यसंहितायां** सिद्धान्तशैवस्य वेदमूलत्वमुक्त्वा – "स्वतन्त्र इतरोमत" इति। यत्तूक्तं प्रामाण्यग्राहकमहाजनपरिग्रहाभाव इति तन्न। सामान्यत उक्त एव सूतादिमहाजनपरिग्रहस्सर्वागमानामपि। विशिष्य तु सिद्धान्तशैवागमेषु दीक्षाव्यतिरिक्ते सर्वत्र भूतशुध्यादौ प्रतिष्ठाद्युत्सवां तेष्वन्यत्र चास्त्येवाविगानेन महाजनपरिग्रहः। स्मृत्यादिषु च तादृशप्रतिष्ठामङ्गीकृत्य तत्सेवने फलविशेषाभिधानाच्च, भूतशुध्यादेरपि कर्माङ्गतयाऽनुज्ञानाच्च। यस्तत्रापि विवदते श्रौतस्मार्ताचारवर्जितस्स कथं शिष्टस्स्यात्। पञ्चस्तवादिकञ्च तदर्थं महाजनैः परिगृहीतं व्याकृतञ्च महात्मभिः। दीक्षाऽपि श्वेतोपमन्युप्रभृतिभिर्महाजनैः परिगृहीतेति श्रूयते। ये शापदातारः। **महाभारतेऽपि** कृष्णार्जुनाश्वत्थामादीनामपि तत्परिग्रहः श्रूयते। नन्वितरांशवद्दीक्षायां किमिति सर्वमहाजनपरिग्रहो नास्तीति चेत्, तत्रास्ति किञ्चिद्रहस्यं ब्रह्मज्ञानवदिति गृहाण।

श्रूयन्ते हि ब्रह्मज्ञानेच्छायां साधनचतुष्टयसंपत्तिवत्तदिच्छायामपि कर्मसाम्यशक्तिनिपातचरमदेहादयः कारणत्वेनाभिहिता बहुशस्तत्र तत्रागमेषु। **सूतसंहितायां यज्ञवैभवखण्डे चतुस्त्रिंशे अम्बास्तवे** च। एतच्च यथा तथाऽष्टमे वक्ष्यते। तस्मात्कर्मसाम्याद्यभावात्सर्वेषां ब्रह्मज्ञानवन्न तत्रेच्छेति। एवमायुर्वेदधनुर्वेदमन्त्रौषधरसोपनिषदाद्येकदेशसंवादादपि प्रामाण्यं तत्र तत्र प्रकरणान्तरोक्तमनुसन्धेयम्। तस्माद्ग्राहकनिर्वाहकयोरविकलत्वात्सिद्धान्तशैवागमस्य वेदतुल्यं प्रामाण्यमिति।।

---

[80] (पा) पञ्चस्रोतोभिलक्षितं

## सिद्धान्तशैवस्य कूर्मादिपुराणवचनविरोधपरिहारः

इतः परं **कूर्मादि**पुराणानामापाततस्तत्तद्विरुद्धत्वेन प्रतिभासमानानामविरोध उच्यते। उक्त **बृहदारण्यकश्वेताश्वतर तदुपबृह्मणवायुसूतसंहिता**दिभिस्तत्प्रामाण्यस्य व्यवस्थापितत्वात्तद्विरुद्धत्वेनैतेषां वेदप्रशंसादिपरत्वं केवलवैदिकविषयत्वं वेति सामान्यतः स्थित एव परिहारः। तदुक्तं **साम्बपुराणे** –

निन्दा स्मृतिपुराणेषु या तन्त्रविषयाऽनघ।
अपेक्ष्य वेदमार्गार्हं प्रवृत्ता सा न संशयः।। इति।

विशिष्याप्युच्यते। **कूर्मे** तावत्यदुक्तमत्र जीवनोपायप्रश्न इति तत्पूर्वापरा परामर्शविजृम्भितं, न जीवनोपायप्रश्नत्वम्। उत्तरत्र प्राह 'पुण्यैषिणा'मिति,

ईश्वराराधनबलात् गमिष्यथ सताङ्गतिम्।

इति च, तेषां पुण्यैषित्वसद्गतिमत्वप्रतिपादकवचनविरोधात्। किञ्च जीवनोपायप्रश्नत्वे,

न वेदबाह्ये पुरुषे धर्मलेशोऽपि शङ्करे।

इति मुख्यधर्मनिषेधोऽप्यसङ्गतस्स्यात्। तैर्द्धर्मसामान्यस्यापृष्टत्वात्। तस्य वृत्तिप्रश्नानुमोदमात्रत्वे तथाऽपीति विरोधस्स्यात्। यदप्युक्तं वृत्तिशब्दो जीवनोपाय एव रूढ इति तदपि मन्दम्।

वैदिकन्तु पुरस्कृत्य शैवीं वृत्तिं समाचरेत्।

इत्यादौ धर्मसाधनक्रियादावपि बहुशो वृत्तिशब्दप्रयोगात्। यदुक्तं तत्प्रश्नस्यैवौचित्यादिति तदपि मन्दम्। यथा तेषां प्रसिद्धयाजनाद्यनधिकार एवं प्रसिद्धश्रेयस्साधनेष्वनधिरकार एव। तथा च श्रेयस्साधनान्तरप्रश्नस्याप्यौचित्यमेव। प्रत्युत जीवनोपायस्यान्यथाऽपि सम्भवेन महर्षीणां नित्यं श्रेयोर्थिनां शापविषण्णचेतसां तत्र स्वभावेन श्रेयस्साधनप्रश्नस्यैवौचित्यम्। तस्मादतिस्वारस्यात्धर्मस्यैव प्रश्नः। उभयत्र रूढत्वादुभयस्य प्रश्नः। एकत्र रूढत्वेऽप्युक्तस्वारस्येन काकवदुपलक्षणतया दृष्टादृष्टोभयप्रश्न एव। सर्वथानैकस्य जीवनस्य प्रश्न इति। मोहकत्वमपि तेषु मन्त्रौषधादिप्राचुर्यात्, वैदिकभ्रष्टानां तेषामन्येषाञ्च केवलतान्त्रिकाणां मन्दमतीनाञ्च मतिस्थैर्यार्थं कृपया कृतवेदादिनिन्दारूपपरस्परविरुद्धप्ररोचकवाक्यप्राचुर्याद्वा। "मोहयन्तं इमं लोक"मित्येतच्च,

इति वर्णाश्रमाचारान्मनसाऽपि न लङ्घयेत्।

इति सिद्धान्तशैवागमनिषिद्धस्य "वेदमार्गपरिभ्रंशं करिष्यन्ती"ति वक्ष्यमाणवैदिकपरिभ्रंशस्य निन्दा। यत्तूक्तं प्रश्नानन्तरं सृष्टत्वमिति तन्न। तत्र सृष्टिकरणशब्दयोरभिव्यक्तिपरत्वात्। अन्यथा सर्गाद्यकाले तत्सृष्टिप्रतिपादकोक्त **बृहदारण्यक**श्रुतिमूलकवचनविरोधात्सृष्ट्यनन्तरमेवेत्यादि तदागमविरोधाच्च। एवमन्यदप्यूह्यम्। यत्तु तदर्थं सृष्टत्वाच्छप्तादय एवाधिकारिण इति तदसत्। न हि तदर्थसृष्टत्वं वाक्यमर्यादया प्राप्तम्,

कार्या दीक्षा च सर्वेषां तच्छक्तिविधियोगिनाम्।
त्रयाणामपि "वर्णानामि"ति।।

श्रुतिप्रमाणप्राप्तं सामान्यतस्त्रैवर्णिकाधिकारं बाधितुं शक्नोति। न तावत्तदर्थसृष्टतामात्रेण तन्मात्रार्थत्वावगतिरस्ति। न हि गङ्गा भगीरथेन सगरपुत्रार्थमानीता तन्मात्रार्था भवति। किन्तु शास्त्रान्तरप्राप्तास्मदाद्यर्थभावाऽपि। तादर्थ्यवचनन्तु तेषां शप्तानामनन्यगतिकत्वेन तदारंभसाधारणप्रयोजकत्वाभिप्रायेण। स्त्रीशूद्रद्विजबन्धूनामित्यप्येवमेवोह्यम्। इदञ्च विस्तरेणाष्टमे वक्ष्यते। अयञ्च साधारणः **कूर्मपुराण**विरोधपरिहारस्तस्य निन्दावचनस्य सिद्धान्तशैवागमविषयत्वमभ्युपेत्योक्तः। वस्तुतस्तु नेदं सिद्धान्तशैवागमविषयम्। किन्त्वश्रौतवामादिचार्वाकान्तविषयमेव। तत्रैव **कूर्मपुराणे** –

निर्मितं हि मया पूर्वं व्रतं पाशुपतं शुभम्।
गुह्यात्गुह्यमतं सूक्ष्मं वेदसारं विमुक्तयः।।

इत्यारभ्य "निष्कामैरिति हि श्रुति"रित्यन्तेन पशुपतिसंबद्धसिद्धान्तशैवागमस्य श्रुतिमूलत्वमुमुक्षुग्राह्यत्वयोश्शिवेनैवोक्तत्वात्। तदनन्तरञ्च –

अन्यानि शैवशास्त्राणि लोकेऽस्मिन् मोहनाय वै।
वेदवादविरुद्धानि मयैव कथितानि तु।।
वामं पाशुपतं सोमं लाकुळञ्चैव भैरवम्।
न सेव्यमेतत् कथितं वेदबाह्यं तथेतरत्।।

इति वामादीनामेव तेन निषेधात्। तथा च वामादिविषयमेवैतद्वचनं, तेषामपि न सर्वथाऽप्रामाण्यमित्युक्तम्। तथा च तेषामप्युक्तरीत्या शप्ताद्यधिकारिकत्वेऽपि न क्षतिः। युज्यते च वामादिष्ववैदिकेष्वेव तेषामधिकारो न वैदिकेषु सिद्धान्तशैवागमेषु। तेषामनधिकारित्वस्य वैदिकेष्विव तन्मिश्रेष्वपि शैवागमेष्वर्थसिद्धत्वात्। अन्यत्र –

वेदमार्गपरिभ्रष्टः प्रायश्चित्ते भयं गतः।
वेदेतरागमं गत्वा तदुक्तं धर्ममाचरेत्।।

इत्यादौ वेदेतरेति विशिष्या वैदिकागमेष्वेव वेदभ्रष्टानामधिकारविधानाच्च। किञ्च – ब्रह्मशापादिना महापातककरणेन वेदमार्गपरिभ्रष्टानां स्मार्तद्वादशवार्षिकादिप्रायश्चित्तेषु महाकायक्लेशादिसाध्यत्वेन भयंगतानामत्र तन्त्रे प्रवेशकथने नैतन्तन्त्रार्थानुष्ठानस्याधिकारानुसारेण लघुप्रायश्चित्तत्वमत्र प्रतीयते। उक्त **कूर्मपुराणेऽपि** प्रश्ने – "पापान्नस्त्रातुमर्हथे"ति प्रायश्चित्तप्रश्नादुत्तरे च "नान्यथा निष्कृतिर्हि व" इति कथनेनोक्तार्थस्य प्रायश्चित्तत्वं प्रतीयते। अतस्तद्वचनेनैकार्थ्यमस्य **कूर्म**वचनस्य प्रतीयते। तस्य च वचनस्य स्फुटमवैदिकागमविषयत्वमित्यस्यापि तन्त्र-सामान्योपादानेऽप्यवैदिकविशेषविषयत्वं कल्प्यत इति युक्तमिति सहृदयैरालोचनीयमिति। **वासिष्टलैङ्गेऽपि** "पाञ्चरात्रं प्रशंसन्ती"ति, "तान्येव श्रद्धया युक्ता" इति च प्रशंसैवकाराभ्यां वेदनिन्दितुः केवलतन्त्रानुष्ठातुर्निन्दा। सा च शैवेऽपीष्टैव, त्रैवर्णिकस्य "वैदिकं तु पुरस्कृत्य", "इति वर्णाश्रमाचारा"नित्यादिना तन्निषेधात्।

क्वचित् वेदनिन्दावचनं तु केवलतन्त्राधिकारिप्ररोचकमित्युक्तम्। एवं विष्ण्वागमेऽपीति द्रष्टव्यम्। **सूतसंहितायां** गौतमशापफलत्वोक्त्या निन्दाऽपि शुद्धसत्वानां कृतविशिष्टाहर्गणानां तेषां त्रैवर्णिकानां विशिष्य ब्राह्मणानां ब्रह्मविद्यादिपदं प्राप्तानां केवलतन्त्रदीक्षितत्वं न्यूनपदं

साम्राज्याभिषिक्तस्य मन्त्रिपदमिवेत्येतावता। न तु नरकसाधनत्वेन। किञ्चास्मन्मते इयं निन्दा प्रायशोऽनुगुणैव "शाम्भवे दीक्षिता" इत्येतावन्मात्रं विना। एवं पाञ्चरात्रानुष्ठानस्य पापफलत्वं शापफलत्वञ्च ब्राह्मणानां विशिष्टानां केवलतन्त्रानुष्ठानस्येत्याद्यूह्यम्। यत्तु **पाद्मपुराणे** वसिष्ठदिलीपसंवादे शैवार्थानुष्ठानस्य नरकहेतुत्वमिति तत्पूर्वापराज्ञानविजृंभितम्। तेन हि जीवनार्थं प्रवृत्तैस्सिद्धान्तशैवनिन्दकैः पाषण्डैर्विप्रलब्धेन चित्रनाम्ना राज्ञा प्राप्ताग्निहोत्रादिवैदिककर्मत्यागवेदनिन्दाविष्णुतद्भक्तद्वेषादिकं बहुवेदनिषिद्धं कृतमिति तत्रैव श्रूयते। तच्च शैवेऽपि निषिद्धमेव। पूर्वोक्तवचनेन हि विष्णुद्रोहादिकं शैवे क्वचित्कर्तव्यत्वेन न विहितं, प्रत्युत तत्पूजनस्याङ्गत्वमेव। तत्फलमेव नरकपतनादि। विवृतं चोत्तरत्र तथा –

विष्णुप्रद्वेषमात्रेण नरकानेकविंशतिम्।
भुक्त्वा हि यातनां यामीं निस्तीर्णनरको नृपः।।
समहागिरिराजे वै पिशाचोऽभूत्तदा महान्।
प्रधावति दिशस्सर्वावने तस्मिन् बुभुक्षितः।।
न पश्यन्नशनं तोयमरावीच्च महागिरौ।
कदाचित्पर्यटन् सोऽद्य पिशाचाश्शोकपीडितः।।
प्लक्षप्रस्रवणारण्यं प्रविष्टो भाविसत्फलः।
विभीतकतरुच्छायां समाश्रित्य सुदुःखितः।।
हाहतोऽस्तीति चक्रन्द घोरमुच्चैः पुनः पुनः।
क्षुत्तृष्णादह्यमानस्य सर्वभूतद्रुहो मम्।।
जन्मनोऽस्य दुरन्तस्य कथमन्तो भविष्यति।
अहो पापसमुद्रेऽस्मिन् क्षुधाकल्लोलमालिनि।।
करावलम्बनं को मे निमग्नस्य प्रदास्यति।
इत्थं तस्य पिशाचस्य रोदनं दीनचेतसः।।
देवद्युतिरधीयानश्शुश्रावकरुणामयः।
समागम्य ततस्तत्र पिशाचं तं ददर्श सः।।
को हि त्वं भीषणाकारः कुतो रोदिषि दारुणम्।
अवस्थेयं कुतो ब्रूही किं वाऽहं करवाणि ते।।
श्रुत्वैतद्वचनं प्रीतः पिशाचस्त्यक्त रोदनः।
उवाच दीनया वाचा प्रश्रयावनतस्तदा।।
यन्मेऽस्ति सुकृतं किञ्चित्तेन तुष्टोऽसि भो द्विज।
न ह्यसञ्चितपुण्यानां सद्भिरेकत्र सङ्गतिः।।
इत्युक्त्वा कथयामास पूर्ववृत्तान्तमात्मनः।
विष्णुद्वेषप्रभावेन दशामेतां स्वयं गतः।।

देवद्युतिः –

अहोमुष्णातिमायेयं देवासुरनृणां स्मृतिम्।
यया देवेष्वपि द्वेषो जायते धर्मनाशनः।।

स्रष्टा पालयिता हन्ता जगतां यो महेश्वरः।
आत्मा च सर्वभूतानां तं मूढो द्वेष्टिकः कथम्।।
भवन्ति सर्वकर्माणि सफलानि यदर्पणात्।
तद्भक्तिविमुखो मर्त्यः को नयातीह दुर्गतिः।।
श्रुतिस्मृतिसदाचारविहितं कर्मकेवलम्।
सेवितव्यं चतुर्वर्णैर्नरैर्नारायणस्तथा।। इति।

शाण्डिल्यस्यापि नरकपतनं बुद्धिपूर्वं वेदतत्कर्मत्यागेन बाह्योज्ञत्वप्रत्यवायादिप्रयुक्तमेव। न हि पाञ्चरात्रागमे त्रैवर्णिकस्य कुत्रचिद्वेदत्यागादिकं विहितमस्ति, मिश्रतन्त्रत्वात्तस्य। तदाराधकस्य वैकुण्ठप्राप्तिरेव, उत्तरत्र तथा विवरणात् –

इष्टानमप्यनिष्टानां साधनं मातृवत्सदा।
प्राप्तये परिहाराय बोधयन्ती श्रुतिर्बलात्।।
बुद्धिपूर्वं परित्यक्ताऽनेन साक्षाद्दुरात्मना।
तस्मादेनन्तु पापिष्ठं तत्पापविनिवृत्तये।।
रौरवादिषु सर्वेषु नरकेषु क्रमेण तु।
भोजयित्वा महादुःखान्यप्रसह्यान्यनेकशः।।
आगच्छद्ध्वं सहानेन शाण्डिल्येन दुरात्मना।
इति सञ्चोदिता ब्रह्मन् यमदूता यमेन तु।।
तथैव चक्रुः पापिष्ठमब्दानामयुतं सदा।
पुनश्चैनं समादाय यमदूता यमं ययुः।।
तं दृष्ट्वा यमराजोऽपि प्राह गंभीरया गिरा।
भद्रं भद्रं त्वया भुक्तं कल्याणातीवदुस्सहम्।।
पापानां फलमाश्चर्यं गच्छ विष्णोः परं पदम्।

उत्तरत्र शाण्डिल्यस्य कर्मभूमिप्रेषणं पाञ्चरात्रमुक्तेर्भेदोपासनाप्रयुक्तत्वेन गुणमुक्तित्वाद्वि-देहकैवल्याय ब्रह्माभेदज्ञानार्थमिति न विरोधः। एवं स्थिते यत्भगवता व्यासेन **चतुर्लक्षण्यां** "नानुमानिकमप्येकेषा"मिति चेन्न। शरीररूपकविन्यस्तगृहीतेर्दर्शयति च, "रचनानुपपत्तेश्च नानुमान"मित्यादिना 'पत्युरसामञ्जस्या'दित्यन्तेन सांख्याद्यागमानां प्रामाण्यनिराकरां तदपि वेदविरुद्धेवस्त्वंश एव, न क्रियांशेऽपि। तत्रापि न सिद्धान्तशैवागमस्य तन्निराकरणं, तदनुपलम्भात्। "पत्युरसामञ्जस्या"दित्येतत्तु लौकिकपाशुपतस्यैव केवलनिमित्तेश्वरवादिशैवैकदेशिन एव वा निराकरणमिति।

यदपि च **द्वादशलक्षण्यां कल्पसूत्राधिकरणे जैमिन्यादिभिरागमानां** शास्त्रत्वेन स्मृत्यादिषु वेदवदपरिगणनादिभिर्हेतुभिः प्रामाण्यनिराकरणं तदप्युक्त **स्कान्दमहाभारता**द्यनुसारेणोपक्रान्तवैदिकाधिकारिणस्तत्प्रामाण्यनिराकरणपरम्। तत्तदधि-कारिणः प्रमितिजनकं शास्त्रमिति हि न्यायविदां स्थितिः। स्मृत्यादिषु शास्त्रपरि-गणनमप्यधिकारिविशेषं प्रतीति द्रष्टव्यम्। तस्मान्न कुत्रापि सर्वमार्गप्रामाण्यस्यापि विरोध

इति स्थितम्। विशिष्य सिद्धान्तशैवे संग्रहेणाऽयं परिहारः। शैवो हि त्रैवर्णिकाधिकारो वैदिकव्यामिश्रः। अन्येषां केवलतान्त्रिक इति। तत्र न यथोक्ताधिकारिकृतस्य यथोक्तकर्मणः क्वचिन्नरकहेतुत्वादिकं श्रूयते। अनधिकारिणा वा अधिकारिणाऽपि अयथावत्कृतस्य कर्मणो नरकहेतुत्वादिमात्रेण तस्याप्रामाण्ये शूद्रकृतस्य विपरीतकृतस्य वा कर्मणो यागादेर्नरकसाधनत्वश्रवणेन ज्योतिष्टोमादिवाक्यानामप्रामाण्यमेव स्यादिति। तस्माच्छैवागमस्य श्रुतितुल्यप्रमाणत्वात्युक्तं शैवागमवेद्यत्वं शिवस्येति।।

## सिद्धे सङ्गतिग्रहाक्षेपः

नन्वस्त्वागमस्य प्रामाण्यम्। तथाऽपीश्वरे न तत्सम्भवति, कार्यान्वित एव पदानां संगतिग्रहात्। तथाहि – वृद्धव्यवहारादेव प्राथमिकस्सङ्गतिग्रहः। प्रवृत्तिरूपो व्यवहारश्च कार्यान्वितगोचर इति तेन लिङ्गेन तद्गोचरमेव ज्ञानमनुमीयते। अनुमिते च तस्मिन् पदानां सामर्थ्यात्मक[81] शक्तिग्रहे आवापोद्वापाभ्यां प्रथमगृहीत कार्यान्वितत्वापरित्यागेनैव तत्तदर्थशक्तिग्रह इति सर्वत्र कार्यान्वित एव शक्तिग्रहः। व्याकरणप्रसिद्धार्थकसमभिव्याहारादेरप्येकस्यापि[82] शब्दस्य शक्त्यग्रहे संकेतग्राहकत्वायोगेन प्रथमं कस्यचिच्छब्दस्य कार्यान्विते शक्तिग्रहे तदनुरोधे न तस्यापि कार्यान्वित एवार्थे संकेतग्राहकत्वस्योचितत्वात्। न चान्वितगोचरशक्तिमात्रेण कार्यवाचकपदसमभिव्याहारेण कार्यान्वितार्थबोधसम्भवान्न कार्यान्विते शक्तिः कल्प्येति वाच्यम्। आवापोद्वाराधीनतत्तत्पदनिषतत्तदर्थशक्तिग्रहात्। पूर्वमन्यथासिद्धिप्रतिसन्धानाभावेन कार्यान्वितगोचरशक्तेः प्रथमगृहीतायाः परित्यागायोगात्।

न चैवं घटस्तिष्ठतीत्यादौ सिद्धार्थेऽन्वयबोधानुभवविरोधः, कार्यान्वित एव शक्तिग्रहे कारणबाधेनान्वयबोधासम्भवेनागृहीतासंसर्गपदार्थोपस्थितिमात्रेऽन्वयबोधत्वाभिमानात्। कार्याभावे कार्यान्वितपदार्थस्मृतिरपि[83] कथमिति चेन्न। प्रकृते कार्यान्वयाभावेऽपि[84] कार्यान्वितार्थस्मृतिसम्भवात्। वस्तुतस्तु[85] स्मृतिर्घटत्वादिमात्रप्रकारिका

---

[81] (टि) सामर्थ्यात्मकेति शक्तौ विशेषणन्नैयायिकाभिमतेश्वरसंकेतात्मकत्वव्युदासार्थम्।

[82] (टि) व्याकरणप्रसिद्धार्थकसमभिव्याहारादेरपीति। यत्पदसमभिव्याहारात्पदान्तरस्य शक्तिग्रहस्तस्य पदस्य शक्तिग्रहोऽपि ग्राहकप्रमाणेन कार्यान्वित एव भवतीति भावः। आदिना नैखण्टुकादिपदसमभिव्याहारो ग्राह्याः।

[83] (टि) कार्यान्वितपदार्थस्मृतिरपीति। पदार्थोपस्थितिमात्रेऽन्वयबोधत्वाभिमानेऽपि न केवलतन्मात्रविषयिण्यान्तस्यान्तत्वाभिमान इति वक्तुं शक्यम्। पदजन्यपदार्थोपस्थितेरेव शाब्दबोधकारणत्वेन पदस्य कार्यान्विते शक्तिग्रहे कार्यान्वितत्वेन रूपेणैव तत्स्मृतिर्वाच्या। घटोऽस्तीत्यत्रकार्यान्वयाभावेन कथं तत्र तदन्वितार्थस्मृतिरिति शङ्कार्थः।

[84] (टि) कार्यान्वयाभावेऽपीति। घटमानयेत्यत्र धात्वर्थः कार्यविषयः। स च घटपदेन कार्यत्वेन कार्यसामान्यान्वितत्वेन स्मारिते घटेऽन्वेति। घटोस्तीत्यादौ कार्यविशेषान्वयाभावेऽपि कार्यत्वेन कार्यान्वितार्थस्मृतेः काऽनुपपत्तिः। यतो भवतैव शक्तिज्ञानसहकारेण पदजन्यत्वं स्मृतेरभ्युपगतमिति समाधातुराशयः।

[85] (टि) स्मृतेः कार्यान्विताविषयकत्वेऽपि सिद्धार्थबोधकस्य प्रामाण्याग्रहेऽप्याह – वस्तुतस्त्विति।

न तु कार्यान्वितघटत्वादिप्रकारिका। तस्याः कार्यान्वितविषयकत्वासम्भवात्[86]। कार्यान्वितविषयकत्वं स्वरूपेणोपस्थितप्रवर्तकज्ञानप्रकारोपहितान्वितविषयकत्वः। प्रवर्तकज्ञानप्रकारश्च कृत्युद्देश्यत्वलक्षणे लिङ्गाद्यर्थो विधिरेव। स च स्वरूपेणोपस्थितस्तत्रैव प्रकारी भवति, यत्र तद्बोधकलिङ्गादियुक्तं वाक्यं श्रूयते। न च प्रवर्तकज्ञानप्रकारोपहितान्वितविषयकत्वमित्येतद्वाक्यजन्ये बोधेऽपि कार्यान्वितविषयकत्वापत्तिः। तद्व्यावृत्त्यर्थमेव स्वरूपेणोपस्थितपददानात् नह्यत्र कृत्युद्देश्यत्वं स्वरूपेणोपस्थितं प्रकारः। किन्तु स्वगतेन प्रवर्तकज्ञानप्रकारत्वेनैव। निष्प्रकारोपस्थितिश्च स्वरूपेणोपस्थितिः। अतो वाक्यजन्यमेव घटानयनं कार्यमित्येव माद्यन्वयबोधरूपं कार्यान्वितविषयकम्। न तु स्मृतिः, तस्याः क्वाप्युक्तरूपत्वासम्भवात्। अत एव कार्यान्वितपदमपि न कार्यान्वितबोधकः।

अत्र त्यकृत्यप्रत्ययस्य[87] विद्ध्यर्थत्वेऽन्वितपदविशेषणत्वासम्भवेनार्हत्वमात्रार्थकतया विवक्षितरूपकार्यान्वितबोधजनकत्वासम्भवात्। अत एव कार्यान्वितव्युत्पत्तावपीह कार्याभाव इति सिद्धार्थवाक्यमपि कार्यान्वया परित्यागात्प्रमाणं स्यादिति निरस्तम्। विवक्षितकार्यान्वितबोधजनकत्वस्य तत्रासम्भवात्। न चैवं सिद्धार्थानामाख्यायिकादीनां वैयर्थ्यम्। तेषामप्येवं प्रवर्तितव्यं नत्वेवमिति प्रवृत्तिनिवृत्तिपरत्वात्। अन्यथा सिद्धार्थमात्रबोध- नस्य निष्प्रयोजनत्वात्। न च 'पुत्रस्ते जात' इत्यादिवाक्यश्रवणानन्तरं श्रोतुर्मुखप्रसादचिह्नेन हर्षेऽनुमिते तद्धेतुपुत्रजन्मज्ञानजनकतया कल्पिते[88] तद्वाक्ये आवापोद्वापाभ्यां तटस्थस्य सिद्धार्थेऽपि सङ्गतिग्रहस्संभवतीति वाच्यम्। हर्षस्य कारणान्तरादपि सम्भवेन पुत्रजन्मज्ञानस्य तेनानुमातुमशक्यत्वात्। तस्मान्न सिद्धार्थे संगतिग्रहः। अस्तु वा सिद्धेऽपि संगतिग्रहः। तथाऽपीश्वरबोधकानान्तन्मात्रनिष्ठत्वे वैफल्यप्रसङ्गेन प्रयोजनपर्यवसानाया कार्यान्वय एव तात्पर्यमभ्युपेयमिति।

अत्र प्रतिविधीयते – कार्यान्वयस्सङ्गतिग्रहे उपायमात्रम्। न तूपेयसङ्गतिग्रहविषयकोटिनिविष्टोपि तथात्वे मानाभावात्। न च कार्यान्वयप्रतीतिरेव मानम्। तस्याः कार्यवाचकपदसमभिव्याहारादप्युपपत्तेः। न चान्यथोपपत्तेः[89] प्रथममप्रतीत्या तत्रापि शक्तिं गृह्णातीति युक्तम्। तथा सति कार्यत्वोपहितानयनान्वितघटज्ञानस्य घटानयनगोचरप्रवृत्त्याऽनुमितत्वेनायनान्वितत्वोपहितेऽपि घटपदस्य शक्तिग्रहापत्तेः। यदि च प्रथमञ्जनकत्वग्रहमात्रं, न तु जनकताप्रयोजकशक्तिग्रहः, आवापोद्वापाभ्यान्तु शक्तिग्रहे

86 (टि) कार्यान्वितविषयकत्वासंभवादिति। अयमाशयः – अर्थस्मृतेः पदजन्यत्वमेकसंबन्धिज्ञानस्यपरसंबन्धिस्मारकत्वविधया वक्तव्यम्। तत्र संबन्धग्रहस्सहकारी। प्रकृते शक्तिरेव संबन्ध इति तत्ग्रहस्सहकारी भवति। अर्थस्य कार्यान्वितत्वेन शक्तिग्रहविषयत्वेऽपि तत्सहकृतपदजन्यस्मृतावपि न तेन रूपेण विषयत्वं वक्तुं शक्यम्। अनुभवविरोधात्। न हि हस्तिनि दृष्टे हस्तिपकोहस्तिसंबन्धित्वेन स्मर्यते। किन्तु तत्संबन्धितावच्छेदकेनैव तद्व्यक्तित्वादिना। तद्वत् प्रकृतेऽपि घटपदसंबन्धितावच्छेदकेन घटत्वादिनैव तत्स्मरणमिति भावः। इदमेवोक्तं घटत्वादिमात्रप्रकारिकेति।

87 (टि) अत्र त्यकृत्यप्रत्ययस्येति। कार्यपदस्थ ण्यत्प्रत्ययस्येत्यर्थः।

88 (टि) कल्पिते - अनुमिते

89 (टि) अन्योथोपपत्तेरित्यस्यान्यथोपपत्तिसंभव इत्यर्थः। स चायुक्तत्वे हेतुः।

आनयनपदलभ्यत्वप्रतिसन्धानान्नानयनान्वितत्वेऽपि शक्तिग्रह इति मन्यसे, तदा प्रकृतेऽपि तुल्यम्। अन्यथोपपत्त्यप्रतिसन्धानदशायां तत्र शक्तिग्रहेऽप्यनन्तरं गौरवान्यलभ्यत्वप्रतिसन्धा-नाभ्यां तत्परित्याग इत्यपि तुल्यम्। यदुक्तं हर्षेण पुत्रजन्मज्ञानमनुमातुमशक्यमिति तदपि न मनोरमम्। उपस्थितपरित्यागेनानुपस्थितकल्पने गौरवेण तस्यैव कल्पनात्[90]। अन्यथा कार्यान्वयज्ञानेऽप्यन्यस्य हेतुत्वसम्भवेन वाक्यस्य हेतुता न सिद्ध्येत्। यदप्युक्तं प्रयोजनपर्यवसानाय कार्यपरत्वं वक्तव्यमिति तदपि न चतुरश्रम्। ईश्वरप्रतिपादनेन परमपुरुषार्थमुक्तिनिष्पत्तेः।।

## चिच्छक्तेः प्रमाणत्वनिरूपणम्

ननु प्रमाणस्य किं लक्षणम्। न तावत्प्रमितिसाधनत्वं, दीपदिष्वति व्याप्तेः। तदुक्तं **श्रीमत्पौष्करे** –

ननु न स्यात्कुतो मानं यत्तत्प्रमितिसाधनम्।
सत्वदीपदृगादीनां प्रमाणत्वप्रसङ्गतः।। इति।

त्वन्मते चिच्छक्तेरेव प्रमितित्वेन तत्साधनासम्भवाच्च। ननु केवलाचिच्छक्तिर्न प्रमितिः। किन्तु तत्तद्विषयावच्छिन्ना। सा च विषयावच्छेदस्य जन्यतया जन्येति न तत्साधनासम्भवः। न च दीपादिष्वतिव्याप्तिः। साधनपदस्य करणपरत्वादिति[91] चेन्न। चक्षुराद्यसन्निकर्षेऽपि विषयोत्पत्त्यनन्तरमेव चिच्छक्तेर्विषयावच्छेदसद्भावेन तत्र चक्षुरादेरजनकत्वात्, संशयविपर्यासादेरपि तत्तद्विषयावच्छिन्नचिच्छक्तिरूपत्वेन तत्करणेऽतिव्याप्तेश्च। करणत्वस्यानिरुक्तेश्च। तथाहि – किं करणत्वमयोगव्यवच्छेदेन फलसंबन्धित्वं वा, व्यापारवत्त्वं वा, फल नियतव्यापारवत्वं वा, कर्तृप्रेर्यत्वं वा। नाद्यः। सुखादिषु[92] कर्मस्वतिव्याप्तेः। चक्षुरादावव्याप्तेश्च। न द्वितीयः, घटदीपादिष्वतिव्याप्तेः, परामर्शादौ व्यापाराभावेनाव्याप्तेश्च। न च तद्व्यापारकं लिङ्गमेव करणम्,[93] तस्यातीतानागतादिरूपतया जनकत्वस्यैवायोगेन तद्विशेषकरणत्वासम्भवात्। अत एव[94] न तृतीयः। चक्षुर्व्यापारस्य संयोगादेरन्धकारादौ फलाजनकतया तन्नियमाभावेन चक्षुरादावव्याप्तेश्च। न च कारणान्तर-साहित्यावच्छिन्नस्य तन्नियतत्वमस्तीति वाच्यम्। एवं सति सर्वस्यापि[95] व्यापारस्य तथाविधत्वेन फलनियतपदस्य वैयर्थ्यापत्तेः। कर्मादावतिव्याप्तेश्च। कर्मादिकमपि

---

90 (टि) कल्पनात् कारणत्वेनानुमानात्।

91 (टि) करणपरत्वादिति। दीपादीनां कारणत्वेऽपि फलनियतव्यापारवत्वाभावेन न करणत्वमिति भावः।

92 (टि) सुखादिषु कर्मस्थिति। सुखादीनामज्ञातसत्वाभावेन तेषां फलीभूत स्वज्ञानायोगव्यव-च्छिन्नत्वादित्यर्थः।

93 (टि) ननु न यथा कथञ्चिद्व्यापारवत्वं करणत्वप्रयोजकं ब्रूमः। येन जलाहरण-ज्वलनादिव्यापारमादाय घटदीपादिष्वतिव्याप्तिस्स्यात्। किन्तु फलनियतव्याप्यत्वं तच्च न घटादिष्विति। कुतोऽयमतिप्रसङ्ग इत्यत आह–परामर्शादाविति।

94 (टि) अत एव–अव्याप्तेरेव।

95 (टि) सर्वस्यापीति। जलाहरणादेरपि घटसाक्षात्कारसामग्रीसमवहितस्य फलनियतत्वसत्वादिति भावः।

अनेन रूपेण करणमेव कर्तृकर्मकरणादिव्यपदेशभेदस्तूपाधिभेदेनापीति चेन्न। तथा सति रूपाद्युपलब्धिपक्षककरणजन्यत्वानुमानस्य कर्त्रादिनाऽर्थान्तरग्रस्तत्वेन चक्षुरादेरसिध्यापत्तेः। करणत्वविवक्षावैयर्थ्याच्च। नापि चतुर्थः। शरीराद्यतिव्याप्तेः, परामर्शाद्यव्याप्तेश्च। नापि प्रमा सामग्रीत्वम्। चक्षुराद्यव्याप्तेः, सामग्र्याः कारणसमुदायरूपतया समुदायस्य च समुदाय्यनतिरेकेण चक्षुरादेरपि सामग्रीत्वे मेयमात्रादीनामपि मानत्वप्रसङ्गेन विविक्तव्यवहारलोपप्रसङ्गः। तदुक्तं **श्रीमत्पौष्करे** –

ननु प्रमेयसंसिद्धौ सामग्री केन नेष्यते।
प्रमात्रादिघटान्तेषु सत्स्वेव घटनिश्चयात्।
तन्न प्रमातृमेयादिव्यवहार विलोपतः।
मातृमानप्रमेयाणां तदन्तर्भावतस्स्थितेः।।
तेषां तु व्यतिरेकेण सामग्री च न दृश्यत। इति।

साधनसामग्र्यादीनां मेयत्वेन मानत्वस्यायुक्तत्वाच्च। तदुक्तं **श्रीमत्पौष्करे** – "यन्मेयन्नहि तन्मानं यतो मानेन मीयतः।" इति। अतो न प्रमाणसामान्यलक्षणं युक्तमिति। अत्रोच्यते – तत्तद्विषयावच्छिन्नाचिच्छक्तिस्तत्तदर्थे प्रमा, सैव प्रमाणमपि। न चैवं विषयस्य सर्वदा प्रकाशप्रसङ्ग इति वाच्यम्। चक्षुरादिकरणकबुद्धिवृत्त्यनुदये मलावृतत्वेन विषयसंबन्धस्यासत्कल्पत्वात्। तदुदये तु मलनिवृत्त्याऽनावृतविषयसंबन्धेन विषयावच्छिन्नचिच्छक्तिकादाचित्कतया प्रकाश कादाचित्कत्वसम्भवात्। यद्वा – यथार्थानुभूतिरूपबुद्धिवृत्युपारूढत्वं विषयस्य चिच्छक्त्या संबन्ध इति कदाचिदेव विषयावच्छेदात् कादाचित्कप्रकाशसम्भवः।

"संशयादिविनिर्मुक्ता चिच्छक्तिर्मानमिष्यतः" इति **श्रीमत्पौष्करस्थं** संशयादिविनिर्मुक्तपदमपि संशयादिविनिर्मुक्तबुद्धिवृत्त्युपहितार्थकं तत्तद्विषयावच्छिन्नपरमेव। चिच्छक्तेः ससंशयत्वादितादात्म्यासंभवेन[96] तद्विनिर्मुक्तपदवैयर्थ्यापत्त्या तस्य तद्विनिर्मुक्तबुद्धिवृत्त्युपहितपरत्वस्यावश्यकत्वात्। नचैवं बुद्धिवृत्तिरेवार्थप्रकाशोऽस्तु, अलं चिच्छक्त्याऽपीति वाच्यम्। बुद्धेर्जडत्वेन तृद्वृत्तेरपि तथात्वेन संविद्रूपायाश्चिच्छक्तेरेवार्थप्रकाशत्वात्। तदुक्तं **श्रीमत्पौष्करे** –

प्राकृतत्वाविशेषेण दृगादेरविशेषतः।
असंविदात्मकत्वेन न हि बुद्धेः प्रमाणतः।। इति।

अत्र बुद्धिपदेन तद्वृत्तिस्तदभेदादुक्तेति द्रष्टव्यम्। **मृगेन्द्रेऽप्युक्तम्** –

इति बुद्धिप्रकाशोऽयं भावप्रत्ययलक्षणः।
बोध इत्युच्यते बोधव्यक्तिभूमितया पशोः।। इति।।

---

[96] (पा) संशयादिबुद्धिवृत्तितादात्म्यासम्भवेन
(टि) संशयादिबुद्धिवृत्तितादात्म्यासंभवेनेत्येतत्प्रमादपतितम्। संशयाददवृत्तेरपि विकल्पेनार्थप्रकाशकत्वेन चिच्छक्त्युपारोहमन्तरा तदसंभवेन तस्यास्तत्तादात्म्यावश्यंभावात्। अतस्संशयादिविनिर्मुक्तेति पौष्करवचनस्य संशयत्वादिविनिर्मुक्तेत्यर्थ आवश्यकः। अतो भाष्येऽपि सशंयत्वादितादात्म्यासंभवेनेति वर्तितव्यम्।

## वृत्तेर्यथार्थत्वनिरूपणम्

ननु किमिदं बुद्धिवृत्तेर्यथार्थत्वम्। न तावदर्थसदृशत्वं, सादृश्यमात्रस्य विपर्यासेऽपि गतत्वात्। उद्भूतसादृश्यस्य घटादिगोचरबुद्धिवृत्तावप्यभावात्। नापि समर्थक्रियाजनकत्वं, तस्य यथार्थत्वावच्छेद्यत्वात्, क्रियागतसामर्थ्यस्यापि दुर्वचत्वाच्च। नाप्यर्थाव्यभिचारित्वं, तद्यद्यर्थानधिकरणावृत्तित्वं तदा घटाद्यनधिकरणबुद्धौ तद्वृत्ते वर्तनादव्याप्तिः। अथार्थसंबन्धानधिकरणावृत्तित्वं तदा संशयविपर्यासादेरप्यर्थसंबन्धाधिकरण-बुद्धिवृत्तित्वादतिव्याप्तिः। नापि विशेष्यनिष्ठाभावाप्रतियोगिधर्मप्रकारकत्वं, घटवत्भूतलमित्यादौ भूतलनिष्ठान्योन्याभावप्रतियोगिघटप्रकारकत्वादव्याप्तेः। नापि विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मप्रकारकत्वं, श्यामे बदरफलादाविदमिदानीं रक्तमित्यादिभ्रमेऽतिव्याप्तेः। तत्र रक्तरूपस्योत्पत्स्यमानतया तथाविधधर्मप्रकारकत्वात्। नापि विशेष्यनिष्ठसंसर्गाभावाप्रतियोगिप्रकारत्वं,[97] रक्तं बदरफलमिति प्रमायामव्याप्तेः, तस्य बदरफलनिष्ठप्रागभावप्रतियोगिप्रकारकत्वात्।

नापि स्वविषयकालावच्छेदेन[98] विशेष्यनिष्ठसंसर्गाभावाप्रतियोगिप्रकारकत्वः स्थूलकालावगाहिनि कालानवगाहिनि च तस्मिन् ज्ञानेऽव्याप्तेः। घटपटाविति समूहालंबनस्य पटघटनिष्ठाभावप्रतियोगिघटत्वपटत्वप्रकारकतया तत्राव्याप्तेश्च। नापि विशेष्यवृत्तिप्रकारकत्वं, वह्निगुञ्जापुञ्जयोरिमौ वह्नी इमौ गुञ्जापुञ्जवह्नी इति ज्ञाने चातिव्याप्तेः। नापि प्रकाराश्रयविषयकत्वं, भ्रमेऽपि[99] रजतत्वाश्रयस्य रजतस्य विषयतया तत्रातिव्याप्तेः। नापि प्रकाराश्रयविशेष्यकत्वं, व्यत्यासेन समूहालम्बनभ्रमेऽतिव्याप्तेः। नापि प्रकारानाश्रयविशेष्यकत्वं[100], समूहालंबनबुध्यव्याप्तेः। नापि तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं, व्यत्यासभ्रमातिव्याप्तेः। अत्र घटत्वमित्यत्राव्याप्तेश्च[101]। तस्माद्यथार्थत्वं दुर्वचमिति प्राप्ते अभिधीयते – स्वविरोधिधर्मानवच्छेदेनोल्लिख्यमान तत्तत्प्रकारतत्तत्संबन्ध-वद्विशेष्यकत्वावच्छेदेन तत्तत्प्रकारकत्वं यथार्थत्वम्। स्वविरोधिधर्मानवच्छेदेनेति विशेषणा-न्मूलावच्छेदेन हस्तसंयुक्तविशेष्यके अग्रे हस्तसंयोगीति ज्ञानेनातिव्याप्तिः। स्ववृत्त्यवच्छेदकध-र्मावच्छेदेनेति पदपरिहारेण विरोधिधर्मानवच्छेदेनेत्युक्त्याऽवच्छेदकमात्रविषयके वृक्षो हस्तसंयोगीति ज्ञानेऽव्याप्तिः परिहृता। उल्लिख्यमानेति विशेषणेन साक्षात्संबन्धविषयके लोहितस्स्फटिक इति ज्ञाने परंपरासंबन्धवद्विशेष्यकत्वप्रयुक्ताऽतिव्याप्तिर्निरस्ता[102]।

---

[97] (टि) संसर्गाभावेति। तथा च रक्तस्य बदरफलनिष्ठप्रागभावादिप्रतियोगित्वान्नातिव्याप्तिरित्यर्थः।

[98] (टि) स्वविषयकालावच्छेदेनेति तथा च प्रमाविषयीभूतरक्तकालावच्छेदेन बदरफले तत्प्रागभावा-भावान्नाव्याप्तिरिति भावः।

[99] (टि) इदं रजतमिति तादात्म्येन रजतप्रकारकभ्रमेऽपीत्यर्थः।

[100] (टि) विशेष्यकत्वमिति। तादृशभ्रमे रजतविशेष्यकत्वाभावान्नातिव्याप्तिरिति भावः। इदन्त्वन्तु विशेष्यकोटिनिविष्टमिति न प्रकारः।

[101] (टि) तद्वद्विशेष्यकत्वावच्छेदेन तत्प्रकारकत्वस्य विवक्षणान्नातिव्याप्तिरित्याशङ्क्याह – अत्र घटत्वमिति।

[102] (टि) अतिव्याप्तिर्निरस्तेति। अतिव्याप्तिप्रयोजकस्वाश्रयसाम्मुख्यरूपपरंपरासंबन्धास्य तादात्म्येन लौहित्यावगाहिना लोहितस्स्फटिक इति ज्ञानेनानुल्लिख्यमानत्वादिति भावः।

संबन्धपदे न चात्र घटत्वमिति घटानाश्रयघटत्वविशेष्यकज्ञानेऽव्याप्तिरपाकृता। न चैवं घटवत्घटत्वमिति ज्ञानेऽतिव्याप्तिः। उल्लिख्यमानस्य घटाधारत्वसंबन्धस्य घटत्वेऽभावात्। संबन्धवद्विशेष्यकत्वपदेन भ्रमेऽतिव्याप्तिः पराकृता।

तत्र रजतत्वसंबन्धवद्रजतविषयकत्वसत्वेन तदवच्छेदेन तत्प्रकारकत्वसत्वेऽपि रजतत्वसंबन्धवतो रजतस्य विशेष्यत्वाभावेन तत्संबन्धवद्विशेष्यकत्वाभावेन तदवच्छेदेन तत्प्रकारकत्वाभावात्। न च भासमानं रजतत्वसंबन्धं प्रति रजतस्यानुयोगित्वे विशेष्यत्वाभावः कथमिति वाच्यम्। अनुयोगित्वस्याभानेन विशेष्यत्वाभावोपपत्तेः।

न हि स्वरूपसताऽनुयोगित्वेन विशेष्यत्वं भवति, अत्र घटत्वमित्यत्र घटस्य विशेष्यत्वापत्तेः। अवच्छेदेन तत्प्रकारत्वमित्युक्त्या व्यत्यासभ्रमेऽतिव्याप्तिः प्रतिक्षिप्ता। तस्मिन्गुञ्जापुञ्जविशेष्यकत्वावच्छेदेन वह्नित्वप्रकारकत्वं वह्निविशेष्यकत्वावच्छेदेन गुञ्जापुञ्जत्वप्रकारकत्वं न तु तत्तत्संबन्धवद्विशेष्यकत्वावच्छेदेन तत्तत्प्रकारकत्वमिति।।

## प्रामाण्यस्य स्वतो ग्राह्यत्वम्

विषयावच्छेदलक्षणं संविद्गतं प्रामाण्यं स्वप्रकाशरूपया संविदा गृह्यते। बुद्धिवृत्तिगतं यथार्थत्वन्तु मनसा। तस्य[103] स्वतो ग्राह्यत्वं बाधानवतारकालीनस्वाश्रयगोचरयावल्लौकिकप्रत्यक्षग्राह्यत्वं परतस्त्ववादिनं प्रतिसाधनीयम्। बाधानवतारकालीनेति विशेषणेन यत्र रजते नेदं रजतमिति बाधावतारस्तत्र तत्गोचर[104]प्रत्यक्षेण प्रामाण्याग्रहणात्बाध इति दोषो निरस्तः।

स्वाश्रयगोचरेत्यनेन घटज्ञानगतप्रामाण्यस्य घटज्ञानगोचरप्रत्यक्षेणाग्रहणात्। बाधो निराकृतः। यावदिति विशेषणेन ज्ञानान्तरेणार्थोपनये[105] नैयायिकेनापि मनसा प्रामाण्यग्रहस्वीकारात्सिद्ध-साधनमिति दूषणमपास्तम्।

न च लौकिकपदेनैव तन्निरासः। ज्ञानान्तरोपनयेन प्रामाण्यांशे अलौकिकत्वेऽपि तदाश्रयविषयकत्वांशे लौकिकत्वसम्भवात्तदंश एव लौकिकत्वस्य विवक्षितत्वात्। लौकिकेति विशेषणेन सामान्यलक्षणादिजन्य[106] ज्ञानविषयत्वमादाय सिद्धसाधनशङ्का[107] निराकृता। किमत्र प्रमाणमिति चेत्साम्ग्र्येवेति ब्रूमः।

तथाहि – स्ववृत्तिवर्तमानज्ञानगोचरमेव लौकिकं प्रत्यक्षं, तद्यदोत्पद्यते तदा स्वविषयीभूतज्ञानोपस्थापितं विशेष्यस्य तद्वत्त्वमवगाहमानमेवोत्पद्यते, साम्ग्रयास्सत्वात्।

---

103 (टि) तस्य–बुद्धिवृत्तिगतयथार्थत्वस्य।

104 (टि) तत्र तद्गोचरेति। नेदं रजतमहन्त्विदं रजतमिति जानामीति बाधावतारकालीनरजतज्ञान-गोचरानुव्यवसायेनेत्यर्थः।

105 (टि) ज्ञानान्तरेणार्थोपनय इति। रजतमहञ्जानामीति ज्ञानग्रहणे स्मृत्यादिना ज्ञानान्तरेणोपनीतस्य प्रामाण्यस्य तद्गतत्वेन भानस्वीकारेण यत्किञ्चित् ज्ञानग्राहकग्राह्यत्वस्य सिद्धत्वात्सिद्धसाधनमिति भावः।

106 (टि) सामान्यलक्षणादिजन्येति। यत्र घटज्ञानमेव ज्ञानत्वेन विषयः तत्र सर्वेषामपि।

107 (टि) सिद्धसाधनशंकेति। इदमापाततो वा लेखकप्रमादपतितं वा। सामान्यलक्षणादिजन्य-ज्ञानविषयत्वसत्वेऽपि यावत्त्वेनैव वारणसंभवात्। किन्तु बाधशंकेति ज्ञानाविषयत्वमिति च वर्तितव्यम्।

अर्थतद्वत्वस्य मूलज्ञानविषयतया ग्रहणेऽपि स्वातन्त्र्येणाग्रहणान्न प्रामाण्यग्रह इति चेन्न। स्वातन्त्र्येण ग्रहणस्यानिर्वचनात्। तथाहि – किं ज्ञानविषयत्वेनाग्रहणं, किं वा ज्ञानाविषयत्वेन ग्रहणम्, अथवा प्रत्यासत्तिभूतज्ञानाग्रहणम्। नाद्यः – प्रमात्वानुमितावपि स्वातन्त्र्येण ग्रहणानुपपत्तेः। जलज्ञानं प्रमेत्यस्य हि जलत्वसंबन्ध्येव जलत्वसंबन्धि-तयाऽवगाहत इत्यर्थः। तत्र जलत्वसंबन्धस्य द्विवारमवगाहेन प्रथमं ज्ञानाविषयत्वेनोल्लेखेऽपि ज्ञानविषयत्वेनाप्यनन्तरमुल्लेखेन ज्ञानविषयत्वेनाग्रहणाभावात्।

द्वितीये तु – यद्यप्यत्र ज्ञानविषयतयाऽप्युल्लेखात् ज्ञानविषयत्वेनाग्रहणाभावेऽपि ज्ञानाविषयत्वेनाप्युल्लेखान्नोक्त दोषावकाशः, तथाऽपि तादृशस्वातन्त्र्येण ग्रहणस्य प्रकृतेऽपि नानुपपत्तिः। अनुव्यवसायस्यापि जलमेव जलतया जानामीत्येवमाकारत्वसम्भवात्। न च मनसो रजततया ज्ञायमानत्वेन ग्रहणे सामर्थ्येऽपि पुरोवर्तिनो रजतत्वग्रहणे सामर्त्याभावात्कथमेवमाकारत्व-मिति वाच्यम्। वैशिष्ट्यग्रहे सर्वत्र मनस एवास्माभिः स्वातन्त्र्यस्य विकल्पो मनस इत्यादि स्वरसेनाङ्गीकारात्। परमतेऽपि सुरभिचन्दनमित्यादाविव ज्ञानप्रत्यासत्तिसत्वेन बहिरपि स्वातन्त्र्यसम्भवात्। न तृतीयः – गेहस्थतया[108] घटमयं जानातीत्यादिवाक्यजन्यज्ञानस्यापि स्वातन्त्र्येणार्थविषयकत्वापत्तेः। नन्वेवं ज्ञाने प्रामाण्यसन्देहो न स्यात्, ज्ञानस्याग्रहे धर्मि-ज्ञानाभावात्ग्रहे च प्रामाण्याग्रहे स्वतस्त्वभङ्गापत्तेः प्रामाण्यग्रहस्य सत्वादिति चेन्न।

तवापि मते प्रामाण्यसंशयस्य[109] तद्वत्त्वाभावसंशयपर्यवसन्नतया विषयविरोधेन व्यवसायेन प्रतिबन्धादनुत्पत्त्यापत्त्याऽस्य दोषस्योभयसमाधेयत्वात्। मन्मते सन्देहपूर्वं व्यवसायनाशात्प्रतिबन्धकाभावेन संशय उपपद्यत इति चेन्न। अप्रमुष्टतत्संस्कारस्यापि संशयविरोधित्वात्। अन्यथा निश्चितेऽर्थे तृतीयक्षणे संशयापत्तेः। अप्रामाण्यसंशयसमानाधा-नन्तु दोषजन्यत्वसंशयात्, निश्चितेऽप्यर्थे ज्ञानस्य दोषजन्यत्वसंशयेन संशयदर्शनात्। अन्यथा परतस्त्ववादिमतेऽपि दूरस्थजलादिज्ञान इव करतलामलकादिज्ञानेऽपि प्रामाण्यसंशयस्य तदा हितार्थसंशयस्य चापत्तेः। धर्मिज्ञानस्य जनकत्वे मानाभावेन संशयरूपस्यैव धर्मिज्ञानस्य निष्पत्तिसम्भवाच्च। न च धर्मिज्ञानस्याजनकत्वे पथिगच्छतो नानावृक्षेन्द्रिय[110]सन्निकर्षेऽपि वृक्षविशेषादिनियतसंशयानुपपत्तिरिति वाच्यम्।

धर्मिज्ञाननियामकस्यैव[111] संशयनियमाकत्वसम्भवात्, अन्यत्र सन्निकर्षसत्वे ज्ञानानुदयस्यायोगात्। न च विषयमाहात्म्यादेरननुगतस्यानुगतधर्मिज्ञानरूपकारणसम्भवे संशयकारणत्वकल्पनं न युक्तं, धर्मिज्ञानेत्वनुगतस्यासम्भवादननुगतस्यापि[112] तस्य

---

[108] (टि) गेहस्थतयेति। अस्य वाक्यजन्यज्ञानस्य ज्ञानविषयकत्वेऽपि विषयीभूतस्य ज्ञानस्य घटाद्यर्थं प्रति प्रत्यासत्तित्वाभावेन प्रत्यासत्तिभूतज्ञानाग्रहणसत्वात् स्वातन्त्र्येणार्थविषयकत्वापत्तिरित्यर्थः। न चेष्टापत्तिः। विशेषणांशेऽपि ज्ञानस्य स्वतन्त्रार्थकत्वे क्व वाऽस्वतन्त्रार्थकता स्यादिति।।

[109] (पा) प्रामाण्यसंशयस्याप्रामाण्यसंशयपर्यवसन्नतया

[110] (टि) नाना वृक्षेति। यतो नानावृक्षेषु सन्निकर्षसत्वेऽपि वृक्षविशेष एव संशयो जायतेऽतो धर्मि -ज्ञानस्य कारणत्वमावश्यकम्, अन्यथाऽन्यत्रापि संशयस्यादिति भावः।

[111] (टि) धर्मिज्ञाननियामकस्यैवेति। अयमाशयः – सन्निकर्षसाम्येऽपीतरत्र संशयाभावो निश्चयाद्व धर्मिज्ञानाभावाद्वा। उभयथाऽपि नियामकं किञ्चिद्वक्तव्यम्। तदेव विषयमाहात्म्यादिसंशयजनकम्। सन्निकर्षसत्वेऽन्यत्र ज्ञानानुदयश्चानुपपन्न इति।

[112] (टि) अनुगतस्येति। कारणस्येति शेषः।

हेतुत्वमिति वाच्यम्। विषयमाहात्म्यादेस्संशयजनकत्वस्य क्लृप्तत्वेन कारणान्तरस्य कल्पनाया अयुक्तत्वात्। तथाहि – धर्मिज्ञानस्य विषयमाहात्म्यादिजन्यतावच्छेदकं न संशयान्यधर्मिज्ञानत्वम्। गौरवात्। किन्तु धर्मिज्ञानत्वम्। तच्च संशयेऽप्यस्तीति संशयकारण-त्वं क्लृप्तमेव। नन्वेतावता संशयकारणीभूतधर्मिज्ञानगोचरत्वनिबन्धनानुपपत्तिपरिहारेऽपि संशयेनैव स्वाश्रयगोचरबाधानवतारकालीनलौकिकप्रत्यक्षात्मकेनाग्रहणात्बाधः। न च तत्र प्रामाण्यस्यापि कोटित्वात्ग्रहणमस्तीति वाच्यम्। अप्रामाण्यतदभावसंशयेनागृहीततया तथाऽपि बाधात्। न च धर्मिज्ञानेन व्यवसायनाशान्न संशयस्य लौकिकत्वमिति वाच्यम्। धर्मिज्ञानस्य त्वया कारणत्वानङ्गीकारेण लौकिकत्वसम्भवादिति।

मैवम् – बाधानवतारकालीनेत्यनेन तद्वत्त्वाभावोपस्थितिसामग्र्यनुत्तरकालीनत्वस्य विवक्षितत्वात्, संशयस्य च तद्वत्त्वाभावविषयकतया तदुपस्थितिसामग्र्युत्तरकालीनत्वात्। तस्मात्संशयानुपपत्त्यभावाद्युक्तं स्वतस्त्वम्। परतस्त्वपक्षे तु प्रथमप्रामाण्यग्रहानुपपत्तिश्चाधिका। क्वचिदपि प्रामाण्याग्रहेऽन्वयिनोऽसम्भवाद्[113] व्यतिरेकिणोऽपि साध्यप्रसिध्यभावेनानवतारात्। नचाप्रामाण्याभावसाध्यकस्य साध्यप्रसिद्धिं विनाऽप्यप्रामाण्यरूपप्रतियोगिप्रसिध्या व्यतिरेकव्याप्तिग्रहे प्रवृत्तिरुपपन्नेति वाच्यम्। अप्रामाण्यस्यापि परतस्त्वेनाप्रसिद्धितादवस्थ्यात्। एतावताऽप्रामाण्याभावसिद्धावपि प्रामाण्यानुमितेरसम्भवाच्च। न च तद्वत्त्वादेर्ज्ञानान्तरेणोपनये मनसा प्रामाण्यग्रहणे साध्यप्रसिद्धिरिति वाच्यम्। व्यवसायस्याप्युपनायकत्वाविशेषेणा-नुव्यवसायेनापि प्रामाण्यग्रहापत्तेः, दाहसामर्थ्यवद्विशेष्यकत्वादेर्हेतोरपि[114] ग्रहणायोगाच्च। अतः परतो ग्राह्यत्वासम्भवात्सिद्धं प्रामाण्यस्य स्वतो ग्राह्यत्वम्।।

## अप्रामाण्यस्य परतो ग्राह्यत्वम्

अप्रामाण्यन्तु परतो गृह्यते। तदभाववत्वस्य व्यवसायानुपनीतत्वेनानुव्यवसायेन ग्रहणा सम्भवात्। नचाप्रामाण्यस्याप्रसिध्या प्रथमग्रहणानुपपत्तिरिति वाच्यम्। बाधोपनीते तदभाववत्वे मनसा तत्ग्रहसम्भवात्। न्चैवमनुव्यवसायेनापि तत्ग्रहणं युक्तः तदभाववत्वस्य व्यवसायानुपनीतत्वाभिधानात्।।

## प्रामाण्यस्योत्पत्तौ परतस्त्वम्

उत्पत्तौ तु प्रामाण्यस्य परतस्त्वमेव। परतस्त्वन्तु अप्रमाव्यावृत्तकारणनिरूपितकार्यतावच्छेदकत्वम्।

---

113 (टि) अन्वयिनोऽसंभवादिति। इदं ज्ञानं प्रमा, सफलप्रवृत्तिजनकत्वादित्यस्यान्वयिनः क्वचिदपि प्रमाणान्तरेण प्रामाण्याग्रहे दृष्टान्ताभावेनासंभवः।

114 (टि) वह्निज्ञानं प्रमा दाहसामर्थ्यवद्विशेष्यकत्वादित्यत्र हेतोः प्रमात्वघटिततयाऽनुमानात् पूर्वं ग्रहणाभावात्। न च सफलप्रवृत्तिजनकत्वस्य प्रमात्वाघटितस्य हेतुत्वं संभवतीति वाच्यम्। प्रवृत्तेस्साफल्यनिश्चयेऽपि ज्ञाने तज्जनकत्वानिश्चयात्। तथाहि – यद्यपि ज्ञाने व्यभिचारज्ञानाभावसहकृतसहचारज्ञानेन निश्चेतुंशक्यं, तन्न तद्व्यक्तित्वेन निश्चेयं, प्रवृत्तिप्रवर्तकयोस्समानविषयकत्वेनैव जन्यजनकभावस्यौचित्यात्। इत्थञ्च मदीयाप्रवृत्तिर्दाहसमर्थविषयिणी तल्लाभप्रयोजकत्वादिति प्रथममनुमाय पश्चान्मदीयं ज्ञानन्दाहसमर्थविषयकं तल्लाभप्रयोजकप्रवृत्तिजनकतावच्छेदकतद्विशेष्यकत्वादित्यनुमेयम्। तथा चानुमानात्पूर्वं हेतोर्ग्रहणायोग इति भावः।

यद्यपि साधारणकारणनिरूपितकार्यतावच्छेदकत्वं साधारणधर्मस्यैवेति कार्यतावच्छेदकत्वोक्तिमात्रे- णाप्रमाव्यावृत्तकारणनिरूपितकार्यतावच्छेदकत्वं लभ्यत इत्यप्रमाव्यावृत्तेत्यादिकमनपेक्षितं, तथाऽपि स्पष्टबोधार्थं तदुपादानमिति मन्तव्यम्। ननु प्रमात्वस्य कार्यतावच्छेदकत्वे किं मानम्। कार्यमात्रवृत्तित्वमिति चेन्न। नीलघटत्वपरज्ञानत्वादौ[115] व्यभिचारात्। न च बाध- काभावे सतीति विशेषणीयं, बाधकसामान्याभावस्य सन्दिग्धत्वात्, विशेष्यस्य वैयर्थ्याच्च। विशेषानिरूपणेन विशेषाभावस्यापि हेतुत्वासम्भवात्। प्रमात्वावच्छिन्नं प्रत्यनुगतकरणा- सम्भवेन बाधाच्च। नीलघटत्ववद्विशेष्यकत्वावच्छिन्नकारणात्[116] तत्प्रकारकत्वावच्छिन्न- कारणाच्चार्थसमाजमहिम्नोपपत्तेश्च। नन्वेवमप्रमाकरणविजातीयकारणाजन्यत्वे प्रमायास्तद्वि- जातीत्वन्नस्यात्, न हि विलक्षणकारणाजन्यत्वे कार्यवैलक्षण्यं सम्भवति। विलक्षणशालि यवबीजादिजन्यानामेव तदङ्कुरादीनां वैलक्षण्यदर्शनादिति चेन्न। नीलघटपटज्ञानादेः पीतघटपटज्ञानादिकारणविजातीयकारणजन्यत्वाभावेऽपि तद्वैजात्यदर्शनात्। तत्र तद्वि- जातीयत्वेनाजनकत्वेऽपि विजातीयकारणजन्यत्वमस्तीति यदि, तदेहापि विजातीयत्वेन जनकत्वं न सिध्येत्। तस्मान्न प्रमात्वस्य कार्यतावच्छेदकत्वमिति।

अत्र ब्रूमः – प्रमात्वं कार्यतावच्छेदकम्, अवच्छेदकान्तरोपपन्नकार्यत्वाधि- करणस्वावच्छिन्नयावत्कार्यवृत्तिकार्यत्वप्रतियोगिकैः एककारणासम्भवरूपबाध- काभावे सति कार्यमात्रवृत्तित्वात्, घटत्ववदित्यनुमानं प्रमात्वस्य कार्यतावच्छेदकत्वे मानम्। अत्र सत्यं तेन नीलघटत्वपटज्ञानत्वादौ व्यभिचारव्युदासः। उत्तरभागेन च द्रव्यत्वादौ तद्व्युदासः। न च प्रमात्वस्य नित्यायामपि संविदि वृत्तेर्बाधोऽसिद्धिश्चेति[117] वाच्यम्। तद्वद्विशेष्यकतत्प्रकारकबुद्धिवृत्तित्वस्य घटानित्यप्रमात्वस्य वा पक्षत्वात्। न च पूर्वोक्तरीत्या सत्यन्तासिद्धिः, तद्वद्विशेष्यकत्वे सति तत्प्रकराकत्वस्य समूहा लंबनभ्रमसाधारणस्यार्थसमाजमहिम्नोपपन्नत्वेऽपि तद्वद्विशेष्यकत्वावच्छिन्न- तत्प्रकारकत्वस्यावच्छेदकान्तरोपपन्नकार्यत्वाधिकरणत्वाभावात्, प्रत्यक्षप्रमात्वादेः। पक्षतयाऽनुगतकारणासम्भवस्याप्यभावात्। यद्यपि प्रत्यक्षप्रमात्ववच्छिन्नं प्रत्यपि नानुगतो गुणः, तथाऽपि स्थूलावयविप्रत्यक्षप्रमात्वावच्छिन्नं प्रतिभूयोवयवेन्द्रियसन्निकर्षो गुणः। तथाऽनुमितिप्रमात्वावच्छिन्नं प्रतिसाध्यवद्विशेष्यकत्वावच्छेदेन हेतुप्रकारकज्ञानं गुणः। न तु साध्यवद्विशेष्यकं हेतुप्रकारकं, व्यत्यासभ्रमानुमितोपि प्रमात्वापत्तेः। केचित्तु यथार्थपरामर्शो गुणः न च बाधनवतारकालोत्पन्नाप्रथमक्षणावच्छिन्नघटादिगोचरागन्ध- वत्त्वानुमितिः प्रमा स्यादिति वाच्यम्। पक्षतावच्छेदकाविरोधिसाध्यप्रमात्वावच्छेदेन गुणत्वाङ्गीकारादित्याहुः तन्न। तत्र गुणसत्वेन पक्षतावच्छेदकाविरोधिसाध्यप्रमाया उत्पत्त्यापत्तेः। पक्षतावच्छेदकविरोधि तत्साध्यमिति चेत्किमेतावता। अन्वयव्यभिचारो हि

---

[115] (टि) नीलघटानित्यज्ञानत्वादाविति घटत्वज्ञानत्वयोरेव लाघवात् जन्यतावच्छेदकत्वमिति न नीलघटत्वादेस्तत्त्वम्।

[116] (टि) विशेष्यकत्वावच्छिन्नकारणादिति। तदवच्छिन्नं यत्कारणन्तस्मादित्यर्थयः। तदवच्छिन्नत्वञ्च तदाश्रयजनकत्वसंबन्धेनेत्यवधेयम्। एवं तत्प्रकारत्वावच्छिन्नत्वमपि।

[117] (टि) बाधः नित्यसाधारणस्य कार्यतानवच्छेदकत्वात्। असिद्धिः कार्यमात्रवृत्तित्वाभावात्।

कारणव्यावर्तनेन परिहर्तव्यो न तु कार्याभावप्रदर्शनेन। अन्यथा साध्यप्रमा नास्तीत्येवाभिधीयतां, किं पक्षतावच्छेदकाविरोधिपदोपादानेन, धूळीपटलगोचरधूमभ्रमेण दैवाद्वाह्निमतिवह्निप्रमानुत्पत्त्यापत्तेश्च। नचेश्वरस्य यथार्थपरामर्शस्तत्राप्यस्तीति वाच्यं, क्लृप्तहेतुभावस्यैव तदीयस्य परामर्शस्य गुणत्वसम्भवे व्यधिकरणस्य तत्कल्पनायोगात्[118]। यद्यपीश्वरज्ञानस्यापि हेतुत्वं क्लृप्त, तथाऽप्युपायगोचरापरोक्षज्ञानस्य तत्क्लृप्तम्। न तु परामर्शस्य तस्मान्न यथार्थपरामर्शस्य गुणत्वम्।

अन्ये तु अबाधिततत्वप्रमा गुणः, न च साध्यनिश्चयस्याभावे अबाधिततत्वप्रमा न सम्भवति, भावे तु सिद्धसाधनान्नानुमित्युदयस्स्यादिति वाच्यं, साध्यसंशयस्य साध्यांशे यथार्थतया अबाधिततत्वप्रमापदव्यपदेश्यस्य जनकत्वसम्भवेन सिद्धसाधनानवकाशादिति वदन्ति। तदपि न मनोरमम्। साध्यसंदेहाभावेऽपि घनगर्जितादिनाऽनुमित्युदयेन नियतपूर्ववृत्तित्वस्याक्लृप्तत्वेन नियमानन्यथासिद्धकल्पनापेक्षया क्लृप्तनियतपूर्वभावस्योक्तस्य गुणस्यानन्यथासिद्धिमात्रकल्पने लाघवात्। ईश्वरीयाबाधिततत्वप्रमागुणत्वस्यापि पूर्वोक्तरीत्या निरासात्। न च त्वन्मतेऽपि नाना कर्तृके घटादौ लाघवप्रतिसन्धानजन्यैककर्तृकत्वानुमितिः प्रमा स्यात्, एकत्वस्य[119] लाघवोपनीततयाऽनुमितिविषयत्वेऽपि साध्यकोटिनिवेशाभावेन साध्यवद्विशेष्यकत्वावच्छेदेन हेतुप्रकारकज्ञानस्य सत्वादिति वाच्यम्।

उपनीत भाननिरासेनैकत्वभानस्य प्राक्प्रतिक्षिप्तत्वात् शाब्दप्रमायामपि वक्तृवाक्यार्थप्रमा[120] गुणः। नचावक्तृकवेदजन्यप्रमायां व्यभिचारः, तत्रापि गुणजन्यत्वानुसारेणेश्वरस्य वक्तृत्वकल्पनेनावक्तृकत्वासिद्धेः। ननु शाब्दप्रमाया गुणजन्यत्वेऽपि नेश्वरसिद्धिः, योग्यतायास्तत्प्रमाया वा गुणत्वसम्भवादिति चेन्न। योग्यताया अनन्वयनिश्चयविरहरूपत्वे भ्रमसाधारण्येन गुणत्वायोगात्, संसर्गरूपत्वेऽतीतानागतादिरूपत्वेन जनकत्वायोगात्, एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावरूपत्वेऽनीश्वरवादि-मते बाधाभावपर्यवसन्नतया बाधाभावदशोत्पन्नबाधितार्थकवाक्यजन्यसाधारणतया गुणत्वासम्भवात्। योग्यताप्रमायानियतपूर्ववृत्तित्वस्याक्लृप्ततया नियतपूर्ववृत्तितया क्लृप्तस्य वाक्तृवाक्यार्थज्ञानस्यानन्यथासिद्धिमात्रकल्पने लाघवेन गुणत्वस्योचितत्वेन योग्यताप्रमायास्तत्वायोगात्। वेदजन्यप्रमायां वक्तृवाक्यार्थज्ञानसंशयात्पूर्ववृत्तित्वनियमोऽसिद्ध इति चेन्न। पक्षीय संशयस्य नियमग्रहाविरोधित्वात्। अन्यथा वह्न्यादेरपि धूमादिपूर्ववृत्तित्वनियमो न सिध्येत्, पर्वतादौ तत्संशयात्। तस्मात्सिद्धं वक्तृवाक्यार्थप्रमाया गुणत्वम्। एवं सर्वत्र यथायथं गुणत्वमूह्यम्। अप्रमायामप्यनुगतस्य दोषस्याभावेन पित्तादि तत्तद्दोषजन्यत्वेनैव परतस्त्वाङ्गीकारात्। केचित्तु प्रमामात्रे विशेष्यवृत्तिविशेषणज्ञानं गुण इत्याहुः। तदयुक्तं, व्यत्यासभ्रमस्यापि प्रमात्वापत्तेः। ननु यदि प्रमैव प्रमाणं तदा –

प्रमाणमेकं तद्वाक्यं तथ्यमीश्वरभाषितम्।

---

118 (टि) अधिकरणस्य अनुमित्यधिकरणस्यानुमातुः तत्कल्पनायोगात् गुणवत्वकल्पनायोगात्। ईश्वरपरामर्शानधिकरणत्वादनुमातुरित्यर्थः।

119 (टि) ननु तत्र कर्तर्येकत्वाभावेनैककर्तृकत्वरूपसाध्यवद्विशेष्यकत्वावच्छेदेन हेतुप्रकार-कज्ञानन्नास्तीत्याशंक्याह – एकत्वस्येति।

120 (टि) वक्तुर्या वाक्यार्थप्रमा सैव गुणः।

इत्यत्र **श्रीमत्पौष्करे** करणे कथं तद्व्यपदेश इति चेन्न। तदुपकारकतया तत्रापि प्रमाणव्यपदेशाङ्गीकारात्। तदुक्तं तत्रैव –

पश्यामीति दृशा लोके प्रसिद्धिरुपकारतः।। इति।

तथा च करणमप्यनुप्रमाणम्। करणत्वन्तु शक्तिविशेषो दीपादिव्यावृत्तोऽतो नाति प्रसङ्गः। शक्तिश्चोपरिष्टात्साधयिष्यते।।

## प्रमाणविभागः

तच्च प्रमाणं त्रिविधम्। प्रत्यक्षानुमानशब्दभेदात्। तदुक्तम् – "प्रत्यक्षमनुमानञ्च स शब्दश्चेति शाङ्करे"। इति। उपमानार्थापत्तिसम्भवैतिह्यानामन्तर्भावं तत्तत्प्रमाणनिरूपणावसरे वक्ष्यामः।।

## प्रत्यक्षनिरूपणम्

तत्र साक्षात्कारिप्रमा प्रत्यक्षम्। तत्करणमपि प्रत्यक्षम्। साक्षात्कारित्वमखण्डो धर्मविशेषः। प्रत्यक्षं सविकल्पकनिर्विकल्पकभेदेन द्विविधम्। तत्र सविकल्पकं सप्रकारम्। प्रकारस्तु भासमानवैशिष्ट्यप्रतियोगित्वोपेतः। निष्प्रकारकं ज्ञानं निर्विकल्पकम्। निर्विकल्पकसद्भावे देवदत्तत्वादिप्रकारकं प्राथमिकज्ञानं विशेषणज्ञानपूर्वकं विशिष्टज्ञानत्वादनुमित्यादिवदित्यनुमानं मानम्। अत्र च प्राथमिकमिति पक्षविशेषणमहिम्ना जनकस्य निष्प्रकारकत्वसिद्धिः। अत एव न स्मृत्याऽर्थन्तारता। देवदत्तत्वादेः प्रागननुभूततया तदा तद्गोचरस्मरणस्यासम्भवेन प्राथमिकतत्प्रकारकप्रत्यक्षस्य तज्जन्यत्वायोगात्।

पक्षे हेतौ च ज्ञानपदस्य वृत्तिपरत्वादीश्वरज्ञानचिच्छक्त्यार्बाधस्ताभ्यां व्यभिचारश्च पराकृतो वेदितव्यः। नन्वनुमितित्वावच्छिन्नं प्रतिसाध्यज्ञानत्वावच्छिन्नस्य शाब्दज्ञानत्वावच्छिन्नं प्रतिपदार्थज्ञानत्वावच्छिन्नस्य च हेतुत्वं क्लृप्तम्। न तु तत्र विशिष्टज्ञानत्वं जन्यतावच्छेदकं, नापि विशेषणज्ञानत्वं जनकतावच्छेदकमिति दृष्टान्तस्य साध्यवैकल्यम्। न च विशेषणज्ञानत्वेन विशेषणज्ञानजन्यत्वाभावेऽपि विशेषणज्ञानत्वाश्रयजन्यत्वसद्भावान्न साध्यवैकल्यमिति वाच्यम्। कार्येण कारणानवच्छेदकरूपोपहितसिद्धेरयुक्तत्वात्। अन्यथाऽतिप्रसङ्गादिति[121]।

मैवम् – विशेषयोः कार्यकारणभावेन सामान्ययोरपि बाधकाभावे कार्यकारणभावावधारणात्। नन्वेवं विशेष्यज्ञानमपि कारणं स्यात्तद्विशेषस्य पक्षज्ञानस्य कारणत्वादिति चेन्न। निर्विकल्पकस्योभयविषयतया[122] सामग्रीबलादुत्पन्नतया विशेष्यज्ञानस्य जनकत्वाङ्गीकारे विरोधाभावात्। यदि च घटाभाववत्भूतलमिति ज्ञानं नाभावनिर्विकल्पकपूर्वकम् अभावज्ञानस्य प्रतियोगिज्ञानजन्यतया विशिष्टज्ञानसामग्रीनियमेन तद्गोचरनिर्विकल्पकासम्भवात्।

121 (टि) अन्यथाऽतिप्रसङ्गादिति। धूमादिकार्येण वह्नित्वादिः कारणतावच्छेदकवह्नित्वोपहित एव सिध्यन् सिद्ध्यति। न तु तदनवच्छेदकपार्णत्वोपहितोऽपि। तथा च तथाऽपि सिध्यत्वित्यतिप्रसङ्गः।

122 (टि) उभयविषयतयेति। निर्विकल्पके यो विषयस्तस्य तदुत्तरसविकल्पके यदि प्रकारत्वन्तदा विशेषणज्ञानं भवति। अथ विशेष्यत्वं तदा विशेष्यज्ञानन्निर्विकल्पकमित्युभयविषयत्वम्। न तु प्रकारविशेष्योभयविषयत्वं, व्याहतेः।

अतोऽभावगोचरं सविकल्पकमेव जनकमभ्युपेयम्। तदपि यद्यभावविशेषणकं तदाऽनवस्था स्यादित्यभावविशेष्यकं तदास्थेयम्। तत्रापि यदि विशेष्यज्ञानं जनकं तदा पुनरप्यनवस्था तादवस्थ्यमिति विशेष्यज्ञानत्वेन जनकत्वं व्यभिचारान्न सम्भवतीति मन्यसे तदा तस्मादेव बाधकाद्विशेष्यज्ञानत्वेन जनकत्वं न सम्भवतीति न किञ्चिदनिष्टम्। अथाभावत्वप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रतिप्रतियोगिज्ञानस्य जनकत्वं नाभावप्रत्यक्षत्वावच्छिन्नं प्रति इदं त्वादिप्रकारकप्रत्यक्षे व्यभिचारादिति विशिष्टज्ञानसामग्रीनियमाभावेनाभावेऽपि निर्विकल्पकसम्भवात्तदनन्तरं तद्विशेष्यकं तद्विशेषणकं वा प्रत्यक्षमिति न व्यभिचारः, तदा बाधकाभावाद्विशेष्यज्ञानत्वेनापि जनकत्वमस्तु, कानोहानिः। युक्तश्चाभावेऽपि निर्विकल्पकाभ्युपगमः। अन्यथा तस्यैन्द्रियकत्वानापत्तेः, आलोचनं हि व्यापारमिन्द्रियामित्या-दिस्वरसेनेन्द्रियाणां निर्विकल्पकं प्रत्येव जनकत्वस्थितेः। अथवा –

न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते।।

इत्युक्तरीत्या सर्वं सविकल्पकं ज्ञानं शब्दोल्लेखि। अत एव शब्दसंबन्धस्य चक्षुराद्यगम्यत्वेन मनस एव तज्ज्ञापकत्वात्सर्वत्र सविकल्पके मनस एव जनकत्वमिति "विकल्पो मनस" इत्याकारग्रन्थस्सङ्गच्छते। शब्दोल्लेखा नियमे तु गुणक्रियादिवैशिष्ट्यस्य चक्षुरादिनाऽपि ग्रहणसम्भवेन तत्ग्रन्थस्यासङ्गतत्वापत्तेः। न च बालमूकादिज्ञानस्य शब्दोल्लेखित्वासम्भवः, विभक्तशब्दोल्लेखासम्भवेऽप्यविभक्तशब्दात्मकनादोल्लेखस्य तत्रापि सम्भवात्। शब्दस्य चानुपस्थितस्य वैशिष्ट्यग्रहासम्भवादुपस्थितिर्वाच्या। उपस्थितिश्च स्मृतिरूपा न संबन्धि-दर्शनं विनेति शब्दस्मृतिहेतुसंबन्धिदर्शनत्वेन निर्विकल्पकसिद्धिः। न च संबन्धित्वेन संबन्धिदर्शनस्य स्मृतिहेतुत्वान्निर्विकल्पकस्य स्मृतिहेतुत्वमयुक्तमिति वाच्यम्। हस्त्यादिदर्शनस्य संबन्धित्वप्रकारकतया स्मृतिहेतुत्वस्यान्योन्याश्रय[123]निरस्तत्वेन वस्तुतस्संबन्धिदर्शनमात्रस्य हेतुत्वात्।

तथाऽपि सप्रकारकसंबन्धिदर्शनत्वं जनकतावच्छेदकमिति निर्विकल्पकस्य न स्मृतिहेतुत्वमिति चेन्न। त्वन्मते निर्विकल्पकाभावेन सप्रकारकत्वस्य वैयर्थ्ये न जनकतावच्छेदककोटिनिवेशायोगात्। मन्मतेऽपि लाघवेन संबन्धिदर्शनत्वस्यैव जनकतावच्छेदकत्वात्। न च सुखादावपि विशिष्टज्ञानजनकतया शब्दस्मृतिहेतुसंबन्धिदर्शनत्वेन च निर्विकल्पकस्याङ्गीकर्तव्यतया विकल्पो मनस इति ग्रन्थविरोध इति वाच्यम्। तस्यायोगव्यवच्छेदपरतयाऽन्ययोगव्यवच्छेदपरत्वाभावेन निर्विकल्पकजनकत्वेऽप्यविरोधात्।

प्रत्यक्षं प्रकारान्तरेण त्रिविधम्। इन्द्रियसापेक्षमन्तःकरणसापेक्षं निरपेक्षञ्चेति। तदुक्तम् – "प्रत्यक्षं त्रिविधं प्रोक्तमक्षमानसचिद्वशात्"। इति।

**श्रीमत्पौष्करे**ऽप्युक्तम् –

एतच्चेन्द्रियसापेक्षं निरपेक्षं तथैव च।
अन्तःकरणसापेक्षमिति त्रिविधमिष्यतः।। इति।

---

[123] (टि) अन्योन्याश्रयेति। हस्तिदर्शनस्य संबन्धित्वप्रकारकत्वं हस्तिपकस्मरणाद्वक्तव्यं तद्दर्शनेन च हस्तिपकस्मरणमित्यन्योन्याश्रयः।

तत्र निरपेक्षञ्चित्प्रकाशरूपम्। तदपि द्विविधं, स्वसंवेदनं स्वसंवेद्यञ्चेति। तत्र स्वसंवेदनं स्वात्मगोचरज्ञानम्। स्वसंवेद्यं शिवगोचरं ज्ञानम्। अन्तःकरणसापेक्षमपि ज्ञानं द्विविधम्। योगिप्रत्यक्षं सुखादिप्रत्यक्षञ्चेति। योगिप्रत्यक्षं योगाभ्याससमासादितधर्मपरिपाकसहकृतेन मनसाऽतीतानागतातीन्द्रियार्थपरिज्ञानम्। सुखादिप्रत्यक्षन्तु प्रसिद्धम्। इन्द्रियसापेक्षं बाह्यार्थगोचरं प्रत्यक्षम्। सापेक्षेषु योगिप्रत्यक्षं सन्निकर्षानपेक्षः। नचासन्निकृष्टज्ञानजननेऽतिप्रसङ्गः। योगजधर्मसाचिव्येनासन्निकृष्टार्थग्रहणेऽतिप्रसङ्गाभावात्। अस्तु वा तत्रापि योगजधर्म एव सन्निकर्षः॥

## सन्निकर्षनिरूपणम्

प्रत्यक्षज्ञानजनकश्च सन्निकर्षश्चतुर्विधः। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, संबद्धविशेषणता चेति। तत्र घटादिग्रहे संयोगः। रूपादिग्रहे संयुक्तसमवायः। रूपत्वादिग्रहे संयुक्तसमवेतसमवायः। शब्दग्रहेऽपि संयुक्तसमवाय एव ग्राहकः। आहंकारिके श्रोत्रे आकाशादिगुणस्य शब्दस्य समवायायोगेन परोक्तस्य समवायसन्निकर्षस्यासम्भवेन श्रोत्रसंयुक्ताकाशादिसमवायस्यैव सन्निकर्षतौचित्यात्। उक्तरीत्या शब्दत्वग्रहणमपि संयुक्तसमवेतसमवायेनैव।

> शब्दस्य ग्रहणं श्रोत्रसमवेततया स्थितम्।
> शब्दत्वं समवेतार्थसमवायात् प्रतीयत॥

इति **श्रीमत्पौष्करस्थन्तु** वचनं परमतानुसारेणेति ज्ञेयम्। संबद्धविशेषणतयाऽभावादेर्ग्रहणम्। अत एव[124] नाभावस्य प्रमाणान्तरता। तत्फलस्य घटाद्यभावपरिच्छेदस्येन्द्रियादेव निष्पत्तेः॥

## अभावस्यानुपलब्धिगम्यत्वम्

नन्विन्द्रियं न घटाद्यभावग्राहकं, तेनासन्निकर्षात्। न च संबद्धविशेषणता सन्निकर्षः, अभावपरिच्छेदस्यैन्द्रियकत्वासिध्या तत्र[125] प्रमाणाभावात्। अथानन्यथासिद्धेन्द्रियान्वयव्यतिरेकानुविधानं प्रमाणम्। नचाधिकरणग्रहणेनान्यथासिद्धिः। अन्धस्यत्वचोपनीते घटे नीलाद्यभावग्रहापत्तेः। न च प्रतियोगिग्राहकेणेन्द्रियेणाधिकरणज्ञानमभावज्ञाने कारणं, वायौ रूपाभावाग्रहप्रसङ्गात्। किञ्चेन्द्रियदोषेणाभावग्रहणस्य दुष्टत्वमपीन्द्रियजन्यत्वे मानं, कारणदोषानुविधायित्वस्य कार्य दोषे दर्शनादिति। मैवम् – अनुपलब्धिगतयोग्यताघटकत्वेनान्यथासिद्धेः[126]। अनुपलब्धेर्हि योग्यत्वं प्रतियोगितद्व्याप्येतरयावत्तदुपलम्भकसमवहितत्वं, तत्र चोपलम्भकतयेन्द्रियमपि निविष्टमिति।

124 (टि) अत एव नाभावस्येत्यत्रोपलम्भाभावस्येत्यर्थः।

125 (टि) तत्र सन्निकर्षे। प्रमाणाभावादिति। ऐन्द्रियकत्वे सिद्धे तदन्यथानुपपत्त्या विशेषणतासन्निकर्षः कल्पनीयः। तस्यैवेदानीमसिद्धौ कुतः। प्रमाणमिति भावः। अन्धस्य त्वचोपनीत इति। इन्द्रियेणाधिकरणज्ञानस्य सत्वेनानुपलब्ध्याऽभावग्रहापत्तेरित्यर्थः। प्रतियागिग्राहकेणेति। त्वचो नीलरूपप्रतियोग्यग्राहकत्वान्नापत्तिरिति भावः। वायौ रूपाभावेति। प्रतियोगिग्राहकचक्षुरग्राह्यत्वाद्वा योस्तत्राधिकरणज्ञानरूपकारणाभावादित्यर्थः।

126 (टि) अन्यथासिद्धेरिति। इन्द्रियान्वयव्यतिरेकानुविधानस्येत्यादिः। नियतपूर्ववर्तित्वमात्रेणेति। योग्यता संपादकत्वेनेन्द्रियस्य नियतपूर्ववर्तित्वमपेक्षितम्। तावतैव तदनुभवोपपत्तिरित्यर्थः।

अत एव घटाद्यभावग्रहे आलोकस्यापेक्षितततया तस्य च चक्षुस्सहकारितानियमेन चाक्षुषत्वमभावग्रहस्येत्यपास्तम्। आलोकस्यापि योग्यताघटकत्वेनान्यथासिद्धेः। इन्द्रियदोषेण -भावाग्रहणमपि योग्यानुपलब्ध्यभावादेव। अदुष्टस्यैव प्रतियोगिग्राहकत्वात्। न च चक्षुषा घटाभावं पश्यामीत्यनुभवविरोधः, नियतपूर्ववर्तित्वमात्रेण तदुपपत्तेः। चक्षुराद्यव्यापारेऽपि[127] देवालयादिषु मैत्राद्यभावस्य गृहगतेन चैत्रादिना ग्रहणाच्च। तस्मादनुपलब्धिरेवात्र मानमिति।।

## अभावस्यैन्द्रियकत्वम्

अत्रोच्यते – स्फीतालोकवति भूतलादौ निमीलिताक्षस्य घटाभावाद्यग्रहणमनुभवसिद्धम्।

---

[127] (टि) चक्षुराद्यव्यापारेऽपीति। ननु कथमिदं सङ्गच्छते। योग्यता संपादकस्येन्द्रियव्यापारस्याभावे कथमभावग्रहणमिति चेत् न। इन्द्रियस्य नेन्द्रियत्वेनोपयोगः। अन्धस्य त्वचा घटप्रत्यक्षेनीलाभावग्रहापत्तेः। न च प्रतियोगिग्राहकत्वेन, तदाऽनुपलब्धेरेवाभावात् कुतो भावग्रहः। कुत्र वेन्द्रियोपयोगः। न च प्रतियोग्यभावादनुपलब्धिस्संभवतीति वाच्यम्। तर्हि तदा तस्य प्रतियोगिग्राहकत्वमेव नास्तीति कथं तेन रूपेणोपयोगः। न च प्रतियोगिग्रहणयोग्यत्वेनोपयोग इति वाच्यम्। प्रतियोगिनोऽपि तत्त्वेनोपयोगापत्तेः। न च प्रतियोगिनः प्रमाणविघटकत्वेन तस्याभावग्रहेऽनुपयोग इति तदितर तत्ग्रहणयोग्यस्यैवोपयोग इति वाच्यम्। प्रतियोगिसत्वदशायां तस्येवेन्द्रियालोकादेरपि प्रमाणविघटकत्वस्य तुल्यत्वात्। न च प्रतियोग्यभावदशायामिन्द्रियादेर्न विघटकत्वमिति वाच्यम्। इन्द्रियाद्यभावदशायां प्रतियोगिनोऽप्यनुपलब्ध्यविघटकत्वात्। न विषय-विघटकत्वात्प्रतियोगिनोऽनुपयोग इति वाच्यम्। विषयाभावेऽपि रज्जुमन्यत्र रज्जुर्नास्ति अपि तु सर्प एवास्तीत्यभावग्रहसंभवेन विषयाविघटनस्यानपेक्षणात्। नचाभावप्रमायां तदपेक्षितमिति वाच्यम्। तत्र विषयस्यैव कारणत्वौचित्येनेन्द्रियादेरनुपयोगात्। न च विषयसत्वेऽपीन्द्रियाभावे तदग्रहणात्सोऽप्यपेक्षित इति वाच्यम्। तर्ह्यभावग्रहणार्थमिन्द्रियाद्यपेक्षितमितियोग्यताघटकत्वे नापि निवशोऽनुपयुक्तो भवति। तथैवास्त्विति चेन्न। प्रतियोग्युपलब्धिदशायामपीन्द्रियेणाभावग्रहापत्तेः। अनुपलब्धिविशिष्टस्य तस्य ग्राहकत्वमिति चेन्न। घटाभाववति भूतले पटग्रहणसमये नियमेन घटाभावग्रहणापत्तेः। पटग्रहणव्यावृत्तत्वादिन्द्रियस्य न तेनाभावग्रहणमिति चेन्न। भूतलग्रहण-व्यावृतत्वादिन्द्रियस्य न तेनाभावग्रहणमित्यनुपलब्ध्यैव तत्ग्रहणमित्युचितम्। ननु चक्षुषा भूतलाग्रहणेऽप्यनुपलब्ध्याऽभावो गृह्यतामिति चेन्न। अभावग्रहे भूतलभानार्थं तदपेक्षणात्। न च तावन्मात्रेणेन्द्रियजन्पत्वमभावग्रहस्य। नन्वेवं त्वचा गृहीते शुक्लघटेऽन्धस्य नीलाभावग्रहापत्तिरिति वाच्यम्। यद्यप्यधिकरणमात्रग्रहणार्थमलमेवेन्द्रियान्तरमपि। तथाप्यभावग्रहस्य निषेधरूपतया प्रसक्तिपूर्वकत्वेन प्रसक्तेर्ज्ञानरूपत्वेन। निषेधस्तत्ग्रहणयोग्यस्यैव तदभावग्रहणमिति कथम-न्धस्य नीलाभावग्रहापत्तिः। ननु तथाऽपि चक्षुर्व्यापाराभावे कथं पुरुषस्य योग्यतेति चेत् न। योग्यतायास्तदाऽपि सत्वात्। ननु तर्हि निमीलितनयनस्यापि नीलाभावग्रहापत्तिरिति वाच्यम्। अभावग्रहस्य विशिष्टवैशिष्ट्यावगाहिज्ञानतया तत्राधिकरणभानार्थं नयनोन्मीलनस्यावश्यकत्वात्। ननु त्वचा गृहीते शुक्लघटे निमीलतनयनस्य नीलाभावग्रहापत्तिरिति वाच्यम्। यत्र यस्य निषेध-स्तत्र तत्ग्राहकेण तत्ग्रहस्यैव प्रसक्तित्वेन तेन तत्भानस्यैवाभावग्रहेऽपेक्षिततत्वात्। न च तर्हि वायौ रूपाभावग्रहो न स्यादिति वाच्यम्। तत्र वायुविशेष्यकरूपग्रहस्याप्रसिद्धत्वेन सामान्यतो रूपग्रहस्यैव तत्र प्रसक्तिया चक्षुषा वायुग्रहणानपेक्षणात्। भवताऽपि तत्रेत्थमेव समाधेयत्वात्। एतेन जलादौ गन्धाद्यभावग्रहो व्याख्यातः। नन्वेवमप्यालयप्रदेशस्य मैत्राभावप्रतियोगिमैत्रग्राहकेण चक्षुषा ग्रहीतुं योग्यत्वेन तत्ग्रहणार्थं चक्षुर्व्यापारस्यावश्यकत्वे कथं तदव्यापारे तत्र तदभावग्रह इति चेन्न। यत्र प्रतियोगिग्राहकयोग्यस्याभावग्रहे लौकिकी विषयता तत्रैव तद्व्यापारापेक्षा। अत्र त्वलौकिक्ये वालये विषयतेति तदव्यापारेऽप्यभावग्रहोपपत्तिरित्यभिप्रायादिति।

तच्चेन्द्रियासन्निकर्षप्रयुक्तम्। अन्यथाऽनुपलब्धिरूपग्राहकसत्वे तस्यानुपपत्तेः। न च योग्यता विरहादाग्रहः। अक्षिनिमीलनेन सन्निकर्षच्छेदेऽपि सन्निकर्षस्य प्रतियोगिव्याप्यतया तत्तद्व्याप्येतर यावत्तदुपलम्भकसमवधानरूपायास्तस्याऽपि सत्वात्। प्रतियोगिसत्वप्रसञ्जितप्रति-योगिकत्वमनुपलब्धेर्योग्यत्वम्। तत्र च घटसत्वेऽपि सन्निकर्षाभावेनानुपलम्भसम्भवान्न प्रतियोगिसत्वेनोपलम्भापादनमिति योग्यता नास्तीति चेत्तथा सति योग्यता घटकत्वे-नान्यथासिध्युपवर्णनविरोधात्। भवतु वा प्रतियोगितद्व्याप्येतरयावत्तदुपलम्भकसमवधानं योग्यत्वं, तथाऽपि न तदवच्छेदकं, किन्तु स्वतन्त्रावन्वयव्यतिरेकानुविधानात्कारणमेव। अन्यथाऽनुपलब्धिसहकृतस्य तस्य कारणत्वेऽनुपलब्धेरप्यवच्छेदकत्वेनान्यथासिध्यापत्तेः। अवच्छेदकत्वेऽपि दण्डगतदार्ढ्यवदालोकगतोद्भूतरूपवच्च कारणत्वोपपत्तेश्च।

अत इन्द्रियादेरपि सिद्धं कारणत्वम्, अस्तु कारणत्वं, करणत्वन्त्वनुपलब्धेरेवेति चेन्न। इन्द्रियस्य घटाद्युपलब्धौ करणत्वस्य क्लृप्ततया तस्यैवाभावोपलब्धावपि तथात्वसम्भवे-ऽनुपलब्धेस्तत्कल्पनायोगात्। चक्षुराद्यव्यापारेऽप्यभावावधारणन्तु, स देशस्तदा मैत्राभाववान्, तदा तत्तद्व्याप्येतर यावत्तदुपलम्भकसमवहितत्वे सति तत्कालीनानुभवजन्यमैत्राविषयक मदीयस्मरणविषयत्वादित्यनुमानेन। अत्र मदीयत्वविशेषणेन यत्र यस्य मैत्रे तथाविधा-दरप्रत्ययाभावात्तदनुभवेऽपि संस्कारानाधानात्तत्प्रमोषाद्वा तदविषयकं स्मरणं तद्विषयत्वमादाय तत्र मैत्रवतिव्यभिचारो निरस्तः। यत्तूक्तमिन्द्रियन्नाभावग्राहकमसन्निकर्षादिति, तदप्युक्त यारीत्येन्द्रियग्राहकत्वसमर्थनेन विशेषणतासन्निकर्षकल्पनान्निरस्तम्। तस्मात्सिद्धं सन्निकर्षचातुर्विध्यम्।।

## अनुमाननिरूपणम्

अनुमितित्वोपेतं यथार्थज्ञानमनुमानं, व्याप्तिज्ञानजन्यं परोक्षार्थज्ञानं वा। शाब्दबोधव्युदासार्थं जन्यान्तम्। व्याप्तिज्ञानत्वेन तज्जन्यत्वस्य विवक्षितत्वात् न व्याप्तिघटितवाक्यार्थबोधेऽतिव्याप्तिः। तत्र तस्य पदार्थज्ञानत्वेन जनकत्वात्। संशयविपर्ययाद्युत्तरप्रत्यक्षेऽतिव्याप्तिवारणाय परोक्षेति। तदुक्तं **श्रीमत्पौष्करे** –

अनुमानं दृढव्याप्त्या परोक्षार्तावबोधनम्। इति।

अत्र च व्यप्तेर्दृढत्वं निश्चितत्वम्। तेन व्याप्तिनिश्चयजन्यत्वं लभ्यते। तत्करणमनुमानम्। करणञ्च परामर्शः। तस्य निर्व्यापारत्वेऽपि शक्तिविशेषरूपे करणत्वेनानुपपत्तिः। अनुमानप्रामाण्यसाधनावसरे व्याप्तिस्वरूपं तद्ग्रहप्रकारश्चोक्त इति नेह प्रतन्यते। अनुमानस्य स्वार्थपरार्थभेदेन विशेषतो दृष्टसामान्यतो दृष्टभेदेन वा द्वैविध्यं केवलान्वयादिभेदेन त्रैविध्यं परार्थानुमानगतप्रतिज्ञाद्यवयवानां हेत्वाभासानाञ्च पाञ्चविध्यमाकरे बोध्यम्। विस्तरभयान्नेह प्रतिपाद्यते।।

## उपमानादीनामन्तर्भावनिरूपणम्

अत्रैवोपमानार्थापत्तिसम्भवानामन्तर्भावः। तथाहि – उपमानफलं न तावद्गवयपिण्ड-गतगवयशब्दवाच्यत्वपरिच्छेदः। तस्य गोसादृश्यसामानाधिकरण्येन गवयशब्दवाच्यत्वं

बोधयताऽतिदेशवाक्येनैव[128] सिद्धेः। नापि गवयत्वगतवाच्यत्वपरिच्छेदः। तस्यापि लाघवोपनीतस्य भानाप्युपगमे गवयपदं सप्रवृत्तिनिमित्तकं पदत्वादित्यनुमानेन पुनः प्रतिसंहितेनातिदेशवाक्येन वा लाघवसहकृतेन निष्पत्तिसम्भवात्। उपनीतभानानङ्गीकारेऽपि गवयत्वं गवयपदप्रवृत्तिनिमित्तं तत्पदजन्यज्ञानविशेष्यवृत्तिधर्मत्वादित्यनुमानेन तज्जनने विरोधा-भावात्। अन्यथा घटजनकं कीदृगिति पुष्टवतस्संस्थानविशेषोपेतम्। तदित्युत्तरश्रवणसमनन्तरं तत्तादृशसंस्थानोपेतदर्शने तन्निष्ठचक्रत्वादिजातिविशेषगतघटादिजनकतावच्छेदकत्वपरिच्छेदाय मानान्तरमभ्युपेयं स्यात्। उपमानस्यैव तत्रापि जनकत्वमित्यभ्युपगमस्तु –

संबन्धस्य परिच्छेदस्संज्ञायास्संज्ञिना सह।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः।।

**इत्युदयनाचार्यवचनेन** विरुध्यते। तस्योपलक्षणपरत्वेऽपि सर्वत्रोक्तेन लघुत्व-लिङ्गेनैवावच्छेदकत्वनिश्चयान्न तदर्थं मानान्तराभ्युपगमो युक्तः। तथाऽनुपपद्यमानार्थ-दर्शनादुपपादककल्पनारूपार्थापत्तिरप्यनुपपत्तेर्व्यतिरेकव्याप्तिरूपतया तत्प्रतिसन्धान-जन्यपरोक्षज्ञप्तिरूपतयाऽनुमानान्न भिद्यते। न च सामान्यतः प्रवृत्तस्य प्रमाण-स्य[129] विशेषप्रवृत्तप्रमाणविरोधे भिन्नविषयत्वकल्पनमर्थापत्तिफलम्। सविषय-कत्वानुमानेनैवैकविषयबाधसहकृते नेदमेतद्विषयातिरिक्तविषयकम् एतदविषयकत्वे सति सविषयकत्वादित्यनुमाने न वा तत्सिद्धेः। सहस्रसंख्यावच्छिन्नसत्भावनिश्चये शतसंख्यावच्छिन्नसद्भावनिश्चयात्मासम्भवोऽपि व्याप्तिनिश्चयजन्यत्वादनुमानमेवेति।।

## अथ शब्दप्रमाणनिरूपणम्

आप्तवाक्यजन्यं ज्ञानं शब्दप्रमाणम्। तथाऽऽप्तवाक्यमपि शब्दप्रमाणम्। तदुक्तं **श्रीमत्पौष्करे** – "आप्तोक्तिरागम" इति। प्रकृतवाक्यार्थगोचर यथार्थज्ञानवानाप्तः। तदुक्तं **तत्रैव** –

"प्रत्यक्षेणानुमानेन यदि च वार्थं सुनिश्चितः।
यो वक्ति सोऽयमाप्तस्या"दिति।।

वाक्यमाकांक्षायोग्यतासत्त्युपेतं पदकदम्बकम्।।

## आकाङ्क्षा

आकाङ्क्षा तु यद्रूपोपहितस्य पदस्य यद्रूपोपहितेन पदेन सह यदन्वयबोध-जनकत्वं तद्रूपोपहितत्वं तस्य तद्रूपोपहितेन तस्मिन्नन्वय आकाङ्क्षा। द्वितीयान्तस्य

---

[128] (टि) अतिदेशवाक्येन गोसदृशो गवयपदवाच्य इति वाक्येन।

[129] (टि) सामान्यतः प्रवृत्तस्य प्रमणस्येत्यादि। "न हिंस्यात्सर्वाभूतानी"ति भूतसामान्येन प्रवृत्तस्य प्रमाणस्या-ग्निषोमीयं पशुमालभेतेति विशेषप्रवृत्तेन प्रमाणेन विरोधे तादृशपशुव्यशतररिक्तभूतविषयकत्वकल्पनं यथार्थापत्ति फलमित्यर्थः। सविषयकत्वानुमानेनैवेत्यादि। न हिंस्यादिति वचनं यागीय पशुहिंसाव्यतिरिक्तविषयकम्। तत्र बाधितत्वे सति सविषयकत्वादित्यनुमानप्रयोगः। नचैतदविषयकत्वे सति सविषयकत्वादिति प्रयोगः। एतदविषयकत्वं कुत इत्याशंकायामेतद्विषये बाधितत्वादित्यनुमानान्तरापेक्षणादिति।।

सकर्मकक्रियापदेन सह क्रियाकर्मभावान्वयबोधकत्वमिति तस्मिन्नन्वये तस्य तेन सह द्वितीयान्तत्वमाकांक्षा। एवं समानविभक्तिकस्य तादृशेन सहाभेदान्वयबोधकत्वमिति समानविभक्तिकत्वभेदान्वय आकांक्षा। एवं संबन्धितयाऽन्वये षष्ठ्यन्तत्वादिकं बोध्यम्। नचैवमननुगमः, लक्ष्यभूतायास्तत्तदन्वयाकांक्षाया अप्यननुगतत्वेन लक्षणाननुगमस्यादोषत्वात्। अन्यथा घटः कर्मत्वमित्यादिवाक्यव्यावृत्तत्वे लक्षणस्याभेदान्वयेऽप्यनाकाङ्क्षत्वं स्यात्तत्साधारणत्वे क्रियाकर्मभावान्वयेऽप्यकांक्षा स्यादिति[130] दोषद्वयस्याप्रतीकारात्। उक्तस्य चाकाङ्क्षा पदवाच्यत्वं जिज्ञासायोग्यतारूपत्वेन द्वितीयान्तादिपदजन्योपस्थितेः क्रियादिगोचरजिज्ञासाजनकतया द्वितीयान्तत्वादेः तद्योग्यतारूपत्वात्। न चैवं जनितान्वयबोधे वाक्ये सति पुनरप्यन्वयबोधापत्तिः। अतोऽजनितान्वयबोधकत्वमेवाकांक्षेति वाच्यम्। इष्टापत्तेः। त्वयाऽप्युपस्थित्यन्तरस्याजनितान्वयबोधत्वेन पुनरन्वयबोधप्रसङ्गेऽस्य समाधानस्यावश्याभ्युपगन्तव्यत्वात्।

## योग्यता

योग्यताऽप्यनन्वयनिश्चयविरहः। यद्यप्यत्र आप्तवाक्येऽप्यनन्वयभ्रमदशायामयोग्यत्वमनाप्तवाक्येऽपि चानन्वयनिश्चयविरहदशायां योग्यत्वञ्चापतति, तथाऽप्यनन्वयनिश्चयविरहस्यैव शाब्दबोधजनकत्वादनुपयुक्ततन्निर्वचनस्य चायुक्तत्वादिष्टापत्तिरेवात्र युक्ता। अत एवाप्तपदेनैवाग्निना सिञ्चतीत्यादेर्व्यावर्तनाद्वाक्यनिर्वचनस्तस्य योग्यतापदस्य वैयर्थ्यमित्यपास्तम्। आप्तोदीरितस्यानन्वयभ्रमदशायामबोधकत्वेनालक्ष्यतया तद्व्यावर्तनार्थत्वात्।।

## आसत्तिः

आसत्तिः पदयोरव्यवधानेनोपस्थितिः। सा च क्वचिदव्यवधानेनोच्चारणेन क्वचिद्योजनयेति न व्यवहितोच्चरितपदश्लोकेऽव्याप्तिः। अत्र योग्यतासत्त्योः स्वरूपेण हेतुत्वम् आकांक्षायास्तु ज्ञाताया इति विवेकः।।

## शब्दस्य पृथक्प्रामाण्यप्रतिक्षेपः

ननु शब्दस्य लिङ्गभावेनैवार्थगोचरबुद्धिजनकत्वसम्भवान्न पृथक्प्रामाण्यं युक्तम्। तत्र यद्यपि घटवत्भूतलमिति वाक्यप्रयोगस्थले एते पदार्थामिथस्संर्गवन्तस्साकांक्षासन्नपदप्रतिपाद्यत्वादित्यनुमानमग्निसेचनादौ व्यभिचारादनुपपन्नम्। योग्यपदप्रक्षेपेऽपि तस्यानन्वयनिश्चयविरहपरत्वे तथैव। अबाधितार्थकत्वपरत्वे तु सन्दिग्धासिद्धिः[131]। भूतलं घटवत्तत्समानविभक्तिकपदबोध्यत्वादित्येतदपि योग्यपदप्रक्षेपाप्रक्षेपयोः पूर्ववदेव दुष्टम्।

[130] (टि) अभेदान्वयेऽप्यनाकाङ्क्षत्वं स्यादिति। कर्तृसमवेतेप्साविषयत्वरूपस्वरूपसंबन्धात्मकस्य कर्मत्वस्य घटस्वरूपत्वेन घटः कर्मत्वमित्यत्राभेदान्वयबोधोत्पत्तिसंभवेन तत्राकांक्षाया आवश्यकत्वादित्यर्थः। तत्साधारणत्वे तु घटः कर्मत्वमित्यत्र क्रियाकर्मभावेन घटकर्मकानयनशमत्यन्वयबोधस्स्यात्। आकांक्षायास्सत्वादित्यभिप्रायः। इष्टापत्तेरित्यस्य पुनरप्यन्वयबोधस्येत्यादिः।

[131] (टि) सन्दिग्धासिद्धिरिति। अबाधितार्थकपदप्रतिपाद्यत्वरूपहेतुस्वरूपासिद्धिसन्देह इत्यर्थः। नचाग्निनेति। तत्र स्वप्रतिपाद्ययोरग्निनिष्ठकरणत्वसेचनक्रिययोस्संसर्गाभावादित्याशयः।

तथाऽप्येतानि पदानि स्वप्रतिपाद्यसंसर्गबोधपूर्वकाणि सन्दर्भविशेषवत्वादित्यनुमानमदुष्टम्। नचाग्निना सिञ्चतीत्यादिपदे व्यभिचारः। तत्र संसर्गाभावेऽपि संसर्गबोधपूर्वकत्वस्य साध्यस्य सद्भावात्[132]।

न च शुकाद्युदीरितपदे[133] व्यभिचारः तत्र सन्दर्भविशेषाभावात्। तद्व्यावृत्तसन्दर्भविशेषानङ्गीकारे सर्वसम्मतस्य वक्तृज्ञानानुमानस्यानुत्पत्त्यापत्तेः। न चैवं तत्रान्वय बोधानुपपत्तिः लिङ्गाभावादिति वाच्यम्। तत्रार्थबोधपूर्वकसन्दर्भवदानुपूर्वीसमानानुपूर्विकमित्येतावन्मात्रेणार्थबोधाभिमानात्। अन्यथा तत्तदर्थबुबोधयिषापूर्वकचेष्टविशेषसमानाकारस्योन्मत्तादिचेष्टाविशेषस्यार्थबोधकत्वापत्तेः। यदि तु तत्र बुबोधयिषापूर्वकत्वव्याप्यचेष्टाविशेषत्वस्याभावात्तदननुमानेऽपि[134] तत्सदृशदर्शनात्तत्[135] स्मरणमात्रमिति मतं तदा प्रकृतेऽपि तुल्यमिति न कश्चिद्दोषः। नचैवमपि संसर्गस्य स्वातन्त्र्येणासिद्धेः प्रवृत्तिर्न स्यादिति वाच्यम्। अभिप्रायविषयतयाऽर्थोपस्थितेरपि चेष्टादिस्थले प्रवर्तकत्वदर्शनात्। अन्यथा तस्यापि प्रमाणान्तरत्वापत्तेरिति।।

## शब्दस्य पृथक्प्रामाण्यव्यवस्थापनम्

अत्र प्रतिविधीयते – स्वातन्त्र्येणार्थज्ञानं प्रवर्तकम्। नत्वर्थज्ञानमात्रम्। तथा सति गेहे घटं सन्दिह इत्यादिज्ञानस्यापि प्रवर्तकत्वापत्तेः। ज्ञानाविषयतया ग्रहणरूपं स्वातन्त्र्येण ज्ञानं तदा निर्वहति। यदि साक्षादर्थ एवानुमीयते[136] यदि वा प्रमाऽनुमीयते घट घं सृष्टमेव भूतलं तत्संसृष्टतया ज्ञात्वेदं वाक्यं रचितवानिति। न च तथानुमानमं। अबाधितार्थकत्वविनाकृतस्य हेतुत्वे व्यभिचारात्[137]। तत्सहकृतस्य तथात्वेऽज्ञानासिद्धेः[138]। तस्मात्प्रवर्तकस्य स्वातन्त्रेणार्थज्ञानस्य सिद्धये पृथक्प्रामाण्यमङ्गीकरणीयम्। न चैवं चेष्टाविशेषादिजन्यानुमितेरप्यभिप्रायविषयतयाऽर्थविषयकत्वेन प्रवर्तकत्वं न स्यात् अर्थाभावेऽपि[139] तत्सत्वेनार्थव्याप्त्यभावेन साक्षादर्थविषयकत्वासम्भवादिति वाच्यम्। तस्य व्याप्तिबलेनाभिप्रायानुमापकत्वानङ्गीकारात्साक्षादेवार्थज्ञापकत्वाभ्युपगमात्।

---

132 (टि) साध्यस्य सद्भावादिति। न स्वप्रतिपाद्ययोर्यस्संसर्गस्तद्बोध साध्यं, किन्तु स्वप्रतिपाद्यप्रकारविशेष्यकविवक्षितसंसर्गबोधपूर्वकत्वम्। स च बोधस्तस्मिन्नपि वक्तरि भ्रमात्मको वर्तत इति न व्यभिचार इति भावः।

133 (टि) तत्र शुकाद्युदीरित पदे। अर्थबोधाभिमानात्। श्रोतुश्शाब्दबोधात्मकार्थबोधाभिमानात्।

134 (पा) तदनुमानेऽपी, (टि) तदननुमानेऽपि अर्थबोधाननुमानेऽपि। तदनुमानेऽपीत्येव पाठो दृश्यते। स च प्रामादिकः। तत्सदृशदर्शनात् – चेष्टाविशेषसदृशदर्शनात्। तत्स्मरणमात्रं – अर्थस्मरणमात्रम्। तस्या अपि – चेष्टाया अपि।

135 (पा) प्रवर्तकत्वापत्ते

136 (टि) अर्थ एवानुमीयत इति। एते पदार्थामिथस्संसर्गवन्त इति। प्रमानुमीयत इति। प्रमानुमानन्तु अयं पुरुषो घटसंसृष्टमेव भूतलन्तत्संसृष्टतयेत्यादि।

137 (टि)व्यभिचारादिति। अर्थाभावेऽपि प्रमाभावेऽपि चाकांक्षादिमत्पदकदंबकत्वसत्वेनेत्यर्थः।

138 (टि)अज्ञानादसिद्धेरिति। प्रामाण्यनिश्चयं विनाऽबाधितार्थकत्वविशिष्टहेतुज्ञानासिद्धेरनुमानायोगात्। तन्निश्चयसत्वेऽनुमानानपेक्षणादित्यर्थः।

139 (टि) तत्सत्वेन – अभिप्रायसत्वेन।

सङ्केतसाचिव्येनार्थबोधकत्वस्य शब्दप्रमाणलक्षणत्वान्न तस्य प्रमाणान्तरत्वापत्तिदोषोऽपि। शब्दचेष्टादेरर्थाभावस्थलेऽपि सत्वात्कथं साक्षादर्थबोधकत्वमिति चेत् व्याप्तावेव व्यभिचारस्य विरोधित्वेन संकेतेनार्थप्रत्यायकत्वे तस्याविरोधित्वादिति। ऐतिह्यमपि बाधितार्थकत्वेऽप्रमाणमेव। तथात्वे तु शब्द एवान्तर्भवतीति सर्वं समञ्जसम्।।

## सूत्रशेषार्थः

नन्वेवमपि सिध्यतु जगत्कर्ता। स हिरण्यगर्भादिषु कतम इति जिज्ञासायामाह – "सहृत्वैतत्सृजत्यस्मात् प्रभुर्हर" इति। स कर्ता एतत् जगत् हृत्वा स्थूलावस्थापरित्याजनेन शक्तिशेषं कृत्वा सृजति उत्पादयति। अस्मात् संहारपूर्वं स्रष्टृत्वात्। प्रभुः – प्रभवनशीलः। कर्ता हरः – शिवः, न तु हिरण्यगर्भादिरित्यर्थः। हिरण्यगर्भादेस्संहृतत्वेन संहारसमयेऽवस्थानायोगेन तत्समयावस्थितस्य शिवस्यैव जगत्कर्तृत्वं युज्यत इति भावः।।

## प्रळयप्रतिक्षेपः

ननु प्रळय एव नास्ति मानाभावात्। कार्यत्वं स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति, कार्यमात्रवृत्तित्वादेतद्घटत्ववदित्यस्य कार्यनिष्ठात्यन्ताभावप्रतियोगित्वोपाधिग्रस्तत्वात्। ननु मायाद्वयं कदाचित्स्वोपादेयपरंपराध्वंसवत् उपादानत्वात् तन्त्वादिवदिति मानमिति चेन्न। मायाद्वयस्य कालभेदेनापि स्वोपादेयपरंपराध्वंसवत्वेन साध्यसिध्युपपत्त्येकस्मिन्काल उभयोरुपादेयपरंपराध्वंसवत्त्वासिध्याऽस्यार्थान्तरत्वात्। नचैककालीनमिति पक्षविशेषणदाने तन्महिम्नैवैकस्मिन्काले तद्वत्त्वं सिध्यतीति युक्तम्। पक्षीयस्य हेतोस्तद्वृत्तिसाध्याभावे स्वस्य पक्षधर्मत्वायोगेन तादृश साध्यप्रमापकत्वेऽपि पक्षतावच्छेदकावच्छेदेन साध्याभावेऽप्युपपन्नत्वेन[140] तदवच्छिन्नसाध्यप्रमापकत्वे मानाभावात्। अनुपपत्त्यभावेऽपि स्वभावादेव तस्य तत्प्रमापकत्वमित्यस्योक्तिमात्रत्वात्। मायाद्वयस्य परं प्रत्यसिध्याश्रयासिद्धेश्च, कर्तुरेवोपादानत्वेन हेतोरप्यसिद्धेश्च[141]। अहोरात्रस्याहोरात्रान्तरपूर्वकत्वनियमेन ब्राह्मणादिवर्णस्य तत्पूर्वकत्वव्याप्त्या संकेतग्रहस्य पूर्वपूर्ववृद्धव्यवहारमूलकत्वावश्यंभावेन च प्रळयस्य प्रमाणबाधितत्वाच्चेति।।

## प्रळयप्रतिष्ठापनम्

मैवम् – जगदुपादानं कदाचित्स्वोपादेयप्रबन्धशून्यम्, उपादानत्वादित्यस्ति प्रळये मानम्। ननु जगच्छब्दस्य घटपटादिप्रपञ्चवाचकतया घटाद्युपादानमृत्तन्त्वादिकमेव पक्षीकृतं स्यात्, तस्य चेदानीमप्युपादेय प्रबन्धशून्यतयाऽस्माभिरप्यङ्गीकृतत्वेन सिद्धसाध-नम्। तन्त्वादेः पक्षीकरणादेव दृष्टान्ताभावोऽपि। न च सर्वानुस्यूतं किञ्चिदुपादानमस्ति, मानाभावादिति चेन्न, कर्तुरुत्तरसूत्रेणोपादानत्वस्य स्थापयिष्यमाणतया तस्य पक्षत्वे विरोधा-

---

[140] (टि) पक्षतावच्छेदकावच्छेदेन साध्याभावेऽप्युपन्नत्वेनेति। यथोत्पत्तिकालावच्छेदेन घटे गन्धा-भावेऽपि पृथिवीत्वस्य हेतोर्घटवृत्तित्वमुपपद्यते तद्वदिति भावः।

[141] (टि) हेतोरप्यसिद्धेश्चेति। अकर्तरि मायाद्वये उपादानत्वाभावादित्यर्थः। अहोरात्रपूर्वकत्वेनेति। तथा चाहोरात्रपरिवर्तनाविच्छेदावश्यंभावेन कथं तद्विच्छेदकप्रळयसिद्धिरिति भावः।

भावात्। प्रबन्धपदोपादानेन चोपादेयमध्यान्तर्गतयत्किञ्चिच्छून्यत्वेनार्थान्तरता निरस्ता। तन्त्वादेरपक्षत्वाद्दृष्टान्तत्वमविरुद्धम्। नन्वेवमपि वृत्तप्रळयासिद्धिः, भाविप्रळये-नाप्युक्तसाध्यनिर्वाहादिति चेत् – जगदुपादानतावच्छेदकं जनितैतत्सजातीयकार्यकारणवृत्ति, अनेकवृत्तिधर्मावच्छिन्नकार्यता निरूपितकारणतावच्छेदकत्वात्तन्तुत्ववदिति वृत्तप्रळयस्यापि साधनात्।

एतत्तन्तुत्वे व्यभिचारवारणायानेकवृत्तीति विशेषणम्। नचाहोरात्रस्याहोरात्रान्तर-पूर्वकत्वनियमेन प्रळयानुपपत्तिः। व्याप्तिमात्रस्य कार्याक्षमत्वेनाविरोधित्वात्। नचाहोरात्रत्वे नाहोरात्रान्तरपूर्वकत्वमनुमेयम्। सर्गाद्याहोरात्रस्य पक्षत्वे आश्रयसिद्धिबाधयोरन्यतरापत्तेः[142]। इदानीन्तनस्य पक्षत्वे सिद्धसाधनात्। एवं ब्राह्मणादेस्तत्पूर्वकता नियमोऽपि निरसनीयः। तथाऽपि सर्गाद्यकालोत्पन्नस्य ब्राह्मणस्य कथं ब्राह्मणत्वनिर्वाहः, तत्प्रयोजकस्य ब्राह्मणजन्यत्वस्याभावादिति पृच्छामीति चेत् अदृष्टविशेषस्यैव तत्र प्रयोजकत्वमिति गृहाण। नचैवमननुगमः, अस्यैव सर्वत्र प्रयोजकत्वसम्भवात्। गोमयवृश्चिकयोरिवैकशक्तिमत्वेनानुगमसम्भवाच्च। सर्गाद्यकालीनसंकेतग्रहोऽपि परमेश्वरानुग्रहसमासादितसार्वज्ञस्यानन्तेशदेर्व्यवहारादिति न काप्यनुपपत्तिः। ननु तनुकरणभुवनादेः प्राणिजातभोगहेतुत्वेनेश्वरस्य करुणया तत्सृष्ट्युपपत्तावपि संहारेण प्राणिनामुपकाराभावात्तत्करणं व्यर्थं, युगपदेव स्वसृष्टतावत्प्रजासंहारश्चानुचित इति चेत्संसारचक्रपरिभ्रमणखिन्नानाम् अणूनां विश्रान्तये पुनः पुनः कार्यप्रवाहजननेन कुण्ठितशक्तेर्मायायाः कार्यजननौन्मुख्याय कर्मणां परिपाकाय च संहरणस्य युक्तत्वात्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

भोगसाधनमाक्षिप्य कृत्वा कारणसंश्रयम्।
तच्च सात्मकमाक्रम्य विश्रमायावतिष्ठते।।
भविनां भवखिन्नानां सर्वभूतहितो यतः। इति।

अत्र भोगसाधनं तनुकरणभुवनादिकं मायाख्यकारणलीनं कृत्वाऽन्तर्निहितजीवं तदपि कारणमधिष्ठाय वर्तत इत्यर्थः। **सिद्धान्तसारावळ्यामप्युक्तं त्रिलोचनशिवाचार्यैः** – "विश्रान्त्यै भविनाञ्च खिन्नमनसां पाकाय कर्मावळेर्माया या बलसम्भवाय कुरुते शंभुर्महासंहृति"मिति।

## हिरण्यगर्भस्य जगत्कर्तृत्वम्

ननु हिरण्यगर्भ एव जगत्कर्ता, तस्यैव –

एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः।
भोगिशय्यागतश्शेते त्रैलोक्यग्रासबृंहितः।।

इति **पुराण**वचनेन प्रळयकालावस्थानप्रतिपादनात्, प्रजापतेस्सर्वान्तस्सञ्चारोक्त्या सर्वानुप्रवेशस्य धात्रा पूर्वसर्गानुसारेण चन्द्रसूर्यद्युपृथिव्यादीनां क्लृप्ततायाः प्रजापतेः प्रजासर्जनकामनायाश्च श्रवणात्। न च प्रजापतिधातृशब्दाभ्यां योगेन शिव एव प्रतिपाद्यत

142 (टि) आश्रयसिद्धिबाधयोरन्यतरापत्तेरिति। प्रळयाभावे आश्रयासिद्धिः – आदित्वासंभवात् तत्सत्वे बाधः – अव्यवधानेन तत्पूर्वमहोरात्राभावात्।

इति युक्तम्। योगाद्रूढेः प्रबलत्वात्, रूढिपरित्यागे हेतोरभावाच्च। तस्मात् हिरण्यगर्भ एव जगत्कर्तेति।।

## हिरण्यगर्भस्य जगत्कर्तृत्वनिरासः

मैवम् –

अप एव सर्जादौ तासु वीर्यमवासृजत्।
तदण्डमभवद्धैमं सहस्रांशु समप्रभम्।।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।

इति **मानववचनेन** प्रत्यक्षश्रुतिमूलेन हिरण्यगर्भस्य सृज्यत्वप्रतिपादनेन तस्य सर्वस्रष्टृत्वासम्भवात्, **लैङ्गपुराणस्थेन** –

तमपृच्छंस्ततो देवाः को भवानिति मोहिताः।
सोऽब्रवीत्भगवान् रुद्रो ह्यहमेकः पुरातनः।।
आसं प्रथममेवाहं वर्तामि च सुरोत्तमाः।
भविष्यामि च लोकेऽस्मिन् मत्तो नान्योऽस्ति कश्चन।।
नित्यान्नित्योऽहमनघो ब्रह्माऽहं ब्रह्मणः पतिः।

इति वचनेन दृष्टश्रुतिसंवादिना शिवस्य सर्गाद्यसमयवर्तित्वस्य ब्रह्मणश्शिवं प्रतिशेषत्वस्य च कथनाच्च। "एकार्णव" इत्यादिपुराणवचनन्तु न सर्वकार्योपसंहारे हिरण्यगर्भस्यावस्थानं प्रतिपादयति। एकार्णव इति, भोगिशय्यागत इति चोपादानात्। किन्तु कतिपय कार्योपसंहारसमयेऽवस्थानम्, अतो न तद्वचनबलात्तस्य जगत्कर्तृतासिद्धिः। तथा प्रजासर्जनकामनाऽप्युक्तहेतुभिः कतिपय सर्गगोचरेति व्याख्येयम्। प्रजापतिधातृशब्दावपि पशुपतित्वेन जगद्धारकत्वेन च योगेन शिव एव वर्तेते। रूढित्यागे च कारणाभिधानान्नोक्तदोषः। **भगवता बादरायणेनापि** "नेतरोऽनुपपत्तेरि"ति सूत्रेण तस्य हिरण्यगर्भस्य जगत्कारणत्वं प्रतिक्षिप्तम्।।

## नारायणस्य जगत्कारणत्वम्

ननु मास्तु हिरण्यगर्भस्य जगत्कारणत्वं नारायणस्य तु स्यात्।

सृष्टेस्तु प्रागिदं सर्वं स देवासीत्तु कारणम्।

इति **स्कान्द**वचनमूलभूतेन सृष्टिप्राक्काले सन्मात्रावस्थानप्रतिपादकेन **छान्दोग्योपनिषद्वचनेन** सामान्यतः प्रतिपन्नस्य जगत्कारणस्य –

एको नारायणो ह्यासीन्न ब्रह्मा न च शंकरः।
नेन्द्रस्सूर्यो न च गुहो न सोमो न विनायकः।।

इति **पाञ्चरात्रसंहितान्तर्गतप्रकाशिकास्थ** वचनसमानार्थेन **महोपनिषद्वर्तिना सुबालोपनिषद्वर्तिना** च वचनेन सृष्टिप्राक्कालावस्थानप्रतिपादनमुखेन कारणत्वख्यापने न नारायणत्वेननिर्धारणात्, शिवहिरण्यगर्भयोस्तत्सृज्यतया सर्वकारणत्वायोगात्। तत्सृज्यता तु –

एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ मम।
मया दर्शितपन्थानौ सृष्टिसंहारकारकौ।।

इति **महाभारत**वचनमूलभूतेन नारायणाद्रुद्रस्य ब्रह्मणश्च जननप्रतिपादकेन **नारायणोपनिषद्वचनेन** सिद्धा। तयोरपि ब्रह्मण एवाधिक्यमुदाहृतम्। **महाभारतस्थ**वचनेनोत्तरेण –

एष लोकगुरुर्ब्रह्मा जगदादिकरः प्रभुः।
एष माता पिता चैव युष्माकं प्रपितामहः।।
अस्यैव चानुजो रुद्रो ललाटाद्यस्समुत्थितः।
मयाऽनुशिष्टो भविता सर्वभूतवरप्रदः।।

इति वचनेन तस्य शिवात्पूर्वं जन्मनः कथनात्, तन्मूलभूत**नारायणोपनिषद्वचनेनापि** पाठक्रमेण तथैव प्रत्यायनात्। ननु सामान्येन प्रतिपन्नस्य जगत्कारणस्य –

सोऽब्रवीद्भगवान् रुद्रो ह्यहमेकः पुरातनः।।

इति **लैङ्गपुराणस्थवचनमूलभूतेनाथर्वशिरोवचनेन** –

अव्यक्तादभवत् स्थाणुश्शिवः परमकारणम्।
सत्कार्यकरणोपेत ऋषिर्विश्वाधिकः प्रभुः।।
देवानां प्रथमं देवं जायमानं मुखाम्बुजात्।
ददर्श चाग्रे ब्रह्माणं चाज्ञया तमवैक्षत।।
दृष्टो रुद्रेण देवेशस्ससर्ज सकलं जगत्।

इति **लैङ्गचनमूलभूतेन तैत्तिरियमन्त्रेण** –

यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम्।
सहभूतेन्द्रियैस्सर्वैः प्रथमं संप्रसूयते।।
एष देवो महादेवो विज्ञेयस्तु महेश्वरः।
न तस्य परमं किञ्चित्परं समधिगम्यते।।
अनेन चित्रकृत्येन प्रथमं सृज्यते जगत्।
अन्तकाले पुनश्चेदं तस्मिन् प्रळयमेष्यति।।

इति **शिवपुराणस्थवचनमूलभूतेनाथर्वशिखावचनेन** च शिवात्मनाऽपि निर्धारणं दृष्टम्। अतः कथं नारायणस्यैव कारणत्वमिति निश्चय इति। मैवम् – **अथर्वशिरस्थस्य** सर्गाद्यसमये स्वातिरिक्तावस्थाननिषेधपूर्वकं स्वावस्थानप्रतिपादनमुखेन रुद्रस्य स्वगतसर्वकारणत्वोपदेशस्य "शास्त्रदृष्ट्या तूपदेशो वामदेवव"दिति **ब्रह्ममीमांसासूत्रो**क्तरीत्या स्वान्तर्यामिपरमात्माभिप्रायकत्वात्। अन्यथा तदीयस्यैव परमात्मकर्तृकसर्वान्तरप्रवेशवचनस्य वैयर्थ्यात्। न च स्वस्यैव सर्वकर्तृत्वोपपत्त्यर्थं रुद्रेण सर्वान्तःप्रवेशः प्रतिपादित इति वाच्यम्। अत्र प्रवेशकर्तुस्तत्पदोपात्तत्वात्। न हि स्वस्य तत्पदेन नित्यपरोक्षवाचकेन प्रत्यवमर्शस्संभवति, प्रत्यगात्मनो नित्यापरोक्षत्वात्। नचान्तर्यामिणोऽपि पूर्वमनभिधानेनाप्रक्रान्ततया प्रक्रान्तवाचिना तच्छब्देनोपस्थापनमयुक्तमिति वाच्यम्।

देवमनुष्यब्राह्मणक्षत्रियादिशब्देषु शरीरवाचकेषु शरीरिवाचकत्वस्य दर्शनेनाहं शब्दस्यान्तर्यामिशरीरकोटिनिविष्टस्वात्मवाचकतया स्वशरीरकस्यान्तर्यामिणोऽपि पूर्वमहं शब्देन शक्त्यैवोपस्थितिसम्भवात्। रुद्रवचनसमाप्त्यनन्तरं श्रुतिरेव रुद्रस्य सर्वान्तर्यामिभावं प्रतिपादयतीति तच्छब्दोपपत्तिरिति चेत्, तत्प्रतिपादनानन्तरमपि रुद्रवचनदर्शनेन तत्समाप्त्यसिद्धेः। रुद्रस्य चान्तर्यामी नारायणः –"विष्णुरात्मा भगवतो देवस्यामिततेजसः"।

**महाभारत**वचनमूलेन **सुबालोपनिषद्वाक्येन** तस्य तदन्तर्यामिता प्रतिपादनात्। अव्यक्तादभवदित्यादिमूलभूत**तैत्तिरीयमन्त्रोऽपि** यदुपबन्धप्रतीतानुवादित्वनिर्वाहाय नारायणात्ब्रह्मणो जनिप्रतिपादक**सुबालोपनिषद्रू**पपुरोवादसापेक्षतया तत्प्राप्तार्थ-प्रतिपादकत्वेन रुद्रपदस्य संसाररुजाद्रावकत्वयोगेन नारायणप्रतिपादनपर एव। "यस्मात्सर्व"मित्यादिमूलभूत**मथर्वशिखा**वचनमप्युक्तकारणवाक्यैर्विष्णोस्सर्वकारण-त्वप्रतिपादनेन तदवतारविशेषस्यैव जननप्रतिपादकतया नेतव्यम्। **पुरुषसूक्ते** महापुरुषशब्दनिर्दि-ष्टस्य नारायणस्यैव सर्वात्मकत्वस्येतरव्यवच्छेदेन मोक्षहेतुज्ञानविषयत्वस्य च बोधनाच्च। न च शिवपरत्वेन निर्णीत**श्वेताश्वतरसन्दर्भस्थ** वाक्यप्रत्यभिज्ञया **पुरुषसूक्तस्य** शिवपरत्वं युक्तं, पुरुषसूक्तस्थ वाक्यप्रत्यभिज्ञया तस्यैव नारायणपरत्वात्। न च तत्रैवोपसंहारे[143] तच्छब्देन नारायणं प्रत्यवमृश्य नारायणादुत्तरस्यामृतत्वहेतुवेदनविषयस्य शिवस्य प्रतिपादनान्नारायणस्य तथात्वप्रतिपदाने तस्य तात्पर्यं नास्तीति वाच्यम्। उपक्रमेणा-सञ्जातविरोधितया प्रबलेन नारायणस्य तथात्वप्रतिपादनेनोपसंहारस्यापि नारायण एव तच्छब्दनिर्दिष्टविश्वोत्तरत्वप्रतिपादनपरतयानेयत्वात्। **विष्णुपुराणे** –

सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात्।
सर्वव्यापी भुवस्स्पर्शादत्यतिष्ठद्दशाङ्गुलम्।।

इत्यादिना **पुरुषसूक्तार्थस्य** सार्वात्म्यादेर्विष्णावेव प्रतिपादनाच्च। न च **रुद्राध्यायादिना** नमस्कारबाहुळ्यप्रदर्शनेन रुद्रस्यापि सर्वोत्कृष्टत्वादिकं प्रकटितमिति वाच्यम्। तस्याहिंसा प्रार्थनादिना लिङ्गेन भयाधिक्यकृतत्वेनोत्कर्षज्ञापकत्वाभावात्। ननु **महोपनिषदि नरायणोपनिषदि सुबालोपनिषदि पुरुषसूक्ते** च नारायणस्य सार्वात्म्यसर्वकारण-त्वसर्वान्तर्यामित्वादिकं प्रतिपाद्यत्वेन प्रतीयते। **अथर्वशिरसि अथर्वशिखायां श्वेताश्वतरमन्त्रे तैत्तिरियरुद्राध्याये** च परमशिवस्य तत्सर्वं प्रतीयते। तत्रोभयोस्सर्वकारण-त्वाद्ययोगेनानयोरन्यतरस्यैव तत्प्रतिपादनीयम्। तत्र यदि सार्वात्म्योपदेशश्शिवस्य शास्त्रदृष्ट्यान्तर्याम्यभिप्रायेण, तदा नारायणे तदुपदेशस्य तदभिप्रायकत्वं केन वार्यते। तथा कारण-वाक्यगताश्शम्भुमहेश्वरेशानत्र्यम्बकोमापतिनीललोहितविरूपाक्षशर्वरुद्रमृडभवादिशब्दा यदि योगवृत्त्या नारायणे पर्यवसायिनस्तदा पुरुषमहापुरुषविष्णुलक्ष्मीपतिपुण्डरीकाक्ष-नारायणादिशब्दा अपि तयैव वृत्त्या शिव एव वर्तन्ताम्। यदि च नारायणादुत्पन्नतया रुद्रस्य प्रतिपादनान्तस्य सर्वकारणत्वं न सम्भवति, तदा तस्यापि जननप्रतिपादनात् तन्न सिध्येत्। यदि तु जननप्रतिपदानमवताराविशेषपरं तदा रुद्रस्याप्युत्पत्तिप्रतिपादनं संहाररुद्रविषयमस्तु। अतो विनिगमनाभावान्नारायणविषयत्वनिर्धारणमयुक्तमिति चेन्न। अन्येषां विष्णुवाचिनां

---

143 (टि) तत्रैव–श्वेताश्वतर एव। तच्छब्देनेति। "ततो यदुत्तरतर"मिति वाक्यस्थ तसिलन्ततच्छब्देन।

योगेन शिवविषयत्वसम्भवेऽपि –

आपो नारा इति प्रोक्तो आपो वै नरसूनवः।
ता यदस्यायनं प्रोक्तं तेन नारायणस्स्मृतः।।

इति **मनुना** कृतनिर्वचनस्य नारायणपदस्य "पूर्वपदात्संज्ञायागम" इति सूत्रेण संज्ञाविषये कृत णकारादेशतया योगेन तदन्यप्रतिपादकतायां णकारादेशानुपपत्तिप्रसङ्गनिराकृतत्वेनान्यपरत्वासम्भवेन रुद्रवाचिनामेव शब्दानां नारायणपरतया योजनीयत्वात्। न च नारायणपदस्यापि लक्षणया रुद्रपरत्वं सम्भवतीति युक्तं, मुख्यार्थपरत्वसम्भवे लक्षणाया अयुक्तत्वात्। न च कारण–वाक्येषु शिवपदोपादानेन शिवस्य सर्वकारणत्वावगमान्मुख्यार्थासम्भवः, तस्य योगेन नारायणे–ऽपि वृत्त्युपपत्तेः। रूढेर्योगापहारितया योगस्तत्र सन्नपि कार्याक्षम इति चेत्सत्यम्। यदि रूढिर्व्याप्रियेत तदा योगापहारस्स्यादपि, सा तु असम्भवादन्यतात्पर्यकेण कारणवाक्यस्थेन नारायणपदेन न व्याप्रियत इति युज्यते योगस्य व्यापारः।

नन्वेवं योगस्य विलम्बितत्वेनाबोधकतया रूढ्यर्थशिवसंबन्धिनि नारायणे शिवादिपदस्य रूढिपूर्विकालक्षणैवाङ्गीकर्तव्या। तथा च नारायणपदस्यापि सा सम्भवतीति पुनरपि साम्यमिति चेन्न। मुख्यार्थसम्भवे उपचरितार्थत्वायोगेन रूढिपूर्वकलक्षणाया अयुक्तत्वात्। न च योगस्य विलम्बादप्रवृत्तिः। तावद्वर्णोपस्थितिपूर्वकसमुदायशक्त्युपस्थितिकालेऽवयवशक्तेरप्युपस्थितिसम्भवेन विलम्बासिद्धेः। न च विलम्बाभावे रूढेर्योगापहारित्वमपि न स्यादिति वाच्यम्। पदान्तरोपस्थापितान्वयात्पूर्वमेव सामग्रीबलेन योगस्य रूढ्यर्थान्वितस्वार्थबोधकतया केवलयौगिकेऽर्थेऽप्रवृत्तेरेवापहारतया रूढेर्योगापहारित्वस्याक्षतेः, बह्वृचब्राह्मणे देवेष्वग्नेरवमत्वस्य विष्णोः परमत्वस्य चाभिधानाच्च। **महाभारते** –

यतस्सर्वाणिभूतानि भवन्त्यादियुगागमे।
यस्मिंश्च प्रळयं यान्ति पुनरेव युगक्षये।।
असृजत् सलिलं पूर्वं स तु नारायणः प्रभुः।
ततस्तु भगवांस्तोये ब्रह्माणमसृजत्स्वयम्।। इति।

**विष्णुपुराणे** –

विष्णोस्सकाशादुद्भूतं जगत्तत्रैव स्थितम्।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च स।।

इति विष्णोस्सर्वकारणत्वप्रदर्शनाच्च। **भगवद्गीतायामपि** विश्वरूपप्रदर्शनेन भगवता स्वस्यैव सर्वोत्तमत्वं प्रकटितम्। अत एव भगवता प्राचेतसेनापि **श्रीमद्रामायणे** नारायण–स्यैव विश्वयोनित्वं व्यक्तीकृतम्। न च **स्कान्दवाय्वादित्यादिपुराणेषु** शिवस्यैव जगत्कारणत्वादिकमितरनिरासेन स्पष्टं प्रतिपादितमिति कथमयं निर्णय इति युक्तम्। तेषां तामसत्वेनानादरणीयत्वात्। तथाहि – "पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणास्मृतम्"। इति **मात्स्यवचने**न,

ब्राह्ममेव कृते चाद्ये पुराणं श्रुतिसम्मतम्।

अष्टादशविधं तच्च शतकोटिप्रभेदत:।।

इति **धर्मसंहिता**वचनेन च प्रथमतो **ब्राह्मपुराणं** प्रणीतवांस्तदनन्तरं तदर्थसंक्षेपोऽष्टादशभि: प्रदर्शित इत्यष्टादशविधं पुराणमिति प्रतिपादनात्सर्वेषां पुराणानामाद्यकर्ता हिरण्यगर्भ इत्यवसीयते। स च सृज्यत्वनियम्यत्वादिश्रवणात् क्षेत्रज्ञकोटिनिविष्ट इति कदाचित्सत्वोद्रिक्त: कदाचिद्रजोभिभूत: तदा चित्तमश्छन्नो भवति। तदुक्तं **भगवता** –

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुन:।
सत्वं प्रकृतिजैर्मुक्तं यदेभिस्स्यात् त्रिभिर्गुणै:।। इति।

सत्वादयश्च,

सत्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।।
प्रवृत्तिञ्च निवृत्तिञ्च कार्याकार्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिस्सा पार्थ सात्विकी।।
यया धर्ममधर्मञ्च कार्यञ्चाकार्यमेव च।
अयथावत् प्रजानाति बुद्धिस्सा पार्थ राजसी।।
अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी।।

इति **श्रीभगवद्वचनेन** सम्यक् ज्ञानलोभमोहजनकतयाऽवधारिता इति तमो जनितविपरीतबोधेन हिरण्यगर्भेण विरचितं शिवमाहात्म्यप्रतिपादकं पुराणं सत्वोद्रेकसमासादितसम्यक्बोधेन तेन विरचिताद्विष्णुमाहात्म्यप्रतिपादकात् पुराणाद्दुर्बलमिति तत्प्रतिपादितमनादरणीयम्। एवं पुराणानां सात्विकादिविभागाश्च तत्तत्प्रचुरकल्पविभागप्रतिपादनमुखेन वर्णितो **मात्स्यपुराणे** –

संकीर्णास्सात्विकाश्चैव राजसास्तामसास्तथा। इति।

**तत्रैव** –

यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा।
तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते।।
अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदु:।।
सात्विकेष्वपि कल्पेषु माहात्म्यमधिकं हरे:।
संकीर्णेषु सरस्वत्या: पितॄणाञ्च निगद्यते।। इति।

सत्वादिगुणप्रचुरेण ब्रह्मणा तत्तत्कल्पप्रोक्तेषु पुराणेषु तत्तद्गुणमयानां तत्वानां माहात्म्यं वर्ण्यत इति सामान्यतो विशेषतश्च प्रतिपादितम्। अत: सात्विकवैष्णवपुराणप्रतिपादितं विष्णोरेव सर्वजगत्कारणत्वमादरणीयमित्येवं प्राप्ते –

## नारायणस्य सर्वजगत्कारणत्वनिरास:

अभिधीयते – अस्तु तावन्मनुना कृतमेव नारायणनामनिर्विचनं, तथाऽपि तस्य नाम्नो

लक्षणया बोधकत्वसम्भवान्नासम्भवदन्यतात्पर्यकत्वम्। न च शिवनाम्नां योगेन नारायण-बोधकत्वसम्भवेन लक्षणां विनैवोभयत्र बोधकत्वे सम्भवत्येकत्र लक्षणाङ्गीकरणमयुक्तमिति वाच्यम्। प्रबलरूढ्युपस्थापितस्य रूढ्यर्थस्य परंपरयाऽपि वाक्यार्थान्वयाय रुद्रादिशब्दस्यापि बहुवचनावगतबहुत्वनिर्वाहाय तत्प्रकृतिभूतस्य भक्षवाक्यस्थोद्गातृ[144]शब्दस्येव रूढिपूर्वक-लक्षणाया एव युक्तत्वात्। अन्यथा तत्राप्युद्गातृप्रातिपदिकोत्तरबहुवचनार्थस्य बहुत्वस्य यौगिकार्थगतत्वेनापि निर्वाहात् तदुपपत्तये लक्षणा कल्पनमयुक्तं स्यात्।

नन्वयवृत्त्याऽपि नोद्गातृशब्दस्य बहुषु वृत्तिस्सम्भवति। न हि गानमात्रमुद्गानम्। द्वितीया हि साम्नो भक्तिरुत्पूर्वस्य गायतेरभिधेया। ताञ्चोद्गाता एकोऽनुगायतीति चेन्न। उद्गायतौ तृचि च यच्छक्तिद्वयं तद्रूपेण योगेन बहुषु वृत्त्यसम्भवेऽप्युपसर्गधातुप्रत्ययेषु यच्छक्तित्रयं तदात्मना योगेन बहुषु वृत्तिसम्भवात्। न च रूढिप्राबल्यासिद्धिः, तत्प्राबल्यस्य रथकारादिपदे स्थितत्वात्। अन्यथा रथकारादिशब्दस्यापि योगेन रथकरणयोग्यस्य त्रैवर्णिकस्यैवाधि-कारबोधकत्वसम्भवेन सङ्करजातिविशेषस्याधानाधिकारबोधकत्वप्रयुक्तं विद्याप्रयुक्तिकल्पनं न स्यात्। नराणामिदं नारमिति समूहपरान्नारशब्दात् "कर्तृः क्यङि"ति क्यङि कृते सनाद्यन्तत्वेन धातुसंज्ञायां कर्तरि ल्युडन्तत्वेन व्युत्पत्त्यन्तरसम्भवाच्च[145]। "तत्र च कृत्य च"[146] इति णकारादेशो योगवृत्त्याऽन्यपरत्वेऽप्यविरुद्धः। अत एव च टित्वेन ङीबन्तो[147] नारायणीशब्दो गौरीविषये प्रयुक्तो दृश्यते। शिवे केवलरूढानां शब्दानां लक्षणाया

---

[144] (टि) भक्षवाक्यस्थेति। "प्रैतुहोतुश्चमसः प्रब्रह्मणः प्रोद्गातृणा"मिति वाक्यस्थेत्यर्थः। तत्रोद्गातु-रेकत्वेपि बहुत्वोपपत्यर्थमजहल्लक्षणयोद्गातृगणनिविष्टा उद्गातृ प्रस्तोतृ प्रतिहर्तारो गृह्यन्ते। नत्वविवक्षितत्वेन बहुत्वं त्यक्तुं युक्तम्। सति संभवे बहुवचनश्रुत्यवगतस्य तस्य त्यागायोगात्। न वा केवलयोगेनाच्चैर्गातारोऽत्र ग्रहणमर्हन्ति। सर्वथा रूढ्यर्थपरित्यागस्यान्याय्यत्वादिति "सर्वेषां वेदसंयोगा"दित्यधिकरणे स्थितम्।

[145] (टि) व्युत्पत्यन्तरसंभवाच्चेति। नन्वेवं व्युत्पत्तौ कोऽर्थो लभ्यते कथं वा तस्यार्थस्य सर्वकारणे शिवे सङ्गतिरिति चेत्प्रासादायमानोऽयं प्रदेश इत्यत्र यादृशोऽर्थो लभ्यते तादृश एव नरसमूहाय मानोऽयं शिव इत्यर्थो लभ्यते। स च "त्वं स्त्रीपुमानसि त्वं कुमार उत वा कुमारी"ति श्रुतिप्रतिपन्नोऽनरोप्युपाधिवशान्नरसमूहायमान इति तस्मिन् सुतरां सङ्गच्छते।

[146] (टि) तत्र च कृत्य च इति। नन्विदमसङ्गतं कृत्य च इत्यनेनोपसर्गस्थेनैव निमित्तेन णत्वविधा-नादिति चेन्न। श्रुतेरसंभावितार्थकल्पनापेक्षयाऽस्यास्स्मृतेस्तादृशश्रुत्यर्थोपपत्यर्थं पूर्वपदस्थ निमित्ता-र्थकत्वस्यापि कल्पनीयत्वादित्यभिप्रायात्। ननु नायमभिप्रायस्साधीयान्, प्रदर्शितव्युत्पत्त्या तस्यैकपद्येन पूर्वोत्तरपदसमासत्वाभावात्। तथा च रषाभ्यादित्यनेनैव णत्वं भवतीति चेत्। भवतु का नो हानिः यथा कथञ्चिदस्मत्कुलमभिवर्धताम्।

[147] (टि) अत एव च टित्वेन ङिबन्त इति। नन्वयनपदान्तत्वेऽपि भवति टित्वेन ङीप् तत्र कतमत एव चेतीति चेन्न। णत्वासंभवात्। ननु भवति "पूर्वपदात् संज्ञाया"मिति णत्वमिति चेन्न। तर्ह्ययनान्तस्य गौरीवाचकत्वमपि वक्तव्यं भवति। विष्णुमात्रवाचकत्वे टित्वेन ङीपोऽप्रवृत्तेः। न च तत्परत्वम्प्यस्त्विति वाच्यम्। अनेकार्थत्वस्यान्याय्यत्वात्। ननु नानेकार्थत्वं भवति दोषः "भोगे भवानी पुरुषेषु विष्णु"रिति स्थितत्वादिति चेत्सत्यमिदमेव वास्तवं तत्त्वम्। तथा च शक्तिरूपस्य विष्णोश्शक्तमन्तरेण कारणत्वायोगान्महोपनिषद्गतनारायणशब्दस्य नारायणा-श्रयशिवपर्यन्तत्वमावश्यकमिति सर्वमनाविलम्।

आवश्यकत्वाच्च[148]। न च सर्वत्र यथा कथञ्चित् व्युत्पत्तिस्संभवतीति वाच्यम्। तावन्मात्रेण यौगिकत्वे गवादिशब्दानामपि तथात्वापत्तेः। तस्मान्न नारायणशब्दस्यासम्भवदन्यतात्पर्यकत्वम्। यदप्युक्तम**थर्वशिरो**वचनमन्तर्यामिपरमिति, तदपि भवान् क इत्यसाधारणस्वरूपप्रश्नाननुगुणत्वादन्तर्यामिप्रतिपादनस्यायुक्तमेव। न च प्रश्नोऽप्युत्तरानुगुण्यादन्तर्यामिविषय इति युक्तम्।

प्रश्नवाक्यस्य प्रवृत्तिदशायामुत्तरवाक्यार्थविरोधप्रतिसन्धानाभावेन स्वार्थपरत्वनिश्चये तदनुसारेणैव प्रतिवचनस्यापि नेतव्यत्वात्। न च प्रतिवचनस्थस्याहं शब्दस्यान्तर्यामिपरत्वाभावे सर्वान्तरप्रवेशः कस्याभिधीयत इति वाच्यम्। तदर्थस्य स्वात्मन एव तद्वर्णनोपपत्तेः। तच्छब्दोपादानानुपपत्तिस्तु तवापि समाना। स्वान्तर्यामिणोऽप्यप्रकृतत्वेन तच्छब्दव्यपदेश्यत्वासम्भवात्। यदप्यत्रोक्तं शरीरवाचकानां शरीरिपर्यन्ततया अहं शब्देनैव तस्योपस्थितिरिति, तदप्ययुक्तम्। शरीरपदस्य मुख्यशरीरपरत्वे अहंशब्दस्य शरीरवाचकत्वासिद्धेः। साक्षादधिष्ठेयपरत्वेऽप्यधिष्ठेयवाचिनामधिष्ठातृवाचकत्वनियमस्तावद्धस्तशरीरादिपदेषु व्यभिचारान्निरस्तः। प्रकारतयाऽधिष्ठेयवाचकत्वस्याव्यभिचारेऽपि तस्य प्रकृते असिद्धेः, अधिष्ठेयवाचकानामधिष्ठातृवाचकत्वसम्भवमात्रं विवक्षितमिति चेन्न।

शिववचनगताहं शब्दस्य देवैरधिष्ठातृपरत्वनिश्चये सर्वान्तरप्रवेशवचनस्य वैयर्थ्यात्। तस्यानिश्चये तु अहं शब्देनान्तर्यामिणोऽनुपस्थापनेन तच्छब्देन प्रत्यवमर्शायोगात्, अस्तु वा अहं शब्दस्य उच्चारयितृवाचकस्य तदन्तर्यामिवाचकत्वं, तथाऽपि मुख्याहं शब्दप्रयोगविषयस्य तच्छब्दप्रयोगविषयत्वासम्भवादनुपपत्तिसाम्यमावयोः स्वान्तर्यामित्वरूपपरिहरणेन निष्कृष्टस्वरूपमात्रस्य तच्छब्देनोपस्थापनस्योपपादने[149] स्वात्मनोऽप्यात्मत्वमात्रपुरस्कारेण तच्छब्दादुपस्थितावविरोधात्। किञ्चायं तच्छब्दस्समाप्तिबोधकेति शब्दोत्तरत्वेन न शिववचनगतः, किन्तु श्रुतिवचनगतः। नचानन्तरमपि शिववचनानुवृत्तिदर्शनान्मध्यगतस्य कथं श्रुतिवचनत्वमिति वाच्यम्। इति करणबलेन तस्य रुद्रवचनसमाप्त्यनन्तरमेव बोधकत्वकल्पनेन व्यवहितान्वयस्य युक्तत्वात्। न च रुद्रेणैव देवान् प्रति सर्वजगत्कारणत्वबोधनात् श्रुतिवचनगतस्य सर्वान्तरप्रवेशवचनस्यानुपयोग इति वाच्यम्। तस्य देवदर्शनायोग्यनिजपूर्णरूपप्रवेशकथनमुखेनान्तर्धानप्रतिपादकतया सर्वान्तर्यामित्वप्रतिपादकत्वानङ्गीकारात्। एतस्य श्रुतिवचनत्वमन्तर्धानप्रतिपादकत्वञ्च –

पुरा विष्ण्वादयो देवास्सर्वे संभूय कारणम्।
विचार्य जगतो विप्रास्संशयाविष्टचेतसः।।
अतीवसुखदं शुद्धं रौद्रं लोकं समागमन्।
तेषां मध्ये महादेवस्संसारद्रावको हरः।।
रुद्रः परमकारुण्यात्स्वयमाविरभूद्द्विजाः।

---

148 (टि) लक्षणाया आवश्यकत्वाच्चेति। तवापि नारायणविषय इत्यादिः व्युत्पत्तिस्संभवतीति। तथा च योग एव न लक्षणेति भावः। नारायणशब्दस्येति। महोपनिषदादिगतस्येत्यादिः। तदर्थस्य–अहं पदार्थस्य। तद्वर्णनोपपत्तेः – सर्वान्तरप्रवेशवर्णनोपपत्तेः।

149 (पा) स्योपादाने

अदृष्टपूर्वं तं दृष्ट्वा देवा विष्णुपुरोगमाः।।
प्रणिपत्य महादेवमपृच्छन् को भवानिति।
सोऽब्रवीत् भगवान् रुद्रः पशूनां पतिरीश्वरः।।
सर्वज्ञस्सर्वतत्त्वानां तत्त्वभूतस्सनातनः।
अहमेको जगद्धेतुरासं प्रथममीश्वरः।।
वर्तामि च भविष्यामि न मत्तोऽन्योऽस्ति कश्चन।
मन्माया शक्तिसंक्षिप्तं जगत्सर्वं चराचरम्।।
इत्युक्त्वा भगवान् रुद्रः पूर्णं रूपं समाविशत्।
नापश्यंश्च ततो रुद्रं देवा विष्णुपुरोगमाः।।

इत्यादि**स्कान्दे** स्पष्टीकृतम्। तस्मादथर्वशिरोवचनं नान्तर्याम्यभिप्रायकम्।

## शिवस्यैव सर्वजगत्कारणत्वव्यवस्थापनम्

किन्तु शिवपरमेवेति सिद्धम्। यदप्युक्तम् –

विष्णुरात्मा भगवतो देवस्यामिततेजसः।

इत्यत्रात्मशब्देन विष्णोश्शिवान्तर्यामित्वं बोध्यत इति तदप्ययुक्तम्। उक्तरीत्या शिवस्यैव सर्वकारणतया सर्वान्तर्यामित्वेनात्मशब्दस्यांशपरत्वात्। यदप्युक्तं **तैत्तिरीयमन्त्रो** यदुपबन्धप्राप्तानुवादत्वनिर्वाहाय पुरोवाद**सुबालोपनिषद**पेक्षतया नारायणपरत्वेनैव नेतव्य इति, तदपि हिरण्यगर्भस्य शिवात्प्रथमतो जनिं प्रतिपादयतः **श्वेताश्वतरमन्त्रस्य** पुरोवादत्वसम्भवान्निरस्तम्। यदप्युक्तं **अथर्वशिखावचनस्थं** विष्णुपदमवतारविशेषपरमिति, तदपि यथा श्रुतार्थपरत्वे बाधकाभावान्निरस्तम्। यदप्युक्तं **पुरुषसूक्तेन** नारायणस्य विश्वात्मकत्वं प्रतिपादितमिति तदपि **ईशानश्रुत्या** शिवपरत्वावसायान्निरस्तम्।

त्वन्मते[150] नारायणे योगसम्भवेऽपि रूढिशक्त्यानुगुण्यायोगात्। न च भूतभव्यात्मकेशितव्यसन्निधानेन योगशक्त्युन्मेषात्, रूढिशक्त्युन्मेषप्रतिबन्ध इति वाच्यम्। तावता योगशक्त्युन्मेषेपि रूढ्युन्मेषप्रतिबन्धे मानाभावात् रूढ्यर्थस्य भूतभव्यप्रतियोगिकत्वासम्भवेऽपि यौगिकार्थस्य तत्प्रतियोगिकत्वोपपत्तेः। ननु पुरुषश्रुत्या नारायणपरत्वमवसीयते –

पूर् संज्ञे तु शरीरेऽस्मिन् शयनात्पुरुषो हरिः।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते।।
भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
निरुपाधी च वर्तते वासुदेवे सनातनः।।

इत्यादि**पुराण**वचनेन पुरुषशब्दस्य नारायणवाचकत्वावगमादिति चेन्न। क्लृप्तवश्यकसामान्यशक्त्या प्रकरणसाचिव्येन विशेषबोधनोपपत्तौ पृथक्शक्तिकल्पने मानाभावात्। पुराणवचनमपि प्रकरणादिसाचिव्यलब्धविशेषबोधनमात्रपरम्। न च नारायणसमाराधने विनियुक्ततया **पुरुषसूक्तं** तत्परमिति युक्तम्। वचनबलेनैन्द्र्या इव गार्हपत्योपस्थानेऽन्यत्रापि

---

150 (पा) तन्मते

विनियोगोपपत्तेः। **विष्णुपुराणस्थं पुरुषसूक्तोपबृह्मणमपि** वाचनिकविनियोगनिर्वाहार्थतया नेयम्। अस्ति चेशानश्रुत्यानुगुण्येन –

ज्येष्ठसाम्नां त्रयेणैव तथा देवव्रतैरपि।
रथन्तरेण पुण्येन सूक्तेन पुरुषेण च।।

इति **लिङ्गपुराणे** शिवसमाराधनेऽपि विनियोगः। तत्रैव –

द्ब्यौर्मूर्धानो विभोस्तस्य खं नाभिः परमेष्ठिनः।
सोमसूर्याग्नयो नेत्रं दिशश्श्रोत्रे महात्मनः।।
वक्त्राद्वै ब्रह्मणा जाता ब्रह्मा च भगवान्विभुः।
इन्द्रविष्णू भुजाभ्याञ्च क्षत्रियाश्च महात्मनः।।
वैश्याश्चोरुप्रदेशात्तु शूद्राः पादात्पिनाकिनः।

इति शिवपरतानुगुणमुपबृम्हणम्। तस्मात् **पुरुषसूक्तं** शिवपरमेव। बह्वृचब्राह्मण-गतमवमपदं परमपदञ्च न निकर्षोत्कर्षपरमं, किन्त्वाद्यन्तपरम्। अग्नेः प्राथम्यस्यान्यत्र प्रतिपादनेन तदनुसारेणावमपदस्य प्राथम्यपरतया परमपदस्यापि तत्प्रति कोटिभूतपाश्चात्यता परत्वस्यौचित्यात्।।

**भगवद्गीतायामपि** भगवता प्रदर्शितस्य रूपस्य शैवत्वम् –

दर्शयामास पार्थाय परमं रूपमैश्वरम्।

इति तत्रैव स्पष्टीकृतम्। **श्रीमद्रामायणेऽप्यादित्यहृदये** –

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः।।

इति ब्रह्माच्युतसंहाररुद्रेशत्वं सदाशिवस्य प्रतिपादितम्। यदपि **रुद्राध्याये** नमस्कार-बाहुळ्यामभयबाहुळ्यप्रयुक्तत्वावसायान्नोत्कर्षज्ञापकमिति तदप्ययुक्तम्। जगत्कारणादेव सर्वेषां भयस्य श्रुतिषु प्रतिपादनेनाभयप्रयुक्तत्वेऽपि सर्वोत्कर्षज्ञापकत्वाविरोधात्। **महाभारते** –

अहं यथावदाराध्यः कृष्णेनाक्लिष्टकर्मणा।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यत।। इति,
देवदेवस्त्वचिन्त्यात्मा अजय्यो विष्णुरव्ययः।
सर्वरूपं भवं ज्ञात्वा लिङ्गेऽर्चयति तं प्रभुम्।।
तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः। इति,
ततोऽगच्छत्सुपर्णाक्षं त्रिषु लोकेषु विश्रुतम्।
यत्र विष्णुः प्रसादार्थं रुद्रमाराधयत्पुरा।।
परांश्च सुबहून्लेभे दैवतैरपि दुर्लभान्।
उक्तञ्च त्रिपुरघ्नेन परितुष्टेन भारत।।
अपि चान्यैः प्रियतमो लोके कृष्ण भविष्यसि।
त्वन्मुखञ्च जगत्सर्वं भविष्यति न संशयः।। इति।

**हरिवंशे** –

इति संस्तूयमानस्तु भगवान् गोवृषध्वजः।
प्रसार्य दक्षिणं हस्तं वासुदेवमथाब्रवीत्।।
मनीषितानामर्थानां प्राप्तिस्तेऽस्तु सुरोत्तम।
पारिजातञ्च हर्तासि माभूत्ते मनसो व्यथा।।
पुरा मैनाकमाश्रित्य तवस्त्वमकरोर्यदा।
तदा मम वचः कृष्ण संस्मृत्य स्थैर्यमाप्नुहि।।
अवध्यस्त्वमजय्यश्च मत्तश्शूरतरस्तथा।
भवितासीत्यवोचं यत्तत्तथा न तदन्यथा।। इति।

**पराशरपुराणे** –

रौद्रं लिङ्गं महाविष्णुर्भक्त्या शुद्धं शिलामयम्।
चारुचित्रं समभ्यर्च्य लब्धवान् परमं पदम्।।

इति च विष्णोश्शिवसमाराधनस्य वरदानस्य च बहुशः प्रतिपादनाच्च शिवस्यैव सर्वोत्तमत्वम्। नचावतारविशेषस्यैव शिवसमाराधनादिकं तत्र प्रतिपादितमिति युक्तम्,

ततोऽन्वपश्यत् गिरीशस्य वामे
स्वात्मानमव्यक्तमनन्तरूपम्।
स्तुवन्तमीशं बहुभिर्वचोभिः
शङ्खासि चक्राङ्कितहस्तमाद्यम्।।

इत्यत्राद्यपदोपादानेनाद्यमूर्तेरपि शिवसमाराधकत्वप्रतीतेः। **आदित्यपुराणे** –

विश्वेश्वरमुमाकान्तं विश्वान्तर्यामिणं शिवम्।
न ब्रह्माद्यैस्समं ब्रूयाच्छक्तिभिश्चापि पार्वतीम्।।
ब्रूयाद्यदि समं शम्भुं ब्रह्मविष्ण्वादिभिस्सुरैः।
यः कश्चित्तमसाऽऽविष्टः तदा चिन्नैव तं स्पृशेत्।।
सर्वस्मादधिकं ब्रूयात् भगवन्तमुमापतिम्। इति।

**स्कान्दे** च –

यो मां ब्रह्मादिभिस्तुल्यं ये त्वां लक्ष्म्यादिशक्तिभिः।
गुरुं ये प्राकृतैस्तुल्यं संस्मरन्त्यल्पबुद्धयः।।
तेषां पापानि नश्यन्ति शिवरात्रिप्रजागरात्।

इतीतरदेवतासाम्यबुद्धौ निन्दावचनेन च शिवस्योत्कर्षः प्रतिपादितः।

**स्कान्द** एव –

बहुनोक्तेन किं सर्वं त्रिमूर्तीनां विभूतयः।
वरिष्ठा हि विभूतिभ्यस्ते वरिष्ठा न संशयः।।
तेषु रुद्रो वरिष्ठश्च ततो मायी परश्शिवः।

मायाविशिष्टात् सर्वज्ञात् साम्बस्सत्यादिलक्षणः।।
वरिष्ठो मुनयेस्साक्षात् शिवो नात्र विचारणा।

इति बहूक्तिनिषेधपूर्वकं परिनिष्पन्नार्थकथनमुखेन परमशिवस्यैव सर्वोत्तमत्वं प्रतिपादितम्। **तत्रैव** –

अस्ति रुद्रस्य विप्रेन्द्रो अन्तस्सत्वं बहिस्तमः।
विष्णोरन्तस्तमस्सत्वं बहिरस्ति रजो गुणः।।
अन्तर्बहिश्च विप्रेन्द्रो अस्ति तस्य प्रजापतेः।
अतोऽपेक्ष्य गुणं सत्वं मनुष्या विवदन्ति हि।।
हरिश्श्रेष्ठो हरश्श्रेष्ठ इत्यहो मोहवैभवम्।
सत्वाभावात् प्रजानाथं वरिष्ठं नैव मन्यते।।
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम्।
हरश्श्रेष्ठो हरेस्साक्षादिति बुद्धिः प्रजायते।।
महापापवतां नृणां हरिश्श्रेष्ठो हरादिति।
बुद्धिर्विजायते पुंसां सदा संसार एव हि।।
निर्विकल्पे परे तत्त्वे श्रद्धा येषां विजायते।
अयत्नसिद्धा परमा मुक्तिस्तेषां न संशयः।।

इति लोकव्यामोहहेतूपन्यासपूर्वकं शिवोत्कर्षबुद्धेरेव मोक्षहेतुत्वं प्रकटितम्। **तत्रैव** –

भगवान्कस्सुरैस्सर्वैरसुरैस्सिद्धकिन्नरैः।
मुनिभिर्यक्षगन्धर्वैस्तथाऽन्यैस्सर्वजन्तुभिः।।
भुक्त्यर्थञ्च विमुक्त्यर्थं पूज्यः पुण्यवतां वर।
तमस्माकं महाभाग ब्रूहि सर्वार्थवित्तमा।।

इति नैमिशीयानां प्रश्नमुपस्थाप्य –

साधु साधु महाप्राज्ञाः पृष्ठमेतज्जगद्धितम्।
वक्ष्ये तच्छ्रद्धयोपेताश्शृणुध्वं मुनिपुङगवः।।
पुरा विष्णुर्जगन्नाथः पुराणः पुरुषोत्तमः।
मायया मोहितस्साक्षाच्छिवस्य परमात्मनः।।
अहमेव जगत्कर्ता मय्येवेदं जगत्स्थितम्।
मत्समश्चाधिकश्चापि नास्ति सर्वत्र सर्वदा।।
मम शक्तिविलासोऽयं जगत्सर्वं चराचरम्।
अहमेव समाराध्यस्सर्वदा सर्वजन्तुभिः।।
इत्यहं मानसंछन्नस्स्वात्मभूतं महेश्वरम्।
अविज्ञायाम्बिकानाथमनन्तानन्दचित्घनम्।।
अतीव ज्ञापयामास ब्रह्मादीनखिलान् हरिः।
अथ देवो महादेवस्सर्वात्मा सर्वभासकः।।

तस्य शक्तिं समाहृत्य मोहयामास शङ्करः।
ततस्तत्प्रमुखास्सर्वे ब्रह्माद्याः पशवो भृशम्।।
मोहिता मायया शम्भोर्विवशाश्च विशेषतः।
एतस्मिन्नन्तरे श्रीमान्नन्दीशङ्करवल्लभः।।
सर्वविज्ञानरत्नानामाकरः करुणालयः।
समागत्य हरिब्रह्मप्रमुखानमराधिपान्।।
बोधयामास सर्वज्ञः परभावं शिवस्य तु।

इति श्रीमन्नन्दिकेश्वरवचनमवतार्य,

विष्णो विश्वजगन्नाथ शङ्करः परमेश्वरः।
सर्वसाक्षी महानन्दस्सर्वात्मत्वेन संस्थितः।।
स एव सर्वजन्तूनां सदात्मासर्वभासकः।
तस्य प्रसादलेशस्य कणलेशवशेन तु।।
इदं विष्णुपदं लब्धं त्वया नान्येन हेतुना।
अन्येषामपि सर्वेषां पदमस्य प्रसादतः।।
अनेनेदं जगत्सर्वं विना न भवति स्वयम्।
अयं धाता विधाता च सर्वदा सर्ववस्तुनः।।
यथा वैश्वानरेणेद्धमयो दहति भाति च।
तथा तेन भवत्येतत् जगत्सर्वं विभाति च।।
यस्यानन्दस्य भूतानि लेशमन्यानि सर्वदा।
लब्ध्वा सन्तोषसम्पन्नान्यतीव ब्रह्मवित्तमाः।।
अस्यैवाज्ञालवाकृष्टं जगन्नित्यं प्रवर्तते।
अविज्ञायैनमात्मानं भवानत्यन्तमोहितः।।
अहंकाराभिभूतश्च भवता मोहितं जगत्।
अतस्त्वं भ्रान्तिमुत्सृज्य स्वात्मभूतं महेश्वरम्।।
आराधयादरेणैव सह देवैरुमापतिम्।

इति सूतेन शिवस्य विष्ण्वादिभ्य उत्कर्षः प्रतिपादितः। तथा **वासिष्ठरामायणे** –

संसारावलयो भुक्तानि गीर्णा रुद्रकोटयः।
ग्रस्तानि विष्णुबृन्दानि क्व न शक्ता वयं मुने।। इति।

**स्कान्दे** –

असंख्या विलयं यान्ति ब्रह्माणः पण्डितोत्तमाः।
असंख्या विष्णवो रुद्रा असंख्या वासवादयः।। इति।

**लैङ्गे** –

असंख्याताश्च कालाख्या असंख्याताः पितामहाः।

हरयश्चाप्यसंख्याता एक एव महेश्वरः।।

इति कण्ठतोऽर्थतश्चान्येषां विलयप्रतिपादनेन शिवस्यैव सर्वकारणत्वं स्थापितम्। विष्ण्वाद्याधिक्यप्रतिपादकश्रुतीनां तात्पर्यं **स्कान्दे** –

कानिचिद्वेदवाक्यानि ब्राह्मणा वेदवित्तमाः।
रुद्रमूर्तिं समाश्रित्य शिवे परमकारणे।।
पर्यवस्यन्ति विप्रेन्द्रास्तथा वाक्यानि कानिचित्।
विष्णुमूर्तिं समाश्रित्य ब्रह्ममूर्तिञ्च कानिचित्।।
आग्नेयीं मूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित्।
सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवान्यानि कानिचित्।।
एवं मुक्त्यभिधानेन द्वारेणैव मुनीश्वराः।
प्रतिपाद्यो महादेवः स्थितस्सर्वासु मूर्तिषु।। इति।

विष्ण्वादिप्रतिपादनमुखेन शिवविषयमेव स्पष्टीकृतम्। **पराशरपुराणे** –

सर्वकारणमीशानस्साम्बस्सत्यादिलक्षणः।
न विष्णुर्न विरिञ्चिश्च न रुद्रो नापरः पुमान्।।
श्रुतयश्च पुराणानि भारतादीनि सत्तम।
शिवमेव सदा साम्बं हृदि कृत्वा ब्रुवन्ति हि।।

इति देवतान्तरकारणत्वप्रतिपादक**श्रुतिपुराणभारतादीनां** शिवपरत्वमेव प्रतिपादितम्। **तत्रैव** –

वैष्णवेषु पुराणेषु योऽपकर्षस्तु दृश्यते।
रुद्रस्यासौ हरस्यास्य विभूतेरेव केवलम्।।

इत्यादिना शिवापकर्षप्रतिपादकवचनानां संहाररुद्रविषयत्वं ख्यापितम्। एवञ्च शिवविषयाणां विष्णुविषयाणाञ्च कारणवाक्यानां दर्शनादुभयोरपि कल्पभेदेन व्यवस्थया जगत्कारणत्वसम्भवान्नैकस्यापि वाक्यस्य मुख्यार्थत्वकल्पनं युक्तमिति शङ्का निरस्ता। उदाहृत पुराणवचनविरोधात्कल्पभेदेन कर्तृभेदे प्रवाहेश्वरपक्षप्रवेशापत्तेश्च। उभयोर्गुणप्रधानभावं विनैव जगत्कर्तृत्वाभ्युपगमे तयोर्वैमत्यसम्भवेन जगतो दौस्थ्यप्रसङ्गाच्च। किञ्च कर्तुः केवलनिमित्तत्वाभ्युपगमे कल्पभेदेन व्यवस्था संभाव्यते। उपादानत्ववादे तु यत्र शक्त्यात्मना लयमेति। तत एव जगतोऽभिव्यक्तिरुचितेति पूर्वस्मिन् कल्पे शिवादुद्भूय तत्रैव लीनस्य विश्वस्य कथं विष्णोरुद्भवस्संभवति, तत्र तस्य सूक्ष्मात्मनाऽवस्थानाभावात्। किञ्च कल्पभेदेन कारणभेदाभ्युपगमे सर्वकारणत्वस्य व्याकोपप्रसङ्गः। अतः कल्पभेदेन कारणत्वमवान्तरसृष्टिकर्त्रोर्हरिहिरण्यगर्भयोरेव। शिवस्य तु सर्वत्र कारणत्वमित्येवाभ्युपगन्तव्यम्। उत्कर्षापकर्षप्रतिपादकश्रुतिपुराणादिविरोधादेव हरिहरयोरभेदादुभयकारणवाक्यानामप्युपपत्तिरित्यपि परास्तम्। तर्हि किं हरिब्रह्मादीनां जीवकोटिनिवेशोऽभिमतः। न परमात्मकोटिनिवेशस्य,

ब्रह्मा विष्णुश्च रुद्रश्च विभक्ता अपि पण्डिताः।

परमात्मविभागस्था न जीवव्यूहसंस्थिता:।।

इति **स्कान्दे** प्रतिपादनेन परमात्मकोटिनिवेशस्यैवास्मदभिमतत्वात्। तर्हि परमात्मकोटिनिवेशे सर्वेषां साम्यमेव स्यादिति चेन्न। **स्कान्दे** –

देहाकारेण चैकत्वे सति सद्द्विजपुङ्गवा:।
शिरस: पादयोस्साम्यं सर्वथा नास्ति हि द्विजा:।।

इति परमात्मकोटिनिवेशेऽप्युत्कर्षापकर्षव्यवस्थापनात्। यदपि शिवोत्कर्षप्रतिपादकानां पुराणानां तामसत्वेन दौर्बल्यं **मात्स्य**वचनेन सिद्धमिति तदप्ययुक्तम्। **मात्स्य**वचनस्य पुराणानां परस्परविरोधप्रतिसन्धानप्रयुक्ताप्रामाण्याशङ्कानिराकरणाय कल्पभेदव्यवस्थया प्रामाण्यव्यवस्थापरत्वेनाप्रामाण्यप्रतिपादनपरत्वायोगात्। अन्यथोदाहृत **मात्स्य**वचनेऽप्य-प्रामाण्यशङ्कया तामसत्वादिविभागस्याप्यसिद्धिप्रसङ्गात्। एवञ्च हिमादिप्रचुरतया हिमकालादिविभागवत्सत्वादिप्रचुरतया कल्पानां सात्विकादिविभागं प्रतिपाद्य तत्तद्गुण-प्रचुरेषु कल्पेषु कृतप्रचारणानां पुराणानां तद्गुणमयदेवतोत्कर्षप्रतिपादकत्वं तेषु तेषु कल्पेषु व्यवस्थया प्रतिपादयति **मात्स्य**वचनमित्येवाभ्युपगन्तव्यम्। अत एव च **कौर्मेऽपि** कल्पभेदविषयतया सर्वेषां प्रामाण्यमस्तीत्येव स्पष्टमुक्तम्।

क्वचित्ब्रह्मा क्वचिद्विष्णु: क्वचिद्रुद्र: प्रशस्यते।
नानेन तेषामाधिक्यं न्यूनत्वं वा कथञ्चन।।
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभि:।
तानि तानि प्रणीतानि विद्वांसस्तत्र न मुह्यति।। इत्यादिना। तस्मात् प्रभुर्हर इति सिद्धम्।।

**।। इति श्रीसूर्यनार्कोयिलाधीनस्थै: श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभि: विरचिते शिवज्ञानबोधभाष्ये प्रथमसूत्रभाष्यम् समाप्तम् ।।**

# द्वितीयसूत्रभाष्यम्

तस्मात्स्थितमेतत्प्रथमसूत्रेऽसङ्कुचितसृष्टिस्थितिसंहारविशिष्टस्य सर्वस्यापि जगतः कर्ता शिव एव, स एव च परतत्त्वमिति। ननु तथाऽपि जगतः कार्यत्वेन कर्तृवदुपादान-स्याप्यावश्यकत्वात्तदवश्यं वाच्यम्। तद्यदि नित्यं स्वतन्त्रं प्रधानं स्यात्तदा शिवस्य परतत्त्ववत्तस्यापि परत्वं स्यात्। किञ्च शिवस्य जगत्स्रष्टृत्वप्रयोजनाभावेन बालतुल्यत्वं न्यूनाधिकसुखदुःखादिकरणेन वैषम्यनैर्घृण्ये च स्यातामित्याशङ्कापरम्परां द्वितीयसूत्रेण प्राधान्येन निराकुर्वन्नानुषङ्गिकतयाऽऽरम्भादिवादिनोऽपि निराकरोति।

## द्वितीयसूत्रम्

**अन्यस्सन् व्याप्तितोऽनन्यः कर्ता कर्मानुसारतः।**
**करोति संसृतिं पुंसामाज्ञया समवेतया॥ इति।**

तत्र प्रथमम् – "शिवाच्छक्तिमत" इति **वायव्ये**, "जायते तस्माच्चराचर"**मित्यचिन्त्यागमे** च प्रकृतिपञ्चमीश्रुत्या शिवज्ञानेन सर्वविज्ञानप्रतिज्ञाद्यनुगृहीतया शिव एवोपादानमिति हृदिनिधाय स्वयं तत्रोपपत्तिं मतन्तरव्यावृत्तं स्वाभिमतमुपादानत्वं कार्यस्य चारंभसमूहपरिणामत्वादिनिराकरणेन वृत्तिरूपत्वञ्च द्वितीयसूत्रस्याद्यपादेन सोत्तरपदेन प्रतिपादयति – **अन्यस्सन्व्याप्तितोऽनन्यः कर्तेति**। अत्र जगत इति पूर्वसूत्रादनुवर्तते। तच्च पञ्चम्यन्तं व्याख्यायते। तत्रारम्भवादिनो वैशेषिकादय उपादानोपादेययोरत्यन्तभेदगर्भं समवायं वदन्ति, कारणसमूहः कार्यमिति वादिनो बौद्धादयस्तु तयोरत्यन्ताभेदम्। तथा च तद्वत्त्वमेवोपादानत्वमिति। तदुभयन्न संभवति। मृद्घट इत्युपादानोपादेययोस्सामानाधि-करण्यप्रतीतिव्यपदेशौ दृश्येते। तौ चात्यन्तभिन्नाभ्यां घटपटाभ्यामत्यन्ताभिन्नाच्च घटाद्व्यावर्तमानावुपादानोपादेययोर्भेदाभेदं गमयतः। तथा च कार्येण सह भेदाभेद-वत्त्वमुपादानत्वमिति स्वयूथ्याः। प्रथमं तदाह – **अन्योऽनन्य इति**। स्वयन्तु तदपि मुख्यं न संभवति। भेदाभेदयोर्भावाभावयोर्विरोधे नैकत्रासंभवात्। सत्यां गतावप्रामाणिकत्वेन विरोधपरि-हारस्याप्ययुक्तत्वात्। तथा च भेद एव मुख्यः। अभेदस्सु न भेदाभावः। किन्तु तादात्म्यरूपो व्याप्तिपर्यायस्सामानाधिकरण्यव्यपदेशनिर्वाहकोऽभेदकल्पो वैशिष्ट्यसंबन्ध इत्याह – **अन्यस्सन्व्याप्तितोऽनन्य इति**। अत्र व्याप्तिशब्दो वैशिष्ट्यपरः। तदुक्तं **श्रीकण्ठाचार्यैर्भाष्ये** तदनन्यत्वाधिकरणे उपादानोपादेययोरत्यन्तभेदात्यन्ताभेदमुख्यभेदाभेदनिराकरणपूर्वकम् – "किन्तु कार्यकारणयोर्भेदाभेदकल्पं वैशिष्ट्यमनन्यत्वं ब्रूम" इति।

ननु भेदाभेदवत्त्वमात्रेण नोपादानत्वं गुणिनो गुणं प्रति व्यक्तेश्च जातिं प्रत्युपादानत्वापत्तेः। न चेष्टापत्तिः तयोर्युगपदुत्पन्नत्वेन जातेश्च नित्यत्वेन पौर्वापर्याभावात्, अपसिद्धान्ताच्चेत्यत आह – **कर्तेति**। अत्र कारकत्वमात्रं लक्षणे प्रवेश्यं, कर्तृपदञ्च प्रकृताभिप्रायम्। किञ्च व्याप्तिपदमत्रावर्तते। तस्यावृत्तस्यानुस्यूतत्वमर्थः। जगत्पदञ्चाऽऽवृत्तं सप्तम्यन्तं विपरिणम्यते। तथा च[1] शिवो जगदुपादानं जगति व्याप्तितः कार्येषु घटस्सन् पटस्सन्निति सद्रूपशिवानुस्यूतितः,

[1] (टि) तथा चानेन मृद्रूयानुस्यूतिवदिति युक्तिरुक्तेत्यन्वयः। तत्रानेनेत्यस्यावृत्ताद्ध्याहृतपदकदंबेने-त्यर्थः।

घटे मृद्रूपानुस्यूतिवदित्यनेन श्रुतिसिद्धे शिवस्य जगदुपादानत्वे सिद्धवत्कृते युक्तिरुक्ता। किञ्चान्यानन्यपदाभ्यां समूहारम्भपक्षौ यथाक्रमन्निराक्रियते। आवर्तमानसच्छब्दगतेन शत्रा लक्षणं निर्दिश्यते "लक्षणहेत्वोः क्रियाया" इति। तेन सति सप्तम्यन्तपदवदन्यस्सन्ननन्य इति कार्यभेदकालेऽनन्यस्य कारणस्य तद्वैशिष्ट्यं लभ्यते। अनेन परिणामपक्षो निराक्रियते। परिणामो हि पूर्वरूपपरित्यागेन रूपान्तरप्राप्तिः। न च कार्यकाले पूर्वरूपवत्ता तत्रास्ति। दुग्धरूपस्य दध्यवस्थायामभावात्। ततो भवति सन्निति पदेन परिणामपक्षनिरासः। तत्राद्यपक्षद्वयनिराकरणहेतुं स्पष्टत्वात्तत्रतत्रोक्तत्वाच्चोपेक्ष्य परिणामनिराकरणहेतुमाह – **व्याप्तित इति**। कार्येषु घटादिषु मृदादेरनुस्यूतत्वान्न पूर्वरूपपरित्यागगर्भपरिणामस्संभवति, किन्तु वक्ष्यमाणरीत्या वृत्तिरेव कार्यं पटकुटीन्यायादिनेतिभावः।

तत्त्वतोऽन्यथाभाव उपादानगताशेषविशेषगुणसजातीयगुणवत्कार्यान्तरापत्तिर्वा परिणाम इति पक्षो यद्यपि नानेन निराकर्तुं शक्यते। तथापि सपक्षः पश्चान्निराकरिष्यते। यद्यप्यारंभपरिणामयोस्सर्वत्र निराकरणं न संभवति, अनेकतन्त्वारब्धे पटे नष्टदुग्धारब्धे दध्नि च तयोरावश्यकत्वात्। तथाऽपि तन्नियमनिराकरणं क्रियते। तेन वृत्तिः परिणामः आरंभो वा तत्र तत्र यथा संभवमङ्गीक्रियत इति। मायाऽपीश्वरपरतन्त्रा जगदुपादानमेव – "उपादानं सबिन्दुराडि"त्यादिबहुप्रमाणसिद्धत्वात्। अत एव चात्रावचनमपि[2]। जगत्तादात्म्यापन्नमायाधारत्वं तादृशमायातादात्म्यापत्तिरेव वा पटेंऽशुवत् शिवस्य जगदुपादानत्वं निर्विकारश्रुतिश्च साक्षात्तादात्म्यनिषेधपरा परिणामनिषेधपरा वा। अतो न तद्विरोधोऽपीति भावः। यद्वा शिवस्य केवलानिमित्तत्ववादिनः प्रतिक्षेप्तुमाह – "**अन्यस्सन्नि**"**ति**।

अनन्यः कर्ता संसृतिं तनुकरणादिकं करोति। अनन्यत्वस्य प्रतियोग्यपेक्षायां कृतिकर्मत्वेनोपस्थितं तनुकरणादिकमेवान्वेति। अथवा व्याप्तित इत्येतत्प्रतियोग्युपस्थापकम्। व्याप्तितः व्याप्यमानादित्यर्थः। तथा चकार्याभिन्नत्वे सति जनकत्वमेवोपादानत्वं तद्व्याप्तं वेत्युपादानत्वसिद्धिः। अनन्यत्वमेव कुत इत्यपेक्षायामाह – **व्याप्तित इति**। व्याप्तिक्रियाकर्तृत्वादित्यर्थः। तथा च व्यापकत्वादिति हेतुः पर्यवस्यति। व्यापनात्मिका व्याप्तिश्च व्याप्यत्वाभिमतसत्भावस्थले सर्वत्र व्यापकाभिमतस्य सत्वम्। इयञ्च क्वचिद्व्याप्यस्य स्थितौ प्रयोजिका क्वचिदुत्पत्तौ। तत्र दृशादिर्व्याप्तिर्घटादेरुत्पत्तौ प्रयोजिका। आकाशादेस्तु व्याप्तिस्तस्यैव स्थितौ। तदुक्तम् –

अन्यस्यान्यत्र सद्भावस्सर्वदा व्यभिचारिणी।
व्याप्तिराप्तपदार्थात्मलाभस्थितिनिबन्धनम्।। इति।

इयञ्च व्याप्तिर्द्विधा भिद्यते। सन्निधानमात्रेणैका स्वात्मनि विधानेनापरा। तदुक्तम् –

---

[2] (टि) अत एव च – बहुप्रमाणसिद्धत्वादेव च। अत्रावचनम् – मायाया जगदुपादानत्वेनानुक्तिः। जगत्तादात्म्यापन्नमायाधारत्वं तादृशमायातादात्म्यापत्तिरेव वा पटेंऽशुवत् साक्षात्तादात्म्यापत्तिर्वा शिवस्य जगदुपादानत्वं निर्विकारश्रुतिश्च साक्षात्तादात्म्यनिषेधपरा परिणामनिषेधपरावेति पाठे प्रथमविकल्पद्वयापेक्षया साक्षात्तादात्म्यनिषेधपरेति तृतीयविकल्पापेक्षया परिणामनिषेधपरावेति च विकल्पेनोक्तमिति बोध्यम्।

द्विधा सा सन्निधावेका परात्मनि विधानतः। इति।

अत्र यद्यपि व्याप्तिमात्रं नान्यानन्यत्वे हेतुः। आकाशादौ व्यभिचारात्। तथाऽपि योग्यताबलाद्द्वितीयैव व्याप्तिरिहान्वयप्रतियोगितयोपस्थाप्यते। तथा च स्वात्मनि विधानेन कर्ताकार्याभिन्नो मृदादिवदित्युक्तं भवति। न च हेतोरसिद्धिः –

तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा।

इत्यादिना प्रतिपादिताया व्याप्तेस्स्वात्मनि विधानरूपतया तत्र तत्र श्रुत्यागमपुराणादिषु प्रतिपादनाद्दृष्टान्तस्वारस्यसिद्धत्वाच्च। अत एव पञ्चमीश्रुतिर्बहुभवनसंकल्पादिश्रुतिस्सामानाधि-करण्यनिर्देशश्चोपपद्यते। अन्ये तु केवलनिमित्तत्वेनात्यन्तभेदेऽप्यभेदव्यपदेशो लवण-मिदमुदकमितिवद्व्याप्तिसंबन्धेनोपचारत इत्येवमर्थकतया योजयन्ति। तदयुक्तम्। उक्तयुक्तिश्रुत्यादिविरोधात्। वस्तुतोऽन्योऽपि सन् कार्यात्तद्व्यापकतयाऽनन्यत्वेनापि सामानाधिकरण्यश्रुत्यादिषु व्यपदिष्ट इत्यर्थकथने श्रुतिवाक्यस्येहत्यानन्यपदस्य च लक्षणापत्तेश्च। न च मन्मतेऽन्यसन्नित्यस्य वैयर्थ्यम्। अत्यन्ताभेदभ्रमनिरासकतया तस्योपयोगात्। एवञ्च प्रकृत्युपादानत्वं परमाणूपादनत्वं शून्योपादानत्वं परमाणुसंघातात्मकत्वं शिवोपादानत्वेऽप्यारंभवादिसम्मतोत्यन्तभेदश्च निरस्तो वेदितव्यः।

कार्यस्य श्रुतिप्रत्यक्षादिप्रमाणसिद्धतया विवर्तपक्षोऽपि प्रतिक्षिप्तः। एवं करणम-पीश्वरसमवेता तत्परतन्त्राज्ञानक्रियाशक्तिरेवाभ्युपेयते, न स्वतन्त्रा, येनोक्तदोषस्स्यादित्याह – **आज्ञया समवेतयेति**। आज्ञया शक्त्येत्यर्थः। समवेतया परतन्त्रयेत्यर्थः अथवा परिग्रहशक्तिव्यवच्छेदायाह – **समवेतयेति**। अथवा परिणामेनोत्क्षेपणादिक्रियया वा कर्तृत्वे विकारित्वं स्यादिति शङ्कानिरासायाह – **आज्ञयेति**। समवेतशक्तिमात्रेण जनकत्वं न परिणामेन नचोत्क्षेपणादिनेति न विकारित्वमिति भावः। न च शक्तौ प्रमाणाभावः, पूर्वोक्तेश्वरानुमानस्यैव मानत्वात्।।

## निष्कलादिनिरूपणम्

इयञ्च शक्तिरेकैव, तत्भेदे मानाभावात् ईशानादिभेदस्तु कार्यभेदौपाधिकः। तदुक्तम् –

एकैवानेकतां याति शिवशक्तिरुपाधितः। इति।

शक्तिभेदवदेव कर्तुरपि शक्तोद्युक्तप्रवृत्तादिभेदोऽप्यौपाधिकः। एकमेकस्यैव शिवादि-नवभेदाः। तत्र शिवशक्तिनादबिन्द्वाख्यानिष्कळाश्चत्वारो भेदाः। सकलनिष्कल-स्सदाशिवाख्यो भेदः। महेश्वररुद्रविष्णुब्रह्माख्याभेदास्सकलाः। एवं शक्तेरेव शान्त्यतीताशान्तिविद्यानिवृत्तिमनोन्मनी[3]महेश्वर्युमालक्ष्मीवाणीभेदाः। तदुक्तं **सुप्रभेदे** –

तच्छरीरं त्रिधा ज्ञेयं निष्कळं सकलाकलम्।
सकलञ्च तथा ज्ञेयन्त्रिविधन्तु विशेषतः।।
निष्कळन्तु चतुर्भेदं सकळञ्च तथा भवेत्।
सकळन्निष्कळञ्चैकन्नवधा कीर्तिताः क्रमात्।।

---

[3] (पा) शक्तिबिन्दुशक्तिमनोन्मनी

शिवतत्त्वसहस्रांशात् शान्त्यतीता समुद्भवः।
शान्त्यतीता पराशक्तिस्तस्याः पर्यायवाचकः।।
तस्माच्चैव सहस्रांशात् शक्तिनाम्नस्समुद्भवः।
शक्तिरेव तु शान्तिश्च पर्यायस्समुदाहृतः।।
तस्माच्चैव सहस्रांशात् नादमूर्तिसमुद्भवः।
नादस्तस्य तु विद्या च पर्यायस्त्विति कीर्तितः।।
तस्माद्दशैकभागेन बिन्दुतत्त्वसमुद्भवः।
बिन्दुश्चैव निवृत्तिश्च पर्यायस्तस्य वाचकः।।
चतुर्धा निष्कलं ह्येवं शिवतत्त्वं समुच्यते।
तस्माद्दशैकभागेन सादाख्यं तत्त्वमुद्भवम्।।
तस्यैव वामपार्श्वे तु आदिशक्तिर्मनोन्मनी।
वह्नेरुष्णत्ववच्छक्तिरविनाभाविनी विभोः।।
यत्तत्सदाशिवं प्रोक्तं तद्वदीश्वरमुच्यते।
या सा मनोन्मनी तद्वदीश्वरीतत्त्वमुच्यते।।
ईश्वरस्य सहस्रांशाद्रुद्रस्योद्भव उच्यते।
चतुर्भुजस्त्रिनेत्रश्च चंद्रार्धकृतशेखरः।।
विद्युत्पुञ्जनिभो देवः परशुर्मृगधारकः।
सर्वावयवसंपूर्णस्सर्वाभरणभूषितः।।
उमादेव्युत्तरे पार्श्वे सर्वलक्षणसंयुता।
ईश्वरस्य तु कोट्यंशाद्विष्णुस्तस्यैव कीर्तितः।।
श्यामवर्णस्सुरक्ताक्षश्शङ्खचक्रधरो हरिः।
पीताबंरधरो देवः श्रीभूमिसहितस्तथा।।
ईश्वरस्य तु कोट्यंशात् ब्रह्मणस्तु समुद्भवः।
चतुर्भुजश्चतुर्वक्त्रो जटामकुटधारकः।।
कमण्डल्वक्षमालाधृत्पीतवर्णस्सुलोचनः।
सावित्रीसहितस्तत्र ब्रह्ममूर्तिरिति स्मृतः।। इति।

अत्र पाशुपताः – शिवस्याप्तकामत्वेन स्वप्रयोजनाभावात्बालक्रीडावत्केवलं लीलयैव जगत्सृष्टिरुत परप्रयोजनापेक्षयेति विषयेऽनुपभोग्यस्यापि तृणगुल्मादेर्दर्शनात्केवलं लीलयैव जगत्सृष्टिरित्याहुः। तदीश्वरस्योन्मत्तत्वप्रसङ्गेन तद्वाक्यस्य निगमादेरप्यनादरणीयता प्रसङ्गान्निराकरोति – **पुंसां संसृतिमिति।** सम्यक् स्रयते गम्यते इयमित्यनयेति च कर्मकरणादिव्युत्पत्त्या शिवाद्यवनिपर्यन्तानि तत्त्वानि तात्त्विकानि तनुभुवनादीनि च भोगस्थानान्युच्यन्ते। तत्र शुद्धानि तत्वानि पञ्च। अशुद्धान्येकत्रिंशत्। तत्र शुद्धानि कुण्डलिनीकार्याणि, इतराणि मोहिनी कार्याणि। तत्र यद्विशिष्टश्शिवो विशिष्टानां शुद्धानां तत्त्वानां तादृशाञ्च शब्दानामुपादानं सा कुण्डलिनी। तदुक्तं **रत्नत्रये** –

जायतेऽध्वायतश्शुद्धो वर्तते यत्र लीयते।

स बिन्दुः परनादाख्यो नादबिन्द्वर्णकारणम्।। इति।

इयञ्चाशुद्धाध्वकर्तुरनन्तेशस्य शुद्धाध्ववर्तिनामणुसदाशिवानां मन्त्रादीनाञ्च शरीरे तेषां भोगसाधने भुवनादावनन्तेशस्य सविकल्पकज्ञानहेतुत्वेनानुमिते परादिभेदेन चतुर्विधे विशुद्धशब्दे निवृत्त्यादिकलासु चोपादनत्वेन शुद्धाध्ववर्तिनामवकाशप्रदातृतया च सिद्धा। तत्र सूक्ष्माभिधानाया वाग्वृत्तेर्मुमुक्षुगते चित्प्रकाशे महत्त्वमहत्तरत्वमहत्तमत्वाभिव्यञ्जिकाया ईश्वरशक्तेर्नियोज्यत्वमलनिवर्तिकायाश्च तस्या एवोपाधिभूतानामिन्धिकादिकलानाञ्चाश्रयीभूता नादपदव्यपदेश्याऽर्थात्मिका कुण्डलिन्याः प्राथमिकीवृत्तिश्शिवतत्त्वम्। केचित्तु परिणाम इत्याहुः। तन्न । पूर्वावस्था परित्यागेनावस्थान्तरप्राप्तेः परिणामशब्दार्थत्वे प्रकृते पूर्वावस्थापरित्यागाभावेनासंभवात् वृत्तित्वाविरोधिनोऽवस्थान्तरमात्रस्य तदर्थत्वेऽविरोधेन तस्यापि लक्षणत्वमस्तु। अस्य परिणामत्वस्य वृत्ति, तत्प्रतिद्वन्द्विपरिणामोभयसाधरणत्वात्। पश्यन्त्याख्याया वाग्वृत्तेश्चेतनस्य संसारान्निवर्तनं तद्विलक्षणवृत्तिनिरोधनं साक्षात्कारं सर्वदुःखप्रशमनञ्च कुर्वन्त्यास्तत्तत्करणात्क्रमेण निवृत्तिप्रतिष्ठाविद्याशान्तिपदव्यपदेश्याया ईश्वरशक्तेश्चाश्रयीभूता बिन्दुशब्दव्यपदेश्या शिवतत्त्वस्य वृत्तिश्शक्तितत्त्वम्।

## कुण्डलिनीनिरूपणम्

केचित्तु कुण्डलिन्या एव द्वितीयावृत्तिरित्याहुः। एवमुत्तरत्रापि तृतीयावृत्तिरित्यादिमतान्तरं द्रष्टव्यम्। मध्यमाभिधानवाग्वृत्तेराश्रयीभूतं कामिकादितन्त्रभेदकारणानां प्रणवादीनां सामीप्यादिमुक्तिभाजाञ्च तनुभुवनादिकारणं शक्तितत्त्वकार्यं सदाशिवतत्त्वम्। अनन्तेशादीनां तदाराधनात्तत्पदं प्राप्तानाञ्च तनुभवुनादिनिष्पादकं सदाशिवतत्त्वकार्यमीश्वरतत्त्वम्। वैखर्याख्या वाग्वृत्तेरधिष्ठानभूतं सप्तकोटिसंख्यानां मन्त्राणां गणेश्वराणां दिक्पालकानामिन्द्रादीनां विद्याराज्ञीनाञ्च तनुभुवनादिकारणमीश्वरतत्त्वकार्यं विद्यातत्त्वम्। अन्ये तु शिवतत्त्वादीनामधिष्ठातृद्वारकलक्षणं वदन्ति। यदा परमात्मा ज्ञानमात्रयुक्तस्तदा शिवपदाभिधेयः, तदधिष्ठेयं तत्त्वमपि तदभिधेयम्। यदा क्रियामात्रयुक्तस्तदा शक्तिपदव्यपदेश्यः, तदधिष्ठेयं तत्त्वमपि तद्व्यपदेश्यम्। यदा ज्ञानक्रियाशक्तयोस्साम्यं तदा सदाशिवः, तदधिष्ठेयं तत्त्वमपि सदाशिवम्। यदा क्रियाशक्तिरधिका तदा स ईश्वरः। तदधिष्ठेयं तत्त्वमपीश्वराख्यम्। यदा ज्ञानशक्तिरधिका तदा स विद्याभिधानः। तदधिष्टेयं तत्त्वमपि तदभिधानमिति।

कलाद्यवनिपर्यन्ते यद्विशिष्टश्शिव उपादानं सा मोहिनी। सा च सर्गाद्यकालीनेषु स्थूलसूक्ष्मशरीरेषु कलादीक्षितिपर्यन्तेषु चोपादानत्वेन सिद्धा। तदुक्तं **श्रीमत्पौष्करे** –

प्रलये लीनदेहस्य कर्मिणोऽणोरहर्मुखे।
देहादेः कारणं माया सूक्ष्मस्थूलात्मकस्य तु।।
कलादिक्षितिपर्यन्तमविभक्तिपुरस्सरम्।
विभक्तत्वाद्यथाबीजे स्कन्धपर्णफलादिकम्।। इति।

तथा प्रळयकालवर्तिनां कर्मणामाश्रयत्वेनापि तत्सिद्धिर्द्रष्टव्या। कर्तृशक्तिप्रकाशनक्षममविशुद्धमायाकार्यं कलातत्त्वम्। इदञ्च कर्तृशक्त्याच्छादकस्य तमोरूपस्य मलस्य

निवृत्तिस्तैजसपदार्थायत्ता तमोनिवृत्तित्वादित्यनुमानेन सिद्धम्। कर्तृशक्त्यभिव्यञ्जकतया कर्तृकारककोटिनिविष्टञ्च। तदुक्तं **श्रीमन्मृगेन्द्रे** –

कर्तृशक्तिरणोर्नित्या विभ्वी चेश्वरशक्तिवत्।
तमश्छन्नतयाऽर्थेषु नाभाति निरनुग्रहा।।
तदनुग्राहकं तत्त्वं कलाख्यं तैजसंहरः।
मायां विक्षोभ्य कुरुते प्रवृत्त्यङ्गं परं हि तत्।।
तेन प्रदीपकल्पेन तदाच्छन्नचितेरणोः।
प्रकाशयत्येकदेशं विदार्य तिमिरं घनम्।।
इत्येतदुभयं विप्र संभूयानन्यवत्स्थितम्।
भोगक्रियाविधौ जन्तोर्निजगुः कर्तृकारकम्।। इति।

दृक्क्रियाव्यञ्जकं कलातत्त्वकार्यं बुद्धिग्रहे करणं विद्यातत्त्वम्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

एवं व्यक्तक्रियाशक्तिर्दिदृक्षुर्गोचरं दृशः।
भजत्यनुग्रहापेक्षां स्वयं द्रष्टुमशक्नुवन्।।
तदर्थं क्षोभयित्वेशः कलामेव जनिक्षमाम्।
तत्त्वं विद्याख्यमसृजत्करणं परमात्मनः।।
तेन प्रकाशरूपेण ज्ञानशक्तिप्ररोचिना।
सर्वकारकनिष्पाद्यमवैति विषयं परम्।। इति।

इच्छाशक्त्यभिव्यञ्जकं कलाकार्यं बुद्धिधर्माभिषङ्गजनकं वा रागतत्त्वम्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

तदभिव्यक्तचिच्छक्तिर्दृष्टार्थोऽप्यपिपासितः।
नैति तज्जनकं रागं तस्मादेवासृजत्प्रभुः।।
स तेन रञ्जितो भोग्यं मलीमसमपि स्पृहन्।
आदत्तेन च भुञ्जानो विरागमधिगच्छति।। इति।

**श्रीमत्पौष्करेऽप्युक्तम्** –

अथाणोः कलितस्यैव विद्यया कलयाऽपि च।
कलातो जायते रागस्सद्यः पुंसां प्रवृत्तये।।
अनिच्छन्नहि भुञ्जानो दृश्यते क्वचिदप्यणुः।
रागात्भोग्येषु सक्तत्वात्भोग्यं भोक्तुमतोऽर्हति।। इति।

लवत्रुट्यादिप्रतीतिगोचरो मायाजन्यः कालः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

त्रुट्यादिप्रत्ययस्यार्थः कालो मायासमुद्भवः।
कलयन्नासमुत्थानान्नियत्यानियतं पशुम्।। इति।

तार्किकास्तु काल एको नित्य आधारत्वेन सर्वकार्यजनकश्चेत्याहुः। तन्न मनोरमम्। तथात्वे तस्यासिद्धिप्रसङ्गात्। तत्भेदोपाधित्वेनाभिमतानामेव तत्कार्यकारित्वोपपत्तेः,

तत्तन्नियतकालोत्पत्तिकानां कालान्तरेऽनुत्पत्तिदर्शनाच्च। स्वकृतस्यापि दुष्कर्मणः फलभोगानिच्छुं प्रति तत्फलेन योजनरूपे परकृतेनापि सुकृतेन फलं भोक्तुमुद्युतं परं प्रति तद्विनिवर्तनरूपे च नियमे कारणीभूतं तत्त्वं नियतिः। तदुक्तं **श्रीमत्पौष्करे** –

भोगायाभिप्रवृत्तस्य कलाविद्यादिवृत्तिभिः।
कर्मणामार्जितानान्तु फलापहरणे सति।।
तद्विनाशे प्रवृत्ते यन्नियतिश्शिवशासने।
अपि भोगेष्वनिच्छन्तं नियोजयति सा बलात्।।
स्वार्जितेष्वेव नेहान्यैरार्जितेषु कदाचन।
यदि सा न भवेदन्ये भुञ्जीरन्नार्जितं परैः।।
राजाज्ञामन्तरा यद्वत्भुञ्जते दस्यवः परैः।
आर्जितानि तथैवेयमसामञ्जस्यनाशिका।। इति।

कर्मणोऽपि नियतिसहकृतस्यैव तज्जनकत्वान्न तेनान्यथासिद्धिः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

केचिन्नियामकं कर्म यदन्यदतिरिच्यते।
भोगार्थस्सर्वतत्त्वानां सोऽपि कर्मनिबन्धनः।।
कर्मैवास्तु शरीरादिततस्सर्वमपार्थकम्।
अथ देहादिसापेक्षं तत्पुमर्थप्रसाधकम्।।
ततो नियतिसापेक्षमस्तु कर्मनियामकम्। इति।

कलादिपञ्चकारभ्यं प्राकृतभोक्तृत्वप्रयोजकं पुंस्तत्त्वम्। इदञ्च कर्मणां कलादिपञ्चकस्य च कार्यान्तरहेतुतया क्लृप्तत्वात्तदनिष्पाद्येन भोक्तृत्वेन कार्येण सिद्धम्। अन्ये तु कलादिपञ्चकोपेत आत्मैव पुंस्तत्त्वम्। तत्त्वमध्ये गणना तु उपचारादित्याहुः। तन्न। उक्तरीत्या मुख्यसंभवे उपचारस्यानाश्रयणीयत्वात्। गुणादिपृथिव्यन्तमूलोपादानं विभक्तगुणोपादानं वा प्रकृतितत्त्वम्। साङ्ख्यास्तु साम्यावस्थां प्राप्ता गुणा एव प्रकृतिः। अतो गुणेनात्यन्ताभेदान्न गुणोपादानं प्रकृतिः। गुणा एव परमकारणत्वात् प्रकृतिरित्याहुः। तन्न युक्तम्। गुणानामचेतनत्वे सत्यनेकत्वेन कार्यतया परमकारणत्वायोगात्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

साङ्ख्यज्ञानेऽपि मिथ्यात्वं कार्ये कारणबुद्धितः। इति।

तथा **श्रीमत्पौष्करेऽपि** –

ऋषयः –

गुणा एव समावस्थां प्राप्ताः प्रकृतिरुच्यते।
तत्कथं तदुपादानं प्रकृतिः प्रतिपाद्यते।।

ईश्वरः –

न गुणानां समावस्था प्रकृतिश्शिवशासने।
अचेतनत्वेऽनेकत्वात् गुणानां मुनिपुङ्गवाः।।
दृष्टं कारणपूर्वत्वं तत्तु प्रकृतिसंज्ञितम्। इति।

बुध्युपादानं विभक्तगुणसाम्यं वा गुणतत्त्वम्। प्रकाशप्रवृत्तिनियमनकारीणि सत्वरजस्तमांसिगुणः। एतेषां चैकतत्त्वता संभूय कार्यकारित्वेन, सुखदुःखमोहकार्यकारित्वेन तेषां सिद्धिरपि। तदुक्तं **श्रीमन्मृगेन्द्रे** –

ततो बुध्याद्युपादानं गौणं सत्वं रजस्तमः।
तद्वृत्तयः प्रकाशाद्याः प्रसिद्धा एव भूयसा।।
त्रयोगुणास्तथाऽप्येकं तत्त्वं तदपि योगतः।
एकैकश्रुतिरेतेषां वृत्त्याधिक्यनिबन्धनः।। इति।

अध्यवसायव्यापारासाक्षात्भोग्या वा बुद्धिः। चन्दनादयो हि बुद्धिवृत्त्यनुरञ्जकत्वेन परंपरया भोग्याः। बुद्धिस्तु तत्तद्विषयानुरक्ता सुखादिरूपा साक्षात्भोग्येति नासंभवः। तदुक्तं **सद्योज्योतिष्पादैः** – "बुद्धिर्विषयाकारा सुखादिरूपा समासतो भोग्य"मिति। अस्याश्चाष्टौ धर्मादयो भावाः। एते च स्वाश्रयीभूतां बुद्धिं भावयन्ति अनुमापयन्तीति भावपदव्यपदेश्याः। तदुक्तम् –

भावयन्ति यतो बुद्धिं तेन भावा इति स्मृताः। इति।

तत्र धर्मादयश्चत्वारस्सात्विकाः। रागो राजसः। अन्ये तामसः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

भावा बुद्धिगुणा धर्मज्ञानवैराग्यभूतयः।
सात्विका व्यत्ययेनैते रागमुत्सृज्य तामसा।। इति।

एवं सिद्धितुष्टशक्तिविपर्ययभेदेन चतुर्विधाः, प्रत्ययाऽपि बुद्धिधर्मा एव। तत्र सिद्धिरष्टविधा, तुष्टिर्नवविधा, अशक्तिरष्टाविंशतिविधा। विपर्ययः पञ्चविधः। आहत्य प्रत्ययाः पञ्चाशत्। **तदुक्तमीश्वरकृष्णेन** –

पञ्चविपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधासिद्धिः।। इति।

तत्र सिद्धय ऊहादयः। तदुक्तम् – "ऊहश्शब्दोऽध्ययनं दुःखविघातास्त्रयस्सुहृत्प्राप्तिः। दानाञ्च सिद्धयोऽष्टा"विति। प्रकृत्याद्यास्तुष्टयः। तदुक्तम् –

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्याविषयोपरमात्पञ्चनवतुष्टयोऽभिहिताः।। इति।

एकादशानामिन्द्रियाणां सिद्धितुष्टीनाञ्च व्यतिरेका अशक्तयः। तदुक्तम् –

एकादशेन्द्रियवधास्सहबुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदशधा च बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम्।। इति।

अविद्यास्मितारागद्वेषाभिनिवेशाविपर्ययाः। अस्याश्च बुद्धेरनन्यसाध्येनाध्यवसायेन सिद्धिः। बुध्यारभ्यमिन्द्रियारम्भकं वा तत्त्वमहंकारः। सचाहमाकाराध्यवसायेनानन्यसाध्येनानुमीयते। तथा प्राणादीनां चेष्टाहेतुस्संरम्भोऽपि तदनुमापकः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

अथ व्यक्तान्तरात् बुद्धेर्गर्वोऽभूत्करणञ्चितः।

व्यापारात्यस्य चेष्टन्ते शारीराः पञ्चवायवः।। इति।

अहंकारश्च सात्विकादिभेदेन त्रिविधः। सात्विकादयश्च यथाक्रमं तैजसवैकारिकभूतादिसंज्ञकाः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

अथ शेषार्थसिध्यर्थं स्कन्धानस्यात एव सः।
त्रीन्निश्चकर्षसत्वादिभूयिष्ठानीशशक्तिगः।।
तैजसो वैकृतो योऽन्यो भूतादिरिति संस्मृतः। इति।

**श्रीमत्पौष्करे**ऽप्युक्तम् –

स च त्रिविध उद्दिष्टः प्रथमस्तत्र तैजसः।
वैकारिको द्वितीयस्स्यात्तथा भूतादिकः परः।।
सत्वेनोत्कृष्टभागो यस्सतैजस इहोच्यते।
वैकृतो रजसोत्कृष्टो भूतादिस्तमसाऽधिकः।। इति।

सङ्कल्पविकल्पकधर्मकं रूपादिज्ञानक्रमप्रयोजकं क्रमिकचक्षुरादिसन्निधानयोगिवामनः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

देवप्रवर्तकं शीघ्रचारि सङ्कल्पधर्मि च मनः। इति।

तथा **श्रीमत्पौष्करे** –

यस्सङ्कल्पविकल्पात्मा प्रत्ययोऽन्तर्गतो नृणाम्।
स नाहंकारिको नापि बौद्धो व्यापारभेदतः।।
स तु मानस एवेष्टस्तन्त्रेऽस्मिन् मुक्तिसागरे।
चक्षुषाऽऽलोचितेह्यर्थे तदर्थं बुद्धिगोचरम्।।
विदधातीह यद्विप्रास्तन्मनः परिपठ्यतः। इति।

अनेन सन्देहात्मा विकल्पो विशेषणविशेष्यभावावगाही सविकल्पकात्मा सङ्कल्पश्च मनोमात्रसाध्यतया तत्र प्रमाणमित्यपि सूचितम्। तथा ज्ञानक्रमोऽपि तत्र प्रमाणम्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

आत्मेन्द्रियार्थनैकट्ये सर्वदेवा प्रवृत्तितः।
प्रवृत्तिकारकास्तित्वं युक्तितोऽप्यवसीयते।।
तत्त्वान्तरोक्तवृत्तिभ्यो वैलक्षण्याद्विलक्षणः।
सङ्कल्पो बीजमभ्येति मनस्तत्पारिशेष्यतः।।
ज्ञानं तदक्षयोगात्तत्क्रमयोगितया क्रमात्।
तथाऽप्याभाति युगपन्नाशु सञ्चरणादृतः।। इति।

एवं सङ्केतग्रहगोचरव्यतिरिक्ते तज्जातीये तच्छब्दोच्चारणहेतुभूतं ज्ञानमपि तत्र प्रमाणम्। तदुक्तम् –

किञ्च सास्नादिमत्पिण्डे गोशब्दमनुभूय यत्।
भूयस्तत्सदृशे दृष्टे तच्छब्दोच्चारहेतुकम्।।

तन्मनः कथ्यते तन्त्रे विकल्पप्रत्ययात्मकम्। इति।

एवञ्च धर्मिग्राहकमानेन तस्या विभुत्वमपि सिद्धम्। अतामसाहंकारप्रभवं तत्त्वमिन्द्रियम्। तच्च द्विविधं, बुद्धीन्द्रियकर्मेन्द्रियभेदात्। तत्र बुद्धीन्द्रियं सात्विकाहंकारप्रभवं, प्रकाशस्वभावत्वात्। तदपि द्विविधमान्तरं बाह्यञ्च। तत्रान्तरं मनः। बाह्यं श्रोत्रादिभावेन पञ्चविधम्। राजसाहंकारप्रभवं कर्मेन्द्रियम्। क्रियाजनकस्वभावत्वात्। तदपि वागादिभेदेन पञ्चविधम्। तामसाहंकारप्रभवं तन्मात्रं, प्रकाशादिराहित्यात्। तदपि शब्दतन्मात्रादिभेदेन पञ्चविधम्।

तदुक्तं **श्रीमत्पौष्करे** –

तैजसादप्यहंकारान्मनो बुद्धीन्द्रियाणि च।
पञ्चकर्मेन्द्रियाणि स्युरहंकारात्तु वैकृतात्।।
अहंकारात्तु भूतादेर्जाता तन्मात्रसंहतिः। इति।

तत्र शब्दस्पर्शरूपरसगन्धानां ग्राहकाणीन्द्रियाणि श्रोत्रादीनि। एतेषाञ्च तत्तत् ग्रहकरणत्वेन सिद्धिः। न चाधिष्ठानत्वाभिमतैः कर्णशष्कुल्यादिभिरर्थान्तरता। अधिष्ठानत्वाभिमतस्य सत्भावेऽपि क्वचिद्विषयस्याग्रहेण प्राप्यकारित्वानुरोधेन च तदतिरेकसिद्धेः। एतेषाञ्च भिन्नकार्यत्वानुरोधेन सिद्धिदशायामेव भेदेन सिद्धेर्नानात्वम्। एतानि च विषयप्रतिनियमाद्भौतिकानीति केचिदाहुः। तदयुक्तम्। चक्षुषः पृथ्वीगुणनीलग्राहकत्वस्यापि दर्शनेन विषयनियमासिद्धेः। तस्मादाहं-कारिकाण्येवैतानि। तदुक्तं **श्रीमत्पौष्करे** –

बुद्धीन्द्रियाणि कथ्यन्ते श्रोत्रं त्वक्चक्षुरेव च।
जिह्वाघ्राणञ्च पञ्चेति सुप्रसिद्धानि तानि तु।।
प्रत्यक्षविषयत्वेन तेषां सिद्धेर्न युक्तयः।
कथ्यन्ते तान्यहंकारादुपजातानि सात्विकात्।। इति।

वागादीन्द्रियाणामधिष्ठानातिरेकोऽधिष्ठानत्वाभिमतसद्भावेऽपि वचनादिक्रियाणामभावात्सिद्धः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

वागादीनां पदान्यत्वं पदे सत्यप्यतद्गुणात्। इति।

भूतारम्भकं तन्मात्रम्। तत्राकाशारम्भकं शब्दतन्मात्रम्। वाय्वारम्भकं स्पर्शतन्मात्रम्। एवं तेजः प्रभृत्यारम्भकं रूपादितन्मात्रमिति द्रष्टव्यम्। तदुक्तं **श्रीमत्पौष्करे** –

बाह्येन्द्रियपरिच्छेद्यगुणत्वात् भूतसंहतिः।
प्रत्यक्षत्वेऽस्मदादीनां स्थिता कारणपूर्विका।।
या तत्र कारणं विप्रास्सा तु तन्मात्रसंहतिः।
विशेषवत्त्वाच्छब्दादेस्ते च सामान्यपूर्वकाः।।
यत्तत्रापि च सामान्यं तत्तन्मात्रमितीरितम्।
एकद्वित्रिचतुः पञ्चगुणा तन्मात्रसंहतिः।।
अत एव हि भूतानामभियोगो गुणैः क्रमात्। इति।

बाह्येन्द्रियग्राह्यगुणयोगीनि भूतानि। तानि चाकाशादीनि पृथिव्यन्तानि। तत्र स्पर्शरहितं स्थूलशब्दोपादानमाकाशम्। तत्र स्पर्शरहितमित्यनेन वाय्वादीनां निरासः। स्थूलेत्यनेन कुण्डलिन्याः। अस्य च पृथिव्यादिसमवेतशब्दविलक्षणशब्दोपादानत्वेन सिद्धिः। शब्दस्पर्शयोरेवाधिकरणं वायुः। न च शब्दस्य श्रोत्रग्राह्यत्वेनन वायुगुणत्वमित्यसंभव इति वाच्यम्। शकशकादिध्वनेर्वायुनिष्ठत्वानुभवस्य बाधकाभावेनाबाधात्। अयञ्च त्वगिन्द्रियग्राह्योऽपि वायुं स्पृशामीत्यनुभवात् प्रत्यक्षस्पर्शयोगित्वेन प्रत्यक्षत्वानुमानाच्च। धृतिकंपादिलिङ्गैरप्यस्य सिद्धिर्द्रष्टव्या। अस्मिंश्च स्पर्शोऽनुष्णाशीतोऽपाकजश्च। रूपतन्मात्रारभ्यमुष्णस्पर्शाधिकरणं वा तेजः। अस्य च रूपं शुक्लभास्वरमेव। रसतन्मात्रारभ्यं शीतस्पर्शाधिकरणं वा जलम्। अस्य च रूपं शुक्लमेव, रसो मधुर एव। गन्धतन्मात्रारभ्य पृथिवी। अत्र च रूपं नीलपीतादिसर्वम्। रसोऽपि मधुरादिः। स्पर्शोऽनुष्णाशीतः पाकजश्च। तेषाञ्च भूतानामवकाशव्यूहपक्तिसंग्रहधारणा यथाक्रमं वृत्तयः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

व्योमप्रभञ्जनाग्न्यम्बुभूमयो भूतपञ्चकम्।
शब्दाद्येकोत्तरगुणमवकाशादिवृत्तिमत्।।
व्यूहोऽवकाशदानञ्च पक्तिसंग्रहधारणाः।
वायुव्योमहुताशांबुधरणीनाञ्च वृत्तयः।।
इति पञ्चसु शब्दोऽयं स्पर्शो भूतचतुष्टये।
अशीतोष्णौ महीवाय्वोश्शीतोष्णौ वारितेजसोः।।
भास्वदग्नौ जले शुक्लं क्षितौ शुक्लाद्यनेकधा।
रूपं त्रिषु रसोऽम्भस्सुमधुरष्षड्विधः क्षितौ।।
गन्धः क्षितावसुरभिस्सुरभिश्च मतो बुधैः। इति।

**श्रीमत्पौष्करेऽप्युक्तम्** –

महाभूतानि जायन्ते क्रमात्तन्मात्रपञ्चकात्।
आकाशं पवनस्तेजस्तोयं भूरिति संज्ञया।।
गमागमादिव्यापारो यस्मिन् सति नृणां भवेत्।
तद्धेतुभूतमाकाशमिष्यतां मुनिपुङ्गवाः।।
नोचेत्तदवकाशाख्यं विचरेयुः क्व जन्तवः।
न हि भूम्यन्तरादृष्टौ प्राणिनां तु गमागमौ।।
तस्मादाकाशमेष्टव्यमवकाशस्य कारणम्।
किञ्च तीव्रादयश्शब्दा गुण्यपेक्षा गुणतत्त्वतः।।
गुणी चाकाशमित्युक्तं तच्च नृणामतीन्द्रियम्।
वाय्वादीनां समुत्पत्तिः क्रमेणैवाभिधीयते।।
वायुरग्निस्तथा तोयं पृथ्वीत्येतच्चतुष्टयम्।
अनिलस्स्पर्शतन्मात्रादभवद्व्यूहनात्मकः।।
उत्क्षेपणादिव्यापारहेतुत्वेनोपकारकः।
दशधा वर्तमानोऽन्तश्शरीरे सर्वजन्तुषु।।

प्राणापानसमानादिव्यानोदानादिसंज्ञया।
अनलो रूपतन्मात्राज्जायते पंक्तिलक्षणः।।
स च त्रेधा स्थितो लोके गार्हपत्यादिसंज्ञया।
अतोऽन्य एव शैवाग्निस्ततो बिन्दूदरान्तरे।।
यद्यदश्नाति लोकोऽयं तदनेनैव पच्यते।
अतोऽयमनलोऽत्यन्तं प्राणिनामुपकारकः।।
अभवद्रसतन्मात्रात्तोयं संग्रहणक्रियम्।
तोयेनैव प्रतिष्ठाऽस्य स्थिता लोकस्य वस्तुतः।।
स्वतो धूळ्यात्मकत्वेन पृथ्वी चानेन वैदृढा।
पृथिवीगन्धतन्मात्रादभवद्धारणक्रिया।।
नाकाशाज्जायते वायुर्न वायोरग्निसंभवः।
नाग्नेरापस्ततः पृथ्वी धर्मातिशयदर्शनात्।।
कारणात्गुणसंक्रान्तिर्युक्ता कार्येषु न स्वतः।
व्योम्नः पञ्चगुणत्वं स्यात्तथा सृष्टिक्रमो यदि।।
तन्मात्रपञ्चकाज्जातं ततो व्योमादिपञ्चकम्। इति।

एतानि तत्त्वानि द्विविधानि स्थूलानि सूक्ष्माणि चेति। तत्र भुवनारम्भकानि स्थूलानि, प्रतिपुन्नियतानि सूक्ष्माणि। एतैश्च तत्त्वैरारब्धानि कार्याणि त्रिविधानि, साधारणान्यसाधारणान्युभयरूपाणि चेति। तत्र भुवनादीनि साधारणानि। असाधारणानि पुर्यष्टकानि शरीराणि। तदुक्तम् –

तन्मात्रपञ्चकाज्जातं प्रतिपुन्नियतः कलान्तोऽयम्।
पर्यटति कर्मवशतो भुवनजदेहेष्वयञ्च सर्वेषु।। इति।

अन्यत्राप्युक्तम् –

प्रयोक्त्र्यादिमहीप्रान्तमेतदण्वर्थसाधनम्।
प्रत्यात्मनियतं भोगभेदतोऽप्यवसीयतः।। इति।

उभयरूपाणि स्थूलशरीराणि। एतानि च संसृतिशब्देनोच्यन्ते। पुंशब्देन चाणुमात्रं सर्वमुच्यते। न तु पुरुषतत्त्वयोगिसकलाणुमात्रम्। अतद्योगिनोरपि प्रलयविज्ञानकेवलिनोर्भुवनादिश्रवणेन विशेषणस्य प्रयोजनाभावात्। तथा चाणुभोगार्थं तनुकरणभुवनादिकं करोति। नानर्थकं नापि स्वार्थकं करोतीति। अत्र पुंसामिति बहुवचननिर्देशेन तेषां बहुत्वं प्रतिपाद्यते। तेन तेषामेकत्ववादो निराकृतः। तथात्वे एकदैकस्य सुखानुभवोऽन्यस्य दुःखानुभव इति वैषम्यं, तेनानुभूतमर्मं स एवानुसन्धत्ते नान्य इत्यनुसन्धानव्यवस्था च न स्यादिति भावः। तदुक्तं **श्रीमत्पौष्करे** –

भोक्तुमिच्छा यदैकस्य गन्तुमिच्छा परस्य च।
तदैव तस्माच्चैतन्यं भिन्नरूपमिति स्थितम्।। इति।

तथाऽपि पुंसां कर्मानुसारतस्तां करोत्यननुसारतो वेति। विषयेत एवाहुः, कर्मानुसारत एव करोति, अन्यथा तस्य बहुप्रमाणसिद्धस्वातन्त्र्यव्याहतेश्चण्डादीनां महापातकिनामपि

शिवस्य स्वेच्छया पुण्यलोकप्रापकत्वश्रवणाच्चेति। तदपि तस्य वैषम्यनैर्घृण्यप्रसङ्गेन निराकरोति – **कर्मानुसारत इति**। कर्मानुसारः कर्मानतिक्रमः। न चोपकरणकर्मापेक्षायां तस्य स्वातन्त्र्यहानिः। कुलालस्य दण्डापेक्षाया इवोपकरणापेक्षायाः स्वातन्त्र्याविघातकत्वात्। अन्यथा तवापि मते तस्य स्वेच्छापेक्षाऽपि न स्यात्। चण्डेशादीनाञ्च ब्राह्मणपित्रादिहननं न महापातकं, विषयविशेषे अधिकारिविशेष एव च तस्य निषिद्धत्वे नान्यत्रानिषिद्धत्वात्। यथा जामदग्न्यस्य रामस्य मातृहननं यथा वा मद्यपस्य प्रायश्चित्तरूपमपरं मद्यपानमिति। तदुक्तं **सुप्रभेदे** –

छित्वा भित्वा च भूतानि हत्वा सर्वमिदं जगत्।
भजेदेकं विरूपाक्षं न स पापैः प्रलिप्यते।।

**सूतसंहितायां यज्ञवैभवखण्डे** तृतीयाध्याये –

ईश्वरार्थधिया पापान्यपि कर्माणि सुव्रताः।
भवन्ति पूतान्यत्यन्तं सत्यमेव न संशयः।।
आर्द्रं काष्ठं महानग्निश्शुष्कं कृत्वा दहेद्यथा।
तथेश्वरधिया पापं शुद्धविज्ञानदं भवेत्।। इति।

अथवा कारुणिकतया सर्वेषामपि सुखमेव सृजेदिति शङ्कानिरासायाह – **कर्मानुसारत इति**। तत्तत्कृते न धर्मादिना दुःखसर्जनमपि युज्यत इति भावः।

**।।द्वितीयसूत्रसंग्रहभाष्यं समाप्तम्।।**

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याक्रियते। पूर्वसूत्रे जगतः कर्ता शिवस्स एव परतत्त्वमिति स्थितम्। ननु सर्वथाऽपि जगतः कर्तृवदुपदानं करणञ्चावश्यं वाच्यम्। तद्यदि प्रधानादिकं स्यात्तथा तदपि परतत्त्वं भवेत्। किञ्च शिवस्य जगत्करणे प्रयोजनाभावात् बालसाम्यं न्यूनाधिकसुखादिप्रापकतया वैषम्यञ्च स्यादिति शङ्कां प्राधान्येन निराकुर्वन् अर्थाधारं भवादिनोऽपि निराकरोति – **अन्य इति**। तत्र स एव शिवो जगदुपादानम्।।

## शिवस्योपादानत्वसमर्थनम्

ननु तस्य न जगदुपादानत्वं, प्रमाणाभावात्। तथाहि – तत्र न तावत्प्रत्यक्षं प्रमाणं, व्यतिरेकाद्यभावात्। नापि तन्तुजन्यपटादिः स्वोपादानजडातिरिक्तोपादानकः कार्यत्वात्घटवदित्यनुमानं प्रमाणम्, अप्रयोजकत्वात्। एवं सर्वत्र प्रसिद्धकारणद्वयातिरिक्तकारणान्तरसाधनसंभवेन कारणानवस्थाप्रसङ्गाच्च। यदि चोभाभ्यामेव कार्यसिद्धेर्गौरीवादुभयातिरिक्तपदार्थसाधने विरोधाच्चोक्तानुमानासंभवस्तदा प्रकृतेऽप्येकेनैव कार्यसिद्धेर्गौरवं चिज्जडोपादानजन्यत्वे कार्यस्योभयस्वभावापत्त्या विरोधश्चेति तुल्यम्। ननु जगत्सत्तोपादानकं सदुपादानकं वा घटस्सन्पटसन्निति सत्तादात्म्येन प्रतीयमानत्वात्। यद्यत्तादात्म्येन प्रतीयते तत्तदुपादानकम्। यथा मृत्तादात्म्येन प्रतीयमानो घटो मृदुपादानक इत्यनुमानं प्रमाणम्।

तथाहि – अत्र घटस्सन्नित्यादिप्रतीतौ न तावत्स्वरूपसत्तादात्म्यं विषयः। घटो घट इतिवदभेदे सामानाधिकरण्याभावात्, स्वरूपस्याननुगतत्वेनानुगतसत्ताव्यवहारानापत्तेश्च। नापि सत्ताजातितादात्म्यं विषयः घटत्वादिकं सदिति जातौ तत्तादात्म्यव्यवहारानापत्तेः तत्र जातितादात्म्याभावात् घटे घटत्वादिजात्यादौ च सत्ताप्रतीतेर्वैलक्षण्याभावेन घटे सत्ताजातितादात्म्यं विषयः घटत्वादिजात्यादौ च सत्तैकार्थसमवायित्वं विषय इति विषयभेदकल्पनस्यानुभवविरुद्धत्वात् अप्रामाणिकत्वाच्च। किन्तु शिव तादात्म्यमेव। न च शिवस्य सत्तारूपत्वे सद्रूपत्वे वा प्रमाणाभावः। "शिवात्सत्यपरानन्दा"दित्यादिश्रुतिस्मृतीतिहासपुराणादौ अभिषिक्तेऽनुपपदराजशब्दवत् तत्रैवानुपपदसत्यादिशब्दप्रयोगात्। अतो न बाधार्थान्तरादिकमिति। तदुक्तं **श्रीकण्ठाचार्यैर्भाष्ये** श्रुत्यादिषु शिवे सच्छब्दप्रयोगोदाहरणपूर्वकं "सन् पटस्सन् घट इति सर्ववस्तुष्वनुवृत्त्या सर्वगतस्य ब्रह्मणस्सर्वोपादानत्वं सिध्यति। मृदुपरक्तं हि घटादिकं मृदुपादानमिष्यत" इति। मैवम् – घटस्सन्निति द्रव्यं घट इतिवत् सत्ताधेयत्वमनुभूयते। शिवश्च घटाद्याधार इति न तस्य तद्विषयत्वं किन्त्वाधेयजातिरूपाया इति तस्यास्तदुपादाधनत्वसाधने बाधार्थान्तरादिस्स्यात्। अत एव तस्य जातित्वसिद्धौ तदन्यथानुपपत्त्या जातिबाधकबलेन घटत्वादौ सत्ताप्रतीतेस्सत्तैकार्थसमवायित्वविषयत्वं कल्प्यते। तव मते गुणगुणिनोस्समसमयोत्पन्नत्वेन नीलो घट इति घटस्य नीलतादात्म्यानुभवेन च घटे नीलानुपादानके व्यभिचाराश्च खण्डाद्यनुपादानके गवि घटानुपादानिकायां मृदि तादात्म्येन प्रतीयमानत्वस्य सत्वेनानैकान्त्याच्च। तस्मान्नानुमानं प्रमाणम्। ननु तर्हि श्रुतिः प्रमाणम्। तथाहि **वायव्यसंहितायाम्** –

शक्तिः प्रथमसंभूता शान्त्यतीतपदोत्तरा।
ततो माया ततोऽव्यक्तं शिवाच्छक्तिमतः प्रभोः।।
शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्।
तेनैकेन च तद्व्याप्तं मृदा कुम्भादिकं यथा।। इति।

**ज्ञानतिलकेऽपि** –

येन सर्वमिदं व्याप्तं यस्मिन् सर्वं प्रतिष्ठितम्।
यस्मादुत्पद्यते सर्वं तमाहुः परमं पदम्।। इति।

**अचिन्त्यागमे** –

आनन्दो ब्रह्म एवैतत् जायतेऽस्माच्चराचरम्।

**सूतसंहितायाम्** –

शिवात्सत्यपरानन्दप्रकाशैक स्वलक्षणात्।
आविर्भूतमिदं सर्वं चेतनाचेतनात्मकम्।।

इत्यादिषु पञ्चमी श्रूयते। इयञ्च पञ्चम्यपादाने कारक एव, न "अन्यारा"दित्यादिनोपपदयोगे उपपदस्य तादृशस्यात्राश्रवणात्, उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयसत्वाच्च। तत्राप्यपादानसंज्ञा नात्र "ध्रुवमपायेऽपादान"मित्यनेन **सूत्रेण** संभवति। तस्य ह्ययमर्थः

– अपाये विभागक्रियायां साध्यमानायां धातुवाच्यायां यत्ध्रुवं विभागावधिभूतं तत्कारकमपादानसंज्ञं भवतीति। न च सर्गाद्यकाले शक्त्याद्यवनिपर्यन्तस्य जगतश्शिवाद्वि- भागस्संभवति, पूर्वं संयोगाद्यभावात्, जन्युत्पत्त्यादिक्रियायाः पतनवद्विभागसाध्यकत्वाभावाच्च। जगदुत्सिसृक्षतीत्यादिवदभिव्यक्त्याद्यपेक्षया यथा कथञ्चित् कुसृष्टिकल्पनस्य वक्ष्यमाणरीत्या मुख्ये संभवत्ययुक्तत्वाच्च। भीत्रादिसूत्रैरपादानसंज्ञा शङ्कैव नास्ति। भीत्रादेरप्रयोगात्। तथा च "जनिकर्तुः प्रकृति"रित्यनेनैवापादानसंज्ञाऽत्र वाच्या।

ततश्शान्तिपदं जज्ञ इत्यत्रापि जनिकर्तुरुपादानाद्विशेषविहितत्वाच्च। उक्तञ्च **शाङ्करभाष्ये** – "जनिकर्तुः प्रकृतिरितीयं पञ्चमी विशेषविहिते"ति। तस्य च सूत्रस्यायमर्थः – "जनिकर्तुर्जायमानस्य या प्रकृतिस्तदुपादान"मिति। प्रकृतिशब्दश्चोपादाने रूढः श्रुत्यादिषु तथा प्रसिद्धेः। उदाहृतञ्च तथा वृत्त्यादिषु "गोमयात्वृश्चिको जायते शृङ्गाच्छरो जायत" इति। तथा च पञ्चमीश्रुत्या तादृशस्य शिवस्योपादानत्वमिति। एवं शिवस्य बहुभवनसंकल्पोऽपि पुराणादौ श्रूयमाणः प्रमाणम्। तथाहि – सृष्ट्यर्थं हि तेन बहुभवनं सङ्कल्प्यते। तच्च न स्वतस्संभवति। तस्य नित्यत्वात्। तथा च कार्यापेक्षया तत्रापि स्वतादात्म्यापन्नकार्यापेक्षया। निमित्तकारणापेक्षया कार्यस्यात्यन्तभिन्नत्वेन स्वस्य बहुभवनासंभवात्। तस्मात् बहुभवनसंकल्पोऽपि तत्र प्रमाणमिति।।

## उपादानत्वाक्षेपः

नन्वीश्वरोऽन्तर्यामी श्रूयते, नियामकस्य च तस्य नियम्याश्शरीरेन्द्रियात्मादयो बहवो विचित्राश्च। तन्नियामकत्वञ्च तस्य तत्तदुचितशरीरपरिग्रहां तत्तदुचितोपाधिप्रवेशमन्यद्वा विना न संभवति। लोके घटाद्युपायेषु विचित्रेषु नियम्येषु नियामकवैचित्र्यदर्शनात्। तथा च तादृशाकारपरिग्रह एव तस्य बहुभवनन्नाम्। लोकेऽपि ह्यनुपादानस्यैव विचित्रकार्यकारकस्य मायाविनर्तकादीनामपि विचित्रवेषधारिणां बहुभवनव्यवहारो निरूढो दृश्यत इति चेन्न। बहुभवनसङ्कल्पस्य हि तेजोवन्नादिसृष्टौ वाक्यमर्यादया हेतुत्वं तत्र प्रतीयते। तत्सृष्टिहेतुत्वञ्चास्मदुक्तस्य कार्याकारेण बहुभवनसंकल्पस्यैव तत्सृष्टिसंकल्पपर्यवसितस्य। अन्वयव्यतिरेकाभ्यां घटादिसृष्टिसंकल्पस्य तद्धेतुत्वावधारणात्। भिन्नविषयस्य च त्वदुक्तशरीरपरिग्रहादिसंकल्पस्य जगत्सृष्ट्यादिहेतुत्वेन किञ्चित्प्रमाणम्। तस्मादुक्तबहुभवनसंकल्प एव बहुभवनसंकल्पश्रुतिपुराणाद्यर्थः। स च संकल्प ईश्वरकृतत्वादर्थव्याप्त इति बहुभवनसंकल्पश्श्रुतिपुराणादिषु श्रूयमाणः प्रमाणं तत्रेति। मैवम् – न तावत्पञ्चमीश्रुतिस्तत्र प्रमाणम्।

तथाहि – यद्यपि "जनिकर्तुः प्रकृति"रिति पञ्चमी श्रूयते। तथाऽपि व्याकरणस्य प्रयोगमूलत्वात् प्रयोगानुसारेण तद्व्याख्येयम्। प्रयोगश्च "गोमयात् वृश्चिको जायते शृङ्गाच्छर" इत्यादावपादानकारक इवानुपादानेऽपि हेतुमात्रे "पुत्रात्प्रमोदो जायत" इत्यादौ दृश्यते। उदाहृतञ्च तथा क्वचिद्वृत्तौ। तथा च तदनुसारेण प्रकृतिपदं हेतुमात्रपरं व्याख्यायते। हेतुत्वञ्चोभयसिद्धकर्तृत्वेऽपि पर्यवसितमिति न पञ्चमीश्रुतिरुपादानत्वे प्रमाणम्। नापि बहुभवनसंकल्पश्रुतिस्तत्र प्रमाणम्। उक्त नियन्तृशरीरपरिग्रहादिगोचरसंकल्पस्यैव तदर्थत्वात्। न च तस्य श्रुतिपुराणादिपरामर्शप्राप्तसृष्टिहेतुत्वानुपपत्तिः। नियम्य सृष्टिं विना

नियन्तृबहुभवनस्य निष्प्रयोजनत्वात्तदर्थं तत्करणस्यावश्यकत्वेन फलेच्छादिवत् परंपरया तस्यापि हेतुत्वात्। तस्मात्प्रमाणाभावान्न शिवस्य जगदुपादानत्वम्।।

## निर्विकारश्रुतिबाधः

निर्विकारश्रुतिबाधाच्च न तस्य तत्त्वम्। तथाहि – **सूतसंहितायां यज्ञवैभवखण्डे पञ्चदशाध्याये** –

श्रुतिस्सनातनी साध्वी सर्वमानोत्तमोत्तमा।
प्राह चाद्वैतनैर्मल्यनिर्विकारत्वमात्मनः।।

इति निर्विकारत्वं श्रूयते। तथा **सिद्धान्तागमे** –

परव्योम्नि शिखान्तस्थो निष्कळः परमश्शिवः। इति।

**सोमशम्भावपि** –

सर्वज्ञं सर्वकर्तारं बोधानन्दमयं विभुम्।
निष्कळं स्वप्रकाशाञ्च सञ्चिन्त्य परमं शिवम्।। इति।

तथा **मोहशूरोत्तरेऽपि** –

शिवं पूर्ववदावाह्य बोधानन्दघनावृतम्। इति।

उपादानत्वञ्च विकारवत्कारणत्वमतो भवति बाधः। ननु नास्ति निर्विकारश्रुतिबाधः। तथाहि –

या तु कुण्डलिनी शम्भोर्नित्याधिष्ठेयरूपिणी।
भोग्यभोक्तृत्वसंपत्त्यै या शरीरेन्द्रियादिकम्।।
उत्पादयति सा माया खचिता कर्मभिर्नृणाम्।

इति **पौष्करे**। अन्यत्र च – "उपादानं सबिन्दुराडि"ति मायाया अप्युपादानत्वं श्रूयते। एवं श्रुतीतिहासपुराणादिष्वपि। तथा च शिवश्च माया चोभयमप्युपादानं श्रूयते। तत्र च न विकल्पस्संभवतीत्युक्तमिति समुच्चयो वाच्यः। तत्र पक्षचतुष्टयमुभयोरपि पृथग्वाक्ये स्वातन्त्र्येणान्याविशेषणतयोपादानत्वश्रवणाद्रज्जौ सूत्रद्वयवत्स्वातन्त्र्यणैवोपादानत्वमित्येकः पक्षः। अपरस्तु क्वचित्स्वातन्त्र्यश्रवणेऽप्यन्यत्र मायाया अस्वातन्त्र्यवाचकशक्तिपदप्रयोगाच्छिवाच्छक्तिमतः प्रभोरिति शक्तिरूपाविद्यायास्साक्षात् विशेषणत्वश्रवणाच्च मायाशक्तिमतश्शिवस्योपादानत्वे स्थिते तत्रारुणान्यायेन विशेषणत्वस्यौत्सर्गिकत्वेन मायायाऽपि विशेषणत्वेन मायाविशिष्टश्शिव उपादानमिति। अपरस्तु जडकार्यस्वभावानुसारेणाविद्यापरिणामितया उपादानं, शिवस्तु तत्तादात्म्यात्। अंशुः पटो जात इति व्यवहारेण पटं प्रत्यंशुरिव तन्तुतादात्म्येन तदधिष्ठानत्वेनोपादानमिति। इतरस्सत्वारोपितस्य प्रपञ्चस्याधिष्ठानाकाङ्क्षायां शिवस्य तद्योग्यस्याधिष्ठानत्वे उक्तश्रुत्यादिभिः प्रतिपादितेऽविद्याया अधिष्ठानत्वानर्हाया उपादानेऽप्यनाकाङ्क्षताया उपादानत्वश्रुतिरधिष्ठानतावच्छेदकमात्रपरेति मायाशक्त्यवच्छिन्नश्शिवोऽधिष्ठानतया कार्यतादात्म्यादुपादानमिति।

तत्राद्ये पक्षे प्रपञ्चस्योभयत्र व्यासज्यावस्थितत्वेन द्वित्वाश्रय एवैकस्मिन् घटेऽयं घटो द्वौ नेति पर्यवसितद्वित्वनिषेधवदग्नीषोमीय देवताके यागे देवतात्वयोगिन्यप्यग्नौ तन्निषेधवन्निर्विकारश्रुतिः पर्यवसितविकारनिषेधिका। द्वितीयेऽपि पक्षे प्रपञ्चस्य विशिष्टवृत्तित्वेनारुणा गौः क्रयसाधनं न केवलेति उत्तेजकाऽभावविशिष्टप्रतिबन्धकाभावः कारणं न केवल इत्यादिविशिष्टवृत्तिसाध-नत्वस्य केवले निषेधवत्केवलशिवे तन्निषेधपरा तच्छ्रुतिः। तृतीयपक्षेऽपि अंशुर्न साक्षात् पटोपादानमितिवत् नात्मा कुमारो युवावेतिवद्वा साक्षाद्विकारतादात्म्यनिषेधपरा तच्छ्रुतिः। चरमस्तु बहुदोषदुष्टत्वादस्माभिरपि नाङ्गीक्रियत एव। ततो निर्विकारश्रुत्योपादानत्वाबाध इति। तत्र न तावदाद्यः परिहारस्संभवति। उक्तरीत्या विकारस्य शिवमायोभयवृत्तित्वेऽपि तस्य व्यासज्यवृत्तित्वे प्रमाणाभावात्। नह्युभयवृत्तित्वमात्रेण व्यासज्यवृत्तित्वं, गोत्वादेरपि व्यासज्यवृत्तित्वापत्तेः। किन्त्वेकस्मिन्नपर्यवसितप्रतीतिकत्वेन। न च विकारस्य तथात्वम्। एकस्मिन्नपि तन्तौ पटतादात्म्यग्रहणात्। नापि विकारपदस्य पर्यवसितावस्थापन्नार्थवाचित्वे किञ्चित्प्रमाणम्। तथा च यथाऽनेकाश्रयस्यापि घटत्वस्यैकस्मिन् घटे न निषेधः, यथा वा द्वित्वस्य व्यासज्यवृत्तित्वे तदवस्थावाचकद्विशब्दोपरक्ततयैकस्मिन् घटे द्वित्वाश्रये तन्निषेधेऽपि द्वित्वाधारत्वं नास्तीत्यनवस्थावाचिशब्दान्तरेण न निषेधः, एवमत्रापि ब्रह्मणि विकारतादात्म्यसत्वे न विकार निषेधो न संभवति। तथा द्वितीयेपि बाधपरिहारो न संभवति। तत्र कैवल्यावच्छेदेन निषेधाश्रवणात्।

किञ्च विशिष्टस्य केवलादन्यत्वे ब्रह्मणोऽनुपादानत्वप्रसङ्गः, तदनन्यत्वे ब्रह्मणो विकारित्वात् कथं तन्निषेधो युक्तः। अरुणा गौः क्रयसाधनं न केवलेत्याद्युक्तोदाहरणेषु तु केवलपदप्रयोगात् केवलाभावस्य विशिष्टाभावादन्यत्वाच्च न तदुदाहरणम्। तृतीयेऽपि बाधपरिहारो न संभवति। तत्र पक्षे ब्रह्मणसाक्षात्कार्यतादात्म्याभावेन तदुपादानत्वस्य पारिभाषिकमात्रत्वात्, साक्षात्कार्यतादात्म्यवत्येवोपादानशब्दप्रयोगात्, पञ्चम्या अन्यथासिद्धत्वेनोक्तकु-सृष्ट्यादिकल्पने बीजाभावाच्च। तस्मान्निर्विकारश्रुतिबाधितं शिवस्य जगदुपादानत्वम्॥

## अनुमानबाधः

अनुमानबाधितञ्च तस्य तत्त्वम्। तथाहि – शिवो न द्रव्योपादानं निस्पर्शत्वाद्रूपादिवत्। नचाप्रयोजकत्वं, स्पर्शवत्वस्य द्रव्यसमवायिकारणतावच्छेदकतया तयोः प्रयोज्य प्रयोजकत्वेन तदभावयोस्सुतरां धूमाभाववह्न्यभावयोरिव व्याप्यव्यापकभावात्। द्रव्यसमवायिकारणतायां हि स्पर्शवत्त्वमवच्छेदकम्। स्पर्शस्य द्रव्यसमवायिकारणातायामप्रयोजकत्वे कार्ये द्रव्ये नियमेन स्पर्शोपलम्भो न स्यात्। कारणगतविशेषगुणस्यैव कार्ये सजातीयगुणारम्भकत्वनियमात्। नचेष्टापत्तिः। श्रुत्या कार्यद्रव्यत्वेन बोधित आकाशे स्पर्शानुपलम्भादिति वाच्यम्। अवश्यकल्प्ये संभवति द्रव्यसमवायिकारणतावच्छेदकत्वे अन्यस्यावच्छेदकत्वासम्भवेनोक्तस्पर्शवत्वस्यैवावच्छेदकत्वे क्लृप्ते तदनुसारेणाकाशोत्पत्तिश्रुतेस्तदधीनत्वमात्रपरत्वकल्पनेनाकाशस्याकार्यत्वादिति। तथा जगन्नचेतनोपादानकमचेतनस्वभावत्वात्, यद्यत्स्वभावकं न भवति, तत्तदुपादानकं न भवति, यथा वायुस्वभावरहितो घटादिर्न वायूपादानक इति। नचाप्रयोजकत्वम्। उपादेयस्योपादानसमानस्वभावत्वनियमात्। नहि पृथिव्या जलाद्युपादनात्वं दृश्यते, नहि

तेजस्तिमिरोपादानमिति। अपसिद्धान्ताच्च। नहि **शैवागमे** क्वचिच्छिवस्योपादानत्वं श्रूयते। प्रत्युत –

> निमित्तमीश्वराख्यं तददृष्टं सहकारणम्।
> उपादानन्तु यत्सूक्ष्मं सर्वकार्येषु संस्थितम्।।

अन्यत्र –

> निमित्तमीश्वराख्यं स्यात् उपादानन्तु बिन्दुराट्।

इत्यादिना निमित्तोपादानयोर्भेदः प्रतीयते। तस्मान्न शिवस्योपादानत्वमिति। किन्तर्हि जगदुपादानमिति।।

## निरुपादानत्वपक्षः

न किमपीति केचित्। तथाहि – योगीश्वरादिसृष्टौ मन्त्रादिवशेन युद्धादावस्त्रविशेषादि-सृष्ट्वार्थक्रियाकारिण्यामपि न लोकप्रसिद्धोपादानकारणानि दृश्यन्ते। तथा च तत्र यथा कार्यविशेषे क्लृप्तोपादानविशेषं विनाऽपि तत्कार्यं जायत एवं कार्यसामान्ये क्लृप्तोपादानं विनऽपि जगद्रूपं कार्यं भविष्यति। ननु योगिसृष्टानां घटपटादीनां प्रसिद्धघटपटाद्यपेक्षया स्वर्णघटादिवद्वैजात्यमेव। तथा च तत्र मृत्तन्त्वादीनां कारणत्वाकल्पनात् क्लृप्तसामान्यकारणमायादेरेव तत्भविष्यतीति चेन्न। तत्र वै जात्यकल्पने प्रमाणाभवात्। भावे वा क्लृप्तोपादानककार्यापेक्षया विजातीयकार्यमेव योगिसृष्टघटादिकमित्यपि वक्तुं शक्यत्वान्न सामान्यकारणमप्यविद्यादिकं तत्रोपादानमित्यनुपादानकमेव तत्। एवं जगदपि परमयोगिशिवसृष्टत्वादनुपादानकमेव। तदुक्तम् –

> चिदात्मैव हि देवोऽन्तस्थितमिच्छावशात्बहिः।
> योगीव निरुपादानमर्थजातं प्रकाशयेत्।। इति।
> अनुपादाय संभारमभित्तावेव तन्वते।
> जगच्चित्रं नमस्तस्मै कालश्लाघ्याय शम्भवे।। इति च।

तस्मान्न जगदुपादानं किञ्चिदित्येके।।

## शून्योपादानकत्वम्

अन्ये तु शून्यमेवोपादानं वदन्ति। तथाहि – जागराद्यसन्तानातिरिक्तस्सन्तानश्शून्योपादानकः सन्तानत्वाज्जागराद्यसन्तानवत्। न च दृष्टान्तासिद्धिः, क्रमयौगपद्याभ्यामर्थक्रियाकारित्वानुपपत्त्या सर्वस्यापि क्षणिकत्वे सिद्धे सुषुप्तिकाले अर्थक्रियाभावे आलयविज्ञानसन्तानाभावेन शून्यस्यैव जागराद्यसन्तानोपादानत्वादिति।।

## परमाणूपादानकत्वम्

अपरे पुनः परमाणव एव जगदुपादानमित्याहुः। तथाहि – यदिदं जालसूर्यमरीचिस्थं

सूक्ष्मं त्रसरेण्वादि तत्स्वन्यूनपरिमाणद्रव्यारब्धं कार्यद्रव्यत्वात्। तच्चोपादानद्रव्यं नैकम्। एकस्यानारम्भकत्वात्। नह्येकस्मात्तन्तोः पटोत्पत्तिर्दृश्यते। नापि द्वयं, कार्ये त्रसरेणौ महत्वानुपपत्तेः। कार्ये हि महत्त्वं कारणगतमहत्वात् कारणगतबहुत्वाद्वा भवति। नचात्र कारणे महत्त्वं संभवति। तस्यापि महत्त्वे महद्द्रव्यस्यकार्यद्रव्यारभ्यत्वनियमेन तदारम्भकस्यापि कार्यद्रव्यत्वनियमेन कारणानवस्था प्रसङ्गात्। तथा च महतस्त्रसरेणोरारम्भकद्रव्यमण्वनेकञ्च। तच्च कार्यमेव महद्द्रव्यारम्भकस्य कार्यत्वनियमात्। तथा च त्रसरेण्वारम्भकाणि द्रव्याण्यणून्यनेकानि कार्याणि सिद्धानि। तानि च द्रव्याणि स्वन्यूनपरिमाणारब्धानि कार्यद्रव्यत्वात् घटवत्। तानि च तदारम्भकद्रव्याणि नित्यानि कार्यत्वेऽनवस्था प्रसङ्गात्। तानि च प्रत्येकं द्वयं द्वयं संभूय द्वयणुकमारभन्ते। एकस्यानारम्भकत्वात्, त्रयारभ्यत्वे कार्ये महत्त्वापाताच्च। तथा च परमाणवो जगदुपादानं तत्संयोगोऽसमवायिकारणं, कालकर्मेश्वरादयो निमित्तकारणमिति।।

## प्रधानादिवादः

इतरे तु त्रिगुणात्मिका प्रकृतिरेव परमोपादानकारणमिति। केवलमायैवोपादानमित्येकदेशिनः। तस्माच्छिवोनोपादानमिति। अत्रोच्यते – उक्त श्रुत्यादिषु श्रुता पञ्चमीश्रुतिरस्योपादानत्वे प्रमाणम्।।

## प्रकृतिपञ्चम्योपादानत्वसमर्थनम्

सा हि पञ्चम्युपादानत्व एव शक्ता। न हेतुत्वमात्रे। जनिकर्तुः प्रकृतिरित्युपादानत्वरूढप्रकृतिशब्दोपादानेनात्रापादानसंज्ञया पञ्चमी विधानात्। भाष्यकारेणापि गोमयाद्वृश्चिको जायत इति तथैवोदाहृतत्वाच्च। **कैयटश्च भाष्यकारेण** लौकिकदृष्ट्योपादानादपायं कार्यस्याङ्गीकृत्य प्रत्याख्यातेऽस्मिन् सूत्रे शास्त्रदृष्ट्या तस्यारम्भं समर्थयितुं प्रकृतिशब्दस्याविवादमुपादानार्थकत्वं प्रकृते सिद्धवत्कृत्यैवोपादानापेक्षया कार्यस्य विभागे विवादं दर्शयति – "लोके हि यद्यस्माज्जायते तत्तस्मान्निर्गच्छतीत्युच्यते। तर्काद्याश्रयास्तु प्रक्रिया भिद्यन्ते। वैशेषिकदर्शने परमाण्वादिसमवेतं कारणेभ्योऽपृथग्देशं कार्यमुत्पद्यत इति नास्ति कार्यस्यापक्रमः। साङ्ख्यदर्शने चाविर्भावतिरोभावलक्षणजन्मनाशादिरूपपरिणामाभ्युपगमात् नास्ति कार्यस्यापक्रम" इत्यनेन। **काशिकायां वृत्तिकारो**ऽप्युपादानमेवोदाहृतवान्। लोके व्यवहारोऽपि तथैव। नहि भाष्यादिषु क्वचिदन्यत्र वात्राव्याप्तिशङ्का वा तत्परिहारो वा कृतोऽस्ति। तस्मात्सूत्रभाष्य तद्विवरणवृत्तिलोकव्यवहारानुरोधेनोपादानत्व एवैषा पञ्चमीशक्तायत्तूक्तं क्वचिद्वृत्त्यन्तरे "पुत्रात् प्रमोदो जायत" इत्युदाहरणानुरोधेन प्रकृतिशब्दस्य हेतुमात्रपरत्वं व्याख्यायत इति तदसत्। तादृश वृत्तौ प्रमाणाभावात्। भावे वा तस्या भाष्यादिभिर्विरोधेन हेयत्वात्। यदि च पुत्रात् प्रमोदो जायत इत्याकरस्थः प्रयोगस्तदा हेतावुपादानत्वारोपेण गौण्या वा लक्षणान्तरेण वा स समर्थनीयः। यदि च शीर्त्वा मृत्वापि हेत्वर्थकत्वं न त्यजसि तदाऽपि चेतनाचेतनसामान्यवाचि सच्छब्दस्य विशेषपर्यवसानापेक्षायां यथेक्षितृत्वश्रवणाच्चेतने कर्तरि पर्यवसानमुक्तमीक्षत्यधिकरणे।

## एकविज्ञानेन सर्वविज्ञानादिनोपादानत्वम्

तथैकविज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्ताभिध्योपदेशसामानाधिकरण्यनिर्देश तत्रावस्थितिलय-योनिशब्दैर्विशेष उपादाने पर्यवसानं भवतु। तथाहि **सूतसंहितादौ** – "सृष्ट्यर्थमैक्षत प्राज्ञा" इति तस्येक्षितृत्वं श्रूयते। तदनुसारेण सत्कारणत्वश्रुतेर्विशेषे चेतने पर्यवसानम्। तथा पञ्चमीश्रुतेर्हेतुसामान्यवाचिकाया अप्युक्तेर्हेतुभिरुपादाने पर्यवसानम्। तथाहि **सूतसंहितायां यज्ञवैभवखण्डे** पञ्चदशाध्याये –

> यस्मिन् सुविदिते सर्वं विज्ञानं स्यादिदं सुराः।
> तदात्मकत्वात्सर्वस्य नास्त्येव हि भिदास्वतः।।

पञ्चमे –

> यस्य श्रवणमात्रेण श्रुतमेवाश्रुतं भवेत्।
> अमतञ्च मम ज्ञातमविज्ञातञ्च सत्तमाः।।

इति शिवज्ञानेन सर्वकार्यविज्ञानं श्रूयते। तच्च सर्वात्मनाऽभेदे वा तादात्म्येनाभेदे वा। नत्वत्यन्तभेदे। घटज्ञानेन पटज्ञानादर्शनात्। चिज्जडयोश्चात्यन्तिकाभेदो न संभवतीति। तादात्म्येनाभेदो वाच्यः। तदेव चोपादानत्वमित्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुसारेणोपादानत्वविशेषे तस्याः पर्यवसानम्। ननु राज्ञः प्राधान्यात्तस्मिन् ज्ञाते सर्वेषाममात्यादीनां ज्ञानफलं सम्मानादि भवतीति प्राधान्यख्यापनार्थं वा तज्ज्ञानस्य सर्वज्ञानफलकत्वख्यापनार्थं वा यथा लोके राज्ञि ज्ञाते सर्वेऽमात्यादयो ज्ञाता भवन्तीत्युच्यते, एवं प्रकृतेऽपि शिवस्य प्राधान्यख्यापनार्थं वा तज्ज्ञानस्य सर्वज्ञानफलकत्वख्यापनार्थं चैकविज्ञानेन सर्वज्ञानप्रतिज्ञेति। किञ्च तवापि कथं शिवज्ञानेन सर्वं मायादिज्ञातं, तेषां तदकार्यत्वेन तत्तादात्म्ये प्रमाणाभावात्। वक्ष्यमाणरीत्याऽणुमाययोश्शिवतादात्म्येऽप्याणवमलादावगतेः। तथा च त्वयाऽपि प्राधान्यपरमेव वक्तव्यं तद्वचनमिति। मैवम्। तथात्वे अत्यन्तपरोक्षार्थतापत्तेः। नचास्मन्मते मलादावगतिः। सर्वविज्ञानप्रतिज्ञावाक्ये इदं शब्दानुसारेण सर्वशब्दस्य जगद्रूपकार्याकार्यकात्स्न्र्यपरत्वात्। अपि चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यस्य प्राधान्यमात्रपरत्वे तत्प्रतिपादनाय मृल्लोहादिदृष्टान्तोऽप्युपादानो पादेयविषयो नाञ्जसस्स्यात्।

यथा **सूतसंहितायाम्** –

> एकेनैव तु पिण्डेन मृत्तिकाया यथा सुराः।
> विज्ञातं मृण्मयं सर्वं मृदभिन्नत्वतस्सुराः।।
> एकेन लोहमणिना सर्वं लोहादयो यथा।
> विज्ञातस्स्युरथैकेन नखानां कृन्तनेन च।।
> सर्वं कार्ष्णाय संज्ञातं तदभिन्नत्वतस्सुराः। इति।

तथा बहुभवनसंकल्पानुरोधेनापि तस्योपादाने पर्यवसानम्।

यथा **सूतसंहितायाम्** –

> सृष्ट्यर्थमैक्षतप्राज्ञा बहुस्यामिति शक्तिमत्। इति।

उक्तशरीरपरिग्रहादिसंकल्पस्य च न वाक्यमर्यादादिप्राप्यं जगत्सृष्ट्यादिहेतुत्वम्।

विचित्रशक्तिमतश्शिवस्य नियमनार्थं शरीरपरिग्रहादेरनावश्यकतयोक्त संकल्पस्य सृष्टिहेतुत्वे प्रमाणाभावात्। उत्तरत्र शरीरपरिग्रहस्य निरस्यत्वाच्च। तथा **देवीकालोत्तरे** –

भूतानि चाहं स्थिरजङ्गमानि
यावन्ति चान्यान्यहमेव तानि।

इति सामानाधिकरण्यनिर्देशो दृश्यते। न हि निमित्तकारणेऽत्यन्तभिन्ने कार्येण सामानाधिकरण्यनिर्देशो युज्यते। तथा **ज्ञानतिलके** –

येन सर्वमिदं व्याप्तं यस्मिन्सर्वं प्रतिष्ठितम्।

इत्यादौ शिवे जगतोऽवस्थानलयौ श्रूयते। न च निमित्तकारणे तौ दृष्टौ। तथा **सूतसंहितायां यज्ञवैभवखण्डे** उत्तरभागे **पञ्चदशाध्याये** –

नित्यं तथा सर्वगतं सुसूक्ष्मञ्च तदव्ययम्।
यत्भूतयोनिं धीमन्तः परिपश्यन्ति चात्मना।।

इति शिवे भूतयोनिशब्दः श्रूयते। योनिशब्दश्चोपादाने प्रचुरप्रयोगविषयः। तथा च सामानाधिकरण्यनिर्देशादिभिरपि पञ्चम्या विशेषे पर्यवसानम्। तस्मात्पञ्चम्या उपादानत्वशक्ततया वा हेतुत्वमात्रशक्तत्वेऽप्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञानादिभिर्विशेषे पर्यवसानाद्वा शिवस्य जगदुपादानत्वं स्थितमिति।।

## निर्विकारश्रुतिबाधपरिहारः

नापि निर्विकारश्रुतिबाधः। तथाहि – उपादानत्वं शिवस्योक्ततात्पर्यलिङ्गानुगृहीत-स्मृत्यागमादिबहुप्रमाणसिद्धं न सर्वात्मना बाधयितुं शक्यम्। नापि निर्विकारत्वम्। तस्यापि तादृश बहुप्रमाणसिद्धत्वात्। तथा चानयोः प्रमाणयोः विषयभेदो वक्तव्यः। तत्रोपादानतावेदकप्रमाणस्य साक्षादुपादानीभूतमायाधारतयांऽशुवत्पटे शिवस्य जगदुपादानीभूतमायाधारत्वरूपपरंपरोपादानत्वविषयत्वं कल्प्यते। निर्विकारप्रमाणस्य च साक्षाद्विकाराभावविषयत्वं कल्प्यते। न च वैपरीत्यकल्पना युक्ता। निर्विकारवाक्यस्य निषेधवाक्यतया स्वतो बलवत्वेन पारंपर्या सहत्वादप्रसक्तत्वाच्च पारंपर्यस्य। निषेध-वाक्यश्रवणात् पूर्वमुपादानवाक्यस्य स्वतस्साक्षादुपादानत्व एव प्रवृत्तेः। मानान्तरस्य चालौकिके शिवोपादनत्वे शङ्कानुदयात्। न च शिवस्य मायाधारत्वे प्रमाणाभावः निर्विकारश्रुत्यनुसारेण पूर्वोक्तपञ्चमीश्रुतेरेव तत्र प्रमाणत्वादिति। यत्तूक्तमत्र पक्षे उपादानत्वस्य पारिभाषिकत्वापत्तिरिति, तदपि न। पारिभाषिकत्वं हि यदि साक्षादनुपादानत्वं तदिष्यत एवागत्या। यद्यनुपादानत्ववादिमतादवैषम्यं तन्नास्त्येव। विद्यत एवात्र पक्षे वैषम्यमुपादानाधारत्वम्। न हि तेऽप्युपादानीभूतमायाधारत्वं शिवस्याभ्युपगच्छन्ति। तेषां तत्र प्रमाणाभावात्। यदि तेऽप्यागमेषु शिवस्य मायाधिष्ठातृत्वश्रवणमात्रेण तदभ्युपगच्छन्ति तर्हीदानीमस्माभिरुपादानत्वश्रुत्यनुसारेण तादात्म्यमपि शिवे मायायाः कल्प्यत इति पुनरप्यस्त्येव तन्मताद्वैषम्यम्। अस्मिंश्च पक्षे समवेताज्ञावैषम्यं मायाया जडाजडरूपस्वरूपकृतमेव, न तु समवेतत्वासमवेत्वरूपसंबन्धकृतमिति ध्येयम्।

यद्वा – शिवस्य साक्षादुपादानत्वमेव बोध्यते। निर्विकारश्रुत्या च परिणाम-रूपविकारविशेषो निषिध्यते। तथाहि – लोके आरम्भपरिणामसमूहवृत्तिभेदे न विकारश्चतुर्विधस्संभाव्यते। यथा अनेकतन्त्वारब्धः पटः, लोमसमूहश्चामरादि, दुग्ध-परिणामो दधि, संवेष्टित पटवृत्तिः पटकुटी। तत्र आद्यावनेककारणाधीनत्वादेकस्मिन् शिवं न संभाव्येते। तत्रान्त्ययोर्मध्ये परिणाम एव निषिध्यते। परिणामो हि द्विविधो मतभेदेन। पर्वरूपपरित्यागेन रूपान्तरापत्तिः, सत्येव पूर्वरूपे उपादानगताशेषविशेषगुण सजातीयगुण-करूपान्तरापत्तिर्वा। उभयथाऽपि तस्यैव शिवस्वरूपस्य नाशप्रसङ्गेनेष्टविघातकत्वात्, घटादिकार्ये चौतन्यप्रसङ्गे नानिष्टापादकत्वाच्च तन्निषेधस्य सफलत्वात्। सन् घट इति सद्रूपस्य शिवस्येदानीमुपलम्भात्। पूर्वरूपपरित्यागरूपविशेषणाभावेन तन्निषेधसंभवाच्च। वृत्तिस्तु स्वानुस्यूतोपादानस्यावस्थान्तरादिवैशिष्ट्यम्। सा च नेष्टविघातिका येन तन्निषेधस्य साफल्यं स्यात्। न वा तन्निषेधस्संभवति। घटादिषु सद्रूपस्य शिवस्येदानीमनुस्यूतत्वेन विशेषणनिषेधासम्भवात्, विशेष्यस्य विद्यमानत्वाच्च। घटादिषु प्रतीयमानं सद्रूपं यथा शिव एव तथाऽग्रे वक्ष्यते। यथा च वृत्तिः परिणामाद्यपेक्षया प्रकारान्तरं तथोत्तरत्र वक्ष्यते। अतो न वृत्तिनिषेधः। तस्मान्न निर्विकारस्मृत्यागमादिबाधश्शिवोपादानत्वस्येति॥

## अनुमानबाधोद्धारः

यदुक्तं कार्यस्योपादानस्वभावत्वनियमाच्छिवस्य जगदुपादानबाधितं शिवस्य जगदुपादानत्वमिति, तदप्यसत्। कार्यस्योपादानस्वभावत्वं यदि तद्गतधर्मवत्वं तदिष्यत एव। शिवधर्मस्य पदार्थत्वादेर्घटादिष्वप्यङ्गीकारात्। यदि तद्गत यावद्धर्मवत्वन्तर्हि न तन्नियमः कार्येषु। द्रव्योपादानके गुणे द्रव्यत्वस्याभावेन व्यभिचारात्। दुग्धोपादानके दध्नि शृङ्गोपादानके शरे गोमयोपादानके वृश्चिके च दुग्धत्वशृङ्गत्वगोमयत्वादीनामुपादानगतानामभावे न तेषु व्यभिचाराच्च। यद्युपादानगताशेषविशेषगुणसजातीयगुणवत्त्वमेव तत्तदासत्यं अयं नियमोऽस्त्येव। किन्तु स परिणामाभिधेयकार्यविषय एव न वृत्तिविषयेऽपीति कल्प्यते। यद्यस्योपादानस्य परिणामाभिधेयकार्यद्रव्यं तत्तत्समानस्वभावमिति। यदि परिणामकार्यद्रव्यत्वापेक्षया कार्यद्रव्यत्वस्य लघुत्वाद्यत् यस्योपादानस्य कार्यद्रव्यं तत्तत्समानस्वभावमिति नियमः कल्प्येत, तर्हि ततोऽपि लाघवादुपादानत्वं द्रव्यत्वञ्च त्यज्यताम्। तथा च यस्य कारणस्य यत्कार्यं तत्तत्समानस्वभावमिति नियमे दण्डादृष्टादेर्घटादिकारणत्वं घटादेस्स्वगुण-कारणत्वञ्च न स्यात्। यदि च स्वतन्त्रान्वयव्यतिरेकप्रत्यक्षादिसिद्धत्वात्तयोस्तत्त्वस्य तदनुरोधेन प्रामाणिकत्वादुपादानत्वादिविशेषणगौरवन्न दोषायेति, तदा शिवस्यापि जगदुपादानत्वस्योक्तप्रतिज्ञाद्यनुगृहीतप्रकृतिपञ्चम्यन्तस्मृत्यागमादिसिद्धत्वात्तदनुरोधेन प्रामाणिकत्वात् गौरवस्यादोषत्वेन परिणामविशेषणमिति तुल्यम्। तस्मात् यस्योपादानस्य यत्परिणामकार्यद्रव्यं तत्तादृशपरिणाम्युपादानस्वभावमिति परिणामविषय एवायं नियमः।

ईश्वरापेक्षया जगद्वृत्तिरूपमेव न परिणामरूपम्। यथा च कार्यद्रव्यस्य परिणामत्वमेवेति न नियमः तथाऽग्रे वक्ष्यते। एतेन यदप्यपरं बाधकमुक्तं शिवो न द्रव्योपादानं निस्पर्शत्वादिति तदप्यपास्तम्। शिवस्यान्येषाञ्चाकाशादीनां द्रव्योपादानत्वस्यानन्यथा सिद्धोक्तबहुप्रमाण-

सिद्धत्वेन तत्बाधे स्पर्शवत्वस्य द्रव्योपादानतावच्छेदकत्वाकल्पनात्, अवश्यकल्प्येऽपि द्रव्योपादानतावच्छेदके तदनुरोधेनाकाशादिशिवसाधारणमन्यदेवैकशक्तिमत्त्वादिकमवच्छेदकं कल्पनीयम्। अन्यथा रूपवत्त्वस्य त्वदुक्तरीत्या द्रव्योपादानतावच्छेदकत्वकल्पने वायोरपि द्रव्योपादानत्वं न स्यात्। यदि च वायोरपि द्रव्योपादानत्वस्य प्रमाण-सिद्धत्वात्तदनुरोधेन स्पर्शवत्वस्य विकसितस्या[4]वच्छेदकत्वकल्पनं तदाऽऽकाशशिवादीनामपि द्रव्योपादानत्वस्योक्तप्रमाणसिद्धत्वात्तदनुरोधेन सर्वानुगतमेकमुक्तमन्यद्वाऽवच्छेदकं कल्प्यताम्। वस्तुतस्तु तत्तत्त्वावच्छेदेन विशिष्यविशिष्यैव तत्तदुपादानत्वमिति वक्ष्यते। तस्मान्नानुमानबाधितं शिवस्योपादानत्वमिति। यत्तूक्तं शिवस्य जगदुपादानत्वे युष्माकमपसिद्धान्त इति तत्र किं तस्य शैवागमेष्वनुक्तत्वादपसिद्धान्तः। उत प्रतिषिद्धत्वात्। नाद्यः। **देविकालोत्तरादिषु** – "यस्मादुत्पद्यते सर्वमि"त्यादिपञ्च-मीश्रुत्योत्पत्तिरूपजनिकर्तृप्रपञ्चं प्रति शिवोपादानत्वस्योक्तत्वात्, शान्तिपदाद्युपादानेन प्रत्यभिज्ञातशैवागमार्थे **वायुपुराणे** – "शिवाच्छक्तिमतश्शान्त्यादिपदञ्चज्ञ" इति पञ्च-मीश्रुत्या स्वशब्दोपात्तजनिकर्तुरुपादानत्वश्रवणाच्च। **अचिन्त्यागम** एव –

आनन्दो ब्रह्म एवैतज्जायतेऽस्माच्चराचरम्।

इति पञ्चमीश्रुत्या स्वशब्देन जनिकर्तुरुपादानेन तदुपादानत्वस्योक्तत्वाच्च। नचो-पादानं स बिन्दुराडित्यत्रेवोपादानशब्देनानुक्तत्वादपसिद्धान्तः। तत्पर्यायान्तरेणा-नुक्तेरपसिद्धान्तप्रयोजकत्वाभावात्। अन्यथा मायायाप्युपादानत्वस्य पञ्चम्यानुक्तत्वा-न्मायोपादानत्वमप्यवसिद्धान्तस्स्यात्। किञ्च न श्रुतौ ब्रह्मोपादानत्ववादिनां पञ्चमीव्यतिरेकेण ब्रह्मण उपादानत्वावेदकं किञ्चित्प्रमाणमस्ति। तत्रापि ब्रह्मोपादानत्वं व्यासादिभिस्स्थापितमेव। तत् न्यायेन पञ्चमीश्रुत्याऽऽगमेष्वपि तदुपादानत्वमङ्गीकरणयम्। स्थापितञ्च तन्न्यायेनोपादानत्वमागमेष्वपि। नचागमेषु न्यायानवतार इति वाच्यम्। **चतुर्लक्षणी प्रथमाध्यायान्तिमाधिकरणे भाष्ये श्रीकण्ठाचार्यैः** "एतेन सर्वे व्याख्याता व्याख्याता" इत्यस्यागमेषु चतुर्लक्षणीन्यायातिदेशपरतया व्याख्यातत्वात्। अपि च श्रुतिस्मृत्यागमानामेकवाक्यत्वं येनाभ्युपगच्छन्ति तद्दृशाप्युपादानत्वं शिवस्यागमेष्वपि पञ्चमीश्रुत्यङ्गीकरणीयमिति यत्नतस्स्थापितम्। ये तु वयं तेषां शिववाक्यत्वाविशेषेणैकार्थ्याच्चैकवाक्यत्वमभ्युपगच्छामस्तेषामस्माकमागमेष्वपि न पृथक्प्रमाणापेक्षेत्यागमेष्वनुक्तत्वमपि वैदिकानां शाखान्तरानुक्तिरिव नापसिद्धान्तत्वसाधकमिति। नाप्यागमेषु तस्य प्रतिषिद्धत्वादपसिद्धान्त इति द्वितीयपक्षः। असिद्धेः। न हि सिद्धान्तशैवागमेषु क्वचित् शिवस्य वृत्त्युपादानत्वं निषिध्यते। यत्रापि **मृगेन्द्रे** –

येषाञ्चिद्धर्मकाद्धेतोरचितप्युपजायते।
तेषां धूमेन लिङ्गेन जलं किन्नानुमीयते।।

इति प्रकरणादिषु च तत्र तत्र निषिध्यते, तत्रापि परिणाम्युपादानत्वस्यैव निषेधः। कार्येषु घटादिषु चैतन्यापत्तिरूपसांकर्यस्य तदुक्तदोषस्य तत्रैव संभवात्। न वृत्तिमदुपादनत्वस्य।

---

[4] (टि) विकसितस्येति उद्भूतस्येत्यर्थः।

तत्र तदुक्तदोषस्यासंभवात्। वृत्युपादानत्वमेवास्माभिश्शिवस्याङ्गीक्रियते। अपि च अपसिद्धान्तस्य पुरुषदोषत्वान्न तावन्मात्रेणासंभावित दोषान्तरोक्तप्रमाणसिद्धोपादानत्वस्य निरास इत्युक्त न्यायनुगृहीता बाधितस्मृत्यागमादिसिद्धं शिवस्योपादानत्वमिति स्थितम्।।

## उपादानत्वेऽनुमानम्

इदानीमनुमानमपि तदनुग्राहकमुच्यते। तथाहि – अस्ति तावत् घटस्सन् पटस्सन्निति सताघटादेस्सामानाधिकरण्यप्रतीतिः। सा च सिंहो माणवक इतिवन्न गौणी। मुख्यत्वे बाधका-भावात्। मुख्या च लोके त्रिविधा दृश्यते। द्रव्यं घट इति द्रव्यघटयोस्सामान्यविशेषभावेन, नीलो घट इति गुणगुणिभावेन, मृद्घट इत्युपादानोपादेय भावेन च। प्रकृते तु न तावत्, सत्घटयोस्सामान्यविशेषभावेन तत्प्रतीतस्सामान्यादिषु सत्ताजात्यभावेऽपि तत्प्रतीतेरित्युक्तं प्राक्। नचागत्यासामान्यादिषु तत्प्रतीतेः सत्तैकार्थसमवायित्वविषयत्वकल्पनमित्युक्तमिति वाच्यम्। शिवस्यैव सद्रूपस्य सामान्यादिष्वप्यनुस्यूतत्वान्मुख्यतत्प्रतीतिसंभवेनागतेरभावात्। एवञ्चावश्यकसद्रूपशिवेनैव सर्वत्र सत्प्रतीत्युपपत्तौ न त्वदभिमतसत्ताजातौ किञ्चि-त्प्रमाणमपीति। एतेन सन् घट इति सत्तायां घटाधारकत्वं प्रतीयत इति परास्तम्। असिद्धेः। सामानाधिकरण्यमात्रस्यैवानुभवादिति। नापि गुणगुणिभावेन, असंभवात्। कैश्चिदप्यनङ्गीकाराच्च।

तथा च परिशेषात्प्रकृते उपादानोपादेय भावेनैव सा प्रतीतिः। प्रयोगोऽपि सन् घट इति प्रतीतिरुपादानोपादेयभावापन्नवस्तुविषयिणी, सामान्यविशेषाविषयकत्वे सति गुणगुण्यविषयकत्वे च सति मुख्यसामानाधिकरणप्रतीतित्वात्, मृत्घट इति प्रतीतिवदिति। एवञ्च सत्घटयोरुपादानोपादेयत्वे सिद्धेकस्योपादनत्वं कस्योपादेयत्वमिति वीक्षायां सद्रूपस्यैवोपादानत्वं घटपटादिषु बहुष्वनुस्यूतत्वात् घटशरावादिष्वनुस्यूतमृद्वत्। न तु घटादेः, तस्य तु उपादेयत्वमेव व्यावृत्तत्वादिति। तस्मात् सिद्धमेतदुक्तानुमानबहुन्यायानुगृहीतयाऽऽगमेष्वप्युक्तपञ्चमीश्रुत्याऽबाधितया शिवस्य जगदुपादानत्वमिति। इतः परं मतान्तराणि निराक्रियन्ते।।

## अनुपादानकत्वपक्षनिरासः

तत्र प्रथमं यदुक्तं जगदुपादानमेव नेति तच्छिवस्य जगदुपादानत्वसाधनात् सामान्यतो निराकृतमेव। विशिष्यापि निराक्रियते। तथाहि – भावकार्यमात्रे उपादानजन्यत्वनियमात् जगतोऽपि कार्यस्योपादानजन्यत्वमावश्यकम्। न च योगिसृष्टौ क्लृप्तघटादिकारणं विनाऽपि घटादिजन्मवज्जगदपि क्लृप्तोपादानं विनाऽपि स्यादिति वाच्यम्। योगिसृष्टघटादिषु प्रसिद्धघटाद्यपेक्षया वैजात्यकल्पनेन तत्र मृदादेः कारणत्वेनाक्लृप्तत्वात्। नचात्रापि जगति प्रसिद्धघटादिकार्यवैजात्यकल्पनं, प्रमाणाभावात्। तत्रान्तश्शिवस्यैवोपादानत्वसंभवेन योगिसृष्टिवत् क्लृप्तसामान्यकारणव्यभिचाराभावादिति।।

## शून्योपादानत्वनिरासः

शून्योपादानत्वन्तु सत्ब्रह्मोपादानत्वसाधनादेव निरस्तम्। निरसिष्यते च शून्यवाद उत्तरत्रेति।।

## परमाणूपादानत्वनिरासः

नापि परमाणवो जगदुपादानम्। तत्र प्रमाणाभावात्। तथाहि – यदुक्तं त्रसरेण्वा-दिस्वन्यूनपरिमाणानेकद्रव्यारब्धं कार्यद्रव्यत्वादित्यादिप्रणाडिकयाऽनुमानं तत्र प्रमाणमिति तदसत्। स्वसमानपरिमाणैर्दुग्धादिभिरेकैकेनोत्पादितेषु दध्यादिषु व्यभिचारात्। न च तत्रापि दुग्धावयवैरेव दध्याद्युत्पद्यत इति नोक्तव्यभिचार इति वाच्यम्। तत्र प्रमाणाभावात्। न च दुग्धादिध्वंसजन्यत्वेन महापटध्वंसजन्यखंडपटस्येव दुग्धाद्युपादानोपादेयकत्वं दध्यादीनामनुमीयत इति वाच्यम्। दध्यादीनां दुग्धादिध्वंसजन्यत्वासिद्धेः। सतोऽपि दुग्धादेरसादिनाशाद्दध्यादिरसादिना तदभिभवाद्वा तदाकारनुपलब्धिसंभवेन तत्र तद्ध्वंसे प्रमाणाभावात्। सालग्रामादिध्वंसजन्येनारकशरीरे व्यभिचाराच्च। तस्मादाद्यानुमाने दध्यादिषु व्यभिचार एवेति। एवमधिकपरिमाणैश्शृङ्गगोमयघृतादिभिरुत्पादितेषु शरवृश्चिककीटादिष्वपि व्यभिचारः। नचैवमेतद्दोषपरिहाराय स्वन्यूनपरिमाणेति चारब्धमिति च पदं विहाय त्रसरेण्वादिद्रव्योपादानोपादेयमिति साध्यकरणान्नोक्तव्यभिचार इति वाच्यम्। तथात्वे सूक्ष्मभूतैस्सिद्धसाधनात्। न च त्र्यणुकगतमहत्त्वानुरोधेन परिशेषात् कारण-गतबहुत्वस्यावश्यकत्वान्नैकेन भूतेन सिद्धसाधनमिति वाच्यम्। कारणगतमहत्त्वेनापि त्र्यणुकगतमहत्त्वोपपत्तेः परिशेषस्यासिद्धत्वात्। तच्च कारणगतमहत्त्वं नित्यमेवास्तु अतस्तदनुरोधेनापि नानेकद्रव्यारब्धत्वमिति। एतेनाणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वान्महत्परिमाणतारतम्यवदित्यनुमानमपि परमाणुसाधकमपास्तम्। त्रसरेणुत्व एव तद्विश्रान्तिसंभवेन सिद्धसाधनादप्रयोजकत्वाच्च। एतेन यानि परमाणु-साधकत्वेन संभावितानि तदुक्तान्यनुमानानि सर्वाणि निरस्तानि। तस्मान्न परमाणावनुमानं प्रमाणम्। क्वचिज्जगत्कारणे सूक्ष्मत्वश्रुतिरिन्द्रियाग्राह्यत्वेन। न तु त्वदभिमतपरिमाण-विशेषवत्त्वेन। अतो नागमोऽपि तत्र प्रमाणमिति। नापि तदारम्भप्रक्रियाक्षोदसहा।

तथाहि – "सर्गाद्यकालेऽदृष्टविशेषात्परमाणुक्रियोत्पत्तौ संयुक्ताभ्यां द्वाभ्यां परमाणुभ्यां द्व्यणुकाख्यं तदधिकपरिमाणकार्यमारभ्यत" इति तत्प्रक्रिया। तत्र किं तयोः परमाण्वोस्संयोगस्सर्वत्रव्याप्योत्पद्यते, उत तत्तद्दिगवच्छिन्नभागभेदेन व्याप्य। नाद्यः। संयोगस्याव्याप्यवृत्तित्वनियमात्। धर्मिग्राहकमानेन तस्य तथा सिद्धत्वात् अपसिद्धान्ताच्च न द्वितीयः। निरवयवस्य भागभेदासंभवात्, तादृशस्यापि स्वाभाविकभागभेदकल्पने प्रमाणाभावात्, एकस्मिन्नेव परमाणौ नानादिगवच्छेदेन दशसंयोगोत्पत्तौ। दशद्व्यणुकोत्पत्तिप्रसंगाच्च। तत्तत्संयोगप्रदेश एव ततोऽप्यणुरूपकार्योत्पत्तिप्रसंगे द्व्यणुकस्य तदधिकपरिमाणत्वाभावापत्तेश्च। अपि च कार्यस्यानेकद्रव्यारब्धत्वपक्षेऽनेकारब्धत्वाविशेषेण मेरुसर्षपयोरपि तुल्यपरिमाणत्वप्रसङ्गः।

अस्मन्मते त्वेकोपादेयत्वाविशेषेऽपि तयोर्मायाशक्तिवैचित्र्यादतुल्यपरिमाणोपपत्तिः। न तथा त्वयाङ्गीक्रियते। किञ्चारभ्यारम्भकभावपक्षे अनेककपालारब्धो घटः किं प्रतिकपालं परिसमाप्य वर्तते, अपरिसमाप्य वा। नाद्यः। तस्यैकस्मिन् कपाले पर्यवसितवृत्तौ तदैव कपालान्तरेऽनुपलब्धिप्रसंगात्। न हि यदैव पाटलीपुरे देवदत्तस्तदैव स एव मधुरायां संभवति। न द्वितीयः। एकस्मिन् कपालेऽवयविनो घटस्य पर्यवसितोपलब्ध्यभावप्रसंगात्। यथा

घटपटद्वित्वस्यैकस्मिन्न परिसमाप्यवर्तिनो घटमात्रे। न चेष्टापत्तिः। एकस्मिन्कपाले आवृतेऽपि कपालान्तरेऽस्मिन् कपालेऽयं घट इति घटोपलम्भदर्शनात्। किञ्च द्वितन्तुकादिपटोत्पत्त्यनन्तरं क्रमेण त्रितन्तुकादिपटोत्पत्तौ पूर्वमवयवसंयोगविनाशादिना[5] द्वितन्तुकादिपटनाशे पुनस्तदनुत्पत्तौ प्रत्यक्षविरोधेन क्रमेणोत्पत्तौ प्रमाणाभावेन युगपदेव तन्तुष्वेव द्वितन्तुकादिपटानामुत्पत्तिर्वाच्या। तथा च मूर्तानां समानदेशताविरोधो दत्तजलाञ्जलि स्यात्। परमकारणादेवाहत्य तत्तत्कार्यपरिणामसंभवे द्व्यणुकादिप्रक्रिययाऽनन्तकार्यव्यवधानेन घटाद्युत्पत्तिकल्पनागौरवपराहतैवाप्रामाणिकी चेति। एवं पाकनिक्षिप्ते घटादावत्यन्ताग्निसंयोगात्परमाण्वन्तं भंगे पुनर्द्व्यणुकादिप्रक्रियया घटोत्पत्तिरिति वैशेषिकानां पीलुपाकप्रक्रियाऽपि शिष्यदन्धनमात्रम्। तस्मान्नारम्भप्रक्रियाक्षोदसहेति।।

## पुञ्जवादनिरसनम्

एतेन परमाणव एव जगदुपादानम्। अवयविकार्यन्तु न तदोऽतिरिक्तम्। तत्र प्रमाणाभावात्। अतिरिक्त तत्कल्पने गौरवाच्च। किन्तु त एव समूहीभूता अवयवीत्युच्यन्त इति बौद्धानां प्रक्रियाऽपि निरस्ता। परमाणौ प्रमाणाभावादेव। किञ्चातिरिक्तावयविनिराकरणमपि न संभवति। पूर्वापरकालगर्भस्य कार्यकारणभावस्य भेदव्याप्तत्वेनाभेदे तस्यासम्भवात्। अनन्यत्वसाधकलाघवस्य व्याघातरूपप्रतितर्कपराहतत्वात्। न च तत्र प्रमाणाभावोऽपि। अस्ति स्थूलो घट इति एको घट इति च ज्ञानम्। न चैतद्द्वयं घटस्य परमाणुपुञ्जत्व उपपद्यते। तेषामणुत्वात् बहुत्वाच्च। न च वने वृक्षसमूहात्मकेऽनतिरिक्तावयवित्येकं वनमिति तदपेक्षयेदं वनं स्थूलमिति च प्रत्ययवत् घटादेः परमाणुसमूहत्वेऽप्युक्तप्रत्ययद्वयोपपत्तिरिति वाच्यम्। भिन्नदेशस्थानां विशिष्टानां वृक्षाणां वनरूपातिरिक्तैकावयवव्यारम्भकत्वासंभवेन वनस्यातिरिक्तावयवित्वाभावे निश्चिते बाधेनागत्या परस्परसंयुक्तवृक्षघटितत्वादिगुणयोगेन वनान्तरापेक्षयाऽधिकवृक्षघटितत्वगुणयोगेन च वने तत्प्रतीतिद्वयस्य गौणत्वकल्पनात्। न चात्रास्ति तद्वत् किञ्चित्बाधकं येनागत्या तद्वत्घटेऽपि तत्प्रतीतिद्वयस्य गौणत्वं कल्प्येत। अन्यथा परमाण्वेकत्वादेरप्युच्छेदप्रसङ्गः[6]। अपि च तन्तव इति पट इति च कार्यकारणव्यवस्थयोः प्रतीत्याकारशब्दानां भेददर्शनात्तयोर्भेदः। अपि च यत्राप्येकमेव सूत्रमातानवितानात्मनाप्रसूतं तत्रापि पटो जायत इति वक्तव्यम्। तत्र पटबोधदर्शनात्। न च तस्य भ्रमत्वं गौणत्वं वा कल्प्यम्। पटस्य तन्त्ववच्छिन्नसूक्ष्मभूतपरिणामत्वेनाप्युपपत्तेर्मुख्यत्वे बाधकाभावात्। पटश्च तत्रारम्भसमूहवादिनोर्नसम्भवति। तन्तोरेकत्वेन समवायिकारण-संयोगरूपासमवायिकारणाभावात्। कारणसमूहाभावाच्च इति।।

## प्रधाननिरासः

यदप्युक्तं प्रकृतेः परमजगदुपादानत्वमिति तत्रोपादनत्वमिष्यत एव। अन्यानुपादेयत्व-

[5] (टि) पूर्वमवयवसंयोगविनाशादिनेति। त्रितन्तुकादिपटोत्पत्त्यर्थमित्यादिः। प्रत्यक्षविरोधेन-द्वितन्तुकादिपटप्रत्यक्षविरोधेन। क्रमेणोत्पत्तौ प्रमाणाभावेनेति। प्रत्यक्षविरोधभिया पुनर्द्वितन्तुकादि पटोत्पत्त्यङ्गीकारे त्रितन्तुकादिपटोत्पत्त्यर्थं पूर्वमवयवसंयोगविनाशादिना पुनर्द्वितन्तुकादिपटनाशे त्रितन्तुकादिपटोत्पत्तिरेव न संभवतीति क्रमेणोत्पत्तौ प्रमाणाभाव इति भावः।

[6] (पा) परमाणुकारणत्वादेः।
(टि) परमाण्वेकत्वादेरुच्छेदप्रसङ्ग इति। यथा घटैकत्वप्रत्ययस्य गौणत्वादिकल्पनयैकत्वमपवदसि तथा परमाण्वेकत्वप्रत्ययस्यापि तथात्वकल्पनया तदेकत्वस्याप्युच्छेदप्रसङ्ग इत्यर्थः।

रूपपरमत्वांशस्तु तस्य अचैतन्ये सत्यनेकत्वादिना लिङ्गेनागमेन च कार्यत्वावगमादन्योपादानकत्वमावश्यकमित्यतोऽसम्भवान्नेष्यत इति। एतच्च यथा तथाऽग्रे वक्ष्यते।।

## केवलमायोपादानत्वनिरासः

यदप्यपरैरुक्तं केवलमायैव जगदापादानमिति तत्रापि तस्या उपादानत्वमिष्यत एव। उपादानान्तरासहकृतत्वरूपकैवल्यन्तु वाक्यमर्यादाप्राप्तमप्युक्तबहुन्यायानुगृहीतनिगमागमादिपञ्चमीश्रुतिसिद्धशिवोपादानत्वविरोधात् बाध्यत इति। यदि च कार्यस्य जगत उपादानाकांक्षायां श्रुत्या मायोपादानत्वबोधनादेव शान्तत्वेन पुनरुपादानान्तराकांक्षाविरहात् न श्रुत्याऽपि शिवोपादानत्वं बोध्यत इति, तदा वैपरीत्यं स्यात्। तत्रापि श्रुत्या शिवोपादानत्वबोधनादेव जगत उपादानाकांक्षायाश्शान्तत्वेन मायारूपोपादानान्तराकांक्षाविरहान्न मायोपादानत्वमपि श्रुत्या बोध्यत इति वक्तुं शक्यत्वात्। तस्मात् श्रुत्योर्युगपदुपस्थितत्वाद्विनिगमाना विरहाच्चोभयोरप्युपादानत्वं, न केवलमायाया इति। केवलशिवोपादानत्वमपि तुल्यन्यायत्वान्निरस्तं वेदितव्यम्। तस्माज्जगतोऽनुपादानत्वं, सोपादानत्वेऽपि शून्यपरमाणूपादानकत्वं, प्रकृत्युपादानकत्वेऽपि तस्याः परमत्वं, मायाशिवोपादानकत्वेऽपि तयोः कैवल्यमित्येतत्सर्वं बाधितमप्रामाणिकञ्च। मायाशक्तिमच्छिवोपादानत्वञ्चाबाधितं बहुन्यायानुगृहीतनिगमागमसिद्धमिति स्थितम्। अमुमर्थं सिद्धवत्कृत्योपादानोपादेययोरत्यन्तभेद्यत्यन्ताभेदिमुख्यभेदाभेदिवैशेषिकबद्धस्वयूथ्यमतव्यावृत्तं स्वाभिमतमुपादानत्वं वदन्नावृत्त्या कार्यस्यारम्भसमूहपरिणामरूपत्वमपि निराकरोति–**अन्यस्सन् व्याप्तितोऽनन्यः कर्तेति**।

अयमर्थोऽनेन यथा लभ्यते तथा संग्रहव्याख्याने उक्तम्। विशिष्यस्य च कार्यस्यारम्भसमूहरूपत्वं निराकृतं, परिणामरूपत्वञ्च निराकरिष्यते। नन्वत्र शिवस्य प्रमाणसिद्धमप्युपादानत्वं कार्यस्य जगत आरब्धत्वाद्यनिरूपणादनिर्व्यूढमिति। अत्र ब्रह्मपरिणामवादी ब्रह्मण उपादानत्वं श्रुतिसिद्धमेव तन्निर्वाहार्थं जगतः कार्यस्य तन्त्वारब्धपटवत्तदारब्धत्वं वा लोमसमूहचामरवत्तत्समूहत्वं दुग्धारब्धदधिवत् परिणामत्वं वा वाच्यम्, प्रकारान्तरस्यासम्भवात्, असंप्रतिपन्नत्वाच्च। तत्राद्यद्वयं ब्रह्मण एकत्वान्न संभवति। निराकृतञ्च तद्द्वयं सामान्यतः पूर्वमित्यन्त्यं परिशिष्यते। तस्मात्ब्रह्मपरिणाम एव जगदित्याह।।

## शिवस्य परिणामित्वनिरासः

तदसम्भवि, शिवापेक्षया जगतः परिणामत्वस्याप्यनिरूपणात्। तथाहि – परिणामो नाम न तावदवयवसंयोगमात्रम्। प्रकृतेऽवयवद्वयाभावेन तदसम्भवात् घटादिस्थलेष्वप्येकावयवापगमे तावदवयवसंयोगाभावेन घटपरिणामविनाशप्रसङ्गात्। न चेष्टापत्तिः। किञ्चिदवयवापगमेऽपि तत्र घटबुद्धिदर्शनात्। न च तत्र तावदवयवसंयोगरूपघटनाशेऽपि परिशिष्टावयवसंयोगरूपघटान्तरोत्पत्तेर्नोक्तदोष इति वाच्यम्। स एवायं घट इति प्रत्यभिज्ञाया बाधकाभावेन सजातीयविषयत्वकल्पनस्यासंभवात्, अनारम्भवादिनस्तव घटान्तरोत्पत्तिकल्पनस्यापसिद्धान्तत्वाच्च। अवयवापेक्षयाऽतिरिक्तावयविद्रव्यान्तरस्य स्थापितत्वान्नावयवसंयोगमात्रं परिणाम इति। अत एवावयवविस्तार एव परिणाम

इत्यप्यपास्तम्। नापि कारणस्य पूर्वरूपपरित्यागेन तत्समानगुणकरूपान्तरप्राप्तिः परिणामः। इदानीं कार्यकाले कारणस्वरूपाभावप्रसङ्गात्, घटादेस्स्वभावकाले मृद्रूपस्याप्यनुस्यूतत्वन्न तत्परित्यागाभावे न परिणामत्वाभावप्रसङ्गच्च। न च तत्रेष्टापत्तिः। तव कार्यद्रव्यस्य परिणामतयेष्टत्वात्। नापि सत्येव पूर्वरूपे तत्समानगुणकरूपान्तरोत्पत्तिः। चौतन्यगुणकशिवपरिणामस्य जगतश्चैतन्यापत्तेः। अन्यच्च परिणामत्वं दुर्वचम्। अतः कार्यस्य जगतश्शिवपरिणामत्वं दुर्वचम्। तथा कारणमपि शिवः कृत्स्नैकदेशविकल्पाभ्यां परिणन्तुमपि न शक्नोति।

तथाहि – शिवः किं कार्त्स्न्येन परिणमते एकदेशेन वा। नाद्यः। सर्वात्मनाऽऽद्यकार्यशिवतत्त्वाकारेण परिणतावपरिणतप्रदेशान्तराभावेन द्वितीयकार्यशक्तितत्त्वाद्याकारेण तदा पुनः परिणामाभावप्रसङ्गात्। न च परिणतेनैव पुनः परिणामस्संभवति। घटाद्याकारेण परिणतमृदादिना तदानीमेव पुनः कार्यान्तराकारेण परिणामादर्शनात्। नचाद्यकार्यमेव शिवपरिणामः। द्वितीयादिपरकार्यन्तु पूर्वपूर्वपरिणामादेव। एतच्चारभ्यारम्भकभावपक्षे अश्वारब्धतन्त्वोः पटवत्संभवत्येवेत्यत्रापि नोक्तदोषापत्तिरिति वाच्यम्। शिवस्य सर्वोपादानत्वप्रतिपादकागमादिविरोधात्। न च परम्परया द्वितीयादिकार्यं प्रत्यपि शिवस्योपादानत्वात्सोऽप्युपपद्यत इति वाच्यम्। साक्षादुपादानत्वस्यैवोत्सर्गतः प्राप्तत्वात्, एकस्यैवागमस्य साक्षादुपादानत्वं प्रतिपाद्यम्। क्वचित्परम्परयेति विधिवैषम्यप्रसङ्गाच्च। अशुद्धमायाऽऽद्यकार्यस्य परस्य कालादेः पूर्वशुद्धविद्याकार्याजन्यत्वेनोक्त पारम्पर्यस्याप्यसम्भवाच्च। न च तत्र साक्षादुपादानत्वमेव शिवस्येति वाच्यम्। तस्य शुद्धमायाऽऽद्यकार्यावरुद्धत्वेन पुनः परिणामासम्भवस्योक्तत्वात्। अपि च घटादिष्वपि सद्रूपशिवान्वयोऽपि दृश्यते सन् घट इति। न च शिवस्य घटादिकं प्रति बहुव्यवधानेन कारणत्वे स उपपद्यते। लोके बहुव्यवधानेन करणकार्पासबीजान्वयस्य तत्कार्येषु पटादिश्वदर्शनात्। तस्मान्न कार्त्स्न्येन परिणामः। नाप्येकदेशे न परिणाम इति द्वितीयः पक्षः। निरवयवस्य शिवस्य स्वत एकदेशानिरूपणात् विचित्रशक्तिमायासम्बन्धात्तदुपगमे आवश्यकत्वेन मायाया एव जगदुपानत्वौचित्यात्। तस्माच्छिवस्य परिणामित्वासम्भवात्कार्यस्य घटादेश्चैतन्यापत्त्या शिवापेक्षया परिणामत्वासम्भवाच्च, प्रकारान्तरस्य च लोकेऽदर्शनान्निगमागमसिद्धमपि जगतश्शिवोपादानत्वं न निर्व्यूढमिति॥

## वृत्तिरूपमुपादानत्वम्

ननु दृश्यते हि लोके वृत्तिर्नाम प्रकारान्तरम्। यथा पटस्य कुट्यवस्थाऽहेः कुण्डलावस्था। न तावहि पटावेव। पूर्वमपि कुट्यादिव्यवहारप्रसङ्गात्। तथा च तयोः कार्यान्तरयोरवस्थाविशेषयोरारम्भसमूहपरिणामत्वासम्भवात् प्रकारान्तरं वृत्तिरूपया श्रयणीयमिति। अस्त्वेवं वृत्तिः प्रकारान्तरम्। तथाऽपि प्रसिद्धवृत्तित्वमपि शिवापेक्षया जगतो न संभवति, कारणसंकोचविकासावस्था हि सा। न च सर्वदा विभोश्शिवस्य संकोचविकासौ संभाव्यते। किञ्च परिणामपक्षोक्तदोषो घटादिचैतन्यापत्तिरप्यस्मिन्पक्षे स्यात्। वृत्तेरप्युपादानत्वसमानस्वभावत्वात्। तस्माच्छिववृत्तित्वस्यापि जगतोऽसंभवादागमप्राप्तमपि शिवस्य जगदुपादानत्वं न निर्व्यूढमिति।

अत्रोच्यते – मायाविशिष्टस्य शिवस्य जगदुपादानत्वं विशेषणीभूतायाश्च मायायास्संकोच-विकासौ संभवत एवेति विशेषणद्वारा विशिष्टवृत्तित्वरूपं जगतो न स्वत इति नोक्तदोष इति शिवस्य मायाविशिष्टस्य प्रसिद्धवृत्तिरेव जगदिति। न चैवं विशेषणीभूतमायायाः परिणाम-संभवात्तद्द्वारा विशिष्टपरिणामत्वेऽपि तत्पक्षोक्तदोषाभावाद्विशिष्टपरिणाम एव जगदस्त्विति वाच्यम्। विशेषणीभूतमायायाः परिणामित्वस्यैवासंभवात्। यत्र हि पूर्वरूपपरित्यागः कार्यनाशानन्तरं न पुनः पूर्वरूपावस्थानं तस्यैवानित्यस्य परिणामित्वम्। तादृशस्यैव पयसो लोके परिणामित्वव्यवहारात्। प्रतिपादितञ्च षट्पदार्थ्यामनित्यानामेव परिणामित्वमित्यतो नातादृश्या मायायाः परिणामित्वसंभव इति। किञ्च केवलशिवापेक्षया कार्यस्यारंभसमूहपरिणाम-प्रसिद्धवृत्तित्वाभावेनानिर्वाहात्तस्यानुपादानत्वं यदि सिषाधयिषितं तदोक्तबहुप्रमाणविरोधः। कार्यस्य प्रसिद्धान्तर्भावसंभवमात्रेण प्रमाणसिद्धस्यापि शिवोपादानत्वस्य परित्यागे पटादिषु तन्त्वाद्यारब्धत्व-स्यैव लोके प्रसिद्धत्वात् दध्नः तदन्तर्भावाभावात्दुग्धस्यापि दद्युपादानत्वं न स्यात्। यदि च दुग्धो-पादानत्वस्य प्रमाणसिद्धत्वात्तदनुरोधेनागत्या दध्नः परिणामत्वरूपप्रकारान्तरकल्पनं तदा प्रकृतेऽपि शिवोपादनत्वस्य प्रमाणसिद्धत्वात्तदनुरोधेन जगत आरम्भसमूहपरिणामप्रसिद्धवृत्तित्वासंभवे शिवापेक्षया प्रकारान्तरत्वं कल्प्यमिति। किं तत्प्रकारान्तरमिति यदि सुहृत्भावेन पृच्छसि तदोच्यते वृत्तिभेद इति।

तथाहि – केवलस्य कारणस्यावस्थान्तरवैशिष्ट्यमात्रमेवोपादानत्वप्रयोजकं गुणक्रियोपादानसाधारणम्। तच्चावस्थान्तरं किञ्चिदुपादानापेक्षया समानगुणकं किञ्चि-दुपादानापेक्षया चासमानगुणकं भवतीत्यन्यदेतत्। न तु स्वसमानगुणकावस्थान्तरवैशिष्ट्यमिति स्वसमानगुणकत्वं तत्र विशेषणीयम्। क्रियाद्युपादाने द्रव्येऽभावात्, गौरवाच्च। तादृशोपादनत्वञ्च शिवस्य स्वासमानस्वभावजगदुत्पादकत्वेऽप्युपपन्नम्। तथा च शिवोपादानासमानस्वभावं जगत्कार्यमारम्भसमूहपरिणामभिन्नत्वेन शिवस्य वृत्तिभेद एवेति। न चैवं विवर्तादप्रसङ्गः। कार्यस्य सत्यत्वाङ्गीकारेण तन्मतप्रवेशाभावात्। तदुक्तम् – "चिद्विवर्तस्तथाऽसत्योऽद्वैतवादिभिरिष्यतः" इति। अत्रासत्य इति च्छेदः। तदभिमतविवर्तत्वन्तु जगतो न पुरस्क्रियते। जगत्सत्यत्वावेदकप्रत्यक्षादिबहुप्रमाणविरोधात्, तत्साधनफलस्य ब्रह्मज्ञाननिवर्त्यत्वस्य प्रपञ्चस्य सत्यत्वेऽपि तस्य ज्ञाननिवर्त्यत्ववचनसामर्थ्यादपि संभवाच्च[7]। नापि तत्तिरस्क्रियते, इष्टविघातस्यानिष्टप्राप्तेर्वाऽभावादिति। तस्मात्सिद्धं शिवस्य जगदुपादानत्वमिति।।

## करणनिरूपणम्

ननु भगवतस्तत्त्वतात्त्विकतनुकरणविषयादिलक्षणसंसारोत्पादने किं करणम्। न तावच्छरीरम्। तस्याशरीरत्वात्। नापि प्राणीनां पुण्यापुण्यात्मकं कर्म। तस्य कर्ता सह साक्षात्संबन्धाभावेन देहा-दिद्वाराधिष्टानेनैव करणत्वस्य वक्तव्यत्वात्। न हि कुठारादिकमुद्यमनादिरूपदेहव्यापारविषयीभूतं

---

[7] (टि) प्रपञ्चस्य सत्यत्वेऽपि तस्य ज्ञाननिवर्त्यत्ववचनसमर्थ्यादपि तत्साधनफलस्य ब्रह्मज्ञाननिवर्त्यत्वस्य संभवाच्चेत्यन्वयः।

करणं दृष्टम्। नापि बिन्दुः। तस्योपादानकुक्षिनिक्षिप्तत्वादुपादानतावच्छेदकत्वाद्वा। देहाभावादेव च बाह्येन्द्रियान्तःकरणतद्धर्मेच्छासंरम्भबोधप्रवृत्त्यादीनां करणत्वं प्रत्याख्यातम्। नापि चिच्छक्त्यात्मकमिच्छाज्ञानादिकं, तस्य भावप्रत्ययात्मकेच्छाबोधादिवृत्तिसहकृतस्यैव जनकत्वात्। अन्यथा कुलालादेस्सर्वदा चिच्छक्तिरूपेच्छादिसत्वेन तत्कार्यस्य घटादेस्सदोत्पत्त्यापत्तेः, कर्तृव्यापारविषयस्यैव करणत्वेन तद्विलक्षणायाश्चिच्छक्तेः करणत्वायोगाच्च। इच्छादीनां कर्तृत्वनिर्वाहकतया करणत्वायोगाच्च। इच्छादेरात्मभेदे करणत्वायोगेन तत्भेदेऽचेतनत्वे सत्यनेकत्वेन कार्यत्वापत्त्या सर्वत्र कार्ये करणत्वायोगाच्च। न च करणमेव मास्त्विति वक्तुं युक्तं, कार्यस्य करणजन्यत्वनियमात्।

क्रियाया एव करणापेक्षत्वे तनुभुवनादेस्तदनपेक्षत्वे तद्वदेव कर्त्रनपेक्षत्वस्य-प्यापत्तेः। कार्यविशेषक्रियात्वापेक्षया कार्यत्वस्यैव लाघवेन तदपेक्षत्वं[8] प्रयोजक-तयोत्पादनक्रियायास्तदपेक्षतया कर्तृसिद्धौ करणस्याप्यावश्यकत्वात्। न च कर्तुरेवोपादानत्ववत्करणत्वमपीति युक्तम्। कर्तुरुपादानता प्रयोजकस्य कार्याभिन्नत्वे सति कारणत्वस्य सद्भावेनोपादानत्वस्य संभवेऽपि स्वाधिष्ठेयत्वाभावेन करणत्वस्यानुपपत्तेः। तस्मादावश्यकं करणं तस्य। तच्च विशिष्य निरूपणीयमित्यपेक्षायामाहाज्ञयेति। शक्त्येत्यर्थः। तदुक्तं **श्रीमन्मृगेन्द्रे** – "करणञ्च न शक्त्यन्य"दिति। अन्यत्राप्युक्तम् – "शक्त्य इहास्य करण"मिति। बिन्दोरपि परिग्रहशक्तित्वात्तद्व्यवच्छेदायाह –"**समवेतये**"**ति**। तादात्म्यसंबन्धेन संबद्धयेत्यर्थः। तदुक्तम् – "संबन्धश्शक्तिमच्छक्त्योस्तादात्म्यं स्यादि"ति। अथवा समवायेन संबन्धेन वर्तमानयेत्यर्थः। बिन्दोस्तु न समवेतत्वमिति तद्व्यवच्छेद इति भावः॥

## शक्तित्वनिर्वचनम्

ननु शक्तिमत्समवेतस्यैव शक्तिशब्दवाच्यत्वेन तद्विलक्षणस्य बिन्दोश्शक्तिशब्देनैव व्यवच्छेदस्सिद्ध इति चेन्न। शक्तिमत्समवेतत्वस्य शक्तित्वं प्रत्यप्रयोजकत्वात्। शक्तित्वे हि शक्तिमत्तन्त्रत्वमेव प्रयोजकम्। तच्च शक्तिमदधीनस्थितिकत्वरूपमीश्वराधीनस्थितिके बिन्दावप्यक्षतमेव। केचित्तु–अनन्यप्रवर्त्यत्वे सत्याऽऽदि। शक्तिमदवस्थितत्वं शक्ति-लक्षणम्। आगन्तुकेऽतिव्याप्तिवारणायाऽऽदिशक्तिमदवस्थितत्वं विशेषणम्। उदासीने नित्येऽतिव्याप्तिनिवारणायानन्यप्रवर्त्यत्वे सतीत्युक्तम्। तथा च बिन्दोरपि शक्तिलक्षणयोगित्वेन शक्तित्वात्तद्व्यवच्छेदाय विशेषणं युक्तमित्याहुः। केचिदत्र बिन्दुरपि समवेत एव। तथाहि – शिवस्य द्वे शक्ती। एका दृक्शक्तिः। परा क्रियाशक्तिः। उभे अपि समवेते एव। तत्र क्रियाशक्तिरेव बिन्दुरित्याहुः। तन्न। शुद्धाध्वनिष्पादने उपादानविशेषणं तदवच्छेदको वा बिन्दुः। नचाजडायाः क्रियाशक्तेस्तथात्वं संभवति। "नामिश्रं परिणमत" इति **न्यायेन** जडस्यैव तथात्वौचित्यात्। यदप्यत्रेच्छाज्ञानादिकायाश्शक्तेर्भावप्रत्ययसहकृताया एव जनकत्वं घटादौ स्थितमिति तदपि न युक्तम्। कुलालादिसमवेतायास्तस्यामलावृतत्वेनाप्रकाशमानतया कार्याक्षमत्वेन विषयविशेषे तत्प्रकाशार्थं भावप्रत्ययापेक्षत्वेऽपि सर्वदा मलानावृताया

[8] (टि) तदपेक्षत्वेति। कर्त्रपेक्षत्वेत्यर्थः। स्वाधिष्ठेयत्वाभावेनेति। स्वस्येत्यादिः।

ईश्वरशक्तेस्तदसहकृतायापि जनकसम्भवात्। अत एवोक्तं **रत्नत्रये** –

निरावरणनिर्द्वन्द्वनिरूपादानवैभव। इति।

यदप्युक्तं कर्तृव्यापारविषयस्यैव करणत्वमिति तदप्ययुक्तम्। साक्षात् संबन्धरहितस्यैव करणत्वे तथात्वस्य प्रयोजकत्वात्। अन्यथा दहस्पन्दादौ यत्नादेः करणत्वानापत्तेः। अत एव कर्तृत्वनिर्वाहकतया करणत्वानुपपत्तिरित्यपि परास्तम्। देहस्पन्दानुकूलयत्नस्य तथाविधस्यापि करणत्वदर्शनात्। शक्तेः कार्यत्वापत्तिस्तु चेतनत्वे नैकत्वेन चाङ्गीकारादचेतनत्वानेकत्वयोरभावान्निरस्ता। तदुक्तं **श्रीमन्मृगेन्द्रे** "शक्तिर्नाचेतनाचित" इति। तथाऽन्यत्रापि –

एकैवानेकतां याति शिवशक्तिरुपाधितः। इति,
सैषा शिवाश्रया शक्तिरमोघा बलवर्धिनी।
एकानैक विभागेव कार्यभेदाद्विभाव्यतः।। इति च।

एकस्याश्शक्तेः कथं ज्ञानेच्छाक्रियात्वकत्वमिति चेन्न। चिद्रूपायाश्शक्तेरेव सृष्ट्यादिकारण-कर्मपरिपाकादिसाहित्येन करिष्यामीत्येवं रूपत्वे इच्छात्वस्यार्थक्रियाहेतुभूते इदमित्थं भवत्वित्याद्याकारत्वे क्रियात्वस्य चोपपत्तेः। ज्ञानेच्छायत्नभेदवादिनां तार्किकादीनामपि सर्वदा सृष्टिसंहाराद्युत्पत्तिप्रसङ्गपरिहाराय तत्तत्कारणसाहित्ये तत्तदिच्छादिरूपत्वमनुमतमेव।

तथा च तन्मते सिसृक्षासञ्जिहीर्षात्वादिकमिव ज्ञानेच्छाक्रियात्मकत्वमप्येकस्या एव शक्तेरुपपन्नमिति न कोऽपि दोषः। तदुक्तं **मालिनीविजये** –

या सा शक्तिर्जगद्धेतुः कथिता समवायिनी।
इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते।।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम्।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।।
एवं भूतमिदं वस्तु भवत्विति यदा पुनः।
जाता तदैव तद्वस्तु कुर्वन्त्यत्र क्रियोच्यतः।। इति।

अस्या एव चेच्छादिभेदवदीशानादिभेदोऽपि। तथाहि – "ईशाना शब्देन विश्वाधिष्ठानरूपं सर्वाक्रमणमुच्यते"। तद्धेतुतया शक्तिरपि तेन शब्देन व्यपदिश्यते, या सर्वार्थोपरि-वृत्तितयोपासकैर्मूर्द्धभावेन[9] परिकल्प्यते। पुरुषशब्देन पुरुषशेषतया पूर्णतया वा मन्त्रतन्त्रलक्षणं ज्ञानमुच्यते। तत्कारणतया शक्तिरपि तथोच्यते, या शब्दात्मकशास्त्रव्यञ्जकतया वक्त्रतयोपासकैः परिकल्प्यते।

अघोरपदेन तनुभोगेन्द्रियलक्षणस्य अघसोऽरितया निवर्तकत्वेन शैवं ज्ञानमभिधीयते, तज्जनकतया शक्तिरपि तथा व्यपदिश्यते, या परदुःखापनोदनप्रवणतया हृदयत्वेनोपासकैः परिचिन्त्यते। वामशब्देनापि विलक्षणतया विशिष्टाधिकारिणं भोगस्थाननिविष्ठानां

[9] (टि) या सर्वार्थोपरीत्यादियत्पदारब्धं वाक्यपञ्चकमपि तत्तत्पूर्वान्वयि। अघसः अरितयेति छेदः। अरितयेत्यस्य निवर्तकत्वेनेति विवरणम्। अघस इति सान्तं षष्ठ्यन्तं पदम्। अघसोऽरिरघोर इत्यर्थः पर्यवस्यति।

पशुसदाशिवानां तनुभोगेन्द्रियादिनिर्माणमुच्यते, तद्धेतुतया शक्तिरपि तथा व्यवह्रियते, या गुह्यसादृश्येन गुह्यतयोपासकैः कल्प्यते।

सद्यश्शब्देन च पूर्वोक्तकार्यचतुष्टयसंबन्ध्याशुकरणमभिलप्यते, तज्जनिका शक्तिरपि तेन शब्देन व्यवह्रियते, या मूर्धादिसर्वावयवानुविद्धतयोपासकैर्मूर्तिभावेन कल्प्यते। अथवा उपर्यधोभावेनावस्थितशान्त्यतीतादिकलापञ्चकाधिष्ठानेन शक्तेः पाञ्चविद्यं, येन मूर्धादिपरिकल्पना। तदुक्तं **ब्रह्मशम्भुभिः** –

"शान्त्यतीतकला मूर्धा शान्तिवक्त्रसरोरुहा।
विद्यावितितवक्षोंसा प्रतिष्ठा गुह्यमण्डला।।
निवृत्तिजानुजङ्घाङ्घ्रि"रिति।

अत्र कलावाचिभिश्शब्दैस्तदधिष्ठात्र्यश्शिवशक्तयोऽभिधीयन्ते। कार्यभेदादधिष्ठेयभेदाच्च पञ्चविधत्वम् –

कार्यभेदादधिष्ठानवशादेकैव पञ्चधा।
सा भाति बिन्दुश्शान्त्यादिपञ्चाधिष्ठेयगोचरा।।

इत्यादिना **रत्नत्रये** प्रदर्शितम्। तत्र बिन्दुशब्देन शान्त्यतीतकलोच्यत इति द्रष्टव्यम्। एवं लयभोगाधिकारशब्दाभिधेयानां बिन्दुगतकार्योपासंहारकार्यजननाभिमुख्यकार्योत्पादनानां हेतुतया शक्तिरपि लयभोगाधिकारिणी सती त्रैविद्यं लभते। कार्यजननाभिमुख्यस्य भोगव्यपदेश्यत्वं प्राणीनां भोगहेतुतया बोध्यम्। इयञ्च शक्तिरनुत्पन्नैव। सर्वकार्यकारणत्वात्। एकत्वेन कर्मवत्प्रवाहानादित्वेन सर्वकारणत्वस्य उपपादयितुमशक्यत्वात् तज्जनने कारणाभावाच्च। तदुक्तम् –

नित्यैषाऽशेषकार्याणां कारणत्वाद्यथेश्वरः।
सत्वे कारणशून्यत्वादपि बिन्दुवदिष्यते।।
तथाहि तां समाश्रित्य सन्तोऽन्ये सा स्वतस्सती।

अत्र सत्वे कारणशून्यत्वादिति तदुत्पत्तौ करणाख्यस्य हेतोरभावादित्यर्थः। तां समाश्रित्यान्ये सन्तः – **तदधीनोत्पत्तिका इत्यर्थः**। सा स्वतस्सती–**अनुत्पन्नैवेत्यर्थः**। शक्तिस्वरूपन्तु –

शक्तिरप्रतिघोदारमरीचिनिचयात्मिका।
नित्यौदिता नवच्छिन्ना निर्विकल्पस्वरूपिणी।।
निरावरणनिर्द्वन्द्वनिरुपादानवैभवा।
विविधोपाधिसंभेदविवर्तभिदुरोदया।।
शान्तोदितप्रपञ्चादिबिन्दुव्याप्तिपटीयसी।
परानपेक्षानन्यात्मप्रकाशा सर्वतोमुखी।।
आदिमध्यान्तरहिता रहिता सर्वबन्धनैः।।
काष्ठानिष्ठा परा सूक्ष्मा वस्तुमन्नातिलालसा।
चितिरेवं मताऽम्लानमहिमा परमेष्ठिनः।।

इति **रत्नत्रये** निरूपितम्।

अत्र सर्वोऽपि कर्तव्यं बुद्धावलोच्य तदुत्पादनेच्छयायतमानः कार्योत्पादको दृश्यते। शिवस्य तु ज्ञानेच्छाकृतिशून्यस्य कथं कर्तृत्वं शक्तिमात्रेण निर्वहतीति शङ्कास्वरूपे कार्ये चासंभवत्पराभिभूतीनामभीष्टफलप्रदानां प्रकाशत्वपराश्रयत्वादिना मरीचिसदृशीनामिच्छाज्ञानक्रियाणां समष्ट्यात्मिकेत्येवमर्थकेनाप्रतिघेत्यादिविशेषणेन निराकृता। कुलालादिशक्तेरिव भावप्रत्ययापेक्षा स्यादिति शङ्काव्यावर्तनाय समवेतशक्तेरेव बिन्दुतयोपादानकोटिनिविष्टत्वमिति मतनिरासाय च निरावरणेति। आव्रियतेऽनेनेत्यावरणम् आणवमलः। कर्मणो मायया विना भोगाहेतुत्वेन मायायाश्च कर्मणा विना शरीरेन्द्रियादिजनकत्वाभावेन कार्ममयिकलक्षणो मिथुनात्मको बन्धो द्वन्द्वः तत् शून्यत्वान्न कुलालादिशक्तिसाम्यम्। चित्प्रकाशत्वादुपादानविशेषण-तयोपादानकोटिनिवेशेन यदुपादानवैभवमुपादानत्वं तच्छून्येत्येर्थः। लयभोगाधिकारसंपर्केण शक्तेर्लयभोगाधिकारत्वमाध्यासिकं विवर्तरूपमिति भ्रमव्युदासाय विविधेति।

बिन्दुगतलयाद्युपाधिसम्बन्धमात्रेण तत् व्यपदेशाद्विवर्तभिन्नलयाद्युदयोपेतेत्यर्थः। एतदेवोपपादयति वस्तुमात्रेति। उपाधिलयादिभेदेऽपि स्वयं न भिद्यति इत्यर्थः। अचेतनस्य बिन्दोश्शक्त्याधिष्ठेयत्वमुपपादयितुं शान्तेत्यादि। शान्तप्रपञ्च उदितप्रपञ्च-स्स्थितप्रपञ्च इत्येवमादिभेदभिन्नबिन्द्वाधिष्ठानदक्षेत्यर्थः। ननु करणं कर्त्रा विदितमेवोपकारकम्। नह्यविदितकरणस्य क्वापि कर्तृत्वं दृष्टमिति चैतन्यरूपायाश्शक्तेः चैतन्यान्तराविषयत्वेनाविदितत्वात् कथं करणत्वमिति शङ्काव्यवच्छेदाय परानपेक्षेति। तस्यैव विवरणमनन्यात्मप्रकाशेति। तथा च स्वप्रकाशतया स्वेनैव विदितत्वात् नाविदितत्वशङ्केति भावः। ननु शक्तेरपि चैतन्यरूपत्वे शिवात्मभेदः किं कृत इति चेन्न। कर्तृत्वाश्रयत्वविषयानिरूप्यत्वपरमेश्वरत्वमहत्त्वव्यापकत्वादिधर्मयुक्ताच्छिवात्करण-त्वाश्रितत्वसर्वविषयनिरूप्यत्वपरमैश्वर्यरूपत्वमहिमरूपत्वव्याप्तित्वादिधर्मयोगिन्याश्-शक्तेर्भेदस्योपपत्तेः। तदुक्तं **रत्नत्रये** –

तयोर्भेदोऽधुनोच्यते।।
शुद्धेऽध्वनि शिवः कर्ता करणं शक्तिराश्रिता।
समाश्रयस्त विज्ञेयस्स्वनिष्ठघनचिन्मयः।।
सा तु संविदशेषार्थग्रहणे लम्पटोदया।
परमैश्वर्यरूपा च महिमा व्याप्तिरूपिणी।।
महेश्वरो महानेष सर्वार्थव्यापकस्तयोः। इति।

न चैवं भेद एव स्यान्नाभेद इति वाच्यम्। गुणगुणिनोरिव समवायेनाभेदस्यापि सिद्धेः। अभेदे कथं करणत्वमिति चेन्न। भेदसद्भावेन तस्योपपत्तेः। नह्यभेदा सहकृतोभेदः प्रयोजकः। लाघवेन भेदमात्रस्यैव तत्र प्रयोजकत्वात्। अयञ्च कर्ताऽवस्थाभेदेन त्रिधा भिद्यते, शक्त उद्युक्तः प्रवृत्तश्चेति। तत्र यदा समस्तं कार्यमुपादाने उपसंहृतं तदा बहिः प्रवृत्तिविधुरकर्तृत्वशक्तिमात्रयुक्तत्वात् शक्त इत्यभिधीयते। एतदवस्थ एव निष्कळ इत्युच्यते समस्तकलासंसर्गशून्यत्वात्। लयवानिति च समस्तकार्यविलयाधिकरणत्वात्।

यदा तु प्राणीनां कर्मपरिपाकादिना कार्यप्रसवोन्मुखशक्तिस्तदोद्यक्तशक्तियुक्तत्वादुद्युक्त इति व्यवह्रियते, तदैव सकलनिष्कळ इति च, शक्तिकलायुक्तत्वात्पाशकलासंसर्गविधुरत्वाच्च। शक्तिकलानामधिकारावस्थासंसर्ग इति पक्षे तु वस्तुतश्शक्तिकलाहीनतया तद्युक्तत्वेनध्येयतया च सकळनिष्कळत्वम्। अयमेव भोगवानिति च व्यपदिश्यते, प्राणीनां भोगसंपादनायोद्युक्तत्वात् पालनव्यापारयोगाद्वा। यदा तु कार्योत्पादनाय व्यापृताश्शक्तयस्तदा प्रवृत्तशक्तियुक्तत्वात्प्रवृत्त इति व्यपदिश्यते। तदैव सकळ इति पाशकलायुक्तत्वात् शक्तिकलासंपर्काद्वा। अयमेवाधि-कारवानित्यभिलप्यते, कार्योत्पादनाय व्यापृताभिश्शक्तिभिस्संबन्धात्।

तदुक्तम् – शक्तयो हि कर्तव्यतिरस्कारेण स्वात्मन्यवस्थितालयतत्त्वाभिधा-नमवस्थाविशेषमुद्धीपयन्त्यो निष्कळादिपदप्रवृत्तावुपाधिभावं प्रपद्यन्ते। यदा तु ताः कार्यसम्पादनाय प्रवृत्ता न च तत्प्रतियोगभूमिं प्राप्तास्तदा पालनप्रवृत्तत्वात्भोगतत्त्वाभिधा-नमवस्थाविशेषमादर्शयन्त्यस्सकळनिष्कळादिपदप्रवृत्तौ कारणतामुपायन्ति। यदा तु ताः कार्यप्रयोगदशामनुप्राप्तास्तदाऽधिकारतत्त्वाभिधानमवस्थान्तरमवभासयन्त्यस्सकलादिपदप्रवृत्तौ हेतुतां व्रजन्तीति शक्तीनां प्रवृत्तिभेदकल्पनयाऽत्र भेदो न तु पारमार्थिक इति। अथवाऽनवच्छिन्नसुखात्मनि परमशिवे एकलोलीभावेन लयेन मुक्ता एव ललिनोऽभिधीयन्ते। बैन्दवभुवनवर्तिनो विषयसुखसन्ततिभाजोऽणुसदाशिवाभोगिनः। तद्वर्तिनो देहपरिस्पन्दादिविकारेण कार्यं कुर्वाणाः पञ्चकृत्यकारिणोऽनन्तादयोऽधिकारिणः। तदधिष्ठातृतया शिवोऽपि लयी भोग्यधिकारी चेति भेदं भजते। तदुक्तं **रत्नत्रये** –

तथाहि विमलोदारगंभीरे चिन्महोदधौ।
स्वात्मनि प्रविलीयन्ते ते नौके समधिष्ठिताः।।
शिवेन निभृतात्मीयशक्तयोऽन्येपि शेरते।
समालिंग्य महामायामपरावृत्तिशालिनीम्।।
तत्संस्पर्शसुखैकाग्रबुद्धयो भोगलम्पटाः।
तथा परे परव्योमसमाश्रित्याध्वमूर्धनि।।
पञ्चकृत्यानि कुर्वन्ति पत्युराज्ञानुवर्तिनः।
ततस्स तेषामेकोऽपि लयभोगाधिकारिणाम्।।
अधिष्ठातृतया भेदमौपचारिकमृच्छति। इति।

अत्र केचिदेवामाहुः – कर्मनिरपेक्ष एवेश्वरः कारणम्। तस्य तत्सापेक्षत्वे स्वतन्त्र्यविघातापत्तेः। न चैवं सर्वदा सर्वकार्योत्पत्तिप्रसङ्गः। अतिस्वतन्त्रस्याचिन्त्यशक्तेस्तस्य तत्तत्कार्योत्पादनेच्छायां तत्तत्कार्योत्पादकत्वोपपत्तेः। न चैवं कर्मानुष्ठानं विफलं स्यादिति युक्तम्। ईश्वरप्रसादसाहित्ये सफलत्वसम्भवात्। तत्प्रसादाभावे निष्फलत्वस्येष्ठत्वात्। अत एव कृतकर्मणामपि ययातिप्रभृतीनामीश्वरानुग्रहाभावे फलानवाप्तिः श्रूयते। नचेश्वराराधनात्मके वैदिककर्मणि कृते तस्य प्रसादाभाव एवानुपपन्न इति वाच्यम्। स्वतन्त्रतया कृतेऽप्याराधने प्रसादाभावस्याकृतेऽप्याराधने प्रसादस्य चोपपत्तेः। अत एवाभिव्यक्तेश्वरविभूतिलेशेषु प्रभुष्वियं परिपाटी दृश्यते। न चैवं कृतेऽपि कर्मणीश्वरप्रसादाभावस्याकृतेऽपि च तस्मिन् प्रसादस्य च शङ्कया वैदिककर्मानुष्ठाने प्रवृत्तिर्न स्यादिति वाच्यम्। राजसेवाकृष्यादिष्विव

सन्देहादपि प्रवृत्त्युपपत्तेः, पशोरस्वतन्त्रतया स्वतन्त्रेश्वरप्रेरणया प्रवृत्त्युपपत्तेश्च। कर्मसत्भावे मानाभावादपि न तत्सहकृतस्य कारणत्वं युज्यते। नन्विन्द्रियशरीरादिभिश्चिद्योगः किञ्चित्समवधानहेतुकः कदाचित्कत्वात् घटादिवदित्यनुमानं "अथेन्द्रियशरीरार्थै"रित्यादिना **श्रीमन्मृगेन्द्रे** प्रतिपादितं विद्यत इति चेन्न। ईश्वरेच्छयाऽर्थान्तरत्वात्। अत एव –

अविशिष्टेऽपि भोक्तृत्वे भुञ्जते दिवि केचन।
केचनावीचिमुख्येषु न स्यादेतदहेतुकम्।।
यत्तत्र हेतुः कर्मेति मन्तव्यं मुनिपुङ्गवाः।
उभयोः कृषिसाम्ये तु कश्चिद्धान्यानि यच्छति।।
न किञ्चिदपरस्तस्य कर्मकारणकं द्विजाः।

इत्यादि**श्रीमत्पौष्करोक्तं** भोगवैचित्र्येण लिङ्गेन तद्धेतुभूतकारणवैचित्र्यानुमानमपि प्रत्युक्तम्। किञ्च त्वन्मतेऽपि पूर्वपूर्वजन्मार्जितानां देवमनुष्यतिर्यगादियोनिप्रापकाणां कर्माणां सत्वेन तत्सहकृतेनेश्वरेण युगपत्तावद्योनिसम्बद्धदेहा उत्पद्येरन्। न च कर्मणां विपाकक्रमेण कार्यक्रम इति युक्तम्। विपाकस्य बदरफलादिष्विवावस्थाविशेषरूपत्वे तस्य कर्मण्यनुपपत्तेः। अधिककालसंबन्धरूपत्वे जन्मान्तरकृतानामेतज्जन्मकृतापेक्षयाऽपि पक्वतया तत्सत्वेऽपि –

अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुतः।

इत्यादिवचनसिद्धस्यैतज्जन्मकृतोत्कटपुण्यादिगतस्य फलजनकत्वस्य चानुपपत्त्यापत्तेः। तत्तत् कर्मफलोत्पादकसहकारिसमवधानरूपत्वे तत्तत्सहकारिसहितस्यैश्वरस्यैव तज्जनकत्वे कर्मवैफल्यात्, प्रळये सर्वोपसंहारेण बुद्धिविनाशेन तदाश्रितानां कर्मणामवस्थानासंभवेन सर्गाद्यसमये कर्मसापेक्षत्वं परिहृत्य कर्मनिरपेक्षस्येश्वरस्य जनकत्वावश्यं भावाच्च। तस्मात् कर्मनिरपेक्ष एवेश्वरः कर्तेति तन्मतं प्रतिक्षेप्तुमाह – **"कर्मानुसारत" इति**।

अयंभावः – न तावत् कर्मनिरपेक्षस्य सुखदुःखादिहेतुत्वं संभवति, तथात्वे वैषम्यापत्तेः। प्रभुष्वाशयदोषाज्जन्मान्तरादृष्टवशाद्वा वैषम्येण प्रसादाप्रसादयोरुपपत्तेः। ययातिप्रभृतीनामपि पुण्यकृत्वामहंकारेण तत्क्षये फलाभावः। अत एव **भगवता बादरायणेन** विविधसुखदुःखादिप्रापकत्वनिबन्धनं वैषम्यं युगपत्तावत्प्रजासंहारहेतुकं नैर्घृण्यञ्चाशंक्य कर्मसापेक्षत्वेन परिहृतं "वैषम्यनैर्घृण्येन सापेक्षत्वात्" इति। कर्मनैरपेक्ष्य सर्वदा सर्वकार्योत्पत्त्यापत्तेश्च। न च स्वतन्त्रतया कदाचित्करोति नान्यदेति न दोष इति युक्तं, कारणसद्भावे कार्यस्यावश्यकत्वात्। न चेश्वरस्य क्रमेण कार्यकारित्वं स्वभाव इति वाच्यम्। तस्य सहकारिसमवधानक्रमनिर्वाह्यतया तदभावे तस्यैवासिध्यापत्तेः। कर्मानुगुणफलदानेऽपि स्वापराधाद्यनुगुणनिग्रहानुग्रहकर्तुः प्रभोरिव स्वातन्त्र्याविघातोपपत्तेश्च। स्वाधिष्ठितकारणसापेक्षत्वेऽपि कुलालादिवच्चेतनान्तरेच्छानुविधानाभावाच्च। तदुक्तं **सिद्धगुरुभिः** –

स्वतन्त्रस्याप्रयोज्यत्वं करणादिप्रयोक्तृता।
कर्तृस्वतन्त्र्यमेतद्धिनकर्माद्यनपेक्षता।। इति।

यदप्युक्तं सर्गाद्यसमये निरपेक्षस्यैव हेतुत्वमिति तदप्ययुक्तम्। प्रळयेऽवान्तरोपादानाभावेऽपि

परमोपादानेऽवस्थानसंभवेन तदाऽपि कर्मापेक्षया अविरुद्धत्वात्। यदप्युक्तं कर्मसापेक्षत्वेऽपि युगपद्विरुद्धकार्योत्पत्त्यापत्तिरिति तदपि युगपत् कर्माणां सहकारिसाहित्यरूपविपाकाभावेन युगपत्कार्यनिष्पत्त्यभावोपपत्तेर्निरस्तम्। कर्मणां जनकत्वस्य च कर्मसाधनावसरे साधयिष्य-माणतया सहकारिभिरेव कार्यनिष्पत्त्युपपत्तौ कर्मणां वैयर्थ्यमित्यप्ययुक्तमेव।।

## कर्मणि प्रामाण्यम्

कर्मसद्भावे मानन्तु इष्टापूर्तादिकं फलोत्पत्तिप्राक्क्षणवर्तिव्यापारकं तदुत्पत्तिपूर्वं विनष्टत्वे सति तज्जनकत्वात् कृषिचिकीर्षादिवदित्यनुमानम्,

"किञ्च प्रपातटाकादिक्रियाः क्लृप्ताः फलार्थिभिः।
समनन्तरमेवेह न यच्छन्ति फलानि तु।।
आमुष्मिकत्वात्किन्तूर्ध्वं विनष्टा अपि ताः क्रियाः।
फलकालानुवर्तित्वात् संस्कारोऽपूर्वसंज्ञितः।
कल्प्यत"।। इत्येवमन्तेन **श्रीमत्पौष्करो**क्तमनुसन्धेयम्।

## व्यापारव्यवस्थापनम्

ननु अप्रयोजकमिदं व्यापाराभावेऽपि चिरध्वस्तस्य फलजनकत्वे विरोधा-भावात्। न च पूर्वक्षणवर्तित्वरूपं कारणत्वं व्यापाराभावेन निर्वहतीति वाच्यम्। चिरध्वस्तस्यापि व्यवहितपूर्वक्षणवर्तित्वाविरोधात्। अव्यवहितपूर्वक्षण-वर्तित्वघटत्वं तदिति चेन्न। पूर्ववर्तित्वमात्रस्य तत्घटकत्वसंभवेऽव्यवहितत्वस्य गौरवेण तद्घटकत्वायोगात्, यागादेरव्यवहितपूर्वक्षणवर्तित्वाभावेन स्वर्गादिकारण-त्वानापत्तेश्च। अव्यवहितपूर्वक्षणवर्तिव्यापारकत्वं तदिति चेन्न। व्यापार एवाव्याप्तेः। अव्यवहितपूर्वक्षणवर्तितादृशव्यापारकतदन्यतरत्वं तदित्यपि न। पूर्ववर्तित्वमात्रस्यैव तथात्वसम्भवेनात्यन्तगौरवपराहतत्वात्। वस्तुतस्तु त्वन्मते शक्तत्वमेव कारणत्वं, तच्च चिरध्वस्तस्य व्यापाराभावेऽपि सम्भवति। चिरध्वस्ते घटाव्यवहितपूर्वक्षणवर्तिव्यापाररहिते दण्डेऽपि शक्तत्वरूपजनकत्वसत्वेनानैकान्तिकत्वाच्च। तस्मान्नेदं व्यापारसद्भावे मानमिति।

अत्र ब्रूमः – हेतुकृतं जनकत्वं न शक्तत्वम्। अपि तूत्पादनलक्षणक्रिया। न चेयं शक्तमात्रवृत्तिः। शक्तत्वाविशेषेऽपि दण्डानामनेन दण्डेनायमुत्पादितो नत्वन्येनेति सर्वलोकव्यवहारात्। तथा च चिरध्वस्ते दण्डादौ शक्तत्वसद्भावेऽप्येतत्घटोत्पादनक्रियाश्रयत्वाभावान्न व्यभिचारः। अत एव नाप्रयोजकताऽपि, चिरध्वस्त कर्तृकोत्पादनक्रियाया व्यापारव्याप्तत्वात्। न चात्रापि व्याप्तावप्रयोजकत्वं, चिरध्वस्तकर्तृकोत्पादनक्रियात्वावच्छेदेन व्यापारस्य जनकत्वावधारणेन तन्मूलकस्य विपक्षे बाधकस्य सत्वात्। अन्यथा निर्व्यापारध्वस्तेन चैत्रेणापि पाकादिक्रियोत्पादापत्तेः। ननु तथाऽपि हेतोरसिद्धिः, फलोत्पादनेन योगादेस्स्थायित्वस्यैव कल्पनात्। नचैवमनन्तरमपि तदुपलम्भप्रसङ्गः, तदा स्थूलरूपावस्था परित्यागेन सूक्ष्मावस्था स्वीकारादिति चेन्न। क्रियायास्सूक्ष्मावस्थाया एवापूर्वपदव्यपदेश्यतयाऽपूर्वस्वीकारमन्तरेणासिध्युद्भावनायोगात्, स्थूलरूपावस्था

परित्यागस्यैव ध्वंसशब्दार्थत्वाच्च। तस्माद्यागदेर्व्यापारोऽङ्गीकरणीयः।।

## ध्वंसस्य व्यापारत्वनिराकरणम्

नन्वेवमपि यागध्वंस एव व्यापारोऽस्तु कृतमपूर्वेण। न च ध्वंसस्यानन्तत्वादनन्तः फलप्रवाहस्स्यादिति युक्तम्। अपूर्ववन्नियतकालफलजनकस्वभावत्वोपपत्तेः। अन्यथा-ऽपूर्वस्यापि तत्तत् श्रुत्याद्युदितकालानन्तरमपि किञ्चित्कालं जनितेन फलेन विनाशापत्तेः। न च कीर्तनादिना ध्वंसरूपस्य कार्यस्य विनाशासंभवेन तस्मिन् कृतेऽपि तत्फलभोगप्रसङ्ग इति वाच्यम्। कीर्तनादिध्वंसासहकृतस्य फलजनकत्वसंभवात्। केचित्तु कीर्तनादिकं फलप्रतिबन्धकमित्याहुः। तदयुक्तम्। तस्य ध्वंसे प्रतिबन्धकाभावसत्वेन कार्योत्पत्त्यापत्तेः। तस्मात्कीर्तनादिध्वंस एव प्रतिबन्धक इति। मैवम् – यागध्वंसस्य जनकत्वे ध्वंसत्वस्यातिप्रसक्तत्वेनावच्छेदकत्वासंभवेन यागस्याप्यवच्छेदककोटिनिवेशो वाच्यः। स च न संभवति। स्वयं जनकस्य जनकतावच्छेदककोटिनिवेशायोगात्। नचोद्भूतरूपादेस्साक्षात्कारजनकस्यालोकनिष्ठतज्जनकतावच्छेदककोटिनिवेशोऽपि दृष्ट इति वाच्यम्। तत्रालोकगतोद्भूतरूपत्वेन जनकतयाऽऽलोकस्य तन्निष्ठजनकतावच्छेदककोटिनिवेशेन रूपस्य स्वनिष्ठकारणतावच्छेदककोटिप्रविष्ठालोकगतकारणतावच्छेदककोटिप्रवेशेऽपि यागस्य यागत्वेनैव जनकत्वसंभवे ध्वंसस्य तत्कारणतावच्छेदककोटिप्रवेशाभावेन स्वनिष्ठकारणतावच्छेदककोट्यप्रविष्ठध्वंसनिष्ठकारणतावच्छेदककोटिनिवेशायोगात्, व्यापारविनाकृतस्य ध्वंसस्य कार्योत्पादविरोधित्वेन यागध्वंसस्य व्यापारत्वेऽपि स्वस्य स्वसहकृतत्वायोगेन फलानुत्पत्त्यापत्तेश्च। न च व्यापारकालावृत्तिध्वंसस्यैव तद्विरोधित्वं, लाघवेन व्यापारविनाकृतध्वंसत्वेनैव तद्विरोधित्वात् ध्वंसस्यापि व्यापारत्वे चैत्रादेरपि तद्द्वारा पाकादिजनकत्वप्रसङ्गाच्च।।

## देवताप्रीतेर्व्यापारत्वनिरसनम्

तथाऽपीन्द्रादिदेवताप्रीतिरेव व्यापारोऽस्तीति चेन्न। तीर्थस्नानादौ तदयोगात्। तत्रापि तीर्थाभिमानिदेवताप्रीतिस्संभवतीति चेत् उपवासादौ तदभिमानिदेवताया अभावेन तत्प्रीतिव्यापारकत्वायोगात्। सर्वत्रेश्वरप्रसाद एव व्यापारोऽस्त्विति चेत्, तथात्वेऽनन्तरमेव फलोत्पत्तिप्रसङ्गात्। सतीश्वरप्रसादे फलविलम्बायोगात्। तस्मा-द्यागादिजनितात्परिपक्वाद्धर्मादीश्वरप्रसादे फलं जायत इति धर्मादिकमवश्यमङ्गीकार्यम्।।

## दुरितापूर्वसमर्थनम्

ननु व्यापारत्वेनापूर्वकल्पने विहिताकरणे दुरितापूर्वं न सिध्येत्। विहिताकरण-ध्वंसस्य नरकाद्यहेतुत्वात्। हेतुत्वेऽपि तस्यैव स्थायित्वात्, विहितक्रियानुत्पादस्यैव नरकादिहेतुतया व्यापारानपेक्षत्वादिति चेन्न। तत्तद्विहितकालावच्छिन्नस्याकरणस्य हेतुत्वेन तत्तत्कालापगमेन तदवच्छिन्नाकरणस्यापि विनाशेन तत्रापि व्यापारतया दुरितकल्पनोपपत्तेः। व्यापारीभूतस्यादृष्ठस्याश्रयश्च बुद्धिरेव, नत्वात्मा। तथात्वे तस्य विकारित्वप्रसङ्गात्। कृष्यादेरपि कर्तुसंस्कारकत्वादर्शनात्। तदुक्तं **श्रीमत्पौष्करे** –

कल्प्यते न स पुंसस्स्याद्विकारत्वेन हेतुना।
कृष्यादेरपि संस्कारो न पुंसि परिदृश्यते।।
कुर्वन्ति यत्र संस्कारं क्रियास्साष्टगुणा मतिः।
एवं ज्ञानादिसंस्कारोऽप्यूह्यतां मुनिपुङ्गवाः।। इति।

यागादिव्यापारतया क्लृप्तस्यैव भोगवैचित्र्य आत्मनां शरीरादिसम्बन्धे च हेतुत्वात्तद्धेतुतयाऽपि तत्सिद्धिर्युज्यत एव।।

## कर्मविभागः

एतच्चादृष्टरूपं कर्मकार्यस्य भोगादेः प्रतिपुन्नियतत्वाद्विचित्रत्वात् प्रवाहानादित्वाच्च स्वयमपि तथाविधं अचेतनतयाऽस्वतन्त्रत्वेन ईश्वरसहकारिभूतं, क्रियानिर्वर्त्यत्वात्कर्मशब्दव्यपदेश्य-मतीन्द्रियत्वाददृष्टपदाभिधेयं, धर्माधर्मात्मकं प्रत्येकं मनोवाक्कायहेतुकतया त्रिविधम्। तत्र धर्मात्मकमिष्टदेवताध्यानस्तोत्रपठनार्चनादिरूपम्।

अधर्मात्मकन्तु परस्वजिहीर्षा तत्प्रवादतदुपघातादिरूपम्। अथवा कार्यस्य सुखदुःखादेराध्यात्मिकादिभौतिकादिदैविकभेदेन त्रैविध्यात्कर्मापि त्रिविधम्। तत्र चेतः प्रसादोद्वेगादिकमाध्यात्मिकम्। चन्दनानुलेपनगजाद्यभिभवजन्यमादि-भौतिकम्। अभिमतानभिमतवर्षातपादिजन्यमादिदैविकम्। मायादिकालाग्न्यान्ताध्व-वर्तिदेहेन्द्रियार्थप्रवर्तकतया पाशरूपञ्च।

तदुक्तं **श्रीमन्मृगेन्द्रे** –

तस्य प्रदेशवर्तित्वाद्वैचित्र्यात् क्षणिकत्वतः।
प्रतीपुन्नियतत्वाच्च सन्तत्वाच्च तत्गुणम्।।
ईशाविद्याद्यपेक्षित्वात् सहकारि तदुच्यते।
कर्मव्यापारजन्यत्वाददृष्टं सूक्ष्मभावतः।।
जनकं धारकं भोग्यमध्यात्मादित्रिसाधनम्।
तत्सत्यानृतयोनित्वाद्धर्मस्वरूपकम्।।
स्वापे विपाकमभ्येति तत्सृष्टावुपयुज्यते।
मायायां वर्तते चान्ते नाभुक्तं लयमेति च।।
इति मायादिकालान्तप्रवर्तकमनादिमत्।
कर्मव्यञ्जकमप्येतद्रोधिसद्यन्न मुक्तयः।। इति।

**त्रिलोचनशिवाचार्यस्तु** कर्मणः पाञ्चविध्यमाहुः। तथाहि – प्रथमं तावत्कर्मद्विविधम् अशुद्धं शुद्धं चेति। अशुद्धं भौतिकवैदिकाध्यात्मिकभेदात् त्रिविधम्। तत्र लौकिकं धर्मा-धर्मरूपं वापीकूपादिनिर्माणाभक्ष्यभक्षणादिजनितं निवृत्तिकलाव्याप्ताध्वावधिभोगस्य तद्धेतुशरीरादेश्च जनकम्। वैदिकं ज्योतिष्टोमाद्यनुष्ठानरूपं प्रतिष्ठाकलाव्याप्ताध्वावधि-भोगदम्। आध्यात्मिकं वैराग्यजन्यं विद्याकलाव्याप्ताध्वावधिभोगदम्। शुद्धमपि योगजन्यं विज्ञानजन्येति द्विविधम्। तत्राद्यमाधिमार्गिकसंज्ञं शान्तिकलाव्याप्ताध्वावधिभोगदम्। द्वितीयं

मन्त्राभिधं शान्त्यतीतकलाव्याप्ताध्वावधिभोगदम्। तदुक्तम् –

> लौकिकं वैदिकञ्चेति चाध्यात्ममधिमार्गकम्।
> मन्त्रं च पञ्चधा कर्मनिवृत्त्यादिकलागतम्।।

तस्मादेवंविधकर्मसापेक्ष एवेश्वरो जनको न निरपेक्ष इति स्थितम्। अथवेश्वरः कांश्चित्सुखिनस्सृजति कांश्चिद्दुःखिन इति रागद्वेषादिमत्तयाऽस्मदादितुल्यस्स्यादित्याशङ्क्याह – **कर्मानुसारत इति**। तत्तत्प्राणिकृत सुकृतदुष्कृतपरिपाकानुसारेण सुखदुःखादिप्रापक-त्वान्नरकादिप्रसक्तिरित्यर्थः। न च दुःखप्रापकं दुष्कृतमेव कथं कारयतीति वाच्यम्। पूर्वपूर्वदुष्कृतवशेन तदुपपत्तेः।।

## ईश्वरप्रवृत्तेः परार्थत्वम्

नन्वीश्वरस्य जगत्कारणे प्रवृत्तिः किं प्रयोजनोद्देशेन उत तं विनैव। नान्त्यः। प्रयोजनोद्धेश-मन्तरेण प्रेक्षावत्प्रवृत्तेरनुपपत्तेः। न च प्रयोजनाभिसन्धिं विनैव लीलया प्रवृत्तिः, तथा सति बालादिव समीक्ष्यकारित्वापत्तेः। लीलायामऽपि तज्जन्यसुखाद्यर्थमेव प्रवृत्तेश्च। आद्येऽपि किं स्वप्रयोजनोद्देशेन, उत परप्रयोजनोद्देशेन। नाद्यः। अवाप्तसमस्तकामतया दुःखरहितत्वेन च तस्य सुखावाप्तिदुःखपरिहारयोः कृत्युद्धेश्ययोरभावात्। नापि द्वितीयः। केवलपरार्थप्रवृत्तस्यापि प्रेक्षारहितत्वात्[10]। प्रेक्षावतामपि करुणया प्रवृत्तिर्दृश्यत इति चेन्न। निरुपाधिपरदुःखप्रहाणेच्छारूपकरुणासत्वे जगत्सृष्टेर्दुःखहेतुत्वेन तत्राप्रवृत्तेरेवौचित्यात्। तदुक्तं **भट्टपादैः** –

> प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।
> जगच्चासृजतस्तस्य किन्नाम न कृतं भवेत्।।

इतीमामाशङ्कां निवर्तयितुमाह – **पुंसामिति**। पुंसां प्रयोजनाय संसृतिं करोति। यद्यपि तत्काले संसृतिर्दुःखजनिका, तथाप्यनवच्छिन्नशिवानन्दानुभवप्रतिबन्धकस्य मलस्य परिपाकसद्भाव एव तत्त्वज्ञानोत्पादनेन निवर्तनीयतया परिपाकस्य च भोगं विनाऽसंभवेन परंपरयाऽनवच्छिन्नशिवसुखप्रकाशार्थमेव दुःखानुषक्तस्यापि संसारस्य निर्माणे परमकारुणी-कस्य प्रवृत्तिर्युज्यत इति भावः।।

## तत्त्वनिरूपणम्

अत्र संसृतिशब्दाभिधेये तत्त्वतात्त्विकसंघाते तत्त्वं निरूप्यते। तत्र तत्त्वानि षट्त्रिंशत्। तत्र शुद्धमायाकार्याणि शिवशक्तिसदाशिवेश्वरविद्याख्यानि पञ्चतत्त्वानि। अशुद्धमायाकार्याणि च कलाविद्यारागकालनियतिपुरुषप्रकृतिगुणबुध्यहंकारमनश्श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणि-पादपायूपस्थशब्दस्पर्शरूपरसगन्धतन्मात्राकाशवायुतेजोजलपृथिव्याख्यान्येकत्रिंशत्। प्रकृतिगुणयोरत्यन्तभेदाभावादेकतत्त्वता। तत्र प्रथमं शुद्धमायाकार्यान्निरूप्यते।

तत्र शुद्धशब्दोपादानकोटिनिविष्टं कारणं तदुपादानकारणतावच्छेदकं वा

[10] (टि) प्रेक्षारहितत्वादिति। तथा च बालवदसमीक्ष्य कारित्वापत्तिरिति भावः। प्रेक्षावतामपीति। करुणया परार्थं प्रवृत्तस्यापि प्रेक्षा दश्यते तथा च नोक्त दोष इत्यर्थः।

शिवतत्त्वाद्युपादानं वा शुद्धमाया।

तदुक्तं **रत्नत्रये** –

जायतेऽध्वायतश्शुद्धो वर्तते यत्र लीयते।
स बिन्धुः परनादाख्यो नादबिन्द्वर्णकारणम्।। इति।

अत्र नादशब्देन पराभिधाना वाग्वृत्तिरभिधीयते। बिन्दुशब्देन पश्यन्ती मध्यमाख्ये। अर्णशब्देन वैखर्याख्या। **तत्रैव** –

चतस्रो वृत्तयस्तस्य याभिर्व्याप्तास्त्रिधाणवः।
वैखरी मध्यमाभिख्या पश्यन्ती सूक्ष्मसंज्ञितः।।

इति वाग्वृत्तेश्चातुर्विद्याभिधानात्। तथा **श्रीमत्पौष्करेऽपि** –

शब्दाश्चतुर्विधास्तेपि वैखर्यादिविभेदतः।
वैखरी मध्यमाख्या च पश्यन्ती सूक्ष्मसंज्ञितः।।

इति चातुर्विद्यमभिहितम्। तत्र प्राणवायोरूर्ध्वप्रसरणेन श्रोत्रग्रहणयोग्यार्थबोधनक्षमा च वाणी वैखरी। बुद्धिस्थ वर्णतत्क्रमोपेता प्राणवृत्त्यगोचरीभूता सा मध्यमा। अविविक्तव-र्णान्तर्मुख्यर्थबोधना क्षमा पश्यन्ती। अर्थसामान्यप्रकाशकशब्दस्वरूपमात्ररूपा वाण्येव परा। तदुक्तं **तत्रैव** –

तत्र सा वैखरी श्रोत्रग्राह्यायाऽर्थस्य वाचिका।
स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा।।
प्रयोक्तृणामियं प्रायः प्राणवृत्तिनिबन्धना।
केवलं बुध्युपादाना क्रमवर्णानुपातिनी।।
अन्तस्संज्ञल्परूपा तु न श्रोत्रमुपसर्पति।
प्राणवृत्तिमतिक्रम्य वर्तते मध्यमाह्वया।।
अविभागेन वर्णानां सर्वतस्संहृता क्रमा।
स्वयंप्रकाशा पश्यन्ती मयूराण्डरसोपमा।।
स्वरूपज्योतिरेवान्तस्सूक्ष्मा वागनपायिनी। इति।

प्रयोक्तृणां प्रतिपादयितृणां प्रायोऽतिशयेनार्थस्य वाचिकेति योजना[11]। प्राणस्य वृत्तिः ऊर्ध्वप्रसरणं निबन्धनं व्यञ्जकं यस्यास्सा तथोक्ता। बुध्युपादाना बुध्युपारूढेत्यर्थः। मयूराण्डरसो यथा परस्परव्यतिषङ्गादविभक्तनीलपीतहरितादिवर्णस्तथा बुध्युपारोहात्पूर्वं वाग्वृत्तिरविविक्तककारादिवर्णतत्सन्निवेशविशेषेत्यर्थः। स्वयंप्रकाशा – अर्थप्रकाशना क्षमेत्यर्थः। स्वरूपस्य – अर्थसामान्यस्य। ज्योतिः – प्रकाशिका। अनपायिनी – वाग्वृत्त्यन्तरापेक्षया बहुकालावस्थायिनी। अन्तर्वाक्बुद्धिस्था वाक् सूक्ष्मसंज्ञितेत्यर्थः।

---

[11] (टि) अतिशयेनार्थस्य वाचिकेति योजनेति। इदमापतपतितम्। यार्थस्य वाचिकेति वाक्यपदैरिदं पदघटि-तवाक्यान्तरघटकपदानामन्वये पदसङ्कीर्णताव्यवहितान्वयश्च। अतो यथा न्यासमियं प्रयोक्तृणां प्रायः प्राणवृत्तिनिबन्धनेत्येवान्वयः।

अथवा बिन्दुर्वर्णशब्दैः पश्यन्त्याद्या तिस्रो वृत्तयोऽभिधीयन्ते। परा वाणी तु वृत्तित्रयकारणीभूता बिन्दुरेव। तदुक्तं **तत्रैव** –

तमेव वाणीं सूक्ष्माख्यामाहुरात्मविदो जनाः। इति।

तमेव – बिन्दुमेवेत्यर्थः॥

## बिन्दुव्यवस्थापनम्

नन्वत्र बिन्दुसद्भावे किं मानम्। न तावच्छुद्धशब्दरूपं कार्यम्। तस्यैवासिद्धेः। नाप्यशुद्धमायाधिष्ठातुरनन्तेशस्य देहादिकम्। विदेहस्यैवेश्वरवदधिष्ठातृत्वोपपत्तेः, शिवस्यैव सर्वत्र कर्तृत्वसम्भवाच्च। अन्यथा विश्वकर्तृत्वं तस्य न स्यात्। नापि शुद्धाध्ववर्तिनाम-मवकाशादिरूपं कार्यं शुद्धाध्व न एवासिद्धेः। तस्य निबिडमूर्तद्रव्याभावेनोपपत्तेश्च। नापि निवृत्यादिकलाः। तासां मोहिनी जन्यत्वोपपत्तेः, तत्सत्भावे मानाभावाच्च, सर्वत्र समवेत-शक्तेरेवोपादानत्वसम्भवाच्च। शक्तित्वेनोपादानत्वं तस्या न सम्भवतीति चेन्न। बिन्दोरपि शक्तित्वे न तदसम्भवापत्तेरिति।

मैवम् – कलादिक्षित्यन्तं कार्यं शरीरिकर्तृकं, दुःखानुषक्तकार्यत्वात् सकलाख्याणु-भोगहेतुत्वात् घटादिकार्यवदिति कार्यपक्षकेण मायाशरीरिकर्त्रधिष्ठिताजडव्याप्तोपादानत्वात्क-लाव्याप्तोपादानत्वाद्वा, मृदादिवदिति कारणपक्षकेण वाऽनुमानेन शरीरिकर्तृसिद्धौ तच्छरीरोपादानत्वेन बिन्दुसिद्धिः। मायाविद्याकलाव्याप्तात्वस्यागमसिद्धत्वान्न हेत्वसिद्धिः। यद्यपि महामायायामप्यागमो विद्यते[12], तथाऽपि तत्र युक्तेरपि सद्भावात् सा प्रदर्शिता। न च दुःखाननुषक्तकार्यस्य विज्ञानाकलभोग्यस्य चासिध्या जडाव्याप्तोपादानस्यासिध्या च हेतूनां व्यर्थविशेषणत्वम्। कार्यमात्रस्य शरीरिकर्तृकत्वे उपादानमात्रस्य शरीर्यधिष्ठितत्वे च तस्मिन्नपि शरीरे शरीरान्तरापेक्षयामनवस्थाप्रसङ्गेन सामान्यतो व्यभिचारनिश्चयेन तद्वा-रणार्थत्वात्।

नचाप्रयोजकत्वं, घटत्वादेरननुगतत्वेनानुगतस्याशुद्धकार्यत्वस्यैव शरीरिजन्यता-वच्छेदकत्वात्। नचाङ्कुरादौ व्यभिचारः। तत्राप्यनन्तादिशरीरस्यास्मदादीन्द्रियागम्यस्य जनकत्वोपपत्तेः। अत एव शिवस्यैव सर्वत्रास्मदाद्यनधीने साक्षात्कर्तृत्वोपपत्तेश्शरीरकल्पना व्यर्थेति परास्तम्। राजादेः फल्गुकृत्य इवाशुद्धेऽध्वनि साक्षाच्छिवस्य कर्तृत्वानौचित्याच्च। अस्मिन्नर्थे – "प्रोक्तोऽनन्तोऽसिते प्रभुः" इत्यागमोऽपि। न चानन्तशरीरेऽपि मायाया एव जनकत्वम्। मायाकार्येऽनन्तस्य कर्तृत्वेन स्वशरीरे स्वस्य कर्तृत्वविरोधात्। अथवा – मायाया उक्तेन हेतुना प्रयोज्यकर्त्रधिष्ठितत्वमनुमेयम्। प्रयोज्यत्वे शरीरित्वम्। शरीरस्य भुवनवृत्तित्वनियमात्तदाधारभूतभुवनसिद्धिः। भुवनस्य च तत्त्ववृत्तित्वनियमादशुद्धतत्त्वस्य तत्र जनकत्वायोगात्तत्र भुवनादिरूपशुद्धाध्वसिद्धौ तज्जनकत्वेन बिन्दुसिद्धिः। तदुक्तं **रत्नत्रये** –

---

[12] (टि) महामायायामपीति – बिन्धावपीत्यर्थः। जडाव्याप्तोपादानस्येति – जडाव्याप्तं प्रत्युपादान-स्येत्यर्थः। अत एव – अनन्तेशस्य कारणत्वावश्यम्भावदेव। आगमोऽपीति–प्रमाणमिति शेषः।

तथाहि मायाया तेषां क्षोभिताऽनन्ततेजसा।
कलादिक्षितिपर्यन्तं तत्त्वजातमसूतसा।।
अविशुद्धजडत्वेन मायामार्गतया तथा।
दुःखानुषङ्गन्मायेय कार्माणवमलान्वयात्।।
सकलाणूपभोग्यत्वात्परिणामोदयैरपि।
माया जडान्तरव्याप्ता परिणामवती च यत्।।
निष्पादने कलादीनां शरीरादिसमन्वितम्।
पुरुषं गमयेदेव पराधीनमसंशयम्।।
सुवर्णमिव कर्मारं मकुटोत्पादकर्मणी। इति।

तथा तत्रैव –

किञ्च मायाप्रयोज्येन कर्त्रा केनाप्यधिष्ठिता।
उपादानां कलादीनां कलाव्याप्तस्वरूपिणी।।
यथा मृत्कलशादीनां कुलालेन तथाह्यसौ।
प्रयोज्यः पशुभावेन कर्ता हेतुर्महेश्वरः।।
नियोज्यत्वाच्छरीरादियुक्तोऽनन्तः कुलालवत्।
मायायाः क्षोभको येन शरीरेणेन्द्रियेण च।।
देशादिना स सिद्धोऽध्वा विशुद्धश्शिवशासनः। इति।

अत्र मायामार्गतया – **मोहजनकतयेत्यर्थः**। एवं विशुद्धशब्दोपादानत्वेनापि तत्सिद्धिः। न च विशुद्धशब्दासिद्धिः। मायिककार्यकर्ताऽनन्तस्सविकल्पकज्ञानवान् सन्नेव तथाविधः प्रयोज्यकर्तृत्वात्सम्मतवदिति तत्सिध्युपपत्तेः **कामिकाद्यागमस्यापि** विशुद्धत्वाच्च। अविशुद्धत्वे तज्जन्यबोधेन मुक्त्ययोगात्। नचैवमस्मदादीनां शुद्धशब्दापरिज्ञानात् कामिकाद्यर्थावबोधो न स्यादिति वाच्यम्। अङ्गारस्थानीयेष्वशुद्धेषु वर्णेषु वह्निस्थानीयानामभिव्यक्तशुद्धवर्णानामेवार्थबोधजनकत्वोपपत्तेः। विशुद्धे च शब्देऽविशुद्धस्याकाशस्योपादानत्वायोगात् परिशेषेण बिन्दोरेवोपादानतयाऽभ्युपगन्तव्यत्वात्।

तदुक्तं **रत्नत्रये** –

बिन्दुरेव विकल्पाख्यां सविकल्पकबुद्धिषु।
स्ववृत्तिभेदसंभेदैरुल्लिखन्लभते चितम्।।
न चायं भावनासंज्ञस्संस्कारोऽध्यक्षभावतः।
संस्कारास्स्मृतिलिङ्गा हि नास्मत्प्रत्यक्षगोचराः।।
न बुद्धेः परिणामोऽयं मायोर्ध्वमपि सम्भवात्।
तथा विद्येश्वरोऽनन्तो मायामाक्रम्यतेजसा।।
ततस्सृष्टिं प्रकुरुते सविकल्पकबोधवान्।
अणुत्वे सति कर्तृत्वाऽदस्मत्प्रेष्यो यथा जनः।। इति।

अत्र सविकल्पकबुद्धिष्विति बहुव्रीहिः। सविकल्पकबोधयुक्तेष्वात्मसुस्थितो

बिन्दुरेव स्ववृत्तिभेदसंभेदैस्सूक्ष्मादिवाग्वृत्तिसम्बन्धैश्चितिमात्मशक्तिमुल्लिखन्नवच्छिन्नां कुर्वन्विकल्पाख्यां लभते, यत्सम्बन्धेन बुद्धीनां सविकल्पकत्वमित्यर्थः।

यद्वा – सविकल्पाख्यासु बुद्धिषु साहित्यप्रतियोग्युपस्थापकविकल्पव्यपदेशं वृत्तिद्वारा बिन्दुरेव लभत इत्यर्थः।

ननु कथं बिन्दुरेवेति निर्धार्यते। पूर्वानुभवजन्मसंस्कार एव विकल्पो भविष्यती-त्याशंक्याह – **न चायमिति**। संस्कारस्य स्मृतिलिङ्गानुमेयत्वेन प्रत्यक्षज्ञानविषय-विशेषरूपविकल्पत्वमयुक्तमित्यर्थः। परंपरया बुद्धिपरिणामस्याविशुद्धशब्दस्यैव विकल्पत्वमाशंक्यानन्तादिबुद्धिविषयस्य मायोर्ध्ववर्तिनो बुद्धिपरिणामत्वायोगेन निरस्यति – न **बुद्धेरिति**। अनन्तादीनां सविकल्पकबुद्धिरसिद्धेत्याशङ्कानिरासाय सविकल्पकबुद्धिं साधयति – **तथेति**। ततः मायाया इत्यर्थः। एवं शुद्धाध्ववर्तिनामवकाशादिहेतुत्वेनापि तत्सिद्धिः, प्रकृतस्याकाशस्य मायोर्ध्वमसत्वेन तद्धेतुत्वायोगात्। न च निबिडमूर्तद्रव्याभावे नान्यथासिद्धिः। शब्दादिहेतुतयाऽऽवश्यकस्याकाशस्यैवाशुद्धाध्वनि तद्धेतुतया क्लृप्तत्वेनेहापि परमव्योम्न एव तद्धेतुत्वौचित्यात्। तदुक्तं **रत्नत्रये** –

किञ्चावकाशदं प्राहुस्तमम्बरमनीश्वरम्।
शिवानामसमैश्वर्यभाजां भोगाधिकारयोः।।
ज्योतिर्गणा नामाकाशमिव भूतादिकारणम्। इति।

अत्र भूतादिस्तामसाहंकारः कारणं परंपरया यस्य तत्भूतादिकारणमित्यर्थः। एवं कलाहेतुत्वेनापि तत्सिद्धिः। न च तत्र मानाभावः।

अन्याश्च वृत्तयो बिन्दोर्निवृत्त्यादिकलात्मिकाः।
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च।।
शान्त्यतीता च पञ्चैताश्शुद्धमार्गे पुरात्मिकाः।
मिश्राशुद्धाध्वनोरेतास्तत्त्वाद्याधारिका स्थिताः।।
वस्तुरूपाः कला ज्ञेयाश्शब्दरूपाः पुरोदिताः।
शब्दवस्तूभयात्मासौ बिन्दुर्नान्यतरात्मकः।।

इति **श्रीमत्पौष्करस्थ** वचनस्यात्र मानत्वात्। कलाव्याप्ततयाऽशुद्धमायायास्तत्र जनक-त्वासंभवाच्छिवशक्तेरुपादानत्वम्। बिन्दोरुपादानत्वे शक्तित्वाभावप्रसङ्गश्च पूर्वत्र निरस्तः। अस्याश्च महामायायास्साक्षात्परंपरया च जातानि शिवशक्तिसदाशिवेश्वरशुद्धविद्याख्यानि पञ्चतत्त्वानि।।

## शिवतत्त्वनिरूपणम्

तत्र शिवतत्त्वं कुण्डलिन्याः प्रथमः परिणामः। तत्रैव च सूक्ष्माभिधाना वाग्वृत्तिः कामिकाद्यात्मनश्शिवज्ञानस्य। मुमुक्षुगते चित्प्रकाशे महत्त्वमहत्तरत्वमहत्तमत्वाभिव्यञ्जिकाया ईश्वरशक्तेर्नियोज्यत्वमलनिवर्तिकायाश्शिवपदप्रापिकायाश्च तस्या एवोपाधिभूता इन्धिका-दिकलाश्च। तदुक्तं **श्रीमन्मृगेन्द्रे** –

ऊर्ध्वाधोविषयालोको महान्यश्च महत्तरः।
ता इन्धिकाद्यास्ससस्थानास्तद्वानीशस्तिसृष्वपि।।
सर्वज्ञत्वादियोगेऽपि नियोज्यत्वं मलां शतः।
प्रमार्ष्टितद्यया साऽस्य मोचिका तत्पदञ्च यत्।।
मोचकस्तत्क्रियाकृच्च ययेशानं करोति तम्।
सोर्ध्वगा तत्पदञ्चेति तदीशश्चोर्ध्वगापतिः।। इति।

सस्थाना इति तासां स्थानभूताः कला अपीन्धिकादिसंज्ञा इत्यर्थः। तद्वानिति – इन्धिका दिपतिरित्यर्थः। तत्पदञ्चयदिति तस्या मोचिकायाश्शक्तेः पदं स्थानं या कला साऽपि मोचिकेत्यर्थः। एवमुत्तरत्रापि अस्य च तत्त्वस्य शिवाधिष्ठितत्वादात्मनां शिवत्वहेतुत्वाद्वा शिवतत्त्वव्यपदेशः। अस्यैव च नादसंज्ञाऽपि।।

## अथ शक्तितत्त्वम्

शिवतत्त्वपरिणामश्शक्तितत्त्वम्। अत्रैव च कामिकादेः पश्यन्ताख्या वाग्वृत्तिश्चेतनस्य संसारनिवर्तनहेतुभूतशिवशक्तिस्थानरूपानिवृत्त्यादिकलाश्च। तदुक्तं **श्रीमन्मृगेन्द्रे** –

निवर्तयति भूतानि यया साऽस्य निवर्तिका।
निवृत्तिरिति तत्स्थानं तत्रेशोऽपि निवृत्तिमान्।।
निवृत्तस्य गतिर्भूयो यया प्रच्या विलक्षणा।
निषिध्यते प्रतिष्ठा सा स्थानं तद्वांश्च तत्पतिः।।
त्यक्त्वाऽऽप्तगम्यविषयं यया ज्ञानं ददात्यणोः।
विद्या सा स्थानमप्यस्य विद्येशश्च तदीश्वरः।।
सर्वदुःखप्रशमनं ययास्य कुरुते हरः।
सा शान्तिस्तत्पदं चेति तत्कुर्वन्सोऽपि शान्तिमान्।। इति।

यया शक्त्या भूतानि संसारन्निवर्तयति निवर्तिका सा शक्तिः। तत्स्थानञ्च निवृत्तिः। तत्स्थानपतिर्निवृत्तिमानित्यर्थः। संसारान्निवृत्तस्य तद्विलक्षणवृत्तिनिषेधेन पूर्वैव वृत्तिर्यया शक्त्या प्रतिष्ठाप्यते सा शक्तिः तत्स्थानञ्च कलाप्रतिष्ठा। तद्वांश्च प्रतिष्ठापतिरित्यर्थः। आप्तविषयं शाब्दं ज्ञानं गम्यविषयमानुमानिकञ्च ज्ञानं त्यक्त्वाऽर्थात्साक्षात्काररूपं ज्ञानमणोर्यया शक्त्या करोति सा तस्यास्स्थानं कला च विद्या। तत्पतिर्विद्यापतिरित्यर्थः। एवमुत्तरत्रापि। अस्य तत्त्वस्य शक्तिशब्दवाच्यत्वं शक्त्यधिष्ठानत्वेन बोध्यम्। अस्यैव च बिन्दुसंज्ञाऽपि। एतत्तत्त्वद्वितयमपि –

वृत्तिस्तत्त्वात्मिका चास्य चतुर्धा संव्यवस्थिता।
शिवतत्त्वं सदेशाख्यमैशं विद्याह्वयं तथा।।
शुद्धान्येतानि तत्त्वानि रुद्राणूनां महात्मनाम्।
विचित्रपुरमालाभिः खचितानि महान्ति च।।

इति **श्रीमत्पौष्करे** पञ्चमी तु परा कला –

शिवतत्त्वाह्वयं तत्र पुराणी दशपञ्च च।

इति **रत्नत्रये** च शिवतत्त्वशब्देनैवाभिहितमिति न तद्विरोधः।।

## अथ सदाशिवतत्त्वम्

शक्तितत्त्वपरिणामस्सदाशिवतत्त्वम्। अत्रैव कामिकादीनां मध्यमाभिधानवाग्वृत्तेरवस्थानम्। इदमेव च तत्त्वं **कामिकादि**तन्त्रभेदकारणानां प्रणवादीनां सामीप्यादिमुक्तिभाजाञ्च तनुकरणभुवनादिकारणम्।।

## अथेश्वरतत्त्वम्

सदाशिवतत्त्वपरिणाम ईश्वरतत्त्वम्। एतच्चाधिकारिणामनन्तादीनां तदाराधनादिना तत्पदं प्राप्तानां रुद्राणाञ्च तनुभुवनाद्यारम्भकम्।।

## अथ विद्यातत्त्वम्

ईश्वरतत्त्वपरिणामो विद्यातत्त्वम्। अस्मिंश्च **कामिकादि**शास्त्रस्य वैखार्याख्याया वाग्वृत्तेरवस्थानम्। इदमेव करणभूतानां सप्तकोटिसंख्यानां मन्त्राणां गणेश्वराणां विद्याराज्ञीनाञ्च तनुभुवनादिकारणम्। अत्र च क्षुभिता कुण्डलिनीलयावस्थशिवाधिष्ठेयत्वाल्लयतत्त्वं शिवतत्त्वं शक्तितत्त्वञ्च। भोगावस्थशिवाधिष्ठेयत्वात् भोगतत्त्वं सदाशिवतत्त्वमधिकारावस्थ-शिवाधिष्ठेयत्वादधिकारतत्त्वम्। एवं च शुद्धानि तत्त्वानि पञ्चैव। एतेषां च लयभोगाधि-काररूपेण क्वचित् त्रित्वमभिहितम्। क्वचित्तु शिवशक्तिसदाशिवानां शिवाधिष्ठेयत्वेन सदाशिवतत्त्वत्वमेवाभिप्रेत्य त्रैविध्यमुक्तम्। क्वचित्तु शिवप्रेर्याधिष्ठितत्वेनेश्वरतत्त्वं विद्यातत्त्वं चैकीकृत्य चातुर्विद्यमुदितम्। परत्र शक्तिशिवतत्त्वे भोगत्वेनैकीकृत्य चतुष्ट्वं कथितमिति सर्वेषामविरोधः। केचित्तु शिवशक्तिसदाशिवेश्वरविद्यातत्त्वानां तत्तत्पदाभिधेयशिवद्वारकं लक्षणं वदन्ति। तथाहि – यदा परमात्माज्ञानमात्रयुक्तस्तदा शिवपदाभिधेयः, तदधिष्ठेयं तत्त्वमपि तदभिधेयम्। यदा क्रियामात्रयुक्तस्तदा शक्तिपदव्यपदेश्यः। तदधिष्ठेयं तत्त्वमपि तद्व्यपदेश्यम्। यदा शिवस्य ज्ञानक्रियाशक्तिसाम्येन प्रवर्तेते, तदा स सदाशिवः। तदधिष्ठेयं सदाशिवम्। शिवस्य सिसृक्षादशायां ते साम्येन प्रवर्तेते। एकस्यापि तदोद्रेकहेतोरभावात्। यदा तु तस्य क्रियाशक्तिरधिका ज्ञानशक्तिर्न्यूना तदा स ईश्वरः तदधिष्ठेयमपीश्वरम्। कार्यजननदशायां हि क्रियाशक्तिरुद्रिक्ता, ज्ञानशक्तिस्तु न्यूना। एवं तस्यैव यदा ज्ञानशक्ति-रधिका, क्रियाशक्तिर्निकृष्टा तदा स एव विद्या, तदधिष्टेयं विद्यातत्त्वम्। पालनदशायां हि क्रियाशक्तिर्निकृष्टा ज्ञानशक्तिरुत्कृष्टा। तदुक्तम् –

तयोः प्रसरतोस्साम्ये तत्त्वात्मा स्यात् सदाशिवः।
ईशोऽधिकक्रियाशक्त्या विद्याज्ञानातिरिक्तये।।[13] इति।

**तत्त्वप्रकाशेऽपि** –

"ज्ञानक्रियाख्य शक्त्योरपकर्षोत्कर्षयोरभावेन।

---

[13] (टि) ज्ञानातिरिक्तयेति – अधिकज्ञानशक्त्येर्थः।

य: प्रसरस्तं प्राहुस्सदाशिवाख्यं बुधास्तत्त्वम्।।
न्यग्भवति यत्र शक्तिर्ज्ञानाख्योद्रिक्ततां क्रिया भजते।
ईश्वरतत्त्वं तदिह प्रोक्तं सर्वार्थकर्तृ सदा।।
न्यग्भवति कर्तृशक्तिर्ज्ञानाख्योद्रेकमश्नुते यत्र।
तत्तत्त्वं विद्याख्य"मिति।।

केचित्तु न केवलं शिवादितत्त्वपञ्चकमेव महामायावस्था, किन्त्वशुद्धमाया प्रकृती अपि। तेन समस्तमपि कार्यं साक्षात्परंपरया वा कुण्डलिनीजन्यमेव। महामाया हि त्र्यवस्था विश्वोपादानम्। स्थूलसूक्ष्मपरात्मिकास्तिस्रोऽवस्था:। तत्र स्थूलावस्था सत्त्वरजस्तमसां साम्यावस्था प्रकृत्यभिधाना भोग्यार्थोत्पादिका। सूक्ष्मा तु भोक्तृत्रौपाधिककार्यजनिका कलाद्यविभागरूपा मायासंज्ञा। पराऽपि शुद्धवर्णजनिका[14]। न च मायाप्रकृत्यो: कार्यत्वे मानाभाव:। मायाप्रकृतीकुण्डलिनीकार्ये तत्कार्यव्याप्तत्वात्, प्रयोज्यकर्त्रधिष्ठितत्वाद्वा, यद्यत्कार्यव्याप्तं तत्तत्कार्यं, यथा मायेय मृद्व्याप्तो घटो मायेय:, यत्प्रयोज्यकर्त्रधिष्ठितं तत्तत्कण्डलिन्यारब्धं, यथा मृदित्यनुमानयोस्सद्भावात्। नचाप्रयोजकत्वं, मायाया अकार्यत्वे तत्कार्यस्य परंपरया कलारब्धत्वाभावेन कलाविशुध्या कार्यवर्गविशुध्यभावप्रसङ्गात्, अन्यस्य शुध्याऽन्यस्य शुद्धावती प्रसङ्गात्। कार्यकारणभावे त्वभेदात्कलाविशुध्या कार्यवर्गशुद्धिर्युज्यते। न च व्याप्यव्यापकभाव एवातिप्रसङ्गनिवारक:। शिवतच्छक्तिविशुध्या सर्वस्यापि कार्यस्य सर्वदा शुद्धिप्रसङ्गात्। तस्मात् सर्वमपि कार्यं साक्षात् परंपरया वा कुण्डलिन्यारब्धमिति। तदुक्तम् –

अवस्थामपरे बिन्दोर्मायामाहुर्विपश्चित:।
कलाव्याप्तस्वरूपा च पुद्गलाधिष्ठिता च यत्।।
तथैव प्रकृतीस्तेषां स्थूला सूक्ष्मा परेत्यसौ।
महामाया भवेत्त्रेधा तत्र स्थूला गुणात्मिका।।
बुध्यादिभोग्यजननी प्रकृति: पुरुषस्य सा।
सूक्ष्मा कलादितत्त्वानामविभागस्वरूपिणी।।
जननी मोहिनी माया सर्वाशुद्धाध्वकारणम्।
मन्त्रयोनि: परा माया नित्या कुण्डलिनी तु या।।
उपादानं शरीराणां विद्याविद्येश्वरात्मनाम्।
येषां माया मते नित्या कलाविद्यादिकारणम्।।
न तेषामसितो मार्ग: कलाशुध्या विशुध्यति।
कला हि शोधिता: पञ्चनिवृत्त्याद्या विशुद्धये।।
तत्त्वादीनामतो बिन्दो: कार्यमध्वाऽविशेषत:।
इत्याख्याता महामाया सर्वाध्वप्रकृति: परा।।
आचार्यैस्तैरशेषाध्वकार्यवादविचक्षणै:। इति।

तदप्युक्तम् –

---

[14] (टि) भोक्तृत्वौपाधिककार्यजनिकेति – भोक्तृत्वनिमित्तं यत्कार्यं तज्जनिकेत्यर्थ:।

मायातत्त्वं जगत्बीजमविनाश्य शिवात्मकम्।

इत्याद्यागमेषु तदकार्यत्वप्रतिपादनात्। प्रदर्शितयोश्च हेत्वोरप्रयोजकत्वमेव। जडव्यापकशुध्या व्याप्यशुद्धेरुपपत्तेः। तदुक्तम् –

अन्ये तु कथयन्त्यत्र मायामध्वस्वनश्वराम्।
उपादानं कलादीनामभिव्याप्ताञ्च बिन्दुना।।
व्याप्तिश्च तादृशी ज्ञेया तयोरागमवेदिभिः।
यया व्यापकशुध्यैव विशुद्धिरितराश्रया।। इति।
यया यादृश्या जडकर्तृकत्वविशिष्टयेत्यर्थः।

अथाशुद्धमाया तत्प्रभवञ्च कार्यजातन्निरूप्यते। अत्राशुद्धमाया नाम पृथिव्यादेः कलान्तस्योपादानकोटिनिविष्टं कारणं उपादानतावच्छेदकं वा। सात्वजन्येति न तत्रोपादानान्तरापेक्षा। नचाजन्यत्वासिद्धिः, प्रवाहानादिकार्योत्पादकत्वे नाजन्यत्वासिद्धेः। न च स्वयमपि प्रवाहानादितया तथाविधं कार्यं जनयेदिति युक्तं, धर्मिग्राहकप्रमाणेन लाघवसहकृतेनैकत्वेनैव सिद्धतया प्रवाहानादित्वायोगात्। ननु किं धर्मिग्राहकं प्रमाणम्। न तावत्घटादिकमचेतनविशिष्टात्मोपादानकं कार्यत्वाद्व्यतिरेकेणात्मवदिति मानं, मृदादिनाऽर्थान्तरत्वात्। पृथिव्यादिपक्षकाण्यप्येवमेव तन्मात्रादिनाऽर्थान्तरत्वेन निरसनीयानि। नापि कलाकालनियतयस्तथा तत्त्वादिति मानं कार्यत्वे मानाभावेन हेतोरसिद्धेरिति। मैवम् – कार्यत्वस्य तत्तन्निरूपणावसरे साधयिष्यमाणत्वात्। नचैवमपि तत्त्वत्रितयमात्रोपादानकोटिनिवेशसत्भावात् अथवा प्रळयकालवर्तिभिस्सिद्धेर्नाशुद्धाध्ववर्त्तिसकलतत्त्वोपादानकोटिनिवेश इति वाच्यम्। साक्षात् परंपरया वाऽत्रोपादानकोटिनिवेशस्य सद्भावात्। अथवा प्रळयकालवर्तिनि कर्माणि किञ्चि-दाश्रितानि, संस्कारत्वात्सम्मतवदित्यनुमानं मानम्। नचात्मनाऽर्थान्तरत्वं, तदाश्रितत्वस्य निरस्तत्वात्। ननु शिवस्य मायायाश्चाविचित्रत्वात् कथं विचित्रकार्यजनकत्वम्। न च कर्मवैचित्र्येण तदुपपत्तिः। तस्योपादानवैचित्र्याभावे तत्प्रयोजकत्वादर्शनेन घटपटादाविव तद्वैचित्र्यस्यावश्यकत्वादिति चेन्न। अविचित्रस्यैव सुवर्णस्य स्वस्तिकरुचकादाविव शक्तिवैचित्र्येण तदुपपत्तेः। तस्याश्च मायाया अशुद्धत्वं मोहजनकत्वेन दुःखानु-षक्तभोगसाधनतत्त्वतात्विकसंहतिजनकत्वेन च बोद्धव्यम्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

तदेकमशिवं बीजं जगतश्चित्रशक्तिमत्।
सहकार्यधिकारान्तं संरोधिव्याप्यनश्वरम्।। इति।

अत्र जगत इत्यसितं विवक्षितम्। सहकारिणां कर्मणां यावदधिकारं कार्योन्मुख्यपर्यन्तं संरोधि-देहाद्युत्पादनेन बन्धनशीलं, व्यापि–स्वकार्यव्यापकं, अनश्वर–प्रळयकालेऽप्यवस्थितमित्यर्थः। तथा **श्रीमत्पौष्करेप्युक्तम्** –

नित्यैका व्यापिनी वस्तुरूपा कर्माश्रिताऽशिवा।
साधारणी च सर्वेषां सकलानां मुनीश्वराः।।
प्रळये लीनदेहस्य कर्मिणोऽणोरहर्मुखे।

देहादेः कारणं माया सूक्ष्मस्थूलात्मकस्य तु।।
कलादिक्षितिपर्यन्तमविभक्तिपुरस्सरम्।
विभक्तत्वाद्यथा बीजे स्कन्धपर्णफलादिकम्।। इति।

वस्तुस्वरूपेत्यनेनास्मिन्मते परमत इव नानिर्वचनीयत्वमिति प्रकटितम्।।

## सत्कार्यवादः

कलादिकार्यञ्च कारकव्यापारात्पूर्वमपि स देवाभिव्यज्यते। नत्वसदेवोत्पद्यते। असत्वे नृश्रृङ्गादिवदुत्पत्त्यसंभवात्। नन्वत्यन्तासत्वात्युज्यते नृश्रृङ्गादेरनुत्पत्तिः। कलादेस्तूत्पत्तेः पूर्वमेवासत्वादुत्पत्तिस्संभवतीति चेन्न। सार्वकालिकाभावप्रतियोगित्वापेक्षयाऽभावप्रतियोगित्वस्यैव लाघवेनानुत्पत्तिप्रयोजकत्वात्। मृत्पिण्डादिगताभावप्रतियोगिनोऽपि पटादेरुत्पत्तिदर्शनात्तत्तत्र न प्रयोजकमिति चेन्न। तत्गताभावप्रतियोगित्वस्य तत्रानुत्पत्तिप्रयोजकत्वात्, शशमस्तकसिकतासंबन्ध्य- भावप्रतियोगिनोश्शृङ्गतैलयोस्तत्रानुत्पत्तिदर्शनात्। प्रयोगश्च घटो मृत्पिण्डे पूर्वमपि सन् तत्रोत्पद्यमानत्वात् यो यत्रासन् स तत्र नोत्पद्यते, यथा तैलश्रृङ्गादिकं सिकताशशमस्तकयोरिति।

नन्वत्रानुपलब्धिबाधः। न च खननादिव्यापारात्पूर्वं जलादेरिव सतोऽप्यनुपलब्धिर्युक्तेति वाच्यम्। तत्र मृदादिना तिरोधानेन सतोऽप्यनुपलब्धेर्युक्तत्वात्। इह तु कारकव्यापारात्पूर्वं सत्वे उपलम्भप्रसङ्गात्। नह्यत्र सतोऽप्यावारकं किञ्चिदस्तीति चेन्न। इहापि मृत्पिण्डाद्यवस्थाया एवावारकत्वात्। यदि तु घटाद्यभावेनैवाप्रतीत्युपपत्तावावारकत्वं तस्या न कल्पनीयमिति मन्यसे, तदा जलादेरप्यभावादेवाप्रतीत्युपपत्तौ तत्राप्यावारकत्वकल्पना व्यर्था। यदि तु तत्र पूर्वमपि जलावस्थानस्य प्रमाणप्रमितत्वादावारकं कल्प्यते तदेहापि प्रदर्शितेन प्रमाणेन पूर्वमपि सत्वप्रमितेरावरकं कल्पनीयमिति तुल्यम्। नन्वप्रयोजकमिदं, तत्रासतोऽप्युत्पत्तिसंभवात्। न चैवं सिकतास्वपि तैलमुत्पद्येतेति वाच्यम्। आपादकाभावात्। तत्रासत्त्वमुत्पत्त्यविरोधी- त्यङ्गीक्रियते, न तु उत्पत्तिप्रयोजकमिति। येन तिलादन्यत्र तैलस्य उत्पत्तिरापाद्यत इति।

मैवम्। इदमत्रोत्पद्यते नान्यत्रेति व्यवस्था तावद्दृश्यते। अत्र च नियामकम् अन्वेषणीयं, सति संभवे त्यागायोगात्। न च तैलोत्पत्तौ तिलत्वं घटोत्पत्तौ मृत्त्वमिति नियामकमस्तीति वाच्यम्। अनुगतस्य सम्भवेऽननुगतस्य तत्त्वायोगात्। न च तत्प्रागभावाधिकरणत्वं प्रयोजकं, प्राग्भावाधिकरणत्वापेक्षया तस्य गुरुत्वात्। न च तच्छक्तिमत्वं प्रयोजकं, शक्तेस्सूक्ष्मावस्थारूपत्वेऽस्मत्पक्षप्रवेशात्सामर्थ्यरूपत्वे निमित्तादावपि तदुत्पत्त्यापत्तेः। तस्माद्यत् यत्र प्रागप्यस्ति तत्तत्रोत्पद्यत इत्येवाभ्युपेयम्। न च किं कुत्र प्रागप्यस्तीति प्रश्नेऽनुगतं नियामकं वक्तव्यमिति वाच्यम्। अनुगतस्यासम्भवेन तत्राननुगतस्यापि नियामकत्वोपपत्तेः। नन्वेवं कुलालादिव्यापारो व्यर्थः। तत्पूर्वमपि घटादेस्सत्वादिति वाच्यम्। आवारकमृत्पिण्डाद्यवस्थापनयनेन सार्थकत्वात्। नन्वेवं कूपादौ जलाद्यभिव्यक्तं मृदादौ घटादिरुत्पन्न इति व्यवहारभेदो न स्यात्, विशेषाभावादिति चेन्न। यत्र स्थूलरूपेणापि पूर्वमवस्थितं पश्चादभिव्यज्यते तत्राभिव्यक्तिः, यत्र तु पूर्वं स्थूलरूपेणानवस्थितं सूक्ष्मरूपेणावस्थितं पश्चादभिव्यज्यते तत्रोत्पत्तिरिति विशेषोपपत्तेः। अथवा यत्र कारण-

गतावस्थाविशेषेणावृतं तदवस्थापनयनेनाभिव्यज्यते तत्रोत्पत्तिः, यत्र तु द्रव्यान्तरेणावृतं तन्निवृत्त्याऽभिव्यज्यते तत्राभिव्यक्तिरिति तयोर्भेदः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

तद्व्यक्तिर्जननं नाम तत्कारकसमाश्रयात्।
तेन तन्तुगताकारं पटाकारावरोधकम्।।
वेमदिनाऽपनीयाथ पटव्याप्तिः प्रकाश्यते।
यथा घटादिगूढस्य पटादेस्तद् व्युदासतः।।
नासतः क्रियते व्यक्तिः कलादेर्ग्रन्थितस्तथा। इति।

पटादेरित्यभिव्यक्तिमात्रे दृष्टान्तः। नन्वभिव्यक्तिरपि यदि पूर्वं सती तदा कारकव्यापारो व्यर्थः। यदि तु पूर्वमविद्यमानोत्पद्यते तदा असदुत्पत्तिरङ्गीकृता स्यादिति चेन्न। अभिव्यक्तेरपि पूर्वं सूक्ष्मरूपेणावस्थितायास्स्थूलरूपेणाभिव्यक्त्युपपत्तेः। नचैवमनवस्था, त्वत्सम्मतोत्पत्तिवदुपपत्तेः। घटाद्युत्पत्तिरपीदानीमुत्पद्यते न वा। यदि नोत्पद्यते तदा पूर्वमपि सत्वापत्त्या कारकव्यापारवैयर्थ्यम्। अथ तु उत्पद्यते, तदाऽनवस्थेति। यदि तु उत्पत्तेस्स्वपरनिर्वाहकत्वेन नानवस्था, तदभिव्यक्तावपि तुल्यम्। उपादानोपादेययोरभेदादपि सदेव कार्यमभिव्यज्यते। अभेदस्तु सामानाधिकरण्यादिना साधितः। किञ्च कार्येणासम्बद्धं कारणं किं कार्यमुत्पादयति, उत सम्बद्धम्। नाद्यः। असंबद्धस्य जनकत्वेऽतिप्रसङ्गात्। अतो द्वितीयः पक्षः परिशिष्यते। संबन्धश्च द्विनिष्ठतया कार्यस्याप्याधारस्य सत्वमपेक्षते। नह्यस्ति संभवसंबन्धी नास्ति संबन्धस्त्वस्तीति। अतस्सदेवकार्यम्। तदुक्तं **सांख्यैः** –

असत्त्वान्नास्ति संबन्धः कारणैस्सत्वसंगिभिः।
असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः।। इति।

तथा – असदकरणादुपादानाग्रहणात्सर्वसंभवाभावात्। शक्तस्य शक्यकारणात् कारण-भावाच्च सत्कार्यमिति। अत्र उपादानं कारणं तस्य ग्रहणं कार्येण संबन्धः। तस्मात् असंबद्धमेव जनयत्विति शङ्का निरासाय सर्वसम्भवाभावादित्युक्तम्। असम्बद्धस्य जनकत्वे सर्वस्मात्सर्वं भवेत्, तदभावादित्यर्थः। नन्वसम्बद्धमपि न सर्वं जनकं किन्तु शक्तमेवेति शङ्कां व्युदस्यति शक्तस्येति। शक्तेरपि सर्वगोचरत्वे पूर्वोक्तदोषानिवृत्तेश्शक्यगोचरत्वं वाच्यम्। शक्यत्वञ्च शक्तिसंबन्धात्मकमसतो न घटत इति सत्वसिद्धरिति भावः। करणाभावात् – कार्यस्य उपादानकारणानतिरेकादित्यर्थः। तथा **श्रीमन्मृगेन्द्रेप्युक्तम्** –

तदाधाराणि कार्याणि शक्तिरूपाणि संहृतौ।
विवृतौ व्यक्तिरूपाणि व्याप्रियन्तेऽर्थसिद्धये।।
तन्त्वादिकारकादीनां पटासत्वे पटार्थिनः।
सत्वे कारकशब्दोऽपि व्यपैतीति हतं जगत्।।
साफल्यमसदुत्पत्तावस्तुकारकवस्तुनः।
उत्पादयतु सर्वस्मात् सर्वस्सर्वमभीप्सितम्।।
अथाशक्यं यतश्शक्यमत्र वः किन्नियामकम्।
न च पश्यामि तत्किञ्चिच्छक्तिश्चेत् सिद्धसाध्यता।। इति।

अत्रार्थसिद्धय इत्यन्तेन प्रस्ताविते सत्कार्यपक्षे तन्त्वादीत्यनेन पटादेर्वेमादिषु प्रवृत्तिः पटासत्व एव युज्यते, वेमादेः कारकव्यपदेशश्च। सत्वे तु उभयमपि न स्यादित्यानुपपत्तिराशङ्किता। सा च साफल्यमित्यादिना असदुत्पत्तिपक्षे कारकव्यापारसाफल्यमङ्गीकृत्यातिप्रसङ्गेनासदुत्पत्त्यसंभवप्रदर्शनेन परिहृता।।

## कलातत्त्वनिरूपणम्

अस्याश्च मायायाः प्राथमिकं कार्यं कलातत्त्वम्। लक्षणन्तु कर्तृशक्तिप्रकाशकत्वं, न तु मायाप्रथमकार्यत्वम्। मायायाः कलानिरूप्यत्वे नान्योन्याश्रयात्। ननु कोऽयं कर्तृशक्तेः प्रकाशः। न तावत्परिणामविशेषः। अपरिणामित्वात्तस्याः[15]। नाप्याच्छादकमलनिवृत्तिः। तस्य सर्वात्मना निवृत्तौ तदैव मोक्षप्रसङ्गात्। नाप्येकदेशेन। एकदेशेन निवृत्तिर्हि किं खद्योतप्रभादिना तमस इवैकदेशेन विनाशः, किं वा पाषाणप्रक्षेपादिना जलोपरिस्थितशैवालसंघातस्येवैकदेशेनान्यत्रापसरणम्। नाद्यः। खद्योतप्रभाया अन्यत्र गमने पुनस्तमो जननस्यैव कलाया अन्यत्र गमने[16] पुनस्तत्र मलोद्भवस्य वक्तुम-शक्यत्वेन सर्वदा प्रकाशप्रसङ्गात्। नापि द्वितीयः। मलस्य स्पन्दवत्वप्रसङ्गात्। नचेष्टापत्तिः। व्यापकावच्छादकतया व्याप्यत्वेनाङ्गीकृतस्य तस्य तदयोगात्। अत एव तस्याजसंयोगमङ्गीकुरुषे[17]। स्पन्दवत्वे तदनुपपत्तिप्रसङ्गात्। तस्मात्प्रकाशो दुर्वच इति ।

मैवम् – अच्छादकनिवृत्तेरेव प्रकाशत्वात्। मलस्य स्वरूपेणानिवृत्तावप्याच्छादनहेतुशक्त्यभि-भवेतदुपहितत्वरूपाच्छादकत्वाभावेनाच्छादकनिवृत्तेर्वक्तुं शक्यत्वात्। ननु कलातत्त्वे किं मानम्। कर्तृशक्तिप्रकाशरूपं कार्यं प्रमाणमिति चेन्न। तस्य कर्मादिनाऽप्युपपत्तेः, कलला कर्तृशक्तिप्रकाशे सर्वत्र कर्तृशक्त्यभिव्यक्त्या सर्वकर्तृत्वापत्तेश्चेति चेन्न। कर्मणो भोगजनकत्वेनैव क्लृप्ततयाऽन्यत्र तत्तज्जनिक्षमतत्तत्सहकृतस्यैव जनकत्वेन कर्ममात्रेण निष्पत्त्यसंभवेनान्यस्य कल्पनीयत्वात्, कर्तृशक्त्यावारकस्य तमोरूपस्य मलस्य निवृत्तिस्तैजसपदार्थायत्ता तमोनिवृत्तित्वात् सम्मतवदिति विशेषानुमानेऽर्थान्तराभावाच्च[18]। अत एव च क्षुभितमायया शरीरादिना वाऽर्थान्तरता निरस्ता। अतैजसत्वेन तस्य तमो निवर्तकत्वायोगात्। ननूभयानुगतं किन्तमस्त्वम्, आवारकत्वञ्चेत्कुड्यादीनामपि स्यादिति चेन्न। निस्पर्शत्वे सत्याच्छादकत्वं तमस्त्वमित्युपपत्तेः। न च सर्वविषयकर्तृशक्तिप्रकाशापत्तिः। कर्तृसामान्यप्रकाशकत्वेन[19] विशेषापादने आपादकाभावात्। इदञ्च कलातत्त्वं कर्तृशक्त्यभिव्यञ्जकत्वेन तत्प्रयोजकतया हेतुकर्तृत्वेन कर्तृकारककोटिनिविष्टम्। अत एव "प्रयोक्त्र्यादिमहीप्रान्त"मित्यत्र प्रयोक्त्री शब्देन कलानिर्दिष्टा। तदुक्तं **श्रीमन्मृगेन्द्रे** –

---

15 (टि) तस्याः – शक्तेः।

16 (टि) कलाया अन्यत्र गमन इत्यत्र गमनेनेति स्थितं चेद्रमणीयम्।

17 (टि) अजसंयोगं – अनादि संयोगम्।

18 (टि) विशेषानुमानेऽर्थान्तराभावाश्चेदिति। तथा च विशेषानुमानमपि तत्र प्रमाणमिति भावः। कर्तृसामान्यप्रकाशत्वेनेत्यादि।

19 (टि) कर्तृशक्तिसामान्यप्रकाशेनेति वर्तितव्यम्। तथा च तत्सामान्यप्रकाशे साधिते तमादाय न सर्वविषयशक्तिप्रकाशरूपविशेषापादनं संभवति। आपादकाभावादित्यर्थः।

कर्तृशक्तिरणोर्नित्या विभ्वी चेश्वरशक्तिवत्।
तमश्चन्नतयाऽर्थेषु नाभाति निरनुग्रहा।।
तदनुग्राहकं तत्त्वं कलाख्यं तैजसं हरः।
मायां विक्षोभ्य कुरुते प्रवृत्त्यङ्गं परं हि तत्।।
तेन प्रदीपकल्पेन तदाच्छन्नचितेरणोः।
प्रकाशयत्येकदेशं विदार्य तिमिरं घनम्।।
इत्येतदुभयं विप्रसंभूयानन्यवत् स्थितम्।
भोगक्रियाविधौ जन्तोर्निजगुः कर्तृकारकम्।। इति।

निरनुग्रहा – **तमोनिवृत्तिविनाकृता**। एतदुभयम् – **अणुः कलातत्त्वञ्च**। अन्यद्व्याख्यातप्रायम्। अतैजसत्वेऽपि मायायास्तैजसकलानिष्पादकत्वं विचित्रशक्तिकत्वेन तैजसोत्पादानुकूलशक्तियोगेन। नन्वस्तु कलाख्यं तत्त्वम्। तस्य कार्यत्वं कुतस्सिध्यति, यतस्तज्जनकतया मायाऽनुमीयत इति चेन्न। तमो निवृत्त्याऽनुमीयमानस्य तस्याकार्यत्वे सर्वदा तमोनिवृत्तिप्रसङ्गेन कार्यत्वसिद्धेः। तस्यैव[20] कादाचित्कत्वसंभवे सहकारि कादाचित्कत्वस्याकल्पनीयत्वात्। अस्य च कलाशब्दवाच्यत्वं तमः प्रोत्सारणहेतुत्वेन "कलाक्षेप" इति प्रोत्सारणरूपे क्षेपे तच्छब्दप्रकृतेर्धातोः[21] पाठात्। तदुक्तं **पौष्करे** – "कलामलनिवर्तना"दिति।।

## अथ विद्यातत्त्वम्

कलातत्त्वप्रथमारभ्यं विद्यातत्त्वम्। दृक्शक्तिव्यञ्जकं वा बुद्धिग्रहणकारणं वा तत्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

एवं व्यक्त क्रियाशक्तिर्दिदृक्षुर्गोचरं दृशः।
भजन्त्यनुग्रहापेक्षां स्वयं द्रष्टुमशक्नुवन्।।
तदर्थं क्षोभयित्वेशः कलामेव जनिक्षमाम्।
तत्त्वं विद्याख्यमसृजत्करणं परमात्मनः।।
तेन प्रकाशरूपेण ज्ञानशक्तिप्ररोचिना।
सर्वकारकनिष्पाद्यमवैति विषयं परम्।। इति।

एवं पूर्वोक्तया रीत्या कलाव्यक्तकर्तृशक्तिः पुरुषो गोचरम् – बुद्ध्याख्यं तदुपारूढं बाह्यमर्थं वा मलावृतत्वेन स्वयं द्रष्टुमसामर्थ्याद्दृशोऽनुग्राहकमपेक्षते। तदर्थं तस्य पुरुषस्योपकाराय, ईशः – अनन्तेशः विद्याख्यं व्यवहितविषयघटादिग्राहकचक्षुराद्यपेक्षयाऽव्यवहितविषयबुद्धिग्राहकत्वादात्मनः[22] परं करणमसृजत्। तेन च सृष्टेन ज्ञानशक्त्यभिव्यञ्जकेन प्रकाशात्मकेन सर्वैश्चक्षुरादिभिः कारकैर्विषयोपहितत्वाकारेण निष्पाद्यं परमव्यवहितं विषयं बुध्याख्यमवैतीत्यर्थः।

ननु बुद्धेर्ग्रहणमसिद्धम्। ततस्तद्धेतुत्वेन न विद्या सिध्यति। न च पुरुषभोगस्य

[20] (टि) ननु सहकारिविरहेण न सर्वदा तमोनिवृत्तिरित्याशङ्क्याह – तस्यैवेति।

[21] (टि) तच्छब्दप्रकृतेः – कलाशब्दप्रकृतेः।

[22] (टि) अव्यवहितविषयबुद्धीति। अव्यवहितविषयात्मकबुद्धिरित्यर्थः।

सुखादिरूपबुद्धिगोचरज्ञानत्वेन[23] बुद्धिज्ञानसिद्धिः। स्रक्चन्दनादिज्ञानस्यैव भोगत्वसम्भवादिति। मैवम् – स्रक्चन्दनादिज्ञानस्य भोगहेतुत्वेन भोगत्वाभावात्। न च मन एव बुद्धिग्रहणे करणं, निरसिष्यमाणत्वात्।

**श्रीमत्पौष्करेऽपि** –

ततो विद्याकलातत्त्वादभूत् भोगार्थमात्मनः।
कलया कर्तृयुक्तस्य बुद्धिलक्षणकर्मणः।।
आलोचने यत्करणं सा विद्या शिवशासने।
बुद्धिर्हि कर्मग्राह्यत्वादात्मनो घटकुड्यवत्।।
ग्राह्यं करणसापेक्षं दृष्टं रूपादिकं यथा।
ततश्च चक्षुराद्येश्च क्रमेणार्थे निदर्शिते।।
बुध्यन्तैर्निश्चितार्थैस्तां पुमान्संवेत्ति विद्यया।
तस्मात्भोग्यस्य संवित्तौ विद्याकरणमात्मनः।। इति।

कर्तृयुक्तस्य – **अभिव्यक्तकर्तृशक्तिकस्येत्यर्थः**। बुद्धेरालोचन इत्युक्ते बुद्धिकर्तृकालोचन इत्यर्थभ्रमस्स्यात्, तन्निरासाय कर्मण इत्युक्तम्। बुद्धेः कर्मेत्यर्थभ्रमनिरासाय वक्षणेति। बुद्धेः कर्मत्वं साधयति – **बुद्धिर्हीति।** अत्र यद्यपि ग्राह्यत्वं ग्रहणकर्मत्वमित्यर्थे साध्याभेदः, तथाऽपि जडत्वादित्यर्थो ग्राह्यः। एवं कर्मत्वं साधयित्वा तेन करणानुमानं दर्शति – **ग्राह्यमिति।** ग्राह्यं स्वग्रहाय करणसापेक्षमित्यर्थः। बुद्धेर्भोग्यत्वं तत्संविदि विद्यायाः करणत्वञ्च दर्शयति – **ततश्चेति**। चक्षुराद्यैर्बुध्यन्तैः क्रमेणार्थे निदर्शिते निश्चितैरर्थैरवच्छिन्नां तां बुद्धिं विद्यया पुमान्संवेत्तीत्यर्थः। यद्वा – निश्चितार्थैर्बुध्यन्तैरर्थे दर्शिते तान्दर्शितार्थां बुद्धिमित्यर्थः।।

## अथ रागतत्त्वम्

कलाया द्वितीयं कार्यं रागतत्त्वम्। आत्मगतेच्छाशक्त्यभिव्यञ्जकं वा, बुद्धिधर्माभिष्वङ्गजनकं वा तत्त्वम्[24]। ननु किमर्थं रागतत्त्वमङ्गीक्रियते। इच्छाशक्त्यभिव्यक्त्यर्थमिति चेत्, बुद्धिधर्माभिलाषेणेच्छाशक्त्यभिव्यक्त्युपपत्तेः। आवश्यकञ्च तस्य तदभिव्यञ्जकत्वम्। अन्यथा प्रतिनियतविषयतयेच्छाशक्त्यभिव्यक्त्ययोगात्। बुद्धिधर्मेण तत्तत्गोचराभिलाषेण तत्तदिच्छाशक्त्यभिव्यक्तौ हि तस्याः प्रतिनियतविषयत्वं संभवति। रागतत्त्वेन तदभिव्यक्तौ नियामकाभावेन[25] तदयोगात्। अत एव न विद्यातत्त्वमङ्गीकर्तव्यम्। तत्कार्यस्य दृक्शक्त्यभिव्यञ्जनस्य बुद्धिवृत्त्यैव निष्पत्तिसंभवात्, दृक्शक्तेर्नियतविषयत्वाय तस्याव्यञ्जकत्वेनावश्यकल्पनीयत्वात्। विद्याया व्यञ्जकत्वे विषयनियमहेतोरभावात्,[26]

---

[23] (टि) सुखादिरूपबुद्धिगोचरेति। सुखादिरूपिणी या बुद्धिस्तद्विषयकेत्यर्थः।

[24] (टि) तत्त्वमिति। रागतत्त्वमित्यर्थः।

[25] (टि)नियमाकाभावेनेति। रागतत्त्वस्य सर्वविषयसाम्यादित्याशयः। तदयोगात् – प्रतिनियमविषयत्वायोगात्। तस्याः बुद्धिवृत्तेः।

[26] (टि) विषयनियमहेतोरभावादिति। विद्यायास्सर्वविषयसाम्यादित्याशयः।

बुद्धिग्रहो मनसोपपद्यत इति न तदर्थमपि विद्यातत्त्वं कल्पनीयम्। एवं कलातत्त्वमपि विषयप्रतिनियमायावश्यकल्पनीयव्यञ्जकभावप्रतिनियतविषयाहंकारधर्मसंरम्भेणैव कर्तृ-शक्तिव्यक्त्युपपत्तेर्न कल्प्यम्। बुद्धिधर्माभिष्वङ्गजनकतयाऽपि न रागतत्त्वमङ्गीकार्यम्। तस्य सुखतत्साधनत्वादिज्ञानेनोत्पत्तिसंभवात्। न च विरक्तस्य सुखादिसाधनता ज्ञाने सत्यप्यभिष्वङ्गो न दृश्यत इति वाच्यम्। तत्र भोगेन विषयदोषदर्शनादिना वा तदभावोपपत्तेः,[27] तस्य तत्प्रतिबन्धकत्वात्। अन्यथा तवापि विरक्तस्य रागतत्त्वेनाभिष्वंगोत्पत्त्यापत्तेः। न च तस्य रागतत्त्वमेव नास्तीति युक्तम्। विषयदोषदर्शनादिना क्वचिन्निवृत्ततृष्ण-स्यापि विषयान्तरेऽभिलाषदर्शनेन तदभावस्याशक्याभ्युपगमत्वात्, रागतत्त्वस्य नियतविषयतयाऽभिलाषहेतुत्वायोगेन सुखादिसाधनता ज्ञानस्य तद्धेतुत्वेनाङ्गीकर्तव्यत्वाच्च। तस्मात्तत्त्वत्रयमपि वृथैवाभ्युपगतमिति। मैवम् – अभिलाषबोधवृत्तिसंरम्भाणामिच्छाज्ञान-कृतिव्यञ्जत्वेऽपि न तैरन्यथासिद्धिः।

तथाहि – बोधवृत्त्यादय उत्पन्ना व्यञ्जकाः। तदुत्पत्तिश्चेन्द्रियबुद्धिमनसां व्यापारेण, सोऽपि च तत्गोचरेण पुरुषाधिष्ठानेन। न चेश्वराधिष्ठानेन तदुपपत्तिः। देहेन्द्रियादिव्यापारस्य जीवाधिष्ठानजन्यत्वनियमात्। अन्यथा कुलालादिदेहेऽपि तदधिष्ठानं विनैवेश्वराधिष्ठानेन कुंभाद्युत्पत्तिप्रसंगात्। अधिष्ठानञ्चापरोक्षज्ञानचिकीर्षाकृतिरूपम्। तच्चातिनिबिडेन मलेनावृतत्वाच्छून्यकल्पमप्रकाशमानतया न कार्यनिष्पत्तये पर्याप्तमिति प्रकाशमानमभ्युपगन्तव्यम्। तत्प्रकाशश्च न तदधीनव्यापारा[28]नन्तरभाविभिर्बोधवृ-त्त्यादिभिस्संभवतीत्यन्यदेव प्रकाशकमुपेयमिति तत्प्रकाशकत्वेन कलादिसिद्धिः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

विद्याव्यक्ताणुचिच्छक्तिनुन्नाक्षेशाक्षगोचरान्।<br>
स्वीकृत्य पुं प्रयुक्तस्य करणस्यैति कर्मताम्।।

मतिस्ते नेतर। इति। अत्र विद्यातत्त्वाभिव्यक्तयाऽणुचिच्छक्त्या नुन्नं प्रेरितमक्षेशमक्षाधिष्ठातृमनो येषां तेषामक्षाणां गोचरान्स्वीकृत्य मतिर्बुद्धिः पुंप्रयुक्तस्य पुंसा प्रकर्षेण युक्तस्य साक्षात्संबद्धस्य करणस्य विद्याख्यस्य कर्मतामेति। तेन विद्यातो व्यतिरिक्तेत्यर्थः। विद्याग्रहणं कलारागयोरप्युपलक्षणम्। तेन तत्त्वत्रयाभिव्यक्ताणुशक्तित्रयनुन्नेत्यर्थः पर्यवस्यति। बुद्धिकर्तृकघटादिकर्मकग्रहणे चक्षुरादेः करणतयाऽऽत्मकर्तृकहग्रहणकरण-त्वाभावेनात्मकर्तृक[29]बुद्धिकर्मकग्रहणे करणस्यैव पुंसा साक्षात्सम्बन्ध इति तात्पर्यम्। न च कलादेरपि व्यापाराय तत्गोचराधिष्ठाने वाच्ये तत्प्रकाशाय पदार्थान्तरकल्पनापत्तिः। व्यापारं विनाऽपि स्वरूपत एव तस्य व्यञ्जकत्वाभ्युपगमात्[30]। न च मनः प्रभृतेरप्यव्याप्रियमाण-स्यैव बोधवृत्त्यादिजनकत्वम्। तथानुपलम्भात्। तद्व्यापारानुकूलयत्नाभावाच्च[31]। न चैवं मनः प्रभृतिगोचरकर्तृशक्त्यादिव्यञ्जकत्वमेव कलादेस्स्यात्, न तु घटादिगोचर

[27] (टि) तदभावोपपत्तेः। अभिष्वङ्गाभावोपपत्तेः।

[28] (पा) तदधिष्ठानाधीनव्यापारा

[29] (टि) आत्मकर्तृकग्रहणकरणत्वाभावेनेति। चक्षुरादेरित्यर्थः।

[30] (टि) तस्य व्यञ्जकत्वेति। तस्य – कलादेः।

[31] (टि) तद्व्यापारानुकूलेति। कलादिव्यापारानुकूलेत्यर्थः।

तदभिव्यञ्जकत्वमपीति वाच्यम्। मनः प्रभृतिगोचरकर्तृशक्त्याद्यभिव्यक्त्यर्थं तत्कल्पनेऽपि[32] लाघवेन कर्तृशक्त्याद्यभिव्यक्तित्वस्यैव तज्जन्यतावच्छेदकत्वेन सर्वत्र तद्व्यञ्जकत्वोपपत्तेः। तदुक्तम् –

> कलोद्वलितचैतन्यो विद्यादर्शितगोचरः।
> रागेण रञ्जितश्चापि बुध्यादिकरणैर्युतः।।
> भुङ्क्ते तत्र स्थितो भोगान्भोगैकरसिकः पुमान्। इति।

न च तत्सत्वेऽपि[33] कथं घटादिगोचरकर्तृशक्त्याद्यनभिव्यक्तिरिति युक्तम्। तावता तद्विषये संरम्भादेरपि सहकारित्वं कल्पनीयम्। न तु क्लृप्तव्यञ्जकपरित्यागस्तत्रोचितः। न च मनोव्यापारगोचरयत्नानुभवस्य त्वयैव प्रदर्शनात्कलामात्रव्यंग्यत्वं तत्गोचरकर्तृशक्तेरयुक्तमिति वाच्यम्। प्राथमिकतद्व्यापारानुकूलकृत्यादिशक्तेरेव कलामात्रव्यंग्यत्वाभ्युपगमेनान्यत्र यत्नादिव्यंग्यत्वेऽप्यविरोधात्। अत एव बुद्धिसंवेदनकरणत्वेनापि तत्सिद्धिरविरुद्धा। बुध्युत्थापिताहंकारगतयत्नाधीनव्यापारस्य मनसः प्राथमिकबुद्धिसंवेदने करणत्वासंभवेन तत्र विद्यायाः करणत्वकल्पनेऽन्यत्रापि तस्या एव करणत्वौचित्यात्। एवं बौद्धरागादिहेतुत्वेनापि रागतत्त्वसिद्धिः। न च सुखादिसाधनता ज्ञानादिनाऽन्यथासिद्धिः। तस्यापि ज्ञानस्य बुध्यादिव्यापारजन्यत्वेन तत्गोचरेच्छाशक्त्यभिव्यञ्जनद्वारा रागतत्त्वाधीनत्वात्। नचैवं रागतत्त्वमेवास्तु, कृतं बौद्धेन रागेणेति वाच्यम्। रागतत्त्वसत्वेऽपि तत्तद्विषयविशेषे प्रवृत्त्यदर्शनेन बौद्धरागसाहित्येनैव जनकत्वौचित्यात्। नापि बौद्धराग एवास्त्विति वक्तुं युक्तम्। तद्धेतुत्वेन रागतत्त्वसिद्धेर्दर्शितत्वात्। नन्वेवं रागतत्त्ववद्द्वेषतत्त्वमपि सिध्येदिति चेन्न। आत्मनि द्वेषशक्तेरभावेन तद्व्यञ्जकत्वेन तत्कल्पनाया अयुक्तत्वात्। नचेच्छाशक्ति-वद्द्वेषशक्तिरपि कुतो नास्तीति वाच्यम्।

बुद्धिधर्मद्वेषेणैव तत्कार्यसिध्युपपत्तावात्मनि द्वेषकल्पने मानाभावात्। आत्मनीच्छाशक्तिस्तु बुध्यादिगोचरप्राथमिकव्यापारायाङ्गीकर्तव्या। नचात्मन्येव द्वेषशक्तिमङ्गीकृत्य बुद्धिगतो द्वेषो नाभ्युपेय इति युक्तम्। आत्मगतत्ववादिनोऽपि तत्तद्विषयकद्वेषाभिव्यक्त्यर्थं बौद्धस्य द्वेषस्याङ्गीकर्तव्यत्वात्। न च बौद्धद्वेषजनकतया तत्सिद्धिः। आत्मानन्दादि[34]गोचररागेणैव तद्विरोधिनि द्वेषस्योत्पत्त्युपपत्तेः। दुःखादिसाधनता ज्ञानस्य वा तत्र[35] हेतुत्वसंभवात्। न हि सुखादिसाधनता ज्ञानायैव प्रदर्शितया रीत्या रागसिद्धवत् द्वेषसिद्धिरस्ति। प्राथमिकप्रवृत्ते रागसाध्यत्ववत्द्वेषसाध्यत्वाभावात्। तस्माद्रागतत्त्वमुपेयम्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

> तदभिव्यक्तचिच्छक्तिर्दृष्टार्थोऽप्यपिपासितः।
> नैति तज्जनकं रागं तस्मादेवासृजत्प्रभुः।।

---

[32] (टि) तत्कल्पनेऽपि – कलादिकल्पनेऽपि। कर्तृशक्त्याद्यभिव्यक्तत्वस्यैव – कर्तृशक्त्यादिनिष्ठाभिव्यक्तत्वस्यैव। सर्वत्र – मनः प्रभृतौ घटादौ च।

[33] (टि) तत्सत्त्वेऽपीति – मनः प्रभृतिगोचरकर्तृशक्त्यभिव्यञ्जनसत्वेपीत्यर्थः।

[34] (टि) आत्मानन्दादीति – स्वानन्दादीत्यर्थः। आदिना पुत्राद्यानन्दपरिग्रहः। तद्विरोधिनि – आत्मानन्दादी विघातके।

[35] (टि) तत्र – द्वेषे

स तेन रञ्जितो भोग्यं मलीमसमपि स्पृहन्।
आदत्ते न च भुञ्जानो विराममधिच्छति।। इति।

तया विद्ययाऽभिव्यक्तचिच्छक्तित्वेन दृष्टार्थोऽपि अपिपासितोऽनभिव्यक्तेच्छाशक्तिस्सन्नैति भोग्याहरणाय न व्याप्रियते। अतस्तज्जनकमिच्छाशक्त्यभिव्यञ्जकं रागतत्त्वं तस्मात्कलातत्त्वादसृजत्। तेन रागतत्त्वेन रञ्जितोऽभिव्यक्तेच्छाशक्तिः मलीमसमधर्माद्यनुषक्तमपि भोग्यमादत्त इत्यर्थः। यद्वा – अपिपासितोऽजनितबौद्धाभिलाषस्तेन रञ्जितो जनिताभिलाष इत्यर्थः। रागतत्त्वस्याभिलाषजनकत्वन्तु प्रदर्शितया रीत्या बुध्यादिव्यापारद्वारा। रागतत्त्वेन सामान्यतोऽभिव्यक्तेच्छाशक्तित्वेन रञ्जितस्यैव तत्तद्विषयतृष्णात्मा बौद्धौ रागो जायते, पटस्येव त्रिफलाकषायादिना रञ्जितस्य माञ्जिष्ठकादिनेति विषयाभिलाषं प्रति रागतत्त्वस्य जनकत्वम्। न च भोग्यविशेषस्यैवाभिलाषजनकत्वेन तत्त्वं न भोक्तृगतस्य तत्त्वान्तरस्येति युक्तं, भोग्यमात्रस्य तज्जनकत्वे वीतरागाभावप्रसङ्गात्। तदुक्तम् –

भोग्यविशेषे रागे न हि कश्चिद्वीतरागस्स्यात्। इति।

तथा **श्रीमत्पौष्करेऽपि** रागस्वरूपमभिहितम् –

अथाणोः कलितस्यैव विद्यया कलयाऽपि च।
कलातो जायते रागस्सद्यः पुंसां प्रवृत्तये।।
अनिच्छन्नहि भुञ्जानो दृश्यते क्वचिदप्यणुः।
रागात्भोग्येषु सक्तत्वात्भोग्यं भोक्तुमतोऽर्हति।।
स च बुद्धिगतो रागः किमन्यत्रापि चेष्यते।
अलमेकेन चेद्द्वाभ्यां किमत्र कथयेश्वर।।
योऽयं बुद्धिगतो रागस्संप्रोक्तः प्रत्ययात्मकः।
स स्यादनेन रक्तस्य नारक्तस्य कदाचन।।
तस्मादनेन रागेण विद्यया कलुषीकृता।
चिच्छक्तिरिच्छारूपैव सती बुद्धिगतेन तु।।
रागेण सह संपृक्ता विषयं विषयं प्रति।
भिन्ना विशिष्टरूपस्यादन्या सामान्यरूपिणी।।
तत्र ग्राहकनिष्ठोऽयं रागो बौद्धात् पृथङ्मतः। इति।

अत्र कलातो रागः – रागतत्त्वं, पुंसां प्रवृत्तये – भोग्योपभोगाय जायते। ननु रागतत्त्वस्य कया प्रणाड्या भोग्योपभोगहेतुत्वमित्यपेक्षयामाह – "**अनिच्छन्निति**"। अनिच्छन् – अनभिव्यक्तेच्छाशक्तिस्सन्, भुञ्जानो न दृश्यते। ततः किमित्यत आह – रागादिति। तथा च रागो भोग्यगोचरेच्छाशक्त्यभिव्यञ्जनेन भोगे उपयुज्यत इत्यर्थः। बुद्धिरागेणैवेच्छाशक्त्यभिव्यक्त्युपपत्ते रागतत्त्वं व्यर्थमित्याक्षिपति – **स चेति**। चोऽवधारणे। बुद्धिगतो राग एव सः इच्छाशक्त्यभिव्यञ्जक इत्यर्थः। बुद्धिराग एव रागतत्त्वं विना न भवतीति तदप्यङ्गीकरणीयमिति समाधत्ते योऽयमिति। तात्पर्यन्तु प्रदर्शितम्। तत्तद्विषयकबुद्धिरागाभिव्यक्ताचिच्छक्तिस्तत्तदिच्छारागतत्त्वभिव्यक्ता इच्छामात्रमिति द्रष्टव्यम्।।

## कालतत्त्वनियतितत्त्वे

अथ मायोद्भवं कालतत्त्वं नियतितत्त्वं च निरूप्यते। यद्यपि मायाकार्यत्वेन कलातत्त्वनिरूपणानन्तरमुत्पत्तिक्रमानुरोधेनैतयोरेव निरूपणमुचितं तथाऽपि कलादि-तत्त्वत्रयव्यापारानन्तरमेवैतयोर्व्यापारात् प्रवृत्तिक्रमानुरोधेन तदानन्तर्यमनयोरिति द्रष्टव्यम्। तदुक्तं **श्रीमत्पौष्करे** –

कलादिभिस्त्रिभिस्तत्त्वैः प्रवृत्तं पुरुषं ततः।
लवत्रुट्यादिभिः कालः कलयत्यात्मवृत्तिभिः।। इति।

एवं नियतेरपि प्रदर्शयिष्यमाणे **श्रीमत्पौष्करस्थे** तल्लक्षणवचने तदनन्तरं प्रवृत्तिः प्रतिपादितेति द्रष्टव्यम्। तत्र लवकुट्यादिप्रतीतिविशेष्यः कालः, भोगेयत्तापरिच्छेदहेतुर्वा। तदुक्तं **श्रीमन्मृगेन्द्रे** –

त्रुट्यादिप्रत्ययस्यार्थः कालो माया समुद्भवः।
कलयन्नासमुत्थानान्नियत्या नियतं पशुम्।। इति।

आसमुत्थानात् – स्थूलरूपेणाभिव्यक्तिमारभ्य। पशुं कलयन् – इयत्तावच्छिन्नभोगं कुर्वन्नित्यर्थः। तत्रैव नियतेरप्यर्थाल्लक्षणमाचष्टे – नियत्यानियतमिति। नियतिकार्यं नियमनं तन्निरूपणावसरे वक्ष्यते। अयं च कालस्सर्वत्र कार्ये निमित्तम्। निमित्तताऽपि नाधिकरणत्वमात्रेण। एवं तज्जन्यताऽपि न कार्यत्वेन। किन्तु तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषत्वेनैव। अन्यथा अचिरप्ररूढादपि वृक्षादेः पुष्पफलाद्युत्पत्त्यापत्तेः। तदेतत्सर्वं "नाकाले जायत" इत्यादिना **श्रीमत्पौष्करे** प्रतिपादितम्। अस्य च लवत्रुट्यादिभेदस्स्वाभाविक एव, नत्वौपाधिकः। उपादिभेदप्रतिसन्धानविधुराणामपि तद्व्यवहारात्। क्षणोपाधेर्निर्वक्तुमशक्यत्वाच्च। स्पन्दस्य द्वित्र्यादिक्षणावस्थाधित्वात्। न च क्रियोत्पत्त्यनन्तरः पूर्वदेशसंयोगनाशोत्पत्तेः पूर्वः कालः क्षणम्। तत्कालमात्रावस्थायिपदार्थं विना तस्य कालान्तराद्व्यवच्छेदायोगात्।

ननु तथाविधपदार्थं विनाऽपि क्रियोत्पत्त्यनन्तरत्वेन पूर्वदेशसंयोगनाशोत्पत्तिपूर्वत्वसहकृतेन कालान्तराद्व्यवच्छेदः। तत्र क्रियोत्पत्त्यनन्तरत्वमात्रं संयोगनाशोत्पत्तिपूर्वत्वञ्च यद्यपि विवक्षितक्षणपूर्वोत्तरक्षणयोरपि वर्तते। तथाऽप्येकविशिष्टमपरं नास्तीति तद्व्यवच्छेदो भविष्यतीति चेन्न। स्वत एव तन्मात्रवृत्तिपदार्थावच्छेदेन वा भेदाभावे तस्य कालस्य क्रियोत्पत्त्यानन्तर्यस्यैवासिद्धेः। क्रियोत्पत्तिर्हि क्रियाया आद्यकालसंबन्धः। तत्र यदि द्वितीयः कालस्स्वगतेन स्वमात्रवृत्तिपदार्थकृतेन वा भेदेन न भिद्यते, तदा सोऽप्याद्य एवेति तदुत्तरत्वं तस्य न स्यादिति स्वगत एव वा स्वमात्रवर्तिकृतो वा भेदो वाच्यः। न तु क्रियोत्पत्त्यनन्तरत्वादिनेति न क्षणोपाधिसिद्धिः। नाप्यन्त्यशब्दस्तदुपाधिः। अन्त्यशब्दस्य सर्वदाभावात्, तत्प्रतिसन्धानविधुराणामपि क्षणव्यवहाराच्च। प्रळये तदभावाच्च। त्वन्मते तदाऽपि क्षणलवादिरूपकालविशेषसद्भावात्। तस्मात्कालस्य स्वाभाविक एव भेदोऽभ्युपगन्तव्यः। तत्र क्षणलवादिभेद एव स्वाभाविकः। मासायनवत्सरादिभेदस्तु चन्द्रसूर्यनक्षत्रगत्याद्युपाधिकृत एव। अत एव चोत्पद्यते। जडत्वे सति स्वतोऽनेकत्वात्।

**श्रीमत्पौष्करेऽपि** –

काल एको विभुर्नित्य इष्यते कैश्चिदीश्वर।
तथा किमिति नोद्दिष्टो भगवन् वक्तुमर्हसि।।

इत्याक्षेपोपन्यासपूर्वकम् –

काल एको यदीष्येत क्रियातो नातिरिच्यते।
यस्मात्स्वतः क्रियायास्तु नास्त्यतीतादिरूपता।।
तस्या एव यदीष्येत सैव कालः प्रसज्यते।
ततश्च वर्तमानादिपदार्थानां मुनीश्वराः।।
वर्तमानादिरूपैस्तु कालैर्भिन्नैर्व्यवस्थितिः।
ततश्च नैकः कालोऽयं किन्त्वनन्तात्मवृत्तिकः।।

इति स्वाभाविको भेदस्समर्थितः। तत्र मासर्त्वयनादिभेदस्य सूर्यगत्याद्युपाधिकृतत्वस्य सर्वैरभ्युपगतत्वेन तद्वदेव सर्वभेदव्यवहारस्यौपाधिकत्वसंभवान्न स्वाभाविकभेदे मानमस्तीति पूर्वपक्षतात्पर्यम्। अत्र सिद्धान्तः काल एको यदीति। अत्र यदि काल एक इष्यते, तदा अतः – अस्मात्, कालात् क्रिया नातिरिच्यते – वर्तमानादिरूपेण न भिद्येतेत्यर्थः। मास्तु सकालकृतो वर्तमानादिभेदः क्रियायास्स्वत एव तु भविष्यतीतीष्टापत्तिमाशङ्क्य परिहरति – **यस्मादिति**। किमिति स्वतः क्रियाया अतीतादिरूपता नास्तीत्याशङ्क्याह – **तस्या एवेति।** क्रियाया एव स्वतो वर्तमानादिरूपत्वे तत्संबन्धादेव पदार्थेषु वर्तमानादिव्यवहारोपपत्तेः काल एव न सिध्येदित्यर्थः। यद्वा – यदि काल एक इष्यते, तदा क्रियातः – क्रियापेक्षया, नातिरिच्यते – न विशिष्यते, स्वगतवर्तमानादिविभागाभावात् क्रियासाम्यं स्यादित्यर्थः।

क्रियातो विशेषाभावं दर्शयितुं क्रियायास्स्वगतवर्तमानमानत्वाद्यभावं दर्शयति – **यस्मादिति**। अत्रेदमाकूतं – कालो यदि भिन्नत्वेन नांगीक्रियते तदा कालोऽपि न सिध्यति मानाभावात्। तथाहि – काले किं क्षणमास्ते मुहूर्तमास्ते प्रहरमास्त इत्यादिप्रतीतिर्मानम्, अथवा परापरव्यवहारः, उत वर्तमानादिव्यवहारः, किं वा तत्तत्कालनियतोत्पत्तिकं कार्यम्। नाद्यः, तेन भिन्नत्वेनैव सिद्धेरभेदायोगात्। न च भेदांश उपाधिकृतः। तेनैव तद्व्यवहारोपपत्तौ कालस्यासिद्धप्रसङ्गात्, क्षणलवादेरुपाध्यभावाच्च। नापि द्वितीयः। एकेन कालेन विचित्रव्यवहारानुपपत्तेः। न च बह्वल्पतपनपरिस्पन्दसहकृतेन तेन परत्वापरत्वयोः विचित्रयोरुत्पत्त्या तथा व्यवहार इति युक्तम्। तादृशतपनपरिस्पन्देनैव तयोरुपपत्तेः। न च तस्य पिण्डगतत्वाभावेन कथं तत्र तदुत्पादकत्वमिति वाच्यं, स्वरूपसंबन्धेनैव तदुपपत्तेः। अन्यथा अधिकपरिस्पन्दसमवायिसूर्यसंयुक्तकालसंबन्धस्य युवपिण्डेऽपि सत्वेन परत्वस्योत्पत्त्यापत्तेः। तस्मादधिकतपनपरिस्पन्दस्यात्र स्वरूपसंबन्धो नास्तीत्येवोपेयम्। अतोधिकाल्पतपनपरिस्पन्दसंबन्धादिनैव त्वन्मते परापरव्यवहारोपपत्तेर्न तदनुरोधेन कालसिद्धिः।

अस्मन्मते त्वधिकल्पकालसंबन्धेनैव परापरव्यवहार इति कालभेदसिद्धिः। नापि

तृतीयः। तेनापि भिन्नत्वेनैव सिद्धेः। उपाधेस्स्वतो वर्तमानत्वाद्यभावेन तत्कृतत्वायोगात्, स्वाभाविकत्वे बाधकाभावाच्च। नापि चतुर्थः। तत्तद्भिन्नकार्येण सिध्यतस्तस्यैकत्वायोगात्। उपाधिभेदसाहित्येन भिन्नकार्यजनकत्वे उपाधेरेव जनकत्वोपपत्तेरुपहितस्यासिद्धिप्रसङ्गात्। न चैवं कालस्यानित्यत्वे आत्मनो नित्यत्वं न स्यात् त्रिकालसंबन्धस्यैव नित्यशब्दार्थत्वादिति युक्तम्। कालानवच्छेदस्यैव तदर्थत्वात्। तदुक्तं **श्रीमत्पौष्करे** –

अनित्यः काल उद्दिष्टस्तत्कथं नित्यताऽऽत्मनाम्।
नित्यकालानुवर्तित्वं नित्यत्वं तद्वदेश्वर।।

ईश्वरः –

कालावच्छेदशून्यत्वान्नित्यत्वं कालवर्जितम्।
न हि कालस्य नित्यत्वं कालवस्त्वनवस्थितेः।। इति।

नन्वेवं कालवद्दिगपि कस्मान्नोदिष्टेति चेन्न। भूप्रदेशाकाशादेरेव दिग्व्यवहारोपपत्तेः। ननु भूप्रदेशादेर्न स्वतः प्राक्त्वादिकमिति तदुपेता दिगङ्गीकर्तव्येति चेन्न। त्वन्मते दिशोऽपि स्वतः प्राक्त्वादिभेदाभावात्कालवत्स्वतः प्रागादिविभागवती दिक्त्वया किमिति नाभ्युपेयत इति चेन्न। किञ्चित्प्रति प्राच्या एव किञ्चित् प्रतिप्रत्यक्त्वेन कस्या अपि स्वतः प्राक्त्वाद्ययोगात्। यद्यप्येवमेकस्यैव कालस्य किञ्चित्प्रतिवर्तमानत्वं किञ्चित्प्रत्यतीतत्वं किञ्चित्प्रत्यनागतत्वमिति तस्यापि न स्वतो वर्तमानादिविभागो युक्तस्तथाऽप्यनन्यथासिद्धेन क्षणमास्ते मुहूर्तमास्त इत्यादिव्यवहारेणैव कालसिद्धिः। न चेह तथाऽनन्यथासिद्धो व्यवहारस्समस्ति। प्रागादिव्यवहारस्योपाधिकृतत्वावश्यंभावात्। इहास्तीत्यादेर्भूतलादिविषयत्वात्। तस्मात्भूतलाद्यतिरिक्ताया दिशोऽभावात्तदनुद्देश इति सिद्धम्।।

## नियतितत्त्वम्

नियमनकारणं तत्त्वं नियतिः। नियमनन्तु स्वकृतस्यापि दुष्कर्मणः फलभोगानिच्छुं प्रति तत्फलेन योजनं, परकृतेनापि सुकृतेन फलं भोक्तुमुद्यतं परं प्रति तन्निवर्तनञ्च। ननु कर्मणैव नियमनमस्त्विति चेन्न। केवलस्य कर्मणो भोगादाविवात्राप्यजनकत्वेन नियतिसहकृतस्यैव जनकत्वात्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

केचिन्नियामकं कर्म यदन्यदतिरिच्यते।
भोगार्थस्सर्वतत्त्वानां सोऽपि कर्मनिबन्धनः।।
कर्मैवास्तु शरीरादि ततस्सर्वमपार्थकम्।
अथ देहादिसापेक्षं तत्पुमर्थप्रसाधकम्।।
ततो नियतिसापेक्षमस्तु कर्मनियामकम्। इति।

अत्र भोगार्थ इत्यादिप्रतिबन्ध्यापरिहारः[36]। ननु नियतितत्त्वे किं मानं, दुष्कृतस्य फल-जनकत्वनियमेन तत्फलानुपभोगस्याप्राप्तेस्तत्फलप्रापणावश्यंभावरूपस्य नियमनस्य

[36] (पा) सत्यापरिहारः

दण्डादिसामग्रीसत्वे घटावश्यंभावस्येव हेत्वन्तरानपेक्षत्वेन तस्य मानत्वायोगात्। अन्यथाकृतेऽपि दुष्कर्मणि नरकाद्यभावे निषेधशास्त्रस्याप्रामाण्यप्रसङ्गात्। एवं सुकृतस्यापि "कर्ता शास्त्रार्थवत्वा"दिति **न्यायेन** कर्तृगतमेव फलं प्रतिजनकत्वेनाकर्तृः फलभोगस्याप्रसक्ते तद्व्यवच्छेदरूपस्यापि नियमनस्य तत्त्वान्तरानपेक्षत्वात्। अदृष्टस्य कर्तृगतफलजनकत्वनियमाभावे तदुत्पादनप्रयासस्य वैफल्यप्रसङ्गात्। तत्र तत्र कर्तृगामि क्रियाफले विहितस्यात्मने पदस्यानुपपत्तिप्रसङ्गाच्च। न च जातेष्ट्यादिषु पुत्रादेरकर्तुरपि फलसंबन्धदर्शनात्कर्मणः कर्तृगतफलजनकत्वनियमो नास्तीति वाच्यम्। तत्रापि पूतपुत्रकत्वादेरेव फलत्वेन नियमोपपत्तेः, कर्तुरेव फलसंबन्ध इति नियमस्याभावे तवापि तद्धेतुत्वेन नियतिकल्पनायोगाच्च। तस्मान्न नियतौ मानमिति। अत्र प्रतिविधीयते – कर्मणो हि श्रुत्या फलजनकत्वमात्रमवधारितं, न तु फलकर्तृसंबन्धजनकत्वमपि। तत्बोधकाभावात्। फलस्य कर्तृसंबन्धो न्यायानुगृहीतश्रुत्या तत्र तत्रात्मनेपदादिना चावधार्यत इति चेन्न। तत एव तद्धेतुतया नियतिकल्पनोपपत्तेः। यथा श्रुत्याऽवगतस्य कालान्तरभाविफलजनकत्वस्य निर्वाहाया पूर्वं कल्प्यते, तथा श्रुतितोऽवगतस्य फलकर्तृसंबन्धस्यैव जनकतया नियतितत्त्वं कल्प्यते। न च कर्मण एव तत्रापि जनकत्वं कल्प्यतां धर्मिकल्पनात् इति न्यायात्, न तु नियत्याख्यं तत्त्वान्तरमिति वाच्यम्।

तथा सति स्वर्गानुभवादौ देहादेरपि कल्पना न स्यात्, कर्मण एव देहं विनाऽपि जनकत्वकल्पनासंभवात्। यदि चैहिकसुखानुभवादौ देहजन्यत्वदर्शनेनामुष्मिकेऽपि तत्कल्पना, तदेहापि कृष्यादिफले कर्तृसंबन्धप्रापकस्य कृष्यादिव्यतिरिक्तस्य राजाज्ञादेर्दर्शनेन कर्मफलेऽपि तत्प्रापकस्य कर्मव्यतिरिक्तस्य नियतित्वस्य कल्पनोचितेति तुल्यम्। "कर्ता शास्त्रार्थवत्त्वा"दित्यस्यापि कर्त रिफलसंबन्धप्रतिपादकत्वमात्रं न तु धर्मादौ तत्संबन्धप्रापकत्वप्रतिपादनेऽपि तात्पर्यं, तत्र युक्त्यप्रदर्शनादिति न तेन विरोधोऽपि। तस्मात्कर्मणः फलमात्रजनकत्वेनान्यकृते नापि योगेनान्यस्यापि फलोपभोगे प्राप्ते तद्वारणाय नियतितत्त्वमपेक्षितम्। एवं निषिद्धस्यापि कर्मणः फलजनकत्वावश्यंभावेऽप्यकर्तर्यपि तदुत्पत्तिसंभवेन कर्तुस्तत्संबन्धानवश्यंभावे तदवश्यंभावायापि तत्कल्पनमिति न काऽप्यनुपपत्तिः। तदुक्तं **श्रीमत्पौष्करे** –

भोगायाभिप्रवृत्तस्य कलाविद्यादिवृत्तिभिः।
कर्मणामार्जितानान्तु फलापहरणे सति।।
तद्विनाशे प्रवृत्तेयं नियतिश्शिवशासने।
अपि भोगेष्वनिच्छन्तं नियोजयति सा बलात्।।
स्वार्जितेष्वेव नेहान्यैरार्जितेषु कदाचन।
यदि सा न भवेदन्ये भुञ्जीरन्नार्जितं परैः।।
राजाज्ञामन्तरा यद्वत् भुञ्जते दस्यवः परैः।
आर्जितानि तथैवेयमसामञ्जस्य नाशिका।।
अनया नियतं तच्च यच्छरीरेन्द्रियादिकम्।
अथ चेच्छाङ्करीशक्तिर्या सैव स्यान्नियामिका।।

सत्यं न सा स्वतः किन्तु नियतिव्यवधानतः।
तत्संबन्धाद्विमुच्येरन् सैव चेन्नियतिर्यदि।।
न कर्म स्वफलं पुंसां संबन्धयितुमर्हति।
कर्मत्वात् कृषिवत्तस्मान्नेह कर्मनियामकम्।। इति।

अत्र कलाविद्यादिवृत्तिभिरिति क्रियादृक्शक्तिप्रकाशादिभिरित्यर्थः। फलापहरणे सति – अन्यत्र फलजनने प्रसक्त इत्यर्थः।

न केवलं फलस्यैव नियमाय नियतितत्त्वमङ्गीकर्तव्यम्। किन्तु शरीरादिनियमायापीत्याह – **अनयेति**। शरीरादेर्नियमस्तु प्रतिनियतपुंभोगजनकत्वम्। न च तत्तत्कर्मार्जितत्वेनैव तत्तत्भोगनियम उपपन्न इति वाच्यम्। राजाज्ञाभावे तत्तत्कृष्याद्युत्पादितस्यापि सस्या-देरन्योपभोगजनकवन्नियत्यभावे तत्तत्कर्मार्जितस्यापि देहादेरन्यभोगजनकत्वप्रसङ्गात्। ननु नियतिरपि न पुरुषमात्रेण फलं योजयति, तथा न देहमात्रेण तदुपभोगजनकत्वं, अपि तु तत्तत्कर्मकर्त्रा तत्तत्कर्मार्जितेन चेत्यावश्यकत्वात् कर्मकर्तृत्वादिकमेव नियामकमस्त्विति चेन्न। तत्तत्कृष्यार्जितेष्वेव राजाज्ञाया नियमाकत्ववत्तत्तत्कर्मार्जित एव देहादौ नियमाकत्वोपपत्तेः। अत्र शिवेच्छया अन्यथासिद्धिं शङ्कते – **अथ चेदिति**। शिवेच्छायाः कार्यमात्रे हेतुत्वेन क्लृप्तायास्तत्तत्कार्येषु तत्तद्धेतुत्वेनावधारित तत्तत्साहित्येनैव जनकतया केवलया तया नान्यथासिद्धिरिति परिहरति – **सत्यमिति**। यदि केवलैव तदिच्छानियमनं कुर्यात्तदा मोक्षसाधनज्ञानाद्यसहकृतापि सा तं तद्वदेव जनयेदित्याह – **तत्संबन्धादिति**। कर्मणा-ऽन्यथासिद्धिमनुमानेन निराकरोति न कर्मेति।।

## अथ पुंस्तत्त्वम्

पुंस्तत्त्वं कलादिपञ्चकारभ्यं पुरुषगतप्रकृतिभोक्तृत्वप्रयोजकम्। पुरुषस्तु कलादिपञ्च-केनाविद्यादिना चोपेतः। कलादिपञ्चकमात्रं विज्ञानाकलप्रळयाकलयोरपि गतमतोऽविद्याद्युपेत इति। तावन्मात्रमनिष्पन्नकलादिकेपीति तद्व्यावृत्तये कलाद्युपेत इति। ननु पुंस्तत्त्वे किं मानम्। पुरुषगतस्य भोक्तृत्वस्य कर्मणैवोपपत्तेस्तस्य तत्र मानत्वायोगात्, पुंस्तत्त्वजनकत्वेनाभिमतस्य कलादिपञ्चकस्यैव तत्प्रयोजकत्वसंभवाच्चेति चेन्न। कर्मणः सुखादिमात्रहेतुत्वेन क्लृप्ततया भोक्तृत्वप्रयोजकत्वायोगात्। कर्मणो जनकत्वेऽपि भोगादौ शरीरसाहित्येन जनकत्ववत् पुंस्त्वत्वसाहित्येनैव प्रयोजकत्वस्यौचित्याच्च। कलादिपञ्चकस्य बुध्यादावपि रागादिजनकत्वेन पुरुषमात्रगतभोक्तृत्वरूपकार्यजनकत्वायोगात्। पुंस्त्वत्वस्य तु तत्रैव प्रयोजकत्वेन कल्पनान्न कोऽपि दोषः। अन्ये तु – कलादिपञ्चकोपेत आत्मैव पुंस्तत्त्वं विशेषणस्य कलादिपञ्चकस्य जन्यतया जन्यत्वोक्तिस्तस्यैव जडतया जडमध्ये गणनञ्च युज्यते। पुरुषतत्त्वनिष्ठतयोक्तानि भुवनान्यपि रागतत्त्वाधोभाग एव द्रष्टव्यानीत्याहुः। अत्र अञ्जास्यं बुद्धिमद्ग्राह्यमिति नाभिधीयते।।

## अथ प्रकृतितत्त्वम्

प्रकृतितत्त्वं गुणादिपृथिव्यन्तमूलोपादानं विभक्तगुणोपादानं वा। अत्र साङ्ख्याः – गुणा

एव साम्यावस्थां प्राप्ताः प्रकृतिशब्देन प्रधानशब्देन च व्यपदिश्यन्ते। प्रकरोतीति प्रकृतिः प्रधत्त इति प्रधानमिति व्युत्पत्तेः। प्रकर्षस्तु सर्वापेक्षया मूलकारणत्वात् तत्रापि कारणा-न्तरान्वेषणेऽनवस्थाप्रसङ्गात्। इयञ्च प्रकृतिरचेतनापरिणामिनित्या। तद्योगवियोगाभ्यामेव पुरुषस्य संसारापवर्गौ। पुरुषस्त्वपरिणामी। अत एव न कर्ता। नह्यनाहितातिशयस्य कर्तृत्वं संभवति। सर्वदापि तत्कार्यजननप्रसङ्गात्। अतः कर्तृत्वमङ्गीकुर्वता यत्नरूपः परिणामः परिस्पन्दो वाऽभ्युपगन्तव्यः। स च निर्विकारतया श्रुतिषूद्घुष्यमाणस्य पुरुषस्य न संभवतीत्यकर्त्रैव। महदादिकार्यन्तु प्रकृत्यैव जायते। नचाचेतनत्वेन कथं प्रकृतेः कार्योत्पादनाय प्रवृत्तिरिति वाच्यम्। कार्योत्पादनाय प्रवृत्तौ फलीभूतस्य पुरुषार्थस्यैव प्रयोजकत्वेन चैतन्यस्यानपेक्षिततत्वात्। वत्सवृध्यर्थं प्रवर्त्तमाने क्षीरे तथा दर्शनात्प्रत्युतचेतनस्य प्रवृत्तावुदाहरणाभावात्। न च प्रकृतिस्साक्षात्स्रक्चन्दनादिकमेव सृजतु, किं महदादिसृष्ट्येति वाच्यम्। तावन्मात्रसृष्ट्या पुरुषार्थासिद्धेः।

तथाहि – न तावद्विषयास्साक्षादेव चैतन्येनोपरज्यन्ते। सदोपलम्भप्रसङ्गात्। अस्तु तर्हीन्द्रियालोचितं चैतन्येनोपरज्यत इतीन्द्रियसद्भावः। मनः प्रभृति तु व्यर्थमिति चेत्। व्यासङ्गदशायामिन्द्रियसंबन्धेऽपि विषयोपरागाभावान्मनसोऽप्यङ्गीकर्तव्यत्वात्। एवमहंकारोऽप्यङ्गीकर्तव्य एव। स्वप्नादौ व्याघ्रोऽहमित्याद्यभिमानदशायां मनस्संबन्ध-स्यापि नरत्वस्य चैतन्योपरागाभावात्। इन्द्रियमनोहंकाराणां व्यापाराभावेऽपि सुषुप्तौ निश्वासप्रश्वाससन्तानानुकूलव्यापारवत्तया बुद्धिरप्युपेया। एवं तन्मात्राण्यपि भूतसौक्ष्म्यरूपत्वेनाङ्गीकर्तव्यानि। अतः पुरुषोपभोगाय महदादिसृष्टिः। उपभोग-स्त्विन्द्रियैरालोचितस्य मनसा विशेषणविशेष्यभावेन गृहीतस्याहंकारेणात्मीयत्वे नाभिमतस्य मयेदं कर्तव्यमिति बुध्याऽध्यवसितस्य चैतन्येनोपरञ्जनम्। अत्र कर्तृत्वचैतन्ये परस्परसान्निध्यात्पुरुषबुद्धिगतत्वे न प्रतीयेते। अत्र च सर्वाण्यपि वस्तूनि केवलप्रकृतिकेवलविकृत्युभयानुभयरूपतया चतुर्विधानि। तत्र केवलप्रकृतिः प्रधानम्। केवलविकृतिरेकादशेन्द्रियाणि पञ्चभूतानि। महदहंकारपञ्चतन्मात्राण्युभयरूपाणि। पुरुषोऽनुभयरूपः। **तदुक्तमीश्वरकृष्णेन** –

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिपुरुषः।। इति।

तस्मात्गुणानामेव प्रकृतित्वान्न तद्धेतुभूता प्रकृतिरिति। तदयुक्तम्। गुणानां सत्वादिभेदभिन्नतया विचित्रत्वेन जडत्वे सत्यनेकत्वेन कार्यत्वात्तद्धेतुभूता प्रकृतिरवश्यमङ्गीकार्या। न च गुणसाम्यावस्थैव प्रकृतिस्सा चैकैवेति वाच्यम्। तथाऽपि गुणानां नानात्वेन तद्धेतुः तत्त्वान्तरस्यावश्यकल्पनीयत्वात्, साम्यस्य दुर्वचनत्वाच्च। साम्यं हि संबन्ध-विशेषो वा, उत्कर्षापकर्षवैधुर्यं वा, उपमर्द्योपमर्दकभावशून्यत्वं वा। नाद्यः। संयोगसमवाययोरभावेन स्वरूपसंबन्धस्यैव वक्तव्यत्वेन नानात्वावश्यंभावात्। अत एव नापि द्वितीयः। कारणे सर्वदोत्कर्षापकर्षयोरभावे कार्ये सुखदुःखादावुत्कर्षाद्यनुपपत्तेश्च। अत एव न तृतीयः[37]। उत्कर्षापकर्षसत्वे उपमर्द्योपमर्दकभावस्यापि सत्वात्। न च तथापि

[37] (टि) अत एव नानात्वावश्यंभावादेव।

गुणकारणत्वेन कल्पितस्याव्यक्तस्यैव वा परमकारणत्वमस्त्विति वाच्यम्। तस्यापि प्रतिपुरुषनियतातिवाहिकशरीरानुप्रविष्टस्य नानात्वेन जन्यत्वात्। चेतनस्य परिणामाभावेऽपि कर्तृत्वं शक्तिमात्रेणेति साधितं, साधयिष्यते च पञ्चमे। तस्मात्गुणतत्त्वोपादानं प्रकृतिरिति सिद्धम्। तदुक्तं **श्रीमत्पौष्करे** –

गुणाद्यवनिपर्यन्तं तत्त्वजातं यतो भवेत्।
तदव्यक्तमिति प्रोक्तं क्षोभ्यं श्रीकण्ठविक्रमैः।।

ऋषयः –

गुणा एव समावस्थां प्राप्ताः प्रकृतिरुच्यते।
तत्कथं तदुपादानं प्रकृतिः प्रतिपाद्यते।।

ईश्वरः –

न गुणानां समावस्था प्रकृतिश्शिवशासने।
अचेतनत्वेऽनेकत्वात्[38] गुणानां मुनिपुङ्गवाः।।
दृष्टं कारणपूर्वत्वं तत्तु प्रकृतिसङ्गतम्। इति।

अत्र दृष्टमनुमितमित्यर्थः। तदनुमितं कारणं प्रकृतिसङ्गतं प्रकृतित्वेनोपपन्नमित्यर्थः। तथा **श्रीमन्मृगेन्द्रेऽपि** –

ततः प्राधानिकं तत्त्वं कलातत्त्वादजीजनत्।
सप्तग्रन्थिनिधानस्य यत्तत्गौणस्य कारणम्।। इति।

सप्तग्रन्थिनिधानस्य महदहंकारतन्मात्रात्मकसप्तग्रन्थिनिधानस्य गौणस्य गुणतत्त्वस्येत्यर्थः।।

## अथ गुणतत्त्वम्

बुध्युपादानं विभक्तगुणसाम्यं वा गुणतत्त्वम्। प्रकाशप्रवृत्तिनियमनवृत्तिकानि सत्वरजस्तमांसि गुणाः। ननु गुणानां त्रित्वात्कथं गुणतत्त्वस्यैक्यम्। यदि च बुध्युपादानत्वेनैकरूप्यादेकतत्त्वता, तदाऽहंकारोपादानकत्वेनेन्द्रियतन्मात्रादीनामप्यैक्यं स्यादिति चेन्न। गुणानां संभूयैव कार्यकारित्वेनैकतत्त्वतोपपत्तेः। अहंकारादिषु सात्विकादिभेदव्यपदेशस्तु त्रितयारब्धत्वेऽपि तत्तत्प्रकाशादिवृत्तिप्राचुर्येण। तदुक्तं **श्रीमन्मृगेन्द्रे** –

ततो बुध्याद्युपादानं गौणं सत्वं रजस्तमः।
तद्वृत्तयः प्रकाशाद्याः प्रसिद्धा एव भूयसा।।
त्रयोगुणास्तथाऽप्येकं तत्त्वं तदवियोगतः।
एकैकश्रुतिरेतेषां वृत्त्याधिक्यनिबन्धना।।
न तदस्ति जगत्यस्मिन्वस्तु किञ्चिदचेतनम्।
यन्नव्याप्तं गुणैर्यस्मिन्नैको वा मिश्रको गुणः।। इति।

ननु सत्वादिगुणसत्भावे न किञ्चिदपि मानम्। बुद्धितत्त्वस्य प्रकृत्युपादानकत्वोपपत्तेः।

[38] (टि) अचेतनत्वेनेकत्वादिति। अचेतनत्वे सत्येनेकत्वादित्यर्थः।

सुखदु:खमोहादीनामपि तत्तद्विषयज्ञानेनैवोपपत्ते:। न चैकस्यैव विषयस्य पुरुषभेदेन सुखादिकार्यजनकत्वेन विषयविशेषज्ञानमात्रस्यैव जनकत्वे कार्यसंकरप्रसङ्ग इति वाच्यम्। तवापि गुणत्रयारब्धत्वाविशेषेण कार्यव्यतिकरप्रसङ्गाविशेषात्, तत्तद्धर्माधर्मादिनैव सुखाद्युपपत्तेश्चेति चेन्न। विषयविशेषस्य वनितादेर्ज्ञाने अविशिष्टेऽपि कस्यचित्सुखं कस्यचिद्दु:खमिति वैषम्यन्तावद्दृश्यते। न तत्र विषयविशेषज्ञानमात्रं प्रयोजकम्। तस्याविशेषात्। न च विषयस्य लाभालाभाभ्यां विशेष:। किञ्चित्प्रतिलब्धस्यापि तस्य सुखाजनकत्वात्। अलब्धस्यापि च कञ्चित्प्रतिदु:खाहेतुत्वात्। लब्धालब्धवैषम्यहीनेऽपि नर्तनसंगीतादौ पुरुषविशेषेषु सौमनस्य वैमनस्यादेर्दर्शनाच्च। तस्माद्यद्विषयगतस्य यस्य गुणस्य यं प्रत्युद्भवस्तद्विषयगतेन तेन गुणेन तस्य पुरुषस्य सुखादिरूपं कार्यमित्येवोपेयम्। अत एव प्रसङ्गसाम्यमपि निरस्तम्। धर्माधर्मादेरपि स्वत एव सुखदु:खादिहेतुत्वायोगात्। तस्मात्सुखादिरूपकार्येण गुणसिद्धि:। एवं प्रकाशादिहेतुत्वेनापि तत्सिद्धिर्द्रष्टव्या। **सांख्यैरप्युक्तम्** –

प्रीत्यप्रीतिविषादात्मका: प्रकाशप्रवृत्तिनियमार्था:।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा:।। इति।।

## अथ बुद्धितत्त्वम्

अध्यवसायव्यापारा बुद्धि:, साक्षात्भोग्या वा। अस्याश्च धर्माधर्मज्ञानाज्ञानवैराग्या-वैराग्यैश्वर्यानैश्वर्यरूपा अष्टौ धर्मा:। ते च स्वाश्रयीभूतां बुद्धिं भावयन्त्यनुमापयन्तीति भावशब्देन व्यपदिश्यन्ते। तत्र धर्मज्ञानवैराग्यैश्वर्याणि सात्विकानि। अवैराग्यं राजसम्। इतरत्रयं तामसम्। अत एव तद्धेतुकास्सिद्धितुष्ट्यशक्तिविपर्ययभेदभिन्ना: प्रत्यया अपि बुद्धिधर्मा एव। अत्र सिद्धिरष्टविधा। तत्राध्यात्मविद्यानामक्षरस्वरूपग्रहणात्मकमध्ययनं ताराख्यासिद्धि:। तदनन्तरं कार्ये कारणत्वोपचारेण शब्दपदव्यपदेश्यं शाब्दं ज्ञानं सुताराख्यासिद्धि:। तदनुपूर्वापरविरोधेन तात्पर्यग्राहकन्यायालोचनपूर्वमर्थपरीक्षणमूहपदाभिधेयं तारतराख्यासिद्धि:। न्यायालोचितस्य श्रद्धेयत्वाय गुरुशिष्यसब्रह्मचारिभिस्तदर्थे संवादस्सुहृत्प्राप्तिशब्दाभिधे-या रम्यकाख्यासिद्धि:। आदरनैरन्तर्यदीर्घकालसेवनपरिपाकवशात्संशयविपर्यासप्रहाणेन विवेकसाक्षात्कारस्वच्छप्रवाहावस्थानरूपा "शुद्धिर्दैप् शोधन" इत्येतद्धातुनिष्पन्नेन दानपदेनाभिहिता सदामुदिताख्यासिद्धि:। आध्यात्मिकाधिदैविकाधिभौतिकभेदभिन्नानां त्रिविधानां दु:खानां विघाता: प्रमोदप्रमोदितमोदनाख्यास्सिद्धय:। तदुक्तम् –

"ऊहश्शब्दोऽध्ययनं दु:खविघातास्त्रयस्सुहृत्प्राप्ति:।
दानञ्च सिद्धयोऽष्टा"विति।

अत्र छन्दोनुरोधाय क्रमव्यत्यास:। तुष्ठिर्नवविधा। तत्राध्यात्मिकाश्चतस्त्रस्तुष्टय:। बाह्या: पञ्च। तत्र प्रकृतिरेव विवेकख्यातिं करिष्यति किं ध्यानाभ्यासेनेति प्रकृतौ तुष्टि: प्रकृत्याख्या। विवेकख्यातिर्न प्रकृतिमात्रेण। सर्वस्यापि तदुत्पत्त्यापत्ते:। किन्तु प्रव्रज्योपादानेनेति प्रव्रज्योपादाने तुष्टि उपादानाख्या प्रव्रज्याऽपि न सद्यो मोक्षदा, किन्तु कालपरिपाकानुरोधेनेति काल एव सर्वं विधास्यति किं मुधोपतापेनेति काले तुष्टि: कालाख्या। प्रकृत्युपादानकालेभ्यो

न मोक्षो भवति, किन्तु भाग्यादेवेति भाग्ये तुष्टिर्भाग्याख्या। आर्जनरक्षणक्षयभोगहिंसासु दोषदर्शनेन जातात्पञ्चविधात् विषयेभ्य उपरमात्पञ्चतुष्टयः। तदुक्तम् –

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्या विषयो परमात्पञ्चनवतुष्टयोऽभिहिताः।। इति।

अशक्तिरष्टाविंशतिभेदभिन्ना। एकादशेन्द्रियाणामष्टविधसिद्धीनां नवविधतुष्टीनां व्यतिरेका अशक्तयः। तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञका अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चविधविपर्ययाः। एवं पञ्चाशत्प्रत्ययाः। ननु बुद्धिसद्भावे किं मानम्। न तावदध्यवसायः। मनसैवेदं मया कर्तव्यमित्येवं रूपस्याध्यवसायस्योपपत्तेः। नाप्यहंकाराख्यमुपादेयं, गुणस्यैव तदुपादानत्वसंभवात्। न च भोग्यान्तराभावात् भोग्यत्वेन बुद्धिसिद्धिरिति युक्तम्। स्रगादेरेव भोग्यत्वोपपत्तेः। साक्षात्भोग्यत्वं न स्रगादेरिति चेन्न। सुखादेरेव साक्षात्भोग्यत्वोपपत्तेः। सुखमपि बुद्धिवृत्तिरेवेति तत्सिद्धिरिति चेन्न। आत्मधर्मत्वेन बुद्धिवृत्तित्वानाङ्गीकारात्। अत एव भावाष्टकाश्रयत्वेनापि न तत्सिद्धिः। आत्मन एव तदाश्रयत्वोपपत्तेः। नाप्यात्मकर्तृकबाह्यार्थकर्मकग्रहणकरणत्वेन तत्सिद्धिः। चक्षुरादीनामेव तथात्वोपपत्तेरिति। मैवम् – दृश्यते तावदिदं मया कर्तव्यमिति सर्वेषामद्यवसायः। तत्र नमनः करणं, तत्कार्यार्थनिश्चयाद्विलक्षणत्वात्। न चाध्यवसायोऽपि निश्चय एवेति वाच्यम्। तेनार्थगतस्याकारस्यानवगाहनात्। न हि तेन भोजनादिगतं कर्तव्यत्वन्नाम किञ्चिदवगाह्यते। तस्यैवानिरुक्तेः। कर्तव्यत्वं हि न तावत्कर्तुरिष्ठसाधनत्वं, भोजनान्तरक्षणेऽपि एतादृशाकारोपेत भोजनादिज्ञानसत्वेन कर्तव्यमित्यध्यवसायापत्तेः। नापि कृत्यनन्तरभविष्यत्वं, भुक्तवतोऽपि श्वः करिष्यमाणे भोजने तादृशाकारज्ञाने कर्तव्यमित्येवं रूपस्याध्यवसायस्यादर्शनात्। नाप्यव्यवहिते काले कृत्यनन्तरभविष्यत्वम्। अव्यवहितकालसंबन्धस्य तत्र मानाभावे-नानवगाहनात्। न च चिकीर्षैवाध्यवसायः। पाककृतिर्मे भवतु, पाको मदीय कृतिविषयो भवत्वित्येवंरीत्याऽनुभूयमानायाश्चिकीर्षाया अध्यवसायस्य विलक्षणतयाऽनुभूयमानत्वात्। तस्मादध्यवसायोऽर्थनिश्चयविलक्षणः। न च विलक्षणेऽप्यध्यवसाये मनस एव करणत्वं कल्प्यतामिति वाच्यम्। तवापि कार्यवैलक्षण्येन कारणवैलक्षण्याभावे तत्त्वसङ्करप्रसङ्गात्। न चात्मैवाध्यवस्यत्विति वाच्यम्। आत्मनोऽध्यवसायकर्तृत्वेऽपि करणत्वेन तत्सिध्युपपत्तेः। एवं भावाष्टकाश्रयत्वेनापि बुद्धिसिद्धिः। आत्मनो निर्विकारत्वेन तदाश्रयत्वायोगात्। समवेतद्रव्यं पूर्वावस्थानाशजन्यमवस्थान्तरं वा विकार इति जन्यगुणाश्रयत्वेऽपि निर्विकारत्वं घटत इति चेन्न। जन्यधर्ममात्रस्यैव लाघवेन विकारशब्दार्थत्वात्। न हि जन्यधर्माश्रयत्वमात्मनः प्रबलेन प्रमाणेन बोधितं, येन गौरवं प्रामाणिकं स्यात्। ज्ञानादीनां चेतनधर्माणां कथं जडबुद्धिध-र्मत्वमिति चेन्न। ज्ञानरागव्यतिरिक्तानां चेतन- धर्मत्वानङ्गीकारात्। ज्ञानरागयोश्च द्वैविध्येन जडाजडधर्मत्वोपपत्तेर्वृत्तिशक्तिरूपयोश्च तयोः कलादितत्त्वत्रयनिरूपणावसरे साधितत्वात्। एवञ्च सुखादिरूपेण परिणताया अस्या एव भोग्यत्वमपि। तदुक्तम् – "बुद्धिर्विषयाकारा सुखादिरूपा समासतो भोग्यं" इति। बुद्धेः प्रमाणसिद्धत्वादहंकारोपादानत्वमपि युक्तं, तस्मात् बुद्धितत्त्वमभ्युपेयम्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

बुद्धितत्त्वं ततो नानाभावप्रत्ययलक्षणम्।

परं तदात्मनो भोग्यं वक्ष्यमाणार्थसंस्कृतम्।।
भावा बुद्धिगुणा धर्मज्ञानवैराग्यभूतयः।
सात्विकाव्यत्ययेनैते रागमुत्सृज्यतामसाः।। इति।

अत्र वक्ष्यमाणार्थसंस्कृतमिति – वक्ष्यमाणैरर्थैश्शब्दादिभिर्विषयैरवच्छिन्नमित्यर्थः। तथा **श्रीमत्पौष्करेऽपि** –

गुणतत्त्वात्पराबुद्धिरभवन्मुनिपुङ्गवाः।
रजस्तमोभ्यां न्यग्भूता वृत्तिस्सत्वेन चोत्कटा।।
सा बुद्धिरुदिता तन्त्रे विषयाध्यवसायिनी।
बोधोऽत्र द्विविधः प्रोक्तो विषयाध्यवसायकः।।
आद्योऽनद्यवसायात्मा व्यवसायात्मकस्तु यः।
सा बुद्धिरितरस्त्वात्मस्वभावो ग्राहकात्मनः।। इति।

अत्र गुणतत्त्वादित्यनेनोपादानं कथितम्। अस्याश्च बुद्धेरजस्तमोभ्यां कृता वृत्ति न न्यग्भूता, सत्वेन कृता सा वृत्तिरुत्कटा अनभिभूता प्रत्युताभिभवतीत्यर्थः। बुद्धेर्लक्षण-माह – **बुद्धिरुदितेति**।

विषयाध्यवसायशब्दस्य बोधार्थकत्वादात्मन्यतिव्याप्तिमाशङ्क्य बोधद्वै-विध्यप्रदर्शनपूर्वकं विवक्षितं विशेषं दर्शयति – **बोधोऽत्रेति**। अथवा विषयाद्यवसायपदस्य बोधपर्यायत्वभ्रमेणात्मन्यतव्याप्तिशङ्कां बोधविशेषवाचकत्वप्रदर्शनपूर्वकं व्युदस्यति – **बोध इति**। विषयाद्यवसायक आद्यः, अनद्यवसायात्मार्थात् द्वितीयः। तत्र व्यवसायात्मकोऽध्यवसायात्मा यो बोधस्सा बुद्धिः। वृत्तिवृत्तिमतोरभेदात्सामानाधिकरण्यम्। इतरोऽनद्यवसायात्मको ग्राहकात्मनः स्वात्मस्वभावः – **स्वाभिन्नचिच्छक्तिरूप इत्यर्थः**।।

## अहंकारतत्त्वम्

इन्द्रियारम्भकं मन आरम्भकं वा अहंकारतत्त्वम्। नन्वहंकारसद्भावे न मानम्। इन्द्रियारम्भस्य प्राणादिचेष्टायाश्च बुध्यैवोपपत्तेः, अहमाकाराध्यवसायस्यापि मनसैव संभवात्, त्वन्मतेऽध्यवसायस्य बुद्धिव्यापारत्वेन बुध्यैवोपपत्तेश्चेति चेन्न। एकरूपस्य सर्वदा व्यवस्थितस्याहमाकाराद्यवसायस्य प्रवृत्त्यर्थं भिन्नरूपात् बुद्धिकार्याद्विषयाध्यवसायाद्वि-लक्षणत्वेन तद्विलक्षणकारणसाध्यत्वात्, कार्यवैलक्षण्यस्य करणवैलक्षण्यव्याप्तत्वात्, बुद्धेरहमध्यवसायहेतुत्वे विषयाध्यवसायेषु सर्वत्राहमुपरागप्रसङ्गाच्च। अस्मन्मते तु अहंकारव्यापाराव्यापाराभ्यां तदुपरागानुपरागयोरुपपत्तेः। न च विषयाध्यवसायेषु आत्मभानसाम्ग्रयनुप्रवेशाननुप्रवेशाभ्यामेव तयोरुपपत्तेरहंकारकल्पना व्यर्थेति वाच्यम्। आत्ममनस्संयोगस्य सर्वत्रानुप्रवेशे नाननुप्रवेशायोगात्। अहंकारव्यापारस्य तु सर्वत्रज्ञानसाम्ग्र्यामनुप्रवेशे मानाभावान्न सर्वत्राहमुपरागः। तस्मादहमाकाराध्यवसायहेतुत्वे नाहंकारसिद्धिः। तदुक्तं **श्रीमत्पौष्करे** –

अत ऊर्ध्वमहंकारतत्त्वं संक्षिप्य वर्ण्यते।

प्रत्यात्मनियतं तच्च प्रसिद्धमहमात्मकम्।।
मनः पूर्वमधस्तत्त्वं यत एवोपजायते।

ऋषयः –

प्रत्ययो योऽहमात्माऽत्र व्यवसायात्मको यतः।
बुद्धेरेव ततो भूयात्किमनेन वदेश्वर।।

ईश्वरः –

विषयाध्यवसायो यः प्रत्यर्थं भेदतस्थितः।
अयमित्यात्मकस्सर्वो बुद्धिशब्देन गण्यते।।
अहमात्मैकरूपस्तु सर्वदा संव्यवस्थितः।
ग्राहकव्यवसायात्मा बुद्धिरेषा कथं भवेत्।।
विषयाभिमुखीबुद्धिरहं विषयिसंग्रहः।
ऐक्यं कथं तयोर्विप्राः कथ्यतेऽत्यन्तभिन्नयोः।। इति।

अत्र मनः पूर्वमित्यनेन लक्षणमुच्यते। अहंकारे प्रमाणमाक्षिपति – **प्रत्यय इति**। योऽहमात्मा प्रत्ययस्य यतो व्यवसायात्मकः – **अध्यवसायात्मकः**, अतः – **अद्यवसायात्मकत्वात्**, बुद्धेरेव भूयात् – **भवतु**। अनेनाहंकारेण न किमपि प्रयोजनमित्यर्थः। समाधत्ते – **विषयेति**। स सर्व इति तच्छब्दो यदुपादानबलादध्याहर्त्तव्यः। तथा **श्रीमन्मृगेन्द्रेऽपि** –

अथ व्यक्तान्तरात् बुद्धेर्गर्वोऽभूत्करणञ्चितः।
व्यापारस्य चेष्टान्ते शरीराः पञ्चवायवाः।। इति।

अत्र अव्यक्तात्प्रथमतोऽभिव्यक्तं गुणतत्त्वं व्यक्तं, ततोऽन्यद्व्यक्तं व्यक्तान्तरं, तादृश्या बुद्धेरित्यर्थः। क्वचिदव्यक्तान्तरादिति पाठः। तत्राप्ययमर्थः। प्रकृतिर्गुणश्चाव्यक्तम्। गुणस्यापि बुध्यपेक्षया व्यक्तत्वात्। ततोऽन्यदव्यक्तान्तरम्। बुद्धेरप्यव्यक्तत्वं स्वकार्यापेक्षया द्रष्टव्यम्। स चाहंकारस्त्रिविधः। सात्विकराजसतामसभेदात्। एतेषामेव भेदानां तैजसवैकारीकभूतादिसंज्ञा बोद्धव्याः। तदुक्तं **श्रीमत्पौष्करे** –

स च त्रिविध उद्दिष्टः प्रथमस्तत्र तैजसः।
वैकारिको द्वितीयस्स्यात् तथा भूतादिकः परः।।
सत्वेनोत्कृष्टभागो यस्स तैजस इहोच्यते।
वैकृतो रजसोत्कृष्टो भूतादिस्तमसाऽधिकः।। इति।।

## मनस्तत्त्वम्

अथ मनः। संकल्पविकल्पधर्मकं मनः, स्वाधिष्ठानबलादिन्द्रियेषु संकल्पविकल्पहेतुत्वापादकं वा। इन्द्रियैर्हि चक्षुरादिभिः केवलमर्था आलोच्यन्ते। उपेक्षणीयेषु वस्तुषु सन्निकर्षमात्रेणालोचनस्यैव दर्शनात्। यत्र त्वर्थविशेषे मनः प्रवृत्तं तत्र तदैव विविधकल्पनारूपं सन्देहं विकल्पशब्दाभिधेयं सम्यग्विशेषणविशेष्यभावेन कल्पनं परिच्छेदञ्च

संकल्पपदाभिधेयं जनयति। अथस्संकल्पविकल्पधर्मत्वं मनसः। यद्वा – मनोऽनधिष्ठितमिन्द्रियमर्थसन्निकृष्टमालोचनं जनयति। अधिष्ठितं तु विकल्पसंकल्पादिकमितीन्द्रियेषु स्वाधिष्ठानेन संकल्पविकल्पहेतुत्वापादकता तस्येति लक्षणद्वयमपि नासंभवि। तदुक्तं **श्रीमत्पौष्करे** –

यस्संकल्पविकल्पात्मा प्रत्ययोऽन्तर्गतो नृणाम्।
स नाहंकारिको नापि बौद्धो व्यापारभेदतः।।
स तु मानस एवेष्टस्तन्त्रेऽस्मिन्मुक्तिसागरे।
चक्षुषालोचिते ह्यर्थे तमर्थं बुद्धिगोचरम्।।
विदधातीह यद्विप्रास्तन्मनः परिपठ्यते।
अन्यथालोचिते कुम्भे पटेऽपि स्याद्विनिश्चयः।। इति।

तमर्थं बुद्धिगोचरं विदधातीति, निश्चयद्वारेति शेषः। आलोचितमेवार्थं मनोनिश्चयद्वारेण बुध्यारूढं करोतीत्येतद्विपक्षे बोधकप्रदर्शनपूर्वकं द्रढयति – **अन्यथेति**। तथा **श्रीमन्मृगेन्द्रेऽपि** –

"देवप्रवर्तकं शीघ्रचारि संकल्पधर्मी च। मन" इति।

देवनाद्द्योतनादिन्द्रियाणि देवास्तेषां प्रवर्तकमित्यर्थः। प्रवर्तकमित्युपलक्षणं निवर्तकमित्यपि द्रष्टव्यम्। तथा –

आत्मेन्द्रियार्थनैकृष्ट्ये सर्वदेवा प्रवृत्तितः।
प्रवृत्तिकारकास्तित्वं युक्तितोऽप्यवसीयते।।
तत्त्वान्तरोक्तवृत्तिभ्यो वैलक्षण्याद्विलक्षणः।
संकल्पो बीजमभ्येति मनस्तत्पारिशेष्यतः।।
ज्ञानं तदक्षयोगात्तत् क्रमयोगितया क्रमात्।
तथाऽप्याभाति युगपन्नाशुसञ्चरणदृतः।। इति।

अत्र सर्वेदेवा प्रवृत्तित इति – **कस्यचिदेवेन्द्रियस्य ज्ञानजनकत्वादित्यर्थः**। प्रवृत्तिकारकास्तित्वमिन्द्रियविशेषनिष्ठज्ञानजनकत्वानुकूलतत्गतसन्निधानवत् तत्भाव इत्यर्थः। तत्त्वान्तराणां कलादीनामुक्तेभ्यः कर्तृशक्त्यभिव्यक्त्यादि यो वृत्तिभ्यः व्यापारेभ्यः वैलक्षण्यात् – **भेदकात्विलक्षणः भिन्नः संकल्पः व्यापारविशेषः**, बीजं – **कारणम्**, अभ्येति – **अनुमापयति**। तत्कल्पितं बीजं पारिशेष्यतस्तत्त्वान्तरस्य जनकत्वायोगेन मन एवेति सिद्धमित्यर्थः। ज्ञानं संकल्पात्मकं तस्य मनसोऽक्षेण योगाज्जायत इति शेषः। तस्याक्षमनो योगस्य क्रमयोगितया क्रमाच्च जायत इत्यर्थः। तथाऽपि क्रमेण जननेऽपि युगपदिवाभाति। तच्च यौगपद्यभानमाशुसञ्चरणादृते न भवति। मनस आशुसञ्चारात् क्वचित्तथा भानमित्यर्थः।

ननु मनस्सद्भावे न मानम्। संकल्पविकल्पयोरिन्द्रियैरेवोत्पत्तिसंभवात्। नचोपेक्षणीयेऽपि तदुत्पत्त्यापत्तिः। तज्जनने बुभुत्साया अपि सहकारित्वेन तद्वैकल्प्येन तदनुत्पत्त्युपपत्तेः। न च युगपत्विषयसंबद्धेष्वपि पञ्चेन्द्रियेषु क्रमिकज्ञानोत्पादेन क्रमिकसन्निधानवत्कारणकल्पने मनस्सिद्धिरिति वाच्यम्। बुभुत्साक्रमेणैव तत्क्रमोपपत्तेः। न च युगपत्तावत् गोचरबुभुत्सायां

युगपत् ज्ञानोत्पत्त्यापत्तिरिति वाच्यम्। इष्टापत्तेः। सामग्रीणां परस्परप्रतिबन्धेन कस्यचिदपि तत्र कार्यस्य नोत्पत्तिरित्यभ्युपगमाद्वा। अन्यथा तवापि मनसः केनेन्द्रियेण सन्निधानं भवेत्। नियमकाभावात्। सन्निधापकबुभुत्साया अविशेषेऽप्यदृष्टवशेन सन्निधिक्रम इत्यभ्युपगमे तेन ज्ञानक्रम एवाभ्युपगम्यताम्। ननु स्मृतिकरणत्वेन मनस्सिद्धिः सदृशदर्शनादेरननुगतत्वेन करणत्वासंभवादिति चेन्न। पूर्वानुभवस्यैव संस्कारव्यापारकत्वेन करणत्वसंभवात्। न च सुखात्मादिप्रत्यक्षकरणत्वेन तत्सिद्धिः। सुखादेर्बुद्धिवृत्तित्वेन तत्ग्रहकरणीभूतया विद्ययैव ग्रहणोपपत्तेः। आत्मनोऽपि स्वप्रकाशत्वेन स्वग्रहे करणानपेक्षत्वात्। तस्मात्प्रमाणाभावान्न मनस्तत्त्वमभ्युपेयमिति।

मैवम् – नष्टस्य द्रव्यादेरन्वेषणाय पथिगच्छतस्सन्निकृष्टेऽपि तृणादौ संकल्प-विकल्पात्मकस्य प्रत्ययस्यानुदयस्तावद्दृश्यते। स च तज्जनकस्येन्द्रियस्य मनस्संबन्ध-व्यतिरेकादेव। बुभुत्साव्यतिरेकोऽपि तत्रैव प्रयोजकः। तत्तद्विषयकबुभुत्सायाः तत्तद्विषयकसंकल्पादौ साक्षाद्धेतुत्वे द्रव्यान्वेषणस्थलीय तृणादौ तदनुत्पत्त्यापत्तेः। इन्द्रियसंबन्धद्वारा तु हेतुत्वे नष्टद्रव्यगोचरबुभुत्सायास्तत्ग्राहके चक्षुषि मनसो निवेशनादबुभुत्सितमप्यन्वेषणस्थलीयं तृणादिकं गृह्यत इति युक्तम्। किञ्च बुभुत्सायास्साक्षात् हेतुत्वे तीव्रस्याशनिपातजन्यध्वन्यादेरबुभुत्सितस्य संकल्पप्रत्ययो न स्यात्। मनो निवेशद्वारा तु जनकत्वे तीव्रशब्दादेरपि मनस्समाकर्षकत्वाद्युज्यते संकल्पप्रत्ययः। ननु तवापि तत्र बुभुत्साया अभावात् श्रोत्रमनस्संबन्धो न स्यात्। तद्विशेषे हेतुत्वाभ्युपगमे ज्ञानविशेषे ममापि हेतुत्वमस्त्विति चेन्न। मनस्संबन्धे स्वाधीनत्वादिविशेषस्येव ज्ञाने कस्यचिदपि विशेषस्यानुपलम्भात्। ज्ञाने च साक्षात्स्वाधीनत्वाभावात्।

किञ्च – सूक्ष्मस्य शास्त्रार्थादेर्ग्रहणं सत्यामपि बुभुत्सायां मनो व्यावर्तनासमर्थस्य नोत्पद्यत इत्यनुभवसिद्धम्। तत्र बुभुत्सायास्साक्षाद्धेतुत्वे तदप्युत्पद्येत[39]। मनस्सन्निधानद्वारा तु जनकत्वेऽत्यन्तचलस्य मनसः पुनरप्यन्यत्र गमनात्तदभावः। न च ममापि मध्येऽन्यबुभुत्सया तद्वि-हतिरिति[40] वाच्यम्। एतद्गोचरबुभुत्सानुवृत्तावपि मध्ये तदनुत्पादस्य मनो व्यावर्तनयत्नादेश्चानुभवात्। नह्यनुभूयमानस्य यत्नस्यान्यो विषयोस्ति। तत्गोचर[41]बुभुत्सादेर्यत्नाजन्यत्वात्। ननु बुभुत्सायाः मनस्संबन्धद्वारा जनकत्वे श्रोत्रनिवेशितेऽपि मनस्यनेकशब्दसन्निपाते कथं बुभुत्सितस्यैव ग्रह इति चेन्न। तावता अनेकशब्दसमवधानस्थलीय बुभुत्सितशब्दग्रहत्वावच्छेदेन बुभुत्साया जनकत्वकल्पनौचित्यात्। सर्वत्र बुभुत्सायास्साक्षाज्जनकत्वस्य प्रागेव निरासात्। तस्मात् संकल्पविकल्पजनकतया मनस्सिद्धिः। अत एव ज्ञानक्रमहेतुभूतक्रमयोगिसन्निधा-नवत्वेनापि मनस्सिद्धिरविरुद्धा, बुभुत्सायास्साक्षादजनकत्वोपपादनेन तत्क्रमस्यापि मनो निवेशनक्रमद्वारेणैव जनकत्वात्। एवं स्मृतिकरणत्वमपि मनस एवेष्टव्यं, पूर्वानुभवस्य संस्कारव्यापारसहितस्यापि फलयोगव्यवच्छेदाभावेन[42] प्रणिधानव्यापारकस्य मनसः

[39] (टि) तदप्युत्पद्येत – सूक्ष्मशास्त्रार्थग्रहणमप्युत्पद्येत।

[40] (टि) तद्विहतिः – तादृशशास्त्रार्थबुभुत्साविहतिः।

[41] (टि) ननु सैव बुभुत्साविषयोऽस्त्वित्याशङ्क्याह – तत्गोचरेति।

[42] (टि) फलायोगव्यवच्छेदाभावेनेति। ननु मनसोऽपि स्वव्यापारेण व्यावधानात्कथं स्मृत्ययोगव्यवच्छेद इति चेन्न। तत्तत्करणस्य तत्तत्फलजनकीभूतव्यापारव्यतिरिक्तेन फलायोग्यव्यवच्छेदस्य →

तत्सद्भावेन तस्यैव करणत्वौचित्यात्।

किञ्च – गोशब्दार्थमजानानस्यायं गोशब्दवाच्य इति श्रृङ्गग्राहिकया आप्तवाक्यात्तदर्थं निश्चितवतस्तत्समानाकारे पिण्डे तच्छब्दोच्चारणहेतुभूतं ज्ञानमनुभूयते। तन्न तावदिन्द्रियजन्यं तस्य तज्जनने[43]ऽसामर्थ्यात्। नापि शब्दस्तस्यैव तद्व्यक्त्यगोचरत्वात्[44]। नाप्यनुमानम्। तद्व्याप्तस्यापरिज्ञानात्[45]। संस्थानविशेषस्य व्याप्तत्वेऽपि तथात्वज्ञानहेतोरभावात्।

मनस एव तत् ज्ञानहेतुत्वे मनस्सिध्यापत्तेः। साक्षाद्वाच्यत्वग्रह एव मनसो हेतुत्वसंभवाच्च। तस्मान्मन एव तथाविधज्ञानहेतुः। न च प्राथमिकशाब्दबोधात्पूर्वमपि मनसा तत्ग्रहापत्तिः[46]। तस्यापि[47] तत्र सहकारित्वात्। न च मनसोऽपि कथं तत्रैव[48] तत्ग्राहकत्वमिति वाच्यम्। औचित्यसाहित्येन[49] तत्ग्राहकत्वे तस्यैव साक्षित्वात्[50]। तस्मात् संकेतग्रहस्थलव्यतिरिक्तगोचरतच्छब्दोच्चारणजनकज्ञानहेतुतयाऽपि तत्सिद्धिः। तदुक्तं **श्रीमत्पौष्करे** –

किञ्च सास्नादिमत्पिण्डे गोशब्दमनुभूय यत्।
भूयस्तत्सदृशे दृष्टे तच्छब्दोच्चारहेतुकम्।।
तन्मनः कथ्यते तन्त्रे विकल्पप्रत्ययात्मकम्। इति।

अत्र विकल्पग्रहणमुपलक्षणं संकल्पस्यापि। विशिष्ठप्रत्ययसंशयादिजनकस्वभावमित्यर्थः। यद्वा– औचित्यसाहित्येनार्थपरिच्छेदो विकल्पश्शक्तिग्रहविषयसजातीये तच्छब्दवाच्यत्वनिश्चयादिः। तज्जनकस्वभावमित्यर्थः। एवं च मनसो विभुत्वं निरस्तम्। संकल्पविकल्पजनकतया ज्ञानक्रमोपपादकक्रमिकसन्निधानवत्तया च मनसस्सिद्धिदशायामेवाविभुत्वेनैव सिद्धेः। विभुत्वे[51] उपेक्षणीयेऽपि संकल्पादिप्रत्ययस्य ज्ञानयौगपद्यस्य चापत्तेः। ननु तस्याणु–त्वमेवाङ्गीकर्तव्यं, सावयवत्वेन संकोचविकासवत्वे ज्ञानक्रमस्थलेऽपि यौगपद्यापत्तेरिति चेन्न। तत्तद्विषयबुभुत्सया तत्तत्ग्राहकेष्विन्द्रियेष्वितरेन्द्रियप्रदेशाद्व्यावर्त्यमनसो निवेशनेन यौगपद्यप्रसङ्गाभावात्। युगपत्बुभुत्सायां युगपत्तावदिन्द्रियेषु निवेशनसंभवेन युगपत्प्रत्य–

← विवक्षितत्वात्। न च तर्हि यागस्य स्वर्गसाधनत्वं न स्यादिति वाच्यम्। अगत्या श्रुत्युक्तकरण–त्वनिर्वाहायादृष्टद्वारकस्थले व्यापारवत्कारणं करणमित्यभ्युपगमेऽपि दृष्टद्वारकस्थले पूर्वोक्तस्यैव करणत्वरूपत्वौचित्यात्।

43 (टि) तस्य तज्जनन इति। ईश्वरेच्छाविषयत्वरूपस्य वाऽतिरिक्तशक्तिविषयत्वरूपस्य वा वाच्यत्वस्येन्द्रियाविषयत्वादित्यर्थः। तस्यैव अयं गोशब्दवाच्य इति पूर्वोक्तस्यैव।

44 (टि)तद्व्यक्त्यगोचरत्वादिति। तस्य पूर्वदृष्टव्यक्त्यन्तरगोचरत्वात् शब्दान्तरस्याभावाच्चेति भावः।

45 (टि) तद्व्याप्तस्य गोचरशब्दवाच्यत्वव्याप्तस्य।

46 (टि) तत्ग्रहापत्तिः – समानाकारे पिण्डे गोशब्दवाच्यत्वग्रहापत्तिः।

47 (टि) तस्यापि – प्राथमिकशाब्दबोधस्यापि।

48 (टि) तत्रैव – गोव्यक्त्यन्तर एव।

49 (टि) औचित्यसाहित्येनेति। गवि गोशब्दवाच्यत्वे गृहीते तत्समानाकार एव मनस्स्तत् ग्राहकत्वस्योचितत्वादिति भावः।

50 (टि) तस्यैव साक्षित्वात् – औचित्यस्यैव नियामकत्वदित्यर्थः।

51 (टि) विभुत्वे विभुत्वाङ्गीकारे। सावयवत्वेनेत्यस्यान्यथेत्यादिः।

यस्यादिति चेन्न। इष्टापत्तेः[52]। अत एव शब्दादीनि युगपत्प्रत्येयमीत्यनुभवोऽपि। ननु कस्यचित्पुरुषविशेषस्य[53] युगपत् बुभुत्सायामपि न युगपत्प्रत्ययः। अतः पञ्चावधानित्वाभिमते ज्ञानक्रम एव, यौगपद्यप्रत्ययस्तु भ्रान्त इति चेन्न। पुरुषविशेषस्य मनोविकासजनने सामर्थ्याभावेन युगपत्बुभुत्सायामपि युगपत् ज्ञानाभावोपपत्त्या तत्सामर्थ्योपेते पञ्चावधानित्यपि क्रमकल्पनस्यायुक्तत्वात्। अत एवाणुत्वसाधकाभावेऽपि सावयवत्वेपि न प्रमाणमस्तीति परास्तं, पञ्चाविधानि ज्ञानयौगपद्याय विकासवत्वेन सावयवत्वस्य वक्तव्यत्वात्। नचाणु मनः पञ्चकमेवास्तु। अनेकपरमाणुनिष्पाद्यावयविकल्पनापेक्षया लघुत्वादिति वाच्यम्। परमाणुवादस्य निरस्तत्वेनावयविकल्पनाया एव मनोऽनेकत्वकल्पनापेक्षया लघुत्वात्। एवं द्विस्त्रिश्छिन्नगोधा शरीरादावपि युगपत्तावदवयवेषु चेष्टाहेतुयत्ननिष्पत्तयेऽवयविमनः कल्पनमेवोचितम्। न तु मनोन्तरप्रवेशो यौगपद्यप्रत्ययस्य तत्रानित्यत्वं[54] वा कल्प्यमिति।।

## इन्द्रियतत्त्वम्

अथेन्द्रियम् – "अतामसाहंकारप्रभवं तत्त्वं इन्द्रियम्"। तच्च द्विविधम्। बुद्धीन्द्रियकर्मेन्द्रियभेदात्। बुद्धीन्द्रियं सात्विकाहंकारप्रभवं, प्रकाशकस्वभावत्वात्। तदपि द्विविधं, आन्तरं बाह्यं चेति। तत्रान्तरं मनः, बाह्यं श्रोत्रादिभावेन पञ्चविधम्। कर्मेन्द्रियं राजसाहंकारप्रभवं, क्रियाजनकस्वभावत्वात्। तदपि वागादिभेदेन पञ्चविधम्। तामसाहंकारप्रभवन्तु तन्मात्रं, प्रकाशादिराहित्यात्। तदपि शब्दतन्मात्रादिभेदेन पञ्चविधम्। तदुक्तं **श्रीमत्पौष्करे** –

तैजसादप्यहंकारान्यबुद्धीन्द्रियाणि च।
पञ्चकर्मेन्द्रियाणि स्युरहंकारात्तु वैकृतात्।।
अहंकारात्तु भूतादेर्जाता तन्मात्रसंहतिः। इति।

तत्र शब्दग्राहकमिन्द्रियं श्रोत्रम्। ननु श्रोत्रादीन्द्रियसद्भावे किं मानम्। शब्दाद्युपलब्धिरिति चेन्न। इन्द्रियाधिष्ठानत्वाभिमतैः कर्णशष्कुलीगोळकादिभिरेवार्थान्तरत्वात्। न च प्राप्यकारित्वायाधिष्ठानातिरिक्तमेवेन्द्रियमिति वाच्यम्। प्राप्यकारित्वेऽपि त्वगादे[55]रधिष्ठानातिरेकासिद्धेः, चक्षुश्श्रोत्रयोः प्राप्यकारित्वस्यैवासिद्धेश्च। न चैवं कुड्यादिव्यवहितस्याप्युपलम्भप्रसङ्ग इति वाच्यम्। कुड्यादेः प्रतिबन्धकत्वेन तदभावस्यापि हेतुत्वात्। प्राप्यकारित्वे शाखाचन्द्रमसोर्युगपदुपलम्भायोगाच्च। स्फटिकमण्यन्तस्थितस्य सूत्रादेरनुपलंभप्रसङ्गाच्चेति चेन्न। चक्षुरादिकं प्राप्तार्थग्राहकं[56] साक्षात्कारककरणत्वात्, त्वगादिवदित्यनुमानेन प्राप्यकारित्वसिद्धेः। नन्वस्मिन्ननुमाने गोळकस्य पक्षत्वे बाधः, एतदनुमानफलीभूताया अतिरिक्तेन्द्रियसिद्धेरभावप्रसङ्गाश्च। गोळकातिरिक्तस्य पक्षत्वे

[52] (टि) इष्टापत्तेरिति – अत एव पञ्चावधानी दशावधानीत्यादि लोकप्रसिद्धिरिति भावः।

[53] (टि) कस्यचित्पुरुषविशेषस्येति। अनवधानिन इत्यर्थः।

[54] (टि) अनित्यत्वं वेति – भ्रमत्वं वेत्यर्थः।

[55] (टि) त्वगादेरिति। तस्या प्राप्यकारित्वादित्यर्थः।

[56] (टि) प्राप्तार्थग्राहकमिति। प्राप्यकारित्वं विना त्वच इव चक्षुरादेः प्राप्तार्थग्राहकत्वायोगेन तत्सिद्धिरिति भावः।

आश्रयासिद्धिः। सिद्धे हि प्राप्यकारित्वे गोळकातिरिक्तस्याश्रयस्य सिध्याऽनुमानं स्यात्। तथा चान्योन्याश्रयः। प्राप्यकारित्वसिध्यनन्तरं गोळकातिरिक्तस्य सिद्धिः, तत्सिद्धौ च तत्पक्षकानुमानेन, प्राप्यकारित्वसिद्धिरिति।

मैवम् – गोळकत्वेन तदन्यत्वेन चानिश्चितस्य रूपसाक्षात्कारकरण-त्वेन निश्चितस्य पक्षत्वात्, कुड्यान्तरितोपलंभप्रसङ्गस्य विपक्षे बाधकस्य सत्भावान्नाप्रयोजकता। न च कुड्यस्य प्रतिबन्धकतया तदनुपलंभो युक्त इति वाच्यम्। तस्यापि सन्निकर्षविघटनद्वारैव[57] प्रतिबन्धकत्वात्। अन्यथा कुड्यात्बहिस्थितस्यैव कुड्यपुरुषयोर्मध्यस्थितस्याप्यनुपलंभप्रसङ्गात्। कुड्यस्य साक्षात्प्रतिबन्धकत्वाङ्गीकारात्[58]। ननु कुड्यस्य न कुड्यत्वेन प्रतिबन्धकता, किन्तु ग्राह्यग्रहीतृमध्यगतत्वेनेति नोक्तदोष इति चेन्न। सन्निकर्षप्रतिबन्धायैव मध्यगतत्वस्यापेक्षणात्, नाभिदघ्ने कुड्ये मध्यवर्तिन्यपि बहिर्वर्तिनः पुरुषस्य[59] ग्रहणाच्च। किञ्च ग्राहककुड्ययोर्मध्यगतेन पुरुषादिना[60] ग्राहकसमीपस्थेन कुड्यादेर्भूयो देशानुपलम्भः, कुड्यादिसमीपगतेनत्वल्पीयः प्रदेशानुपलम्भ इति सर्वानुभवसिद्धोऽयं विभेदस्त्वन्मते अयुक्तस्स्यात्। मध्यगतत्वाविशेषात्। मत्पक्षे तु दीपादिसमीपगतस्य स्तम्भादेः कुड्यादिगते भूतः प्रदेशे आलोकसंयोगनिरोधकत्वं, कुड्यादिसमीपगतस्य तु तत्गते[61]ऽल्पप्रदेशे तन्निरोधकत्वमिति[62] क्लृप्तत्वादिहापि भूयोल्पप्रदेशयोस्सन्निकर्षनिरोधाद्युक्त एव। न च ममापि मते ग्राहकसमीपगतस्य मध्यवर्तिनो बहुप्रदेशज्ञानप्रतिबन्धकत्वं, ग्राह्यसमीपगतस्य तु तस्याल्पदेशग्रहप्रतिबन्ध-कत्वमिति कल्पनात् न दोष इति वाच्यम्। मन्मते आलोकादिस्थले तथा प्रतिबन्धकत्वस्य क्लृप्तत्वेन नूतनकल्पनाविरहात्। त्वन्मते त्वेवंविधप्रतिबन्धकत्वस्य कल्पनीयत्वात्। किञ्चैव एवमभिमुखस्थितस्य कुड्यादेरिव पश्चात्भागस्थितस्यापि ग्रहणं स्यात्, ग्राहकग्राह्ययोर्मध्ये कस्याप्यभावात्, गोळकाभिमुख्यमपि हेतुरिति चेन्न। दर्पणप्रतिबिम्बितस्य तस्यैवाग्रहण-प्रसङ्गात्। ननु तवापि सन्निकर्षाभावादग्रहणप्रसङ्ग इति चेन्न। कुम्भादिगतजलप्रतिस्फालितानां सूर्यरश्मीनां कुड्यादाविव चक्षुर्वृत्तीनामपि दर्पणप्रतिस्फालनेन पश्चाद्भागगतेऽपि संबन्धो - पपत्तेः। न च तत्रापि दर्पणान्तरुत्पन्नस्यैव कुड्यादेः पश्चात् भागवर्ति कुड्यसदृशस्योपलम्भ इति वाच्यम्।

तत्र कुड्योत्पत्तिकारणस्य मृदादेरभावात् दर्पणान्तर्गतत्वभानस्य भ्रमत्वात्[63] तवापि दर्पणगते कुड्यादौ प्रतिबिम्बमानकुड्यादाविव परिमाणापकर्षज्ञानस्य भ्रमत्वाङ्गीकारात्।

---

[57] (टि) सन्निकर्षविघटनद्वारेति। चक्षुषो विषयदेशगमनविघटनद्वारेत्यर्थः।

[58] (टि) ननु कुतोऽयं प्रसङ्ग इत्यत आह – कुड्यस्य साक्षात्प्रतिबन्धकत्वेति।

[59] (टि) पुरुषस्येति कर्मणी षष्ठी।

[60] (टि) पुरुषादिनेत्यनुपलम्भहेतौ तृतीया।

[61] (टि) तत्गते – कुड्यादिगते।

[62] (टि) तन्निरोधकत्वं – आलोकसंयोगनिरोधकत्वम्।

[63] (टि) कथं तर्हि दर्पणे कुड्यमिति प्रतीतिरिति चेदाह – दर्पणान्तर्गत्वेति। तवापीति। मत इति शेषः। दर्पणगते कुड्यादाविति। मम मते प्रतिबिम्बमान कुड्यादाविव तव मते दर्पणगते कुड्यादौ परिणामापकर्षज्ञानस्य भ्रमत्वाङ्गीकारादित्यर्थः।

ननु दर्पणान्तस्थिता अवयवा एवोपादानं बाधकं विना दर्पणान्तर्गततत्वभानस्य भ्रमत्वकल्पनायोगात्। एवं परिमाणापकर्षज्ञानस्यापि न भ्रमत्वं कल्पनीयम्[64]। न च ममैवेदं मुखं दर्पणे भातीति ज्ञानस्य भ्रमत्वं स्यादिति वाच्यम्। च्छायाशिरसि ममेदं शिर इति व्यपदेशवत्तद्व्यपदेशस्य गौणत्वादिति चेन्न। दर्पणाद्यवयवानां तदा कर्माभावेन संयोगानिष्पत्तेः। कर्माभावेऽपि संयोगो निष्पद्यतां, संयोगाभावेऽपि वा अवयवी निष्पद्यतामिति शङ्कायाश्च क्लृप्तकार्यकारणभावभञ्जकत्वेनायुक्तत्वात् एवं सत्युपादानं विनाऽपि निष्पत्तेर्वक्तुं सुशकत्वाच्च। दर्पणान्तर्मुखस्याङ्गीकारे तस्य हासनयनविकासादेश्चेतनाधिष्ठानव्याप्यस्य दर्शनेन चेतनाधिष्ठितत्वापत्तेश्च। न च चेतनाधिष्ठितत्वे नियमेनान्यहासाद्यनुविधायिहासादिकमनुपपन्नमिति न चेतनाधिष्ठितत्त्वमिति वाच्यम्। तवापि द्रव्यान्तरत्वे नियमेनान्यकर्मानुविधायि कर्मवत्त्वानुपपत्तिप्रसङ्गात् कर्महेतुतया विक्लृप्तस्य गुरुत्वद्रवत्ववेगायत्नादेरभावात् कर्मानुत्पत्तिप्रसङ्गाच्च। न च बिम्बकर्मैव तद्धेतुः।

तद्धेतुभावस्य कल्पनीयत्वेन कल्पनागौरवस्यापरिहारात्, व्यधिकरणत्वे न तस्य निमित्तमात्रत्वेनासमवायिकारणं विना कार्योत्पत्तिप्रसङ्गाच्च। अन्धकारस्थे[65] जले प्रतिबिम्बितस्य मुखादेरभासहेत्वालोकसंबन्धाभावे नानवभासप्रसङ्गाच्च।

मन्मते तु बिम्बस्यालोकसंयुक्ततया तस्यैव जलगतत्वेन भानाङ्गीकरान्न कोऽपि विरोधः। ममापि प्रतिबिम्बसाक्षात्कारे बिम्बालोकसंयोग एव हेतुरिति चेन्न। तत्तत्गोचरचाक्षुषसाक्षात्कारे तत्तदालोकसंयोगस्य हेतुतया क्लृप्तत्वेन क्लृप्तपरित्यागाक्लृप्तकल्पनयोरापत्तेः। तस्माद्द-र्पणान्तर्मुखस्याभावात् बिम्बमेव तत्रत्यतया भासत इति युक्तम्। एवं च मदीयमेवेदं मुखमिति ज्ञानस्य प्रमात्वमेव। परिमाणापकर्षज्ञानस्य तु युक्तिबलात् भ्रमत्वम्। तस्मात्पश्चात् भागगतस्य कुड्यादेरेव दर्पणगततया भानान्न गोळकाभिमुख्यं कारणम्। न च प्रतिबिम्बभानान्यभाने गोळकाभिमुख्यं हेतुः। प्रतिबिम्बादिभाने तु दर्पणाभिमुख्यमेव हेतुरिति वाच्यम्। अननुगतकारणकल्पनायां गौरवात्। न च गोळकाभिमुख्यस्याहेतुत्वे गोळकमेव गृह्येत तदधिष्ठानत्वेनेन्द्रियसंबन्धसद्भावादिति वाच्यम्। इन्द्रियाभिमुख्यस्य हेतुत्वेन तदभानोपपत्तेः। गोळकाभिमुख्यस्य प्रतिबिम्बादौ व्यभिचारप्रदर्शनात्। तस्मातगोळकव्यतिरिक्तस्य तदधिष्ठानकस्य गमनागमनादिशीलस्यैवेन्द्रियत्वम्। शाखाचन्द्रज्ञानयोगस्तु यौगपद्यप्रत्यो भ्रान्त एव। स्फटिकान्तरितग्रहानुपपत्तिस्तु तवाऽपि समाना। ग्राहकग्राह्यमध्यवर्तिपदार्थाभावस्य ग्राह्यग्रहे कारणत्वेनाङ्गीकारात्। अस्वच्छस्य तथाविधस्याभावः कारणमित्यभ्युपगमे ममापि तथाविधस्यैव सन्निकर्षप्रतिबन्ध-कत्वाभ्युपगमेन दोषाभावात्। तस्मात् सन्निकर्षजनकत्वानुरोधेनाधिष्ठानातिरिक्तचक्षुस्सिद्धिः। त्वगादेस्त्वदधिष्ठानातिरेकेन प्राप्यकारित्वं हेतुः। किन्तु बधिरकुष्ठ्यादेश्शब्दस्पर्शाद्यप्रतीतिः। न च बधिरस्यापि कर्णशष्कुल्यवच्छिन्नाकाशोऽस्तीति कथमिन्द्रियव्यतिरेक[66] इति वाच्यम्।

---

[64] (टि) न भ्रमत्वं कल्पनीयमिति। दर्पणान्तर्गताल्पावयवैरेवोत्पन्नत्वादिति भावः।

[65] (टि) अन्धकारस्थ इति। कूपस्यान्तरन्धकारसत्वात्।

[66] (टि) इन्द्रियव्यतिरेकः – इन्द्रियाभावः।

तस्य मयेन्द्रियत्वे नानङ्गीकारात्। अङ्गीकृतस्य चाहंकारिकस्य व्यतिरेकोपपत्तेः। कुष्ठादेरपि स्वतो दोषत्वकल्पने प्रमाणाभावात्।

ननु कथं श्रोत्रस्य प्राप्यकारित्वम्। न च कर्णशष्कुल्यधिष्ठानकस्याहंकारिकस्य श्रोत्रस्य वृत्तिरूपेण भेर्यादिदेशे गमनेन तत्स्यादिति वाच्यम्। गृहान्तर्गतस्यावारकद्रव्यसत्भावेन श्रोत्रस्य बहिर्निर्गमनायोगात्। न च वायोरिव ग्रहरन्ध्रादिना निर्गमस्स्यादिति वाच्यम्। दूरदेशजातस्य तारस्येव मन्दशब्दस्यापि ग्रहणप्रसङ्गात् इन्द्रियसंबन्धाविशेषात्। न च मन्दत्वादेवाग्रहणं, समीपस्थस्याप्यग्रहणप्रसङ्गादिति चेन्न। भेर्यादिदेशोत्पन्नस्य सन्तानक्रमेण श्रोत्रसंबद्धशब्दजनकत्वोपपत्तेः। अत एवाशनिध्वन्यादेर्विळम्बेनोपलम्बे मेघाभिघातजन्यविद्युदुपलम्भानन्तरं ध्वन्युपलम्बप्रतीक्षयाऽवस्थानेन विळम्बस्सर्वसम्मत एव। न च तवापि विद्युदागमनसमये सन्तानक्रमेण ध्वनेरागमनं कुतो न भवतीति वाच्यम्। ध्वनिजनकस्य च वायोस्तेजोऽपेक्षया विळम्बेन तद्विळम्बोपपत्तेः। ननु च श्रोत्रवृत्तिगमनेन प्राप्यकारित्वानुपपादने शब्दोत्पत्तिदेशादिर्नोपलभ्येतेति चेत्, अनुमानेन देवालयारामादिदेशप्रभवत्वस्य बुध्युपपत्तेः। न च दूरस्थेऽपि केतकीकुसुमादौ गन्धोपलम्भान्न घ्राणस्य प्राप्तकारित्वमिति वाच्यम्। वाय्वादौ संक्रान्तस्य गन्धस्योपलम्भोपपत्तेः, वाय्वानीतेषु परागेषु गन्धोपलब्ध्युपपत्तेश्च। न च घ्राणेन्द्रियस्यैव विषयपर्यन्तगमनं किमिति न कल्प्यत इति वाच्यम्।

वाय्वानुलोम्याभावेऽपि तत्ग्रहणप्रसङ्गात्। एवं स्पर्शाद्युपलब्धिसाधनमिन्द्रियं त्वगादि। नन्विन्द्रियभेदे किं मानम्। एकस्यैव तत्तदधिष्ठानगतत्वेन भिन्नकार्यजनकत्वोपपत्तेः। एकस्यापीन्द्रियस्य तत्तदधिष्ठानगतत्वावच्छेदेन तत्तत्ग्रहणशक्तिवधेनान्धबधिरत्वाद्युपपत्तेश्चेति चेन्न। भिन्नस्य तत्तद्विषयोपलम्भस्य हेतुतया धर्मिग्राहकेण इन्द्रियस्य सिद्धिदशायामेव भिन्नत्वेनैव सिद्धेः। यदि ह्येकत्वं प्रमाणप्रमितं स्यात्तदा शक्तिभेदेन कार्यभेदः कथञ्चिन्निर्वाह्यस्स्यात्। मलस्य चिदावरणकृत्यहेतुतयाऽनुमितौ लाघवसहकारेणै-कत्वसिद्धेश्शक्तिभेदेन बद्धमुक्तादिव्यवस्थोपपत्तिः। तस्मान्नानाभूतानीन्द्रियाणि। तदुक्तं **श्रीमत्पौष्करे** –

एवं प्रसाधिते चान्तःकरणत्रितयेऽधुना।
बुद्धीन्द्रियाणि कथ्यन्ते श्रोत्रं त्वक् चक्षुरेव च॥
जिह्वा घ्राणं च पञ्चेति सुप्रसिद्धानि तानि तु।
प्रत्यक्षविषयत्वेन तेषां सिद्धेर्न युक्तयः॥
कथ्यन्तेतान्यहंकारादुपजातानि सात्विकात्। इति।

अत्र प्रत्यक्षा घटादयो विषयाग्राह्या येषां तानि प्रत्यक्षविषयाणि, तत्त्वेनेत्यर्थः। घटादिग्राहकत्वेनेन्द्रियसिद्धेरन्यायुक्तयो न कथ्यन्त इत्यर्थः। एतानि चेन्द्रियाणि वर्तमानमात्रग्राहीणी। तेषामेवेन्द्रियसंबन्धात्। अवर्तमानेष्वपि ज्ञानसामान्यादिप्रत्यासत्तिरस्तीति चेन्न। अतीतानागतादिप्रतीथौ क्लृप्तकारणभावेनाऽऽन्तरकरणेनैव तत्प्रतीत्युपपत्तेर्बाह्येन्द्रियस्य तत्प्रतीतिकारणत्वे मानाभावेन तत्प्रत्यासत्तिकल्पने बीजाभावात्। सुरभिचन्दनं, स एवायं

चैत्र इत्यादि ज्ञानस्य मानसत्वोपपत्तेः। बाह्यविशेष्यकेऽपि कविकाव्यादिमूलभूते ज्ञाने मनसो जनकत्वावधारणात्। **तदुक्तमीश्वरकृष्णेन** –

सांप्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्। इति।

नन्वेषां कथमाहंकारिकत्वं, तथात्वे कारणभेदाभावेन भिन्नविषयत्वानुपपत्तेः, तस्माद्विषय-प्रतिनियमाय प्रकृतिभेदोऽभ्युपेयः। तत्तत्भूतप्रकृतिकत्वेन तु तत्तत्प्रतिनियतगुणग्रहो युज्यत इति भौतिकत्वमेव। प्रयोगश्च श्रोत्रादीनि शब्दाद्याश्रयप्रकृतिकानि, तदभिव्यञ्जकत्वात्, यद्यस्याभिव्यञ्जकं तत्तदाश्रयप्रकृतिकं यथा कुंकुमगन्धाभिव्यञ्जकं घृतमिति।

मैवम् – विषयभेदे इन्द्रियभेद एव प्रयोजकः, न तु प्रकृतिभेदः। पृथिवी प्रकृतिकत्वेऽपि पाषाणादीनां गन्धाभिव्यञ्जकत्वादर्शनात्। प्रकृत्यभेदेऽपीन्द्रियस्य भेदस्तु पाषाणवृक्षादेरिवोपपन्नः। तत्तत्गुणग्राहकत्वस्य तत्तत्प्रकृतिकत्वप्रयोज्यत्वे चक्षुषः पृथिवीजलगुणरूपग्राहकत्वेन पृथिवीजलप्रकृतिकत्वस्याप्यापत्तेर्लिङ्गमपि नीलादिव्यञ्जकेन चक्षुषानैकान्तिकमेव। किञ्च – प्रकृतिभेदो विषयप्रतिनियमप्रयोजक इत्यत्र विषयप्रतिनियमः कीदृग्रूपो विवक्षितः। किं यत्प्रकृतिकं यदिन्द्रियं तत्तस्यैव गुणं गृह्णाति नान्यस्येति, अथवा यदिन्द्रियं यत्प्रकृतिकं तत्तत्गुणमेव गृह्णाति न तु तद्गुणादन्यदिति। नाद्यः। चक्षुषा नीलादेरपि ग्रहणात्। नापि द्वितीयः। कर्मसामान्यादीनामग्रहणप्रसङ्गात्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

नियतार्थतयाऽक्षाणि नाना योनीनि कस्यचित्।
गन्धादिव्यञ्जकत्वाच्च तदाधारात्मकान्यपि।।
शब्दैकग्रहाकं श्रोत्रं स्पर्शैकग्राहिणी च त्वक्।
तथाऽस्तु यदि नादत्ते स गुणं कारणान्तरम्।।
त्वगिन्द्रियमयुक्तार्थग्राहि युक्तपराङ्मुखम्।
तेजो वारिमहीद्रव्यं दृगादत्ते सरूपकम्।।
ततस्त्रिद्रव्यजा सा स्यान्न परेणेष्यते तथा।
येनोपलभ्यते योऽर्थस्स तस्यार्थस्य कारणम्।।
न प्राप्तमपि कर्मादि सेयं व्यसनसन्ततिः। इति।

अत्र प्रथमेनार्धेन सामान्यतः प्रकृतिभेदानुमानमुक्तम्। द्वितीयेन विशेषतः। तृतीयेन तु प्रथमस्य हेतोरसिद्धिः परिहृता। कस्यचिदिति नैयायिकादेरित्यर्थः। अत्र प्रकृति तत्गुण-मात्रग्राहकत्वं नियतार्थकत्वमिति विवक्षायां परमतेऽप्यसिद्धिमाह – **तथास्त्विति**। इन्द्रियं यदि सगुणं कारणान्तरमुपादानव्यतिरिक्तं न गृह्णाति तदा तथास्तु नियतार्थमस्तु। उपादानव्यतिरिक्तं तद्गुणञ्च गृह्णातीति नियतार्थत्वमसिद्धमित्यर्थः। उपादानव्यतिरिक्तस्य ग्रहणं दर्शयति – **त्वगिन्द्रियमिति**। अयुक्तस्योपादानव्यतिरिक्तत्वात्ग्रहीतुमनुचितस्य पृथिव्यप्तेजोरूपस्यार्थस्य ग्रहीतृयुक्तस्य उपादानत्वात् ग्रहीतुमुचितस्य पवनस्य ग्रहण-पराङ्मुखं त्वगिन्द्रियं, तथा दृक्सरूपकं रूपसहितं तेजोवारिमहीद्रव्यमादत्ते। तत्र यदि दृशः प्रकृति तत् गुणमात्रगृहीतृत्वनियमस्स्यात् महीवार्यादिग्राहकत्वं न स्यात्। तत्ग्राहकत्वे वा

तत्प्रकृतिकत्वं स्यादित्यर्थः। शब्दादिमात्रग्राहकत्वं नियतार्थत्वमित्यङ्गीकारे तु इन्द्रियभेदेनैव तदुपपत्तेरप्रयोजकत्वमिति भावः। तथाऽस्त्वित्यादिकं द्वितीयानुमानेऽपि सामान्यव्याप्तौ व्यभिचारप्रदर्शनपरतया योजनीयम्। यद्यत्गुणग्राहकं तत्तत्प्रकृतिकमिति नियमो नास्ति। नीलादिग्राहके चक्षुषि व्यभिचारादित्यर्थः। प्रकृतितत्गुणमात्रग्राहकत्वनियमाङ्गीकारे कर्मसामान्यादिग्राहकत्वमपि न स्यादित्याह – **येनेति**। येनेन्द्रियेण योऽर्थ उपलभ्यते। स तस्य प्रकृतिभूतस्तत्गुण एव वेति तवाभिमतम्। नचैतत्संभवति। तथा सति कर्मादिगृह्यमाण-तया न प्राप्तमिति व्यसनपरं परापत्तेरित्यर्थः। ननु चक्षुस्तैजसं गन्धानभिव्यञ्जकत्वे सति रूपव्यञ्जकद्रव्यत्वादालोकवदित्यनुमानेन तैजसत्वादिसिद्धिरस्तु अत्र मनसि व्यभिचारवारणाय सत्यन्तम्। सन्निकर्षे व्यभिचारवारणाय द्रव्यपदम्। शब्दादिषु पञ्चसु-मध्ये रूपस्यैव व्यञ्जकत्वादिति वा प्रयोक्तव्यम्। नन्वत्र लुप्ताक्षरमषीनीलिमव्यञ्जके जले व्यभिचारः। न च तस्य तदाच्छादकमलनिरासकत्वमात्रं, न तु तद्व्यञ्जकत्वमिति वाच्यम्।

भूतलनीलरूपाभिव्यञ्जके जले तथाऽपि व्यभिचारात्। जलसिक्ते हि भूतले सन्निकृष्टप्रदेशापेक्षया नैल्यमनुभूयते। तच्च न तदात्व एवोत्पन्नमिति वक्तुं युक्तम्। उत्पादकत्वाभिमतस्यावयवनैल्यस्य पाकादेश्चाभावात्। तस्मात्पूर्वमवस्थितं व्यञ्जकाभावादनभिव्यक्तं जलसंयोगेनाभिव्यज्यत इत्येवोपेयमिति व्यभिचार एवेति चेन्न। जलस्य नवशरावगन्धाभिव्यञ्जकत्वेन तत्र हेतोरगमनात्। न च शब्दमात्रव्यञ्जकत्वादित्यत्र दृष्टान्ताभावः। सामान्यव्याप्तौ तत्राप्यालोकादेर्दृष्टान्तत्वसंभवादिति। मैवम्। गन्धानभिव्यञ्जकत्वे सति रूपाभिव्यञ्जकत्वस्य पाषाणादौ व्यभिचारात्। तस्याऽपि सन्निकर्षकोटिनिविष्टतया स्वगतरूपाभिव्यञ्जकत्वात् स्वगतस्य परगतस्य वा गन्धस्य तेनानभिव्यक्तेश्च। एवं रूपानभिव्यञ्जकत्वे सति गन्धव्यञ्जकत्वादितरापि स्वगतरूपाभिव्यञ्जके घृतादौ साधनवैकल्यं द्रष्टव्यम्। न च रूपे परकीयत्वविशेषणप्रक्षेपेण दोषद्वयपरिहारः। तथाऽप्यञ्जनादौ स्फटिकलौहित्यभ्रमसाधने जपाकुसुमे च व्यभिचारापरिहारात्। घृतस्यापि भूतलनीलरूपव्यञ्जकत्वाच्च। अप्रयोजकत्वेनाहंकारिकत्वबोधकागमबाधेन चानुमानस्य निरासोपपत्तेश्च। तस्मदिन्द्रियाणाहंकारिकाण्येवेति स्थितम्। ननु पादादिभिरेव सञ्चरणा-दिक्रियोपपत्तौ तदधिष्ठानकेन्द्रियाङ्गीकारो व्यर्थ इति चेत्, सत्यपि पादादौ कस्यचिद्विह-रणाद्यदर्शनेन बुद्धीन्द्रियवत्कर्मेन्द्रियस्याप्यावश्यकत्वात्। तदुक्तं **श्रीमन्मृगेन्द्रे** – "वागादीनां पदान्यत्वं पदे सत्यप्यतत्गुणाः"। इति।

पदान्यत्वं – अधिष्ठानान्यत्वमित्यर्थः। सत्यपि पदे अतत्गुणाः – तत्कार्यहीना यतः पुरुषा दृश्यन्त इत्यर्थः। ननु तामसाहंकारेणैव भूतानां निष्पत्त्युपपत्तेस्तन्मात्रैरलमिति चेन्न। आकाशादिषु शब्दाद्येकैकोत्तरगुणवत्वस्याकस्मिकत्वपरिहारायाविशेषाणां शाब्दाद्येकैकोत्तर-गुणानामेव प्रकृतित्वौचित्यात्। न च गन्धरसस्पर्शाद्यधिकरणपरमाणूपादानकत्वेन तावद्-गुणाधिकरणत्वमिति वाच्यम्। गन्धरसस्पर्शादिसौक्षम्यस्यैव तद्धेतुत्वसंभवे तदधिकरण-परमाणुकल्पनायागौरवपराहतत्वात्। तदुक्तं **श्रीमत्पौष्करे** –

तन्मात्रण्यपि कथ्यन्ते क्रमात्प्राप्तानि संप्रति।
बाह्येन्द्रियपरिच्छेद्य गुणत्वात् भूतसंहतिः।।

प्रत्यक्षत्वेऽस्मदादीनां स्थिता कारणपूर्विका।
या तत्र कारणं विप्रास्सा तु तन्मात्रसंहतिः।।
विशेषवत्वाच्छब्दादेस्ते च सामान्यपूर्वकाः।
यत्तत्रापि च सामान्यं तत्तन्मात्रमुदीरितम्।।
एकद्वित्रिचतुः पञ्चगुणा तन्मात्रसंहतिः।
अत एव हि भूतानामभियोगो गुणैः क्रमात्।।
स्थौल्यसौक्ष्म्यकृतो भेदो भूततन्मात्रयोरिह। इति।

अत्रात एव, तन्मात्राणामेकद्वित्रिचतुः पञ्चगुणरूपत्वादेव, भूतानां क्रमात् एकैकाधि-कैर्गुणैरभियोगोऽभिमतो योग उपपद्यत इत्यर्थः। एवं च पृथिव्यास्तन्मात्रपञ्चकं जलस्य तच्चतुष्टयमित्यादिक्रमो द्रष्टव्यः। यद्वा – पृथिव्या गन्धतन्मात्रं जलस्य रसतन्मात्रमित्यादिक्रमो बोद्धव्यः। न च वाय्वादेश्शब्दतन्मात्रजन्यत्वमस्त्विवति वाच्यम्। तस्याकाशसाधारणत्वेन तेनैव तदुत्पत्त्ययोगात्। स्पर्शादितन्मात्रसहितेन तदुत्पत्त्युपगमे आवश्यकेन स्पर्शादितन्मात्रेणैव कार्यनिष्पत्तिसंभवे तस्यान्यथासिद्धत्वात्। एवं तेजसि गन्धरसतन्मात्रयोरसत्भावादेवाजनकत्वे सतोरपि शब्दस्पर्शतन्मात्रयोराकाशवायुसाधारण्येनासाधरण्याय रूपतन्मात्रसाहित्येन जनकत्वे आवश्यकरूपतन्मात्रस्यैव जनकत्वम्।

एवं जलपृथिव्योरपि रसगन्धतन्मात्रयोर्जनकत्वं व्यवस्थापनीयम्। यद्यपि च शब्दतन्मात्रस्य वाय्वादिसाधारण्यं स्पर्शतन्मात्रस्य तेजः प्रभृतिसाधारण्यं रूपतन्मात्रस्य जलादिसाधारण्यं, रसतन्मात्रस्यापि पृथिवीसाधारण्यमस्ति, तथाऽपि तेषां तत्र तत्र जनकत्वाभावादसाधा-रण्यम्। यद्यपि विषमप्रकारस्य[67] रूपतन्मात्रस्य[68] पृथिव्यामभास्वरशुक्लैकप्रकारस्य तस्य जले, भास्वरस्य च तेजसि तथा रूपासमानाधिकरणस्पर्शतन्मात्रस्य वायौ उष्णस्पर्शरूपस्य तस्य तेजसि शीतरूपस्य[69] जले रूपसमानाधिकरणानुष्णाशीतरूपस्य पृथिव्याञ्चासाधारण्यं संभवति। तथाऽपि तन्मात्रावस्थायं विशेषाभावा[70] नोक्तैर्विशेषैरसाधारण्यमुपपद्यते। तदुक्तं **श्रीमन्मृगेन्द्रे** –

शब्दस्स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
गुणाविशिष्टास्तन्मात्रास्तन्मात्रपदयोजिताः।। इति।

अत्र गुणाविशिष्टत्वं शब्दादीनां पृथिव्यादिगुणेषु शब्देषु खडखडत्वादिवत्स्पर्शेषु चानुष्णा-शीतत्वादिवत् रूपेषु रसेषु चानेकविधत्वादिवत्गन्धेषु च सुरभित्वादिवत् विशेषस्याभावः। एवंविधविशेषशून्याश्शब्दादयस्तन्मात्रपदे भूतप्रकृतित्वरूपे योजिताः तन्मात्रा ज्ञेया इत्यर्थः।।

---

67 (टि) विषमप्रकारस्येति। तेजोजलाद्यवृत्तिनीलादिरूपस्येत्यर्थः।

68 (पा) षट्प्रकारस्य

69 (टि) शीतरूपस्येति। स्पर्शस्येति शेषः। एवमनुष्णाशीतरूपस्येत्यत्र बोध्यम्।

70 (टि) तन्मात्रावस्थायां विशेषाभावादिति। उक्तविशेषणविशिष्टत्वाभावादित्यर्थः।

## आकाशतत्त्वम्

शब्दतन्मात्रोपादेयमाकाशं स्पर्शतन्मात्रानारभ्यत्वे सति[71] उक्तरूपं वा स्थूलवर्णात्मकशब्दोपादानं वा। तत्र स्थूलवर्णात्मकशब्दाभ्यां सूक्ष्मवर्णोपेतायाः कुण्डलिन्या अवर्णात्मक[72]स्थूलशब्दोपेतानां वाय्वादीनां च व्यावृत्तिः। नन्वाकाशसद्भावे किं मानम्। न तावदवकाशः। तस्य निबिडमूर्तद्रव्याभावरूपतया मूर्तद्रव्यनिरासहेतोरेव तद्धेतुत्वात्। नापि नीलं नभ इत्यारोपाधिष्ठानत्वेन तत्सिद्धिः। प्रभामण्डलादेरेवाधिष्ठानत्वेनोपपत्तेः। नापि शब्दोपादानत्वेन तत्सिद्धिः। कुण्डलिन्या एवोपादानत्वेनोपपत्तेः। न च ध्वन्यात्मकशब्दस्याशुद्धत्वेन शुद्धमायाकार्यत्वमनुपपन्नमिति वाच्यम्। तत्रापि भेर्यादीनामुपादानत्वोपपत्तेः। अशुद्धत्वस्य निर्वक्तुमशक्यत्वाच्च। अत एव शब्दगुणकत्वेनापि तत्सिद्धिरपास्ता, भेर्यादीनां गुणित्वसंभवात्, शब्दस्य गुणत्वे मानाभावाच्चेति।

मैवम् – ध्वन्यात्मकशब्दोपादानत्वेन तत्सिद्धिसंभवात्। दुःखानुषङ्गरूपेणाशुद्धत्वेन शुद्धमायाकार्यत्वस्यानुपपत्तेः। भेर्यादीनामप्याद्यशब्दोपादानत्वसंभवेऽपि द्वितीयादिशब्दं प्रति तदसंभवात्। तस्य चेन्द्रियसन्निकर्षकारणत्वानुरोधेन व्यवस्थापितत्वात्। अत एव द्वितीयादिशब्दगुणकत्वेनापि तत्सिद्धिरविरुद्धा। शब्दस्य गुणत्वेनापि तत्सिद्धिरविरुद्धा। शब्दस्य गुणत्वं तूत्कर्षापकर्षवत्वेन साधनीयम्। न च द्रव्ययोरपि लोहसुवर्णयोरुत्कर्षापकर्षदर्शनाद्व्यभिचारः। तत्रापि गुणोत्कर्षापकर्षाभ्यामेव तद्व्यवहारात्। न च स्वातन्त्र्येण प्रतीयमानत्वेन द्रव्यत्वं साधनीयम्। अन्यनिष्ठत्वाप्रकारकप्रतीतिविषयत्वस्य तदर्थत्वे गन्धादिभिर्व्यभिचारात्। साक्षात्संबन्धजन्यबुद्धिविषयत्वस्य तदर्थत्वे मन्मते स्वरूपासिद्धेः। आहंकारिकश्रोत्रसंबद्धे आकाशे समवायेन विशेषणतया वा तत्ग्रहात्, द्रव्यत्वानिश्चये संयोगस्य निश्चेतुमशक्यत्वात्समवायेन ग्रहाभ्युपगमे गुणत्वस्यैवापत्तेश्च। शब्दोपादानतया नीलारोपाधिष्ठानत्वमपि तस्य युज्यते। ननु नीलज्ञानं प्रमैवास्तु बाधकाभावात्। न च निस्पर्शत्वेन नीरूपत्वमनुमेयम्। अप्रयोजकत्वात्प्रभादेरिवानुद्भूतस्पर्शवत्वोपपत्तेश्च। अनुमानस्य प्रत्यक्षबाधितत्वेन कालात्ययापदिष्टत्वाच्च। अत एव व्यापकत्वादिलिङ्गमपि परास्तमिति।

मैवम् – दूराद्यस्मिन्नेव प्रदेशे नैल्योपलम्भस्तस्मिन्नेव समीपोपसर्पणे तदभावोपलम्भात्तत्ज्ञानस्य भ्रमत्वं निश्चीयते। समीपोपसर्पणजन्यज्ञानस्य शुक्तित्वज्ञानादेरिव प्रबलत्वात्। ननु तथाऽप्याकाशस्य नीरूपत्वेन चक्षुरयोग्यत्वात्कथं तद्विशेष्यको भ्रमः। न च नीलरूपविशेष्यकचाक्षुषारोपानन्तरं मानस आकाशविशेष्यको भ्रम इति वाच्यम्। नीलरूपस्यासन्निकृष्टत्वेन भ्रमविशेष्यत्वायोगात्। चाक्षुषसाक्षात्कारादौ विशेष्यांशे लौकिकसन्निकर्षस्यैव जनकत्वेन ज्ञानादेरपि सन्निकर्षत्वानुपपत्तेरिति चेन्न। आलोकरूपस्य नीलत्वेनाकाशगतत्वेन च चाक्षुषभ्रमानन्तरमाकाशविशेष्यकमानसभ्रमोपपत्तेः।

---

[71] (टि) स्पर्शतन्मात्रानारभ्यत्वे सतीति। वाय्वादौ तत्तत्पूर्वतन्मात्रारभ्यत्वं तत्तत्तन्मात्रारभ्यत्वं चास्तीत्याशङ्क्य व्योमादौ तत्तदुत्तरतन्मात्रनारभ्यत्वे सतीति विशेषणमित्यवधेयम्।

[72] (टि) अवर्णात्मकेति। ध्वन्यात्मकेत्यर्थः।

## वायुतत्त्वम्

अथ वायुः। स्पर्शतन्मात्रारभ्यो वायुः। रूपतन्मात्रानारभ्यत्वे सत्युक्तरूपो वा रूपासमानाधिकरणस्पर्शोपादानं वा। अस्य च शब्दोऽपि गुणस्तद्गतत्वेन शकशकादिध्वनेः प्रतीतेर्बाधकाभावेनावच्छेदकत्वमात्रविषयकत्वकल्पनायोगात्। न च श्रोत्रेन्द्रियग्राह्यत्वेन व्यतिरेकिणा[73] तत्गुणत्वाभावोऽनुमेयः, घटादेस्सपक्षात् व्यावृत्तत्वेनासाधरण्यात्। नापि वाय्वादिकं न शब्दगुणकं, आकाशेतरत्वात् व्यतिरेकेणाकाशवदिति मानम्, अप्रयोजकत्वात् प्रत्यक्षबाधितत्वाच्च। अयञ्च त्वगिन्द्रियजप्रत्यक्षविषयः। तादृशस्पर्शोपेतत्वात्। नचात्रोद्भूतरूपवत्वं प्रत्यक्षरूपवत्वं वोपाधिः, तस्य स्पार्शनप्रत्यक्षं प्रत्यप्रयोजकत्वात्। न च तस्य द्रव्यगतैन्द्रियकत्वं प्रति प्रयोजकत्वेन तत् व्यावृत्त्या तन्निवृत्तौ तद्विशेष[74]स्पार्शनत्वमपि व्यावर्तत इति युक्तम्। तस्य चाक्षुषत्वं प्रति प्रयोजकत्वेन सामान्यं प्रत्यप्रयोजकत्वात्। न च सामान्येऽपि प्रयोजकान्तराभावादिदमेव प्रयोजकमिति वाच्यम्।

इन्द्रियग्राह्यगुणाधिकरणत्वस्य तत्र प्रयोजकत्वात्। नचैवमाकाशस्यापि श्रोत्रप्रत्यक्षताप्रसङ्ग इति वाच्यम्। चाक्षुषस्पार्शनप्रत्यक्षरूपविशेषकारणयोः प्रत्यक्षरूपस्पर्शयोरभावेन सामान्यसामग्र्या अकिञ्चित्करत्वात्। न च श्रोत्रप्रत्यक्षप्रसङ्ग इति वाच्यम्। तस्य द्रव्यग्रहणे शिलाशकलस्येवाङ्कुरे स्वरूपायोग्यत्वात्, शब्दातिरिक्त तथाविधगुणाश्रयत्वस्य प्रयोजकत्वाद्वा। न च वायोः प्रत्यक्षत्वे तद्गतस्य संख्यादेः प्रत्यक्षतापत्तिः, तत्र सजातीयसंवलनादिदोषाभावस्यापि हेतुत्वात्। अन्यथा सौरालोकादौ तवापि तत्ग्रहप्रसङ्गात्। तथाऽपि वायोस्स्पर्शवत्वे किं मानं, वायुव्यतिरिक्तस्य कस्यचिदपि तत्प्रत्यक्षे[75] अभानादिति चेन्न। असाधारणग्राह्यगुणपुरस्कारं विनेन्द्रियस्य द्रव्याग्राहकत्वात्।।

## अथ तेजः

रूपतन्मात्रारभ्यं तेजः, रसतन्मात्रानारभ्यत्वे सत्युक्तरूपं वा। उष्णस्पर्शोपादानं वा। चन्द्रातपादावपि तेजस्त्वेनानुद्भूतस्योष्णस्पर्शस्य सत्वान्नाव्याप्तिः। अस्य च यद्यपीन्द्रियवत्प्रकाशकत्वात्परंपरयाऽपि सात्विकाहंकारारब्दत्वमेव। तथाऽपि घटाद्यपेक्षया प्रकाशकत्वेऽपीन्द्रियापेक्षया प्रकाश्यत्वेन सत्वगुणापकर्षेण परंपरया तामसाहंकारकार्यत्वमुक्तं वेदितव्यम्। अत्रापि धमधमादिशब्दस्याग्न्यादिगुणत्वमेवेति।।

## अथ जलम्

रसतन्मात्रारभ्यं जलं, गन्धतन्मात्रानारभ्यत्वे सत्युक्तरूपं वा, शीतस्पर्शाधिकरणं वा। तप्तवारिगतं तु शैत्यं प्रबलेन तेजोगतौष्ण्येनाभिभवां नोपलभ्यते। वाय्वादिना तदपगमे तूपलभ्यते। हिमकरकादिकमपि शीतस्पर्शवत्वाज्जलमेव। द्रवत्वप्रतिबन्धमात्रेण तत्र काठिन्यप्रतीतिः। यद्यपि चास्य कूपतटाकादिषु रसभेदः प्रतीयते, तथाऽपि तस्याश्रयभेदकृतत्वात्सर्वत्र मधुर एव रसः। समुद्रजलादिषु लवणरसप्रतीतिरपि पार्थिव–

---

[73] (टि) श्रोत्रेन्द्रियग्राह्यत्वेन व्यतिरेकिणेति। शब्देन वायुगुणः, श्रोत्रेन्द्रियग्राह्यत्वात् व्यतिरेकेण–स्पर्शवदिति प्रयोगः।

[74] (टि) तत्व्यावृत्त्या – उत्भूतरूपव्यावृत्त्या। तन्निवृत्तौ – ऐन्द्रियकत्वनिवृत्तौ। तद्विशेषेति – ऐन्द्रियकत्वविशेषेत्यर्थः।

[75] (टि) तत्प्रत्यक्षे – वायुप्रत्यक्षे।

लवणसंसर्गकृतैव।।

## अथ पृथिवी

गन्धतन्मात्रारभ्या पृथिवी। अस्याञ्च रूपं नानाविधं, रसश्च षट्प्रकारः, स्पर्शश्चानुष्णाशीतरूपः। एते च गन्धसहिताः पाकजाः अपाकजाश्च। न च घटादौ रक्तरूपवत् तप्तजलेऽपि पाकजस्पर्शोऽस्त्विति वाच्यम्। अग्न्यपायेऽपि रक्तरूपप्रतीतिवत् उष्णस्पर्शोपलम्भापत्तेः।।

## भूतानि

एतच्चाकाशादिपृथिव्यन्तं बाह्येन्द्रियग्राह्यगुणाधिकरणत्वेन वा स्थूलशब्दोपादानत्वेन वा तन्मात्रोपादेयत्वेन वा प्रवृत्तिनिमित्तेन भूतपदव्यपदेश्यम्।

तदुक्तं **श्रीमन्मृगेन्द्रे** –

व्योमप्रभञ्जनाग्न्यम्बुभूमयो भूतपञ्चकम्।
शब्दाद्येकोत्तरगुणमवकाशादिवृत्तिमत्।।
व्यूहोऽवकाशदानञ्च पक्तिसंग्रहधारणाः।
वायुव्योमहुताशाम्बुधरणीनां च वृत्तयः।।
इति पञ्चसु शब्दोऽयं स्पर्शो भूतचतुष्टये।
अशीतोष्णौ महीवाय्वोश्शीतोष्णौ वारितेजसोः।।
भास्वदग्नौ जले शुक्लं क्षितौ शुक्लाद्यनेकधा।
रूपं त्रिषु रसोऽम्भस्सुमधुरष्षड्विधः क्षितौ।।
गन्धः क्षितावसुरभिस्सुरभिश्च मतो बुधैः। इति।

अत्र शब्दाद्येकोत्तरगुणमिति गुणद्वारकं लक्षणमवकाशादिवृत्तिमदिति व्यापारद्वारकं पञ्चानामपीति बोध्यम्। तथा **श्रीमत्पौष्करेऽपि** –

महाभूतानि जायन्ते क्रमात्तन्मात्रपञ्चकात्।
आकाशं पवनस्तेजस्तोयं भूरिति संज्ञया।।
गमागमादिव्यापारो यस्मिन्सति नृणां भवेत्।
तद्धेतुभूतमाकाशमिष्यतां मुनिपुङ्गवाः।।
नोचेत्तदवकाशाख्यं विचरेयुः क्व जन्तवः।
न हि भूम्यन्तरा[76] दृष्टौ प्राणिनान्तु गमागमौ।।
तस्मादाकाशमेष्टव्यमवकाशस्य कारणम्।
किञ्च तीव्रादयश्शब्दा गुण्यपेक्षा गुणत्वतः।।
गुणी चाकाशमित्युक्तं तच्च नृणामतीन्द्रियम्।
वाय्वादीनां समुत्पत्तिः क्रमेणैवाभिधीयते।।
वायुरग्निस्तथा तोयं पृथ्वीत्येतच्चतुष्टयम्।
अनिलः स्पर्शतन्मात्रादभवत् व्यूहनात्मकः।।

---

[76] (टि) भूम्यन्तरा – भूमेरन्तः प्रदेशे।

उत्क्षेपणादिव्यापारहेतुत्वेनोपकारकः।
दशधा वर्तमानोऽन्तश्शरीरे सर्वजन्तुषु।।
प्राणापानसमानादिव्यानोदानादिसंज्ञया।
अनलो रूपतन्मात्राज्जायते पंक्तिलक्षणः।।
स च त्रेधा स्तिथा लोके गार्हपत्यादिसंज्ञया।
ततोऽन्य एव शैवाग्निस्ततो बिन्दूदरान्तरे।।
यद्यदश्नाति लोकोऽयं तदनेनैव पच्यते।
अतोऽयमनलोऽत्यन्तं प्राणीनामुपकारकः।।
अभवद्रसतन्मात्रात्तोयं संग्रहणक्रियम्।
तोयेनैव प्रतिष्ठाऽस्य स्थिता लोकस्य वस्तुतः।।
स्वतो धूळ्यात्मकत्वेन पृथ्वी चानेन वैदृढा।
पृथिवी गन्धतन्मात्रादभवद्धारणक्रिया।।
नाकाशाज्जायते वायुर्न वायोरग्निसंभवः।
नाग्नेरापस्ततः पृथ्वी धर्मातिशयदर्शनात्[77]।।
कारणात्गुणसंक्रान्तिर्युक्ता कार्येषु न स्वतः।
व्योम्नः पञ्चगुणत्वं स्यात्तथा सृष्टिक्रमो यदि।।
तन्मात्रपञ्चकाज्जातं ततो व्योमादिपञ्चकम्। इति।।

## तत्त्वानां साधारण्यासाधारण्ये

अत्रापि कारणद्वारा कार्यद्वारा वा लक्षणान्युपयोगाश्च कथिताः। एतैश्च कलादि-पृथिव्यन्तैरारब्दानि कार्याणि साधारणासाधारणोभयरूपभेदेन त्रिविधानि। तत्र भुवनादीनि साधारणानि, सर्वेषां भोगजननस्वरूपयोग्यत्वात्। तत्तत्पुरुषीयाणामपि चन्दनादीनां उक्तरूपोपन्नत्वात्[78] साधारणत्वमेव। असाधारणानि कलादिपृथिव्यन्तारब्धानि पुर्यष्टकशरीरादीनि। तेषां तत्तत्भोगमात्रजनकत्वात्। तदुक्तं **तत्त्वसंग्रहे** –

वसुधादिस्तत्त्वगणः प्रति पुं नियतः कलान्तोऽयम्।
पर्यटति कर्मवशतो भुवनज देशेष्वयञ्च सर्वेषु।। इति।

तथा **श्रीमन्मृगेन्द्रेऽपि** –

प्रयोक्त्र्यादिमहीप्रान्तमेतदण्वर्थसाधनम्।
प्रत्यात्मनियतं भोगभेदतो व्यवसीयते।।
सर्वतो युगपत् वृत्तेरनुत्पादादसर्वगम्।
भिन्नजातीयमप्येकफलं दीपाङ्गवस्तुवत्।। इति।

अत्र कर्तृशक्त्यभिव्यञ्जनेन पुरुषप्रेरकत्वात्प्रयोक्त्री कला। कार्यकारणयोरभेदात्

---

[77] (टि) धर्मातिशयदर्शनादिति। व्योमाद्यपेक्षया वाय्वादिष्वित्यर्थः।

[78] (टि) उक्तरूपोपपन्नत्वात् – सर्वेषां भोगजननस्वरूपयोग्यत्वात्।

महीप्रान्तभिन्नजातीयशब्दाभ्यां तत्कार्यं व्यपदिष्टम्। एषां च भूततन्मात्र-बुद्धीन्द्रियकर्मेन्द्रियान्तःकरणरूपेण वर्गपञ्चकेन तत्कारणेन गुणेन तद्धेतुभूतेन प्रधानेन कलादिपञ्चककञ्चुकेन चारब्धत्वात्पुर्यष्टकव्यपदेशः।

शब्दः स्पर्शाश्च रूपञ्च रसो गन्धश्च पञ्चकम्।
बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम्।।

इति **श्रीमत्कालोत्तरवचन**मप्येतत्परतयैव व्याख्येयम्।।

## पुर्यष्टकदेहः

ननु भोगस्य कर्मजन्यत्वात्तत्प्रतिनियमस्यापि नियतिजन्यत्वात्पुर्यष्टकदेहः किमर्थमङ्गीकरणीयः। न च भोगजनने कर्मणस्सहकारित्वेन तत्सिद्धिः। चन्दनादेस्स्थूलदेहस्य च तदुपपत्तेः[79]। तस्याङ्गीकारेऽपि कलाद्यारब्दत्वे मानाभावश्चेति चेन्न। स्थूलदेहपरित्यागेन लोकाल्लोकान्तरगमनस्य व्यापके चेतने स्वभावतोऽसंभावितत्वेनोपाधिकृतत्वेऽवश्यमङ्गीकरणीये उपाधित्वेन तत्कल्पनोपपत्तेः। न च लोकान्तरगतफलोपभोगहेतुस्स्थूलदेह एवोपाधिः। तस्य लोकान्तर एवोत्पत्तिश्रवणे नेहत्यत्वायोगेनोपाधित्वायोगात्। तस्य कलादिमह्यन्तारब्धत्वं तु आगमादेवावगन्तव्यम्। एवं कलादीनां कार्यकारणभावे उत्पत्तिक्रमेऽसाधारणे कलादौ च यत्रानुमानं न प्रवर्तते तत्र सर्वत्रागम एव शरणम्।

तदुक्तं **श्रीमन्मृगेन्द्रे** –

बुध्यगम्येऽपि सद्वाक्यात्प्रतीतिरनुपद्रवा।
मितार्थादमितार्थस्य ज्यायस्त्वमिति सूरयः।। इति।

उभयरूपाणि स्थूलशरीराणि। ननूभयरूपत्वं व्याहतम्। प्रतिनियतभोगजनकत्वे सर्वभोगजनकत्वस्य तस्मिन्वा सति तस्यायोगादिति चेन्न। शरीरस्य हि द्वेधा भोगजनकत्वं, तत्रैकं भोगावच्छेदकत्वेन अपरं चन्दनादिवत्भोग्यत्वेन। तत्राद्यं वनितादिशरीराणां तदीय भोगजनने। द्वितीयन्तु पत्यादिभोगजनने। तत्राद्यस्यासाधारणत्वेन द्वितीयस्य साधारणत्वेन चोभयरूपत्वोपपत्तिः। चन्दनादीनां केवलभोग्यत्वं सूक्ष्मदेहस्यापि केवलावच्छेदकत्वमिति नोभयरूपता। एवं निरूपिता तत्त्वसंहतिः। तात्विकानि भुवनादीनि तु अष्टमसूत्रे वक्ष्यन्ते।।

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये द्वितीयसूत्रभाष्यम् समाप्तम् ॥**

---

[79] (टि) तदुपपत्तेः – सहकारित्वोपपत्तेः। तस्याङ्गीकारेऽपीति। तस्य – पुर्यष्टकदेहस्य।।

# तृतीयसूत्रभाष्यम्

पूर्वसूत्रे पुंसां संसृतिं करोतीत्युक्तं, तत्र को वा पुमान् यस्यैषा शिवाद्यवनिपर्यन्ता संसृतिस्संभाव्येतेत्याशङ्क्य, कालान्तरदेशान्तरभावि शिवाद्यवनिपर्यन्ता भोगयोग्यतासिद्ध्यर्थं वक्ष्यमाणशिवानन्यताद्यर्थञ्च शून्यदेहेन्द्रियान्तःकरणचित्तप्राणक्षणिकविज्ञानात्मवादिनिराकरणपूर्वकां तद्व्यावृत्तस्वयंप्रकाशविज्ञानरूपी सर्वगोचरज्ञानक्रियाशक्तियोग्यपि तस्या[1] आणवावृतत्वेन परतन्त्रतयाऽवस्थापञ्चकस्थ इत्युत्तरसूत्रद्वयेन प्रतिपादयति –

## तृतीयसूत्रम्

**नेतितो ममतोद्रेकादक्षोपरतिबोधतः।**
**स्वापे निर्भोगतो बोधे बोद्धृत्वादस्त्यणुस्तनौ॥**

नेतित इत्यादि –

नेतितः – शून्यप्रतिपत्तेः, ममतोद्रेकात् – ममता ममेदं शरीरमिति शरीरात्मभेदबुद्धिः, तस्या उद्रेकात् आधिक्यात् अधिकबलत्वात् भूयस्त्वात्। अक्षोपरतिबोध – अक्षाणां चक्षुरादीनां बाह्यकरणानाम्, उपरतिः – स्वप्नः, तत्राऽपि बोधनात् बोधदर्शनात्। स्वापे निर्भोगतः। भुज्यत इति भोगो बुद्धिः। सुषुप्तिकाले भोगस्य बुद्धेरभावात्। अत्र स्वापरग्रहणं तुरीयतुरीयातीतयोरप्युपलक्षणम्। भोगग्रहणञ्च[2] चित्तप्राणयोरप्युपलक्षणम्। बोधे बोद्धृत्वात् – बोधे सति प्रबोधानन्तरं बोद्धृत्वात्। अस्ति शब्दोऽसद्व्यावृत्तिपरोऽसङ्कुचितसार्वकालिकास्तित्वपरश्च। तनुशब्दोऽपि देहेन्द्रियान्तःकरणादिसमुदायपरः। तथा च देहेन्द्रियान्तःकरणादिसङ्घेऽधिष्ठेयेऽधिष्ठातृतया स्थित एवाणुः, न तु स्वदेहेन्द्रियान्तःकरणादिरूपः। अस्ति असद्व्यावृत्तः स्थायी चेति साध्यपञ्चकं पर्यवसितम्। तत्र च यथायोग्यमुक्तहेतुपञ्चकस्याप्यन्वय उपपद्यते। अथवा व्यक्तमेवोत्तरसूत्रेऽन्तःकरणादन्य इति साध्यम्। अपि शब्दसमुच्चितेन्द्रियान्यत्वञ्च। तथा च तत्साध्यद्वयमत्र संबध्यते। एवाञ्चात्र पक्षे तनुशब्देन देहमात्रमुच्यते। अस्तिशब्देन चोक्तं साध्यद्वयम्। तथा चात्रापि पूर्ववदेवान्वयः।

तथाहि – शून्यप्रतिपत्तेः प्रतिपत्ताऽणुर्नासन्निति। अयंभावः[3] – सर्वशून्यवादिनस्तव घटादिशून्यमिति यदि केनच्चिन्न प्रतिपद्यते तदा तस्याप्रामाणिकत्वापत्तिः। तथा च तस्य प्रतिपत्ता वाच्यः। न च सोऽपि शून्यः, तत्र प्रमाणाभावात्। न हि स्वयं वक्ष्यमाणप्रत्यभिज्ञया तदानीमवगतस्स्वाभावरूपं शून्यत्वमवगन्तुमर्हति। इदानीं नाहमस्मीति स्वात्मनि

---

[1] (टि) तस्यास्सर्वगोचरज्ञानशक्तेस्तादृशक्रियाशक्तेश्च। आणवावृतत्वेन – मलाभिभूतत्वेन।

[2] (टि) भोगग्रहणञ्च – बुद्धिग्रहणञ्च।

[3] (टि) नेतितः – सर्वाभावप्रतिपत्तेर्नात्माभावसिद्धिर्माध्यमिकानाम्। तथाहि – सर्वाभावः प्रमितश्चेत्सिध्येत्। प्रमितिश्च सर्वाभावरूपविषयसव्यपेक्षा स्वात्मलाभापेक्षाऽऽश्रयापेक्षा च साधयन्ती स्वस्वाश्रयविषयव्यतिरिक्तसर्वाभावमेव साधयेत्। तथा च कथं सर्वशून्यता। इदमेवाहायं भाव इति।

क्रियाविरोधश्च। यद्वा शून्यप्रतिपत्तिरस्ति न वा। यदि नास्ति तदा तस्याप्रामाणिकत्वापत्तिः। तथा च सास्तीति वाच्यं, न च सापि शून्या, तथात्वे शून्यासिद्धिप्रसङ्गात्। नह्यसत्याऽसिद्धं साध्यत इति सा सतीति वाच्या सैवास्माकमात्मेति[4]।

चार्वाकास्तु देह एवात्मेत्याहुः। तथाहि – देहातिरिक्तात्मसद्भावे किं मानं, न तावत् प्रत्यक्षम्। तस्यानुपलंभात्। मम देह इति प्रत्ययस्य ममात्मेतिवदुपपत्तेः। नाप्यनुमानं, लिङ्गाभावात्। चैतन्याश्रयत्वेन तत्कल्पने देहेनार्थान्तरत्वात्। ननु प्रवर्तमानो देहादिरन्याधिष्ठानप्रयुक्तप्रवृत्तिमान् जडत्वाद्दण्डादिवदिति मानम्। तदुक्तं **श्रीमत्पौष्करे** –

प्रवर्तमानो देहादिश्चेतनाधिष्ठितस्सदा।
स्वतः प्रवृत्तिशून्यत्वाज्जडत्वेन घटादिवत्।।
यस्तु प्रवर्तकस्सोऽयमात्मेति परिपठ्यत। इति।

अत्रान्याधिष्ठितत्वमेव साध्यं, चेतनेति तु पर्यवसानाभिप्रायकम्, अन्यथा साध्याप्रसिद्यापत्तेः। देहाद्यधिष्ठितस्य घटादेर्दृष्टान्तत्वानुपपत्तिप्रसङ्गाच्च। अत एव यस्तु प्रवर्तक इत्यधिष्ठातृमात्रं साध्यमुपादाय सोऽयमात्मेति चेतने पर्यवसानं कथितमिति। मैवम् – चैतन्यहीनत्वलक्षणस्य जडत्वस्य मां प्रत्यसिद्धेः। स्वसमवेतचैतन्यगुणाधिष्ठितत्वेनार्थान्तराच्च। न च चैतन्यस्य भूतसमवाये[5] घटादिष्वपि तत्प्रसक्तिः। वस्तूनां विचित्रस्वभावतया देहादिरूपेण परिणत एव भूते तत्समवायोपपत्तेः। न हि मणिमन्त्रादिषु भूतेषु विचित्रशक्तयो दृष्टा इत्यन्यत्रापि तादृश्यन्ते। अन्यथा तवापि देहाद्यवच्छेदेन चैतन्योत्पत्तिवत् घटाद्यवच्छेदेनापि तदापत्तेः, चैतन्यं प्रति क्लृप्तहेतुभावस्य[6] देहस्यैव समवायित्वकल्पनौचित्याच्च। एतेन जडत्वासिध्यैव,

विरुद्धकारणात्कार्यं विरुद्धं नैव जायते।
विरुद्धमपि चैतन्यञ्जडाद्देहात्कथं भवेत्।।

इति **श्रीमत्पौष्करो**क्तन्निरस्तम्। न च शवत्वदशायामपि चैतन्यापत्तिः। अत एव **श्रीमन्मृगेन्द्रे** – 'यस्मान्नसत्यपि शवे चिति'रित्युक्तमिति युक्तम्। तवापि शवशरीरान्निवृत्तात्मनश्चैतन्योत्पत्त्यापत्तेः। प्राणवायुसंयोगलक्षणसहकार्यभावादनुत्पत्तेश्च तुल्यत्वात्[7]।

ननु देहो न चैतन्याश्रयः, भोग्यत्वात् विकारित्वाद्वा[8], घटवदिति चौतन्याश्रयः तदन्योऽभ्युपगन्तव्यः। तदुक्तं **श्रीमन्मृगेन्द्रे** –

'चेतनश्चेन्न भोग्यत्वाद्विकारित्वाच्च जातुचित्।

---

[4] (टि) सैवास्माकमात्मेति। ननु सर्वशून्यत्वप्रतिपत्तिरेवास्माकमात्मेति कथमुच्यते। प्रतिपत्त्यैव खल्वात्मेति चेन्न। तस्य प्रथममेवेक्तत्वेनाद्वैतिमतमादायापि वादिनिग्रहसंभवात्। स्वमतेऽप्यात्मरूप-चित्यैव सुषुप्तौ सर्वविषयाभावप्रकाशभ्युपगमाच्च।

[5] (टि) भूतसमवाये पृथिव्यादिभूतसमवाये। तत्समवायोपपत्तेः – चैतन्यसमवायोपपत्तेः।

[6] (टि) क्लृतहेतुभावस्य – आस्तिकमतेऽवच्छेदकतया, नास्तिकमते समवायितया। तथा च शरीरस्य हेतुत्वमुभयसिद्धम्। तत्र समावायितया परमास्तिकेनाङ्गीकार्यं शरीरव्यतिरिक्तस्य चैतन्यहेतुत्वन्तु न नास्तिकेनाभ्युपगतमिति भावः।

[7] (टि) तुल्यत्वात्। आवयोरास्तिकनास्तिकयोरुभयोरपीति भावः।

[8] (टि) भोग्यत्वं परशिवे व्यभिचरितमित्याशङ्क्याह – विकारित्वाद्वेति।

भोग्याविकारिणो दृष्टाश्चिद्विहीना घटादयः।। सोऽप्येव' मिति।

मैवम्। इन्द्रियानाश्रयत्वस्योपाधित्वात्। न च पक्षेतरता, हस्तादेरपि[9] व्यावर्तस्य सत्भावात्, अनुमानस्य मानत्वासिद्धेश्च। तस्माद्देह एवात्मा, न तु तत्रान्योऽस्तीति। तदेतन्निराकर्तुमाह – **ममतोद्रेकादिति**। ममतोद्रेकान्न देहोऽणुरिति संबन्धः।

नन्वहं मनुष्य इति शरीरात्मप्रत्ययोऽप्यस्ति, तथा च विनिगमनाविरहात् कथं भेदबुध्या भेदस्साध्यत इत्याशङ्क्योक्तमुद्रेकादिति। शरीरात्मभेदे उक्तप्रत्यक्षवदनुमानागमप्रत्ययानां बहूनां सत्वात्तत्प्रत्ययस्याधिक्यमिति भावः। तथा च प्रबलेन तेन विरोधादभेदप्रत्यक्षमेव नास्ति। व्यपदेशस्त्वौपचारिकः। सत्वेऽपि वा भ्रम एवेति द्रष्टव्यम्। तदुक्तं **श्रीमत्पौष्करे** –

तस्मात्स्थूलोऽहमित्यादिर्ज्ञेयो राहोश्शिरो यथा। इति।

राहोरित्युपचारमात्रे दृष्टान्तः। अपि च नेतित इत्यावर्तते। तेनानुमानमप्युपन्यस्तम्। तथाहि – नेतितः। देहश्चैतन्यगुणाश्रयो नेत्यनुमानेन निश्चयादित्यर्थः। नेतीति पदं तदभिलापहेतु-भूतायां बुद्धौ वर्तते, ततस्तत्सिद्धिः। अनुमानन्तु चैतन्यं न देहविशेषगुणः, असत्यपि विरोधिगुणप्रादुर्भावे तत्समानकालीनध्वंसस्य प्रतियोगित्वात्, घटगतरूपादिवत् व्यतिरेकेण देहरूपवदिति। नचासिद्धिः। मरणदशायामसत्यपि ज्ञानान्तरे[10] देहसत्वेऽपि चैतन्याभावात्। चैतन्यन्तु शरीरगतचेष्टाप्रयोजको धर्म इति नाश्रयासिद्धिः। तदुक्तं **श्रीमत्पौष्करे** –

किञ्च यस्य तु यो धर्मस्तन्नाशाद्धर्मनाशनम्।
विरोधिगुणसद्भावादथ स्यादन्यथा द्विजाः।।
देहे सत्यपि चैतन्यं मृते किमिति नेष्यते।
यत्भावयदभावाभ्यां चेष्टाचेष्टे भजेत्तनुः।।
तच्चैतन्यमिति प्रोक्तं व्यतिरिक्तं तु देहतः। इति।

अथवा य उज्जयिन्यां मया पूर्वस्मिन्वत्सरे दृष्टस्सोऽत्र वाराणास्यां दृश्यमानो न भवतीति पूर्वदृष्टसमानाकृतौ कस्मिंश्चित्तत्त्वेन[11] सन्दिह्यमाने समीपोपसर्पणादिनाऽऽलोचने तद्भेदनिश्चयादित्यर्थः। देहस्यैव चैतन्यगुणयोगित्वे तस्योपचयापचयादिना भेदेन पूर्वदेहदृष्टात्भेदमिदानीं तनो[12] देहो न निश्चिनुयात्। नह्यन्येन परिदृष्टात् भेदमभेदं वाऽन्यो निश्चेतुं शक्नोतीति भावः। नेति निश्चयस्तद्धेतुभूतप्रतियोगिस्मृतेस्तज्जन्यायाः प्रत्यभिज्ञायाश्चोपलक्षकः। देहस्यैवात्मत्वे ते अपि न स्यातामिति भावः। तदुक्तं **श्रीमत्पौष्करे** –

किञ्च बाल्ये च वार्धक्ये यौवने च विभेदतः।
शरीरस्यानुसन्धानं कथं बाल्ये कृतस्य च।।

---

[9] (टि) हस्तादेरपीति। पक्षेतरत्वन्तु पक्षमात्रव्यावृत्तमिदन्तु हस्तादेरपीति न तत्तुल्यतेति भावः।

[10] (टि) विरोधिगुणाभावं दर्शयति – असत्यपि ज्ञानान्तर इति। चैतन्यध्वंसस्य शरीरसमानकालिकत्वं प्रतिपादयितुं देहसत्वेऽपीति।।

[11] (टि) तत्त्वेन – पूर्वदृष्टत्वेन।

[12] (टि) पूर्वदेहदृष्टात्भेदं – चैत्रस्य पूर्वदेहेनोज्जयिन्यां दृष्टाद्यज्ञदत्तात्वाराणस्याञ्चैत्रेण दृष्टस्य विष्णु-मित्रस्य भेदं चैत्रस्येदानीन्तनो देहो न निश्चिनुयादित्यर्थः।

सतावदनुसन्धत्ते प्राक्भुक्ता सेयमङ्गना।
इति तस्माच्छरीरात्मवादोऽध्यक्षनिराकृतः।। इति।

अत्राध्यक्षनिराकृत इति पूर्वदृष्टप्रतियोगिकभेदाभेदप्रत्यक्षान्यथानुपपत्तिनिराकृत इत्यर्थः। न तु साक्षात्प्रत्यक्षनिराकृत इत्यर्थो ग्राह्यः। देहगोचरस्यात्मभेदप्रत्यक्षस्यात्रानुपन्यासात्। तथा **श्रीमन्मृगेन्द्रे**ऽपि – "न स्मृतिस्तदा।

नाप्येवं सुप्रतीतत्वात् स्मर्ता कायेतरोऽस्त्यतः।।" इति।

अत्र देहातिरिक्तात्मानाभ्युपगमे स्मृतिर्न स्यादिति न स्मृतिस्तदेत्यनेनापादिते इष्टापत्तिशङ्का न कार्या, तस्यास्सर्वलोकप्रसिद्धत्वादिति नाप्येवमित्यनेनोक्तम्। नचानुमानस्य प्रामाण्यं नास्तीतित्युक्तं, तस्य प्रथमसूत्रे साधितत्वात्। इन्द्रियाणामात्मत्वन्निरसितुमाह – अक्षेति।

अक्षोपरतिबोधनान्नेन्द्रियाण्यणुरिति संबन्धः। अस्ति स्वप्ने गजमहं पश्यामीति ज्ञानाश्रयतयाऽहंत्वेन चानुभवादणुः। न च तदानीमिन्द्रियाणि सन्ति स्मृत्यागमाभ्यां तदा तदसत्वस्य प्रतिपादनादिति भावः। अथवा[13] अक्षाणाञ्चक्षुरादीनामुपरतौ स्वकार्याक्षमत्वे विनाशेऽपि बोधनात्तद्गृहीतार्थानुसन्धानादित्यर्थः। योऽहञ्चक्षुषा घटमद्राक्षं सोऽहमिदानीमान्ध्यदशायां तमेव त्वचास्पृशामीत्यनुसन्धानाद्दशाद्वयानुस्यूतमेकं ज्ञातारं कल्पयतीतीन्द्रियातिरिक्तज्ञातृसिद्धिरिति भावः। अथवा अक्षोपरतेर्बोधत इत्यर्थः। न हि स्वात्मविनाशस्स्वेन ज्ञातुं शक्यते। स्वात्मनाशकाले स्वस्यानवस्थानादिति भावः। बुद्धिचित्तप्राणानामात्मत्वं निरसितुमाह – **स्वाप इति**। स्वापे निर्भोगतो न बुद्धिरणुरिति संबन्धः। बुद्धिचित्तप्राणानाणवः। सुषुप्तितुरीयतुरीयातीतेषु यथाक्रमं तेषामभावादित्यस्य पर्यवसितोऽर्थः।

अत्रापि तदा तेषामभावस्स्मृत्यागमाभ्यामवगम्यते। अथवा प्राणवायोरात्मत्वन्निराकरोति – **स्वापे निर्भोगत** इति। भोगबोधयोः कदाचिद्व्यतिरेकप्रतिपादनेन कदाचिदेवान्वयप्रतिपादनेन च कादाचित्कत्वमुक्तम्। तथा च तयोः प्राणवायुगुणत्वे तद्गतस्पर्शादिवद्यावद्द्रव्यभाविता स्याद्वायुविशेषगुणस्य यावद्द्रव्यभावित्वनियमादिति भावः। अन्तःकरणात्मत्वनिरासेऽपि नेतित इत्येवावृत्त्या योजनीयम्। तेषां करणत्वेनैव धर्मिग्राहकप्रमाणेन सिध्या ज्ञातृत्वाभावनिश्चयादिति भावः। ज्ञानक्रमादिलक्षणकार्यमात्र एव चरितार्थत्वेन तेषां ज्ञातृत्वे मानाभावाच्च। तदुक्तं **श्रीमत्पौष्करे** –

बुद्ध्यादीनां न चात्मत्वं यत्कार्यात् सिद्धिरात्मनः।
तदन्यकार्यहेतुत्वात्तेषां सिद्धिर्यतस्स्थिता।।
अत्रापि तेषां हेतुत्वे विश्वमप्येकमिष्यताम्। इति।

ज्ञानसन्ततिरात्मेति मतन्निरसितुमाह – **बोध इति**। बोधे बोधृत्वादस्त्यणुरिति सार्वकालिकसत्तावचनेनाणुशब्दस्य संबन्धः। अणु अस्ति सार्वकालिकः। न क्षणिकविज्ञानसन्तानः। प्रबोधानन्तरं पूर्वजागरकृतकर्मशेषबोधृत्वात्। क्षणि-कालयविज्ञानसन्तानात्मपक्षे पूर्वसन्तानस्य सुषुप्तौ विच्छिन्नत्वेन प्रबोधानन्तरोत्पन्नसन्तानस्य

[13] (टि) स्वकार्याऽक्षमत्वमित्येवं रूपविनाश उपरतिशब्दार्थ इत्याह – अथवेति।

सन्तानान्तरत्वेन तयोर्भिन्नसन्तानत्वात् सन्तानैक्यप्रयुक्तमप्युक्तानुसन्धानं न स्यात्। सुषुप्तौ पूर्वसन्तानाविच्छेदेऽपि शरीरनाशे पूर्वसन्तानस्य सर्वात्मना विच्छेदात् पुनर्जन्मानन्तरं बालस्य स्तन्यपानादिप्रवृत्त्यनुकूलेष्टसाधनतादिस्मरणं न स्यात्। अनुभवितृस्मर्तृसन्तानभेदादिति। सचायमात्मा नैयायिकादीनामिव नास्माकं जडत्वेनाभिमतः। तस्य चैतन्यरूपतया निगमागमादिषु बोधनात्। नापि साङ्ख्यादीनामिव अकर्तृत्वेनाभिमतः। विधिवाक्यादिना तस्य कर्तृत्वबोधनात्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

> नाव्यापको न क्षणिको नैको नापि जडात्मकः।
> नाकर्ताभिन्नचिद्योगी पाशान्ते शिवता श्रुतेः।। इति।।

**। तृतीयसूत्रे संग्रहभाष्यं समाप्तम् ।**

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यानं प्रस्तूयते। पूर्वसूत्रे पुंसां संसृतिं करोतीत्युक्तम्। तत्र को वा पुमान् यस्योक्तासंसृतिस्संभाव्येतेत्याकांक्षायां देहादिव्यतिरिक्त इति प्रतिपादयति – **नेतित इति**।।

## शून्यवादः

अत्र माध्यमिकः प्रथमं शून्यमात्मतत्त्वमित्याह। तथाहि – शुक्तौ रजतज्ञाने विशेषदर्शनानन्तरं[14] मया दृष्टमिदं रजतं कालत्रयेऽपि नास्तीति द्रष्टृदर्शनतद्विषयरजतत्वतत्संबन्धतद्धर्मिणां त्रैकालिको निषेधः प्रतीयते। त्रैकालिकनिषेध एव स्वस्य शून्यत्वं नाम। तथा च द्रष्टुरप्यात्मनस्तादृशनिषेध-प्रतीतेस्तस्यापि शून्यत्वम्। न च रजतादेरेवाभावस्तत्र प्रतीयते, न तु द्रष्टुरिति कल्प्यत इति वाच्यम्। विनिगमनाविरहात्। प्रत्युतार्धजरतीयाया[15] रीतेरयुक्तत्वाद्द्रष्टुरप्यभावः प्रतीयत इति शून्यत्वमेव द्रष्टुरिति। किञ्च यदवस्थात्रयाव्यभिचारितदात्मतत्त्वमिति वृद्धाः। नचेन्द्रियमनोहंकाराणामवस्थात्रयाव्यभिचारित्वम्। तेषां स्वप्नसुषुप्त्योरभावात्। नापि क्षणिकविज्ञानस्य, सुषुप्ताभावादेव। तथाहि – सुषुप्तौ न विषयेण साकारं ज्ञानमस्ति, तदानीमिन्द्रियाणामुपरतत्वात्। नापि निर्विकल्पकमालयविज्ञानं तदा तत्र प्रमाणाभावात्।

ज्ञानस्य सप्रकारकत्वनियमाच्च न निष्प्रकारकज्ञान संभवः। किञ्च यदि सुषुप्तावहं ज्ञानं तदोत्थितस्य सुषुप्तावहमित्यभिमन्यमान एवासमिति तत्ज्ञानस्मृतिरपि स्यात्स्वयंप्रकाशत्वेन तत्ज्ञानस्यापि[16] तदानीं ज्ञातत्वात्। न च तथा दृश्यते। उत्थितस्य सुखमहमस्वाप्समिति ज्ञानं न स्मृतिः। उक्तबाधकेन सुषुप्तिकाले तदनुभवासंभवात्। किन्तु तात्कालिकानुभव इति ज्ञानमप्यवस्थात्रयव्यभिचार्येव। ततश्शून्यमेवावस्थात्रयाव्यभिचार्यात्मकतत्त्वमिति।

## शून्यवादनिराकरणम्

किञ्च यदि सुषुप्तावहंज्ञानमस्ति तदा तच्छून्यविषयमेवेति मदिष्टसिद्धिरेव। तथाहि – अयं

---

[14] (टि) विशेषदर्शनानन्तरं – इदं नीलपृष्ठमिति दर्शनानन्तरम्।

[15] (टि) अर्धं जरत्याः पाकाय भवतु अर्धं बीजायेति रीतेरयुक्तत्वादित्यर्थः।

[16] (टि) तत्ज्ञानस्यापि – अहमिति ज्ञानस्यापि।

घट इति सविकल्पकज्ञानस्य नामजात्यादिविशिष्टविषयस्य स्वविषयविपरीतवस्तुमात्रावगाहि[17] निर्विकल्पकजन्यत्वं दृष्टम्। तद्दृष्टान्तेन जागराद्यालयविज्ञाननिर्विकल्पकस्य विषय-वस्तुसत्तामात्रविरोधिशून्यविषयकसौषुप्तिकानुभवजन्यत्वमनुमीयते। सुषुप्तावन्यस्य[18] वस्तुसत्तामात्रविरोधिविषयकस्य नामजात्यादिवैशिष्ट्यज्ञानस्यासंभवात्। प्रयोगश्च यस्सत्प्रत्ययः स स्वविषयविपरीतविषयज्ञानजन्यः यथा सविकल्पकः जागराद्यालयविज्ञानञ्च सत्प्रत्यय इति सौषुप्तिकज्ञानस्य शून्यविषयत्वसिद्धिः। अपि च सौषुप्ति[19]कालयप्रत्ययाश्शून्यविषयाः स्वोचितकारणं विनापि जायमानप्रत्ययत्वात्मायिकहस्त्यादिप्रत्ययवदितीतोऽपि सौषुप्तिकप्रत्ययानां शून्यविषयत्वं, तत्सामान्येनान्येषामपि शून्यविषयत्वम्। अहं प्रत्ययविषयश्चात्मेति सर्वसम्मतत्वादित्यात्मनश्शून्यत्वमिति। तन्निराकरोति – **नेतित इति**।

अत्र नेतीति समुदाय एवाभावप्रतीत्याकारानुकरणं न तु शब्दानुकरणस्थल इव न शब्दस्यैवानुकरणत्वं, इति शब्दस्य तु स्वरूपार्थविभक्त्यर्थयोर्द्योतकत्वं नेत्यस्माच्छब्दादित्यादाविव। तथा चात्र पदद्वयप्रतिरूपकादनुकार्येणाभावप्रतिवृत्तिरूपेणैकार्थे-नार्थवतः प्रातिपदिकान्नेतीति समुदायादाद्यादिभ्यस्तसिर्वक्तव्य इति वार्तिकेनाद्यादेराकृतिगण-त्वात्तस्युत्पत्तिरुपपद्यते। ततश्चाभावप्रतिपत्तितोऽणुरस्ति असद्व्यावृत्त इति योजना। एतेन नेतीत्यत्र प्रकारार्थककेवलेति शब्दात्तस्युत्पत्तौ न शब्दस्याभावार्थकत्वेनाणुर्नास्तीति योजनायामनन्वयः, प्रकृतासङ्गतिः, अनिष्टापत्तिश्च। यदि न शब्दस्यैवानुकरणत्वं इति शब्दस्य स्वरूपाद्यर्थद्योतकत्वं तथा शब्दानुकरणत्वे उक्तदोषतादवस्थ्यं गतार्थत्वात्तस्यनुत्पत्तिश्च प्रतीत्याकारानुकरणत्वेऽपि तस्यानुत्पत्तिरितीदं दूषणमलघ्नकं वेदितव्यम्।

यद्वा – नेति शब्दस्स्वरादिषु पठ्यते। सचाभावप्रतिपत्त्यर्थो व्याख्यायते। अथवा न शब्दोऽभावे, इति शब्दः प्रकारे। तत्राभावः प्रकारो यस्येत्यस्वपदविग्रहः। अभावप्रकारप्रतिपत्त्यर्थको बहुव्रीहिः। यद्वा न शब्दोऽभावाकारप्रतीत्यनुकरणं गतिसंज्ञकम्। इति शब्दोश्चेण् धातुः, क्तिन्नन्तो गत्यर्थत्वात् ज्ञानार्थः। तेन न शब्दस्य गतिसमासः। न शब्द इति चेन्नेति न प्रत्यय इत्यर्थः। सर्वथाऽभावप्रत्ययो नेतीति शब्दार्थः। एषु च व्याख्यानप्रकारेषु तस्मात्तस्युत्पत्तिरविरुद्धा। अयंभावः – सर्वं शून्यमिति वदतस्तव घटादिशून्यता केनचित्प्रतिपद्यते न वा। द्वितीये न शून्यतायां प्रमाणम्। आद्ये यः प्रतिपत्ता स सन्नङ्गीकरणीयः। न च सोऽपि शून्यः। तत्र प्रमाणाभावात्। न हि स्वयं तदानीं वक्ष्यमाण-प्रत्यभिज्ञादिना निश्चितस्स्वाभावरूपं शून्यत्वमवगन्तुमर्हति। न वा नाहमिदानीमस्मीति स्वाभावरूपं शून्यत्वं कश्चित् प्रतिपद्यते। तदुक्तं **विवरणे चतुर्थवर्णकान्ते** –"नह्यबाधि-

---

17 (टि) स्वविषयविपरीतवस्तुमात्रावगाहीति। स्वस्मिन्विषयीभूतस्य घटत्वादिविशिष्टस्यविपरीतं यत्घटादिवस्तुस्वरूपमात्रं तदवगाहीत्यर्थः।

18 (टि) वस्तुसत्तामात्रविरोधित्वं शून्यस्येव तद्वद्विशिष्टस्याप्यविशिष्टमित्याशङ्क्याह सुषुतावन्यस्येति।

19 (टि) विशिष्टज्ञानेनार्थान्तरतामांशक्याह – अपि च सौषुप्तिकेति। न तु शब्दानुकरणस्थल इवेति। यथा नेत्यस्माच्छब्दादित्यादौ न शब्दमात्रस्यानुकरणत्वं तद्द्योतकत्वमेवेति शब्दस्य न तथात्र न शब्दमात्रस्यानुकरणत्वं, किन्तु नेतीतीत्यन्तस्यैवाभावप्रतीत्यनुकरणत्वमित्यर्थः। अनन्वय इति। अणुनेत्यन्वयसंभवेऽपि इतीत इत्यस्यान्वयासंभव इत्यर्थः। नन्वस्ति तस्याप्यन्वयः नेतितः नेतीति हेतोरित्यशङ्क्याह – प्रकृतेति।

तप्रत्यभिज्ञावगत आत्मा स्वाभावमवगन्तुमर्हती"ति।

यद्वा – शून्यताप्रतिपत्तिरस्ति न वा। द्वितीये शून्यस्याप्रामाणिकत्वापत्तिः। आद्ये सा सती वाच्या, असत्यार्थसिध्यसंभवात्। सैवास्माकमात्मेति। किञ्चात्मनस्सत्वावेदकबहुप्रमाण-विरुद्धञ्च शून्यताप्रतिपदानम्। यत्तूक्तं मया दृष्टमिदं रजतं कालत्रयेऽप्यत्र नास्तीति प्रत्यक्षं द्रष्टुश्शून्यतायां प्रमाणमिति, तन्न। उक्ताभावप्रत्ययोऽप्युक्तरीत्या द्रष्टरि बाधात्सविशेषणे हि विधिनिषेधावन्यतरमुपसंक्रमत इति न्यायेन स्वर्गीध्वस्त इत्यत्र स्वर्ग इवात्रापि रजतादावेव पर्यवस्यति। तथोक्तपरिशेषोऽपि न शून्यतायां प्रमाणम्। वक्ष्यमाणरीत्या सतस्स्थायिन आत्मनस्सिद्धेः परिशेषस्यासिद्धत्वात्। तथा जागराद्यालयविज्ञानपक्षकं शून्यविषयकसौषुप्तिकज्ञानजन्यत्वसाधकम-प्यनुमानमप्रयोजकमेव। अन्यथा जागराद्यज्ञानहेतुभूतानुमितसौषुप्तिकान्तिमज्ञानं पक्षीकृत्य तत्ज्ञानं स्वविषयशून्यविपरीतज्ञानजन्यं प्रत्ययत्वादित्यनुमानेन वस्तुसत्तामात्रनामजात्यादिविशिष्टव्यतिरिक्तशून्यविपरीतविषयकज्ञानमपि सिध्येत्, वस्तुसत्तामात्रज्ञानसिद्धावात्मनः सत्यत्वप्रसङ्गात्। त्वया सौषुप्तिकसर्वज्ञानस्य शून्यविषत्वाङ्गीकाराच्च। नामजात्यादिवैशिष्ट्यज्ञानस्य च तत्रासंभवात्। तथा सौषुप्तिकसर्वाहंप्रत्ययपक्षकमपि शून्यविषयकत्वानुमानं स्वरूपसिद्धमेव। आलयविज्ञान-रूपस्वरूपज्ञानस्यास्माभिरनादित्वाङ्गीकारेण जायमानत्वगर्भहेत्वसिद्धेः। तस्मान्न द्रष्टुश्शून्यतायां प्रमाणमिति। अथवा नेतीति शून्यदेहान्तःकरणादीनामात्मत्वनिषेध-कस्य स्मृत्यागमस्थस्य वाक्यस्य प्रतीकतोऽनुकरणम्। तस्मात्पूर्ववत्तसिः। तेन निषेध-श्रुतेर्नोक्तानामात्मत्वमिति। तस्मान्न शून्यमात्मेति स्थितम्।

## शरीरात्मवादनिरासः

ननु तर्हि सच्छरीरमात्मेति लोकायताः। तथाहि – यस्य ज्ञानाश्रयत्वं यत्र चाहं प्रत्ययस्स आत्मेति सर्वाविवादम्। अस्ति च शरीरस्य तदुभयम्। मनुष्योऽहं जानामीति मनुष्यत्वादिध-र्मिणि शरीरेऽहं प्रत्ययस्य ज्ञानाश्रयत्वस्य चानुभवात्। न चैवं शरीरमहमिति बुध्यापत्तिः। मन्मते शरीरत्वात्मत्वयोरेकत्वेन घटो घट इतिवत् स्वाभावाद्वा रूपं घट इतिवत्समानाधि-करणबुध्यभावसंभवात्। ननु कराद्यवयवसंघातश्शरीरं तत्र यावदवयवसमूहस्य ज्ञानाधा-रत्वे हस्तादिकतिपयावयवापगमे ज्ञानाधारत्वं न स्यात्, कतिपयावयवसंघातस्य तत्वे शिरः कपालाद्यपगमेऽपि ज्ञानाधारत्वं स्यादिति चेन्मैवम्। हस्तपादादि सर्वं त्वगिन्द्रियाधिकरणमेव सर्वस्मात् स्पर्शोपलब्धेः। तत्र शिरः कपालाद्यपेक्षमेव हस्तादीनां त्वगिन्द्रियाधारत्वम्। नष्टेषु शिरः कपालादिष्वितरैः स्पर्शानुपलम्भात्। शिरः कपालादीनान्तु निरपेक्षमेव तदाधारत्वम्। हस्तपादादिषु नष्टेष्वपि शिरः कपालादिभिस्स्पर्शोपलंभात्। तथा च निरपेक्षत्वगिन्द्रियाधार-या यावदवयवविशिष्टतदितरकतिपयावयवसंघस्य ज्ञानाधारत्वम्। अतो नोक्तदोष इति। ननु पृथिव्यप्तेजोवायुभूतसंघात् एव शरीरम्। न तु पार्थिवमेव, क्लेदनपाचनव्यूहनानामप्यबादिध-र्माणां तत्रोपलम्भात्। तत्र चतुर्णां भूतानामन्यतमस्यैव न भोक्तृत्वम्। भोगोत्पत्तौ चतुर्णां सन्निधानस्याविशेषेण विनिगमनाविरहात्। अतश्चतुर्णां भोक्तृत्वं वाच्यम्। तथा च तत्र चतुर्णां

प्रत्येकं भोक्तृत्वम्, उत संहतानाम्। आद्येऽपि किञ्चतुर्णां भूतानामनियमेन सर्वरूपरसादिभोक्तृत्वं, प्रत्युत प्रतिनियतस्वस्वासाधारणगुणभोक्तृत्वम्। आद्येऽपि किमन्योन्यसापेक्षाणां भोगः, उत तन्निरपेक्षाणाम्। नाद्यः। स्वतन्त्रभोक्तृणां भोगेऽन्योन्यसाहाय्यादृष्टेः स्त्रीपुंसयोरस्मन्मतेन भोक्त्रोरात्मनोरन्योन्यापेक्षा, किन्तु भोक्त्रोरन्योन्यशरीरापेक्षैव। निरपेक्षाणां भोग इति पक्षेऽपि युगपद्वा क्रमेण वा भोगः। तत्र नाद्यः पक्षस्संभवति। अत्र हि भूतानामविरोधेन संघातो दृश्यते। न च गुणप्रधानभावमन्तरेण भोक्तृणामविरोधेन संघातः क्वचिद्दृष्टस्संभवति वा। अतोऽत्र गुणप्रधानभावो भूतानां वाच्यः। न च युगपत्भोगे स उपपद्यते। भोक्तृत्वन्नाम भोगं प्रतिप्रधानत्वम्। न च तस्य तदानीमेवान्यगुणभावस्संभवति, विरोधात्। नापि क्रमेण भोगः, स्वतन्त्राणां गुणप्रधानभावं विना विरोधेन संघातासंभवेन क्रमभोगासंभवात्। न च स्वतन्त्राणां गुणप्रधानभावोऽन्यत्र दृष्टः। ननु दृश्यते वराणां[20] स्वतन्त्राणामपि क्रमभोगे गुणप्रधानभाव इति।

मैवम्। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। दृष्टान्ते हि भोग्यस्य स्त्र्यादेः प्रतिपुरुषनियतत्वेन स्वाभोग्ये कन्यादौ तस्य तत्भोक्त्रुरुपकारकत्वरूपगुणभावो युज्यते। ततश्च भोगव्य- वस्थाऽपि संभवति। प्रकृते तु चतुर्णां भूतानां भोग्यस्य रूपरसादेस्साधारणत्वेन सुन्दोपसुन्दवत् गुणप्रधानभावासंभवेन संघातासंभवाद्विषयव्यवस्था न स्यात्[21]। न चात्रापि रूपरसादीनां विषयाणां गुणानां स्वस्वासाधारणगुणकभूतं प्रतिनैयत्यमेवेति पक्ष आश्रीयत इति वाच्यम्। योऽहं रूपमद्राक्षं सोऽहं स्पृशामीति जिघ्राम्यास्वादयामीति च रूपरसादिभोक्तॄणामैक्यप्रत्यभिज्ञानात्। अस्तु वा रूपरसादीनां प्रतिपुरुषनैयत्यम्[22]। तथाऽपि रूपरसादीनां[23] सर्वेषां भोक्तॄणां विषयाणाञ्च युगपदुपलब्धान्योन्यानुमितयौगपद्यानां युगपत्सन्निधान एकस्मिन्मुहूर्ते प्रतिनियतमुपभोग्यानां कन्यानामनेकासां तत्भोक्तॄणाञ्च वराणा- मनेकेषां युगपत्सन्निधान इव गुणप्रधानभावेन संघातासंभवेन भोग्यव्यवस्था न स्यादिति। ननु तर्ह्युक्तसर्वदोषनिरासाय संहतानां भोक्तृत्वमिति पक्ष आश्रीयते। न चात्राप्येकैकस्मिन्भूते

[20] (टि) ननु दृश्यते वराणामिति। नन्वस्ति मत्तकाशिन्याः कन्यादशकम्। ततस्तस्यासंस्तावत्संख्याकाश्च वराः। ते च क्रमेणैवानुभवन्ति ताः। तत्रैकस्य भोगेऽन्यो गुणभूत इति दृष्टे गुणप्रधानभावे कथमदर्शनमिति भावः। मत्तकाशिनी गृहे एकस्यैव मिथुनसंवेशनयोग्यस्य प्रावरकस्य सत्वेन क्रमिकस्यावश्यकत्वे तत्र कन्यानां प्रतिपुरुषनियतत्वेन स्वाभोग्यकन्याभोक्तृभोगे तदुप- कारकत्वेनान्येषां गुणभावसंभवेऽपि प्रकृते रूपरसादेस्सर्वभूतसाधारणत्वेन सुन्दोपसुन्दवत् गुणप्रधानभावो न संभवतीति समाधत्ते – दृष्टान्ते हीत्यादिना। उपकारकत्वमत्र भोगाप्रतिबन्ध- कत्वमात्रम्। गन्धसंयोजनादिभोगोपकरणसंपादनं वा।

[21] (टि) विषयव्यवस्था न स्यादिति। प्रथममस्य भूतस्य भोगोऽनन्तरमन्यस्येति विषयव्यवस्था न स्यादित्यर्थः।

[22] (टि) प्रतिपुरुषनैयत्यमिति, प्रतिभूतनैयत्यमित्यर्थः।

[23] (टि) रूपरसादीनां प्रतिभूतनियतत्वेन विषयव्यवस्थासंभवेऽपि बहूनां वराणामेकस्मिन्मुहूर्ते यावत् स्वस्वभोगोपकरणसमवधाने यथा नान्योन्यस्य गुणप्रधानभावः, एवं रूपरसादीनां युगपत्सन्निधाने प्रतिनियतभोक्तॄणां भूतानामपि गुणप्रधानभावासंभवेन तदधीनसंघातासंभव इत्याह – तथाऽपीति। रूपरसादीनां सर्वेषां ये भोक्तारस्तेषां विषयाणाञ्चेत्यर्थः। ननु कन्यकानामिव विषयाणां युगपत्सन्निधाने प्रमाणन्नास्ति युगपत्तासामिव तेषामग्रहणादित्याशङ्क्योक्तं युगपदुपलब्धान्योन्येति। अन्योन्योपलम्भानुमितेत्यर्थः।

चैतन्यानुत्पादे कथं समुदाये तदुत्पत्तिः "शतमप्यन्धानान्न पश्यती"ति **न्यायादिति** वाच्यम्। प्रत्येकमसमर्थेष्वपि समुदितेषु क्वचित् कार्योत्पत्तिदर्शनात्। यथा किण्वादिषु प्रत्येकं मदोत्पत्त्यभावेऽपि समुदितेषु तदुत्त्पत्तिः, अनलेषु च प्रत्येकं ज्वालोत्पत्त्यभावेऽपि संघीभूतेषु तदुत्पत्तिरिति चेन्न। भोक्तृताप्रयोजकसंघातस्यानिरूपणात्।

तथाहि – संघातो नाम न तावदेकदेशस्थितत्वमात्रम्, सर्वेषां भूतानां सर्वत्र व्यापित्वेन शरीरादन्यत्रापि भोगप्रसङ्गात्। नापि भोगरूपैकक्रियान्वयित्वम्, जलदाहे काष्ठवह्निवायुकालानाञ्चतुर्णां भूतानां दाहरूपैकक्रियान्वयित्वेन तेष्वपि भोग-प्रसंगात्। नाप्यग्न्ययः पिण्डवद्दृढतरसंयोगः, वायोस्तथाविधसंयोगासंभवात्। वाय्वंशे संयोगमात्रविवक्षायां तप्तायःपिण्डे पीतजले वायुसंयुक्ते भोगप्रसंगात्। तस्माद्व्यस्तानां संहतानां वा भूतानां भोक्तृत्वासंभवाच्छरीरात्मवादे भोक्तृत्वानुपपत्तिरिति। मैवम् – भूतसंघात एवात्मा, संघातो नाम तैरवयविविशेषारंभ एव। न च तत्र तैरवयविविशेषारंभे प्रमाणाभावः।

उक्त व्यूहनादेः कार्यस्यैव प्रमाणत्वात्। न च दृतिवस्त्रोदकेषु वायुजलाग्निसंयोगादिव प्रकृतेऽपि भूतान्तरसंयोगमात्रादेव व्यूहनक्लेदनपाकानामुपपन्नत्वेनान्यथासिद्धत्वान्न व्यूहनादेरवयव्यन्तरकल्पकत्वमिति वाच्यम्। शरीरस्य भूतसंयोगमात्रत्वे भूतारब्धा-वयवित्वाभावे तत्स्थ जलाद्यपगमे वस्त्रादीनामिव जलापगमे शरीरस्यापचयो न स्यात्। अवयवापगमस्यैवावयव्यपचयप्रयोजकत्वात्। एतेन शरीरस्याप्रत्यक्षवायुगर्भभूतचतुष्टयारब्ध-त्वे तस्य प्रत्यक्षाप्रत्यक्षवृत्तित्वेन तरुवायुसंयोगवदप्रत्यक्षत्वप्रसङ्ग इति बाधकतर्कसहकृतेन शरीरं न प्रत्यक्षाप्रत्यक्षारब्धं प्रत्यक्षत्वात् घटवदित्यनुमानेन शरीरस्य न भूतचतुष्टयारब्धत्वमिति वैशेषिकोक्तमप्यनुमानमपास्तम्। त्वगिन्द्रियान्वयव्यतिरेकानुविधाय्युपलम्भस्य वायोरप्रत्यक्षत्वे प्रमाणाभावात्। केवलाप्रत्यक्षवर्तिनोरपि शब्दत्र्यणुकयोस्तवमते प्रत्यक्षत्वाच्च।

तस्मादस्ति भूतचतुष्टयारब्धमेकं शरीरम्। स एव न आत्मा। न चैवं तस्य भूतचतुष्टयभिन्नत्वे भूतचतुष्टयतत्त्ववादिनस्तव तत्त्वातिरेकप्रसङ्गः। तत्भिन्नत्वेऽपि तदारब्धतया तत्परतन्त्रत्वेन स्वतन्त्रतत्त्वान्तरत्वानङ्गीकारादिति। तत्राह – **ममतेति।** अत्र मम शब्दात् विभक्त्यन्तप्रतिरूपकात्स्वरादिषु पाठादव्ययादपि शरीरात्मभेदप्रतिपत्त्यर्थकात् सद्यस्तायामित्यत्रेव **वार्तिकेन** स्वार्थिकस्तल् प्रत्ययः। निर्मम इत्यादौ वृत्तौ[24] यद्यपि मम शब्दस्य मलं विनाऽपि प्रयोगस्तथाऽप्यवृत्तौ न तं विना प्रयोगः। तथा चावृत्तावेव तद्विधानम्।

यद्वा – "तस्य भावस्त्वतलौ"। यस्य गुणस्य हि भावाद्द्रव्ये शब्दनिवेशस्तदभिधा-नेत्वतलौ। "समासकृत्तद्धितेषु संबन्धाभिधान"मित्यादि**पाणिनिकात्यायनवचनानां** त्वतल् प्रत्ययविधायकत्वमात्रमेव, नत्वर्थविशेषनियामकत्वम्। अर्थविशेषग्रहणञ्च तत्र प्रायिकाभिप्रायम्। अर्थस्तु लोकव्यवहारत एव निश्चेयः। तदुक्तं भगवता **पाणिनीनैव** – "प्रधानप्रत्ययार्थवचनमशिष्यमर्थस्यान्यप्रमाणत्वा"दिति। अस्यायमर्थः – प्रकृतिप्रत्ययावर्थम्। सह ब्रुवत इति **सूत्रं** व्याकरणान्तरे आरब्धं स्वयं तन्निराकरोति। प्रधानं प्रकृतिः,

---

[24] (टि) निर्मम इत्यादौ वृत्ताविति। समासवृत्तावित्यर्थः। यस्य हि गुणस्य भावात् घटत्वपटत्वादि-सत्वात् कम्बुग्रीवा तानवितानादियुक्तेषु घटपटादिशब्दप्रयोगः, तदभिधाने घटत्वपटत्वाद्यभिधाने त्वतलावित्यर्थः। स्मृत्या दृढेति। ममतोद्रेकदिति सूत्रेणेत्यर्थः।

प्रकृतिप्रत्यययोरर्थवचनं उक्तसूत्रमशिष्यमनारब्धव्यम्। कुतः, अर्थस्यान्यप्रमाणत्वात् अन्यलोकव्यवहारप्रमाणकत्वादिति। तथा च प्रकृते स्मृत्यादिषु दृढमदीयत्वबुद्धौ ममताशब्दप्रयोगात् मदीयत्वबुद्धिरेव तस्यार्थ इति निश्चीयते।

यद्वा ममेति देहात्मभेदबुध्यनुकरणं मतम्। अनुकार्येण अर्थेनार्थवत्वात् प्रातिपदिका-दुक्तरीत्या तल्। मम शरीरमिति शरीरस्यात्मभेदप्रतिपत्तेस्तनावात्मा, न तनुरेवेत्याधाराधेय-भावानुषङ्गिकभेदेनोक्तहेतोस्संबन्धः। नन्वस्त्यहं मनुष्य इति शरीरात्मनोरभेदप्रत्ययोऽपि। तथा च विनिगमनाविरहात्कथं भेदनिर्धारणम्। यदि विरुद्धयोः प्रामाण्यायोगादवश्यवक्तव्ये कस्यचित्। प्रत्ययस्य भ्रमत्वे उपचरितार्थत्वे वा विनिगमनापेक्षायामनेकस्मिन् दूरस्थ वृक्षादावभेदारोपस्य गौणाभेदप्रत्ययस्य च दर्शनेन दृष्टसजातीयत्वादत्राण्यभेदप्रत्ययस्यैव भ्रमत्वमुपचरितत्वं वा कल्प्यत इति, तदा तुल्यमेकस्मिन्नपि चन्द्रे भेदारोपस्य शिरोरूपे राहौ राहोश्शिर इति गौणभेदप्रत्ययस्य च दर्शनेन दृष्टसजातीयत्वे न भेदप्रत्ययस्यैव भ्रमत्वगौण-त्वयोः कल्पनमिति। तस्माद्विनिगमनाविरहान्न भेदप्रत्ययमात्रेण शरीरानात्मत्वमिति। तत्राह – **उद्रेकादिति**। ममतायाश्शरीरात्मभेदबुद्धेरुद्रेकादाधिक्यात् बहुत्वादित्यर्थः। तथा च बहुप्रमाणबाधनाद्वरमेकस्यैवोक्तप्रत्यक्षप्रत्ययस्य भ्रमत्वादिकल्पनमिति भावः। अस्ति तावत् बाल्याद्यवस्थानां परिणामभेदेन शरीरभेदेऽप्यात्मैक्यप्रत्यभिज्ञानमबाधितं, योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थाविरे प्रणप्तॄननुभवामीति।

तथा स्वप्नादौ व्याघ्रादिशरीरभेदेऽप्यहमर्थैक्यानुभवः, तथा च तदनुगृहीते नात्माशरीरेभ्यो भिद्यते तेषु व्यावर्तमानेषु स्वयमनुवृत्तत्वात्, येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो भिद्यते, यथा पुष्पेभ्यस्सूत्रमित्यनुमानेन भेदप्रत्ययः। तथा बालस्य जन्मानन्तरमेव स्तन्यपानादिप्रवृत्त्यनु-सारेणेष्टसाधनतादिस्मरणं कल्प्यते, तच्च नानुभवं विना, अनुभवश्चेदानीं नास्तीति जन्मान्तरे सकल्प्यः। अन्यानुभूते चान्यस्य स्मरणादर्शनादिदानीं स्मर्तुरेव जन्मान्तरेऽनुभवितृत्वं वाच्यम्। न चैततद्देहात्मभाव उपपद्यते। पूर्वोत्तरदेहयोर्भेदादतीतोऽप्यनुमानद्देहात्मभेदप्रत्ययः। तथा देशान्तरकालान्तरदेहान्तरभोग्यस्वर्गाद्युद्देशेन चर्यादिविधायकागमेनापि कृतहाना-कृताभ्यागमप्रसङ्गतर्कानुगृहीतेनार्थात् शरीरात्मभेदप्रत्ययः स्थापितश्चानुमानागमयोः प्रमाण्यम्।

ननु स्वर्गो नाम निरतिशया प्रीतिः। सा चास्मिन्नेव जन्मनि कार्तवीर्यादीनामिव साम्राज्याधि-पत्ये नास्मिन्नेव देहे संभवतीति न देहान्तरमपेक्षते। याऽपि बहुकालसहस्रसमासादितभोग्या स्वर्गादिप्रीतिस्साऽपि मन्त्रौषधादिसिद्धेऽस्मिन्नेव देहे संभवति। अस्मिन् देहे प्रायशः कार्यादर्शनं तु अङ्गवैकल्यादप्युपपद्यत इति नोक्तागमसामर्थ्याच्छरीरात्मभेदप्रत्यय इति। सत्यम्, देवताधि-करणन्यायेन मन्त्रार्थवादादिप्रामाण्यस्य पूर्वं स्थापितत्वात्तदनुरोधेन शरीरान्तरभोग्यस्वर्गादीरिति तदनुगृहीतोक्तागमेन सामर्थ्याच्छरीरात्मभेदप्रत्यय इति। तस्माच्छरीरात्मभेदप्रत्ययानां बहुत्वात्तेषां भ्रमत्वादिकल्पनाद्वरमेकस्यैवाभेदप्रत्ययस्य भ्रमत्वादिकल्पनमिति।।

## इन्द्रियात्मवादनिरासः

सन्तु तर्हीन्द्रियाण्येवात्मेति लोकायतभेदः। तथाहि – अस्ति तावदिन्द्रियाणां ज्ञानाश्रयत्वं, सत्यपि

शरीरे विकलेन्द्रियस्य न ज्ञानमन्यथाज्ञानमित्यन्वयव्यतिरेकाभ्यामिन्द्रियाणां ज्ञानहेतुत्वेऽवश्यं वाच्ये करणत्वापेक्षयोपादानत्वस्योत्पत्तिस्थित्युभयप्रयोजकत्वेनाभ्यर्हितत्वात्तेषामुपादानत्वस्यैव कल्पनात्। मनुष्यो अहं जानामीति देहस्य ज्ञानाश्रयतया प्रतीतिस्तु ज्ञानाश्रयेन्द्रियाधारतया परंपरयाऽप्याधारत्वादुपपद्यते। तथा करणत्वादिविशिष्टानां तेषामिन्द्रियाणामहं प्रत्ययविषयत्वमपि काणोऽहं मूकोऽहमितीन्द्रियधर्मकाणत्वादिविशिष्टेष्वहंप्रत्ययदर्शनात्। इन्द्रियाण्यहमिति वा चक्षुरहमिति वा प्रतीत्यभावस्त्वस्मन्मते इन्द्रियत्वात्मत्वयोरेकत्वेन पर्यायत्वात्स्वस्य श्रोत्राद्यात्मकत्वेन[25] च व्यावर्त्याभावात् स्वभावाद्वा रूपं घट इति प्रतीत्यभाववदुपपद्यते। तथा च तेषां ज्ञानाश्रयत्वाहं प्रत्ययविषयत्वयोरविकलत्वादात्मत्वमिति। नन्वत्रापि पक्षे व्यस्तसमस्तादिविकल्पतद्दूषणानि प्रादुष्युरिति चेन्मैवम्। व्यस्तानामेवेन्द्रियाणामात्मत्वम्। चक्षुषि विकलेऽपि त्वगादिभिस्स्पर्शादिज्ञानदर्शनात्। रूपादीनाञ्च चक्षुरादीनि प्रति प्रतिनियतान्वयव्यतिरेकनियतविषयत्वमेव वरगोष्ठीवत्क्रमेण भोगः। युगपत्सर्वविषयेषु सन्निहितेष्विन्द्रियाणां प्रतिनियतानेककन्यासु वराणामिव युगपत्भोग एवास्तु, अभोगो वाऽस्तु, विरोधेनेति।

व्यस्तेन्द्रियात्मत्वेऽपि योऽहं रूपमद्राक्षं सोऽहं स्पृशामीत्यादिद्रष्टृस्प्रष्ट्रादीनामेकत्वप्रत्यभिज्ञा तेषामेकशरीराश्रयत्वेनैकत्वापत्त्याऽप्युपपद्यते। अत इन्द्रियाणि चक्षुरादीनि करणान्यात्मेति। तत्राह – **अक्षोपरतिबोधत इति**। अक्षाणाञ्चक्षुरादीनां करणानामुपरतिः – स्वप्नः। तत्रापि बोधनात् – अहंत्वज्ञानाश्रयत्वबोधनादिति। अयंभावः – असि तावत् स्वप्ने गजमहं पश्यामीत्यहंत्वेन ज्ञानाश्रयत्वेन चात्मानुभावः। न च स इन्द्रियाणामात्मत्वमुपपद्यते। तदानीमुक्तानामिन्द्रियाणामुपरतत्वे न ततो ज्ञानासंभवात्, तदाश्रयत्वासंभवाच्च। तस्मान्नेन्द्रियाणामात्मत्वमिति। यद्वाऽक्षशब्देनाक्षव्यापार उच्यते। उपरतिशब्देनापि तदुपरतिः। तयोश्च द्वन्द्वसमासः। अक्षव्यापार तदुपरत्योर्बोधनात् द्रष्टृत्वादित्यर्थः। अत्र सूत्रे तनुशब्देन देहेन्द्रियान्तःकरणादिसंघ उच्यते। तथा चेन्द्रियेष्वणुरित्याधा-राधेयभावानुषङ्गप्राप्तेन नाणुरिन्द्रियाणीत्यनेनायं हेतुस्संबध्यते। अथवा उत्तरसूत्रे आत्माऽन्तःकरणादन्योपीत्यऽपि शब्दसमुच्चितेनेन्द्रियभेदेनायं हेतुस्संबध्यते। प्रयोगश्च आत्मानेन्द्रियाणीन्द्रियोपरतावपि स्वयमुपलब्धत्वात्, इन्द्रियव्यापारतदुपरत्योर्द्रष्टृत्वाद्वा। अत्र सामान्यतो व्याप्त्या घटोपरतावुपलभ्यमानपटवत् घटव्यापारतदुपरतिद्रष्ट्रात्मवदिति। मम चक्षुरित्यादिप्रतीतेर्यद्यप्यत्रापि साध्ये ममतोद्रेकादित्ययं हेतुः पूर्वोक्तस्संभवत्येव। तथाऽप्यसंकीर्णदूषणकथनाय हेत्वन्तरोपन्यास इति नेन्द्रियाण्यात्मेति स्थितम्। अस्तु तर्ह्यन्तःकरणादिकमेवात्मेति चैत्तिकाहंकारिकादयः।

तथाहि – स्वप्ने चक्षुराद्यभावेऽपि गजमहं पश्यामीति विज्ञानाश्रयत्वाहंप्रत्ययविषयत्वे कस्यचिद्दृश्येते। तच्चान्तःकरणमिति, तदानीं तस्योभयसम्मतत्वात्। तथा चान्तःकरणमेवात्मा। नन्वनुभवाश्रयत्वमेवात्मत्वं, न स्मृतिसाधारणज्ञानमात्राश्रयत्वं, स्वप्नज्ञानस्यानुभवरूपत्वे प्रमाणाभावात्। बाह्यार्थग्राहकेन्द्रियाणामुपरतत्वादननुभूते स्वप्नादर्शनाच्च स्मृतिरूपत्वमेव

25 (टि) नन्विन्द्रियत्वात्मत्वयोरैक्येनेन्द्रियाण्यहमिति प्रतीत्यभावेऽपि चक्षुरहं श्रोत्रमहमिति कुतो न स्यादित्यत आह – स्वस्य श्रोत्रादीति। कथं तर्हि चक्षुरिन्द्रियमिति प्रत्यय इत्याशङ्कायामाह – स्वभावाद्वेति।

तस्येति तदाश्रयोऽप्यन्तःकरणमनात्मैव, तस्यानुभवितृत्वेऽपि प्रमाणाभावादिति चेत्। मैवम् – अन्यानुभूतेऽन्यस्य स्मरणासंभवात्, स्वप्नावस्थायां स्मर्तुरन्तःकरणस्यैव जागरेऽप्यनुभवितृत्वस्यावश्यं वाच्यत्वाल्लाघवात्, ज्ञानाश्रयत्वस्यैवात्मत्वप्रयोजकत्वाच्च। एवञ्चावश्यकल्प्ये चक्षुरादिकं विना स्वप्ने ज्ञानस्याश्रयान्तरे तस्यैव जागरेऽप्यन्तः-करणस्याश्रयत्वसंभवे चक्षुरादेर्ज्ञानाद्यन्वयव्यतिरेकस्य करणविषयत्वं कल्प्यते। काणोऽहं मूकोऽहमिति बुद्धेरप्यगत्याकरणे कर्तृत्वोपचारत्वं कल्प्यते।

अपि च – योऽहमद्राक्षं सोऽहं स्पृशामीति प्रत्यभिज्ञाऽप्यन्तःकरणस्यात्मत्वपक्षे आञ्जस्येनोपपद्यते। एकस्यैवान्तःकरणस्य द्रष्टृत्वात्, स्प्रष्टृत्वाच्च। चक्षुरादीनां आत्मत्वे द्रष्ट्रादीनां भिन्नत्वेनैकदेहाश्रयत्वं विना नाञ्जस्येन सोपपद्यते। अपि च नैकाश्रयत्वेनापि प्रत्यभिज्ञा युज्यते। एकप्रासादस्थेष्वपि पुरुषेषु भिन्नेषु स एवायमिति प्रत्यभिज्ञाऽदर्शनात्। तस्मादन्तःकरणमात्मा। यद्वा – अहं जीवामीत्यनुभवात् प्राणादिकमेवेति। तत्राह – **स्वापे निर्भोगत इति**। स्वापस्सुषुप्तिः। तत्र स्वापग्रहणन्तुर्यतुर्यातीतयोरप्युपलक्षणम्। भोगोऽन्तः-करणम्। अत्र भोगशब्दश्चित्तप्राणयोरप्युपलक्षकः। तथा च स्वापतुर्यतुर्यातीतेष्वन्तः-करणचित्तप्राणानामभावान्नान्तःकरणादिकमणुरिति। अत्राप्यानुषङ्गिकेनान्तःकरणभेदेन हेतोस्संबन्धः, उत्तरसूत्रस्थेन वा।

अयंभावः – सुषुप्तितुर्यतुर्यातीतेषु यथाक्रममन्तःकरणचित्तप्राणा न सन्तीति सकलागमस्मृतीतिहासपुराणादिसिद्धम्। आत्मा च तदानीमप्यस्त्येवेत्युत्तरसूत्रे "अव-स्थापञ्चकस्थोऽत" इति वक्ष्यते। अत्र मे मनोऽन्यत्र गतं सांप्रतञ्च स्थिरीकृत-मित्यनुभवात्। "ममतोद्रेकादक्षोपरतिबोधत" इति हेतुद्वयमप्यत्र योज्यम्। तस्मान्नान्तः-करणचित्तप्राणानामात्मत्वमिति। अस्तु तर्हि विज्ञानसन्ततिमात्रमात्मेति विज्ञानवादिनः। तथाहि – अस्त्यहमित्यालयविज्ञानम्। न च तस्य शरीरेन्द्रियान्तःकरणान्याश्रयास्संभवन्ति। तेषां ज्ञेयत्वात्, स्वात्मनि क्रियाविरोधेन ज्ञानाश्रयत्वासंभवात्। नचाश्रयान्तरं निरूपयितुं शक्यते। अतः परिशेषान्निराश्रयं ज्ञानमेवात्मा। तच्च ज्ञानं क्षणिकं। न च तत्र प्रमाणाभावः। प्रत्यक्षानुमानयोरेव प्रमाणत्वात्।

तथाहि – अयं घट इति प्रत्यक्षं तावत्क्षणिकत्वे प्रमाणम्। अत्र ह्ययं घट इत्येतत्क्षण-विशिष्टता घटस्य प्रतीयते। तेन स्वविरुद्धक्षणान्तरविशिष्टघटव्यावृत्तिः स्वाश्रयीभूतैतत्घटे प्रतिपद्यते। यथा नीलो घट इत्यत्र नीलेन पीतघटव्यावृत्तिस्स्वाश्रये विशेषणानां स्वाश्रये स्वविरुद्धविशेषणान्तरविशिष्टार्थव्यावृत्तिबोधकत्वस्वभावत्वात्। तथा चैतत्घटस्य पूर्वोत्तरक्षणविशिष्टघटव्यावृत्तिसिध्या तस्य क्षणिकत्वमिति। एवमात्मनोऽप्येतत्क्षण-विशिष्टस्य क्षणान्तरविशिष्टव्यावृत्तिप्रतीतेः क्षणिकत्वम्। एवमनुमानमपि तत्र प्रमाण-म्। अयं घट एतदुत्पत्तिक्षणाव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगी, उत्पन्नघटत्वात्, पूर्वोत्पन्ननष्टघटवत्। नचोत्पन्नेऽनष्टे घटे व्यभिचारः, तस्य पक्षसमत्वादिति। तथा यत् सत्तत्क्षणिकं, यथा जलधरपटलः, संश्च विवादास्पदीभूतात्मादिरित्यनुमानान्तरमपि तत्र प्रमाणम्। तथाहि – सत्वन्नामार्थक्रियाकारित्वमेव। न सत्ताजातिसमवायित्वम्। सामान्यविशेषसमवायानामसत्वप्रसङ्गात्। तेषु सत्ताजातेरभावात्। तत्रानवस्थारूपहान्यसंबन्धा-

नाज्ञातिबाधकानां सत्त्वात्। अत एव सामान्यादित्रयं निस्सामान्यमिति न्यायविदः। न च तेषु सत्तासमवायित्वाभावेऽपि सत्ताजात्या सहैकार्थसमवायित्वात्सत्वमिति वाच्यम्। तथात्वे घटादौ सत्ताजातिसमवायित्वं सामान्यादिषु सत्ताजात्यैकार्थसमवायित्वं तव सत्ताव्यवहारप्रयोजकमिति प्रयोजकभेदादनुगतसत्ताव्यवहारो न स्यात्।

किञ्च त्वदभिमतजातिरूपसत्ताऽपि न संभवत्येव। तस्याः कृत्स्नैकदेशवर्तित्व-विकल्पपराहतत्वात्। तथाहि – सत्ताजातिर्घटादौ कात्स्न्र्येन वर्तते, उतैकदेशेन। नाद्यः। एकस्मिन् घटे तस्याः कात्स्न्र्येन वृत्तौ तदानीं घटान्तरेऽनुपलब्धिप्रसङ्गात्। नहि साकल्येन मधुरायां वर्तमानो देवदत्तस्तदानीमेव पाटलीपुरेऽप्युपलभ्यते। न द्वितीयः। निरवयवायास्तस्या एकदेशासंभवात्। अयं घटस्सन्नित्येकस्मिन्नपि घटे पर्यवसितसत्ताबोधदर्शनाच्च। तस्मादर्थक्रियाकारित्वमेव सत्वम्। तच्चार्थक्रियाकारित्वरूपं सत्वं स्थायिनः क्रमकारित्वयुगपत्कारित्वान्यतरत्वावच्छिन्नव्याप्तं प्रसङ्गतद्विपर्यानुमितनित्यासामर्थ्यसामर्थ्याभ्यां स्थायिनः क्रमकारित्वयुगपत्कारित्वयोः निर्वृत्या स्वयमपि निवर्तत इति प्रमाणसिद्धमर्थक्रियाकारित्वरूपं सत्वं क्षणिकत्वमादायैव विश्राम्यति।

तथाहि – स्थायिनोऽर्थक्रियाकारित्वं सत्वं क्रमकारित्वयुगपत्कारित्वाभ्यां व्याप्तम्। परस्परविरोधे हि न प्रकारान्तरस्थितिरिति तृतीयप्रकारस्यासंभवात्। तत्र स्थायित्वपक्षे न बीजादीनां क्रमेणातीतानागतबीजांकुराद्यनेकार्थक्रियाकारित्वम्। प्रसङ्गतद्विपर्ययाभ्यां स्थायिनोऽतीतानागतार्थक्रिययोर्नित्यासामर्थ्यानुमानेनातीतानागतार्थक्रियाकारित्वस्यैव तत्पक्षेऽसंभवात्। क्रमकारित्वे हि बीजादिकं यदा वर्तमानार्थक्रियां करोति तदाऽतीतानागतार्थक्रिययोस्सामर्थ्यमस्ति, न वा। आद्ये ते अप्यर्थक्रिये तदा कुर्यादेव। यद्यदा यत्र समर्थं तत्तदा तत्करोत्येव, समर्थस्य विळम्बयोगात् सामग्रीवत्, चरमकारण-वच्च। समर्थञ्च बीजादि तदाऽतीतानागतार्थक्रिययोरिति तदा तदुत्पादनप्रसङ्गः। न च तदा तदतीतानागतार्थक्रिये करोति। तस्मात्तदा तत्त्रासमर्थमेवेत्युपसंहार एव तद्विपर्ययः। अयमेव च पर्यवसानेन द्वितीयविकल्पार्थः। तथा च द्वितीये यद्यत्र कदाचिदसमर्थं, तत्तत्र सर्वदाऽसमर्थमेव, यथा शिलाशकलमङ्कुरे। असमर्थञ्च कदाचित् बीजादिसदाऽप्यतीतानागतार्थक्रिययोरिति। तेन बीजस्य सर्वदाऽतीतानागतार्थक्रिययोरसामर्थ्यानुमानादतीतानागतार्थक्रियाकारित्वमेवासमर्थस्य बीजादेर्न संभवतीति, कुतः क्रमेणातीतानागतार्थक्रियाकारित्वं तत्बीजस्येति। नन्वस्त्येव बीजस्यातीतानागतार्थक्रिययोर्वर्तमानार्थक्रियाकारित्वसमये सामर्थ्यम्। न च तदानीमपि तयोः करणापत्तिरूपप्रसङ्गादिदोषः। सहकारिसन्निधानक्रमस्य कार्यक्रमप्रयोजकत्वेन समर्थस्यापि सलिलपवनादिसहकारिसन्निधानाभावादेव तदकरणोपपत्तेः। समर्थस्यार्थक्रियाव्याप्तत्वे प्रमाण-भावेन तेन तदापादनासंभवात् सलिलपवनादेश्चान्वयव्यतिरेकाभ्यां बीजसहकारित्वादिति।

मैवम् – सहकारित्वप्रयोजकातिशयानवस्थाप्रसङ्गेन सलिलपवनादीनां बीजादिसह-कारित्वासंभवेन कारणीभूतसलिलपवनाद्यभावस्यार्थक्रियारूपकार्यकारणाभावप्रयोजकत्वात्। सामर्थ्यस्यार्थक्रियाकरणव्याप्तत्वात्। तथाहि – सलिलपवनादीनां बीजादिसहकारित्वे तैस्सलिलपवनादिभिस्तत्रोपादनकारणे बीजादावङ्कुरकार्योत्पत्त्यनुकूलः कश्चनातिशय आधेयः। कारणेऽकिञ्चित् कुर्वतस्तत्सहकारित्वायोगात्। अन्यथा तदा सन्निहितं

सर्वमपि रासभाकाशादिवस्तुजातं तत्र सहकारि स्यात्। उभयेषामतिशयानाधायकत्वेन विशेषाभावात्। एवञ्चाधीयमानोऽप्यतिशयो बीजरूपधर्मिभिन्न एव वाच्यः। अतिशयत्वात्। तदनन्तरमिदानीं सहकारिणाऽत्रार्जितत्वाच्च। न तु बीजाद्धर्मिणोऽत्यन्ताभिन्नः। किञ्च तदानीमुत्पन्नस्याव्ययहितोत्तरक्षणेऽङ्कुरोत्पादनसमर्थस्यातिशयस्य धर्मिणो बीजादत्यन्ताभेदेऽव्यवहितोत्तरक्षणेऽङ्कुरोत्पादनासमर्थं बीजमिदानीं कार्योत्पत्तिव्यवहितपूर्वक्षणमुत्पन्नमिति स्यात्। तादृशातिशयेन बीजस्याप्यत्यन्तैक्यात्। तथा चास्मदभिमतकुर्वद्रूपस्यैवेदृशत्वेनास्मन्मतप्रवेशस्स्यात्। तथा च भिन्ने तस्मिन्नतिशय आधीयमानेऽङ्कुर इव[26] बीजस्य कारणत्वं सलिलपवनादीनाञ्च तत्सहकारित्वञ्चावश्यं वाच्यम्। तद्ग्राहकान्वयव्यतिरेकस्योभयत्राविशेषात्[27]। तथा चाङ्कुरानुकूलातिशये जनयितव्येऽपि बीजे सलिलपवनादिभिरतिशयान्तरमवश्यमाधेयम्। अन्यथाऽकिञ्चित्कुर्वतां तेषां सहकारित्वानुपपत्तेः। एवं तस्मिन्नतिशये जनयितव्येऽपि तत एव कारणत्वं बीजस्य[28]। सहकारित्वञ्च सलिलपवनादीनां तदर्थञ्चातिशयान्तराधानम्। एवं तस्मिन्नपीत्यतिशयानवस्थानान्न प्रकृताङ्कुरादिसिद्धिरिति। अतस्सहकारित्वप्रयोजकातिशयाधानासंभवान्न सहकारित्वं तेषाम्। अतो न तदभावात्। समर्थस्याप्यतीतानागतार्थक्रिययोर्वर्तमानार्थक्रियाक्षणे तत्करणाभावः। कारणाभावस्य कार्याभावनियामकत्वात्।

अतो न सहकारिसन्निधानक्रमस्य कार्यक्रमनियामकत्वम्। तस्मादप्रतिबन्धमुक्तप्रसङ्गतद्विपर्ययाभ्यां क्रमकारित्वपक्षे वर्तमानार्थक्रियाकारिणो बीजस्यातीतानागतार्थक्रिययोः सर्वदाऽसमर्थ्यानुमानान्न तस्यातीतानागतार्थक्रियाकारित्वम्। अतो न स्थायिनः क्रमेणानेकार्थक्रियाकारित्वम्। नापि तस्य युगपत् सर्वार्थक्रियाकारित्वम्, अनुपलब्धेः, केनापि वादिनाऽनङ्गीकाराच्च। किञ्चात्रापि पक्षे स्थायिनः प्रसङ्गतद्विपर्ययाभ्यां सर्वदा सामर्थ्यानुमानान्न युगपत्कार्यं कृत्वा विश्रमः। तथाहि – स्थायिनो वर्तमानार्थक्रियासमये यो युगपदनेकार्थक्रियाकारित्वस्वभावस्स उत्तरक्षणेऽपि तस्यानुवर्तते वा न वा। यदि नानुवर्तते तर्हि पूर्वमपि तस्य स्वभावो न स्यात्। शीतोष्णवदेकस्य विरुद्धस्वभावद्वयायोगात्, पूर्वं तत्स्वभावसत्वे शीतोष्णवत्पूर्वोत्तरक्षणयोरपि धर्मिभेदापत्त्या स्थायित्वभङ्गप्रसङ्गाच्चेत्यापादनं प्रसङ्गः। न च पूर्वक्षणे त्वया तादृशस्वभावाभावोऽङ्गीक्रियते। तस्मादुत्तरक्षणेऽपि तादृशस्वभावो वाच्य इति विपर्यये पर्यवसानमेव विपर्ययः। अयमेव द्वितीयविकल्पार्थः पर्यवसानेन। तथा च द्वितीयेन पूर्ववत् सर्वदा तादृशसामर्थ्यानुमानान्न युगपत्कार्यं कृत्वा विश्रम इति। एवं प्रसङ्गतद्विपर्ययानुमानं **सर्वदर्शनसंग्रहा**द्युक्तमनुसन्धेयम्। वाद्यन्तरैरप्यनङ्गीकृतत्वादयंपक्षस्तु विस्तरेण नोक्तः। तस्मात्स्थायिनः प्रसङ्गतद्विपर्ययानुमितनित्यासामर्थ्यसामर्थ्याभ्यां यथाक्रमं क्रमकारित्वयुगपत्कारित्वयोः व्यापकयोर्निवृत्त्याऽर्थक्रियाकारित्वमपि निवर्तते। न च तर्हि लोकेऽर्थक्रियाकारित्वमेव नास्तीति वक्तुं न्यायम्। तस्य प्रत्यक्षप्रमाणसिद्धत्वात्। तथा च प्रमाणसिद्धमर्थक्रियाकारित्वरूपं सत्वं धर्मिणः क्षणिकत्वमादाय

---

26 (टि) अङ्कुर इवेति। तस्मिन्निवाधीयमाने तस्मिन्नतिशये बीजस्य कारणत्वं सलिलपवनादीनाञ्च सहकारित्वमिति सम्बन्धः।

27 (टि) उभयत्र – अङ्कुरातिशययोः।

28 (टि) तत एव – अतिशयान्तरत एव।

विश्राम्यति। तस्मात् प्रत्यक्षानुमानसिद्धं क्षणिकत्वम्। न चैवं प्रतिक्षणं भिन्नत्वेनात्मना[29] पूर्वमनुभूतार्थस्येदानीं स्मरणानुपपत्तिः, अन्यानुभूतेऽन्यस्य स्मरणादर्शनात्, अन्यथा देवदत्तानुभूतमर्थं यज्ञदत्तस्स्मरेदिति वाच्यम्। भिन्नत्वेऽप्येकसन्तानत्वेन स्मरणोपपत्तेः। देवदत्तयज्ञदत्तसन्तानयोस्तु भिन्नत्वादेव देवदत्तानुभूतार्थस्य यज्ञदत्तेन न स्मरणम्। न च व्यक्त्यैक्यापेक्षया सन्तानैक्यस्य प्रयोजकत्वकल्पनं गुर्विति वाच्यम्। क्षणिकत्वस्यैव प्रमाण- सिद्धत्वेनागत्यैवं कल्पनात्। एवं क्षणिकत्वस्य प्रमाणसिद्धत्वाद्योऽहमपचं सोऽहं भुञ्ज इति प्रत्यभिज्ञाऽपि ज्वालायामिव निरन्तरोत्पन्नत्वेनागत्या[30] सादृश्यविषयेति कल्प्यते। अत एव[31] कर्मकरणफलभोगव्यवस्था बन्धमोक्षव्यवस्था चैकसन्तानत्वेनेति कल्प्यते। तस्मात् क्षणिकविज्ञानसन्ततिरात्मेति सप्रष्टव्यः। किं सुषुप्तौ विज्ञानसन्तानानुवृत्तिरस्ति नवेति। तत्राद्ये न प्रमाणम्। प्रत्युत सर्वविषयज्ञानोपरतिरूपसुषुप्तिविरोधश्च। द्वितीये सुषुप्तिपूर्वसन्तानस्य विच्छिन्नत्वेन प्रबेधानन्तरसन्तानस्य पूर्वसन्तानानुत्पन्नत्वेन भिन्नसन्तानत्वेन च त्वदुक्तप्रयोजकस्याप्यभावात्पूर्वजागरणकृतकर्मशेषानुसन्धानमुत्तरत्र न स्यात्। नचेष्टापत्तिः। प्रबुद्धस्य पूर्वजागरणकृतकर्मशेषस्मरणदर्शनादित्याह – **बोधे बोधृत्वादिति।** बोधे सुषुप्तस्य प्रबोधानन्तरं पूर्वजागरणकृतकर्मशेषबोधृत्वादित्यर्थः। अत्रास्ति धातोरर्थद्वयं, असद्व्यावृत्तिः, यथा घटोऽस्तीति। सदासत्वञ्च। यथा **कुसुमाञ्जलौ –**

स्यादेव वा न स्यादेव वा न तु कदाचित्स्यात्। इति।

अत्र द्वितीये नास्त्यर्थेनास्य हेतोस्संबन्धः। अणुस्सदा सन् स्थायी न क्षणिकः, पूर्वजागरण- कृतकर्मशेषानुसन्धातृत्वादिति। ननु सुषुप्तावप्यस्त्यहमित्यालयविज्ञानम्। न च तत्रापि प्रमाणाभावः सुप्तोत्थितस्य सुखमहमस्वाप्समिति सुषुप्तिकालीनालयविज्ञानस्मरणदर्शनात्, स्मरणस्य च समानविषयकानुभवपूर्वकत्वात्। न च सुषुप्तिविरोधः[32]। विषयानुभवस्य सुषुप्तावनङ्गीकारात्, तस्यैव[33] तद्विरोधित्वात्। ननु सुषुप्तौ न तावदुक्तज्ञानं संभवति, तदा ज्ञानसामान्यकरणयोग्यमनस्संयोगादेरभावेन कारणबाधात्। तथा च तदनुरोधेन सुखमहमस्वाप्समिति ज्ञानमपि सुप्तोत्थितस्येदानीं पूर्वकालीनाहंकारस्यानुमितिरूपानुभव[34] एव न स्मृतिरिति कल्प्यते। किञ्च सुखमहमस्वाप्समित्युत्थितस्य पूर्वकालीनसुखज्ञानमपि

---

[29] (टि) भिन्नत्वेनात्मनामिति। सन्तानस्यावस्तुत्वात् सन्तानित्वेनात्मनां प्रतिक्षणं भिन्नत्वमितिभावः।

[30] (टि) निरन्तरोत्पन्नत्वेनेति। सन्तानिनामित्यादिः।

[31] (टि) अत एव – क्षणिकत्वस्य प्रमाणसिद्धत्वादेव।

[32] (टि) न च सुषुप्तिविरोध इति। सुषुप्तेस्सर्वविज्ञानाभावरूपतयाऽऽलयविज्ञानसत्वे कथं सुषुप्तिरिति भावः।

[33] (टि) तस्यैवति। विषयानुभवाभावस्यैव सुषुप्तिरूपतया सत्यप्यालयविज्ञाने न तदनुपपत्तिरिति भावः।

[34] (टि) अहंकारस्यानुमितिरूपेति। नन्वनुमानेन सुषुप्तिकालीनाहङ्कारस्य साधनेऽपि सौगतस्येष्टं सिध्यत्येव। अहमिति ज्ञानस्यैव तदा तेनालयविज्ञानत्वस्वीकारादिति को विशेषः फलेऽनुमितिस्मृत्योरिति चेन्न। सुषुप्तोत्थितज्ञानस्य स्मृतित्वाङ्गीकारे स्मृतेः पूर्वानुभवनाशजन्यत्वेन सुषुप्तिकालीनाहङ्कारस्य नाशोऽवश्यंभावीति तदा क्षणिकविज्ञानसिद्धिर्निरुपद्रवा भवति। अनुमितिरूपत्वे तु अवस्थात्रये दण्डायमानस्यापि तस्य तदाऽननुभवमात्रमिति सोपद्रवैव सेति।

दृश्यते। न च तदंश इदं स्मरणं भवति। तदा मुख्यसुखजनकचन्दनवनितादिविषयसंबन्धा-भावेन तदधिकस्वरूपसुखे च प्रमाणाभावेन च तदा मुख्यसुखस्यैवाभावे निश्चिते इदानीं वा पूर्वं वा तत्ज्ञानमात्रस्यैवासंभवात्। तथा च दुःखाभाव एव तदा संभावित उपचारात्सुखत्वेन ज्ञायत इति वक्तव्यम्। तस्यापि च ज्ञानसंभवेऽपीदानीं न स्मरणं संभवति। सुषुप्तिकाले तत्ग्राहकप्रतियोगिस्मरणादेरभावेन तदनुभावासंभवात्। तस्मादुत्थितस्योक्तज्ञानं दुःखाभावस्यैव। तस्यापि न स्मरणं, किन्तु तात्कालिकदुःखाभावस्येदानीमनुमितिरूपानुभव एव। न चेदानीं तात्कालिकतद्व्याप्तलिङ्गप्रतिसन्धानाभावात् सोऽप्यनुपपन्न इति वाच्यम्।

प्रत्यक्षसिद्धैतत्कालीनेन्द्रियप्रसादाङ्गलाघवादिलिङ्गानुमितपूर्वसुषुप्तिकालीनो-परतेन्द्रियत्वस्यैव तद्व्याप्तस्य प्रतिसंहितत्वात्। अन्यथा तवापि निर्दुःखमस्वाप्स-मिति दुःखाभावानुमितिरप्युत्थितस्य न स्यात्। अतस्तदंशे तत्ज्ञानमनुमितिरूपमेव। अतोऽहमंशेऽप्युत्थितस्य तत्ज्ञानमनुमिति रूपमेव वाच्यम्। स्मृतित्वानुमितित्वयोर्विरुद्धजात्योरेकत्र समावेशासंभवादिति चेत् — मैवम्। अहमित्यालयविज्ञानमात्मेत्युक्तम्। तच्च नोत्पत्त्यर्थं मनस्संयोगादिकमपेक्षते। पूर्वस्वसन्तानेनैवोत्पत्तेः। नापि स्वज्ञानार्थम्। "दृश्यञ्चेत् जडिमा भवे"दित्यादिवक्ष्यमाणशिवस्वयंप्रकाशत्वयुक्तितौल्येन जीवस्वयंप्रकाशत्वस्य तवापि सम्मतत्वात्। अतः कारणबाधादिदोषप्रसङ्गाभावात् सुषुप्तावस्त्येवालयविज्ञानम्। पूर्वोक्तस्याहमस्वाप्समित्युत्थानसमनन्तरप्रत्ययस्य स्वतः प्राप्तपरामर्शत्वबोधकाभावेन परामर्शरूपत्वात्। यत्तूक्तमपरं बाधकं सुखांशे स्मरणासंभवे नाहमंशेऽप्यनुभव एवेति तदपि मन्दम्। अहं सर्वदा स्यामिति निरुपाधीच्छाविषयत्वमहमर्थस्यानुभूयते। न चायमनुभवश्शरीरस्यैवेति वाच्यम्। अचिकित्स्यमहारोगग्रस्ते दुःखैकावच्छेदकेऽपि[35] तस्मिन् सत्यहं सर्वदा स्यामितीच्छायाः सर्वानुभवसिद्धत्वादात्मविषयत्वमेवोक्तेच्छायाः। न च सिद्ध आत्मनि न स्वत इच्छा संभवति। नित्यत्वाच्च न दुःखप्रागभाव[36]वदुत्तरकालसंबन्धि-त्वरूपपरिपालयत्वेनापीच्छेति वाच्यम्। तन्नित्यत्वापरिज्ञानेन जानतोऽप्यतिसुन्दरत्वेनातिगुप्तेऽपि सुवर्णेऽपहरण[37]शङ्कयेच्छावद्वेच्छोपपत्तेः। तथा चात्मा निरूपाधीच्छाविषयत्वात्सुखरूप एव। तदेव च सुखं स्वयंप्रकाशं सुषुप्तौ भासते। तस्य च स्मरणमुत्थितस्य संभवत्येवेति नाशं द्वयेऽपि तात्कालिकानुमितिरूपत्वमुत्थितज्ञानस्येति।

तस्मात्सुषुप्तौ तत्सन्तानानुवृत्तिरस्त्येवेत्याद्यः पक्षो निर्दोष इति चेत् — अस्त्वेवं सुषुप्तौ स्वयंप्रकाशमात्मस्वरूपज्ञानम्। सम्मतञ्चास्माकमपि। तथाऽपि तव मते प्रायणानन्तरमपि तत्सन्तानानुवृत्तिरस्ति न वा। द्वितीये एकस्मिन् जन्मन्येकसन्तानत्वाद्यद्यपि पूर्वोक्तकर्मशेषानु-सन्धानं संभवति। तथाऽपि जन्मानन्तरं बालस्य स्तन्यपानादिप्रवृत्त्यनुकूलेष्टसाधनतास्मरणं न संभवति। पूर्वानुभवितृस्मर्त्रोर्भिन्नसन्तानत्वेनत्वत्सम्मततत्प्रयोजकसन्तानैक्यस्याप्यभावात्[38]।

---

[35] (टि) दुःखैकेति। तस्मिन्द्दुःखैकावच्छेदकेऽपि सतीत्यन्वयः।

[36] (टि) दुःखप्रागभाववदिति। सिद्धोऽपि दुःखप्रागभावो यथोत्तरकालेऽप्यनुवर्तनार्थं परिपाल्यत्वेनेष्यते तद्वदित्यर्थः।

[37] (टि) अपहरणेति — तस्करोपहरेद्वेति शङ्कया स्वामिनो नापहरतादितीच्छासुवर्णे तद्वदात्मा सुषुप्तौ मा विच्छिद्येतेतीच्छा जानतोऽपि संभवत्येवेत्यर्थः।

[38] (टि) सन्तानैक्यस्यापीति। यथाऽनभ्युपगमेन त्वन्मते व्यक्त्यैक्याभावस्तद्वदित्यर्थः।

एवं कर्मफलभोगव्यवस्थाबद्धमुक्तव्यवस्था च न स्यात्। तथा चान्यः कर्ताऽन्यः फलभोक्तान्यो बद्धोऽन्यो मुक्त इति अव्यवस्थया फलार्थिनां कर्मानुष्ठानां मुमुक्षूणां बद्धानां[39] ज्ञानश्रवणाद्यनुष्ठानञ्च न स्यादिति तत्बोधकनिगमागमानामननुष्ठानलक्षणमप्रामाण्यं स्यात्। नचेष्टापत्तिः। वेदागमादेः प्रामाण्यस्य पूर्वं स्थापितत्वादिति दूषणमत्र द्रष्टव्यम्। सूत्रेऽप्यत्र पक्षे बोधग्रहणं जन्मनोऽप्युपलक्षणम्।

बोधृत्वपदेन चोक्तेष्टसाधनतानुसन्धातृत्वं विवक्षितम्। तदप्युक्तकर्मफलभोगबन्ध-मोक्षव्यवस्थादेरप्युपलक्षणमिति द्रष्टव्यम्। द्वितीयविकल्पे यद्यप्ययमपि दोषो नास्ति, तथाऽपि योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थाविरे प्रणतृननुभवामीत्यात्मनो बहुकाल-स्थायित्वप्रत्यभिज्ञायास्स्वरसतो व्यक्तैक्यविषयत्वे संभवति न सन्तानैक्यविषयत्वकल्पनं युक्तम्। व्यक्त्यैक्यमात्रोच्छेदप्रसंगात् गौरवाच्चेति दूषणमत्र द्रष्टव्यम्। सूत्रेऽप्यत्र पक्षे बोधृत्वपदमुक्तप्रत्यभिज्ञारूपबोधकर्तृत्वपरं व्याख्येयम्। ननूक्तं क्षणिकत्वस्य प्रमाणसिद्ध-त्वादेव तस्यास्सन्तानैक्यविषयत्वकल्पनमिति, तन्न। क्षणिकत्वे प्रमाणाभावात्।

तथाहि – यत्तावदुक्तमयं घट इति प्रत्यक्षं तावत्क्षणिकत्वे प्रमाणमिति तत्र न विशेषणमात्रस्य विशेषेणान्तरविशिष्टव्यावृत्तिबोधकत्वम्। एकस्मिन्नेव क्षण एकस्मिन्नपि पुरुषादौ दण्डकुण्डलरूपविशेषणभेदेन रूपरसादिरूपविशेषणभेदेन च तत्तद्विशिष्टभेदापत्तेः। किन्तु विरुद्धविशेषणस्यैव विरुद्धविशेषणान्तरविशिष्टव्यावृत्तिबोधकत्वं वाच्यम्। तथा च प्रकृते न पूर्वोत्तरक्षणयोरेकस्मिन्नधिकरणे सहानवस्थिततत्व[40]नियमरूपो विरोधः। तस्येदानीमसिद्धेः। प्रत्युत स एवायं घटो यः पूर्वेद्युर्दृष्ट इति प्रत्यभिज्ञया पूर्वोत्तरक्षणा-श्रयस्यैक्यावगमात्तयोरेकत्रावस्थिततत्वमेव।

अस्तु वा कालतः पूर्वोत्तरक्षणयोर्विरोधात्तद्विशिष्टभेदप्रतीतिः। तथाऽप्यभिज्ञा-द्वयप्राप्तभेदप्रतीत्युत्तरकालभाविन्या प्रत्यभिज्ञया विशिष्टभेदप्रतीतिः पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति **न्यायेन** बाध्यते। अस्तु वा पूर्वोत्तरक्षणविशिष्टभेदप्रतीत्या तत्तत्क्षण-विशिष्टस्य घटस्य क्षणिकत्वम्, तथाऽपि घटस्वरूपभेदेन किञ्चित् प्रमाणम्। प्रत्युत स्वरूपैक्यमेवोक्तप्रत्यभिज्ञयेति। एतेनोक्तानुमानमपि निरस्तम्। तस्याप्युक्तप्रत्यभिज्ञा बाधि-तत्वात्। किञ्चास्त्वर्थक्रियाकारित्वमेव सत्वम्। तच्च स्थायित्वेऽपि संभवत्येव। न च स्थायित्वे युगपत्कारित्वक्रमकारित्वरूपविशेषबाधार्थक्रियाकारित्वरूपसामान्यबाधः। क्रमकारित्वे बाधाभावात्।

तथाहि – अस्त्येव बीजस्य सर्वदाऽङ्कुरजननसामर्थ्यम्। न च सर्वदाऽङ्कुरजननप्रसङ्गः। सामर्थ्यस्यार्थक्रियाकारित्वव्याप्तत्वे प्रमाणाभावात्। समर्थस्यापि सलिलादिक्रमिकसहकार्य-पेक्षया विळम्बोपपत्तेः। न च समर्थस्य सहकार्यपेक्षैवानुपपन्नेति वाच्यम्।

तथात्वेऽसमर्थस्य नितरामित्यपेक्षैव लोके न स्यात्। नचाकिञ्चित्कुर्वतस्सह-कारित्वानुपपत्तिः। अकिञ्चित्कुर्वतः कारणत्ववत्सहकारित्वस्यापि संभवात्। न च

[39] (पा) मुमुक्षूणां बद्धेन

(टि) अत्र मुमुक्षूणां बद्धेनति पाठोऽसमन्वयात् प्रामादिकः। बद्धानामिति भवितव्यम्।

[40] (टि) सहानवस्थिततत्वे नियमस्तु कालभेदेनाप्येकत्रानवस्थानम्।

सहकारित्वेनाभिमतसलिलपवनपावकादेः तदन्यरासभादेश्चाविशेषापत्तिः किञ्चित्करणाभावेऽपि सहकारित्वासहकारित्वस्यैव विशेषत्वात्। न चातिशयाभावेऽयमेव विशेषो न संभवतीति वाच्यम्। तदभावेऽपि तस्यान्वयव्यतिरेकसिद्धत्वात्। तस्माद्यथा व्रीह्यादेः कारणत्वमनुपकुर्वतोऽप्यन्वयव्यतिरेकाभ्यां तथा सलिलपवनपावकादेरपि तत एव[41] सहकारित्वं, तत्र विद्यमानानामन्येषां[42] पदार्थानां प्रमाणाभावान्न सहकारित्वमिति। तस्माद्देहेन्द्रियान्तःकरणप्राणादिभ्यो भिन्नस्स्थाय्येवात्मेति सिद्धम्।।

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये तृतीयसूत्रभाष्यम् समाप्तम् ॥**

---

41 (टि) तत एव – अन्वयव्यतिरेकाभ्यामेव।

42 (टि) अन्येषां आकाशादीनामिति।

# चतुर्थसूत्रभाष्यम्

अन्तःकरणादीनां स्वापादिसर्वावस्थाननुस्यूतत्वादनात्मत्वमुक्तम्। नन्वात्माऽपि तदानीन्नास्त्येव प्रमाणाभावादीत्याशङ्क्यावस्थापञ्चकानुस्यूतिं प्रतिपादयति –

## चतुर्थसूत्रम्

**आत्माऽन्तःकरणादन्योऽप्यन्वितो मन्त्रिभूपवत्।**
**अवस्थापञ्चकस्थोऽतो[1] मलरुद्धस्वदृक्क्रियः॥**

अत्रावस्थापञ्चकस्थोऽत इति जाग्रत्स्वप्नसुषुप्तितुरीयतुरीयातीतेष्ववस्थापञ्चकेष्वनुस्यूत एकोऽणुर्यतोऽतो नान्तःकरणादीति संबन्धः।

य एवाहं पूर्वेद्युर्निर्धन आसं स एवाहमद्य सधनो भवामीत्यवस्थापञ्चकानुस्यूतैकात्मप्रत्यभिज्ञानादवस्थापञ्चकानुस्यूतत्वं तस्येति भावः। अयञ्च "स्वापे निर्भोगत" इत्यत्रापेक्षितो हेतुः। तत्र[2] पूर्वं तदानीमात्मसत्तायां[3] हेतोरनुक्तत्वात् इतरत्र यथासंभवमभ्युच्चयो द्रष्टव्यः। पञ्चावस्थाग्रहणं देहान्तरस्याप्युपलक्षणम्।

ननु पञ्चावस्थानुभवस्तस्य न संभवति। तथाहि – मुक्तौ तस्या सङ्कुचितज्ञानक्रियाशक्तिरागमसिद्धा। न च सा तदानीमुत्पद्यते, ईश्वरात् संक्रमतीति वा कल्पयितुं युक्तम्। मोक्षरूपायास्तस्या अनित्यत्वप्रसङ्गात्। तदुत्पत्त्यादिपक्षस्य निराकरिष्यमाणत्वाच्च। तथा च सर्वज्ञत्वादिकमप्यणोरस्तीति[4] वाच्यम्। इत्थञ्च तस्य सर्वज्ञत्वात् सर्वतन्त्रत्वादाप्तकामत्वाच्च कथं परतन्त्रपञ्चावस्थानुभवः[5], कथं वा पूर्वोक्तदुःखव्यामिश्रविषयभोगस्तस्येत्यत आह – **मलरुद्धस्वदृक्क्रिय इति**। मलेन रुद्धा ज्ञानक्रियाशक्तिः स्वकीया यस्य स तथोक्तः। बहुव्रीहिलब्धेऽपि ज्ञानक्रियाशक्तेः स्वीयत्वे स्वपदोपादानं तृतीयार्थगर्भबहुव्रीहिशङ्कानिवृत्त्यर्थं यद्वा स्वपदं स्वभोग्यपरानन्दानुभवसमर्थस्वात्मपरम्। मलेन रुद्धे स्वात्मज्ञानक्रियाशक्ती यस्येति विग्रहः। अथवा दृक्क्रिययोरात्मभेदबोधनाय स्वशब्दः। यद्यपीदानीमपि तस्य ज्ञानक्रियाशक्तिरस्त्येव तथाऽपि तस्यारुद्धत्वादसर्वज्ञत्वात् परतन्त्रतयाऽनाप्तकामतया पञ्चावस्थानुभव उपपद्यत इति भावः।

नन्वेवं सुतरां पञ्चावस्थानुभवस्तस्य न स्यात्, रुद्धज्ञानक्रियाशक्तित्वेन पाषाणतुल्यत्वात्। तथा च वृश्चिकभयात् पलायमानस्याशीविषमुखनिपात इत्याशङ्क्याह – **अन्वित इति**। अत्र प्रतियोग्याकांक्षायामन्तःकरणादयः प्रतियोगित्वेन संबध्यन्ते। अन्तःकरणादिभिरन्वित इत्यर्थः। तथा च तत्तद्घटाद्याकारवृत्तिपरिणतान्तःकरणेन कलादिना च कदाचित् किञ्चित् किञ्चिद्विदारितमलस्तं तमर्थमनुभवतीति जागराद्युपपत्तिरिति भावः। अणुरिति पदसन्निधानेऽपि

---

[1] (पा) पञ्चकस्थस्स्यात्

[2] (टि) तत्र – स्वापे निर्भोगत इत्यत्र।

[3] (टि) तदानीं – स्वापसमये।

[4] (पा) तथा च सेदानीम्यणोरस्ति

[5] (टि) परतन्त्रपञ्चावस्थेति – परतन्त्रस्य या पञ्चावस्था तदनुभव इत्यर्थः।

पुनरात्मग्रहणं यौगिकार्थेन तस्य व्यापित्वप्रदर्शनार्थम्। सर्वत्रात्मकार्योपलंभाद्विभुरित्यर्थः। तेन यश्चाण्वात्मवादो **रामानुजानां**, यश्च शरीरपरिमाणवादः **कौळानां** तद्द्वयमपाकृतं वेदितव्यम्। अणुत्वे सर्वाङ्गीणसुखसंवेदनाद्यनुपपत्तेः। देहपरिमाणत्वेऽनित्यत्वेन कृतहानाकृताभ्यागमप्रसङ्गात्। न चैवं तनाविति तनुमात्रवर्तित्वोक्तिरयुक्तेति वाच्यम्। तनौ तद्व्यापारसत्वेन तथाव्यपदेशोपपत्तेः। अथवा तृतीयसूत्रात् भिन्नवाक्यत्वेन चतुर्थसूत्रं व्याख्यायते ननु मोक्षदशायामस्य सार्वज्ञ्यं सर्वक्रियायोगश्च श्रूयते। तन्न तत्कालोत्पन्नमिति युक्तं वक्तुम्। अनित्यत्वप्रसङ्गात्।

अतस्स्वाभाविकतया संसारदशायामप्यस्तीत्यभ्युपेयम्। तथा च कथमस्य जाग्रदाद्यवस्था उपपद्यन्ते। नह्यस्य सर्वदा सार्वज्ञे चक्षुरादिजन्यविषयज्ञानादानादिक्रियाविगमेऽन्तःकरणस्थ वृत्तिविषयज्ञानाद्यात्मिकाः स्वप्नाद्यवस्था उपपद्यन्ते। अतोऽस्य कथमवस्थापञ्चकोपपत्तिरित्यत आह – **आत्मेति।** आत्मा मलरुद्धस्वदृक्क्रिय इत्येकं वाक्यम्। तदनन्तरमतोऽवस्थापञ्च-कस्थ इत्यपरं वाक्यम्। अतः – मलरुद्धस्वदृक्क्रियत्वात् अवस्थापञ्चकोपेत इति। अयंभावः – यद्यप्यस्य सर्वविषया दृक्क्रिया च स्वाभाविकी। तथाऽपि तयोर्मलकृतेन तिरोधानेनासत्कल्पत्वाच्चक्षुरादेर्विषयसंबन्धे कलादिद्वारेण मलस्यैकदेशतो विगमे तत्तद्विषयज्ञानस्य पाण्यादेरादेयादिसंबन्धे सत्यादानादिक्रियायाश्च सत्भावात्मा जागरः, तस्यापि विगमे स्वप्नादिश्चोपपद्यत इति। जागराद्यवस्थाहेतुमाहान्वित इति। अन्तःकरणादीनां प्रकृतत्वात्तैरन्वित इत्यर्थः[6]। अन्तःकरणादिभिः कतिपयैरन्वितो जाग्रदवस्थां भजते। तैरेव कतिपयविनिर्मुक्तैरन्वितस्स्वप्नावस्थाम्।

अत्र दृष्टान्तो मन्त्रिभूपवदिति। मन्त्रियुक्तो भूपो मन्त्रिभूप इति मध्यमपदलोपी-समासः। मन्त्रिभूपाविवेत्यस्य दार्ष्टान्तिकानानुगुण्यात्। मन्त्रिशब्दश्च छत्रचामर-करंकवाहिप्रभृतीनामुपलक्षकः। तथा च यथा भूपो मन्त्रिप्रभृतीनामुपकरणानां सर्वेषां सत्भावे किञ्चित्परित्यागे च तत्तदवस्थां भजते तथाऽयमपीत्यर्थः। मन्त्रादिव्यतिरेकेण[7] भूपस्येवान्तः-करणादिव्यतिरेकेणात्मनस्सत्वमेव नास्तीत्याशङ्कानिरासाय पूर्वसूत्रोदितं भेदमनुवदति – **अन्तःकरणादन्योऽपीति**। अपिस्समुच्चये। अन्तःकरणादित्यस्यानन्तरं दृष्टव्यः। अन्तःकरणात् अपिशब्दसमुच्चितादिन्द्रियप्राणादेश्चान्य इत्यर्थः। अवस्थापञ्चकन्तु जाग्रत्स्वप्नसुषुप्तितुरीयतुरीयातीतरूपन्नेत्रादिस्थानकम्। तदुक्तम् –

जाग्रन्नेत्रस्थितं विद्यात्कण्ठे स्वप्नं समादिशेत्।
सुषुप्तं हृदयस्थाने नाभिपद्मे तुरीयकम्।।
तुर्यातीतं वस्तिपद्मे प्रवृत्तं सर्वदेहिनाम्। इति।

तत्र श्रोत्रादीनां ज्ञानेन्द्रियाणां वागादीनां कर्मेन्द्रियाणां शब्दादिपञ्चविषयवृत्तीनां वचनादीनां व्यापृतीनान्नागादीनां प्राणादीनाञ्च वायूनां मनोमुखानाच्च पञ्चानां समाहारो जाग्रत्।

---

[6] (टि) तैरन्वित इत्यर्थ इति। न तेषामाश्रय इति शेषः।

[7] (टि) मन्त्र्यादिव्यतिरेकेणेति। यथा मन्त्र्यादिव्यतिरेकेण भूपोऽस्ति। तथान्तःकरणादिव्यतिरेके-णाऽत्मा नास्तीत्याशङ्कानिरासायेत्यर्थः।

इन्द्रियदशकविनाकृतानान्तु[8] स्वप्नः। क्षेत्रज्ञचित्तप्राणानां सुषुप्तिः। क्षेत्रज्ञप्राणयोस्तुरीयम्। क्षेत्रज्ञमात्रस्यावस्थानं तुरीयातीतम्। तदुक्तम् –

श्रोत्रवाक्छब्दवचननागप्राणमनोमुखैः।
जाग्रत्स्वप्नश्च शब्दादिपञ्चविंशतिभिर्भवेत्[9]।।
क्षेत्रज्ञचित्तप्राणैस्तु सुषुप्तिश्चित्तवर्जितम्।
तुर्यन्तुर्यातीतके स्यात् क्षेत्रज्ञस्सर्ववर्जितः।। इति।

क्षेत्रज्ञशब्देन आत्मतत्त्वमुच्यते। एतच्चाधोमुखमवस्थापञ्चकम्। ऊर्ध्वमुखन्तु निर्मलजाग्रदादिपञ्चकमष्टमसूत्रे वक्ष्यते। श्रोत्रादीन्यपि गणितानि –

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं ज्ञानेन्द्रियाणि च।
वाक्पाणिपादोपस्थानि पायुः कर्मेन्द्रियाणि च।।
वचनादानगमनोत्सर्गानन्दाख्यवृत्तयः।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः।।
प्राणोऽपानस्समानश्चोदानव्यानौ च वायवः।
शब्दस्स्पर्शश्च रूपञ्च रसो गन्धश्च वृत्तयः।।
मनोहङ्कारबुद्धी च चित्तं क्षेत्रज्ञ एव च। इति।

ननु मलसद्भावे किं मानम्। न तावदज्ञोऽस्मीत्यादिप्रत्यक्षं, तस्य ज्ञानाभावविषयत्वात्। नाप्यनुमानं, लिङ्गाभावात्। ननु पशोः पारतन्त्र्यम्। किञ्चिदायात्तम् अस्वाभाविकत्वात्, घटगतरक्तरूपवत्। नचासिद्धिः। मुक्तता दशायां पारतन्त्र्यादर्शनात्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

पाशाभावे पारतन्त्र्यं वक्तव्यं किं निबन्धनम्।
स्वाभाविकञ्चेन्मुक्तेषु मुक्तशब्दो निवर्तत।। इति।

एवं क्षणविध्वंसिषु दुःखानुषक्तेष्वशुद्धेषु भोगेषु सक्तिः किञ्चिदायत्ता आगन्तुकत्वात्, घटादिवत्। तादृशभोगासक्तिहेतुत्वेन मलत्वमपि पक्षधर्मताबलात्सिध्यति[10]। न च रागतत्त्वेनार्थान्तरता। तस्यापि दोषरहितेषु मुक्तेष्विच्छाजनकत्वाभावेन दोषसापेक्षत्वेऽपेक्षणीयस्य दोषस्य मलरूपस्य सिध्यविरोधादिति। तदुक्तं **श्रीमत्पौष्करे** –

किञ्चायं मलिनो नो चेत्सक्तिर्भोगेषु किं कृता।
यदि सा निर्मलेऽपि स्यान्मुक्तात्मस्वपि सा भवेत्।।

---

[8] (टि) विनाकृतानान्त्विति। समाहार इति शेषः। एवमग्रेऽपीति द्रष्टव्यम्।

[9] (टि) पञ्चविंशतिभिरिति। जाग्रति श्रोत्रादिपञ्चकं, वागादिपञ्चकं, शब्दादिपञ्चकं, वचनादिपञ्चकं, नागादिपञ्चकं, प्राणादिपञ्चकं, क्षेत्रज्ञसहितमन आदिपञ्चकं, आहत्य त्रिपञ्चाशत्समाहारः। तत्रादितः पञ्चकद्वयं परिहृत्य पञ्चविंशतिभिस्स्वप्न इत्यर्थः।

[10] (टि) ननु घटादिरिव चक्रादिभोगासक्तेरपि व्याप्तिबलात् कश्चन हेतुः कामं सिध्यतु, तस्य मलत्वमपि कुतस्सिद्धमित्यत आह – पक्षधर्मता बलादिति। घटादिहेतुभूतचक्रादिसाधारण्येन हेतुत्वमात्रेण सिद्धावपि यथा चक्रत्वादिकं विना चक्रादेर्घटादिहेतुत्वन्न सिध्यत्येवं मलत्वं विना भोगासक्तिहेतुत्वं न सिध्यतीति भावः।।

रागोऽस्ति कारणं सक्तेरिति चेत् किं मलेन तु।
सत्यं रागोऽस्ति तद्धेतुर्न स किञ्चित्करोऽमले।।
अमलेऽपि स चेत्सक्त्यै स्यान्मुक्तेऽप्यविशेषतः।
न हि मुक्तश्शिवो वाऽपि भोगासक्तः कदाचन।। इति।

तस्मात्पारतन्त्र्यभोगासक्तिभ्यां मलसिद्धिरिति। मैवम् – पारतन्त्र्यस्य कर्मायत्तत्वसंभवेन कर्मणाऽर्थान्तरत्वात्। भोगासक्तेरपि मिथ्याज्ञानजन्यत्वसंभवेनार्थान्तरत्वात्। अथ –

आत्मा मलावृतस्सर्वज्ञत्वे किञ्चित्ज्ञता यतः।
न किञ्चित्ज्ञस्तु यस्सोऽयं मलेनापि न संवृतः।।
यथा शिवस्तथा नायं मलेनैव समावृतः।

इति **श्रीमत्पौष्करोक्तं** केवलव्यतिरेक्यनुमानं मानम्। न चात्र सर्वज्ञत्वे सतीति व्यर्थं, जडेश्वरयोः किञ्चित् ज्ञत्वेनैव व्यावृत्तेरिति वाच्यम्। व्यभिचारवारकत्वेन हेत्वनुप्रवेशाभावे अपि प्रतिनियतविषयज्ञानकारणान्नियतविषयकज्ञानोत्पत्त्यैव किञ्चिज्ज्ञत्वसंभवेन मलावृतत्वं प्रत्यप्रयोजको हेतुरिति शङ्कानिरासार्थत्वात्। अत एव "न किञ्चित्ज्ञस्तु यस्सोऽय"मिति तद्विनाकृतस्यैव व्यतिरेकव्याप्तिः प्रदर्शितेति। मैवम् – "मलावृतत्वस्य साध्यस्याप्रसिध्या व्यतिरेकव्याप्तिग्रहासंभवात्। मिथ्याज्ञानकर्मादिनिरुद्धत्वेन किञ्चित्ज्ञत्वोपपत्तेरप्रयोजकत्वाच्च। नाप्यागमः। तत्गतानां तमोनीहाराञ्जनादिशब्दानां मिथ्याज्ञानकर्मादिविषयकत्वात्। तस्मान्न मलसत्भावे मानमिति। मैवम्। आत्मा किञ्चिदावृतसार्वज्ञ्यः किञ्चित्ज्ञत्वादित्येवानुमानशरीरम्। मलपदन्तु पक्षधर्मताबललभ्यविशेषोपस्थापकम्[11]। अतो न साध्याप्रसिद्धिः। न चैवं मिथ्याज्ञानादिनार्थान्तरत्वम्[12]। मिथ्याज्ञानस्य यथावदर्थप्रकाशेऽनुत्पत्त्या तदुत्पत्तये पटलस्येवावारकस्यापेक्षणीयत्वात्, मिथ्याज्ञानस्य कादाचित्कत्वेन तदभावदशायां सर्वस्यापि प्रकाशप्रसङ्गाच्च। तदुक्तं **श्रीमत्पौष्करे** –

नाप्येतदन्यथाज्ञानं तस्याप्यनुदयात् स्वतः।
शुक्तिका रजतज्ञानं न भवेत्पटनं विना।।
किञ्चैतदन्यथाज्ञानमागन्तुकमथेतरत्।
आगन्तुकं चेच्चिच्छक्तेर्बाधकं न कदाचन।।
यद्यनागन्तुकं तर्हि नान्यथाज्ञानमेव तत्। इति।

कर्मणोऽप्यादिमत्वेनानाद्यात्मप्रकाशावारकत्वायोगात्, प्रवाहानादित्वेन तदुपपत्तावपि कर्मणो भोगहेतुत्वे ज्ञानात्मकभोगावारकत्वायोगात्, मायेय तत्त्वबुद्धिगतस्य तस्य तदूर्ध्वभुवनगतेष्वभावेन तेषामनावृतत्वप्रसङ्गाच्च। भोगहेतुत्वेनैव क्लृप्ततया तज्जननेनान्यथासिद्धस्यावरणं प्रत्यपि हेतुत्वे तत्त्वसाङ्कर्यप्रसङ्गाच्च। तदुक्तं **श्रीमत्पौष्करे** –

कर्मणाऽपि न च ज्ञानबाधस्संभवति द्विजाः।
साध्यत्वात्कर्मणः पुंसस्साधकत्वेन संस्थितेः।।

---

[11] (टि) पक्षधर्मता बललभ्यविशेषो मलत्वम्।

[12] (टि) मिथ्याज्ञानं - भ्रमः।

किञ्च भोगैकहेतुस्तत्कथं भोगस्य बाधकम्।
यतो ज्ञानात्मको भोगो न हि तेन तदावृतिः।।
धर्माधर्मात्मकं कर्म तौ च बौद्धौ व्यवस्थितौ।
व्याप्त्यभावात्तयोरूर्ध्वं बाधकौ सर्वतः कथम्।।
किञ्च भोगप्रवृत्तौ तौ व्याप्रियेते कथं वृतौ।
अन्यत्रापि प्रवृत्तस्य यद्यन्यत्रापि हेतुता।।
अन्यत्र तत्त्वासंसृष्टिः[13] कार्यभेदाद्विहन्यते।
तस्मान्न कर्मचिच्छक्तेर्बाधकं संव्यवस्थितम्।। इति।

अत एव पारतन्त्र्यहेतुत्वेनाप्यनुमानं युक्तम्। कर्मणो मायोर्ध्ववर्तिष्वभावेन तत्पार-तन्त्र्यहेतुत्वासंभवेन तेनार्थान्तराभावात्। एवं भोगासक्तिहेतुत्वेनापि तत्सिद्धिरविरुद्धा। मिथ्याज्ञानस्याप्यावरणापेक्षायाः प्रदर्शितत्वेन तेनार्थान्तरायोगात्। तस्य चात्मना संबन्धो न समवायः, तत्सत्वे तादात्म्यप्रसङ्गात्। नचावारकत्वमेव संबन्धः, तस्य संबन्धान्तरा यत्तत्त्वात्। अतः परिशेषात्संयोग एव संबन्धः। संयोगित्वाच्च द्रव्यत्वं, व्यापकाच्छादकतया व्यापकत्वं नानात्वे कल्पनागौरवादेकत्वञ्चाभ्युपेयम्। नचैवमेकस्य मुक्तौ सर्वेषां मुक्तिस्स्यादिति वाच्यम्। मलगतायास्तत्तदात्मप्रकाशावारकशक्तेर्विनाशे तस्य तस्य मुक्त्युपपत्तेः।

वस्तुतस्तु तत्तदात्ममलसंयोगनाशात्तस्य तस्य मुक्तिरिति दशमे वक्ष्यते। मलात्मनोश्च संयोगोऽनादिरेव, जनकत्वाभिमतस्य कर्मादेरभावात्। न चैवमजन्यो विभागोऽपि स्यादिति युक्तम्। तत्र मानाभावात्, संयोगस्य चावारकत्वान्यथानुपपत्त्या सिध्युपपत्तेः। न चैवं तस्य विनाशो न स्यात्, अनादित्वादिति वाच्यम्। अनादित्वेऽपि विनाशकसामग्रीसमवधा-नेन विनाशोपपत्तेः। मलकृत्यं चित्प्रकाशस्य तिरोधानमपि कार्योन्मुख्यविघटनमेव। तस्मादेकोऽनादिर्विचित्रशक्तियुक्तो भोक्तृत्वपारतन्त्र्यादिप्रयोजको मलस्सिद्धः।

तदुक्तं **सिद्धान्तसारावल्यां त्रिलोचनशिवाचार्यैः** –

"नीहारोऽनादिरेको मनुजसहभवस्ताम्रगा काळिकेव स्वाधीकारान्तरनाशि प्रतिनियतदृगावारकानेकशक्तिः। पाश्यश्शोध्यश्च बोध्यः स तु भवति यतो भोक्तृता पारतन्त्र्यं कर्मादेर्योग एतत्कृतिमनुकलिता रोधयित्रीशशक्ति" रिति।

अथवा अन्तःकरणादिभ्यो भिन्नस्तैस्तैरन्वितस्सन् यतोऽवस्थापञ्चकं भजतेऽयमात्माऽतो मलरुद्धदृक्क्रियतया ज्ञायत इत्यर्थः। पूर्वव्याख्यानेऽत इति कारके पञ्चमी। अत्र तु ज्ञापक इति भेदः।।

। चतुर्थसूत्रसंग्रहभाष्यं समाप्तम् ।

[13] (टि) अन्यत्र तत्त्वासंसृष्टिरिति। असंसृष्टिः-असंकरः। कार्यभेदात्–एकस्यैव विलक्षण-कार्यद्वयोत्पादकत्वात्। विहन्यते। तत्त्वसंकरस्स्यादित्यर्थः। अथवा तत्त्वसंसृष्टिरिति भवितव्यम्। यदा कर्मावृतौ व्यापृतं तदा भोगतत्त्वसर्गो विहन्यते। इतरत्रत्वितरदित्यर्थः।

## अथ विस्तृतभाष्यम्

विस्तरेण आणवमलवैभवयोः साधनं क्रियते। सूत्रार्थस्तु पूर्ववत्। ननु मलसद्भावे किं प्रमाणम्। न तावदहमज्ञो मामन्यञ्च न जानामीति प्रत्यक्षम्। तस्य ज्ञानाभावविषयकत्वात्। ननु ज्ञानाभावो न प्रत्यक्षग्राह्यः प्रतियोगिज्ञानाज्ञानाभ्यां तदनुपपत्तेः प्रतियोगिनो ज्ञानस्य ज्ञाने तस्यैव ज्ञानस्य सत्वेन तदभावाभावात्[14]। अज्ञाने च प्रतियोगिज्ञानाभावेनाभावज्ञानासंभवात्। न च घटज्ञानस्य प्रतियोगिनो ज्ञानेऽपि तस्य घटज्ञानेतरत्वेन[15] घटज्ञानाभावस्संभवतीति युक्तम्। अहमज्ञ[16] इति ज्ञानसामान्याभावस्य यावद्विशेषाभावस्य वा प्रतीतिरित्येवाभा-वविषयकत्ववादिनाऽङ्गीकर्तव्यत्वेन यत्किञ्चित् ज्ञानसत्वेऽपि तदसंभवात्। अन्यथा ज्ञानतोऽपि विशेषाभावसत्वेनाहमज्ञ इति प्रतीत्यापत्तेः घटज्ञानस्य[17] ज्ञाने निरूपकत्वेन घटस्यापि भानेन प्रतियोगिसत्वेन विशेषाभावस्यापि दुर्ग्राहत्वाच्च ननु ज्ञानत्वेनोपस्थितस्य घटज्ञानस्याभावग्रहे प्रतियोगिज्ञानस्य घटाद्यविषयकत्वेन न प्रतियोगिसत्वम्। न च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्याभाव[18]ज्ञानहेतुत्वेन प्रतियोगिगोचरस्य घटविषयकतानियमेन प्रतियोगिसत्वापत्तिः, सप्रकारक[19]प्रतियोगिज्ञानस्याभावधीहेतुत्वात्। अत एव तत्तद्व्यक्तित्वादिनाऽनुपस्थितस्यापि तत्तत्घटस्याभाव इह भूतले घटो नास्तीति प्रतीयत इति।

मैवम् – प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानत्वेनाजनकत्वेऽपि यत्प्रकारकस्य प्रतियोगिज्ञानस्य जनकत्वं तदवच्छिन्नानुपलब्धेरभावधीहेतुत्वात्प्रतियोगिज्ञानसत्वे

---

14 (टि) अहमज्ञ इत्यनुभवस्य ज्ञानाभावविषयकत्वं वदता वक्तव्यम्। किं ज्ञानसामान्याभावो विषयः, उत ज्ञानशविशेषाभाव इति। नाद्य इत्याह–प्रतियोगिज्ञानाज्ञानेति। प्रतियोगिनो ज्ञानस्यज्ञानाभावप्रतियोगिनो ज्ञानस्य, तस्यैव ज्ञानस्य प्रतियोगिनो ज्ञानस्य यत्ज्ञानं तस्यैव। तदभावात्ज्ञानसामान्याभावाभावात्। इदमुपलक्षणं–अभावज्ञाने प्रतियोगिज्ञानस्याहेतुत्वेऽपि प्रत्यक्षे विषयस्य कार्यसहभावेन हेतुतया ज्ञानसामान्याभावज्ञाने ज्ञानसामान्याभावस्य तादृशहेतुत्वस्यावश्याभ्युपेयतया ज्ञानसामान्याभावज्ञानस्यापि ज्ञानसामान्यान्तर्घटकतया तत्सत्वे विषयस्यैवाभावेन ज्ञानसामान्याभावो ज्ञानविषय इति वचनस्यान्धः पश्यति मूको वदतीति वचनसादृशत्वादिति। द्वितीयमादायाशङ्कते न च घटज्ञानस्येति।

15 (टि) घटज्ञानेतरत्वेनेति। तस्य घटज्ञानात्मकप्रतियोगिनो यत्ज्ञानं तस्य घटज्ञानेतरत्वेनेत्यर्थः।

16 (टि) निराकरोति–अहमज्ञ इति।

17 (टि) अभ्युपगम्यापि विशेषाभावविषयकत्वं दूषयति–घटज्ञानस्य प्रतियोगिन इति। घटज्ञानविषयकज्ञानस्यापि विषयतासंबन्धेन घटविशिष्टज्ञानविषयकत्वेन घटविषयकत्वावश्यंभावेन तस्यापि घटज्ञानाभावप्रतियोगित्वेन तत्सत्वे विषयाभावेन तद्विषयकत्वस्याप्यसंभवदित्यर्थः। अत्रापि प्रतियोगिज्ञानस्याभावबुध्यहेतुत्वेऽपि प्रतियोगितयाऽभावे घटावगाहिनो घटाभावबुद्धेरपि तत्प्रतियोगितया स्वेनैव स्वविषयापहारेणोत्पत्तुमेवानर्हत्वं बोध्यम्।

18 (टि) प्रतियोगिज्ञानस्य–घटज्ञानविषयकज्ञानस्य। घटादीति। तस्य घटादिविषयकत्वेन यत्सत्वं तन्न। केवलज्ञानत्वेनैव तस्योपस्थितत्वादित्यर्थः।

19 (टि) सप्रकारकेति। तथा च प्रकृतेऽपि ज्ञानत्वप्रकारकज्ञानरूपप्रतियागिविशेष्यकोपस्थितिसत्वे न तस्य च घटाप्रकरकत्वेन घटज्ञानत्वाभावान्न प्रतियोगिसत्वापत्तिरिति भावः।

ज्ञानत्वावच्छिन्नानुपलब्धेरभावात्[20]। अन्यथा[21] घटसत्वेऽपीह घटो नास्तीति विशेषा-भावग्रहापत्तेः। ननु ज्ञानत्वावच्छिन्नाभावो घटज्ञानत्वावच्छिन्नाभावो वा यद्यपि दुर्ग्रहस्तथाऽपि घटादिगोचरप्रत्यक्षानुमितित्वाद्यवच्छिन्नाभावो गृहीतुं शक्यते। न हि घटादिप्रत्यक्षगोचरस्मृतेरपि प्रत्यक्षत्वमस्ति। येन प्रतियोगिज्ञानसत्वेनैव प्रतियोगिसत्वमापाद्येतेति चेन्न। ज्ञानसामान्यविरोधि-त्वेन अनुभूयमानस्याज्ञानस्य विशेषाभावरूपत्वायोगात्। ननु सर्वस्यापि यत्किञ्चित् ज्ञानसत्वेन ज्ञानसामान्यविरोधित्वेनानुभवो नास्त्येव। पुरोवर्तिनं पुरुषतया न जानामीत्यत्रैव न जानामीति सामान्योक्तेरपि तात्पर्यम्। तथा च पुरोवर्तिविशेष्यकघटत्वप्रकारकज्ञानस्मृतेस्तथाविध-त्वाभावेन तदभावग्रहस्संभवतीति।

मैवम् – पुरोवर्त्यनुयोगिकपुरुषत्वप्रतियोगिकवैशिष्ट्यावगाहिज्ञानमित्यस्याः प्रतियोगिस्मृतेरपि तथाविधत्वस्यावश्यकत्वात्। नचाभावाग्रहवेलायां प्रतियोगिस्मृतेरेव प्रतियोगिभावेनाभावासंभवेऽपि कालान्तरसंबन्धिनोऽभावस्य ग्रहणे न कोऽपि दोष इति युक्तम्। वर्तमानमात्रावगाहिनि प्रत्यक्षे तस्य विषयत्वासंभवात्। न च भावरूपाज्ञानग्रहेऽप्यनुपपत्तिसाम्यम्। तस्य प्रतियोगिनिरपेक्षत्वात्। अत एव प्रतियोग्यनुल्लेखिनी मुग्धोऽस्मीत्यादिना प्रतीतिर्दृश्यते। ननु भावरूपा ज्ञानस्यापि ज्ञानाविरोधित्वे ज्ञायमानेऽपि घटे न जानामीति प्रतीत्यापत्तिः। विरोधित्वे त्वज्ञानविषयकज्ञानेनावच्छेदकतयोल्लिख्यमाने[22] कथं वर्तमानं ज्ञानमसंभवतीति चेन्न। वृत्तिज्ञानविरोधित्वस्यैवाभ्युपगमेनाज्ञानविषयकेण साक्षिणा ज्ञायमानेऽप्यज्ञानसंभवात्[23]। नचावच्छिन्नप्रकाशेऽवच्छेदकप्रकाशस्य हेतुतया हेतुभूतवृत्तिविषये कथमज्ञानसत्वमिति वाच्यम्[24]। अवच्छिन्नप्रकाशत्वेऽपि[25] साक्षिणोऽजन्यत्वेन हेत्वनपेक्षत्वात्।

अत एव भावरूपत्वेऽपि ज्ञानविरोधित्वेन भाने तस्यापि प्रतियोगिसापेक्षत्वाद्दोषसाम्यमिति परास्तम्। प्रतियोगिज्ञानजन्यज्ञानविषयत्वस्यानङ्गीकारात्। न च साक्षिणैवाभावोऽपि गृह्यतामिति युक्तं, साक्षिणो निर्विकल्पत्वेनाभावगोचरत्वायोगात्। भावरूपाज्ञानस्य

---

[20] (टि) ज्ञानत्वावच्छिन्नानुपलब्धेरभावादिति। ज्ञानत्वेन प्रतियोगिनमवगाहमानस्य प्रतियोगिज्ञानस्य ज्ञानत्वावच्छिन्नोपलंभरूपस्य सत्वादिति भावः।

[21] (टि) अन्यथा–घटज्ञानसत्वेऽपि तदभावग्रहाङ्गीकारे।

[22] (टि) अज्ञानविषयकज्ञानेनेत्यादि। घटमहं न जानामीति घटाज्ञानविषयकं यत्ज्ञानं तेनाज्ञानावच्छेदकतयोल्लिख्यमाने घटे कथं वर्तमानं घटोल्लेखसमकालिकमज्ञानं संभवतीत्यर्थः। अत्र उल्लिख्यमानेन कथं वर्तमानं ज्ञानं संभवतीत्यतिप्रामादिकम्। व्याख्यातप्रकारेणोल्लिख्यमाने कथमज्ञानं संभवतीति पाठेन भवितव्यम्।

[23] (टि) ज्ञायमानेऽप्यज्ञानसंभवादिति। तथा च साक्षिणैव घटविषयकत्वेनाज्ञानं गृह्यत इति भावः।

[24] (टि) ननु घटावच्छिन्नाज्ञानप्रकाशं प्रत्यवच्छेदकी भूतघटप्रकाशस्य हेतुत्वेन तस्य च पूर्वक्षण-वृत्तित्वेनापेक्षितस्य वृत्तिरूपस्याज्ञानविरोधिनोऽज्ञानप्रकाशसमयेऽपि सत्वावश्यंभावेन कथं तदा-ऽज्ञानसंभवः कथं वा तत्प्रकाश इत्याक्षिपति – न चेति।

[25] (टि) समाधत्तेऽवच्छिन्नेति भाने–भाननिमित्तम्। तस्यापि–भावरूपाज्ञानस्यापि। प्रतियोगिसापेक्षत्वेनेति। ज्ञानाभावरूपस्याज्ञानस्य ज्ञानात्मकप्रतियोगिसापेक्षत्वेन ज्ञानज्ञानस्यापि प्रतियोगित्वेन तत्सत्वे ज्ञानासंभवो यथा तथाभावरूपस्यापि ज्ञानविरोधिनोऽज्ञानस्य स्वज्ञाने ज्ञानविषयकज्ञानसापेक्षत्वेन तस्याप्यज्ञानविरोधित्वेन नाज्ञानसंभव इति दोषतौल्यमिति भावः। निरस्तमिति। अज्ञानप्रकाशसाक्षिणोनपेक्षत्वेन विरोधाभावेनाज्ञानस्य संभवादिति भावः। विरोधि-त्वं ज्ञानान्तरेण गृह्यते न साक्षिणेत्यर्थः।

तु साक्षिणा स्वरूपेण गृहीतस्य विरोधित्वं ज्ञानान्तरेण गृह्यत इति न कोऽपि दोष इति्। मैवम् – पुरोवर्तिविशेष्यकपुरुषत्वादिप्रकारकज्ञानाभावस्य ग्रहणोपपत्तेः। पुरोवर्तिविशेष्यकपुरुषत्वप्रकारकत्वञ्च पुरोवर्त्यनुयोगिकस्य पुरुषत्वप्रतियोगिकस्य वैशिष्ट्यस्य ज्ञानविषयत्ववैशिष्ट्यत्वाद्यनुल्लेखेन स्वरूपेणोल्लेखः[26]। पुरोवर्तिविशेष्यकं पुरुषत्वप्रकारकमिति प्रतियोगिस्मृतेर्वैशिष्ट्यगतज्ञानविषयत्ववैशिष्ट्यत्वादिविषयकत्वान्न पुरोवर्तिविशेष्यकपुरुषत्वप्रकारकत्वम्। अन्यथास्यापि स्मृतेः पुरोवर्तगोचरपुरुषत्वादि-संशयनिवर्तिकत्वापत्तेः। नचामुं पुरुषतया न जानामीत्यत्रैवमुपपत्तावप्ययं पुरुष इति न जानामीति कथमुपपद्यते। अयं पुरुष इत्यस्याहार्यस्य पुरोवर्तिविशेष्यकत्वे सति पुरुषत्वप्रकारकत्वादिति युक्तम्। अत्रानाहार्यस्य तादृशज्ञानस्याभावबोधनात्। अन्यथा[27] तवाप्याहार्यवृत्तिसत्वेन तत्राज्ञानानुपपत्तिप्रसङ्गात्। अनाहार्यवृत्तेरेव तद्विरोधित्वेन तदभावस्य बोधेऽनुपपत्त्यभावात्। यदप्युक्तं साक्षिणोऽविरोधित्वेन तेनोल्लिख्यमानेऽप्यज्ञानं संभवतीति तन्न। साक्षिगोचरेऽपि सुखादावज्ञानाननुभवे न तस्यापि तद्विरोधित्वस्यावश्यकत्वात्।

ननु न साक्षिविषयत्वकृतोऽज्ञानाभावस्सुखादे स्वत एवाज्ञानविषयत्वं नास्तीति चेन्न। सुखाद्यनुभवशून्यस्य सुखं न जानामीत्यनुभवदर्शनेन तस्याप्यज्ञानविषयत्वावश्यंभावात्, घटादेरस्मरणे साक्षिमात्रेण घटं न जानामीति व्यवहाराभावेन स्मृतिरूपवृत्तिसत्वेऽज्ञानायोगाच्च। वृत्तिमात्रस्य न निवर्तकत्वं, किन्तु तद्विशेषस्यैवेत्यभ्युपगमे तदभावस्यैव विषयत्वोपपत्तेः। अनुमितेऽपि वह्न्यादौ निवर्तकत्वाभिमतवृत्तेरभावेन[28] न जानामीति बुध्यापत्तेश्च। अभावस्यैव साक्षिविषयत्वसंभवाच्च। न च निर्विकल्पके साक्षिणि प्रतियोगिसव्यपेक्षस्याभावस्य भानमयुक्तमिति वाच्यम्। भावस्यापि ज्ञानविरोधित्वेन निरूपणे प्रतियोगिसापेक्षत्वात्। स्वरूपेण भानस्य ज्ञानान्तरेण तद्विरोधित्वभानेऽभावस्यापि तत्संभवात्। अभाव-ज्ञानत्वावच्छेदेन प्रतियोगिज्ञानस्य जनकत्वान्नाभावस्य स्वरूपेण भानं संभवतीति चेन्न। जन्याभावज्ञानस्यैव[29] तदपेक्षत्वेनाजन्येन साक्षिणाऽभावस्य स्वरूपेण ग्रहणसंभवात् ज्ञानान्तरेणापि[30] तद्विरोधित्वग्रहेऽनुपपत्तिसाम्याच्च। ज्ञानविशेषविरोधित्वग्रहे[31] तदभावस्यापि ग्रहसंभवात्। नापि न किञ्चिदवेदिषं गाढं मूढोऽहमस्वाप्समिति परामर्शानुमितः सौषुप्तिकोऽनुभवः। तदानीमेव सुषुप्तिकालीनस्याभावस्य ग्रहणेन परामर्शासिध्या

---

26 (टि) स्वरूपेणोल्लेख इति। अयञ्च प्रतियोगिनिष्ठः। तत्स्मृतिस्तु वैशिष्यट्यगतज्ञानविषयत्व-वैशिष्ट्यत्वाद्यवगाहिनी। सैवाभावज्ञाने हेतुः। तथा च न विरोध इत्याह–पुरोवर्तीति।

27 (टि) स्मृतेस्स्वरूपेण वैशिष्ट्यावगाहित्वे बाधकमाह–अन्यथेति। अयं पुरुष इति न जानामी-त्यत्रेत्यन्तानुकृतः पुरुषत्वप्रकारकाहार्यबोधः। न ज्ञानाहार्यबोधाभावो विषय इति विरोधं परिहरति–अत्रानाहार्याज्ञानस्येति। तदभावस्यैवेति। निवर्तकत्वेनाभिमतवृत्तिविशेषाभावस्यैव न जानामीत्यनुभवविषयत्वोपपत्तेरित्यर्थः।

28 (टि) वृत्तेरभावेनेति प्रात्यक्षिकवृत्तेरेवाज्ञाननिवर्तकत्वेनानुमिते न जानामीति बुध्यापत्तेरित्यर्थः।

29 (टि) जन्याभावज्ञानस्यैवेत्यत्र जन्यत्वं ज्ञाने विशेषणम्।

30 (टि) ननु ज्ञानान्तरेणाभावस्य ज्ञानविरोधित्वग्रहणं विना ज्ञानाभावग्रहणं साक्षिणा न शक्यम्। तत्ग्रहणे तु कथं ज्ञानाभाव इत्याशङ्क्य भावरूपा ज्ञानेऽपि तत्सममित्याह–ज्ञानान्तरेणापीति।

31 (टि) नन्वज्ञानं प्रात्यक्षिकवृत्तिविरुद्धमिति ग्रहे सति कुतो न भावरूपाज्ञानग्रहासंभव इत्यत आह–ज्ञानविशेषविरोधित्वग्रह इति।

सौषुप्तिकानुभवे मानाभावात्। ननु सुप्तोत्थितस्य न सुषुप्तिकालीनज्ञानाभावानुमानम्। लिङ्गाभावात्। तत्र न सुषुप्तिकालीनानुभवजन्यस्मरणाभावो लिङ्गम्। अनुभवसत्वेऽपि स्मरणाभावसंभवेन[32] तत्र तस्य लिङ्गत्वायोगात् विषयविशेषेऽनुभवस्य प्रणिधानदशायां स्मरणजनकत्वनियमेप्युपेक्षणीयगोचरस्य तस्य तथात्वनियमाभावेन तदभावसिध्यागाढं मूढ इत्यत्यन्तं ज्ञानविरहस्यानुभवविरोधात्[33]। नापि ज्ञानसामग्र्यभावो लिङ्गम्। तस्य कार्याभावानुमेयत्वेन परस्पराश्रयत्वात्।

नापीन्द्रियव्यापाराभावो लिङ्गम्। स हि किं तत्काल एवानुभूत इदानीं स्मृतोऽनुमापकः, उतेदानीमेवानुभूतः। नाद्यः। तत्काले कस्याप्यज्ञानेनेन्द्रियव्यापाराभावस्याप्यनुपस्थितेः। न द्वितीयः। तात्कालिकस्येन्द्रियव्यापाराभावस्येदानीं ज्ञापकभावेन ज्ञानासिद्धेः। नचेन्द्रियप्रसादशरीरलाघवादिकं ज्ञापकम्। तस्येन्द्रियव्यापाराभावेन सहचारानवसाया-द्व्याप्त्यसिद्धेः। न च परकीयेन्द्रियप्रसादादौ तत्ग्रहः। तत्प्रतिसन्धानशून्यस्यापि न किञ्चिदवेदिषमित्यनुभवात्। नापि मनसः पुरी तत्प्रदेशसंबन्धो लिङ्गम्। तस्यापि तात्कालिकस्य ज्ञापकाभावेन ज्ञानासिद्धेरपरिहारात्। अथ[34] परामर्शानुमितस्य सौषुप्तिकानुभवस्याभावविषयकत्वं कस्मान्न भवति। न च प्रतियोगिज्ञानविरहेण तदाऽभावज्ञानासंभवः। त्वदुक्तयैवरीत्या ज्ञानविरहे मानाभावादिति। मैवम् – मन्मतेऽज्ञानस्यैव तत्र लिङ्गत्वसंभवादिति।

मैवम् – अज्ञानस्य किं स्वसमानाधिकरणज्ञानासमानाकालीनत्वविशेषितज्ञानाभावव्याप्यता, उत ज्ञानाभावमात्रव्याप्यता। नाद्यः। सुषुप्तावेव तथाविधज्ञानाभावसंभवेन तस्येतः पूर्वमग्रहेण सहचारज्ञानाभावेन व्याप्तिग्रहासंभवात्। न द्वितीयः। ज्ञानान्तरसत्वेऽपि ज्ञानाभावसंभवेन तत्सिद्धावपि सर्वज्ञानविरहासिद्धेः। न च ज्ञानसामान्याभावेन व्याप्तिग्रह इति युक्तम्। प्रथमपक्षोक्तदोषग्रासात्। प्रागभावध्वंसप्रतियोगिनां सामान्याभावविरोधि-त्वाच्च। ननु[35] तत्तत्गोचरज्ञानस्य तत्तत्गोचराज्ञानाभावव्याप्तिग्रहे व्याप्यसमुदायेन ज्ञानाभावसमुदायोऽनुमीयत इति चेन्न। तत्तत्गोचरज्ञानाभावस्यापि प्रतियोगिज्ञानाज्ञानाभ्यां दुर्ग्रहत्वात्, तत्तत्गोचराज्ञानत्वरूप[36]व्याप्यतावच्छेदकप्रकारकोपस्थित्यभावाच्च।

---

32 (टि) स्मरणाभावसंभवेनेति। उत्बोधकासमवधान इति शेषः।

33 (टि) अनुभवविरोधादिति। उत्थानकालिकस्य गाढं मूढ इति ज्ञानस्य स्मृतिरूपत्वेन सुषुप्तौ ज्ञानसामान्याभावसिद्धिः। अनुमितिरूपत्वे तत्रापि हेतुर्वक्तव्यः। स च दुर्लभ इति भावः। अत्यन्तं ज्ञानविरहस्य गाढं मूढ इति प्रत्यभिज्ञारूपानुभवविरोधादित्यर्थः।

34 (टि) सुषुप्तावभावरूपाज्ञानवादी शङ्कते–अथेति। आक्षिपति भावाज्ञानवादी–न चेति। परस्स-माधत्ते – त्वदुयैवेति। प्रतिक्षिपत्यन्यो मैवमिति। प्रतिक्षेपयुक्तिं विघटयति मैवमिति। स्वसमाना-धिकरणेति स्वपदं ज्ञानाभावपरम्। प्रथमपक्षोक्तदोषः सहचारग्रहाभावेन व्याप्तिग्रहासंभवः। व्यतिरेकव्याप्तिग्रहसंभवादाह–प्रागभावेति।

35 (टि) प्रागभावध्वंसाभ्यामत्यन्ताभावस्याविरोधमतमवलंब्या ज्ञानसामान्याभावस्याणुमात्रेऽसंभवेन व्यतिरेकविशेषव्याप्तिमेव प्रदर्शयन्न ज्ञानेन ज्ञानाभावकूटानुमितिमांशकते–नन्विति। तद्विघटयति –नेति।

36 (टि) साक्षिणा तत्तज्ज्ञानाभावग्रहाङ्गीकारे न प्रतियोगिज्ञानापेक्षेत्यशङ्क्याह–तत्तत्गोचराज्ञानत्वेति। अज्ञानगोचरसाक्षिणो नित्यत्वेन संस्काराधानासंभवान्न स्मृत्याद्युपसंभव इति भावः।

अज्ञानस्य[37]स्वनिवर्तकत्वाभिमतज्ञानविशेषाभावव्याप्यत्वेन सुषुप्तिकाले प्रतियोगि-स्मृत्यादेर्विरहस्यासिद्धेश्च। तस्मात्सुषुप्तिकाले ज्ञानाभावासिद्धिरुभयसमाधेया। तत्सिद्धिप्रकारस्तु आदरप्रत्ययविषयस्य वस्तुविशेषादेस्तत्कालानुभव[38]जन्यस्मरणा-भावेनानुभवाभावेऽनुमिते तेन कारणान्तरसत्वसहकृतेनेन्द्रियव्यापाराभावे पारिशेष्येण निश्चिते तेनोपेक्षणीयगोचरज्ञानाभावस्यापि सिद्धिरविरुद्धेति। तस्मान्न भावरूपा ज्ञाने प्रत्यक्षं मानम्। नाप्यनुमानम्। लिङ्गाभावात्। ननु चैत्रप्रमा चैत्रगतप्रमा प्रागभावातिरिक्तानादिनिवर्तिका, प्रमात्वात्, यज्ञदत्तप्रमावदित्यनुमानं प्रमाणमिति चेन्न। चैत्रगतत्वस्यानादिविशेषणत्वे दृष्टान्तस्य साध्यवैकल्यात्[39]। प्रागभावविशेषणत्वे चैत्रभ्रमस्तदिच्छा[40] वा तत्गतभावातिरिक्तानादिनिवर्तिका इत्यादिवदप्रयोजकत्वात्। प्रमा प्राक्पदयोर्वैयर्थ्याच्च[41]। तद्विनाकृते तु साध्ये चैत्रा समवेतत्वस्योपाधित्वात्, यज्ञदत्तप्रमाया अपि तद्गताभावनिवृत्तिरूपतया निवर्तकत्वाभावेन साध्याप्रसिद्धेश्च। न च निवृत्तिरित्येव साधनीयम्। ज्ञानस्य त्वदभिमतमलनिवृत्तिरूपत्वाभावेन बाधात्, ज्ञानस्य मलनिवर्तकत्वे एकदैव सर्वमुक्तिप्रसङ्गाच्च।

अनादिगतशक्तिनिवर्तिकेति साध्ये दृष्टान्तस्य साध्यवैकल्यात्[42], चैत्रप्रमा चैत्रगत-स्याभावातिरिक्तानादेर्न निवर्तिकेति प्रत्यनुमानप्रतिहतत्वाच्च। न च प्रतियोग्यप्रसिद्धिः। प्रतियोग्युपस्थितिमात्रस्यैवाभावबोधहेतुत्वात्[43] तदभावातिरिक्तेति विशेषणाद्वा। न च भ्रमस्सोपादानः भावकार्यत्वादित्युपादानसिद्धौ परिशेषादविद्यासिद्धिः। बुद्धेरेव तदुपादानत्वसंभवेन पारिशेष्यासिद्धेः, त्वया मलस्योपादानत्वेनानाङ्गीकाराच्च। ननु बद्धमुक्तविभागान्यधानुपपत्त्या मलसिद्धिः। तथाहि – मुक्तस्य बन्धावस्थायामनुवर्तमानेन केनचिद्विमुक्ततया मुक्तत्वव्यपदेशः। तत्र च न देहविमोकः कारणम्। तस्य मरणदशायां प्रळये च सत्वात्। अत एव ज्ञानादिविमोकस्यापि तत्र कारणता व्युदस्ता। वृत्तिज्ञानस्य प्रळयेऽपि विनाशात् चिच्छक्तिरूपज्ञानस्य मुक्तावप्यनपायात्। न च धर्माध-

---

37 (टि) तत्तदज्ञानविषयकत्वविशिष्टसाक्षिणोऽनित्यत्वेन तत्तदज्ञानत्वप्रकारकस्मृतिं संभवमाशङ्क्याह – अज्ञानस्येति। ज्ञानविशेषेति प्रात्यक्षिकज्ञानेत्यर्थः। तथा चाज्ञानाविरुद्धस्मृतिसत्वे बाधकाभावेन तद्विरहासिद्धिरिति भावः।

38 (टि) तत्कालानुभवेति–सुषुप्तिकालानुभवेत्यर्थः। निश्चित इति। सुषुप्तिरिन्द्रियव्यापाराभाववती, इन्द्रियेतर यावत्कारणसत्वेऽप्यनुभवाभावादित्यनुमानेन निश्चित इत्यर्थः।

39 (टि) साध्यवैकल्यादिति। यज्ञदत्तप्रमायाश्चैत्रगतानाद्यनिवर्तकत्वादिति भावः।

40 (टि) प्रागभावविशेषणत्वे तु पक्षसपक्षवृत्तितत्तदज्ञानयोस्तदतिरित्वेन तत्तत्प्रमयोस्तत्तन्निवर्तकत्वं संभवतीति पूर्वोक्तदोषाभावेन दोषान्तरमाह–चैत्रभ्रम इति। इत्यादिवत्–इत्यादाविव।

41 (टि) प्रमायाः प्रागभावनिवर्तकत्वमभ्युपेत्याह–ज्ञानस्य मलनिवर्तकत्व इति।

42 (टि) साध्यवैकल्यादिति। तत्र साध्यस्योभयासंप्रतिपन्नत्वादिति भावः। प्रतियोग्यप्रसिद्धिः विशिष्टनिवर्तकत्वरूपप्रतियोग्यप्रसिद्धिः।

43 (टि) उपस्थितिमात्रस्यैवेति। न तु वस्तुसत्वस्यापीत्यर्थः। तदभावातिरिक्तेति। स्वभावातिरिक्तेत्यर्थः। तथा च प्रमाविशेषः पक्षः। तदाभावातिरिक्तप्रमान्तरप्रागभावनिवर्तकत्वस्य प्रमान्तरे प्रसिद्धिरिति भावः। तदभावातिरिक्तसामान्यनिवर्तकत्वसाधनात् भावरूपस्वसमानविषयकाज्ञाननिवर्तकत्वमपि सिध्यति। तादृशाज्ञानानङ्गीकारादिति हृदयम्।

र्मविमोकस्तद्धेतुः। तयोर्बुद्धिगतत्वव्यवस्थापनेन संसारदशायामपि तद्व्यवहारापत्तेः। न च तत्तत्गतभोगजनककर्मविगमेन तद्व्यपदेशः, जनकत्वस्य फलोपधानरूपत्वे प्रळयेऽपि तदापत्तेः। स्वरूपयोग्यतारूपत्वे इदानीं मुक्तेऽपि तद्व्यपदेशानापत्तेः, परकृतस्यापि कर्मण-स्तत्स्वरूपयोग्यत्वात्। न च तत्तत्कृतत्वेन तत्तत्भोगजननयोग्यता। लाघवेन कर्मत्वस्यैव तज्जनकतावच्छेदकत्वात्। अन्यकृतेन कर्मणाऽन्यस्य भोगप्रसक्तेर्नियत्यैव परिहारात्।अत एव भ्रान्तिवासनाविमोकस्यापि तद्धेतुत्वं प्रत्याख्यातम्। तस्या अपि बुद्धिगतत्वेन संसारदशायामपि मुक्तव्यपदेशप्रसङ्गात्।

नापि मायाविमोकस्तद्धेतुः। तत्तत्पुरुषमुक्तावपि साधारणप्रपञ्चोत्पादनायेतरभोग्यप्रपञ्चो-त्पादनाय च तत्सत्वस्यावश्यकत्वात्। नापि मायापुरुषयोर्भोक्तृभोग्यभावविच्छेदः। तस्य प्रळयादावपि सत्वात्। स्वरूपयोग्यता तदाऽप्यस्तीति चेन्न। तर्हि मुक्तावपि तद्व्यपदेशो न स्यात्, तस्यास्तदाऽपि सत्वात्। तस्मादनादेरनवच्छिन्नानन्दानुभवावारकस्य मलस्यापगमेनैव विमुक्तत्वव्यपदेशो वाच्य इति मलोऽभ्युपेय इति। मैवम् – त्वन्मते मलस्यैकत्वेन देवदत्तादिमुक्तिदशायां तदपगमस्याप्यभावात्। तत्तदावारकशक्तेरपगमोऽस्तीति चेत्, तर्हि क्लृप्तमायागततत्तदसाधारणप्रप/ोत्पादनशक्तिविगमेनैव तद्व्यपदेशोऽस्तु, अलं वस्त्वन्तरं कल्पयित्वा तद्गतशक्त्यपगमकल्पनेनापि। नाप्यानन्दाप्रकाशान्यथानुपपत्त्या तत्सिद्धिः। आनन्दस्यासत्वादेवाप्रकाशोपपत्तेः। मोक्षेऽप्यानन्दसद्भावे मानाभावात्, सत्वेऽपि वा तदैवोत्पत्तिसम्भवाच्च। न चैवं तस्य विनाशे पुनस्संसारितापत्तिः, मोक्षनित्यताग्राहकप्रमाणेन विनाशित्वाभावसिद्धेः। अविनाशित्वेनैवोत्पत्त्यभावोऽवसीयत इति चेन्न। मोक्षे व्यभिचारात्। तदतिरिक्तत्वेन विशेषणेऽप्रयोजकत्वात् अप्रकाशस्य दुर्वचत्वाच्च।

तथाहि – अप्रकाशो नाम किं स्वरूपप्रकाशविरहः, किं वा स्वरूपप्रकाश-स्यावस्थान्तरं, उत तस्य विषयसंबन्धविश्लेषः, किं वा तस्य तमस्संबन्धः, अथवा तद्विषयकवृत्तिप्रकाशविच्छेदः, उत वृत्तिप्रकाशहेत्विन्द्रियसंबन्धविच्छेदः, अथवा नास्ति न प्रकाशत इति व्यवहारः, उतैतेभ्योऽन्यः कश्चिदिति। नाद्यः – स्वरूपप्रकाशस्य नित्यत्वेन संसारदशायामपि तद्विरहासम्भवात्, स्वरूपप्रकाशाच्छादकत्वे नाभिमतस्य तद्विरहहेतुत्वाभावाच्च। न द्वितीयः – स्वरूपप्रकाशस्यापरिणामित्वे नावस्थाया अयोगात् योगे वा तस्य द्रव्यजन्यत्वे मानाभावात्। न तृतीयः – स्वरूपसंबन्धस्य तादात्म्यस्य वा विघटनासंभवात्, संयोगस्य चानभ्युपगमात्। न चतुर्थः – तस्यैव साध्यत्वेन साध्याविशेषात्। न पञ्चमः – मुक्तावपि तदप्रकाशापत्तेः, संसारदशायामपि आनुमानिकशाब्दादिवृत्तिसत्वाच्च। न षष्ठः – आनन्दस्येन्द्रियाग्राह्यत्वात्, ग्राह्यत्वे वा मुक्तावप्यप्रकाशापत्तेः। न सप्तमः – आनन्दे तत्प्रकाशे च विद्यमाने नास्ति न प्रकाशत इति व्यवहारस्यैवायोगात्। एवंविधाभिलापाभावे संसारदशायामप्यप्रकाशाभावप्रसङ्गाच्च। नास्ति न प्रकाशत इत्येवं रूपज्ञानस्यैव तद्व्यवहारहेतुत्वेन तेन द्रव्यकल्पनानुपपत्तेश्च। न च प्रकाशमान आनन्दे तथाविधाप्रकाशस्यैवायोगेन तत्प्रकाशलोपाय द्रव्यकल्पनं युक्तमिति वाच्यम्। स्वरूपप्रकाशलोपासंभवस्योक्तत्वात्। नाष्टमः – तस्य स्वरूपप्रकाशविरोधि-त्वे प्रकाशस्यानित्यत्वप्रसङ्गात्, अविरोधित्वेऽप्रकाशपदस्य तत्र पारिभाषिकत्वापत्तेः।

तस्मादानन्दाप्रकाशान्यथानुपपत्त्याऽपि न तत्सिद्धिः।

अत एव चिच्छक्त्या कृत्स्नप्रकाशप्रसङ्गेन तदप्रकाशायावरणसिद्धिरिति परास्तम्। तस्मान्नावरणसद्भावे मानम्। अस्ति तु तदभावे मानम्। आत्मप्रकाशो न तमसावृतः, प्रकाशत्वादालोकवत्। किञ्च मलस्स्वाभाविको वा आगन्तुको वा। नाद्यः, परिमाणादिवदनिवृत्तिप्रसंगात्। न द्वितीयः। तत्पूर्वमप्रकाशाभावप्रसङ्गात्, आगन्तुकस्याच्छादकत्वे मोहादेरेव तदुपपत्तेश्च। न च मोहादिजनकत्वेनैव तत्सिद्धिः, दोषादिनैव तदुपपत्तेः। किञ्च व्यापकेन मलेनेश्वरस्यापि संबन्धादावृतप्रकाशतापत्तिः, अजन्यसंयोगस्य तत्रापि सत्वात्। न च तत्र मानाभावः। शिवो मलेन संयुज्यते आत्मत्वात्पशुवदिति मानस्य सुवचत्वात्। अजन्यविभागापत्तिभयेन तत्र संयोगानङ्गीकारे पशुष्वपि तदनुपपत्तिसाम्यात्, जडस्य मलस्य प्रकाशं प्रत्याच्छादकत्वायोगाच्च। तस्मान्मलाभ्युपगम एव मलिन इति उच्यते। संसारदशायामानन्दो नास्ति न प्रकाशत इति व्यवहारस्तावत्सर्वजनसिद्धः। स च नानन्दाभावप्रयुक्तः, मोक्षदशायामपि तदभावप्रसङ्गात्। न चेष्टापत्तिः। तदा तत्सद्भावस्याष्टमसूत्रे व्यवस्थापयिष्यमाणत्वात्। न च तदैव तस्योत्पत्तिर्युक्ता उत्पत्तिमत्भावत्वेन विनाशित्वप्रसङ्गात्। न च मोक्षे व्यभिचारः। तस्यानन्दरूपत्वे पक्षत्वेन व्यभिचारायोगात्। पाशविनाशरूपत्वे भावत्वेनैव व्यवच्छेदात्। नचाप्रयोजकत्वम्। विनाशित्वे घटत्वादेरननुगतत्वेनोत्पत्तिमत्भावत्वस्यैवावच्छेदकत्वात्। अत आनन्दाप्रकाशप्रयुक्त एव सोऽभ्युपेयः। अप्रकाशश्चावरणाभावविशिष्टचिच्छक्त्यभावः। तद्धेतुत्वञ्च विशेषणाभावरूपस्यावरणस्य तत्प्रयोजकत्वम्। नचावरणसिद्धेर्पूर्वं तदभाव-विशिष्टचिच्छक्त्यभावरूपोऽप्रकाशो न सिद्ध इति वाच्यम्।

नास्ति न प्रकाशत इति व्यवहारेण सामान्यतोऽनुमितस्याप्रकाशस्य विशिष्याभाव-मात्ररूपत्वासंभवेन विशिष्टाभावत्वनिश्चये तत्प्रयोजकतया विशेषणाभावरूपावरण-कल्पनोपपत्तेः। एवञ्च स्वरूपप्रकाशविरोधित्वाविरोधित्वाभ्यां सामान्यतः खण्डनमपि परास्तम्। विशेष्याविरोधित्वेऽपि विशिष्टविरोधस्य सद्भावात्। एवं बद्धमुक्तव्यवस्थान्यथानुपपत्त्याऽपि तत्सिद्धिरविरुद्धा। न च मायागत तत्तदसाधारण-प्रपञ्चोत्पादनशक्तिविगमेन मुक्तत्वोपपत्तिः। मायाया एव प्रपञ्चसूक्ष्मावस्थारूपतया शक्तित्वेन तद्विनाशानुपपत्तेः। प्रत्यनुमानमप्याणवान्धकारानुगततमस्त्वाभावादनुपपन्नम्। नचान्धकारानावृतत्वमेव साध्यं, सिद्धसाधनात्। नाप्यनावृतत्वमात्रं, घटान्तर्वर्तिदीपादिना व्यभिचारात्। यदप्यागन्तुकत्वस्वाभाविकत्वाभ्यां विकल्प्य दूषणमुक्तं तदपि स्वा-भाविकत्वाङ्गीकारेण निरस्तम्। न च स्वाभाविकत्वे अविनाशित्वम्। अस्यानुमानरूपत्वे[44]

[44] (टि) अनुमानरूपत्व इति। मलोऽविनाशी, स्वाभाविकत्वादात्मवदित्यनुमाने भवान्प्रष्टव्यः। किं मलोऽभ्युपगतो भवता नेति। आद्ये बद्धमुक्तव्यवस्थार्थमेव तस्याभ्युपगन्तव्यतया तत्ग्राहकप्रमाणे-नैव स स्वाभाविकोऽपि विनाश्येव सिध्यतीति बाधः। द्वितीये तु मलस्यैव त्वन्मतेऽभावेनाश्रया-सिद्धिः। न च मन्मतमवलंब्यानुमातुं भवता शक्यम्। तर्हि मन्मतरीत्या बाधोऽपि भवताऽगीकार्य एव। यदि मलस्स्वाभाविकस्स्यात्तर्ह्यविनाशी स्यादिति तर्करूपत्वे तु धर्मिग्राहकप्रमाणविरोधेन विनाशित्वरूपविपर्यय एव पर्यवस्यतीत्यर्थः।

तर्करूपत्वे चाश्रयासिद्धिबाधविपर्ययपर्यवसानादिग्रस्तत्वात्। यदप्युक्तं शिवस्यापि मलसंयोगादावृतप्रकाशतापत्तिरिति, तदपि तस्य मलसंयोगे प्रमाणाभावादयुक्तम्। आत्मत्वेन मलसंयोगानुमानस्य निगमागमधर्मिग्राहकानुमानैर्बाधितत्वात्, अप्रयोजकत्वाच्च। अणोऽस्तु मलसंयोगानुमाने आनन्दाप्रकाशानुपपत्यादेर्विपक्षे बाधकस्य सत्भावात्। यच्चोक्तं जडस्याजडाच्छादकत्वं न युज्यत इति तदप्याच्छादकनिवृत्तावेव मोक्षोदयादजडस्य च निवृत्त्ययोगाज्जडस्यैवाच्छादकत्वावश्यंभावेन निरस्तम्। तदुक्तं **श्रीमत्पौष्करे** –

किञ्चाजडं[45] जडेनैव बाध्यते नाजडेन तु।
सजातीयत्वतो हेतोर्नाणूनामीश्वरो यथा।।
किञ्चाजडं जडन्नो चेत् बाध्यन्तत्केन बाध्यते।
अजडं वा जडं वाऽपि द्वयं वस्तुविनिश्चितम्।।
आत्मानात्मान्तरात् बाध्यो विनाशात्बाधकात्मनः।
तन्नाशमन्तरा यस्मात्मुक्तिर्न स्याच्चिदात्मनः।।
जडेनैवाजडं तस्मात्बाध्यमभ्युपगम्यताम्। इति।

बाधकात्मनः – **बाधकस्यात्मनः**, विनाशात् – **विनाशप्रसङ्गादित्यर्थः।** बाध कत्वे कथमात्मनो विनाशप्रसङ्ग इत्याशङ्क्याह – **तन्नाशमन्तरेति।** अस्य च मलस्य लाघवादेकत्वम्। एकत्वेऽपि तत्तदावारकशक्तिविगमेन तत्तन्मुक्तिव्यवस्था। नन्वियं व्यवस्था तदा स्यात्, यदि शक्तिः प्रमाणसिद्धा स्यात्। तस्यां तु प्रमाणं नास्ति। तथाहि – न ताव-द्वह्निसंयुक्तेऽप्यङ्गुल्यादौ सति प्रतिबन्धके मन्त्रादौ स्फोटानुदयान्यथानुपपत्तिस्तत्र मानम्। मन्त्राद्यभावस्य कारणत्वेन तदभावेनैव स्फोटानुत्पत्त्युपपत्तेः। नचाभावस्याभावत्वादेव न कारणत्वमिति वाच्यम्। अन्वयव्यतिरेकयोस्सत्वेन तस्यापि कारणत्वाविरोधात्। त्वयाऽपि प्रतिबन्धकाभावस्य शक्तौ तदुद्भवे वा कारणत्वस्याङ्गीकारात्। अन्यथा प्रतिबन्धकेन नष्टायामभिभूतायां वा शक्तौ तद्विगमेऽपि कार्यानुदयापत्तेः। न च सत्यपि प्रतिबन्धके मन्त्रे उत्तेजकसमवधाने कार्योदयो न स्यात् प्रतिबन्धकाभावस्याभावादिति वाच्यम्। तवापि तत्र शक्त्युद्भवानापत्तेः। प्रतिबन्धकाभावस्य तद्धेतोरभावात्। उत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्य तद्धेतुत्वे ममापि तस्य स्फोटहेतुत्वोपपत्तेः। उत्तेजकाभावमण्योर्विशिष्टशब्दव्यपदेश्ययोरभाव उत्तेजकमण्यभावरूपत्वेनानुगतः कथं कार्यहेतुः। शक्त्युद्भवे तु मन्मते एकशाक्तिमत्वेनानुगततया हेतुत्वमुपपद्यत इति चेन्न। विशेषणावच्छिन्नप्रतियोगिकस्य विशिष्टाभावस्यानुगतत्वेन हेतुत्वोपपत्तेः। न च तत्र मानाभावः। अनुगतविशिष्टाभावव्यवहारस्यैकशक्तिमत्वेनानुगतेनाभा-वद्वयेनैवोपपत्तेरिति युक्तम्।

शक्तेरतीन्द्रियतया तत् ज्ञानाभावेऽप्यनुगतव्यवहारात्। अनुगतव्यवहारस्यानुगतार्थ-ज्ञानसाध्यत्वात्। नापि प्रतिबन्धकत्वान्यथानुपपत्तिस्तत्र मानम्। कार्यानुत्पत्तिहेतुत्वेन प्रतिबन्धकत्वोपपत्तेः। अनुत्पत्तेः प्रागभावरूपतयोत्पत्त्यभावेऽपि तस्मिन् सति सत्वरूपस्य तज्जन्यत्वस्याविरोधात्, कार्यानुकूलस्वभावविघटनार्थतया मण्यादेः प्रतिबन्धस्य स्वार्थिकेन

[45] (टि) किञ्चाजडमिति–जडन्नो चेत्, बाध्य–आच्छादनीयं तदजडं, केन बाध्यते – आच्छाद्यते। अजडान्तरस्याजडान्तराच्छादकत्वायोगादित्यर्थः।

प्रत्ययेन[46] प्रतिबन्धकपदव्यपदेश्यत्वोपपत्तेश्च। नापि तृणारणिमणीषु वह्निजनकतावच्छेदकत्वेन तत्सिद्धिः। तेषां विजातीयवह्निजनकत्वस्यावश्यकत्वात्। अनुगतया हेतुत्वे[47] विषकलितसमवधानेऽपि कार्योत्पत्त्यापत्तेः। नापि कारणव्यपदेशान्यथानुपपत्तिस्तत्र मानम्। अनन्यथासिद्धनियतपूर्ववर्तित्वादिना तद्व्यपदेशोपपत्तेः। तवापि रासभादिव्यावृत्तशक्तिग्रहे[48] तस्यैवोपायत्वात्। तस्मान्न शक्तौ मानमस्तीति। अत्र प्रतिविधीयते – अस्ति तावन्मण्यादौ प्रतिबन्धकत्वव्यपदेशः, स न कार्यानुत्पत्तिहेतुत्वनिबन्धनः, दण्डाद्यभावेऽपि[49] तद्व्यपदेशापत्तेः। नापि भावत्वविशिष्टतन्निबन्धनः। कार्यानुत्पत्तिहेतुत्वस्याविशेषे भावाभावत्ववैषम्यमात्रेण तद्व्यपदेशाव्यपदेशयोरयुक्तत्वात् बीजगते दीपोपरिनयनध्वंसे[50] विशेषादर्शनादौ च तद्व्यपदेशानुपपत्तिप्रसङ्गाच्च। नापि कार्यानुकूलाभावप्रतियोगित्वनिबन्धनः। दण्डाद्यभावेऽपि तद्व्यपदेशापत्तेः। नचाभावशब्दो मुख्याभावपरः[51]। दीपोपरिनयनध्वंसे विशेषादर्शनादौ च तदनुपपत्तिप्रसङ्गस्योक्तत्वात्। नापि कार्यहेतुविघटकत्वनिबन्धनः। मण्यादौ तदभावात्, दण्डादिनाशकेऽपि तत्सत्वाच्च। अत एव मण्यादेः प्रतिबन्धत्वमेवेत्यपि परास्तम्। तद्व्यपदेशहेतोरप्यनुपन्यासात्। तस्मात्कारणगतकार्यानुकूलधर्मविघटकत्वं वा प्रतिबन्धकत्वमित्येवोपेयमिति शक्तिसिद्धिः। एवं सति प्रतिबन्धके कार्यानुदयोऽपि तत्र मानम्। विशेषणाभावज्ञानेन[52] विशेष्याभावज्ञानेन चैकशक्तिमत्त्वेनानुगतेन

---

[46] (टि) स्वार्थिकेन प्रत्ययेनेति। प्रतिबध्नाति विघटयतीत्यत्र प्रतिबन्धशब्दात् स्वार्थेकप्रत्यय इति भावः ।

[47] (टि) अनुगततयाऽहेतुत्व इति। अनुगतशक्तेऽद्याप्यसिद्धत्वादिति भावः।

[48] (टि) रासभादिव्यावृत्तशक्तिग्रहे – तद्व्यावृत्तदण्डादिनिष्ठघटजननानुकूलशक्तिग्रहे। तस्यैव – अन्यथासिद्धत्वादेरेव।

[49] (टि) दण्डाद्यभावेऽपीति। तस्यापि घटाद्यनुत्पत्तिहेतुत्वादिति भावः।

[50] (टि) बीजगते दीपोपरिनयनध्वंस इति। अप्रसिद्धोऽयं पदार्थस्तथाऽपि यथामति व्याख्यायते। नेत्ररोगविशेषोऽयम्। यथा बृहन्मूषिकादीनां दीपसन्निधावान्ध्यम्। स च दीपप्रभया नेत्रशक्तिप्रतिबन्ध ो भवितुमर्हति। नयनशक्त्युपघातरूपस्य तस्य ध्वंसत्वेन तस्य दर्शनप्रतिबन्धकत्वेन च बीजगते शक्तिगते दीपोपरिदीपारोपणोपरिनयनध्वंस इति स एवोक्त इति प्रतिभाति। तस्य भावत्वाभावेन तत्र प्रतिबन्धकत्वव्यपदेशानुपपत्तिप्रसङ्ग इति। विशेषादर्शनादौ च संशयोत्तरप्रत्यक्षं प्रतिविशेषदर्शनस्य हेतुत्वं केचिदिच्छन्ति। केचित्तु सशंयसामग्र्याः प्रतिबन्धकत्वम्। तत्र विशेषदर्शनाभावस्यापि सशंयसामग्रीनिविष्टत्वेन प्रतिबन्धकत्वमित्यभिप्रायः।

[51] (टि) मुख्याभावपर इति। दण्डाभावाभावस्य दण्डस्य भावरूपाभावत्वेन मुख्याभावत्वाभावान्न तत्रातिप्रसक्तिरिति भावः। उक्त्वादिति। ध्वंसस्य ध्वंसाभावेन विशेषदर्शनस्य भावत्वेन च ध्वंसविशेषादर्शनयोरव्याप्तिरित्यर्थः।

[52] (टि) ननु प्रतिबन्धकाभावविशिष्टवह्नेरेव दाहजनकत्वं, न तु शक्तिविशिष्टस्य। तथा च तादृशवह्न्यभावादेव कार्यानुदये कथं स शक्तेस्साधक इत्याशंकां विशिष्टाभावस्यैवाभावेन – नियमाशङ्का संभाव्यत इति निराकरोति – विशेषणाभावेत्यादिना। न चात्र विशिष्टाभावो वर्तत इति व्यवहारस्तत्र मानम्। विशेषणाभावज्ञानविशेष्याभावज्ञानयोरेव तादृशव्यवहारकारणत्वात्। न च सर्वत्रानुगतेनैकेनैव तादृशव्यवहारोपपत्तौ न तयोः कारणत्वसंभवः। अन्यतरत्वेनानुगमेऽपि कारणावच्छेदकगौरवमिति वाच्यम्। एकशक्तिमत्वेनैव तयोरनुगमसंभवात्। न च शक्तेरद्याप्यसिद्धत्वान्नतयाऽनुगम इति वाच्यम्। व्यतिररिक्तविशिष्टाभावकल्पनापेक्षया क्लृप्तयोरेवैकशक्तिकल्पने लाघवेनापि शक्तिसिद्धेरिति भावः।

विशिष्टाभावव्यवहारसंभवेनानुगते विशिष्टाभावे मानाभावान्न तदभावेनान्यथासिद्धिः। अभावस्य हेतुत्वे कारणाभावादेव कार्यानुदयेनात्र कारणव्यतिरेकात्कार्यव्यतिरेकः। किन्तु प्रतिबन्धकवशादिति सर्वलोकव्यवहारोच्छेदप्रसङ्गाच्च। कारणत्वव्यपदेशोऽपि शक्तिमत्वनिबन्धनः। अनन्यथासिद्धनियतपूर्ववर्तित्वादेः पूतिकूश्माण्डायमानत्वेन[53] निबन्ध-नत्वायोगात्। तस्मादवश्यं शक्तिरभ्युपगन्तव्या। तदुक्तं **श्रीमत्पौष्करे** –

प्रथमं स्फोटकृद्वह्निस्सहसाऽङ्गुलिसङ्गमे[54]।
स एव मन्त्रसामर्थ्यात् स्फोटोत्पादाय नेष्यते।।
निवार्यमाणस्स्फोटोऽयं कारणान्तरकल्पकः।
यत्तत्र कारणं शक्तिर्गृह्यतां वह्निमन्तरा।।
मन्त्राभावविशिष्टोऽग्निर्हेतुश्चेत् स्फोटजन्मनि।
पृथङ्मन्त्रप्रयोगेऽपि नैव जायेत सोऽङ्गुळेः[55]।। इति।

कारणान्तरस्य स्वाभावद्वारा स्फोटाभावप्रयोजकस्य कल्पक इत्यर्थः। पृथङ्मन्त्रप्रयोगेऽपि उत्तम्भकमन्त्रप्रयोगेऽपीत्यर्थः। अयमात्मा विभुः। नन्वात्मनो विभुत्वे किं मानम्। न तावदात्मा विभु अणुमध्यमपरिमाणशून्यत्वे सति द्रव्यत्वात्, परशिववदित्यनुमानं मानम्। विशेषणासिद्धत्वात्। अणुपरिमाण आत्मागत्युत्क्रान्त्यादिश्रवणात्। न च मध्यमपरिमाणत्वेनापि गत्याद्युपपत्तिः। तथात्वे घटादिवदनित्यत्वप्रसङ्गात्। नचाणुत्वे शरीरव्यापकसुखाद्यनुपपत्तिः, गुणस्य गुणिनं विहाय वर्तनासंभवादिति वाच्यम्। गुणिसंबन्धपरित्यागस्य मयाऽप्यनङ्गीकारात्। गुणिदेशाधिकदेशत्वस्य च प्रदीपप्रभादाविव केतकीगन्धादाविव च सुखादावप्यविरोधात्। न च प्रदीपप्रभादेरपि द्रव्यत्वमेवेति वाच्यम्। रूपस्यैव प्रभात्वोपपत्तौ द्रव्यत्वे मानाभावात्। प्रत्युत द्रव्यत्वाङ्गीकारे तत्रानुद्भूतस्पर्शादेः कल्पनीयत्वेन गौरवात्।

मन्मते तु प्रदीपगतोद्भूतस्पर्शेनैव प्रभाख्यस्य रूपस्यौष्ण्यसामानाधिकरण्यनिर्वाहात्। न चैवं तेजस्संबन्धस्य विषयग्रहसहकारिणोऽसंभवात् प्रदीपप्रभास्थो घटादिश्चक्षुषा न गृह्येतेति वाच्यम्। तेजोरूपसामीप्यस्य विषयग्रहसहकारिणस्तत्रापि भावात्। न च सौरालोकादिना विषयग्रहे तेजस्संयोगः, प्रदीपप्रभादिना तत्ग्रहे तेजोरूपसामीप्यं[56] सहकारीत्यननुगमः। सर्वत्र तद्रूपसामीप्यस्य सहकारित्वोपपत्तेः। एवं केतकीकुसुमादावप्यनुभूयमानो गन्धो विप्रकृष्टकेतकीगत एव। सन्निकृष्टप्रदेशे तत्परागाणामागमनकल्पने प्रमाणा-भावात्। तस्मादाश्रयस्याणुदेशत्वेऽपि तत्गुणस्य सुखादेश्शरीरव्यापकत्वं युज्यते। न चाणुत्वेऽनुपपत्तिपरिहारेऽपि तत्र मानाभावः। आत्मा अणुः मध्यमपरिमाणशून्यत्वे सति गतिमत्वात्परमाणुवदित्यस्य मानत्वात्। न च गत्यादिश्रवणस्योपाधि-गत्यादिनाऽप्युपपत्तेस्स्वरूपासिद्धिरिति[57] वाच्यम्। स्वाभाविकार्थत्वस्यौत्सर्गिकत्वेनौपाधि-

---

53 (टि) पूतिकूश्माण्डायमानत्वादिति। अनुगतस्यानन्यथासिद्धत्वस्यासंभवादिति भावः।

54 (टि) अङ्गुळिसङ्गमे सति सहसा स्फोटकृदित्यन्वयः। अङ्गुलाविति शेषः।

55 (टि) सोङ्गुळेः – अङ्गुळेस्स्फोट इत्यर्थः।

56 (टि) रूपसामीप्यस्य – रूपाधिकरणदेशवृत्तित्वस्य।

57 (टि) गत्यादीत्यादिनोत्क्रान्त्यादिपरिग्रहः। उपाधिगत्यादिना – प्राणादिगत्यादिना।

कार्थत्वायोगात्[58]। विभुत्वस्याद्याप्यसिद्धेरपवादकाभावात्। न च देशान्तरेऽप्युपभोगयोग्यस्य चन्दनादेर्निष्पत्तिरदृष्टायत्ता। न च देशान्तरेण साक्षाद्दृष्टस्य संबन्धोऽस्तीत्याश्रयद्वारक-संबन्धस्या[59]भ्युपगन्तव्यत्वेन विभुत्वसिध्याऽपवादकमस्तीति वाच्यम्।

गुणस्य गुणिप्रदेशाधिकप्रदेशत्वसंभवस्य स्थापितत्वेनादृष्टस्य साक्षात्संबन्धोपपत्तेः[60] तत्तत्भोगानुकूलतया[61] विहितकर्मजन्यत्वमात्रेण तत्तज्जनकत्वोपपत्तौ तद्देशसंबन्ध-स्यानपेक्षितत्वाच्च। तस्मादणुपरिमाण एवात्मा। अथवाऽस्तु मध्यमपरिमाणः, तेन गत्यादि-श्रवणं सुखादेश्शरीरादिव्यापकत्वञ्च युक्तम्। न च मध्यमपरिमाणवत्वेऽनित्यत्वप्रसङ्गः। मध्यमपरिमाणत्वं नित्यवृत्ति अणुविभुमध्यविभागे विभाजकोपाधित्वात्। अणुत्वादिवदिति मध्यमपरिमाणस्यापि नित्यवृत्तित्वसत्भावेन मध्यमपरिमाणस्यानित्यत्वव्याप्त्यभावात्। न च मध्यमपरिमाणत्वे सर्वांगीणसुखाद्यनुरोधेन शरीरतुल्यपरिमाणत्वं वक्तव्यम्। तथा च मशकमातङ्गादिशरीरपरिग्रहे परिमाणभेदेनात्मभेदस्स्यादिति वाच्यम्। एकस्यैव परिमाणस्य जलूकादिपरिमाणस्यैव संकोचविकासवत्तया शरीरद्वयपरिमाणतुल्यत्वोपपत्तेः। तस्मादणुत्वं मध्यमपरिमाणत्वं वाऽत्मनः न विभुत्वमिति।

अत्राभिधीयते – न तावदात्मनोऽणुत्वं संभवति। तत्गुणस्य सुखादेस्सर्वांगीणता दर्शनात्। गुणस्य च गुणिप्रदेशाधिकप्रदेशवृत्तित्वाभावात्। न च केतकीगन्धदीपप्रभादिना व्यभिचारः[62]। प्रभाया गुणत्वस्वैवाभावात्। गन्धस्य तु गुणत्वेऽपि परागाश्रितस्यैवानुभूयमानतया गुणिप्रदेशमात्रवृत्तित्वात्। तथाहि – प्रदीपप्रभा न गुणः। चलनादिमत्वात्। न च घटरूपादाविवाश्रयचलनेन चलनप्रतीतिमात्रमित्यसिद्धो[63] हेतुरिति युक्तम्। आश्रयचलनाभावेऽप्यावारकस्य वस्तुनोऽपगमे[64] चलनप्रतीतेः। आश्रयचलनं विना देशाद्देशान्तरप्राप्तेश्चलनसाध्यत्वेन प्रभादेर्देशान्तरप्राप्तये चलनस्यावश्यकत्वाच्च। दीपासंयुक्तेन[65] चक्षुषा प्रभाया अग्रहप्रसङ्गाच्च। सन्निकर्षस्य संयुक्तसमवायस्याभावात्,

---

[58] (टि) औत्सर्गिकत्वेनेति। चन्द्रमसमेव ते सर्वे गच्छन्ति, तमुत्क्रामन्तं, पुनरैत्यस्मै लोकायेत्यादि-श्रुतेरिति शेषः।

[59] (टि) आश्रयद्वारकसंबन्धः – स्वाश्रयात्मसंयोगः।

[60] (टि) साक्षात्संबन्धोपपत्तेरिति। ज्ञानवददृष्टस्यापि गुण्याधिकदेशत्वसंभवादिति शेषः।

[61] (टि) ननु यत्र सर्वांगीणसुखाद्युपलब्ध्यादिकमस्ति प्रमाणं तत्र ज्ञानप्रभादिषु तत्त्वाङ्गीकारसंभवेऽपि नादृष्टादिषु तत्त्वमङ्गीकर्तुं युक्तम्। अन्यथा तुल्यन्यायेन दीपगतोष्णस्पर्शस्यापि प्रभाप्रदेशपर्यन्तं व्याप्त्यङ्गीकारापत्तेरित्याशङ्क्याह – तत्तत्भोगेति। तथा चादृष्टचन्दनादीनां कालनिष्ठप्रत्यासत्त्येव कार्यकरणभाव इत्यर्थः। चन्दनादिजन्यभोगानुकूलकर्मजन्यत्वन्तु भोगाजनकव्यावृत्त्यर्थं परिचायकतयोक्तम्।

[62] (टि) व्यभिचार इति। गुणः न गुण्यधिकदेशवृत्तिरित्यत्रेति शेषः।

[63] (टि) चलनप्रतीतिमात्रमितीति। न तु चलनम्। तथा चासिद्धः स्वरूपासिद्धो हेतुरित्यर्थः।

[64] (टि) आवारकस्य वस्तुनः तमसः।

[65] (टि) प्रभाया गुणत्वे दोषान्तरमाह – दीपासंयुक्तेति।

तेजस्संबन्धस्य विषयग्रहे सहकारित्वाच्च[66]। न च तेजोरूपसामीप्यमेव[67] सहकारी। सामीप्यकारणत्वापेक्षया संयोगकारणत्वे लघ्ववच्छेदकसंभवात्। तस्मात्प्रभाऽपि द्रव्यमेव।

एवं केतकीकुसुमपरागादेर्वायुनाऽऽनीतस्य घ्राणसंयुक्तस्य गन्ध उपलभ्यते। न तु कुसुमगत एव गन्ध एतावद्देशव्यापी घ्राणेन गृह्यते। कुसुमस्येन्द्रियासंयुक्तत्वेन संयुक्तसमवायस्य सन्निकर्षस्याभावात्, कुसुमगतस्यैव गन्धस्य ग्रहणे वाय्वानुलोम्यस्यानपेक्षाप्रसङ्गाच्च। न च गन्धानयन एव तस्योपयोगः, गन्धस्य गुणत्वेन चलनासंभवात्। न च वाय्वानुलोम्यमपि दूरस्थाश्रितगन्धग्रहे सहकारीति कल्पयितुं युक्तम्। कल्पनागौरवात्। तस्मान्न गुणस्य गुणिदेशाधिकदेशत्वं युक्तम्। न चान्यत्र गुणस्य तथाविधत्वादर्शनेऽपीहैव तथात्वमस्त्विति वाच्यम्। गुणस्वभावविपरीतस्वभावत्वे गुणत्वस्यानुपपत्तिप्रसङ्गात्। तस्मादणुत्वे सुखस्याधिकदेशवृत्तित्वमनुपपन्नम्। अणुत्वसाधकहेतुरपि गत्यादिवचनस्यान्यथासिद्धेः प्रदर्शयिष्यमाणत्वादन्यथासिद्धः। तस्मादणुपरिमाणत्वमयुक्तम्। तथा मध्यमपरिमाणत्वमपि न युज्यते। मशकमातङ्गादिशरीरपरिग्रहे शरीरतुल्यपरिमाणत्वाय संकोचविकासवत्वे सावयवत्वेनानित्यत्वप्रसङ्गात्।

अत एव मध्यमपरिमाणत्वस्य नित्यवृत्तित्वसाधनमपि बाधितम्। अप्रयोजकञ्च। तस्मादणुमध्यमपरिमाणयोरभावाद्विभुत्वम्। किञ्च देशान्तरोत्पन्नानाञ्चन्दनादीनां व्यधिकरणादृष्टाजन्यत्वेन तदाश्रयसंयोगजन्यत्वमावश्यकमित्यतोऽपि विभुत्वम्[68]। न च विभुत्वे घटाद्यवच्छेदेनापि ज्ञातृत्वप्रसङ्गः। तत्कारणीभूतानां मनोयोगादीनामभावेन तदवच्छेदेन ज्ञातृत्वाभावोपपत्तेः। एवं सर्वगतत्वबोधकनिगमागमादिकमपि विभुत्वे मानं द्रष्टव्यम्। न चाणुत्वमपि क्वचिन्निगमादौ बोधितमिति वाच्यम्। तस्योक्तयुक्त्युपबृम्हितविभुत्ववचनानुसारेण सूक्ष्मबुद्धिग्राह्यत्वपरत्वात्। एवञ्च विभुत्वे मानसिद्धे गत्यादिवचनं पुर्यष्टकाद्यौपाधिकगतिपरम्। न च पुर्यष्टकादिगतत्यादेरिहारोपितस्य प्रतिपादनेऽप्रमाण्यप्रसङ्गः। उपाधिगतेरुपचारनिबन्धनत्वस्यैवाभिमतत्वेन श्रुतेरारोपितार्थपरत्वानभ्युपगमात्। न चैवं विभुत्वाभ्युपगमे जीवस्याणुव्यपदेशः[69] किन्निबन्धन इति वाच्यम्। वैभवस्य मलकृताच्छादनेनाप्रकाशमानतयाऽऽनुभाविकेन परिच्छिन्नत्वेन तद्व्यपदेशस्यौपचारिकत्वात्। तस्मादात्मनस्सिद्धं विभुत्वम्। अमुमेवार्थं प्रतिपादयितुमनुवर्तमानेऽप्यणुपद आत्मपदं प्रयुक्तम्। तस्मात् सुष्ठूक्तं पुंसां संसृतिं करोतीति॥

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैःश्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक**

**श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये चतुर्थसूत्रभाष्यम् समाप्तम् ॥**

---

66 (टि) सहकारित्वाच्चेति। प्रभाया अतेजस्त्वे दीपासंयुक्तचक्षुषा तदग्रहणं प्रसज्यत एवेति भावः।

67 (टि) तेजोरूपसामीप्यमिति। चक्षुष इति शेषः।

68 (टि) आवश्यकमित्यतोऽपीति। आत्मनोऽविभुत्वेऽदृष्टाश्रयात्मसंयोगस्य चन्दनादावभावेन तत्तत्पुरुषार्थं तत्तचन्दनाद्युत्पत्त्यनुपपत्तेरात्मनो विभुत्वमावश्यकमित्यर्थः।

69 (टि) अणुव्यपदेशः। अत्र शास्त्रेऽणुपदेन व्यवहारः।

# पञ्चमसूत्रभाष्यम्

तदीय[1]सृष्टिस्थितिसंहारतिरोभावानुग्रहेषु पञ्चसु कृत्येषु सृष्टिस्थितिसंहाराणां कर्ता शिव एवेति स्थापितम्। इदानीं तिरोभावकर्ताऽपि स एवेति साधयति –

## पञ्चमसूत्रम्

**विदन्त्यक्षाणि पुंसाऽर्थान्न स्वयं सोऽपि शम्भुना।**
**तद्विकारी शिवश्चेन्न कान्तोऽयोवत् स तन्नयेत्॥**

इति। तत्र प्रथमं सकार्यकरणस्यैव[2] चेतनस्य लोके दण्डादिनियमनकर्तृत्वं दृष्टं, तथा च जीवनियमनकर्तुरपि सकार्यकरणत्वं वाच्यमिति **मध्वादय** एकदेशिनश्चाहुः। तत्र स्वयमशरीरश्रुत्यनुसारेणाशरीरेन्द्रियस्यैव[3] शिवस्य जीवनियामकत्वं वक्तुं प्रथमं तन्मतं कार्यकारणप्रेरकेष्वणुषु तदुक्तव्याप्तेर्व्यभिचारेण[4] निराकुर्वंस्तदर्थं तत्र हेत्वसिद्धिं निराकरोति – **विदन्त्यक्षाणि पुंसार्थानिति**।

अक्षाणीन्द्रियाणि पुंसाऽर्थेषु नियमितानि[5] नियोजितान्येवार्थान्विदन्ति, न स्वयमेवार्थेषु प्रवर्तन्ते, अचेतनत्वात्। नचाक्षप्रेरणे प्रेरककोटिप्रविष्टमक्षान्तरमपेक्षते, अनवस्थानात्। तथा च तदुक्तव्याप्तेस्तत्र व्यभिचार इति भावः। अत्राक्षग्रहणं शरीरस्याप्युपलक्षणम्। तथा चाक्षाणि प्रेरककोटिप्रविष्टाक्षान्तरं विना यथा पुमान् प्रेरयति तथा शिवोऽपि विचित्रशक्तिमत्वाद्विकरणादिक एव पुमांसं प्रेरयतीत्याह – **सोऽपि शम्भुनेति।** पुमानपि विकरणेनापि शम्भुनाऽनित्याशुचिदुःखात्मकेषु विषयेषु नियमितस्तान्विषयान् भुङ्क्ते। तस्य चेतनत्वेऽपि पटलपिहितदृष्टिवन्मलरुद्धचिच्छक्तित्वेनाचेतनतुल्यत्वात्। तथा चायं प्रयोगः। पुमान् केनचिदधिष्ठित एव विषयेषु प्रवर्तते, अस्वतन्त्रत्वादन्धवत्। स चाधिष्ठाता स्वतन्त्रश्शंभ्भुरेव। तस्यापि पारतन्त्र्येऽनवस्थानादिति। तत्र सकरणाधिष्ठितत्वे साध्येऽक्षादिषु व्यभिचार एव। न च तथाऽपि लोके वास्यादिषु सकरणकस्याक्षादिषु चाकरणकस्याधिष्ठातृत्वदर्शनाद्विनिगमनाविरहः। लाघवाद्विकरणस्यैवाधिष्ठातृत्वकल्पनादिति विकरणाधिष्ठातृसिद्धिः। नचास्वातन्त्र्यहेतोः पुंस्यसिद्धिरिति वाच्यम्। पूर्वसूत्रे मलरुद्धस्वदृक्क्रिय इति तदस्वातन्त्र्यस्योक्तत्वात्। अत एव हेतुसिध्यर्थमेवादिसूत्रे सृष्टिस्थितिसंहारकर्तृत्वकथनसमये वक्तव्यमपि तिरोभावकर्तृत्वं प्रकरणविच्छेदेनात्रोक्तमिति। नन्वस्त्वेवं शिवस्य पुं प्रेरकत्वेऽशरीरत्वम्। तथाऽपि देवदत्तस्य वास्योर्ध्वगमनानुकूलक्रियावदस्यापि पुं प्रवृत्त्यनुकूलव्यापारावेशो वाच्यः। नहि परप्रवृत्तिहेतुक्रियावेशं विना क्वचित्तत्प्रवृत्तिहेतुत्वं दृष्टम्।

---

[1] (टि) तदीयेति – जीवीयेत्यर्थः।

[2] (टि) सकार्येत्यत्र कार्यं शरीरम्।

[3] (टि) अशरीरश्रुत्यनुसारेण – अशरीरादिश्रुत्यनुसारेण।

[4] (टि) व्यभिचारेणेति। अणुनियमनं सशरीरेन्द्रियकर्तृकं नियमनत्वाद्दण्डनियमनवदित्यत्र शरीरेन्द्रियनियमने व्यभिचारेणेत्यर्थः।

[5] (टि) नियमितानीत्यस्य विवरणं नियोजितानीति।

तथा च शिवस्य विकारित्वापत्तिरिति शङ्कते – **तद्विकारीति।** तदिति वाक्यान्तरोपक्रमे, तर्हीत्यर्थे वा। न च निर्विकारश्रुत्यनुसारेण तस्य नियामकत्वेऽपि न क्रियावेश इत्यविकारित्वमिति वाच्यम्। लोके तथा अदृष्टत्वेन निर्विकारत्वप्रतिपादकनिगमागमानामसंभावितार्थत्वादिति भावः। विनाऽपि क्रियावेशं सन्निधानमात्रेण क्वचित्परप्रवृत्तिहेतुत्वं दृष्टम्। तद्दृष्टान्तेन निर्विकारश्रुतेस्संभावितार्थत्वान्नोक्तदोष इत्याह – **कान्तोऽयोवदिति।** यथा कान्तः पाषाण-विशेषस्स्वयं तदानीं निर्व्यापारस्सन्निधिमात्रेणायो नयति तथा शिवोऽपि तं पुमांसं नयेदिति संभावनायां लिङ्गति। अथवा पूर्वसूत्रे पारतन्त्र्यादिहेतुत्वेन मलसिद्धिरुक्ता। संप्रति तदेव पारतन्त्र्यं दर्शयति – **विदन्तीति।** पारतन्त्र्यं ह्यन्याधीनप्रवृत्तिकत्वम्। प्रवृत्तिरपि द्विविधा। बाह्यगोचरान्तरङ्गगोचरा च। तत्र प्रथमा दण्डादिगोचरा द्वितीयेन्द्रियादिगोचरा। तत्रेन्द्रियादिगोचरप्रवृत्तिपूर्विकैव दण्डादिप्रवृत्तिः। नह्यविस्फारितनेत्रस्य मृद्दण्डादिज्ञानपूर्विका तत्र प्रवृत्तिस्संभवति। अत इन्द्रियगोचरप्रवृत्तावेवान्याधीनत्वं वक्तुं तामेव प्रथमतस्साधयति – **विदन्त्यक्षाणीति।**

यद्यपि पुमानक्षैर्वेत्ति न तु तानि तेन[6]। तथाऽप्यक्षाणि विदन्ति ज्ञानमुत्पादयन्ति। काष्ठानि पचन्ति असिश्छिनत्तीतिवत्करणे कर्तृत्वोपचारः। कथं ज्ञानमुत्पादयन्तीत्यपेक्षिते पुंसानीतानीत्युक्तम्। यद्यपि नीतानीति न श्रूयते। तथाऽप्युत्तरत्र नयेदित्युक्तिसामर्थ्यान्नीतानीत्यध्याह्रियते। अक्षाणि पुंसानीतानि प्रवर्तितानि ज्ञानं जनयन्ति। न तु स्वयम्, अचेतनत्वेन स्वतः प्रवृत्तेरसंभवात्। एवमिन्द्रियादिगोचरप्रवृत्तिं साधयित्वा तस्या अन्याधीनत्वं दर्शयति सोऽपि शम्भुनेति। शम्भुनानीत एव नयतीत्यर्थः। नन्वचेतनत्वेनेन्द्रियाणां युक्ता चेतनाधीनप्रवृत्तिकता, न तु पुरुषस्यापि मानाभावादनवस्थाप्रसङ्गाच्चेति चेन्न। चेतनपारतन्त्र्ये निगमागमादीनां सत्वात्। इन्द्रियादिगोचरा पुरुषप्रवृत्तिः परतन्त्र्या संसारिप्रवृत्तित्वादित्यनुमानस्य सत्वाच्च। नन्वेवं चेतनप्रवर्तकस्य शिवस्य विकारित्वं स्यात्, प्रवृत्यनुकूलस्य तादात्विकस्य तद्गतस्य[7] कस्यचिद्धर्मस्यानुत्पादेऽजननदशातो वैलक्षण्याभावेनाजनकत्वप्रसङ्गात्। उत्पत्तिमद्धर्मसमवायस्यैव विकारित्वरूपत्वात्। नचेष्टापत्तिः। तदभावप्रतिपादकनिगमागमादिविरोधादित्यभिप्रेत्य शङ्कते – **तद्विकारीति।**

तत्तर्हि चेतनप्रवर्तकत्वाभ्युपगम इत्यर्थः। समाधात्ते नेति। कान्तस्सन्निधानमात्रेण निर्विकारोऽपि यथाऽयो नयति प्रेरयति, तद्वच्छिवोऽपि सन्निधिनैव निर्विकारोऽपि प्रेरयेदित्यर्थः। अयोवदिति द्वितीया सामर्थ्यात्[8]। न च सन्निधिर्दुर्वचः, कार्योन्मुख्यविशिष्टशक्तेरेव सन्निधि-त्वात्। नचायस्कान्तस्यापि स्वगतकर्मादिरूपविकारवत्वाद्दृष्टान्तत्वानुपपत्तिः। अचलस्यापि[9]

[6] (टि) न तु तानि तेनेति। तानीन्द्रियाणि तु तेन पुंसा विदन्तीति शेषः। अक्षकर्तृकपुंकरणकवेदनं नास्तीत्यर्थः।

[7] (टि) तद्गतस्य – प्रवर्तकशिवगतस्य। अजननदशातः – चेतनाप्रवर्तकत्वकालात्। वैलक्षण्याभावेन प्रवर्तकत्वसमये प्रवर्तकस्य वैलक्षण्याभावेन। अतस्तद्दोषपरिहाराय धर्मोत्पादाङ्गीकारे विकारित्वमेवेत्याह – उत्पत्तिमदिति।

[8] (टि) द्वितीया सामर्थ्यादिति। अर्थसामर्थ्यादित्यर्थः।

[9] (टि) अयसस्समीपं नीते कान्ते साध्यवैकल्यमाह – न चायस्कान्तस्येति। स्वसन्निधिं प्राप्ताय: प्रेरककान्त एव दृष्टान्त इत्याह – अचलेति। अत्रायोविशेषेश्वरान्यतरत्वमेव हेतुः। नीतानीत्यस्य प्रवर्तितानीत्येतदक्षेषु गौणम् – तत्र यत्नरूपप्रवृत्त्यभावात्। अणौ तु मुख्यं तत्र तत्संभवात्। तथा च पक्षसपक्षसाधारणस्य साध्यस्याभान्न बाधसाध्यवैकल्ययोरन्यतरापत्तिमाशङ्क्यान्यथाव्याकरोति।

स्वसमीपगतायस्समाकर्षकत्वदर्शनात्। यद्वा[10] अक्षाणि पुंसानीतानि अर्थैर्योजितानि विदन्ति, न स्वयम्। स्वयमेवार्थैस्संबध्य न गृह्णन्ति, अचेतनत्वात्। सोऽपि पुमान् शम्भुनाऽक्षैर्योजितो वेत्ति, न स्वयमेवाक्षैर्युज्यते, अक्षसंबन्धात्पूर्वं तदनुकूलस्याक्षजन्यस्य ज्ञानादेरभावादचेतनसमानत्वात्। नचाक्षाण्येव पुंसा युज्यन्ते, अचेतनत्वात्। शम्भोरक्षसंबन्ध-जनकत्वे सर्वदा तज्जनकत्वपरिहाराय तादात्मिकाकाराभ्युपगमे विकारित्वं स्यादिति शङ्कते तद्विकारीति। परिहरति कान्त इति। कान्तोऽयो यथा निर्विकारोऽपि योजयति तद्वन्निर्विकारोऽपि सहकारिसाहित्यविशिष्टशक्त्यात्मना सन्निधिनैव पुरुषमक्षैर्योजयेदित्यर्थः॥

**॥ पञ्चमसूत्रसंग्रहभाष्यं सम्पूर्णम् ॥**

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यायते –

पूर्वसूत्रे पारतन्त्र्यादिहेतुत्वेन मलसिद्धिरुक्ता। संप्रति तदेव पारतन्त्र्यं दर्शयति – **विदन्तीति।** पारतन्त्र्यं ह्यन्याधीनप्रवृत्तिकत्वम्। तत्रान्तरङ्गेन्द्रियादिगोचरप्रवृत्तिपूर्वकत्वात् बाह्यदण्डादिगोचरप्रवृत्तेस्तत्र पारतन्त्र्यं दर्शयितुं[11] तामेव प्रथमं साधयति – **विदन्तीति।** अक्षाणि पुंसा नीतानि प्रवर्तितानि ज्ञानं जनयन्ति न तु स्वयम्। अचेतनत्वेन स्वतः प्रवृत्तेरसंभवात्। एवमिन्द्रियादिगोचरप्रवृत्तिं साधयित्वा तस्या अन्याधीनत्वं दर्शयति – **सोऽपि शम्भुनेति**। शम्भुनानीत एव नयतीत्यर्थः।

नन्विन्द्रियादीनामचेतनत्वेन[12] युज्यते चेतनाधीनप्रवृत्तिकत्वम्। चेतनस्य तु स्वयमेव प्रवृत्तिस्संभवति। तस्यापि प्रवर्तकान्तरापेक्षायामनवस्थाप्रसङ्गात्, राजाधीनस्य भृत्यादेस्स्वयमनिच्छोरपि तत्तत्कार्येषु प्रवृत्तिवदिच्छादिविरहदशायामपीन्द्रियव्यापारे प्रवृत्त्यापत्तेश्च[13]। नचेष्टापत्तिः जीवान्तरपारतन्त्र्यहीनस्यानिच्छोः प्रवृत्त्यदर्शनात्। न च नरकादिसाधनत्वेन ज्ञायमानेऽप्यभक्ष्यभक्षणादौ प्रवृत्तिः पारतन्त्र्यज्ञापिका, स्वातन्त्र्येऽनिष्टसाधनत्वेन ज्ञाते प्रवृत्त्यसंभवादिति वाच्यम्। तत्र दृढविश्वासाभावेन तज्जन्यसुखे रागौत्कट्येन नरके द्वेषौत्कट्याभावेन वा प्रवृत्तेरुपपत्तेः। प्रत्युत तद्गोचरप्रवृत्तेः[14]

---

[10] (रट) यद्वेति। तादात्विकाकारस्तदात्विकधर्मः। उभयत्र सहकारिसाहित्यविशिष्टा स्वशक्तिरेव सन्निधिः अतस्सुवच एवेत्यर्थः। ईश्वरस्य जीवादृष्टादिकं सहकारि। कान्तस्यायसस्स्वसमीपानयनमिति विवेक्तव्यम्।

[11] (टि) तत्र पारतन्त्र्यं–इन्द्रियादिगोचरप्रवृत्तौ पारतन्त्र्यम्। अणोरिति शेषः। तामेव–इन्द्रियादि प्रवृत्तिमेव। अक्षाणीतराधीनप्रवृत्तीनि अचेतनत्वात्, सम्मतवदित्यनुमानप्रयोगः। ननु यद्यणुरन्या-धीन प्रवृत्तिकः प्रवृत्तिमत्वात् इन्द्रियवदित्यनुमीयते तदाऽचेतनत्वमुपाधिः। ईश्वरे व्यभिचारश्च। ईश्वरः पराधीनप्रवत्तिकः प्रवृत्तिमत्वादणुवदित्यादिक्रमेणानवस्था वा। अथाणुरीश्वराधीनप्रवृत्तिकः, अणुत्वाद्राजभृत्यवदित्यनुमीयते तदाऽनिच्छाप्रवृत्तिकत्वमुपाधिरिति शङ्कते।

[12] (टि) नन्विन्द्रियादीनामित्यादिना।

[13] (टि) द्वितीयोपाधेः पक्षे साधनाव्यापकत्वं दर्शयति–जीवान्तरेति। सिद्धान्ती साधनव्यापकत्वमापाधेरा-शङ्कते – न च नरकादीति। तद्विघटयति पूर्ववादी तत्र दृढेति।

[14] (टि) तत्गोचरेति – अभक्ष्यभक्षणगोचरेत्यर्थः। पारतन्त्र्याभावज्ञापकत्वेति। यद्यणुः परमेश्वरपरतन्त्रः कथं तर्हि न कळञ्जं भक्षयेदित्यादि तदाज्ञां भञ्जयेत्। अतो न तत्परतन्त्र इत्यर्थः। यो यदाज्ञा-भञ्जकस्सोऽतत्परतन्त्रः। देवदत्ताज्ञाभञ्जकयज्ञदत्तवदित्येतद्राजाज्ञाभङ्गकारिणि व्यभिचारयति–ननु कथमिति। यो यद्विषये यदाज्ञाभञ्जक इति व्याप्तिं विशिष्यं व्यभिचारं पारयति लोक इति।

परमेश्वराज्ञाभङ्गरूपत्वेन पारतन्त्र्याभावज्ञापकत्वाच्च। ननु कथमाज्ञाभङ्गः पारतन्त्र्याभावं ज्ञापयति तद्भङ्गकारिणामपि निग्रहभाजां पारतन्त्र्यदर्शनात्। अन्यथा निग्रहानुपपत्तेः। तद्वत्परमेश्वरकृतनरकादिरूपनिग्रहभाजामेषामपि पारतन्त्र्यमेवेति चेन्न।

लोके राजादिपरतन्त्राणान्तदनुमते कृत्ये पारतन्त्र्येऽप्याज्ञाभङ्गकरणे स्वातन्त्र्यात्। अत एव तेषां दण्डनम्। अन्यथा तस्यापि तदिच्छयैव कृतत्वे तदनुपपत्तेः। नचात्रापि ज्योतिष्टोमादिकरणे परतन्त्राणामभक्ष्यभक्षणादावीश्वराननुमते प्रवृत्तिस्स्वातन्त्र्यकृतत्वान्नरकादिरूपनिग्रहाय पर्यवसन्नेति त्वया वक्तुं शक्यते। तत्प्रवृत्तेरपि तदाज्ञाधीनत्वेनाङ्गीकारात्। किञ्च लोके परतन्त्रप्रवृत्तिर्द्वि-विधा। एकाऽनेनेदं कर्तव्यमित्युक्तमतः करिष्यामीत्यभिसन्धानपूर्विका। अपरा तु यद्यप्यनेनेदं कर्तव्यमिति न कथितमथाप्यस्मिन् कृतेऽस्य प्रीतिर्भविष्यत्यतः करोमीत्यध्यवसायपूर्विका। इन्द्रियगोचरप्रवृत्तेरुभयविधाभिसन्धानपूर्वकत्वस्याप्यभावान्न परतन्त्र्यत्वम्। न च लोके प्रवृत्तस्यापि क्वचिदिष्टानवाप्तेः पारतन्त्र्यम्। क्वचित्प्रत्युतानिष्टावाप्तेः पारतन्त्र्यम्। स्वातन्त्र्ये समीहितफलावाप्तिप्रसङ्गादिति युक्तम्। फले स्वातन्त्र्यानङ्गीकारात्। प्रवृत्तावेव स्वातन्त्र्योपगमात्। क्वचित्फलनिष्पत्त्यभावो विपरीतनिष्पत्तिश्च फलजननकारणाभावाद्विपरीतकारणाच्च। न तु प्रवृत्तिपारतन्त्र्यात्। तस्य तत्राहेतुत्वात्। सफलप्रवृत्तेरपि तव परतन्त्रत्वेनाभिमतत्वात्। न च पुरुषस्य स्वतन्त्रप्रवृत्त्यङ्गीकारे प्राणादिसञ्चारेऽपि प्रवृत्तिस्स्यादिति[15] युक्तम्। प्रवृत्त्ययोग्यत्वेन तत्राप्रवृत्त्युपपत्तेः। अन्यथा पारतन्त्र्यवादिनोपीन्द्रियादिष्विव प्राणादिष्वपि परतन्त्रप्रवृत्त्यापत्तेः[16]। परस्य प्राणादिषु[17] प्रवर्तनेच्छा नास्तीति चेत्तदभावः कुतो निर्णीतः। कार्यभूतायाः प्रवृत्तेरभावादिति[18] चेत्। कदाचित्कार्याभावेन सार्वकालिकेच्छाविरहस्य ज्ञातुमशक्यत्वात्[19]। सर्वदा कार्याभावाभ्युपगमे तु स्वरूपायोग्यत्वस्यावश्यकत्वेन तत एवाप्रवृत्त्युपपत्तेरिच्छाभावकल्पने मानाभावात्। तस्मान्न

[15] (टि) प्राणादिसञ्चारेऽपि प्रवृत्तिस्स्यादिति। नचेष्टापत्तिः कुतो नास्तीति वाच्यम्। कथाश्रवणे प्रवृत्तः आचार्यदर्शने प्रवृत्त इतिवच्छ्वासे प्रवृत्त इति व्यवहाराभावात्। अपि च चेतनप्रवृत्तेस्स्वाधी-नत्वमंगीकर्तुः प्राणसञ्चारेऽपि तदङ्गीकारे मरणाभावप्रसङ्गोऽपि बोध्यः।

[16] (टि) परतन्त्रप्रवृत्यापत्तेरिति। तथा च दर्शनादेरिव प्राणसञ्चारस्यापि कादाचित्कत्वापत्तिः। कञ्चि-त्कालं तदकरणेऽपि दर्शनाद्यकरण इव मरणाभावप्रसङ्गस्तवापि समान इति भावः।

[17] (टि) प्राणादिष्विति विषयसप्तमी। तस्य प्रवर्तनैकदेशप्रवृत्तावन्वयः। प्रवर्तनन्तु प्रवृत्त्यनुकूलाणोः कृतिः। तद्विषयिणीच्छाप्रवर्तनेच्छा। साऽणोर्नास्तीत्यर्थः।

[18] (टि) प्रवृत्तेरभावादिति। प्राणप्रवृत्त्यनुकूलाणुप्रवृत्तेरभावादित्यर्थः।

[19] (टि) ज्ञातुमशक्यत्वादिति। नन्विदमसङ्गतं पारतन्त्र्यवादिनाऽणोः पराधीनप्रवत्तिकत्वेऽपि तत्र तदीयेच्छाऽपि कारणम्, तथा च प्रवर्तनेच्छाया अभावेन सा नास्ति। तत्कथं ज्ञायत इति चेत् प्रवृत्तिं विनाऽपि प्राणस्सञ्चरति। तथा च व्यतिरेकव्यभिचारादणुप्रवृत्तिप्राणप्रवृत्त्योर्न कार्यकारणभावः। इत्थञ्च प्राणप्रवर्तनेच्छैव नास्तीत्युक्तं भवति। तत्र कादाचित्कार्याभावेन कथं सार्वकालिकेच्छाविरहो न ज्ञायतेति चेन्न। भावान्तरात्। यदि कादाचित्क कार्याभावेन प्राणप्रवर्तनेच्छाविरहो निर्णीते उत सार्वदिक तदभावेनेति विकल्पाभिप्रायेणेयमुक्तिस्तदाऽसङ्गतैव। किन्तु प्रवृत्तित्वावच्छिन्नं प्रतीच्छात्वेन कारणत्वमभ्युपेत्यप्राणनानुकूलप्रवृत्त्यभावेनेच्छाभावो निर्णीयते, उत प्राणाप्रवर्तनत्वावच्छिन्नं प्रति तद्विषयकेच्छाभावेन। नाद्यः। प्राणप्रवर्तनाभावेऽपि प्राणसञ्चारे तत्प्रवर्तनैव नास्तीति स्यात्। नत्विच्छाभावः। नाऽपि द्वितीयः। प्रवर्तनाभावेऽपि प्राणसञ्चारसत्वे व्यतिरेकव्यभिचारेण प्रवर्तना तद्विषयकेच्छोभयमपि गगनकुसुमाय मानमित्येव वक्तव्यम्। किमिच्छारूपकारणाभावात् प्रवर्तनाभावसंपादनायासेनेत्यभिप्रायकोऽयं ग्रन्थ इति न कोऽपि दोष।

चेतनप्रवृत्तेः परतन्त्रत्वमिति। मैवम्। इन्द्रियव्यापारगोचराप्रवृत्तिः परतन्त्रा, संसारिप्रवृत्तित्वात्, भृत्यादिप्रवृत्तिवदिति पारतन्त्र्यसिद्धेः।

पारतन्त्र्यञ्च परेच्छाधीनत्वं, न तु कारणा यत्तत्त्वमात्रम्। अतो न सिद्धसाधनम्। न च संसारिपदस्य वैयर्थ्यं, पारतन्त्र्यानुमितेः पूर्वमीश्वरासिध्या तत्प्रवृत्तौ व्यभिचारानवस्थितेरिति[20] वाच्यम्। क्षितिसकर्तृकत्वानुमानेन निगमागमादिभिश्च तत्सिद्धौ व्यभिचारोपस्थित्या तद्वारणेन सार्थकत्वात्, प्रवृत्तिमात्रस्य पारतन्त्र्याभ्युपगमेऽनवस्थापत्त्या कस्यचित्स्वतन्त्रस्याङ्गीकर्तव्यत्वेन सामन्यतो व्यभिचारस्य निश्चितत्वेन[21] तद्वारणार्थत्वाच्च न च तेनैव हेतुना संसारिपरतन्त्रत्वमप्यनुमीयत इति वाच्यम्। अनवस्थापत्त्या सामान्यतो व्यभिचारनिश्चयेनानुमापकत्वायोगात्। यदुक्तं चेतनस्यापि चेतनान्तरप्रेर्यत्वेऽनवस्थेति तत्संसारिचेतनस्यैव चेतनान्तरप्रेर्यत्वाङ्गीकारान्निरस्तम्। यदप्युक्तं पारतन्त्र्ये भृत्यादेरिवानिच्छोरपि प्रवृत्तिस्स्यादिति तन्न। भृत्यादेरपि दण्डभीत्यादिना प्रवृत्तिविषय इच्छासत्वात्। अन्यथेच्छायास्तत्रैव व्यभिचारेण प्रवर्तकत्वानापत्तेः। नचानिच्छुपदेनेच्छासामान्यशून्यो न विवक्षितः, किन्तु स्वस्वाधीनेच्छाविधुरः। तथा च भृत्यादेरिव तादृशेच्छाशून्यस्यापि प्रवृत्तिस्स्यादेवेति[22] वाच्यम्। यत्र कुत्रापि तादृशस्य प्रवृत्त्यापादने नित्ये तादृशस्य प्रवृत्त्यङ्गीकारेणेष्टापादनात्। इन्द्रियव्यापारादिविषयविशेषे तथाविधस्य[23] प्रवृत्त्यापादने भृत्यादेरपि यदकरणे न दण्डादिप्रसक्तिस्तथाविधे विषये तादृशस्य प्रवृत्त्यदर्शनेनापादकाभावात्। ननु पुरुषस्य स्वारसिकेच्छाविहीनस्यापि प्रवृत्तिर्नापाद्यते। येनैवं स्यात्। किन्तु प्रवृत्तेस्स्वस्वाधीनेच्छाजन्यत्वाभावः। तद्विषयस्य तादृशेच्छाविषयत्वाभावो वापाद्यते। अत्र च नित्ये तद्विषयकप्रवृत्तौ चेष्टापादनेऽपीन्द्रियव्यापारे तद्विषयप्रवृत्तौ वा तदापादने न कोऽपि दोष इति वाच्यम्। परतन्त्रप्रवृत्तिविषयस्यापिहितसाधनस्य[24] तादृशेच्छाविषयत्वदर्शनेन

---

[20] (टि) व्यभिचारानवस्थितेः व्यभिचारानिश्चयात्।

[21] (टि) सामन्यतो व्यभिचारस्य निश्चितत्वेनेति। अनवस्थाभिया यत्र पारतन्त्र्यस्य न विश्रमस्तत्र तस्या एतदीय प्रवृत्तिरिति विशिष्यनिश्चयाभावेन सामान्यत इत्युक्तम्। तत्रैव व्यभिचारात् – भृत्यप्रवृत्तावेव व्यतिरेकव्यभिचारात्।

[22] (टि) प्रवत्तिस्स्यादेवेति। अयमाशयः – न प्रवृत्तिसामान्यं प्रतीच्छात्वेन कारणत्वं मयोच्यते। किन्तु स्वाधीनप्रवृत्तिं प्रति स्वाधीनेच्छा। भृत्यस्य तु प्रवृत्तिः पराधीना। न तत्र स्वाधीनेच्छा कारणम्, अतो न व्यभिचारः। इत्थञ्चाभृत्यप्रवृत्तिरपि यदि पराधीना तदा स्वाधीनेच्छाविधुरस्यापि तस्य प्रवृत्त्यापत्तिः। न चैवं दृश्यते अतो न परतन्त्र इति।

[23] (टि) तथाविधस्य – स्वाधीनेच्छाविधुरस्य। तादृशस्य – स्वाधीनेच्छाविधुरस्य भृत्यस्य।

[24] (टि) परतन्त्रप्रवृत्तिविषयस्यापि हितसाधनस्येति। यथाऽऽचार्याधीनशिष्यप्रवृत्तिविषयशास्त्राध्ययने स्वारसिकशिष्येच्छाविषयत्वदर्शनेनेत्यर्थः। व्यभिचारादिति। परतन्त्रप्रवृत्तिर्न स्वारसिकेच्छाजन्येत्यस्य व्यभिचारादित्यर्थः। तत्प्रवृत्तेरपि – अणुप्रवृत्तेरपि। तदिच्छाधीनत्वं – ईश्वरेच्छाधीनत्वम्। आतेच्छाया एव लिङ्गर्थत्वेनेति। न कळञ्जं भक्षयेदित्यत्र कळञ्जभक्षणाभावस्यातेच्छाविषयत्वमित्यभिसन्धिः। प्रसज्यप्रतिषेधवाचिनापीऽति यद्यप्यत्र प्रसक्तस्य भक्षणस्य निषेधमेव बोधयितुमर्हति नञ्। तथा चाप्तस्य निषेधविषयिणीच्छाऽवर्जनीयैव। तथाऽपि न तदिच्छामात्रेण स्वयमेवाभक्ष्यभक्षणे प्रवृत्तस्य ततो निवृत्तिस्संभवतीति यन्निषेधे तादृशेच्छा तस्य तादृशेच्छासहचरितानिष्टसाधनत्वमपि लक्षणया विध्यर्थ इत्यङ्गीकार्य इति भावः। सर्वत्रेष्टसाधनत्वमेव लिङ्गर्थ इत्याग्रहेऽप्याह–बलवदिति। विशेषणनिषेधोपपत्तेः – नात्र कळञ्जभक्षणे बलवदनिष्टाननुबन्धित्वमिति निषेधोपपत्तेरित्यर्थः। स्वरूपसत्परेच्छेति। तथा च तज्ज्ञानाभावेन तत्र पारतन्त्र्यव्यापकत्वानिश्चयान्न →

व्यभिचारात्। तदप्युक्तमभक्ष्यभक्षणादिप्रवृत्तेरपीश्वरेच्छाधीनत्वेन निग्रहप्रापकत्वन्न स्यादिति तदपि साक्षान्न कर्तव्यमिति निषिद्धार्थस्य करणेन निग्रहाद्युपपत्तेर्निरस्तम्। न हि नरकादिजनकत्वे तत्प्रवृत्तेरपि तदिच्छाधीनत्वं प्रयोजकं, किन्तु निषिद्धगोचरत्वमेव। नचेच्छाऽसत्वे निषेधोऽप्यनुपपन्नः। आप्तेच्छाया एव लिङ्गर्थत्वेन वक्तव्यत्वादिति वाच्यम्। प्रसज्यप्रतिषेधवाचिनाऽपि नञा तत्सहचरितस्यानिष्टसाधनत्वस्य लक्षणया बोधनोपपत्तेः। बलवदनिष्टाननुबन्धित्वविशिष्टेष्टहेतुत्वस्य वा लिङ्गर्थत्वेन विशेषणनिषेधोपपत्तेश्च। यदप्युक्तमुभयविधाभिसन्धानपूर्वकत्वस्य व्यापकस्याभावात्तद्व्याप्यस्य पारतन्त्र्यस्यापि निवृत्तिरिति तदपि मन्दम्। स्वरूपसत्परेच्छाधीनापि पारतन्त्र्योपपत्त्या तस्य व्यापकत्वसिद्धेः। यद्यपि भृत्यादिप्रवृत्तौ स्वरूपसत्परेच्छाधीनत्वन्न विद्यते, तथाऽपि ज्ञातपरेच्छाधीनत्वसद्भावात्पारतन्त्र्यम्। ननु किमिदं पारतन्त्र्यं, परेच्छाजन्यत्वं, परेच्छाज्ञानजन्यत्वं वा। नाद्यः। भृत्यादिप्रवृत्तौ तदभावत्। न द्वितीयः। इन्द्रियव्यापारगोचरप्रवृत्तौ तदभावात्। तस्मात्पारतन्त्र्यं दुर्वचमिति। मैवम् – परेच्छाप्रयोज्यत्वस्यानुगतस्य पारतन्त्र्यशब्दार्थत्वात्। भृत्यादिप्रवृत्तेरपि परेच्छाप्रतिसन्धानजन्यत्वेन तत्र प्रतिसन्धानमात्रस्याजनकत्वेन विषयावच्छिन्नस्यैव जनकत्वे अवच्छेदकतया परेच्छाया अपि नियतपूर्ववर्तित्वरूपप्रयोजकत्वसद्भावात्। भृत्यादेः पारतन्त्र्यमन्यस्य स्वातन्त्र्यमिति व्यपदेशस्तु जीवान्तरपारतन्त्र्यतदभावनिबन्धनः।

अज्ञो जन्तुरनीशोऽयमात्मा यस्माद्द्विजर्षभाः।
सोऽपि सापेक्ष एव स्यात् स्वप्रवृत्तौ घटादिवत्।।
इष्यते स कथं कर्ता कर्ता तस्मान्महेश्वरः।
पशुत्वरुद्धचिच्छक्तेः स्वातन्त्र्यं न पशो रतः।।

इत्यादय आगमाः निगमाश्च तत्र मानत्वेनानुसन्धयोः। नन्वेवं चेतनप्रवर्तकस्य शिवस्य विकारित्वं स्यात्। प्रवृत्त्यनुकूलस्य तादात्विकस्य तद्गतस्य कस्यचिद्धर्मस्यानुत्पादेऽजननदशातो वैलक्षण्याभावेनाजनकत्वप्रसङ्गात्। उत्पत्तिमद्धर्मसमवायस्यैव विकारित्वरूपत्वात्। न चेष्टापत्तिः। तदभावप्रतिपादकनिगमागमादिविरोधात्। न च वेमादिप्रवर्तकस्येव[25] निर्विकारत्वविरोधः। स्वसमवेतविकाराभावेऽपि स्वदेहगतस्पन्दादिविकारसाहित्येनाजनकदशातो वैलक्षण्येन जनकत्वस्य निर्विकारत्वस्य चोपपत्तेरिति वाच्यम्। स्वदेहस्पन्दादिजनने[26] विकारित्वापत्तेः। न च तादात्विकेच्छा[27] संरम्भादिबुद्धिवृत्तिसहितचिच्छक्त्यैवाजनकत्वदशातो व्यावृत्त्या जनकत्वस्याविकारित्वस्य चोपपत्तिः। तादात्विकेच्छादिजनने विकारित्वापत्तेः। न च शिवशक्तेः देहस्पन्दादिनेच्छासंरम्भादिना वा साहित्यमस्ति। येनाजनकदशातो

---

← तदभावनिश्चयप्रयुक्तपारतन्त्र्याभावसिद्धिरिति भावः। भृत्यादिप्रवृत्तौ तदभावादिति। राजेच्छासत्वेऽपि तद्ज्ञाने भृत्यस्य प्रवृत्त्यभावादित्यर्थः। इन्द्रियव्यापरेति। तत्रेश्वरेच्छाधीनत्वस्य ज्ञातुमशक्यत्वादित्यर्थः।

25 (टि) वेमादिप्रवर्तकस्येवेति। वास्यादिप्रवर्तनापेक्षयात्यन्तानायाससाध्यत्वेन प्रवर्तकस्य निर्विकारित्वमित्यभिमानादिदम्। तर्ह्यजनकत्वदशातः कथं वैलक्षण्यमित्याशङ्कामपनुदति स्वसमवेतेत्यादिना।

26 (टि) येन वैलक्षण्यं तज्जनने विकारित्वमपरिहार्यमित्याह – स्वदेहेति।

27 (टि)चिच्छक्तौ विकारित्वं तद्वत्वेन वैलक्षण्यं स्वरूपतोऽविकारित्वञ्चेत्याह - न च तादात्विकेति।

व्यावृत्तिर्निर्विकारत्वञ्च स्यात्। अतस्स्वगत एव कश्चित्तत्कालोत्पत्तिको धर्मोऽभ्युपगन्तव्य इति विकारित्वं स्यादेवेत्यभिप्रेत्य शङ्कते – तद्विकारी शिवश्चेदिति। तत्तर्हि चेतनप्रवर्तकत्वाभ्युपगम इत्यर्थः। समाधत्ते नेति।

कान्तस्सन्निधानमात्रेण निर्विकारोऽपि यथाऽयो नयति प्रेरयति तद्वच्छिवोऽपि सन्निधि-नैव निर्विकारोऽपि प्रेरयेदित्यर्थः। ननु कस्सन्निधिः। न तावत्कार्योत्पत्तिदेशेऽवस्थानम्। तस्याजनकत्वदशासाधारणत्वात्[28]। अजनकत्वदशायां स देशः कार्यदेश एव न भवतीति चेन्न। सति कार्ये कार्यदेशत्वाभ्युपगमे कार्यस्यापि तज्जनककोटिप्रवेशादात्माश्रयापत्तेः। नापि शक्तिः। तस्या अपि नित्यत्वेन पूर्वोक्तदोषानिस्तारात्[29]। नापि कार्यौन्मुख्यविशिष्टाशक्तिः। कार्यजननानुकूलपरिणामविशेषस्यौन्मुख्यशब्दार्थत्वे शक्तेः परिणामित्वापत्तेः। कार्यजननानुकूलसहकारिसाहित्यस्य तत्त्वे सहकारिणोऽप्यनागन्तुकत्वे पूर्वोक्तदोषात्। आगन्तुकत्वे तस्यैवावश्यकस्य कार्यजनकत्वोपपत्तौ तत्साहित्यविशिष्टशक्त्युपेतस्य जनकत्वकल्पनायोगात्। नापि कार्योत्पत्त्यनुकूलचिकीर्षायोगित्वम्। चिकीर्षाया जन्यत्वाभ्युपगमे विकारित्वापत्तेः[30]। पूर्वसिद्धेच्छायास्सहकारिसाहित्येन चिकीर्षारूपत्वाभ्युपगमे सहकारिण एव जनकत्वोपपत्तेरित्युक्तत्वात्। तस्मात्सन्निधित्वात्। कार्यौन्मुख्यं कार्यानुकूलसहकारिसाहित्यम्। सहकारिण एव जनकत्वापत्तिस्तु प्रागुक्तपारतन्त्र्यसाधक-श्रुत्यनुमानादिनिराकृता। न च तेन[31] प्रवृत्त्यनुकूलस्य सहकारिणोऽन्यगतस्यानुपलंभेन शिवगतत्वे वाच्ये पुनर्विकारित्वापत्तिः। तत्समानाधिकरणेच्छादेरेवोपलम्भात्[32]। ननु तथाऽपि दृष्टान्तोऽनुपपन्नः, कान्तस्य निर्विकारित्वाभावात्। न च विकारित्वेऽप्ययस्समाकर्षणा-नुकूलविकारशून्यत्वाद्दृष्टान्तत्वोपपत्तिः[33]। सामीप्यानुकूलस्पन्दादेरेव विकारत्वादिति चेन्न[34]। अचलस्यैवायस्कान्तस्यायोगत[35]स्वसामीप्यप्रापकयोक्तृयत्नसाहित्यमात्रेणापि तत्प्रेर-कत्वदर्शनेन दृष्टान्तत्वोपपत्तेः॥

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये पञ्चमसूत्रभाष्यम् समाप्तम् ॥**

---

[28] (टि) अजनकत्वदशासाधारणत्वादिति। परिच्छिन्नस्य कान्तस्य तादृशवैलक्षण्यसंभवेऽपि विभोश्शिवस्य तदसंभवादिति भावः।

[29] (टि) पूर्वोक्तदोषः – अजनकत्वदशातोऽवैलक्षण्यम्।

[30] (टि) विकारित्वापत्तेः। शिवस्येति शेषः।

[31] (टि) न च तेनेति। तेन – अणोः पारतन्त्र्येण। अस्य सहकारिणश्शिवगतत्वे इत्यत्र सहकारिण्य-न्वयः। ज्ञापकत्वं तृतीयार्थः। अन्यत्रानुपलंभेनेत्येतच्छिवगतत्वसाधकम्।

[32] (टि) तत्समानाधिकरणेति। अणुप्रवृत्तिसमानाधिकरणाणवेच्छाया एव कालनिष्टप्रत्यासत्त्या शिवशक्तिसहकारित्वमिति भावः।

[33] (टि) अयस्समाकर्षणानुकूलेति। यो यस्समीपन्नीयते तस्यायस्सन्निध्यनुकूलचलनात्मक-विकारसत्वेऽपि तत्समाकर्षणानुकूलत्वकाराभावद्दृष्टान्तत्वोपपत्तिरित्याशयः।

[34] (टि) यदर्थन्नयनं तादृशसमाकर्षणानुकूलत्वमस्त्येव विकारस्येत्याह – सामीप्यानुकूलेति।

[35] (टि) स्वसन्निधिं प्रापितायस्समाकर्षणे कान्तस्येव प्रवर्तमानप्रेरणेऽपि न शिवस्य विकारित्व-मित्याह – अचलस्यैवेति।

# षष्ठसूत्रभाष्यम्

पूर्वं शिवस्वरूपं तत्र प्रमाणं तत्तटस्थलक्षणञ्च प्रथमद्वितीययोरुक्तं पूर्वोक्तसंसृतिफलभागित्वसिध्यर्थं वक्ष्यमाण शिवाभेदतदभिव्यक्तिरूपमुक्तिफलभागित्वसिध्यर्थञ्च पशुस्वरूपं तत्प्रमाणञ्च तृतीयचतुर्थयोरभिहितम्। प्रसङ्गाच्च मलरुद्धस्वदृक्क्रिय इति कर्मानुसारतस्संसृतिं करोतीति च पाशस्वरूपं तत्प्रमाणञ्च परित्याज्यत्वबोधनाय कथितम्। तद्विरोधिन्यश्च काश्चन विप्रतिपत्तयो निराकृताः। इदानीं शिवस्य किं स्वरूपलक्षणम्, पशुपाशयोरपि के तटस्थस्वरूपलक्षणे इत्याकाङ्क्षायां "पाशागम्यो महेशान" इति,

नाध्यक्षन्नापि तल्लैङ्गं न शाब्दमपि शाङ्करम्। इति।

"यत्सुखं परमं ज्ञेयम्" इति, "स्वसंवेद्यपरञ्ज्योति"रिति **चाचिन्त्यादि**वचनानुसारेण[1] पशुपाशज्ञानप्रमाणावेद्यस्वप्रकाशचिद्रूपपरानन्द एव शिवस्वरूपम्। स च पुरुषार्थत्वादात्मसंबन्धाच्च स्वरूपदृग्भोग्य[2] इति स्वप्रकाशानन्दरूपं शिवस्य स्वरूपलक्षणं, पशोरप्यात्यन्तिकचिदचित्भोक्तृत्वं तटस्थलक्षणम्। तदुभयविलक्षणत्वं स्वरूपलक्षणम्। पाशस्यापि दृश्यत्वं तटस्थलक्षणम्। आत्यन्तिकजाड्यं स्वरूपलक्षणम्। उभयात्मकपशुव्यावृत्तय आत्यन्तिकेत्येवमेतेषां लक्षणान्यभिसन्धाय पशुशिवयोर्लक्षणे श्रुत्यार्थाच्च पाशलक्षणं षष्ठसप्तमाभ्यां प्रतिपादयति –

## षष्ठसूत्रम्

**अदृश्यञ्चेदसद्भावो दृश्यञ्चेज्जडिमा भवेत्।**
**शम्भोस्तद्व्यतिरेकेण ज्ञेयं रूपं विदुर्बुधाः॥**

अत्र नैयायिकादयश्शिवस्य न ज्ञानरूपत्वं न वा तस्य प्रमाणान्तरागम्यत्वम्, प्रत्युत विपरीतमेव निगमागमानुमानादिभास्यत्वात् "शैवागमैश्शिवो वेद्य" इत्यागमेन श्रुत्येकगम्य इति ध्यानगम्य इति स्मृत्या शिवस्य साक्षात् श्रुत्यादिभास्यत्वश्रवणाच्चेत्याहुः। तान्निराकरोति – **दृश्यञ्चेज्जडिमा भवेदिति।** प्रमाणजन्यजडवृत्त्या तदभिव्यक्तचिच्छक्त्या वा साक्षाच्छंम्भोस्स्वरूपं दृश्यञ्चेत्पशुना पृथक्तया अवभास्यञ्चेत् जडिमा – **जडत्वं भवेत्।** योग्यतासत्तिभ्या[3] तस्यैवेति ज्ञेयम्। पृथिव्यादिपाठादिना[4] जडशब्दादिना च तादृशविषयस्य तनुकरणभुवनभोग्यात्मनो जडत्वावश्यंभावात्।

---

[1] (टि) अचिन्त्यादि – अचिन्त्यागमादि।

[2] (पा) स्वरूपदृङ्मुक्तभोग्य
(टि) स्वरूपदृग्भोग्यः – स्वरूपदृशा भोग्यः। अथवा स्वरूपदृङ्मुक्तः तत्भोग्य इत्यर्थः। अत एव स्वरूपदृङ्मुक्तभोग्य इति पाठान्तरम्। अर्थाच्च–अनुमानाच्च। अर्थापत्तिप्रमाणाच्चेति वा।

[3] (टि) योग्यतासत्तिभ्यामिति। यद्यपि चिद्रूपस्यैवास्ति जडिमापादनयोग्यता, तथाऽपि तस्यैव शिवस्येति कुतः। अणोरपि तद्योग्यत्वादित्याशङ्क्योक्तमासत्तीति। शम्भोरिति शिवपदस्येवाणुपदस्यासन्निधानात् तस्यैवेति ज्ञेयमित्यर्थः।

[4] (टि) पृथिव्याद्यचिद्वस्तुनो जडिमापादनयोग्यता नास्तीत्याह – पृथिव्यादीति। पदादिना शाब्दवृत्तिविषयत्वम्। शब्दस्पर्शादिलिङ्गेनानुमितिविषयत्वञ्च। प्रत्यक्षवृत्तिविषयत्वन्तु स्थितमेव। आपादकाभेदः – द्रव्यवृत्तित्वाभेदः। जडिम्न इति शेषः।

यद्यपि वृत्त्यवभास्यत्वस्य वृत्त्यभिव्यक्तचिच्छक्त्यवभास्यत्वस्य वा जडिमशब्दार्थत्वे आपादकाभेदः। तथाऽप्यस्वप्रकाशत्वरूपमचित्वरूपं वा जडत्वमापाद्यम्। यद्यपि परस्य[5] तदापादने इष्टापत्तिरेव। तथाऽपि तदङ्गीकारस्स्वसंवेद्यमित्यादिबहुप्रमाणविरुद्ध इति भावः। ननु प्रमाणजन्यवृत्तिविषयत्वाभावे निगमागमानुमानानामीश्वरविषयाणां क्वोपयोगः। न हि तेषां स्वरूपप्रकाशे उपयोगः। तस्याजन्यत्वात्। अतस्तद्विषय[6]वृत्तिजननेनैवोपयोगात् वृत्तिप्रकाश्यत्वमङ्गीकरणीयम्। आगमेष्वनुमानगम्यत्वोक्तेरपसिद्धान्तश्चेति चेत्, तेषां जगत्कर्तृत्वादिगोचरवृत्तिजनने चरितार्थत्वात्। न चैवं जगत्कर्तृत्वादिकमेव प्रकाशमानं शिवस्वरूपमिति वाच्यम्। चित्प्रकाशेन प्रकाशमाने तस्मिन् कर्तृत्वादेर्बुद्धिवृत्त्या प्रकाशेन तस्यापि प्रकाशोपपत्तेः। नचानुमानाद्यनवतारेऽपि शिवस्वरूपं भावयेदिति वाच्यम्। इष्टापत्तेः। जगत्कर्तृत्वाद्याकारापरिज्ञानमात्रेण कर्तारं न जानामीत्यादिव्यवहारोपपत्तेः। अथवा तद्भासकस्वरूपज्ञानप्रतिबन्धकमलविदारणहेतुतया परंपरयोपयोगः। अत एवागमादिषु तद्गम्यत्वव्यपदेशोऽपि युज्यते। नाप्यपसिद्धान्तः।

नाध्यक्षं नापि तल्लैङ्गं न शाब्दमपि शाङ्करम्।

इत्यादिना साक्षात् श्रुत्यादिगम्यत्वनिषेधेनोक्तपरम्परागम्यत्वस्यैव सिद्धान्तत्वात्। अत एव न प्रमाणाभावोऽपि। तस्मात्प्रमाणवृत्त्यदृश्यं तद्रूपमिति। नन्वस्त्वेवम्। नैतावता तस्य स्वयंप्रकाशत्वं, प्रमाणाविषयस्यासतोऽपि स्वयंप्रकाशत्वापत्तेरित्याशंकायां तदर्थं[7] चैतन्यविषयत्वमपि तत्र प्रवेश्यते असतश्च न स्वरूपचैतन्यविषयत्वमपीति न स्वयंप्रकाशत्वप्रसङ्ग इति स्वयं परिहारं वक्तुं तत्र यदन्यैः प्राचीनगुरुमतानुसारिभिरुक्तं परिहारान्तरं, तदर्थं स्वसत्तयैव स्वापरोक्षव्यवहारहेतुत्वं तत्र प्रवेशनीयम्। असतश्च न स्वापरोक्षव्यवहारहेतुत्वमिति तद्व्यावृत्तिः। न तु स्वरूपचैतन्यविषयत्वं तत्र प्रवेश्यते। अभेदे विषयविषयभावानुपपत्तेः। समत्वाच्च न जीवस्वरूपापेक्षयाऽपि विषयत्वम्। न हि प्रकाशः प्रकाशान्तरविषयो दृष्ट इति। तन्निराकरोति **अदृश्यश्चेदसद्भाव** इति।

इदमिति प्रमाणावृत्त्याद्यप्रकाश्यश्शिवो यदि स्वरूपप्रकाशस्याप्यविषयः, तदाऽसन्नेव स्यात्। नरश्रुङ्गवत् तादृशार्थस्यासत्वनियमात्[8]। न च स्वसत्तयैवापरोक्षव्यवहारहेतुत्वेनोक्तविशेषणे-

---

[5] (टि) परस्य – नैयायिकादेः।

[6] (टि) तद्विषयेति। ईश्वरविषयकेत्यर्थः। प्रकाशमानमिति हेतुगर्भं विशेषणम्। स्वरूपेण स्वसंवेद्येऽपि शिवे विशिष्टवेषेण वृत्तिविषयत्वमुपपादयन्नाक्षेपं परिहरति – चित्प्रकाशेनेति। स्वरूपतो वृत्तिविषयत्वेऽनिष्टमापादयति – न चेति। यदि शिवस्वरूपं स्वसंवेद्यं जगत्कर्तृत्वमपि वृत्त्या तन्निष्ठत्वे न भासमानं तर्हि जगत्कर्तारं न जान इति व्यवहारानुपपत्तिरित्याशङ्क्य यथा स्वसंवेद्येऽप्यात्मनि प्रमाणान्तरेण ज्ञातस्यापि धर्मादेरहं धार्मिक इति परिज्ञानाभावः तद्वच्छिवोऽहं जगत्कर्तेति प्रत्यक्षाभावेन तादृशव्यवहारोपपत्तिरित्याह – जगत्कर्तृत्वाद्याकारेति। धर्मादेः परि-ज्ञानायोग्यत्वेन जगत्कर्तृत्वस्य जीवीय कर्तृत्ववत्तद्योग्यत्वावश्यंभावेन नोक्तसमाधानं सम्भवती-त्याशङ्क्याह – अथवेति। तद्भासक–शिवस्वरूपभासक। स्वरूपज्ञान – अणुस्वरूपज्ञान।

[7] (टि) तदर्थं – तादृशापत्तिनिवारणार्थम्।

[8] (टि) तादृशार्थस्य – सर्वथाऽविषयस्य।

नासद्व्यावृत्तिः। स्वरूपप्रकाशस्याप्यविषयत्वे उक्तापरोक्षव्यवहारहेतुत्वस्यैवासंभवात्[9]। न हि सर्वदाऽविषये घटादावप्यपरोक्षव्यवहारो दृश्यत इति भावः। विषयत्वानुपपत्तिश्चोत्तरत्र समत्वासिद्धेः[10] निरसिष्यते। अत्र प्रतिभवतीति प्रतिभूरितिवत् शं सुखं भवतीति शम्भुरिति व्युत्पत्त्या शम्भुशब्देन शिवस्य सुखरूपत्वमुच्यते। अथवा – शं सुखं लौकिकं भवति यस्मादग्नेरिव विस्फुलिङ्गः, सुखस्य वा भूरुत्पत्तिस्थानमग्निरिव विस्फुलिङ्गस्य स शम्भुरित्यतोऽपि शिवस्यापरिमितसुखरूपत्वमुच्यते। उत्पत्तिस्थानत्वञ्च तस्य स्वलवाभिव्यक्तिप्रदत्वेन। शम्भोरित्यत्र सत इत्यध्याहार्यम्। तेन लक्षणकोटिनिवेशो लभ्यते। शम्भुशब्दश्चायं विवक्षितावयवार्थोऽवश्यं[11] विज्ञेयः। रूपशब्दप्रतियोग्याकाङ्क्षापूरणस्य पूर्वसूत्रादनुवृत्तेनैव शिवशब्देन षष्ठ्यन्ततया विपरिणतेन संभवात्। वक्ष्यमाणशिवाभिव्यक्तेः परमपुरुषार्थत्वसिध्यर्थं लक्षणस्य[12] विषयज्ञानातिव्याप्तिवारणार्थञ्च[13] शिवस्य सुखरूपताया अवश्यं प्रतिपाद्यत्वाच्च। अत एव सुखरूपत्वमुक्तं सिद्धवत्कृत्य तस्य मुक्तभोग्यत्वं वक्ष्यति **विदुर्बुधा इति**।

तस्माच्छम्भोस्सतः तद्व्यतिरेकेन इदमिति प्रमाणवृत्त्यादिदृश्यत्वरूपजडत्वव्यतिरेकेण तद्व्यतिरिक्तत्वे सति ज्ञेयं शिवस्य रूपं स्वरूपमिति पर्यवसितोऽर्थः। तदाह – शम्भोस्तद्व्यतिरेकेण ज्ञेयं रूपमिति। ननु तर्हि तत्स्वरूपं केन ज्ञेयम्[14]। येन तव स्वयंप्रकाशत्वं स्यात्। किञ्चानुपभोग्यस्य सुखस्याभावात् भोगपर्यन्तज्ञानविषयत्वं[15] वाच्यमित्याकाङ्क्षायां शिवस्वरूपस्य सुखस्य वक्ष्यमाणरीत्या परपुरुषार्थत्वात्मुक्ता एवैतत्भोक्तार इत्याह विदुर्बुधा इति। बुधाः – तत्त्वज्ञानेनापसारितमलाश्शिवानुग्रहेण स दृष्टयः विदुः भुञ्जत इत्यर्थः। ज्ञानसामान्यार्थोऽपि विदिरत्र स्वेष्टद्विष्ट[16]सजातीयानुभवरूपतद्विशेषपरः। अत्र शिवस्य स्वयंप्रकाशज्ञानरूपत्वे परानन्दरूपत्वे मुक्तस्य तत्भोक्तृत्वे च प्रमाणं, **अचिन्त्यागमे** –

स्वसंवेद्यं परंज्योतिर्ज्ञप्तिरूपो महाप्रभुः।
आनन्दो ब्रह्म एवैतत् जायतेऽस्माच्चराचरम्।।
आनन्दाद्वर्धते तत्तु तस्मादानन्दमृच्छति[17]।
आनन्दान्तर्गता मुक्तिः केचिदानन्द एव हि।।

---

[9] (टि) हेतुत्वस्यैवासंभवादिति। अयमपरोक्ष इति व्यवहारे व्यवहर्तव्यस्य ज्ञानविषयत्वावश्यक-त्वादिति भावः।

[10] (टि) समत्वासिद्धेरिति। अणुशिवयोरिति शेषः।

[11] (टि) अवयवार्थः – पूर्वोक्तार्थः।

[12] (टि) लक्षणस्य – शिवलक्षणस्य।

[13] (टि) अतिव्याप्तिवारणार्थञ्चेति। विषयज्ञानस्यापि चिदवभास्यत्वादतिव्यातिः। तस्य सुखरूप-त्वाभावात्तद्वारणमिति भावः।

[14] (टि) केन ज्ञेयत्वमित्यत्र किं शब्द आक्षेपे न केनापीत्यर्थः। यत्किञ्चित् ज्ञेयत्वेऽपि स्वप्रकाशत्वोक्तिः परिहासास्पदेत्याह – येन तवेति।

[15] (टि) भोगपर्यन्तं – यावत्भोगकालम्।

[16] (टि) स्वेष्टद्विष्टेति – स्वेष्टस्वद्विष्टेत्यर्थः।

[17] (टि) आनन्दमृच्छति – आनन्दे लयमेति।

**सर्वज्ञानोत्तरे** –

निर्विकल्पमचिन्त्यञ्च हेतुदृष्टान्तवर्जितम्।
तत्सुखं परमं ज्ञेयमात्यन्तिकमनौपमम्।।

**ज्ञानतिलके** –

सुखानि यानि लोकेऽस्मिन् संभोगाश्च मनोरमाः।
क्षणिकान्यतितुच्छानि न तेषु रमते बुधः।।
मोक्षेषु चाक्षयं सौख्यं नैरन्तर्येण चाक्षयम्। इति।।

यत्तूक्तं **रत्नत्रये** –

वेदान्तैश्च कुळाम्नायैस्तथाऽन्यैः प्रतिपाद्यते।
आनन्दविप्रलब्धानां आनन्दोपहिता चितिः[18]।।
चिन्महोदधिगाम्भीर्यमवसीयेत सूरिभिः।
अवगाह्य परानन्दलहरीं यदि नोत्क्षिपेत्।।

इति सोपहासं[19] शिवस्य ज्ञानस्वरूपत्वमेव नत्वानन्दस्वरूपत्वमिति तत्प्रकरणवाक्यत्वान्मूलागमविरोधेऽनुपादेयमेव। यदप्यागमस्थानन्दशब्दस्यावयवार्थानुरोधेन पूर्णपरत्वमिति व्याख्यानं तदपि निर्बीजम्। सुखे रूढस्यानन्दशब्दस्योक्तार्थकत्वकल्पनायां प्रमाणाभावात्, क्वचित्साक्षात्सुखशब्दोपादानाच्च। आनन्दशब्दस्य पूर्णार्थत्वे तस्य लौकिकसुखवैलक्षण्यकथनमपि तत्रासङ्गतं स्यादिति। अत एव पूजास्तवगतं बोधानन्दमयेति पदं व्याचक्षणेनोक्तम् – "अनेन सुखदुःखपरित्यागो मोक्ष इति येषां मतं ते निरस्ता" इति। न च परसुखस्य कथं परेणानुभवः अदृष्टेः समत्वाच्चेत्युक्तमिति वाच्यम्। आगमगम्येऽर्थे युक्तेरनवतारात्, तत्भोक्तृत्वादेवैकान्तिकचिद्रूपशिवप्रकाशतुल्यत्वानङ्गीकाराच्च। एवं दृश्यमित्यत्रापि संबध्यते।

प्रतियोग्याकाङ्क्षायां पशोः प्रतियोगितयैकान्तिकजडप्रपञ्चभोक्तृत्वं, अत एवैकान्तिकाजाड्यमप्युक्तमेवार्थात्। एवञ्चैकान्तिकचिदचित्भोक्तृत्वं पशोस्तटस्थलक्षणं, तदुभयविलक्षणत्वं स्वरूपलक्षणं, सूर्यालोकतमोग्राहकतदुभयविलक्षणचक्षुः प्रकाशवदित्युक्तं भवति। प्रमाणान्तरेण पृथक्तया चावेद्यं स्वसंवेद्यमैकान्तिकचिदात्मकपरानन्दस्वरूपं पत्युः स्वरूपलक्षणमप्युक्तमेव। दृश्यञ्चेज्जडिमा भवेदित्यापादनमुखेन परिशिष्टस्य पाशस्य दृश्यत्वमैकान्तिकजाड्यञ्च तटस्थलक्षणं स्वरूपलक्षणञ्च यथाक्रममर्थादुक्तं भवति। तदेवं सूर्यघटादिचक्षुः प्रकाशानामिव पतिपाशपशूनां स्वरूपमैकान्तिकचिज्जडतदुभयविलक्षण–

---

[18] (टि) आनन्दोपहिता चितिः – आनन्दानुभवरूपा।

[19] (टि) सोपहासमिति। आनन्दविप्रलब्धानामिति पदेन अवगाह्येति वाक्येन चोपहासप्रतीतेः। तत्राद्यस्स्फुटः। द्वितीयस्तु परानन्दलहरीमवगाह्य यदि नोत्क्षिपेत्तदा सूरिभिश्चिन्महोदधिगांभीर्यमेव तस्मादवसीयेत – निर्णीयेत। निर्विशङ्कमुपदिश्येतेति यावदिति गूढ उपहासः। गूढतरोप्यत्रोपहासस्स्फुरति। परस्स्यान्यस्य य आनन्दः तस्य या लहरी तस्यामवगाह्य तावतैवाविश्रम्य यदि नोक्षिपेन्नविकिरेदित्यर्थान्तरगर्भीकारेण। यदि परानन्दो यथेच्छं लभ्येत तर्ह्येते न तं केवलमनुभवेयुः किन्त्वनुभूयोत्क्षिपेयुरपि परकीयत्वादिति।

मिति त्रिविधं पदार्थजातमिति स्थितम्।।

।।षष्ठसूत्रसंग्रहभाष्यं समाप्तम्।।

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यायते –

पूर्वं शिवस्वरूपं, तत्र प्रमाणं, तत्तटस्थलक्षणञ्च प्रथमद्वितीययोरुक्तम्, पूर्वोक्तसंसृति-फलभागित्वासिध्यर्थं वक्ष्यमाणशिवाभेदतदभिव्यक्तिरूपमुक्तिफलभागित्वसिध्यर्थञ्च पशुस्वरूपं तत्प्रमाणञ्च तृतीयचतुर्थयोरभिहितम्। प्रसङ्गाच्च मलरुद्धस्वदृक्क्रिय इति कर्मानुसारतस्संसृतिं करोतीति च पाशस्वरूपं तत्प्रमाणञ्च परित्याज्यत्वबोधनाय कथितम्। तद्विरोधिन्यश्च काश्चन विप्रतिपत्तयो निराकृताः। इदानीं शिवस्य किं स्वरूपलक्षणं, पशुपाशयोरपि के तटस्थस्वरूपलक्षणे इत्याकांक्षायां, "पाशागम्यो महेशान" इति,

नाध्यक्षं नापि तल्लैङ्गं न शाब्दमपि शाङ्करम्। इति,
"यत्सुखं परमं ज्ञेयम्" इति, "स्वसंवेद्य परञ्ज्योति"रिति,

**चाचिन्त्यादि**वचनानुसारेण पशुपाशज्ञानप्रमाणावेद्यस्वप्रकाशचिद्रूपपरानन्द एव शिवस्य स्वरूपम्। स च पुरुषार्थत्वान्मुक्तभोग्य इति स्वप्रकाशानन्दरूपं शिवस्य स्वरूपलक्षणं पशोरप्यात्यन्तिकचिदचिद्भोक्तृत्वं तटस्थलक्षणं तदुभयविलक्षणत्वं स्वरूपलक्षणं पाशस्यापि दृश्यत्वं तटस्थलक्षणं आत्यन्तिकजाड्यं स्वरूपलक्षणं उभयात्मकपशुव्यावृत्तये आत्यन्तिकेत्येवमेतेषां लक्षणान्यभिसन्धाय पशुशिवयोर्लक्षणे श्रुत्यार्थाच्च पाशलक्षणं षष्ठसप्तमाभ्यां प्रतिपादयति – **अदृश्यञ्चेदिति।**

अत्र नैयायिकादयः शिवस्य न ज्ञानरूपत्वं, तत्र मानाभावात्, किन्तु विपरीतमेव। निगमागमानुमानादिभास्यत्वादित्याहुः। तान्निरस्यति दृश्यञ्चेत् जडिमा भवेदिति। प्रमाणजन्यवृत्त्या तद्व्यक्तचिच्छक्त्या वा शम्भोः स्वरूपं दृश्यञ्चेज्जडिमा जडत्वं भवेत्। तद्विषयत्वस्य जडत्वव्याप्तत्वात्। न च वृत्तिविषये जीवात्मनि जडत्वाभावात् व्यभिचारः। तस्यापि वृत्तिविषयत्वानङ्गीकारात्। प्रमाणाधीनवृत्तिविषयत्वे तदप्रवृत्तिदशायामात्मनोऽप्रकाशप्रसङ्गात्। नचेष्टापत्तिः। कदाचिदपि संशयविपर्यासाध्यभावेनाप्रकाशस्यानुपपत्तेः। न हि कश्चिदप्यहं नाहं वेति कदाचिदपि सन्दिग्धे नाहमिति वा विपर्यस्यति। वृत्तिविषयत्वाभावे आत्मनः केन प्रकाश इति चेन्न। स्वप्रकाशतया स्वेनैव प्रकाशोपपत्तेः।

ननु स्वस्य स्वविषयत्वन्न संभवति, स्वात्मनि वृत्तिविरोधान्नहि च्छिदाच्छिद्यत इति चेन्न। छिदायाश्छेद्यत्वप्रयोजककुठारादिसंयोगित्वाभावेनैवाच्छेद्यत्वोपपत्तेः। न हि वयं **प्राभाकरादि**वज्जन्यज्ञानस्य स्वप्रकाशत्वं ब्रूमः। येनात्रापि ज्ञानविषयत्वप्रयोजकज्ञानकारण-सन्निकर्षाद्यनाश्रयत्वेन तदविषयत्वं स्यात्। किन्तु नित्यस्यात्मप्रकाशस्य। नन्वात्मनस्स्वप्रकाशत्वे विरोधपरिहारेऽपि स्वप्रकाशत्वे किं मानमिति चेन्न। अनवस्थापरिहाराय कस्यचित् स्वप्रकाशत्वेनाङ्गीकर्तव्यतया वृत्तेस्स्वविषयत्वप्रयोजकसन्निकर्षाद्यनाश्रयत्वेन स्वप्रकाशत्वानुपपत्त्याऽऽत्मनः स्वप्रकाशत्वसिद्धेः। ननु नानवस्था, ज्ञानस्यावश्यवेद्यत्वाभावात्।

यदि हि ज्ञानमवश्यवेद्यं स्यात्तदा घटज्ञानतद्गोचरज्ञानादीनां ज्ञानजननेऽनवस्था स्यात्। नत्वेवमङ्गीक्रियते। न च ज्ञानतद्गोचरज्ञानादीनां वेद्यत्वाभावेऽप्रमाणिकत्वेनासत्वापत्त्याऽवश्यं वेद्यत्वमङ्गीकर्तव्यमिति वाच्यम्। कालान्तरेऽपि तद्गोचरज्ञाने प्रामाणिकत्वोपपत्त्या तत्कालेऽवश्यवेद्यत्वाभावेनानवस्थाभावात्। न च कदाऽपि घटज्ञानतद्गोचरज्ञानव्यतिरेकेण विषयसहस्रघटितसंवेदनं नानुभूयत इति वाच्यम्।

ज्ञानं जानामीत्येव सर्वस्यापि ज्ञानस्यानुभवेन विषयसहस्रानवच्छेदेऽपिसर्वेषां ग्रहणोपपत्तेरिति। मैवम् – घटज्ञानस्य घटज्ञानविषयत्वावगाहि ज्ञानागोचरत्वे तथात्वस्यासिद्धिप्रसङ्गेन तदवगाहिज्ञानस्याभ्युपगन्तव्यत्वेन तस्यापि ज्ञानत्वमात्रेणोल्लोखे विषयावच्छेदस्यासिद्धिप्रसङ्गेन तद्विषयावच्छिन्नतया ग्रहणे तस्य तस्यापि विषयावच्छेदेन ग्रहणे विषयसहस्रघटितसंवेदनानुभवप्रसङ्गेन[20] स्वप्रकाशत्वमेवावश्याभ्युपेयम्। तच्च न वृत्तिगतमित्यात्मनः स्वप्रकाशत्वसिद्धिः। अथवाऽनुमानादिजन्यां शिवगोचरां बुद्धिवृत्तिमङ्गीकृत्य तत्प्रकाश्यत्वन्निषेद्धुमाह – **दृश्यञ्चेदिति**।

बुद्धिवृत्तिप्रकाश्यञ्चेज्जडवृत्तिप्रकाश्यत्वेन जडं स्यादित्यर्थः। अतोऽनुमानजन्यवृत्तिसत्वेऽपि तस्याजडत्वात् तत्कृतविषयसंबन्धश्चैतन्यमेव शिवस्वरूपप्रकाशकमिति ज्ञेयत्वमेव, न वृत्तिप्रकाश्यत्वम्। ननु घटादावपि वृत्तिकृतसंबन्धश्चैतन्यं प्रकाशकम्। सत्यं वृत्तिरपि सत्वोद्रिक्ततया तामसस्य घटादेः प्रकाशिका न तु चैतन्यं प्रति। न हि चन्द्रिका घटादीन् प्रति प्रकाशिकेति सौरालोकं प्रत्यपि प्रकाशिका भवति।

तदुक्तं **मोक्षकारिकासु** –

बुद्धिबोधप्रकाश्यत्वं शिवस्यान्यैस्समीहितम्।
शैवं मानमविन्दद्भिः पशुमानानुवासितैः।।
आत्माऽप्यविषयो यस्य भोक्ता भोग्यत्वतः कथम्।
स्वप्रकाशमसौ देवं प्रकाशयति शङ्करम्।।
सर्वदोत्पन्नमानोऽसौ पुरुषो नानुभूयते।
न सोऽस्ति कालो यत्रायमत्रस्थेनानुभूयते।।
पूर्वापरत्वतो युक्तमात्मबोधस्य तस्य च।
उपलभ्योपलब्धृत्वं तदभावादिदं त्वसत्।।
परिणामी पुमान् भोग्यः प्राप्तस्तत्गोचरो यदि।
विपरीता च बुद्धिस्स्यात् विरोधश्चापि दर्शने।।
अन्तःकरणवृत्तिर्या बोधाख्या सा महेश्वरम्।
न प्रकाशयितुं शक्ता पाशत्वान्निगळादिवत्।।
बुद्धौ मितायान्नेशस्य प्रतिबिम्बोऽमितत्वतः।
खड्गेऽभीशुमतो यद्वत्तदंशस्य त्वसौ भ्रमः।।

---

20 (टि) विषयसहस्रघटितसंवेदनेति। यद्येकदा बहूनि ज्ञानानि तत्तद्विषयावच्छेदेन विषयी कुर्वाणमेकं ज्ञानमभ्युपगम्यते तदा तस्य विषयसहस्रघटितत्वमपरिहार्यम्। तादृशञ्च ज्ञानन्नानुभवसिद्धमित्यर्थः। तथात्वस्य – घटज्ञानत्वस्य।

दाह्याभिभाव्यधर्माणः पाशास्तेऽतो न शूलिनः।
दाहाभिभवयोः कर्तुः प्रकाशायाभिवाञ्छिताः।।
काष्ठैर्दाह्यैर्न दाहस्य कर्ता वह्निः प्रकाश्यते।
नाभिभाव्याभिरुल्काभिर्दिनकृच्चाभिभावकः।।
विशुद्धेनात्मतत्त्वेन चैतन्याख्येन सूत्रकृत्।
शिवशक्तिकलेद्धेन शिवो ध्येय इति ब्रुवन्।।
पाशागम्यो महेशान इति ख्यापयति स्म नः।
न ध्येयो नापि च ज्ञेयस्तस्मादीशोऽणुबन्धनैः।।
शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा।
शिवं शक्त्यादिभिस्सार्धं पश्यत्यात्मा गतावृतिः।। इति।

अत्राद्यकारिकया शिवः बुद्धिवृत्त्युपारूढ एव प्रकाश्यः प्रकाश्यत्वात् घटादिवदिति शैवशास्त्रानभिज्ञानां पशुशास्त्रवासनावासितानां सांख्यादीनां मतमुपन्यस्य द्वितीयया **कैमुतिकन्यायेन** निरस्यति। बुद्धिवृत्तेः प्रत्यासन्न[21] आत्माऽपि विषयो न भवति। दूरे शिवः। आत्मनो विषयत्वाभावे हेतुगर्भं विशेषणं भोक्तेति। बुद्धिवृत्तेस्तद्विषयकत्वाभावे हेतुर्भोग्यत्वत इति। शिवस्य तदप्रकाश्यत्वे हेतुमाह – **स्वप्रकाशमिति।** तथा च शिवो न वृत्तिप्रकाश्यः स्वप्रकाशत्वात्, जीवात्मवत्। जीवो न तत्प्रकाश्यतत्भोक्तृत्वात्, चन्दनाद्यप्रकाश्य तत्भोक्तृवदिति तात्पर्यम्। तृतीयया जीवात्मनस्स्वप्रकाशत्वसमर्थनेन दृष्टान्ते साधनवैकल्यं निरस्यति। पुरुषस्तावत्सर्वदा प्रकाशते। स यदि बुद्धिवृत्त्या तदुपारूढचैतन्येन वा प्रकाश्येत, सर्वदोत्पन्नबुद्धिवृत्तिर्भवेत्। न तथा दृश्यत इत्याह – **सर्वदेति।** मानपदेन बुद्धिवृत्तिरुच्यते। तथा च सर्वदा प्रकाशाय वृत्त्यनुपारूढप्रकाश्यत्वात् कदापि वृत्त्युपारूढप्रकाश्यता नास्तीत्याह – **न सोऽस्तीति।**

यत्र यस्मिन्काले अत्रस्थेन वृत्त्युपारूढेनानुभूयते, स कालो नास्तीति योजना। अथवा सर्वदा प्रकाशो द्वितीयार्धेनाभिधीयते। अत्रस्थे एतदात्मनि संबन्धिनि यत्र कालेनानुभूयते पुरुषः सकालो नास्ति सर्वदाऽनुभूयत इत्यर्थः। एवं सर्वदा प्रकाशत्वमुपपाद्य प्रकाशान्तरप्रकाश्यत्वे प्रकाशविनाकृतस्याप्यवस्थानं स्यात्तदभावात्तन्नोपपद्यत इति स्वप्रकाश्यत्वमेवेति चतुर्थ्या प्रतिपादयति – **पूर्वेति।** आत्मबोधस्य[22] तस्य तच्छब्दनिर्दिष्टस्य च आत्मबोधविषयप्रकाशस्य चोभयोर्यदिपौर्वापर्यं स्यात्, प्रकाशविनाकृतस्याप्यात्मनो यद्यवस्थानं स्यादित्यर्थः। तदा तयोरुपलभ्योपलब्धृत्वं भवेत्। प्रकाश्यप्रकाशकभावो भवेत्। तदभावात्पौर्वापर्याभावात् इदमुपलभ्योपलब्धृत्वमसत् अयुक्तमित्यर्थः। एवं दृष्टान्ते साधनवैकल्यं निरस्य साध्यवैकल्यं निरस्यति – **परिणामीति।**

बुद्धिवृत्तिप्रकाश्यत्वे पुंसो विषयवत्भोग्यत्वात्परिणामित्वं बुद्धेश्च भोक्तृत्वादपरि-

---

[21] (टि) प्रत्यासन्न इति। प्रत्यासन्नत्वमिहोपकरणोपकरणिभावेन। न तु सामीप्यमात्रम्। तस्य शिवेऽप्यविशेषात्।

[22] (टि) आत्मबोधस्य – आत्मस्वरूपबोधस्य।

णामित्वञ्च स्यात्। तच्च दर्शनविरुद्धमिति[23] बुद्धिवृत्तिप्रकाश्यत्वं पुंसो नास्तीति दृष्टान्ते साध्यसिद्धिरित्यर्थः। एवं विषयत्वाभिमतशिवस्वरूपपर्यालोचनया वृत्तिविषयत्वाभावमुपपाद्य विषयित्वाभिमतवृत्तिपर्यालोचनयाऽपि तमुपपादयति – **अन्तःकरणेति।** पूर्वत्र शिवपक्षकमनुमानमुक्तम्। अत्र तु वृत्तिपक्षकमिति विशेषः। न च पाशत्वेऽपि शिवस्वरूपप्रकाशकत्वमस्त्विति हेतोरप्रयोजकत्वं शङ्कनीयम्।

परमपुरुषार्थरूपशिवप्रकाशकत्वे तदावारकत्वरूपपाशत्वायोगेन हेत्वाभावप्रसङ्गस्यैव विपक्षे बाधकत्वात्। विषयप्रतिबिम्बाधारत्वेन बुद्धिवृत्तेर्विषयप्रकाशत्वमिति परमतमनुसृत्यापि वृत्तेर्न शिवप्रकाशकत्वमित्याह – **बुद्धाविति।** अपरिमितिस्य शिवस्य बुद्धिवृत्तौ सूर्यस्य खड्ग इव सर्वात्मना प्रतिबिम्बायोगेन तदंशस्य प्रतिबिम्बाभ्युपगमेंऽशप्रतिबिम्बाधारत्वेनांशविषयिण्या वृत्तेर्निरंशेंऽशविषयकत्वात् भ्रमत्वं स्यादित्यर्थः। तदंशस्य तु प्रतिबिम्बाभ्युपगम इति शेषः। असौ प्रतिबिम्बाधारभूतावृत्तिरित्यर्थः।

वृत्तिपक्षकानुमानद्वयप्रतिपादकं समनन्तरकारिकाद्वयं स्पष्टार्थम्। प्रदर्शितानुमानानामागमसंवादं दर्शयति – **शिवशक्तीति।** शिवशक्त्या दीपितनिर्मलज्ञानशक्तिना पुरुषेण शिवो ध्येय इति ब्रुवन् **रौरवसूत्रकारः** पाशागम्यत्वं शिवस्य प्रत्यपीपददित्यर्थः। उपसंहरति – **तस्मादिति**। अणुबन्धनैः पाशैर्बुद्धिवृत्तिभिरित्यर्थः। केन तर्हि प्रकाश्यते शिव इति जिज्ञासायामाह – **शिवार्केति।**

चैतन्यप्रकाश्यत्वं न केवलं शिवस्य किन्तु तच्छक्तेरपीति दर्शयितुं शक्त्यादिभिः सार्धमित्युक्तम्। अदृश्यञ्चेदसत्भाव इत्यादेः पूर्वैव व्याख्या।।

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये षष्ठसूत्रभाष्यम् समाप्तम् ॥**

[23] (टि) दर्शनविरुद्धं – अनुभवविरुद्धम्

# सप्तमसूत्रभाष्यम्

पूर्वं त्रिविधं पदार्थजातमिति स्थितम्। अत्रैकान्तिकशिवाद्वैती नन्वात्यन्तिक[1]चिदचिदात्मकमेव पदार्थजातं ऐकान्तिकचिद्घनानन्दपतिव्यतिरिक्तपशोरभावात्, तस्यापि तादृग्रूपत्वात्, नचोक्तेन तदनुभवितृत्वेन[2] पशोस्तद्वैलक्षण्यं[3], श्रुत्यादिष्वात्यन्तिकशिवाद्वैतश्रवणेन तदसिद्धेरित्याशङ्क्यागमानुसारेण जीवस्तदानन्दानुभवितेत्युक्तमेवार्थमिदानीं परिशेषानुमानेनापि[4] सप्तमसूत्रेण प्रतिपादयति।

## सप्तमसूत्रम्

**नाचिच्चित्सन्निधौ किन्तु न वित्तस्ते उभे मिथः।**
**प्रपञ्चशिवयोर्वेत्ता यस्स आत्मा तयोः पृथक्॥**

अत्रायमनुमानप्रकारः – परानन्दशिवस्वरूपं केनचित् अनुभाव्यम्, पुरुषार्थत्वात्, नावेद्यः पुरुषार्थ इत्यवेद्यस्यापुरुषार्थत्वात्। न च हेत्वसिद्धिः। परानन्दरूपशिवस्याभिव्यक्तेस्तत्र तत्रागमेषु परमपुरुषार्थताया उक्तत्वात्। ततस्तत्स्वरूपं जीवात्मभोग्यं, अन्यावेद्यवस्तुत्वात्, अन्याभोग्यत्वे सति भोग्यत्वात्, प्रपञ्चवदिति। सूत्रे प्रपञ्चशिवयोर्वेत्ता यस्स आत्मेत्यत्र शिवस्य वेत्तेति सामान्यानुमानस्य साध्यनिर्देशः। यस्स आत्मेति परिशेषानुमानस्य। हेतुस्तु स्पष्टत्वान्नोक्तः। अत्र प्रपञ्चग्रहणं दृष्टान्ते साध्यप्रदर्शनार्थम्। प्रपञ्चस्य यथा जीवात्मभोग्यत्वं तथा शिवस्यापीत्यर्थः। यद्वोभयभोक्तृत्वरूपतल्लक्षणकथनार्थं तत्। अत्रापि विधि-पूर्वोक्तरीत्या भोगपर्यन्तः। ननु अन्याभोग्यत्वं शिवस्यासिद्धम्। प्रपञ्च एव शिवस्य भोक्ताऽस्त्वित्यतो[5] विशेषणासिद्धो हेतुः। किञ्च प्रपञ्चेऽपि साधनवैकल्यमेव, शिवस्यैव तत्भोक्तृत्वसंभवादित्याशङ्क्या प्रथमं प्रौढिवादेन[6] चिज्जडयोरालोकान्धकारयोरिव प्रपञ्चशिवयोस्सहावस्थानमेव नास्ति, कुतोऽन्योन्यभोक्तृत्वं, येनोक्तदोषौ स्यातामित्याह –

---

[1] (टि) आत्यन्तिकेति। आत्यन्तिकचिदात्मकं तादृशाचिदात्मकञ्चेति द्विविधमेव पदार्थजातं, न तु चिदचिदात्मकः कश्चन पदार्थोऽस्ति। येन पशुपतिपाशभेदेन त्रिविधं स्यात्। न च पशुना त्रैविध्यम्। तस्याप्यैकान्तिकचिद्रूपत्वेन पत्यव्यतिरेकादित्यर्थः।

[2] (टि) तदनुभवितृत्वेन – पत्यनुभवितृत्वेन।

[3] (टि) पशोरित्येतन्मध्यदीपिकान्यायेन पूर्वोत्तरोभयान्वयि। अत्र शिवाद्वैतीति वर्तनादाशंक्याग-मानुसारेणेत्यत्राशङ्कतेऽत आगमानुसारेणेति भवितव्यम्।

[4] (टि) अनुमानेनापि सप्तमसूत्रेणेति समानाधिकरणे। तथा चानुमानपदं न्यायलक्षकमिति वेदित-व्यम्। अथवा सप्तमसूत्रेणानुमानेनापि साधयतीत्यर्थः।

[5] (टि) प्रपञ्च एव शिवस्य भोक्तेति। ननु किमिदमाशङ्क्यते। कथञ्जडस्य प्रपञ्चस्य शिवं प्रतिभोक्तृत्वमिति चेत्, अयमाशयः – ननु को भोक्ता चेतनः उत जडः आहोस्विदभयम्। नाद्यः। शिवस्यापि चेतनत्वेन भोक्तृत्वे साधनवैकल्यम्। न द्वितीयः। प्रपञ्च एव शिवस्य भोक्तेति विशेषणासिद्धो हेतुः। नापि तृतीयः। चिज्जडयोस्संबन्धासंभवेन भोक्त्रभावप्रसङ्गात्। अन्यथा शिवस्यापि जडसंबन्धसंभवेन भोक्तृत्वे प्रथमकल्पदोषापत्तेरिति।

[6] (टि) मतान्तरं – यावतांऽशेन चोदितदोषनिवारणमात्रं भवति स्फुरत्येव मुखतो दोषान्तरे तावता समाधानाभिप्रायोऽत्र प्रौढ्या मतान्तराश्रयणम्। नत्विदमपि किञ्चन मतमस्तीति।

**नाचिच्चित्सन्निधाविति**।

चिद्रूपशिवसन्निधौ तमोरूपजडप्रपञ्चो नास्त्येव। न हि सौरालोकसन्निधौ तमो वर्तते। अत एव तृतीयाद्द्युलोकात्परं विकारावर्ति च ब्रह्मेति केषाञ्चिदङ्गीकार अतो नान्योन्यभोक्तृत्वसंभावनाऽपीति भावः। ननु तत्किं अयमेव सिद्धान्तः। तथात्वे तस्य जगदुपादानत्वं व्यापित्वञ्च पूर्वोक्तं विरुध्येत। तस्मादुभयोः सहावस्थानं त्वयाऽङ्गीकरणीयमेवेत्यभिप्रायेण पृच्छति किन्त्विति। अत्र किन्तु शब्दः पूर्वोक्तार्थे विरोधाभिसन्धानपूर्वकप्रश्ने। व्याकृतश्चैवं किन्तु शब्द एवं भूतेषु स्थलेषु बहुशः **पञ्च-पादिकाविवरणे** तत्त्वदीपनकारेणोक्तार्थविरोधाभिसन्धानपूर्वकप्रश्नपरतया। अत्र परमसिद्धान्तः। अस्त्वेवं तथाऽपि नान्योन्यभोक्तृत्वमित्याह – **न वित्तस्ते उभे मिथ इति**। अत्रापि विधिः पूर्ववदेव भोगपर्यन्तार्थः। अचित्प्रपञ्चो न शिवस्वरूपं वेत्ति, अचेतनत्वात्। नापि चिद्रूपश्शिवः प्रपञ्चम्। तस्य नित्यतृप्तत्वेन स्वेष्टद्विष्टादिगर्भभोगपर्यन्तवेदनासंभवात्। अतो न चोदितदोषाविति। यद्वा – चिच्चित्सन्निधावित्यसन्दिग्धाविपर्यस्तनित्यविशेषदर्शनचिद्रूपशिवसन्निधौ मायाविना तेन प्रदर्शितोऽचित्प्रपञ्चो नास्ति असत्कल्पः स्वकार्यव्यामोहकारीत्यर्थः[7]। न हि मायाविनैन्द्रजालिकेन प्रदर्शितो गजादिः परिषदमिव मायाविनमैन्द्रजालिकं व्यामोहयतीति भावः। अतो मायाव्यैन्द्रजालिक इव चिद्रूपशिवोऽपि तदार्जितं सुखदुःखादिकन्नानुभवति। न वा परिषदिव मायाविमर्शपूर्वकं अर्थतत्त्वं[8] निश्चिनोतीति भावः। अनन्तरव्याख्याने विदिर्विमर्शपूर्वकनिश्चयपर इति। ननूक्तं बहुशस्समत्वादेकत्वाद्वा तद्विषयत्वानुपपत्तिरिति[9] तत्राह – **तयोः पृथगिति**। तस्य प्रकाशस्वरूपत्वेऽप्युक्तप्रमाणसिद्धेन तदनुभवितृत्वेन शिवप्रकाशापेक्षयाऽस्त्येव वैलक्षण्यमित्यपि कल्प्यते। न च तावता तस्य केवलजडत्वप्रसङ्गः। केवलजडप्रपञ्चा-पेक्षयाऽपि तत्भोक्तृत्वेन तस्य वैलक्षण्यात्। यथा प्रकाशस्यापि चक्षुषस्सौरालोकापेक्षया घटाद्यपेक्षया च वैलक्षण्यं, तथा च यथा चक्षुषः तदुभयग्राहकत्वं तथाऽत्रापि तदुभयवैलक्षण्यादुभयविषयकत्वम्। अत एवागमेषु तत्र तत्राणुशिवयोश्चक्षुः प्रकाशसाम्योपदेशः। न चैवं शिवानन्यत्वश्रुत्यागमादिविरोधः। ईदृशविशेषस्य वक्ष्यमा-णानन्यत्वविरोधाभावादिति। तस्मात्पतिपशुपाशानामुक्तं लक्षणं त्रैविध्यञ्च सुस्थम्। सप्तमसूत्रस्य षष्ठसूत्रैकवाक्यत्वान्न विस्तरेण व्याख्या॥

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये सप्तमसूत्रभाष्यम् समाप्तम् ॥**

---

[7] (टि) स्वकार्यव्यामोहकारीति। स्वस्य यत्कार्यं व्यामोहस्तत्कारीत्यर्थः।

[8] (पा) अर्थांश

[9] (टि) तद्विषयत्वानुपपत्तिरिति। जीवस्वरूपज्ञानस्य शिवस्वरूपज्ञानसमत्वात्तेनैक्यात्तस्येवास्यापि निर्विषयकत्वेन शिवविषयकत्वानुपपत्तिरित्यर्थः।

# अष्टमसूत्रभाष्यम्

तदेवं शिवपशुपाशस्वरूपप्रमाणलक्षणयुक्तिसाधनफलेषु पृष्ठेषु शिवपशुपाशस्वरूपं तत्र प्रमाणं तल्लक्षणद्वयं चोक्तम्। तदुपयोगिन्यश्च काश्चन युक्तयोऽप्युक्ताः। इदानीं तादृशशिवप्राप्तिसाधनं किमित्याकांक्षायां सामान्यतो मुक्तिस्वरूपं वर्णयन् शुद्धावस्थाञ्च दर्शयन्दीक्षादिसकलकर्मोपार्जितं यथाधिकारं निगमागमादिवाक्यजन्यं तत्तदर्थेषु हेतु-दृष्टान्तप्रतिपादकाभिर्गुरूक्तिभिर्निवृत्तासंभावनं शिवानन्यत्वेन ज्ञानमेव साक्षात्तत्प्राप्तिसाधनं दीक्षादीन्यागमिकानि कर्माणि गर्भाधानादीनि वाराणसीप्रयाणादीनि च वैदिकानि च तत्प्राप्तिसाध-नत्वेनोक्तान्यपि तत्फलस्वभावपरामर्शेन तेषां तत्साधनत्वनिषेधकवाक्यान्तरपर्यालोचया च ज्ञानद्वारा तत्साधनानीत्याह –

# अष्टमसूत्रम्

**स्थित्वा सहेन्द्रियव्याधैस्त्वान्नवेत्सीति बोधितः।**
**मुक्त्वैतान् गुरुणाऽनन्यो धन्यः प्राप्नोति तत्पदम्।। इति।**

अत्र बोधितस्तत्पदं प्राप्नोतीत्यन्वयः। बोधित इति क्तप्रत्ययप्रतीतेन णीजर्थप्रयोजक-व्यापारकर्मत्वेनानुषङ्गतः। प्रकृत्यर्थबोधकर्तृत्वं तस्य प्रतीयते[1]। अण्यन्तार्थकर्तुरेव ण्यन्तार्थापेक्षया कर्मसंज्ञाविधानात्। ततश्च बोद्धा इत्यप्यर्थो लब्धः। तं विना कर्मप्रतीतेरपर्यवसानात्। यद्विना प्रतीतेरपर्यवसानं सोऽपि शब्दार्थ इति न्यायविदां वचनात्। तत्पदं प्राप्नोति। यद्यपि शिवरूपस्य नित्यसिद्धत्वात् जीवतादात्म्यवत्वाच्च नित्यप्राप्तत्वमेव। तथाऽपि ग्राहकस्य तत्त्वेनाद्यप्रबुद्धत्वेन[2] पूर्वमप्राप्तकल्पं शिवानन्दस्वरूपं तन्मोचनेनेदानीं प्राप्तमिव भवति, विस्मृतदृष्टं कण्ठस्थग्रैवेयकमिवेति प्राप्नोतीत्युच्यते। ततश्च बोद्धा तत्पदं प्राप्नोतीत्युत्सर्गतः प्राप्तविशिष्टवैशिष्ट्यन्यायेन बोधविशिष्टस्य तत्प्राप्तिहेतुत्वबोधनात् सिद्धसाध्यसमभिव्याहारन्यायात् बोधप्राप्त्योस्समानकर्तृकत्वबोध-नाच्च बोधस्य तत्प्राप्तिहेतुत्वं प्रतीयते। सर्वं वाक्यं सावधारणमिति न्यायेन च बोधस्यैव तद्धेतुत्वमित्यवधारणमपि प्रतीयते। अनेन,

दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि।

इत्यागमानुरोधात्,

ज्ञानं विना प्रयागेऽस्मिन् मुच्यन्ते सर्वजन्तवः।

इत्यादिस्मृत्यनुसाराच्च दीक्षादिकमागमिकं प्रयागस्नानवाराणसीप्रयाणादिकं वैदिकञ्च कर्मैव मोक्षसाधनम्, ज्ञानन्तु तत्साधनत्वेन चोदितमपि कर्माङ्गमिति ये वदन्ति, ये च पुनरुभयोरपि कर्मज्ञानयोस्तत्साधनत्वश्रवणात् विनिगमनाविरहादुभयोरपि तुल्यकक्ष्यतया

---

1 (टि) तस्य – क्तप्रत्ययार्थकर्मत्वाश्रयस्य। कर्मत्वेन बोधितस्यानुषङ्गत एव बोधकर्तृत्वलाभः।

2 (टि) ग्राहकत्वेनाद्यप्रबद्धत्वेनेति। अद्य मुक्तिदशायां अनुषङ्गतो बोधृत्वप्रतिपादनेनेत्यर्थः। तन्मोचनेन – अप्राप्तसदृशत्वनिवर्तनेन।

समुच्चयेन विकल्पेन वा तत्साधनत्वमिति वदन्ति, ये च पुनर्यावन्नित्यनैमित्तकयोः करणात्काम्यनिषिध्योश्च वर्जनादागामिपुण्यपापयोरभावे सञ्चितानां कर्माणाञ्च प्रमाणा-भावेनाभावे भावे वा काश्यादिविशिष्टक्षेत्रवासेन प्रायश्चित्तादिना वा योगाभ्यासेन कायव्यूहादिना वा क्षये प्रारब्धकर्मणाञ्च भोगेनैव क्षये सर्वकर्मणां क्षयादर्थान्मोक्षः, तत्र न कर्म नापि ज्ञानं साधनमिति वदन्ति तेषां सर्वेषां मतं निराकृतं भवति। अयंभावः – न मलविदारणं विना तत्स्वरूपप्राप्तिः। विदारणञ्च तस्य तमोरूपस्य प्रकाशरूपं ज्ञानं विना न संभवति। न हि प्रकाशं विना बाह्यस्य तमसश्शास्त्रशतेनापि विदारणं दृष्टम्। तथा च फलस्वभावपरामर्शेन **ज्ञानतिलकगतेन** होमादिवैदिकदीक्षादितान्त्रिकसर्वकर्मकर्त्रनुवादपुरस्सरम्,

न तेषां तत्पदं शान्तं निराधारं निरामयम्।

इति तेषां मोक्षाभावबोधनद्वारा सर्वकर्मणां मोक्षसाधनत्वनिषेधेन च न तेषां साक्षान्मोक्षसाधन-त्वम्। यानि तूक्तानि तेषां मोक्षसाधनत्ववचनानि तान्युक्तबाधकात् ज्ञानद्वारकसाधन-त्वविषयाण्येव, ज्ञानप्रतिबन्धककर्मनिबर्हकत्वात्। यत्तूक्तं ज्ञानकर्मणोरुभयोरप्यहेतुत्वमिति तदपि ज्ञानकर्मणोस्तद्धेतुत्वावेदकोक्तप्रमाणबाधितम्। किञ्च प्रारब्धानां सञ्चितानां च कर्मणां त्वदुक्तरीत्या नाशेऽपि स एव न मुक्तिः, कर्मनाशस्य स्वतः पुरुषार्थत्वाभावात्। किन्तु निगमागमपर्यालोचनया मलविदारणपूर्विका शिवाभिव्यक्तिरेव। सा च ज्ञानं विना न संभवतीत्युक्तम्। किञ्च नित्यनैमित्तिकानुष्ठानेन प्रत्यवायपरिहारेऽपि तदर्थं समिदाहरणादिषु तदानुषङ्‌गिकक्रिमिकीटादिवधेन पुनरधर्मोत्पत्तेरवर्जनीयत्वान्न सर्वकर्मक्षयोऽपि संभवति। उक्तं हि **ज्ञानतिलके** –

क्रियमाणेन धर्मेण ह्यधर्म उपजायत। इत्यादि।

तथा च सर्वकर्मनाशाभावात् भवदभिमताऽपि मुक्तिः कथं भवतु। उक्तेष्वर्थेषु च प्रमाणं **सर्वज्ञानोत्तरगतं** वचनम्। तत्र ज्ञानस्य तत्प्राप्तिहेतुत्वे –

आत्मानं परमो भूत्वा यो विजानाति तत्त्वतः।
स मुच्यते त्वयत्नेन सर्वावस्थां गतोऽपि सन्॥

इति कर्मणां मोक्षहेतुत्वनिषेधे –

न जातु देवा वेदा वा यज्ञा वा बहुदक्षिणाः।
संसारार्णवमग्नानां भूतानां शरणार्थिनाम्॥
नान्यश्शरणदः कश्चिदात्मज्ञानादृते क्वचित्। इति॥

एवं **ज्ञानतिलकादिषु** विशिष्य दीक्षादीनां सहेतुकमपवर्गसाधनत्वनिषेधकं वचनं प्राक् दर्शितम्। तत्रैव तेषां संहितान्तरगतो मोक्षसाधनत्वोपदेशोऽपि मन्दाधिकार्यानुसारेणेत्युक्तम्। तेषां ज्ञानद्वारकत्वे **देवीकालोत्तरगतं** वचनम् –

ज्ञानोत्पत्तिनिमित्तन्तु क्रियाचर्या प्रकीर्तिता। इति।

एवं बोधस्तत्प्राप्तिसाधनमित्युक्तम्। तत्र तद्बोधस्याकाराकांक्षायां नियन्तृनियम्यभावेन पशुशिवयोर्भेदाकारं ज्ञानमेव मोक्षसाधनं, न शिवाभेदाकारं ज्ञानं, प्रत्यक्षादिविरोधे-

ऽभेदस्यासंभवेन तदागमस्योपचरितार्थत्वादिति केचिदाहु:। अन्ये पुनरारोपिताभेदोपासनैव तत्साधनमित्याहु:। तन्न संभवति –

अहमात्मा शिवो ह्यन्य: परमात्मेति यस्स्मृत:।
एवं यो भावयेन्मोहात् न शिवत्वमवाप्नुयात्।।

इति **सर्वज्ञानोत्तरे** भेदज्ञानस्य मोक्षसाधनत्वनिषेधात्। किन्तु,

यश्शिवस्सोऽहमेवेति अद्वैतं भावयेत्सदा।

इत्यादिवचनानुसारेण शिवाभेदाकारं ज्ञानमेव तत्प्राप्तिसाधनम्। तत्रापि यथार्थं ज्ञानमेव तत्साधनं, न तु बुद्धिपूर्वकाभेदारोपरूपोपासना। "सोऽहमस्मि न संशय" इत्यर्थस्यापि पारमार्थिकत्वबोधनादित्याह – "**अनन्यो बोधित**" इति। अनन्यत्वाकारेण बोधित: न भेदाकारेण, नापि बुद्धिपूर्वमारोपित इत्यर्थ:। अत्रानन्यत्वस्य प्रतियोग्याकांक्षायां सन्निधानात् गुरुशब्दोपात्तश्शिव एव संबध्यते। अत्रानन्यत्वन्नामाणुशिवयोर्दर्पणजलादिषु बिम्बप्रतिबिम्बयोर्मुखप्रतिमुखयोरिव सूर्यप्रतिसूर्ययोरिव वाऽवच्छिन्नानवच्छिन्नयोर्घटाकाशमहाकाशयोरिव वाऽत्यन्तैक्यं न विवक्षितम्। बद्धमुक्ताद्यवस्थायै तत्र तत्रागमेष्वत्यन्तैक्यस्य बहुशो निरस्तत्वेनापसिद्धान्तात्। नापि कनकमुकुटयोरहिकुण्डलयोर्वाऽवस्थावस्थावतोरिवात्यन्तैक्यकल्पं, तत एव संकोचविकासावस्थायास्तयोरसंभवाच्च। नापि कालाकाशयोरिवात्यन्तभेदे औपचारिकम्। भेदनिन्दापूर्वकं तयोरद्वैतप्रतिपादकबहुन्यायानुगृहीतोक्त**सर्वज्ञानोत्तरादिव**चनविरोधात्। तस्मादीषद्भेदे सत्यभेद एव तत्त्वम्।

तत्रापि न मृत्घटयोश्शब्दार्थयोरिव वैकस्य कदाचिदात्यन्तिकभेदे सत्यभेद: आरोपितो वानन्यत्वं, तद्वदत्रैकं विनाऽन्यस्यावस्थानाभावात्, शास्त्रेण नित्ययाऽनन्यत्वस्य बोधनाच्च। किन्त्वीषद्भेदसहोऽभेद उक्तवैशिष्ट्यादिकं वा गुणगुणिनो: प्रकाशाश्रयोरिव वाऽन्यत्वं प्रकृते विवक्षितम्। एवञ्च **महर्षि व्यासेन** श्रुत्यादिषु भेदाभेदोभयव्यपदेशरूपविरोधपरिहारार्थं "उभयव्यपदेशात्त्वहिकुण्डलवत्। प्रकाशाश्रयवद्वा तेजस्त्वात्। पूर्ववद्वा" इति सूत्रत्रयेणोदाहृतेष्वहिकुण्डलप्रकाशाश्रयबिम्बप्रतिबिम्बन्यायेषु मध्यमन्याय एव स्थूलदृष्टेरप्यविरुद्धत्वाच्छ्रेयानिति भगवतश्शिवस्य हृदयम्। ननु जीवस्य जाड्याद्विक्रियावत्वस्याऽनिवारणतस्स्वप्रकाशचिदानन्दात्मना शिवेनाभेदो न संभवति। तद्बोधकत्वेन चोक्तागमार्थस्य निश्चेतुमशक्यत्वादित्याशङ्क्य तदर्थं शिव एव उपदेशकात्मक उपसर्तव्य इत्याह – **गुरुणेति**। यद्यप्युक्ताभेदवाक्येनैवाभेदावबोधो जायते, तथाऽपि तदर्थस्यानिश्चितत्वे नासम्भावितत्वेन हेतुदृष्टान्तप्रतिपादकगुरूक्तिं विना तदर्थनिश्चयाभावान्न तेन निवृत्तासंभावनाभेदावबोध:। असंभावनारहितदृढावबोधो गुरुणैव संभवतीति भाव:। तत्र गुरुणा कर्तव्यमसंभावनानिवृत्त्युपायमुपदेशप्रकारमाह **स्थित्वा सहेति**।

प्रतीयमानं जाड्यादिमत्वं न त्वद्धर्म:, किन्तु पाशधर्म एव। इन्द्रियैस्सहस्थितत्वात् त्वय्यपि प्रतीयते जपाकुसुमरक्तिमेव स्फटिके। त्वत्स्वरूपं तु शिवानन्याखण्डचैतन्यमेव, तत्तव न प्रतीयते। आरोपितैरिन्द्रियाद्युपाधिसन्निधानकृतैर्जाड्यादिभिरभिभवात्, जपालौहित्येनेव स्फटिकगतास्वच्छता। अतो न शिवाभेदासम्भावनेति। इति शब्द: प्रकारे।

एवं प्रकारैर्निगमागमार्थोपपत्तिप्रतिपादकैर्गुरूरुपदेशैर्बोधितोऽनन्तरमिन्द्रियादींस्त्यक्त्वा तत्पदं प्राप्नोति। अयमेव गुरूपदेशोऽध्ययनविधिप्राप्तम् –

तावत्कालञ्च कर्तव्यं श्रवणादिविशेषतः।

इति नियमविध्यन्तरप्राप्तं वा श्रवणं नामेति न तदनुक्तिदोष। न वा तस्याप्रयोजकत्वशङ्काऽपि। इन्द्रियव्याधैरिति च व्याधशब्दं प्रयुञ्जानो व्याधपदोपलक्षितमुक्तसर्वार्थविषयसम्भावनाहेतुभूतमुपाख्यानविशेषं सूचयति।

तद्यथा – कश्चिद्राजपुत्रः कुतश्चित्कारणात् जातमात्र एव कर्णादिवत् व्याधकुलं प्रापितस्तैर्व्याधैस्स्वापत्यवदशनवसनादिभिः पोषितस्तैस्सहवासात् स्वात्मानमपि व्याधं मन्यमानस्स्वस्वरूपं राजपुत्रत्वादिकमजानानः पश्चात्तादृशस्य कारणस्यापगमे स्वपित्रा राज्ञा मृगयापदे सङ्गतेनागत्य न त्वं व्याधजातीयः, किन्त्वस्मदपत्यं महाराज एव, कुतश्चित्कारणान्मया व्याधकुले स्थापितः। अतस्त्वं व्याध इत्यात्मानं मन्यमानस्स्वात्मगतं राजत्वं न मनुषे, अतस्त्वमेतान्व्याधानात्मवशीकृत्य मत्पदं राज्यं प्राप्नुहीति बोधितस्तान्व्याधान् त्यक्त्वा तत्पदं प्राप्तवान्। तथा जीवोऽपि संसारमारभ्येन्द्रियैस्सहस्थित्वाऽऽत्मानं तत्स्वरूपमेव मन्यमानस्स्वस्वरूपं शिवाभेदमजानानः पश्चात्कर्ममलपरिपाके सत्यनुग्रहपूर्वकं गुरुरूपेण शिवेनोक्तप्रकारेणाहमेव त्वमित्यनन्यत्वेन बोधितस्तानीन्द्रियाणि वशीकरणचटुलानि त्यक्त्वा तत्पदं प्राप्नोतीति। अत्र षडध्वारण्यानी गतशब्दादिमृगग्राहितया दीपकमृगेषु[3] स्वाभाविकभोज्यव्यावर्तनेन भोज्यान्तरगोचररुच्याधायकत्ववज्जीवेषु स्वाभाविकभोग्यपरशिवानन्दव्यावर्तनेन विषयसुखाख्यभोग्यरुच्याधायकतयेन्द्रियाणि व्याधतया रूपितानि। अत्र सत्स्वपि विषयादिष्विन्द्रियाणां भोगनिष्पादनेऽन्तरङ्गतया तत्परित्यागकथनेनान्येषामपि त्यागोऽर्थात् कथितो भवतीति तत्परित्याग एवोक्तः। नत्वन्येषामभावात्।

तथाहि – सत्स्वेवेन्द्रियेषु विषयतया शब्दादीनां स्थूलभूतानां चोपयोगतस्तन्निष्पादकतया सूक्ष्मभूतस्य तद्धेतुतया च भूतादिसंज्ञास्याहंकारस्य तन्निर्वर्तकतया[4] विषयाद्याकारवृत्तिमत्तया च बुद्धेरिन्द्रियगतविषयग्रहणसामर्थ्याधानेन मनसो बुद्धिहेतुतया गुणानां गुणहेतुतया प्रकृतेर्भोक्तृत्वप्रयोजकतया[5] पुरुषस्य भोगासक्तिहेतुतया रागस्य भोग्यत्वेन[6] कालस्य तन्नियामकत्वेन नियतेर्दृक्क्रिया[7]शक्तिव्यञ्जकत्वेन कलायास्सुखदुःखव्यञ्जकत्वेन विद्यायाविषयव्यामोहकत्वेन कार्यमायाया एतत्प्रेरकतया विद्यादिशिवान्तानामात्माग्रहहेतुत्वेन च मायायाश्शिवादिविद्यान्तानाञ्च भोगोपकरणभुवनादिनिष्पादकतयोपयोगस्सङ्गच्छते। इन्द्रियेषु तु परित्यक्तेषु सर्वेषां परित्यागोऽर्थतस्सिद्ध एव।

---

[3] (टि) शब्दादिमृगग्राहीतयेति। अत्र मृगग्राहित्वं मृगान्तरग्रहणसाधनत्वम्। तथा च यथा व्याधा मृगान्तरग्रहणार्थं दीपकमृगान्मृगान्तरोषितवनेषु तृणादीनि चारयित्वा दीपकमृगसंयुक्तानन्यान् मृगान् गृह्णान्त्येवमिन्द्रियाण्यणून् शब्दादिविषयान् भोजयित्वा शब्दादीनार्जयन्तीत्यर्थः।

[4] (टि) तन्निर्वर्तकतया – अहंकारनिर्वर्तकतया।

[5] (पा) भोक्तृत्वसंपादकतया

[6] (टि) कालस्य भोग्यत्वं भोग्याध्याधारत्वेन।

[7] (टि) दक्क्रियेत्यारभ्य तृतीयान्तषष्ठन्तयोर्व्युत्क्रमेणान्वयः।

तथाहि – इन्द्रियाणां स्थूलदेहाश्रयणामाश्रयपरित्यागं विना न स्वरूपेण त्यागस्संभवति। अत स्थूलदेहपरित्यागोऽर्थसिद्ध एव। एतत्परित्याग एवान्नमयकोशस्य परित्यागः। स्थूलदेहपरित्यागे तदवच्छेदेन भोग्यानां शब्दादीनां गुणानां स्थूलभूतानाञ्च परित्यागोऽपि सिद्ध एव। तत्परित्यागेन च तद्धेतुतयोपयोगिनां तन्मात्राणामपि परित्यागस्सिद्धः। तेन च तदुपयोगिनोऽहंकारस्य परित्यागः। तेन चाहंकाराधीनप्रवृत्तेः प्राणस्य परित्यागः। अयमेव प्राणमयकोशपरित्यागः। इन्द्रियविषयपरित्यागेनेन्द्रियाधिष्ठानद्वारा विषयग्रहकारणस्य मनसः परित्यागः। अयमेव मनोमयकोशस्य परित्यागः। मनः परित्यागेन च तदभिमतार्थग्राहिकाया बुद्धेः परित्यागः। तत्परित्यागेन तद्धेतुभूतानां गुणानां परित्यागः। तत्परित्यागेन तद्धेतुप्रकृतेः। इन्द्रियादिपरित्यागेन तत्भ्रमणहेतोर्भोक्तृत्वप्रयोजकस्य पुरुषत्वस्य परित्यागः। भोग्यपरित्यागेन तदासक्तिहेतो रागस्य, भोगपरिच्छेदहेतोः कालस्य, भोगनियामिकायाः नियतेश्च परित्यागः। बुद्धिपरित्यागेन तत्ग्रहकरणीभूताया विद्यायाः परित्यागः। विद्यापरित्यागेन कर्तव्याभावाद्दृक्क्रियाशक्तिव्यञ्जिकायाः कलायाः परित्यागः। कलादिकार्यपरित्यागेन कारणीभूताया मायायाः परित्यागः। विद्यादिशिवान्तानामपि कालादि[8]प्रेरकत्वात्तत्त्यागेनैव त्यागः। बिन्दुत्याग एव विज्ञानमयकोशत्यागः। नादत्याग एवानन्दमयकोशत्यागः। एवमिन्द्रियपरित्यागकथनेन सर्वेषां परित्याग उक्त इति द्रष्टव्यम्। एवं देहादित्यागे सकलावस्था निवर्तते। तदा[9]ऽन्धकारमध्यगतचक्षुर्वच्चाज्ञानमात्रावृतोऽयं तिष्ठति। एतदवस्थः केवलावस्थ इत्युच्यते। एवं स्थिते गुरुकटाक्षेण मथनादिना काष्ठेऽग्निरिव वक्ष्यमाणरीत्या शिवज्ञानमभिव्यज्यते। तेन चाच्छादकस्य तमोरूपस्य मलस्यापि निवृत्तिर्भवति। एतदवस्थश्च शुद्धावस्थ इति गीयते। तथा च स्वस्योपाधिपरित्यागेन तत्प्रेरकब्रह्मादिकारणपञ्चकत्यागेन च स्वात्मनि ज्ञानानन्दस्वरूपं शिवमेवानुभवति। एवं स्थितस्य यदा निवृत्तोपाधित्वेन स्वात्मदर्शनं तदा निर्मलजाग्रदवस्था। यदा तूपाधिविस्मरणेन निवृत्तोपाधित्वस्यापरिज्ञानेन स्वरूपेणैव स्वात्मदर्शनं तदा निर्मलस्वप्नः। यदा च चक्षुषो परिज्ञानेऽपि सूर्यादेर्ज्ञेयत्वमात्रेणैव ग्राहकस्य स्वात्मनोऽपरिज्ञानेऽपि परशिवस्य ज्ञेयत्वमात्रेण दर्शनं तदा निर्मलसुषुप्तिः। यदा ज्ञानक्रियापरित्यागेन परशिवमात्रदर्शनं तदा निर्मलतुरीयम्। यदा चाखण्डाकारसच्छिदानन्दाद्वयपरिपूर्णपरशिवात्मनैवावस्थानं तदा निर्मलतुरीयातीतम्।

तदुक्तम् – "बाह्यान्तःकरणैरणोस्स्वविषयज्ञानन्तु जाग्रत्ततस्स्वप्नोऽन्तःकरणस्ववृत्ति[10]-विषयज्ञानं सुषुप्तिः परम्। देहेत्विन्द्रियवृत्तिहीनमवचोग्राह्यामतिस्तुर्यकं देहाक्षोपरतौ स्वचिन्मतिरथातीतं शिवत्वोदय" इति। एवं स्थितः प्रारब्धभोगान्ते तत्पदं प्राप्यापेक्षयाऽनन्यः प्राप्नोतीत्यनन्यपदावृत्त्या योजनीयम्। इदञ्चावस्थापञ्चकं हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रस्थानकं वेदितव्यम्। अत्र च[11] शिवेनैक्यं गत इति करिष्यमाणमुक्त्यनुवादानुसारेण तत्पदमित्यत्र शिवस्वरूपमुक्तिवाचिना तच्छब्देन प्रकृतपरामर्शिना गुरुणेति प्रकृतं गुरुं परामृशन् गुरुणाऽभिव्यक्तशिवस्वरूपत्वं सूचयति। तत् –

अतो हि निर्भयो विद्वान्निश्शङ्को निस्पृहस्सदा।

---

[8] (पा) कलादि

[9] (पा) तथा

[10] (पा) स्थवृत्ति

[11] (पा) तथा च

ज्ञानोत्साहपरोभूत्वा श्रद्धाधानो निराकुलः।।
निर्ममः करुणोपेतस्सर्वभूताभयप्रदः।

इत्यादि**देवीकालोत्तरोक्त**विशेषणविशिष्टा अधिकारिणो विज्ञानाकलप्रळयाकलसकलभेदेन त्रिविधाः। तत्र विज्ञानकलाः कर्माशुद्धमायाविरहिता मलयुक्ताः। ते च शुद्धमाया-तत्त्ववासिनोऽनन्तेश्वरादयः। प्रळयाकलास्तु स्ववशीकृतमायेयामलकर्मयुताः। ते च दिक्पालाधिष्ठातृशतरुद्रादयः। सकला अपि मायेयवश्यामलकर्मयुताः। ते चेन्द्रादयः। तत्र मायाधिकारिणां विज्ञानकलानां शरीरपरिग्रहं विनैवान्तर्यामितया शिवेन साक्षाद्बोधनं क्रियते। मध्यमाधिकारिणां महेश्वरेणानुगृहीतानां प्रळयाकलानान्तु शाक्तं बैन्दवं वा शरीरं परिगृह्य सकलानां गुरुरूपाभिव्यक्त्येति विशेषः। तदुक्तम् – "त्रिधा सोऽयमनुग्राह्य" इत्यादि। ननु तर्हि ज्ञानस्य तत्प्राप्तिसाधनत्वे दीक्षादीनां गर्भाधानादीनां संस्काराणाञ्च तत्प्राप्तिसाधनत्वेन चोदितानामप्यतत्फलत्वमिति तदावेदकनिगमागमादीनामप्रामाण्यम्। किञ्च शास्त्रान्तरसिद्धप्रतिबन्धकभावानां सञ्चितकर्मणां सत्वे गुरूपदेशादिना वा कथं तत् ज्ञानमित्याशङ्क्य तत्र प्रथमं सञ्चितं हन्ति दीक्षयेत्यादिवचनानुसारणे ज्ञानप्रतिबन्ध-कसकलसञ्चितकर्मनिबर्हणेन ज्ञानद्वारा तस्मिन्नेव जन्मनि तत्प्राप्तिसाधनत्वाद्दीक्षाया नोक्तदोष इत्याह – **धन्य इति।** अत्र मलपाककर्मसाम्यशक्तिनिपातानन्तरं शिवेन निर्वाणदीक्षया निर्दग्धमुक्तिप्रतिबन्धकसञ्चिताशेषकर्मा धन्य इत्युच्यते। अत्र धन्यस्सन् पश्चात्बोधित इति संबन्धः। न तु बोधितस्सन् पश्चाद्धन्यस्तत्पदं प्राप्नोतीति। दीक्षादिकर्मणां ज्ञानहेतुत्वप्रतिपादकवचनविरोधात्।

तथा चायंक्रमः। प्रथमं त्रैवर्णिकोऽमद्यपत्वादिगुणविशिष्टः सच्छूद्रस्सवर्णाद्यनुलोमजातिश्च मन्दमन्दतरमलपाककर्मसाम्यमन्दमन्दतरशक्तिनिपातयुतो दैवात्पित्राद्युपदेशादिना वा श्रेयो वेदने सञ्जातश्रद्धो विषयदोषदर्शनेन च विरक्तः पुनस्समूलतया विशिष्य तत्प्रतिपत्त्यर्थमधि-गतचर्याक्रियायोगज्ञानपादार्थं कारुण्यादिगुणविशिष्टं ज्ञानवृत्तयोनिलक्षणवयः प्रभृतिविशिष्टं स्वस्वोत्तमवर्णाश्रममभिव्यक्तशिवभावञ्चातुर्वर्णिकं गुरुमुपसर्पति। सोऽपि मन्दभक्त्यादिचिह्नेन ज्ञाततदधिकारः श्रेयः प्रतिपादकागमाध्ययनतदर्थज्ञानानुष्ठानाधिकारसिध्यर्थं समयविशेषदीक्षाभ्यां तदधिकारसंपादिकाभ्यां तं दीक्षयति। सोऽपि ताभ्यां दीक्षितस्ततोऽधीत्य यथा विद्यागमशास्त्रं दैवात्तीव्रशक्तिनिपातादियुतः पश्चाच्चर्याक्रियाद्यनुगृहीतस्य वैराग्यादियुतस्य विशिष्टाधि-कारिणः शिवाभेदज्ञानं मुक्तिसाधनमिति तदर्थञ्चापाततः प्रतिपद्य पूर्वोक्तयुक्त्या तदर्थं संभावितं मन्यमानः पश्चाद्दृढनिश्चयार्थं तमेवान्यं वा विशिष्टं गुरुमुपहारविनयादिपूर्वकमुपसर्पति।

सोऽपि भक्त्युत्कर्षादिनाऽतिमलपाककर्मसाम्यतीव्रशक्तिपातादियुतं[12] विशिष्टाधिकारिणं निश्चित्य तस्य तत्त्वज्ञानप्रतिबन्धकसञ्चितकर्मनिर्हरणार्थं निर्वाणदीक्षां कृत्वा तस्यासंभवनानिवर्तकं स्थित्वेत्यादियुक्तिजातमुपदिशति। सोऽपि तद्वाक्यैरागमवाक्यैस्स्वतर्कैश्च निवृत्तासंभावनं शिवाभेदं प्रतिपन्नस्तत्पदं प्राप्नोति। अनेन च कर्मणां ज्ञानद्वारा मोक्षोपयोगित्वकथनेन "कर्मणां साक्षाद्वा परंपरया वा मोक्षसाधनत्वमेव नास्ति, उदाहृतानि वचनानि तु कर्मणां स्वस्ववाक्ये श्रुतफलानां मोक्षरूपफलान्तराकांक्षाविरहान्न मोक्षफलकत्वावेदकानि किन्त्वर्थवादा एवे"ति

[12] (पा) युक्तं

ये वदन्ति तन्मतमपास्तम्। उभयत्र फलश्रवणे विनिगमनाभावेन कर्मणां संयोगपृथक्त्वन्यायेन दधिवाक्यवद्वाक्यद्वयेनोभयफलकत्वबोधनादिति।।

। अष्टमसूत्रसंग्रहभाष्यं समाप्तम् ।

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यायते –

एवं शिवतल्लक्षणप्रमाणेषु प्रदर्शितेष्वधुना तत्प्राप्तिरूपमुक्तिसाधनजिज्ञासायां सकलकर्माधीनं गुरूपदेशजन्यं ज्ञानं तद्धेतुः, आगमिकदीक्षादिकं वैदिकावर्णाश्रमधर्मवाराणा-सीमरणादयश्च ज्ञानद्वारा हेतव इत्याह – **स्थित्वेति।**

ज्ञानमेव मुक्तिसाधनमित्येतद्विषयसूचित्वेन ज्ञेयम्। अत्र बोधितस्तत्पदं प्राप्नोतीति सावधारणं बोधस्य हेतुत्वप्रतिपादनेन ये दीक्षाया एव हेतुत्वं वदन्ति, ये च केवल-वर्णाश्रमधर्माणां हेतुत्वं वदन्ति, ये च वर्णाश्रमधर्माणां ज्ञानस्य तुल्यकक्ष्यतया समुच्चयेन विकल्पेन वा हेतुत्वं वदन्ति, ये च वाराणसीमरणादीनां विकल्पेन साधनत्वं वदन्ति, ते सर्वे निरस्ताः। तथाहि – एकदेशिनस्तावन्मोक्षोपायं वदन्ति। मोक्षस्तावच्छिवकर्तृकः। तत्र च दीक्षाख्यश्शिवव्यापारः करणम्। न च पाशस्यैव मोचकत्वमस्त्विति वाच्यम्, अचेतनत्वेन स्वयमेव विमोकहेतुत्वासंभवात्। तदुक्तम् –

न पुंसां मोचने शक्तिः पाशानामपि विद्यते।<br>
रज्ज्वादिन स्वयं बद्धं विमुञ्चद्दृश्यते यतः।। इति।

न च संसारदशायां ज्ञानक्रियाव्यक्तेः कलादिरूपपाशजन्यत्वदर्शनात्मुक्तावपि तत्र तद्धेतुत्वमनुमेयमिति युक्तम्। पाशस्य संकुचितविषयज्ञानक्रियाभिव्यक्ति-हेतुत्वेऽप्यसङ्कुचितविषयाभिव्यक्तौ हेतुत्वान्तरस्यैव वक्तव्यत्वात्[13]। तदुक्तम् –

ज्ञत्वकर्तृत्वयोर्व्यक्तिं पाशाः कुर्वन्त्यनेकधा।<br>
मोक्षो व्यक्तिस्तयोरेव मोक्षोऽतः पाशकारितः।।<br>
स्वाकाररञ्जितां पाशाः पाशवृत्त्यनुरागिणीम्।<br>
क्रमान्वितां विनाशार्थां व्याहतामल्पगोचराम्।।<br>
तयोर्व्यक्तिं प्रकुर्वन्ति निस्संज्ञत्वात् भवेरिताः।<br>
शक्नुवन्ति न मोक्षाख्यां येनास्यास्सा विलक्षणा।। इति।

अत्र ज्ञत्वकर्तृत्वयोरिति चोद्ये स्वाकारेत्यादिः परिहारः। ननु ज्ञानेन करणेन पुरुषस्य भोग इव कर्तृत्वमस्तु[14]। आणवमलस्याज्ञानत्वेन तन्निवृत्तौ ज्ञानस्यैव हेतुत्वौचित्यात्। यदि तु परोक्षज्ञाने सत्यपि न तन्निवृत्तिस्तदा अपरोक्षज्ञानमेव तन्निवर्तकमस्तु। न च ज्ञानस्यैव तन्निवृत्तिहेतुत्वे दीक्षाया वैयर्थ्यम्। दीक्षाया ज्ञानहेतुत्वेन सार्थकत्वसंभवात्। “दीयते ज्ञानसद्भाव” इत्यादिना तस्याज्ञानहेतुभावस्य सिद्धत्वात्। प्रारब्धेतरकर्मनाशकत्वेन वा

---

[13] (पा) अहेतुत्वस्य वक्तव्यत्वात्

[14] (टि) अस्त्विति मलनिवृत्ताविति शेषः।

सार्थकत्वमस्तु। न च,

नाभुक्तं क्षीयते कर्मकल्पकोटिशतैरपि।

इति **पुराणवचनेन** "नाभुक्तं लयमेति चे"ति **मृगेन्द्रवचनेन** च भोगाभावे क्षय एवानुपपन्न इति वाच्यम्। दीक्षादेरपि[15] कर्मनाशकत्वेन बोधनात्। न च भोगद्वाराऽपि बोधितस्य[16] कर्मनाशकत्वोपपत्तिः।

प्रारब्धं भोगतो नश्येत्सञ्चितं हन्ति दीक्षया।

इति व्यवस्थावचनेन भोगद्वारं विनैव नाशकत्वनिर्णयादिति चेन्न। स्वरूपापरोक्षज्ञानस्य सर्वदा सत्वेन निवृत्तावरणस्य हेतुत्वे आत्माश्रयदोषात्[17]। यदुक्तमज्ञानस्य ज्ञानमेव निवर्तकमिति तदयुक्तम्। अज्ञानशब्देन भ्रान्तिरभिधीयते, तद्धेतुभूतमावारकद्रव्यं वा। भ्रान्तिरिति पक्षेऽपि सादृश्यनिमित्तभ्रान्तिर्वा आवरणनिमित्तभ्रान्तिर्वा। तत्रावरकद्रव्यमिति पक्षो न युज्यते। तस्य ज्ञाननिवर्त्यत्वे उदाहरणाभावात्। प्रत्युत काचादिद्रव्यस्य वैद्यव्यापारादिवन्मलद्रव्यस्य दीक्षाख्यशिवव्यापारेण निवृत्तेर्युक्तत्वात्। न च साधिकरणदीक्षायां गुरोरेव कर्तृत्वात् शिवव्यापारत्वमयुक्तमिति वाच्यम्।

कुम्भस्थः कर्तरिस्थश्च कुण्डस्थस्स्थण्डिले स्थितः।
तथा देशिकमूर्तिस्थः शिष्यस्थः पाशमोचकः।।

इति वचनेन कुम्भादिष्विव गुरावभिव्यक्तस्य शिवस्य कर्तृत्वोपपत्तेः। सादृश्यनिमित्तभ्रान्तिरुच्यत इति पक्षे प्रकृतानुपयोग एव। मलस्य भ्रान्तित्वाभावात्। अत एवावरणनिमित्तभ्रान्तिरभिधीयत इति पक्षोऽपि निरस्तः। आवरणनिमित्तभ्रान्तेरावरणनिवर्तकव्यापारनिवर्तनीयत्वाच्च। तदुक्तम् –

अस्त्वात्मनीनो मोक्षो हि भोगवत्पुद्गलस्ततः।
मोक्षकर्ता विवेकादिसाधनं संप्रसिध्यति।।
अविवेकावसायोत्थमज्ञानं विनिवर्तते।
विवेकज्ञानतो नान्यत काचादिद्रव्यहेतुकम्।।
स्वकारणनिवृत्त्यैव तन्निवर्तेत नान्यथा।
मलश्चाज्ञानहेतुस्स्यादज्ञानत्वेऽस्य तुच्छता।।
अथात्मधर्मभावस्स्यात्तुच्छत्वे तन्निवर्तते।
ज्ञानादिरफलः पुंसो धर्मत्वेन निवर्त्यते।।
निवर्त्यत्वेनात्मधर्मस्तदनादिनिरोधनम्।
चैतन्यस्यात्मनस्तेन निवृत्तिर्दीक्षया ततः।।
महेशमलमायादिवशगोऽणुस्सचात्मना।
कथं तेभ्यस्तदायत्तमात्मानं मोचयिष्यति।।

---

[15] (टि) दीक्षादेरपीति। भोगस्येवेत्यादिः।

[16] (टि) बोधितस्येति। कर्मनाशकत्वेनेत्यादिः दीक्षादेरिति शेषः। बोधितस्य दीक्षादेर्भोगद्वाराऽपीत्यन्वयः।

[17] (टि) आत्माश्रयेति। आवरणनिवृत्तेरपि स्वकारणकुक्षिनिक्षिप्तत्वादिति।

अस्यात्ममोचने शक्तिर्विद्यते न यतस्स्वयम्।
पाशानां वश्यतामेति तेनेशो मोक्षकृद्वशि।। इति।

अत्र हि हेतौ। यस्मान्मोक्षो भोगवदात्मनीनः पुरुषार्थः, अतः पुद्गलः जीवात्मा मोक्षकर्ताऽस्तु, विवेकादिः विवेकाध्यवसायादिः साधनं कारणमिति शङ्कार्थः। विवेकाध्यवसायस्य साध्योपन्यासपूर्वकं मलनिवर्तने सामर्थ्याभावं दर्शयति – **अविवेकेति**। अविवेकावसायोत्थं भेदाग्रहजन्यमित्यर्थः। सादृश्यज्ञानजन्यमिति वाऽर्थः। अज्ञानं भ्रान्तिज्ञानमित्यर्थः। एवं विवेकावसायस्याज्ञानविशेषनिवर्तने सामर्थ्यं प्रदर्श्य मलस्याज्ञानहेतुत्वात् तन्निवर्तने सामर्थ्यं नास्तीति दर्शयति – **मलश्चेति।** मलस्यैवाज्ञानत्वमिति वक्तारं प्रति विकल्पयति – **अज्ञानत्व इति**। आत्मधर्मभावः आत्मसमवेतत्वमित्यर्थः। प्रथमं विकल्पं निरस्यति – **तुच्छत्व इति**। द्वितीयं निरस्यति – **धर्मत्व इति**। न निवर्त्यते – **न निवर्त्येतेत्यर्थः**। विपर्यये पर्यवसानमाह – **निवर्त्यत्व इति**। उपसंहरति – **तदिति**। आत्मनश्चैतन्यस्य आत्मगतचिच्छक्तेरनादिनिरोधकं तत्। तेन ज्ञाननिरोधिद्रव्यस्यैव मलत्वे न मलस्य दीक्षयैव निवृत्तिरित्यर्थः।

तथा **श्रीमत्स्वायंभुवेऽपि** –

अस्मात् प्रविततात् बन्धात् परसंस्था निरोधकात्।
दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि।। इति।

नन्वीशस्य मोक्षकर्तृत्वे सर्वेषां युगपन्मोक्षस्स्यात्, अपेक्षणीयाभावात्। न च कर्मानुसारेण करणान्नायंप्रसङ्ग इति युक्तम्। कर्मणो मोक्षहेतुत्वाभावात्। न च दीक्षाक्रमेण क्रमः। तस्या अपीश्वरव्यापारत्वेन क्रमायोगात्। अत एव शक्तिनिपातक्रमात् क्रम इति परास्तम्। शक्तिशब्देन दीक्षाभिधाने दोषस्योक्तत्वात्। दृक्क्रियाभिधाने तन्निपातस्य क्रमायोगादिति चेन्न। मलपरिपाकक्रमेण तत्क्रमोपपत्तेः। न च मलपरिपाकोऽपि सर्वेषां युगपदेव स्यादिति वाच्यम्। पद्मादीनामिवानियतविपाकतया कालभेदेन विपाकोपपत्तेः। तदुक्तं **तत्त्वनिर्णये** –

विनिवर्तेत निरोधात्पुंबलतः परिणमन्मलः कालात्।
परिणति विशेषयोगात् स कदाचित्कस्यचित्कथञ्चिच्च।। इति।

अत्र पुंसो बलं दृक्क्रियाशक्तिः। बलत इति षष्ठ्यर्थे तसिः। बलस्येत्यर्थः। अथवा बलशब्दो बलविषयकपरः पुंबलविषयकान्निरोधादित्यर्थः। परिणमन्परिपक्वो भवन्नित्यर्थः। परिणमन्निवर्तत इत्युक्तं, परिणामो वा कथं सर्वेषां न युगपदित्याशङ्क्याह – **परिणतिविशेषेति**। परिणतेर्जनकत्वेन संबन्धिविशेषः परिणतिविशेषः। परिणामानुकूलसहकारिसन्निधानक्रमेण तत्क्रमो युज्यत इत्यर्थः। न च सहकारिक्रमेऽपि नियामकप्रश्नेऽनवस्थेति वाच्यम्। बीजांकुरवददोषत्वात्। नन्वेवं मलः पाकात्स्वयमेव निवर्त्स्यति, तस्मिंश्च निवृत्तेऽज्ञानरूपदोषाभावेन कार्मः पाशोऽपि न भविष्यति, तदभावेन तदधीनस्य मायीय बन्धस्याप्यभावे स्वयमेव मोक्षो भविष्यति, किमीश्वरस्य मोक्षकर्तृत्वापगमेनेति चेन्न। परिपाकेऽपि मलस्य चेतनाधिष्ठानं विनाऽचेतनत्वेन विनाशायोगात्। तदुक्तम् –

रोधशक्त्यधिकारस्य काले या ते स्वयं त्वणोः।

निवृत्ते तु मले शेषः पाशव्रातो निवर्तते।।
तन्निवृत्तौ स्वयं शुद्धदृक्क्रियाशक्तिरात्मनि।
व्यज्यते सर्वविषया नैवातो मोक्षकृत्भवः।।
चेतनाचेतनास्सर्वे वश्यास्तस्येति निश्चितम्।
प्रवृत्तौ वा निवृत्तौ वा मोक्षहेतुरतो हि सः।।
विदार्य शक्तिशूलेन पाशजालमणोश्शिवः।
सर्वज्ञानक्रियारूपं व्यनक्ति द्विविधं फलम्।।

इत्यत्र चेतनाचेतन इत्यारभ्य परिहारः। द्विविधं परापरमोक्षभेदेनेत्यर्थः।।

## मलपाकः

ननु कोऽयं मलस्य परिपाकः। न तावन्निवर्तकशक्तिपातसाहित्यम्। शक्तेस्सर्वदा सद्भावेन तन्निपातस्य कादाचित्कत्वाय मलपरिपाकसाहित्यस्यैव पातशब्दार्थत्वेनात्माश्रयात्। नापि कर्मसाम्यसाहित्यम्। विज्ञानाकलानां मलपरिपाकाभावप्रसङ्गात्। युगपत्पाकस्य साम्यशब्दार्थत्वेन तत्रापि पाकस्य दुर्वचत्वाच्च। नापि चिरकालावस्थानम्। अनादित्वेन बहुकालावस्थानस्य साधारण्येन परिपाकमान्द्याद्यनुपपत्तेः। तस्मान्मलस्य पाको दुर्वच इति। मैवम् – बदरीफलादेरिवावस्थाविशेषस्य पाकत्वात्। अस्यैव पाकस्य तारतम्येन मन्त्रमन्त्रेश्वरादिपदप्राप्तिः। अयमेव च शक्तिपातेऽप्युपाधिः। नचास्य दुर्लक्ष्यतया तद्बोध-रहितेन गुरुणा शक्तिनिपातात्मकदीक्षाधिकारिविशेषणबोधायत्ता कथं दीक्षा क्रियेतेति वाच्यम्। वैराग्यमोक्षौत्सुक्यादिना चिह्नेन तन्निश्चयसंभवात्। तदुक्तं **श्रीमन्मृगेन्द्रे** –

येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ।।
भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासके विधाः। इति।

तल्लिङ्गं शक्तिपातानुमापकमित्यर्थः।

तथा **श्रीमत्पौष्करेऽपि** –

‘तस्यां पतितमात्रायां मलस्याथो नियामिका।
शक्तिर्निवर्तते तस्यान्निवृत्तायां महात्मनः।।
वैराग्यं जायते क्षिप्रं संसाराद्दुःखसागरात्।
दिदृक्षा जायते शम्भोः पादपङ्कजयोरपि।।
कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहं बन्धतः कदा।
को वा दर्शयिता शम्भोरिति सञ्जायते मतिः।।
एवं संसारतो भीतमनुगृह्णाति चेश्वरः।
तद्योग्यतानुसारेण करुणागर्भया दृशा।।
पुनातिसाधिकारेण यं वापि परमेश्वरः।
तयाऽनुग्रहरूपिण्या शक्तेर्गतिनिरोधिका।।

मलस्य क्षीयते शक्तिः सा दीक्षा शाम्भवीक्रिया।
अनुग्राह्यस्य विनये तथाऽनुग्राहकस्य च।।
कारुण्ये स शिवः कर्ता तयोर्योगस्सुदुर्लभः।
एतैर्लक्षैरविच्छिन्नैश्शक्तिपातो महात्मभिः[18]।। अनुमेय' इति।।

वैराग्यं तु –

अथ वैराग्यभेदोऽपि संक्षेपेणाधुनोच्यते।
व्याध्यादिपीडितस्यास्य स्वदेहेऽपि विरागता।।
सन्तुष्टस्सर्वकार्येषु निस्पृहत्वाज्जुगुप्सति।
आध्यात्मिकादिदुःखेभ्यो वैराग्यं नियतं भवेत्।।
आर्जने रक्षणे चोरहरणे द्रविणस्य यत्।
दुःखं तं मन्यमानस्य वैराग्यं सहसा भवेत्।।
स्निग्धाद्वियुज्यमानस्तु जनो दुःखेन पीडितः।
दुःखस्य कारणं स्नेह इति मत्वा विरज्यति।।
कामुकस्तु स्त्रियां दृष्ट्वा किञ्चिद्वैराग्यकारणम्।
सद्यो वैराग्यमायातिश्रेयसः प्राप्तिकारणम्।।
सत्यन्नेद्ध्रियते देहः पानीयादौ न चान्यथा।
एकाहस्याप्यपायेन ग्लानिं बध्नाति तत्क्षणात्।।
दुष्पूरोऽयमतो हेतोर्वैराग्यमुपजायते।
क्वचित्प्रतिग्रहादिभ्यो वैराग्यमुपगच्छति।।
अकस्माज्जायते कश्चिद्विरक्तः पुण्यवैभवात्।

इत्यादिना प्रपञ्चितम्। अथवा कर्मसाम्यलक्षणयोग्यतानुसारेण शिवो मोक्षकृत्। अतो न सर्वेषां युगपन्मोक्षप्रसङ्गः। कर्मसाम्यन्तु विरुद्धफलयोः कर्मणोर्युगपत्कार्योन्मुख्यमुपकारापकारयोः साम्यं वा। तदुक्तम् –

न हृष्यत्युपकारेण नापकारेण कुप्यति।
यस्समस्सर्वभूतेषु जीवन्मुक्तस्स उच्यते।। इति।

तथा **रत्नत्रये**ऽप्युक्तम् –

यथा मधूच्छिष्टमृदोरनपेक्षः क्षणेन च।
द्रवताशुष्कताहेतुरविकारोऽपि भास्करः।।
तथा समासमात्मिय पुण्यापुण्याख्यकर्मणाम्।
अणूनामविकारोऽपि बन्धमोक्षकरश्शिवः।।
परस्परविरोधेन निवारितविपाकयोः।
कर्मणोस्सन्निपातेन शैवीशक्तिः पतत्यणौ।।
तस्यां पतितमात्रायां निर्धूतघनसंवृतिः।

---

[18] (टि) लक्षैः – लक्षणैः।

प्रशान्तमलकालुष्यमात्मानमनुपश्यति।। इति।

तथा **श्रीमत्किरणेऽपि** –

समे कर्मणि सञ्जाते कालान्तरवशात्ततः।
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा।।
सर्वज्ञस्सशिवो यद्वत्किञ्चिज्ञत्वादिवर्जितः। इति।

अत्र समे कर्मणीति कर्मसाम्यस्य सहकारिण उपन्यासः। कालान्तरवशादिति मलपरिपाकस्य। कालो मलस्तस्यान्तरः परिपाक इत्यर्थः। तीव्रशक्तिनिपातश्शिष्यगतो ज्ञातत्वेन यस्यासौ तथेति गुरुविशेषणम्। अथवा व्यधिकरणे तृतीये। शक्तिनिपातेन हेतुनेत्यर्थः। कर्मसाम्यस्य सकलविषये सहकारित्वाद्विज्ञानाकलादौ तदभावात्कथं हेतुत्वमिति दूषणं निरस्तं बोध्यम्। तस्मादीशव्यापारो दीक्षैव मोक्षहेतुः। अस्याश्च श्रवणमनननिदिध्यासनानि सहकारिभूतानि। तदुक्तम् –

श्रोतव्यमेतदाप्तोक्त्या मन्तव्यञ्चोपपत्तिभिः। इति।

न च श्रवणादिवत्साक्षात्कारोऽपि विहित इति वाच्यम्। फलीभूते तस्मिन् विधिशक्तेः कुण्ठतया यथा साक्षात्कारो निष्पद्यते तथा यतितव्यमित्येवं परत्वाद्विधेः। दीक्षितेनापि नित्यनैमित्तिककर्माणि कर्तव्यानि। अन्यथा प्रत्यवायप्रसङ्गात्। तदुक्तं **श्रीमत्स्वायंभुवे** –

एवमेतान् शिवेनोक्तान्समयान् प्रतिपालयेत्।
प्रपालनाच्छिवं याति क्रव्यादत्वं ततोऽन्यथा।। इति।

कर्मणां च तत्तदाश्रमविहितदीक्षितकर्मत्वेनानुगमान्नाननुगमः। तस्माद्दीक्षैव श्रवणादिज्ञानत्रयेण तत्तन्नित्यनैमित्तिकादिना च सहिता मोक्षहेतुरिति। तदेतन्न विचारसहम्। समुच्चयनिरासावसरे उदाहरिष्यमाणैर्ज्ञानादेव तु कैवल्यप्राप्तिस्तत्र न संशय इत्यादिभिर्ज्ञानस्य मोक्षसाधनता प्रतिपादकवचनैर्ज्ञानस्यैव मोक्षहेतुत्वात्। युक्तञ्चैतद्वचनप्रतिपादितं ज्ञानस्य मोक्षहेतुत्वम्। मोक्षो हि आवरणनिवृत्त्याप्राप्तस्यापि प्राप्तिरूपः। आवरणस्य चाज्ञानरूपतया तमोरूपतया च प्रकाशात्मना ज्ञानेन निवृत्तिः युक्ता। यत्त्वत्रावरणस्याज्ञानहेतुत्वान्नाज्ञानत्वं, अज्ञानत्वाभ्युपगमे तुच्छत्वेन तन्निवर्तकत्वाभिमतस्य ज्ञानस्य वैफल्यं, आत्मसमवेतत्वेऽनिवृत्तिप्रसङ्ग इत्युक्तं, तदप्यात्मसंयुक्तत्वेन निवर्त्यत्वोपपत्तिर्निरस्तम्। नन्वज्ञानस्य ज्ञाननिवर्त्यत्वे किमुदाहरणम्। न तावत् भ्रान्तिः। तस्या अपि ज्ञानत्वेनाज्ञानत्वाभावात्। तत्राज्ञानत्वव्यपदेशस्य सम्यक् ज्ञानवदविसंवादिप्रवृत्तिजनकत्वाद्यभावेनाप्रशस्ततया गवाश्वव्यतिरिक्तेष्वपशुव्यपदेशस्येव औपचारिकत्वात्। भ्रान्तेरज्ञानत्वेऽपि भ्रान्तिमलसाधारणस्याज्ञानत्वस्याभावाच्च। न च यथार्थव्यवहारविरोधित्वमुभयानुगतमज्ञानत्वमिति वाच्यम्।

यथार्थव्यवहाराभावस्य यथार्थज्ञानाभावादेवोपपत्तौ भ्रान्तेस्तद्विरोधित्वाभावात्। न च यथार्थव्यवहाराभावव्याप्यत्वेन तद्विरोधित्वं तत्राप्यस्तीति युक्तम्। तथा सति कुड्यादेरपि तादृशविरोधित्वसत्भावेनाज्ञानत्वप्रसङ्गेऽज्ञानस्य ज्ञानेनैव निवर्त्यत्वमिति व्याप्तेस्तत्रैव व्यभिचारापत्तेः। नापि ज्ञानाभाव उदाहरणम्। हेतूकृतस्याज्ञानत्वस्य ज्ञानाभावत्वरूपत्वे

पक्षीकृते मले तदभावात्। मलत्वस्याज्ञानत्वशब्दार्थत्वे दृष्टान्तीकृते ज्ञानाभावे तदभावात्। न च ज्ञानाभावमलसाधारणमन्यदज्ञानत्वमस्ति। स्वरूपप्रकाशाच्छादकत्वस्य ज्ञानाभावेऽभावेनानुगतत्वासंभवात्। न च ज्ञाननिवर्त्यत्वमनुगतम्। तस्यैव साध्यत्वेन साध्याऽभेदप्रसङ्गात्। न च घटादिकं व्यतिरेकोदाहरणम्। रागादिव्यावृत्तत्वेनासाधारण्यात्। न च रागादेर्मिथ्याज्ञाननिवृत्तिद्वारा ज्ञाननिवर्त्यतया साक्षात्ज्ञाननिवर्त्यरूपसाध्याभावेन सपक्षत्वं नास्तीति वाच्यम्। उत्तरज्ञाननिवर्त्यपूर्वज्ञानादेः सपक्षात् व्यावृत्तत्वेन तथाऽप्यसाधारण्यात्। तस्मान्नाज्ञानत्वं ज्ञाननिवर्त्यत्वसाधकमिति। मैवम् – ज्ञानाभाव एवोदाहरणम्। अज्ञानत्वं चास्तीत्यादिव्यवहारहेतुसाक्षाद्विरोधित्वम्। अस्तीत्यादिव्यवहारहेतुश्चावरणाभावविशिष्टः प्रकाशः। तत्साक्षाद्विरोधी प्रकाशरूपविशेष्याभावः विशेषणाभावरूपमावरणञ्च। तथा च ज्ञानाभाव एवोदाहरणं, तस्य व्यवहारहेतुसाक्षाद्विरोधित्वात्। कुड्यादेर्व्यवहारहेतुज्ञानानुत्पादहेतुतया व्यवहारहेतुपरंपराविरोधित्वेऽपि साक्षात्तद्विरोधित्वाभावान्न तत्र व्यभिचारः।

अत एव न काचादिनाऽपि व्यभिचारः। ननु मलो न ज्ञाननिवर्त्यः, द्रव्यत्वात्, काचादिवदिति सत्प्रतिपक्षत्वमिति चेन्न। अज्ञानान्यत्वस्य तत्रोपाधित्वात्। न च पक्षेतरता। विपक्षस्य ज्ञानाभावस्यापि व्यावर्त्यत्वात्। न च पूर्वसाधनव्यतिरेकत्वेनानुपाधित्वं, ज्ञानस्य मोक्षसाधनता प्रतिपादकवचनानुरोधेन तस्य साध्यव्यापकत्वनिश्चयात्। यद्यपि ज्ञानस्यैव दीक्षाया अपि साधनत्वप्रतिपादकं वचनमस्ति, तथाऽपि ज्ञानादेवेत्यादावेवकारे-णान्ययोगव्यवच्छेदेन ज्ञानस्य साधनभावप्रतिपादनाद्दीक्षाविषयं वचनं परंपरासाधनत्वपरम्। न च "दीक्षैव मोचयत्यूर्ध्व"मित्यादौ दीक्षासाधनताप्रतिपादकेऽपि वाक्य एवकारश्श्रूयत इति वाच्यम्।

दीयते ज्ञानसद्भावः क्षीयते च मलत्रयम्।

इत्यादिना ज्ञानद्वारा साधनत्वप्रतिपादनेन तदैकार्थ्याय दीक्षामोचयत्येव ज्ञानद्वारेत्येव-मन्वयकल्पनोपपत्तेः। न च दीयते ज्ञानसद्भाव इत्यत्र द्वारीभूतज्ञानोत्पत्तिर्न विवक्षिता, किन्तु मलापसारणेन स्वीय ज्ञानाभिव्यक्तिरेव फलीभूता विवक्षितेति वाच्यम्। क्षीयते च मलत्रयमित्यस्य वैयर्थ्यापत्तेः। तस्य तत्र[19] हेतुप्रतिपादकत्वे च शब्दस्य समुच्चय[20]प्रतिपादकस्यानुपपत्तेः। च शब्दस्य हेत्वर्थत्वेनोपपत्तावपि **ज्ञानतिलकादौ** दीक्षादेस्साधनता निषेधकस्य वाक्यस्य पर्यालोचनया दीक्षामोचयत्येव ज्ञानद्वारेत्यस्यार्थस्या-श्रयणीयत्वात्, दीक्षानन्तरं ज्ञानार्थप्रवृत्तेश्श्रवणात्, ज्ञानानन्तरं दीक्षादेः कर्तव्यता निषेधाच्च। अत एव "ज्ञानेनैव तु कैवल्यप्राप्ति"रित्यादावपि विज्ञानेन कैवल्यप्राप्तिर्भवत्येवेति ज्ञानस्यापि दीक्षासाधनीभूतस्य परंपरासाधनत्वं प्रतिपाद्यमिति वैपरीत्यं निरस्तम्। तस्मात्सोपाधित्वान्न प्रतिपक्षानुमानम्। एवं सन्निकर्षप्रतिबन्धकत्वे सत्याच्छादकत्वं तमस्त्वमन्धकारमलसाधा-रणम्। प्रकाशत्वन्तु सत्वगुणाधिक्यं ज्ञानतेजस्साधारणम्। तेजसोऽपि सत्वाधिक्यस्य

---

[19] (टि) तस्य तत्र – वृत्तिज्ञानस्य मलत्रयक्षये।

[20] (टि) समुच्चयेति। दीक्षाया ज्ञानहेतुत्वेन सहज्ञानस्य मलक्षयहेतुत्वसमुच्चयेत्यर्थः। ननु च शब्दाभावे फलीभूतज्ञानेन मलक्षय इत्येव लाभाद्दीक्षाया मलक्षयहेतुत्वं न लभ्येत। अतश्च शब्दोऽन्यथासिद्ध इत्यत आह – च शब्दस्येति।

तत्प्रकरणे उपपादनात् इति केचित्। वस्तुतस्तु प्रकाशत्वं तमो निवर्तकता प्रयोजकोऽखण्डो धर्मः। न तु सत्वगुणाधि- क्यम्। सत्वस्य प्रकाशाधीननिर्वचनतयाऽन्योन्याश्रयात्, स्वरूपप्रकाशे तदभावाच्च। एवं च मलस्य तमस्त्वात् प्रकाशनिवर्त्यत्वमित्यनुमाने मलान्धकारानुगतं तमस्त्वं ज्ञानतेजस्साधारणं प्रकाशत्वं च दुर्वचमिति दूषणं निरस्तम्। तस्मात् ज्ञाननिवर्त्यत्वमेव मलस्याभ्युपगन्तव्यम्। त्वयाऽपि श्रवणादिप्रतिपत्तीनां साक्षात्कारद्वारकत्वमनङ्गीकुर्वता तद्विधिवैयर्थ्यपरिहाराय साक्षात्तन्निवर्तकत्वमभ्युपगतमेव। न च साक्षात्कारेतरप्रतिपत्तीनां साक्षान्मलनिवर्तकत्वेऽपि साक्षात्कारस्य निवर्तकत्वे आत्माश्रय इत्युक्तमिति वाच्यम्।

परानन्दमरूपन्तु पश्यन्नानन्दभाग्भवेत्।

इति साक्षात्कारस्य तद्धेतुत्वबोधनेन मानसस्य वृत्तिसाक्षात्कारस्य तद्धेतुत्वोपगमादिति केचित्। वस्तुतस्तु स्वरूपसाक्षात्कारस्यैव हेतुत्वमिति नवमे उपपादयिष्यते।।

## कर्मणैव मोक्षवादः

केचित्तु वर्णाश्रमधर्मा एव मोक्षसाधनमिति वदन्ति। तथाहि **स्कान्दे** –

वक्ष्यामि परमं गुह्यं मुक्तिसाधनमादरात्।
वर्णाश्रमसमाचारादेव मुक्तिर्नचान्यथा।।

इत्युपायान्तरनिषेधपूर्वकं कर्मणां मोक्षसाधनत्वं प्रतिपादितम्।

तथा **गौतमधर्मे** – "यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणास्सब्रह्मणस्सायुज्यं सलोकतामाप्नोती"तीतरनैरपेक्ष्येण साधनत्वन्निरूपितम्। तथा –

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।

इति **पुराणे** इतरव्युदासेन कारणत्वं श्रूयते। न च तत्तदाश्रमविहितकर्मत्वमात्रेण तेषां जनकत्वे यत्किञ्चिन्नित्यादिनाऽपि तत्प्रसङ्गः, तादृश यावत्कर्मत्वेन जनकत्वे त्वसंभवः, तादृशस्य सर्वस्यैकेन कर्तुमशक्यत्वादिति वाच्यम्। तादृशयावन्नित्यनैमित्तिककर्मत्वेन तज्जनकत्वोपपत्तेः। अत एव कर्मणां स्वस्ववाक्ये फलश्रवणेन फलाकांक्षाविरहान्न फलान्तरबोधनं युक्तमित्यपि निरस्तम्। नित्यनैमित्तिकयोरेव तज्जनकत्वस्योक्तत्वात्। अथवा शक्यानुष्ठानतादृशयावत्कर्मत्वेन जनकत्वम्। संयोगपृथकत्वन्यायेन च फलान्तरजनकत्वाविरोधोऽपि। अन्यथा तवापि तेषां ज्ञानसाधनत्वाभावप्रसङ्गात्।

ज्ञानमेव महाविष्णो मोक्षसाधनमुच्यते।

इत्यादिज्ञानस्य साधनताप्रतिपादकवचनं कर्मप्रवृत्तिहेतुभूतकर्मकर्तव्यताज्ञानपरं भवतु। न च,

नान्यश्शरणदः कश्चिदात्मज्ञानादृते क्वचित्।

इत्यात्मज्ञानस्य हेतुताप्रतिपादनं कथमिति वाच्यम्। कालान्तरदेशान्तरभाविफलोद्देशेन कर्मप्रवृत्तेस्स्थिरात्मज्ञानसाध्यत्वेनात्मज्ञानस्य कर्मद्वारा हेतुभावस्य तेन प्रतिपादनोपपत्तेः।

जायते तच्छिवज्ञानं प्रसादादेव मे हरे।

इति मुक्तिहेतुज्ञानस्य शिवप्रसादसाध्यत्वविधानार्थानुवादे शिवज्ञानत्वेनानुवादात् शिवज्ञानस्य तत्साधनत्वं प्रतीयत इति चेन्न। शिवज्ञानस्यापि स्वात्मज्ञानद्वारा परंपराहेतुत्वसंभवात्। ननु कर्मणां मोक्षहेतुता न युज्यते। कर्मानुष्ठाने पुनः पुनर्धर्मार्जनेन संसारस्यानिवृत्तेरिति चेन्न। भोगकामनया कृतानामेव तेषां भोगहेतुत्वेन मुमुक्षुणाऽनुष्ठितानां मोक्षजनकत्वोपपत्तेः। अन्यथा तवापि ज्ञानोत्पादाय तदनुष्ठाने भोगनिष्पत्त्यापत्तेः। न च भोगार्थं निषिद्धानुष्ठाने अधर्मार्जनेन संसारनिवृत्तिर्न स्यादिति वाच्यम्। निषिद्धानुष्ठानेनैव भोगनिष्पत्त्युपपत्तेर्निषिद्धानुष्ठानद्वारक-भोगसंपादकस्य कर्मणस्सत्वे मानाभावात्।

सत्वे वा तस्यापि भोगेन क्षपणोपपत्तेः। न च ज्ञानस्य मोक्षहेतुत्वाभावे प्रारब्धेतरकर्मणां क्षयानुपपत्तेर्मोक्षस्यासंभवः। कायव्यूहपरिग्रहणे सर्वेषां भोगेनैव क्षयस्योपपत्तेः, ममापि कर्मप्रवृत्तिद्वारा परंपरासाधनेनात्मज्ञानेन प्रारब्धेतरकर्मणां भोगं विनाऽपि क्षयस्य संभवाच्च। अत एव कर्मानुष्ठाने आनुषङ्गिकस्याधर्मस्यावश्यंभावेन न संसारादुत्तरणमिति परास्तम्। परंपरासाधनभूतज्ञानेनैवाऽध-र्मानुत्पत्तेरप्युपपत्तेः। न च कर्मणां ज्ञानद्वारा साधनत्वमेव तद्वाक्येन प्रतिपाद्यत इति वैपरीत्यमस्त्विति वाच्यम्। कर्मणां ज्ञानहेतुभावस्य कल्पनीयत्वात्, आत्मज्ञानस्य तु कालान्तरभाविफलोद्देश्यकप्रवृत्तौ हेतुत्वं क्लृप्तमिति वैषम्यात्। तस्मात्कर्मणामेव मोक्षहेतुत्वं ज्ञानन्तु तेषामेव साधनमिति।।

## ज्ञानकर्मसमुच्चयः

अन्ये तु ज्ञानकर्मणी समप्रधान्येन संभूय मोक्षसाधनम्। न च परस्परसाहित्योपस्थापकपदाभावेन निरपेक्षसाधनत्वस्यैव बोधनात्विकल्प एवास्त्विति वाच्यम्। विकल्पस्याष्टदोषदुष्टत्वात्। तथाहि – मोक्षाय यदा कर्मनिर्वर्त्यते तदा ज्ञानवाक्ये प्राप्तं प्रामाण्यं परित्यज्यते। अप्राप्तञ्च अप्रामाण्यं स्वीक्रियते। यदा तु ज्ञानं तदर्थं निर्वर्त्यते तदा ज्ञानवाक्य एव पूर्वं त्यक्तं प्रामाण्यं स्वीक्रियते। स्वीकृतञ्चाप्रामाण्यं परित्यज्यत इति प्राप्तपरित्यागोऽप्राप्तस्वीकारस्त्यक्तस्वीकारः स्वीकृतपरित्यागश्चेति दोषचतुष्टयं ज्ञानवाक्ये। तथा कर्मवाक्येऽपि दोषचतुष्टयमुक्तक्रमेण योज्यम्। न च ज्ञानकर्मणोः परस्परनैरपेक्ष्येणैकस्मिन्फले साधनत्वबोधनाद्दुष्टोऽपि विकल्पो गत्यभावेन स्वीकार्य इति वाच्यम्।

यथाऽन्नं मधुसंयुक्तं मधु चान्नेन संयुतम्।
एवं तपश्च विद्या च संयुक्तं भेषजं महत्।।
ज्ञानं प्रधानं न तु कर्महीनं कर्मप्रधानं न तु बुद्धिहीनम्।
तस्मात्तयोरेव भवेत्प्रसिद्धिः नह्येकपक्षो विहगः प्रयाति।।

इत्यादिना परस्परसापेक्षतयैव जनकत्वबोधनात्। "ज्ञानादेव तु कैवल्यप्राप्ति"रित्यादावेवकारेण निरपेक्षहेतुत्वं ज्ञानस्य बोधितमिति चेन्न। उक्तसमुच्चयप्रतिपादकवचनाविरोधाय तस्य ज्ञानादेव कैवल्यप्राप्तिः न तु ज्ञानं विनेति ज्ञानाभावे कैवल्याभावपरत्वात्। हेतुपञ्चम्यैव ज्ञानाभावे कैवल्याभावस्य लब्धत्वादेवकारस्तत्परो न भवतीति चेन्न। विकल्पितस्यान्यस्य साधनस्य सद्भावेऽपि हेतुपञ्चम्युपपत्त्या तया तस्यालाभेनैवकारस्य[21] तत्परत्वोपपत्तेः। तथा च विकल्पितसाधनस्यैवाऽनेन निषेधः, न समुच्चितसाधनस्य। ननु **ज्ञानतिलके** –

[21] (टि) तस्यालाभेन – ज्ञानाभावे कैवल्याभावस्यालाभेन।।

न दानैर्न तपोयज्ञैर्न होमैर्नियमैर्व्रतैः।
न स्नानतीर्थसंपातैर्लभ्यते परमं पदम्।।

**शिवधर्मोत्तरे** –

न कर्मकरणीयं हि बहिस्तस्य महात्मनः।
ज्ञानामृतेन तृप्तस्य भक्त्या च विवशात्मनः।।

इत्यादिना साक्षात्कर्मणां साधनत्वाभावः प्रतिपादित इति चेन्न। तस्यापि वचनस्य ज्ञानं विना कृतानां कर्मणां मोक्षसाधनत्वाभावप्रतिपादनपरत्वात्। अन्यथा कर्मणां तत्साध-कत्वप्रतिपादकैर्वचनैर्विरोधप्रसङ्गात्। न च,

न लिङ्गं नाश्रमाचारः परमात्मनि संस्थितः। इति **सर्वज्ञानोत्तरे**,
न ध्यानं न तपः पूजा न होमो नैव साधनम्।
अग्निकार्यादिकार्यञ्च नैव तस्य महेश्वरी।।
नियमोऽपि न तस्यास्ति क्षेत्रपीठे च सेवनम्।
नार्चनं पितृकार्यं च तीर्थयात्रा व्रतानि च।।

इति **देवीकालोत्तरे** च ज्ञानिनः कर्मनिषेधात्समुच्चयानुपपत्तिः। उक्तसमुच्चयवचनानुरोधेन तस्य ज्ञानस्तापकत्वात्। न च कर्मणां ज्ञानद्वारा मोक्षहेतुत्वानभ्युपगमेऽदृष्टद्वारकत्वकल्पनाप्रसङ्ग इति वाच्यम्। तव ज्ञानोत्पत्तिप्रतिबन्धकाधर्मध्वंसद्वारा तत्त्वज्ञानहेतुत्वकल्पनापेक्षयाऽदृष्टद्वारा मुक्तिहेतुत्वकल्पनायामेव लाघवात्। तस्मात् ज्ञानकर्मणोस्समप्राधान्येन समुच्चय इति।।

## कर्मप्राधान्यतत्समुच्चयनिरासः

तदेतन्न विचारसहम्। तथाहि – तत्त्वज्ञानानन्तरं कर्मणः कर्तव्यत्वाभावस्तत्र तत्र प्रतिपाद्यते। स च ज्ञानद्वारा कर्मणो हेतुत्वे द्वारस्य निष्पन्नत्वेन युज्यते। साक्षाद्धेतुत्वे तु तदनन्तरमपि कर्मणां कर्तव्यत्वानपायान्न युज्यते। न च तस्य वचनस्य ज्ञानस्तुतिपरत्वम्। स्वार्थपरत्वे संभवत्यत्यन्तपरोक्षार्थत्वकल्पनायोगात्। समुच्चयवचनस्य उपायोपेयभावेनापि समुच्चयप्रतिपादकत्वोपपत्तेः। ज्ञानं प्रधानं इत्यत्रापि ज्ञानं प्रधानं साक्षात्करणं तत्तु कर्मणा स्वजनकेन विहीनं चेत्स्वस्यैवानिष्पत्त्याकार्याजनकम्। तथा कर्मप्रधानं ज्ञानोत्पादकतयाऽवश्यापेक्षणीयम्। अत एव बुध्या द्वारभूतया विनाकृतं न जनकम्। अत उभयोस्सत्व एव मुक्तिर्भवतीति योजनीयम्। अत एव न दानैरित्यादिः कर्मणां हेतुत्वनिषेधोऽपि सङ्गच्छते। यत्तूक्तं केवलानां हेतुत्वनिषेध इति तदपि न युक्तम्। केवलपदस्याध्याहर्तव्यतयाऽध्याहारदोषप्रसङ्गात्। न च तवापि कर्मणां परंपरया साधनत्वसद्भावेन साक्षात्साधनत्वस्यैव निषेद्धव्यतया साक्षात्पदस्याध्याहर्तव्यतयाऽध्याहारदोषः तुल्य इति वाच्यम्।

परम्परासाधने[22] साधनत्वमेव, नत्वनन्यथासिद्धिनियतं साधनत्वमित्यभ्युपगमेन साधनत्वस्यैव निषेधोपपत्तेः। न चैवं वर्णाश्रमसमाचारा इत्यादौ साधनपञ्चम्यनुपपत्तिः। नियतपूर्ववर्तित्वमात्रेण तदुपपत्तेः। न चैवं तव तत्र लक्षणापत्तिः। अनन्यथासिध्यंशस्य

[22] (पा) साधारणम्

परित्यागेऽपि तदितरांशस्य स्वार्थस्यैव बोधनोपपत्तेः। अस्तु वा लक्षणा। तथाऽपि लक्षणापेक्षयाऽध्याहारकल्पना गरीयसी। अन्यथा "गङ्गायां घोष" इत्यादावपि तीरमत्स्यादिपदाध्याहारेण बोधकत्वसंभवाल्लक्षणाकल्पनमनुपपन्नं स्यात्। एवं ज्ञानादेवेत्यत्रापि ज्ञानान्यस्य कर्मादेर्मोक्षहेतुत्वं निषिध्यते। नचात्र ज्ञानाभावे कैवल्याभाव इत्यर्थवर्णनं युक्तम्। इहैवकारस्य विशेष्यसङ्गतत्वेनान्ययोगव्यवच्छेदार्थकत्वात्।

तथाहि – एवकारस्य त्रयोऽर्था अयोगव्यवच्छेदोऽत्यन्तायोगव्यवच्छेदोऽन्ययोगव्यवच्छेद इति। तत्र विशेषणवाचिपदोत्तरस्य प्रथमोऽर्थः। क्रियावाचकपदोत्तरस्य तु द्वितीयः। विशेष्यवाचिपदोत्तरस्य तृतीयः। शङ्खः पाण्डर एव, ब्राह्मणश्चतुर्वेदाभिज्ञो भवत्येव, पार्थ एव धनुर्धर इत्यादिषु तथैव व्यवस्थाया दर्शनात्। अत एव दण्डादेव घट इत्युक्ते वक्तारो भवन्ति, कथं दण्डादेव घटः चक्रादपि तदुत्पत्तिरिति। अन्यथा तदपि वाक्यमयोगव्यवच्छेदार्थकतयाऽऽर्जवेन सङ्गतं स्यात्। न च तताव्युत्पत्तिसिद्धावप्ययोगव्यवच्छेदपरतया कथञ्चिन्नियत इति युक्तम्। मुख्यार्थे संभवति क्लिष्टार्थस्यायुक्तत्वात्। समुच्चयप्रतिपादकवचनस्यावलेशेन गतेरुक्तत्वात्। यदपि ज्ञानोत्पत्तिप्रतिबन्धकाधर्मध्वंसद्वारा ज्ञानहेतुत्वे गौरवमित्युक्तं, तदपि कर्मणां साधनत्वनिषेधकवचनपर्यालोचनया प्रामाणिकत्वेन न दोषावहमिति निरस्तम्। तस्मान्न ज्ञानकर्मणोस्समप्राधान्येन समुच्चयः। नापि कर्मण्येव साधनं, ज्ञानं तु तदुपयोगीति पक्षो युक्तिसहः। ज्ञानिनः कर्मकर्तव्यतानिषेधात्, कर्मणां साधनभावनिषेधाच्च।

न चैवं कर्मणां साधनभावं प्रतिपादयन्ति वाक्यानि कथं सङ्गतानीति वाच्यम्। तेषां परंपरासाधनभावप्रतिपादकत्वेन सङ्गतार्थत्वात्। ज्ञानस्य परंपरासाधनत्वे ज्ञानिनः कर्मकर्तव्यतानिषेधवदनुष्ठितकर्मणो ज्ञानकर्तव्यतानिषेधप्रसङ्गाच्च। आनुमानिकात्मज्ञानेनापि कर्मप्रवृत्त्युपपत्त्या साक्षात्कारस्य तत्रानुपयोगेन विधीयमानस्य साक्षात्कारस्य परंपरासाधनत्वायोगेन साक्षात्साधनत्वावश्यंभावाच्च। अत एव प्रवृत्तिहेतुभूतेन ज्ञानेन भोगार्थं निषिद्धानुष्ठाने कर्मानुषक्ते निषिद्धानुष्ठाने चाधर्मार्जनं न भवतीति निरस्तम्। साक्षात्कारस्यैव तद्विरोधित्वात्। तस्मात्तत्तद्वर्णाश्रमसमाचारादेव ज्ञानद्वारा मुक्तिः। नान्यथा। अनाचरणे पुनः प्रत्यवायोत्पत्त्या तत्त्वज्ञानप्रतिबन्धापत्तेरित्येव **स्कान्दस्य** वचनस्यार्थः। कर्मणैव संसिद्धिमित्यत्रापि संसिद्धिशब्देन ज्ञानमेवाभिधीयते। न च तत्त्वज्ञानोत्पत्तेः प्रागनुष्ठितानां कर्मणां भोगजनकत्वात् कथं ज्ञानोत्पादकत्वमिति[23] वाच्यम्। निष्कामकृतानां[24] तेषां ज्ञानजनकत्वोपपत्तेः। तस्मात्ज्ञानमेव साक्षात्साधनम्। कर्मणि तु तद्धेतुभूतानीत्येव युक्तम्। कर्मणां ज्ञानहेतुभावश्चोत्तरत्र प्रतिपादयिष्यते। ननु मास्तु वर्णाश्रमधर्माणां केवलानां तुल्यवत् समुच्चितानां वा साधनभावः।

काशीमरणादीनान्तु केवलानां तदङ्गीकारे को दोषः। तत्र ज्ञानद्वारकत्वे मानाभावात्। तथा च ज्ञानेन समं तेषां विकल्प एव, निरपेक्षसाधनत्वेन बोधनात्। न च ज्ञानस्य तत्रोत्पत्त्यनङ्गीकारे सञ्चितानां क्षयो न स्यात्, भोगेन क्षये पुनरधर्मार्जनापत्तिरिति वाच्यम्। तीव्रभैरवयातनानुभवेन परमशिवानुसन्धानजन्यसुखानुभवेन च सर्वेषां कर्मणां भोगेनैव

---

[23] (पा) ज्ञानोत्पत्तिरिति

[24] (पा) निरपेक्षितानाम्

क्षयोपपत्तेः। अथवा काशीमरणादीनां मोक्षहेतुता प्रतिपादकवचनानुसारेण भोगं विनाऽपि काशीमरणादिनैव तेषां क्षयः कल्प्यते। न च "नाभुक्तं क्षीयते" इति वचनविरोधः, ज्ञानेन भोगं विनाऽपि नाश इति वदताऽपि तस्य वचनस्य शब्दबोधितनाशकानाश्यकर्मपरत्वस्य वक्तव्यत्वात्। काशीमरणदीनां मोक्षहेतुताबोधकशब्दस्यैव तत्गतकर्मनाशहेतुताबोधकत्वात्। तस्मात् ज्ञानं विनाऽपि तेषां मोक्षहेतुत्वमिति।

मैवम् – मोक्षो हि नाम वस्तुतः प्राप्तस्यैव ज्ञानादप्राप्तस्येव स्थितस्य परशिवानन्दादेः प्राप्तिरूपः। स च विस्मृतस्य ग्रैवेयकादेरिव ज्ञानादेव भवितुमर्हति। ज्ञानं विना कर्ममात्रादज्ञाननिवृत्त्ययोगात्। अतः काशीमरणादिस्थलेऽपि ज्ञानं कल्प्यते। तदुक्तं **शिवधर्मोत्तरे** –

मोक्षार्थी पुरुषस्तस्मात् ज्ञानमेव सदाऽभ्यसेत्।
ज्ञानेन च तदज्ञानं निवर्तेत न कर्मभिः।।
ज्ञानं लब्ध्वाऽचिरादेव शिवसायुज्यमाप्नुयात्। इति।

ज्ञानं विना सञ्चितकर्मणां क्षयानुपपत्तेश्च। नियतदेशकालविशेषभोग्यविविधसुखदुःखादिप्रापकाणां कर्मणां भैरवयातनया शिवानुसन्धानजन्यसुखानुभवेन च प्रक्षयानुपपत्तेः। काशीमरणादीनां मोक्षहेतुतावचनस्य साक्षात्कर्मनाशकत्वबोधकत्वाभावेन शब्दबोधितनाशकभावस्य तेष्वभावात्। तस्मात्काशीमरणादीनामपि ज्ञानद्वारैव हेतुत्वम्। सञ्चितकर्मनाशश्च तत्त्वज्ञानेन शिवकृतया दीक्षया च। तदेतत्सर्वं **स्कान्दे** –

भगवन् श्रोतुमिच्छामस्सर्वतत्त्वविशारद।
केचित्केवलविज्ञानं प्रशंसन्ति विमुक्तये।।
केचित्समुच्चितं कर्मज्ञानेन ब्रह्मवित्तम।
केचिद्दानं प्रशंसन्ति तथा केचिद्व्रतं बुधाः।।

इत्यादिना नैमिशीयानां प्रश्नमुपस्थाप्य उत्तरकथनाय शिवविष्णुसंवादमवतार्य,

ज्ञानमेव महाविष्णो मोक्षसाधनमुच्यते।
ज्ञानं वेदशिरोद्भूतमिति मे निश्चिता मतिः।।
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम्।
जायते तच्छिवज्ञानं प्रसादादेव मे हरे।।
यज्ञदानादिकर्माणि न साक्षान्मुक्तिसिद्धये।
श्रीमद्वाराणसी पुण्या पुरी नित्यं मम प्रिया।।
यस्यामुत्क्रममाणस्य प्राणैर्जन्तोः कृपाबलात्।
तारकं ब्रह्मविज्ञानं ददामि श्रेयसे हरः।।

इत्यादिना कण्ठरवेण प्रतिपादितम्। तथा **शिवधर्मोत्तरेऽपि** –

यदि क्लेशेन महता भवेत्पुण्यं महत्फलम्।
स्यान्महारत्नवाहिन्याः फलं पाषाणवाहिनाम्।।
पाषाणशतसाहस्रं यस्स्कन्धे वोढुमिच्छति[25]।

---

[25] (पा) यस्तु निर्वोढुम्

श्रममेति विनाशं वा नैव तत्फलमश्नुते।।
अङ्गुष्ठोदरमात्रन्तु विशिष्टं पद्मरागकम्।
सुखवाह्यमनूनञ्च महतोऽर्थस्य साधनम्।।
ज्ञानयोगः प्रधानत्वादन्तरङ्गो विमुक्तिदः।
बहिरङ्गोऽप्रधानत्वात् कर्मादिर्भोगसाधनम्।।
यथेहान्तश्चरा राज्ञां प्रियास्स्युर्न बहिश्चराः।
तथाऽन्तर्ध्याननिरताः प्रियाश्शम्भोर्न कर्मिणः।।
बहिः कर्मरता यद्वन्नातीवफलभागिनः।
दृष्टा नरेन्द्रभवने तद्वदत्रापि कर्मिणः।।
यथाऽन्तरुपचारेण नरः स्त्रीषु प्रसीदति।
तथाऽन्तर्ध्यानविधिना प्रसीदति महेश्वरः।।

इत्यादिना कर्मणां ज्ञानापेक्षया बहिरङ्गत्वमुक्तम्। तथा **ज्ञानतिलकेऽपि** –

ईदृग्भूतो दुराधर्षस्संसारार्णोऽतिभीषणः।
तरन्ति ते महात्मानो येषां ज्ञानकरण्डकम्।।
ये पुनस्तीर्थयात्राभिस्स्नानदानजपादिभिः।
यज्ञाग्निहोत्रकर्तारस्तटाकारामकारकाः।।
देवार्चनादिचर्याभिः पञ्चाग्नितपसिस्थिताः।
जपध्यानरताः केचिद्येव शौचरता नराः।।
मुनिनो[26] दण्डधारिण्यो मृगचर्मावकुण्ठिताः।
एकदण्डधरा ये च त्यक्तयज्ञोपवीतिनः।।
नित्यस्नायि शिखाच्छेदि द्वैताद्वैतव्यवस्थिताः।
भस्मस्नायि जटाधारि लिङ्गाराधनतत्पराः।।
शैवाः पाशुपता ये च मन्त्रेणार्थविशेषतः।
महास्थिमुद्राङ्गाश्चैव महाकंकाळधारिणः।।
प्रेतावासरता नित्यं भस्मकुण्ठितविग्रहाः।
सौरधर्मेषु ये सक्ताः विशिष्टास्सुशिखास्तथा।।
वल्कलाम्बरधारिण्यः पुष्पपर्णफलाशिनः।
त्रिदण्डपाणयोऽन्येऽपि त्रिकालस्नायिनो नराः।।
कमण्डलुधरा नित्यं भैक्षाहारास्सुयन्त्रिताः।
तथाऽन्ये भिक्षुसंघाताः काषायो परिवाससः।।
बौद्धधर्मप्रवृत्ताश्च क्लिश्यन्ते मोक्षकांक्षिणः।
दिगम्बरास्तथा चान्ये दिव्याम्बरधरस्तथा।।
उपास्यन्ति महाभक्त्या पुरभेदं जितेन्द्रियाः।
विष्णुधर्मरताश्चान्ये अद्वैतकृतनिश्चयाः।।

---

26 (पा) मौनिनो

भैरवे मारतन्त्रे च लग्नाश्चान्ये फलार्थिनः।
मृगचर्मधरा नित्यं जपहोमार्चने रताः।।
एवं चान्येऽप्यसंख्येया ह्यविद्याफलमोहिताः।
रज्जुभिः पुण्यपापौघैर्वेष्टयन्ति मुहुर्मुहुः।।
न तेषां तत्पदं शान्तं निराधारं निरामयम्।
अज्ञानतिमिराक्रान्ताः कल्पकोटिशतैरपि।।
अनेकैः पापसंघातैरनेकैः पुण्यसञ्चयैः।
बध्नन्ति सर्वदाऽऽत्मानं कोशागारक्रमिर्यथा।।

इत्यादिना केवलानां कर्मणां मोक्षहेतुत्वाभावः प्रतिपादितः। तस्मात्बोध एव साधनमिति स्थितम्। स च न नियन्तृनियम्यभावादिना भेदाकारः किन्त्वभेदाकार इत्याहानन्य इति।

यश्शिवस्सोऽहमेवेति अद्वैतं भावयेत्सदा।

इत्यादिवचनादभेदाकार एव बोधो हेतुरित्यर्थः। एतेषां **वचनानामघोरशिवाचार्यविरचितव्याख्यानं** दशमसूत्रे निराकरिष्यते। अभेदगोचरासंभावनानिवृत्तिर्हेतुदृष्टान्तप्रतिपादनद्वारा गुरूपदेशादित्याह – **गुरुणेति।** अयमेव गुरूपदेशः, तावत्कालञ्च कर्तव्यं श्रवणादिविशेषतः। इति विधि–बोधितं श्रवणम्।।

## श्रवणविधिविचारः

ननु श्रवणविधिः, किमपूर्वविधिः, उत नियमविधिः, आहोस्वित्परिसंख्याविधिः। नाद्यः। तद्गतस्यार्थनिश्चयसाधनभावस्य लोकत एव प्राप्तत्वात्। ननु तात्पर्यावधारणरूपस्य श्रवणस्य वाक्यार्थनिश्चयसाधनभावो न लोकतः प्राप्तः। अर्थविशेषावच्छिन्नस्य तात्पर्यस्य अर्थापरिज्ञाने ज्ञातुमशक्यत्वेनार्थज्ञानस्य तात्पर्यज्ञानजनकतया तज्जन्यता योगात्। न च तात्पर्यज्ञानस्याहेतुत्वे नानार्थादिपदप्रयोगेऽर्थविशेषे तात्पर्यानवधारणेऽपि वाक्यार्थनिश्चयः स्यादिति वाच्यम्। तावता पदार्थतात्पर्यज्ञानस्य वाक्यार्थबोधहेतुत्वसंभवेऽपि वाक्यार्थतात्पर्यज्ञानस्य हेतुत्वानुपपत्तेरपरिहारात्। न च पदार्थतात्पर्यज्ञानस्य हेतुत्वेऽप्यन्योन्याश्रयदोषस्समान इति वाच्यम्। पदार्थनिश्चयस्य फलत्वाभावात्। वाक्यार्थनिश्चयस्य पदार्थज्ञानपूर्वकतत्गोचरतात्पर्यनिश्चयसाध्यत्वेऽप्यविरोधात्। न च पदार्थतात्पर्ये निश्चितेऽपि तत्तत्पदार्थान्वयतात्पर्यसन्देहेऽन्वयबोधाभावादन्वयतात्पर्यज्ञानमपि हेतुतयाऽभ्युपेयमिति वाच्यम्। अन्वयतात्पर्यज्ञानहेतुत्वासंभवस्योक्तत्वात्। अन्वयतात्पर्य–सन्देहेऽन्वयबोधाभावस्तु तात्पर्यसन्देहेन प्रतिबन्धात्। न च सन्देहनिरासाय तात्पर्य–निश्चयापेक्षणे पुनरन्योन्याश्रयस्तदवस्थ इति वाच्यम्।

अन्वयान्तरतात्पर्यकत्वाभावनिश्चयेनापि सन्देहव्युदासोपपत्तेः। तस्मान्न लोकतः प्राप्तस्तात्पर्यनिश्चयात्मकस्य श्रवणस्यार्थनिश्चयसाधनभाव इति। मैवम् – तात्पर्यनिश्चयस्य वाक्यार्थनिश्चयहेतुत्वाभावेऽपूर्वविधिरप्यनुपपन्नस्स्यात्। बाधितार्थकत्वात्। किञ्च तात्पर्यनिश्चयस्य वाक्यार्थनिश्चयाहेतुत्वे निगमागमादेरापातप्रतिपन्ने सर्वत्र प्रामाण्यं स्यात्। नचान्योन्याश्रयदोषः। तात्पर्यज्ञाने हि तात्पर्यावच्छेदकस्यार्थस्योपस्थितिमात्रमपेक्षितं,

न तु सत्तानिश्चयरूपोपस्थितिः। तथाहि – यागस्य स्वर्गसाधनताबोधनपरमिदं वाक्यमिति ज्ञानाय यागस्स्वर्गसाधनमित्येवं रूपोऽर्थसत्तानिश्चयो नापेक्ष्यते, किन्तु यागस्स्वर्गसाधनं भवतु वा मा वा तथाऽपीदं वाक्यमेतत्परमित्यर्थसन्देहेऽपि तात्पर्यनिश्चयदर्शनादर्थोपस्थितिसामान्यमेव। न च सन्देहसाधारणज्ञानमात्रस्य तात्पर्यज्ञान-हेतुत्वेनान्योन्याश्रयपरिहारेऽपि तात्पर्यनिश्चयस्यैवार्थनिश्चयरूपतयाऽऽत्माश्रयदोषस्स्यादेवेति वाच्यम्। तात्पर्यनिश्चयस्यार्थनिश्चयरूपत्वाभावात्।

अर्थनिश्चयो हि यागादौ स्वर्गसाधनतादिवैशिष्ट्यस्यान्याविषयतयोपस्थितिः। यागादेस्स्वर्गसाधनताबोधनपरमिदमित्येवमात्मातात्पर्यनिश्चयस्तु बोधविषयतया वैशिष्ट्यं विषयीकरोतीति नार्थनिश्चयः। न च तात्पर्यनिश्चयाभावदशाया-मप्यापातप्रतिपत्तिरूपशाब्दज्ञानोदयात् व्यभिचारेण तात्पर्यनिश्चयस्य हेतुत्वमयुक्तमिति वाच्यम्। तत्र प्रतीतिमात्रोदयेऽपि निश्चयोदयाभावेन व्यभिचाराभावात्। न च सन्देहव्यतिरिक्तज्ञानस्य निश्चयशब्दार्थतया कोटिद्वयानवलम्बिन आपातप्रत्ययस्य कथं नार्थनिश्चयत्वमिति वाच्यम्। इदमित्थमेवेत्येवं रूपत्वाभावेऽपि कोटिद्वयाविषयत्वमात्रेणापात-प्रत्ययस्यापि निश्चयत्वे **यक्षानुरूपबलिन्यायेन** तात्पर्यस्य कोट्यन्तरानवलम्बित्वमात्रेण निश्चयरूपज्ञानस्यापि संभवेन व्यभिचाराभावात्। तात्पर्यस्य सत्तानिश्चयरूपं ज्ञानं नास्तीति चेत् तर्ह्यर्थस्यापि तथाविधं ज्ञानं नास्तीति न कोऽपि दोषः। क्वचित् तात्पर्यनिश्चयेऽपि वक्तुराप्तत्वसन्देहेऽर्थनिश्चयो नास्तीति चेन्न। तावता वक्तुराप्तत्वनिश्चयोऽपि हेतुरस्तु। न तु तात्पर्यज्ञानस्य वाक्यार्थज्ञानहेतुत्वाभावः।

ननु चास्तङ्गतस्सवितेत्यादौ किमभिप्रायेणानेनेदं वाक्यं प्रयुक्तमिति न जाने सूर्यास्तमयमात्रमनेन वाक्येन मया प्रतिपन्नमिति व्यवहारदर्शनात् व्यभिचारेण तात्पर्यनिश्चयस्य न हेतुत्वमिति चेन्न। तस्य वाक्यस्य सूर्यास्तमयमात्रे मया बोधिते स्वयमेव सन्ध्यावन्दनादिकर्तव्यतां ज्ञास्यतीत्येवमभिप्रायपूर्वकत्वे सूर्यास्तमयस्यैव वाक्यार्थतया तन्निश्चयरूपं फलं तत्तात्पर्यकत्वनिश्चयरूपं कारणञ्चास्त्येवेति न कोऽपि दोषः। किमभिप्रायेणेदं वाक्यं प्रयुक्तमिति न जान इति व्यपदेशस्तु वाक्यार्थनिश्चयप्रयोजकस्य तात्पर्यनिश्चयस्य सत्वेऽपि फलीभूतस्य वाक्यार्थबोधस्य प्रयोजनापरिज्ञानमात्रेण। यदि तु वाक्यमेव सन्ध्यावन्दनादिकर्तव्यता बोधनपर्यन्तं व्याप्रियते तदा सूर्यास्तमयो न वाक्यार्थः, किन्तु सन्ध्यावन्दनादिकर्तव्यत्वमेव तत्गोचरस्तात्पर्यनिश्चयः वाक्यार्थनिश्चयश्चास्तीति न काप्यनुपपत्तिः। ननु किमिदं तात्पर्यं यन्निश्चयो वाक्यार्थनिश्चयहेतुः। न तावत्तत्प्रतीतिजननस्वरूपयोग्यत्वम्, अनभिमतेऽप्यर्थे तस्य सत्वात्। नापि तत्गोचरप्रवृत्तिनिवृत्त्यादिफलकत्वं, स्वरूपाख्यानपरेषु तत्परत्वाभावापत्तेः। नापि तत्प्रतीतिशेषत्वं, जनकत्वस्य शेषशब्दार्थत्वे पूर्वोक्तदोषात्, अन्यस्य दुर्वचत्वादिति। मैवम् – तत्प्रत्यायनेच्छया प्रयुक्तत्वं तात्पर्यम्। न च स्तुतिनिन्दावाक्यानां प्रवृत्तिनिवृत्तिपरत्वं न स्यात्, प्रवृत्तिनिवृत्त्युत्पादनेच्छया प्रयुक्तत्वेऽपि तत्प्रत्यायनेच्छया प्रयुक्तत्वाभावादिति वाच्यम्। प्रवृत्तिनिवृत्तिप्रत्ययाभावेन तत्प्रयोजकस्य तात्पर्यस्याभावेऽप्यदोषात्। प्रवृत्तिनिवृत्तिपरत्वव्यपदेशोऽपि प्रतीत्यनुपयुक्तेनापि तदिच्छया प्रयुक्तत्वेनैवोपपन्नः। नन्वेवमिच्छागर्भस्य तात्पर्यस्य शुकवाक्यादावभावेन ततोऽर्थप्रतीतिर्न

स्यादिति चेन्न।

ईश्वरेच्छायास्तत्रापि सत्वेन तात्पर्याविरोधात्। वस्तुतस्तु तत्र तात्पर्याभावेऽपि न दोषः। तत्रार्थस्य प्रतीतिमात्रोदयेऽपि सत्तानिश्चयस्य कार्यस्याभावात्। तत्रापि सत्तानिश्चयाङ्गीकारे विप्रतिपन्ने तत्र तत्रार्थे शुकवाक्यस्यापि प्रमाणीकरणप्रसङ्गात्। नचाबाधितेऽर्थे तस्यापि प्रामाण्यमिष्टमेवेति वाच्यम्। प्रमाणबोधितत्वेनैवार्थस्याबाधितत्वनिश्चयात्। नत्वर्थाबाधनिश्चयेन प्रामाण्यनिश्चयः। अन्यथा वेदे अर्थाबाधस्यान्यतो निश्चयाभावेन प्रामाण्यनिश्चयो न स्यात्। न चार्थाबाधस्स्वरूपसन्नेव प्रयोजकः। वस्तुतो बाधविरहितेऽप्यर्थे विवदमानयोश्शुकवाक्येन विवादविच्छेदप्रसङ्गात्। नित्यत्वानित्यत्वादिविवादेऽन्यतरस्याबाधितत्वेन तत्गोचरेण वादिवाक्येनैव निर्णये विप्रतिपत्तिविलोपप्रसङ्गाच्च। तस्माच्छुकवाक्यान्नार्थसत्तानिश्चय इति तात्पर्यमनपेक्षितमेव।

न च शुकादिवाक्येऽप्यर्थगोचरसत्तानिश्चयहेतोराकांक्षादेस्सत्वे सत्तानिश्चयः किमिति नोत्पद्यत इति युक्तम्। तत्रार्थव्यभिचारवाक्यात् व्यावृत्तस्याप्तोक्तत्वस्य निश्चयः कारणमित्यङ्गीकारेण तद्व्यतिरेकादेव तदभावोपपत्तेः। अत एवाप्तोक्तत्वसंशये सति नार्थनिश्चयः। एवं च यत्राप्तोक्तत्वनिश्चयः प्रमारूपः तत्रार्थसत्तानिश्चयोऽपि प्रमा। यत्रत्वाप्तोक्तत्वनिश्चयो भ्रमस्तत्र सोऽपि भ्रम एव। यत्राप्तोक्तत्वनिश्चयो नास्ति तत्रार्थोपस्थितिमात्रं, न सत्तानिश्चय इति विवेकः। न च शुकादिवाक्येऽपीश्वरस्य वक्तुराप्तत्वेन तदुक्तत्वनिश्चयेनार्थनिश्चयोऽस्त्विति वाच्यम्। प्रकृतवाक्यार्थस्याबाधितत्वानिश्चयेनेश्वरस्य तत्गोचरज्ञानत्वस्यैवानिश्चयेन प्रकृतवाक्यार्थगोचरयथार्थज्ञानवत्वरूपाप्तत्वनिश्चयासंभवात्। ईश्वरज्ञानस्याबाधितार्थविषयकत्वनियमात्। अन्यथेश्वरमादाय बाधितार्थकस्यापि वाक्यस्याप्तोक्तत्वेन प्रामाण्यापत्तेः। ननु शुकादिवाक्यार्थस्यापि यत्र प्रमाणान्तरेणाबाध-निश्चयस्तत्राप्तोक्तत्वनिश्चयसंभवात्तस्यापि वाक्यस्यार्थनिश्चायकत्वं भवतीति चेन्न। तादृशस्थले तस्यार्थनिश्चायकत्वाभ्युपगमेऽप्यविरोधात्। तस्मात्तात्पर्यबोधो वाक्यार्थनिश्चयहेतुरत एव तदनुपपत्तिरेव लक्षणायामपि बीजम्। नान्वयानुपपत्तिः। यष्टीः प्रवेशयेत्यादौ तदभावात्। न च तत्रापि प्रवेशयेत्यस्य भोजनादिप्रयोजनकं प्रवेशनमर्थः तदन्वयश्च तत्रापि मुख्यार्थेऽनुपपन्न एवेति वाच्यम्।

प्रविशतेर्भोजनप्रयोजनकत्वोपहिते प्रवेशने शक्तेरभावेन तत्तात्पर्यकत्वस्यैव वक्तव्यतया तात्पर्यानुपपत्तेरेव तत्र बीजत्वस्यावश्यकत्वात्। अन्वयानुपपत्तेरध्याहारादिनाऽपि समाधिसंभवेन तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वाच्च। तस्मात्तात्पर्यनिश्चयगतस्य वाक्यार्थनिश्चयसाध – नभावस्य लोकत एव प्राप्तत्वात् न श्रवणविधिरपूर्वविधिः। ननु तात्पर्यनिश्चयस्य वाक्यार्थनिश्चयत्वोपहितं प्रति साधनभावे लोकतः प्राप्तेऽपि मोक्षहेतुत्वोपहितं निश्चयं प्रति स न प्राप्त इति चेत्तर्हि अवघातादेरपि परमापूर्वोपयोगित्वोपहितं वैतुष्यादिकं प्रति साधनत्वस्य लोकतोऽप्राप्तेरवघातादिविधिरप्यपूर्वविधिस्स्यात्। यदि तु वैतुष्यत्वोपहितं प्रति तत्प्राप्त्या स नापूर्वविधिः, तदा प्रकृतेऽपि वाक्यार्थनिश्चयत्वोपहितं प्रति तत्प्राप्तिरस्तीति नापूर्वविधित्वं युक्तम्। नापि द्वितीयः। अवघातनियमसाध्यस्यादृष्टस्य परमापूर्व इवेह नियमादृष्टस्य क्वाप्युपयोगाभावात्। निदिध्यासनसाक्षात्कारादेस्तेन विनाऽप्युत्पत्तिदर्शनेन

व्यभिचारेण तत्र हेतुत्वायोगात्। परमापूर्वस्य तु तद्व्यतिरेके व्यतिरेक एवेति नानुपपत्तिः। अवघातं विनाऽपि नखविदळनादिना वैतुष्यस्येव श्रवणं विनाऽन्येन शाब्दनिश्चयस्य निष्पत्त्यभावेन नियमव्यवच्छेद्याभावाच्च। न च निगमागमादितात्पर्यविचारेणैव शाब्दनिश्चयो जननीयो न तु भाषाप्रबन्धविचारेणेति व्यवच्छेद्यमस्तीति वाच्यम्। भाषाप्रबन्धादेर्मूलसापेक्षत्वेन मूलस्यैव निश्चायकतया ततो निश्चयस्याप्रसक्तेः। नापि तृतीयः। व्यवच्छेद्याभावात्। ज्ञानपादेनोपनिषदा वा ज्ञेयः, न क्रियापादादिना कर्मकाण्डेन वेति व्यवच्छेद्यमस्तीति चेन्न। तस्य तदप्रतिपादकत्वेन ततस्तन्निश्चयस्याप्रसक्तेः। न च प्रमाणान्तरं व्यवच्छेद्यम्। शब्दैकवेद्ये तस्मिन् प्रमाणान्तरस्यापि निश्चायकत्वाप्रसक्तेः। तस्माच्छ्रवणविधिर्दुर्निरूप इति।

अत्र प्रतिविधीयते – श्रवणविधेर्नियमविधित्वं स्वीक्रियते। न च नियमादृष्टसाध्याभावः। साक्षात्कारस्य तत्साध्यत्वोपपत्तेः। अत एव **भगवता बादरायणेन** "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्"दिति सर्वादृष्टसाध्यत्वं ज्ञानस्याभिहितम्। न च व्यवच्छेद्याभावः। भाषाप्रबन्धादिविचारस्य व्यवच्छेदनीयत्वात्। न च मूलसापेक्षत्वेन तस्यानिश्चायकत्वम्। निगमागमदेरिव सापेक्षस्यापि निश्चायकत्वोपपत्तेः। नचाध्ययनविधिनैव व्यवच्छेदस्सिध्यति। तस्य नियमाधीतेन स्वाध्यायेनार्थावबोधे सत्येव फलमित्येवं तात्पर्यकत्वादिति वाच्यम्। तस्य विधेर्वेदबोधितं कर्मनियमाध्ययनजन्यबोधपूर्वकमनुष्ठितं फलाय पर्याप्तमित्येवं तात्पर्यकत्वात्। तथा चात्मज्ञानस्य स्वगोचरेणाधीतस्वाध्यायजन्येन कर्तव्यताज्ञानेनानुष्ठितस्य फलसाधनत्वं लभ्यते। न तु कर्तव्यस्यात्मज्ञानस्य। अन्यथा कपिलादिदर्शितस्य विहितस्याधी-तस्वाध्यायजन्यत्वाभावेन फलजनकत्वाभावप्रसङ्गात्। तथा चात्मज्ञानकर्तव्यता बोधक-स्वाध्यायजन्यकर्तव्यताज्ञानेनानुष्ठितस्य भाषाप्रबन्धादिजन्यज्ञानस्य फलजनकत्वमध्ययनविधि-नाऽव्यावर्तितमिति तद्व्यावर्तनाय नियमविधिरपेक्षित एव।

नचाध्ययनविधिनैवार्थावबोधपर्यन्तेन तदर्थस्य विचारस्याप्याक्षिप्तत्वाद्विचारविधिर्व्यर्थ इति वाच्यम्। अपूर्वविधेर्वैयर्थ्येऽपि नियमविधेर्व्यवच्छेदार्थत्वेन सार्थकत्वात्। तस्मान्नियम-विधित्वाभ्युपगमे न कोऽपि दोष इति। ननु नियमपरिसंख्ययोर्व्यवच्छेदफलकत्वाविशेषात्कथं भेदः। यथाहि अवघातविध्यादिके नियमविधौ नखविदळनादिसाधनान्तरव्यवच्छेदः फलं तथाऽश्वरशनादानविध्यादिके परिसंख्याविधावपि गर्दभरशनादिव्यवच्छेदः फलमिति व्यवच्छेदफलकत्वमुभयोस्समानम्। अतस्तयोर्भेदो न युक्तः। अत्र केचित्। नियमविधौ भावार्थस्य विधेयत्वं, परिसंख्याविधौ तु भावार्थानुवादेनान्यस्य। अवघातविधौ हि व्रीह्युद्देशेनावघात एव विधेयः। नत्ववघातानुवादेन व्रीहयः। अवघातस्याप्राप्तत्वेनानुवाद्यत्वासंभवात्। व्रीहीणान्तु यागसाधनतया विधानात्प्राप्तिरस्तीत्यनुवादो युज्यते। अश्वरशनाऽऽदानविधौ तु प्राप्तादानानुवादेनाश्वरशनाविधानमिति तयोर्भेद इति। तत्तुच्छम्। यागानुवादेन व्रीहिविधानस्यापि नियमविधित्वात्। आदानेऽश्वरशनासंबन्ध-स्यापि प्राप्तत्वेनाभिधेयतया गर्दभरशनासम्बन्धनिषेधस्यैव विधेयत्वाच्च। अन्ये तु तात्पर्यविषयव्यवच्छेदो यत्रार्थात्प्रतीयते स नियमः, यत्र तु शब्दादेव प्रतीयते, सा परिसंख्या।

तथाहि – याजनादिना धनार्जनं कर्तव्यमित्यादिवाक्ये आर्जने याजनादिसंबन्धे बोधिते तत्र कृष्यादिसंबन्धव्यवच्छेदोऽर्थात्सिद्धः। उभयोस्समुच्चितसाधनत्वाभावेन

एकसंबन्धस्यापरसंबन्धाभावव्याप्यत्वात्। न हि याजनप्रतिग्रहाभ्यामेकं धनार्जनमस्ति। तथा च वह्निः किमत्रास्तीति पृष्टवन्तं प्रत्युच्चरितेन धूमोऽस्तीति वाक्येन प्रतिपन्नाद्धू-मात्तात्पर्यविषयोऽपि वह्निर्यथाऽनुमानेनैव बोध्यते, तथेहापि शब्दतः प्रतिपन्नादार्जने याजनादिसंबन्धात् तात्पर्यविषयोऽपि कृष्यादिव्यवच्छेदोऽनुमानेनैव प्रतीयते। पञ्चनखभक्षण-वाक्ये तु भक्षणे पञ्चनखसंबन्धेन शब्दप्रतिपन्ने नेतरसंबन्धव्यवच्छेदो नानुमातुं शक्यते। पञ्चनखापञ्चनखसमुदायस्यैकस्मिन् भक्षणे संबन्धसंभवेनैकसंबन्धस्यापरसंबन्धाभाव-व्याप्तिराहित्यात्।

तथा च लक्षणयेतरसंबन्धव्यवच्छेदश्शब्देनैव बोधनीय इति शाब्द एवेतरसंबन्धव्यवच्छेद इति। तदपि न चतुरश्रम्। याजनसंबद्धे आर्जने कृष्यादेः संबन्धव्यवच्छेदेऽर्थतस्सिद्धेऽपि कृष्यादिना प्रसक्तस्य धनार्जनस्यानिषेधप्रसङ्गात्। न हि कृष्यादिना प्रसक्ते धनार्जने तत्संबन्धव्यवच्छेदस्तदन्यधर्मेण याजनसंबन्धेनानुमातुं शक्यते। तथा च तात्पर्यागोचरस्य याजनकरणकार्जनधर्मिकस्येतरसंबन्धव्यवच्छेदस्यार्थतः प्रतीतावपि कृष्यादिकरणतया प्रसक्ते आर्जने तत्संबन्धव्यवच्छेदस्य तात्पर्यगोचरस्य शब्दादेव प्रतीतेश्चेत्युभयत्र शाब्दत्वसाम्यात्। तस्मादिदमत्र समाधानम्। यतः परो विधिप्रत्ययश्श्रूयते तदर्थस्यैव यत्र कथञ्चिद्विधे-यत्वनिर्वाहस्तत्र नियमः। यत्र तु तस्य न कथञ्चिदपि विधेयत्वं तत्र परिसंख्येति विवेकः।

तथाहि – अवघातवाक्ये हन्तेः परोविधिश्श्रूयते। तत्र तदर्थस्यावहननस्यैव वैतुष्यार्थिना तत्साधनतया कर्तुं प्राप्तस्यापि वैकल्पिकसाधननखविदळनादिकरणप्रसक्त्या पक्षेऽप्राप्तस्य प्रापकतया तत्गोचर एव कथञ्चिद्विधिर्निर्वहति। रशनादानवाक्ये त्वादानस्य न कथञ्चिदपि विधेयत्वनिर्वाहः। नित्यप्राप्तत्वात्। अतोऽन्यदेव गर्दभरशनादाननिषेधादिकं विधेयमिति परिसंख्यैव सा। एवमार्जनवाक्येऽपि परिसंख्यैव। आर्जनस्य पक्षे वा विधेयत्वानभ्युपगमात्। यदि हि पक्षेऽप्राप्तस्य विधानं स्यात्। तदा निष्कामस्याप्यार्जनं कर्तव्यमिति वाक्यार्थस्स्यात्। कृष्यादिना धनार्जनं न कर्तव्यमिति वाक्यार्थः। अतस्तत्राप्यार्जनस्य कथञ्चिदपि विधेयत्वा-निर्वाहात् परिसंख्यैवार्जनविधिः। एवञ्च यत्र क्रियाया अयोगव्यवच्छेदस्तत्र नियमः। यत्र त्वन्ययोगव्यवच्छेदस्तत्र परिसंख्येति व्यवस्थितं भवति। एवञ्च भोजने प्राङ्मुखत्वादिविधिः ऋतूपगमनादिविधिश्च परिसंख्यैव। भोजनोपगमनादेः कथञ्चिदपि विधेयत्वानिर्वाहात्। तस्मादुक्त एव भेदः। तदुक्तं **भट्टपादैः** –

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते।। इति।

अत एव च परिसंख्याया दोषत्रयवत्वम्। तथाहि – याजनादिना धनार्जनस्य कर्तव्यत्वं प्राप्तोऽर्थः। तस्य परित्याग इत्येको दोषः। कृष्यादिना धनार्जनं न कर्तव्यमित्यप्राप्तोऽर्थः। तस्य स्वीकार इत्यपरः। कृष्यादिना प्राप्तस्य धनार्जनस्य बाधा चेत्यन्यो दोषः। नियमे तु सार्वकालिकस्यावघातस्याविधेयत्वेऽपि पाक्षिकावघातकर्तव्यत्वस्य शब्दार्थस्यैव स्वीकारान्नैते दोषाः। एवञ्च इतर व्यवच्छेदो यत्र शाब्दस्तत्र परिसंख्या। यत्र त्वार्थस्तत्र नियम इत्यपि भेदः स्वीकृत एव। आर्जनवाक्ये नियम इति तु न स्वीक्रियते। तत्रापि कृष्यादिना धनं नार्जयितव्यमित्यस्यार्थस्य शाब्दत्वव्यवस्थापनात्। अत एवोपायान्तरेण धनार्जनं प्रत्यवायहेतुः।

तन्निषेधस्य वाक्यार्थत्वात्। नखविदळनादिकन्तु न प्रत्यवायहेतुः। तस्यानिषिद्धत्वात्। किन्तु तत्करणे विहितस्यावघातस्याननुष्ठानात्प्रसक्तस्य परमापूर्वस्यानिष्पत्तिमात्रम्। अतोऽस्त्येव नियमपरिसंख्ययोः भेद इति। तस्मात्गुरूपदेशादिना निवृत्तासंभावनं शिवाभेदज्ञानमेव मोक्षहेतुरिति स्थितम्। ननु तर्हि दीक्षादीनामागमिकानां गर्भाधानादीनाञ्च वैदिकानामुभयेषां कर्मणा मुक्तानि यानि मोक्षसाधनतत्त्वावेदकानि वचनानि तानि सर्वाणि पीड्येरन्निति। अत्र केचित्परिहरन्ति – "सञ्चितं हन्ति दीक्षये"त्यादिस्वस्ववाक्येषु तेषां फलान्तराणि श्रूयन्ते। तथा च फलान्तरावरुद्धत्वात्तेषां न पुनर्मोक्षफलाकांक्षेति नोक्तानि वाक्यानि साक्षाद्वा परंपरया वा मोक्षसाधनत्वावेदकानि। किन्त्वङ्गफलश्रुतिवदर्थवाद एवेति। तत्र नायं परिहारस्साधुः।

तथाहि – यथा स्वस्ववाक्ये फलान्तराणि श्रूयन्ते तथा वाक्यान्तरेष्वपि। तथा च विनिगमनाविरहात् संयोगपृथक्त्वन्यायेन दधिवदुभयार्थत्वमेव। न च फलान्तरावरोध-दोषः। सर्वकर्मणामुत्पत्तिवाक्यबोधितावस्थानुवादेनाधिकारवाक्यद्वयेन फलद्वयसंबन्धस्य युगपदवबोधनात्। तस्मात्तानि च वचनानि कर्मणां मोक्षसाधनत्वावेदकान्येवेति। एवं परोक्तं परिहारं दुष्टं मत्वा स्वयं तत्र प्रथमं दीक्षादेरागमिकस्य कर्मणो ज्ञानप्रतिबन्धकसञ्चि-तकर्मनिबर्हणेन ज्ञानद्वारा मोक्षसाधनत्वम्, "सञ्चितं हन्ति दीक्षया। ज्ञानोत्पत्तिनिमित्तन्तु क्रियाचर्या प्रकीर्तिता"।। इत्यादि **देवीकालोत्तरवचनात्**। अतस्तस्य मोक्षसाधनत्वावेदकानि परंपरासाधकत्वविषयाणि। अतस्तत्र नोक्तदोष इत्याह – **धन्य इति**।

अत्र सामान्यतो ब्राह्मणः क्षत्रियो वैश्योऽमद्यपत्वादिगुणविशिष्टस्सच्छूद्रश्च सवर्णाद्यनुलोमजातिश्च पक्वमलस्समपक्वकर्मामन्दनिपतितपरशक्तिर्दैवात् पित्रादि-नोपदेशादिना वा श्रेयो वेदने सञ्जातश्रद्धो विषयदोषदर्शनेन च विरक्तस्समूलतया विशिष्य तत्ज्ञानार्थमुपसृतज्ञानवृत्तयोनिलक्षणवयः प्रभृतिविशिष्टस्वोत्तमवर्णा-श्रमाभिव्यक्तशिवभावचातुर्वर्णिकगुरुस्तेन भक्त्यादिलिङ्गानुमितस्वाधिकारेण यथा शास्त्रं परीक्षापूर्वकं कृतसमयविशेषदीक्षासञ्जातागमाध्ययनार्थज्ञानानुष्ठानाधिकारोऽधीतनिगम आपातप्रतिपन्नोक्तसन्देहमालोक्ततत्तदर्थः किञ्चिदधिकपक्वमलस्तीव्रनिपतितपरशक्तिरत एव सञ्जातकिञ्चित् तीव्रविविदिषो दृढज्ञानार्थं पुनरुपहारविनयादिपूर्वकमुपसृतगुरुस्तेन शास्त्रचोदितगुणयुक्तेन तीव्रभक्त्याद्यनुमिततीव्रशक्तिनिपातादिना यथाधिकारं कृतनिर्वाण-दीक्षादिभिश्शोधिततीव्रविविदिषा तत्त्वज्ञानप्रतिबन्धकसकलसञ्चितकर्मा तीव्रवैराग्यादियुतः कश्चिदधिकारी कृतार्थत्वाद्धन्य इत्युच्यते। तथाहि **श्रीमत्पराख्ये** त्रैवर्णिकानामसङ्कोचेन दीक्षाधिकारः श्रूयते –

### निर्वाणदीक्षाधिकारः

दीक्षा कार्या हि सर्वेषां तच्छक्तिविधियोगिनाम्।
त्रयाणामपि वर्णानां न तु शूद्रान्त्यजातिषु।। इति।

तथाऽन्यत्र – "ब्राह्मणान् क्षत्रियान्वैश्या"निति च। तथा शूद्रस्य सामान्यतोऽधिकारनिषेधे-ऽप्यस्त्यमद्यपत्वादिगुणविशिष्टस्य सच्छूद्रस्य दीक्षायामधिकारः।

अमद्यपास्तु ये शूद्राश्शौचाचारक्रियादराः।

शिवभक्तश्च ये तेषां दीक्षा कार्याऽन्यथा न हि।। इति।

तत्रैव पूर्वप्रतिषिद्धशूद्रदीक्षाधिकारस्य पुनर्विशिष्टशूद्रेषु प्रतिपादनात्। अतोऽविशेषेण त्रैवर्णिकानां तत्राप्यभ्रष्टानामेव विशिष्टसच्छूद्रस्य च दीक्षायामधिकारः। ननु पुराणेषु ब्रह्महत्यादिमहापातकैर्गौतमादिमहर्षिशापैश्च वैदिककर्मण्यनधिकृतानां भ्रष्टानामेव तन्त्राधिकारश्रवणात्तदनुरोधेनागमिकद्विजादिशब्दानामपि **छागपशुन्यायेन** भ्रष्टद्विजातिपरत्वात्। दीक्षाख्यतान्त्रिककर्मण्यपि श्रुतिपथभ्रष्टानामेव ब्राह्मणादीनामधिकारः, न तु सर्वेषां तेषामभ्रष्टानामपीति। तथाहि **सूतसंहितायाम्** –

वेदमार्गपरिभ्रष्टः प्रायश्चित्ते भयंगतः।
वेदेतरागमं गत्वा तदुक्तं धर्ममाचरेत्।। इति।

**पराशरपुराणे** च –

श्रुतिभ्रष्टस्स्मृतिप्रोक्तप्रायश्चित्तेष्वनुन्मुखः।
क्रमेण श्रुतिसन्ध्यर्थं मनुष्यस्तन्त्रमाश्रयेत्।।

इति च श्रूयते। आभ्यां वचनाभ्यां प्रायश्चित्ते भयंगत इत्यादिशब्दानुसारेण ब्रह्महत्यादिमहापातकैर्वैदिककर्मण्यनधिकृतानां तान्त्रिककर्मण्यधिकारः प्रतीयते। तथा **कूर्मपुराणे** – कपटकृतगोहत्याद्यपराधकुपितगौतमादिषण्मुनिशापदग्धवैदिककर्माधिकाराणामत एव श्रेयः प्राप्त्युपायहीनानामृषीणामर्थे –

तस्माद्वै वेदबाह्यानां रक्षणार्थं यथायथम्।
मोहनानि च शास्त्राणि करिष्यावो वृषध्वजः।।

इत्यादिवचनैस्तत्पृष्टाभ्यां विष्णुरुद्राभ्यां तन्त्रकरणश्रवणात् ब्रह्मशापदग्धकर्माधिकाराणामेव तान्त्रिककर्माधिकारः प्रतीयते। ननूक्तवचनानि न भ्रष्टानामधिकारपराणि, किन्तु "स्मृतिप्रोक्तप्रायश्चित्तेष्वनुन्मुख" इत्यादिपदस्वारस्यात्तेषां स्मार्तप्रायश्चित्तेष्वसमर्थानामधिकृतानाञ्च लघुप्रायश्चित्तान्तरोपदेशपराणि, अधिकारपरत्वेऽपि वा तदधिकारमात्रपराणि, नेतराधिकारव्यवच्छेदपराणीति चेदस्त्वेवमत्र कथञ्चित्। तथाऽपि यत्र तादृशपदवासनाऽपि नास्ति इतराधिकारनिषेधश्च तत्र तवागतेः। यथा **सूतसंहितायां यज्ञवैभवोत्तरखण्डे सूतगीतायामष्टमाध्याये** –

श्रुतिपथगलितानां मानुषाणान्तु तन्त्रं
गुरुगुरुरखिलेशस्सर्ववित् प्राह शम्भुः।
श्रुतिपथनिरतानां तत्र नैवास्ति किञ्चित्
हितकरमिह सर्वं पुष्कलं सत्यमुक्तम्।।
श्रुतिरपि मनुजानां वर्णधर्मं बभाषे
परगुरुरखिलेशः प्राह तन्त्रेषु तद्वत्।
श्रुतिपथगलितानां वर्णधर्मं घृणाब्धिः
श्रुतिपथनिरतानां नैव तत्सेवनीयम्।।

श्रुतिपथनिरतानामाश्रमा यद्वदुक्ताः
परगुरुरखिलेशस्तद्वदाहाश्रमांश्च।
श्रुतिपथगलितानां मानुषाणान्तु तन्त्रे
हरिरपि मुनिमुख्याः प्राह तन्त्रे स्वकीये।।
विधिरपि मनुजानामाह वर्णाश्रमांश्च
श्रुतिपथगलितानामेव तन्त्रे स्वकीये।
श्रुतिपथनिरतानां तेन संसेवनीयाः
श्रुतिपथसममार्गो नैव सत्यं मयोक्तम्।। इति।

तथाऽन्यत्र –

अत्यन्तमलिनानां तु प्राणिनाञ्च सरस्वति।
पाञ्चरात्रादयो मार्गाः।। इति।

तथा **महाभागवते** कृष्णादुत्पादितेन **कुब्जापुत्रेण तन्त्रभागवतं** कृतमित्युक्ते तत्किमर्थं त्रैवर्णिकानां वेदमार्गस्य श्रेयस्संपादकस्य विद्यमानत्वादित्याशङ्कायामुक्तम् – "यत्र स्त्रीशूद्रदासाना"मिति। अतोऽपि वैदिकानधिकृताधिकारत्वमुक्तम्। **सूतसंहितायामपि** क्वचित् "स्त्रीशूद्रद्विजबन्धूना"मित्युक्तम्। तस्मादुक्तपुराणेषु ब्रह्महत्यादिभिर्ब्राह्मणशापैर्वा वैदिककर्मभ्रष्टानामेव द्विजातीनां तन्त्राधिकारश्रवणात्तदनुरोधेनागमेषु "ब्राह्मणान् क्षत्रियान्वैश्या"निति, "दीक्षा कार्या द्विजातीना"मिति च सामान्यतः श्रुतस्यापि ब्राह्मणादिशब्दस्य वैदिकभ्रष्टब्राह्मणादिविशेषपरत्वं कल्प्यते **छागपशुन्यायेन**। यथा सामान्यतश्श्रुतस्यापि ब्राह्मणवाक्यस्थपशुशब्दस्य मन्त्रकाण्डस्थ छागशब्दानुसारेण छागरूपपशुविशेषपरत्वम्। यथा –

यथा वह्निर्महादीप्तः काष्ठमात्रञ्च निर्दहेत्।
तथा शुभाशुभं कर्मज्ञानाग्निर्दहति क्षणात्।।

इति **शिवज्ञानागमे**,

ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुतेऽर्जुना।

इति **स्मृतौ** च सामान्यतस्सर्वशब्दोपबृंहणेनापि श्रुतस्य कर्मशब्दस्य "प्रारब्धं भोगतो नश्ये"दिति, प्रारब्धकर्मणां भोगात्क्षयो न ज्ञानवह्निना। इति च यथाक्रमं व्यवस्थाविशेषनिषेध-कर**स्मृतिसुप्रभेद**वचनानुसारेणाप्रारब्धरूपकर्मविशेषपरत्वमिति। अत्र तावत्,

न पुंभिरार्षकं वाक्यं दैविकं नार्षकैस्सदा।
न देवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मना।।
न शैवं वैष्णवेनापि बाध्यते तु कदाचन।

इति **सर्वज्ञानोत्तर**वचनात्,

तस्योक्तिः पौरुषैस्स्थूलैः प्रमाणैर्न च बाध्यतः।

इति **श्रीमन्मतङ्गागमवचनाच्च**,

अष्टादशपुराणानां कर्ता सत्यवतीसुतः।
कामिकादिप्रभेदानां यथा देवो महेश्वरः।।

इति **पुराण**प्रामाण्यप्रस्तावे यथा शब्देन **कामिकादि**शैवागमस्य कर्तृशिवमुखेन पुराणापेक्षयोत्तमत्वप्रतिपादकतया व्याकृत**सूतसंहिता**वचनाच्च वेदं विना **कामिकादि**-सिद्धान्तागमस्यान्याबाध्यत्वस्यागमप्रामाण्यावसरे स्थापितत्वाच्च सिद्धान्तशैवागमेन कक्ष्या चतुष्टयान्तरितबाध्योक्तपुराणवचनेन सिद्धान्तशैवागमस्याधिकबलस्य न बाधस्संकोचो वा तस्याप्येकदेशबाधित्वादिति स्थित एवायं परिहारः। तथाऽपि पुराणस्य सिद्धान्तशैवागमसमत्वमङ्गीकृत्य परिहार उच्यते। उक्तानि श्रुतिभ्रष्टानां तन्त्राधिकारित्वावेदकानि पुराणवचनानि संभवविशेषणप्रत्यभिज्ञादिभ्यो हेतुभ्यो वेदाननुसारिवामादितन्त्रविषयाण्येव, न वेदानुसारिसिद्धान्तशैवागमविषयाण्यपीति भिन्नविषयत्वान्न **छागपशुन्याय**विषय इति। तथाहि – तन्त्राणि द्विविधानि वेदानुसारिणि तदननुसारिणि स्वतन्त्राणि चेति। तत्र **कामिकादिसिद्धान्तागमादि**तन्त्राणि वेदानुसारिणि। वामपाशुपतादीनि स्वतन्त्राणि वेदाननुसारिणि। उक्तञ्च द्वैविध्यं शैवागमस्य **वायुसंहितायाम्** –

शैवागमोऽपि द्विविधश्श्रौतोऽश्रौतश्च संस्मृतः।
श्रुतिसारमयश्श्रौतः स्वतन्त्र इतरो मतः।। इति।

तत्रापि "स्वतन्त्रो दशधा पूर्व"मित्यारभ्य वामादीनामश्रौतत्वमुक्त्वा, श्रुतिसारमयोऽन्यस्तु शतकोटिप्रविस्तरः। परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यते। इति शतकोटिप्रविस्तर-**कामिकादिसिद्धान्तशिवागमस्य** श्रौतत्वमुक्तम्। तथा **कूर्मेऽपि** –

निर्मितं हि मया पूर्वं व्रतं पाशुपतं शुभम्।
गुह्यात्गुह्यतमं सूक्ष्मं वेदसारं विमुक्तयः।। इति च,
एष पाशुपतो योगस्सेवनीयो मुमुक्षुभिः।
भस्मच्छन्नैर्हि सततं निष्कामैरिति हि श्रुतिः।।

इति चोर्ध्वस्रोतोद्भवसिद्धान्तशैवागमस्य श्रौतत्वमुक्तम्। अत्र हि पाशुपतशब्देन पशुपतिसंबन्धरूपाय वार्थविवक्षाया ऊर्ध्वस्रोतोद्भवः **कामिकादि**शैवागम एवोच्यते, नाधस्रोतोद्भवरूढपाशुपतः। उत्तरत्र तस्य वेदवादविरुद्धत्वकथनात्। एवं तस्य श्रौतत्वमुक्त्वा वामादीनामप्यश्रौतत्वं तत्रैवोक्तम् –

अन्यानि चैव शास्त्राणि लोकेऽस्मिन्मोहनाय वै।
वेदवादविरुद्धानि मयैव कथितानि तु।।
वामं पाशुपतं सोमं लाकुळञ्चैव भैरवम्।
न सेव्यमेतत्कथितं वेदबाह्यं तथेतरत्।। इति।

तथा च यानि "श्रुतिभ्रष्ट" इत्यादीनि श्रुतिभ्रष्टानां तन्त्राधिकारवचनानि तान्यश्रौतवाद्यागमविषयाण्येव। तत्रैव तेषामधिकारसंभवात्। न तु श्रौत**कामिकादिसिद्धान्तागम**विषयाण्यपि। तस्य श्रौतत्वेन श्रुतिभ्रष्टस्य शैवागमादपि भ्रष्टत्वेन भ्रष्टस्य श्रुताविव तन्त्राधिकारासंभवात्। **किञ्चागमेष्वपि** –

वैदिकीन्तु पुरस्कृत्य शैवीं वृत्तिं समाचरेत्। इति,
यस्मिन्वर्णे स्थितो दीक्षां प्राप्तो देही शिवात्मिकाम्।
तत्रैव संस्थितो दीक्षां शिवधर्मञ्च पालयेत्।। इति,
यो यस्मिन्नाश्रमे तिष्ठन्प्राप्तो दीक्षां शिवात्मिकाम्।
स तस्मिन्नेव सन्तिष्ठन् शिवधर्मं च पालयेत्।। इति,
इति वर्णाश्रमाचारान्मनसाऽपि न लंघयेत्।

इति च बहुभिर्वचनैश्शैवाश्रमिण एव शैवाह्निकवर्णाश्रमधर्मानुष्ठानपूर्वं वैदिकाह्निक-वर्णाश्रमधर्माणामवश्यकर्तव्यता प्रतीयते। तथा च सिद्धान्तशैवागमस्य भ्रष्टाधिकारित्वे वैदिकेष्वपि तदधिकार उक्तस्स्यादिति स्ववचनव्याहतिः, उक्तानि वा वचनानि पीड्येरन्निति। **तस्मात्कामिकादि**श्रौतशैवेषूक्तभ्रष्टानां श्रौत इवाधिकारासम्भवादश्रौतेषु च वामपाशुपतादिषु तेषामधिकारसंभवात्तद्विषयाण्येव भ्रष्टानां तन्त्राधिकारप्रतिपादकानि श्रुतिभ्रष्ट इत्यादीनि वचनानि। अपि च भ्रष्टानां तन्त्राधिकारप्रतिपादकवचनेषु क्वचिद्वेदेतरेति स्फुटं विशेषणाच्चावैदिकवामादितन्त्रविषयाण्येव तानि वचनानि। तथाहि –

'वेदमार्गपरिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः। वेदेतरागमं गत्वे'ति।

तन्त्रस्य भ्रष्टाधिकारप्रतिपादकवचने वेदेतरिति श्रूयते। नचेदमागमस्वरूपकथनम्। विशेषणत्वे संभवति स्वरूपकथनपरतया व्याख्यानस्य निरर्थकत्वावहस्यायुक्तत्वात्, उक्त **वायव्यसंहिताकूर्मपुराणा**दिभिस्सिद्धान्तशैवागमस्यापि वैदिकत्वोक्त्या स्वरूप-कथनस्याप्यसंभवाच्च। तस्माद्वेदेतरेति विशेषणमेवागमस्य, न स्वरूपकथनम्। तथा च वेदानुसारि**कामिकादीतरागमं** वामादिकं गत्वेति तस्यार्थः। तथा चैतद्वच-नेऽवैदिकवामादिष्वेव भ्रष्टानामधिकारस्स्फुटं प्रतीयते, न वैदिककामिकादिष्वपीति। यत्रापि श्रुतिभ्रष्ट इत्यादिवचनान्तरेषु वेदेतरेत्यागमविशेषणं नास्ति तत्रापि विशेषिततद्वचनै-कार्थ्यप्रत्यभिज्ञानादागमतन्त्रादिशब्दैरवैदिकागम एवोच्यत इति तान्यप्यवैदिकागमविषयाण्येव। तथाहि –

वेदमार्गपरिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः।
वेदेतरागमं गत्वा तदुक्तं धर्ममाचरेत्।। इति।

विशेषितवचने तावद्विशेषणादेवावैदिकागम एव तत्रागमशब्देनोच्यत इति स्थितम्। तत्र वेदमार्गपरिभ्रष्ट इति कर्तुर्दोषकीर्तनात्प्रायश्चित्तेष्वनुन्मुख इति बहुप्रयाससाध्यस्मार्तद्वादश-वार्षिकप्रायश्चित्तेषु तस्योद्वेगश्रवणाच्च महापातकिनस्तस्य स्मार्तप्रायश्चित्तेष्वपि गुरुष्वसमर्थस्य पापादप्युद्वेजितस्य महता काले नाल्पायाससाध्यशोधकलघुप्रायश्चित्तत्वमवैदिकागमधर्माचरणस्य प्रतीयते। एवम् –

श्रुतिभ्रष्टस्स्मृतिप्रोक्तप्रायश्चित्ते भयंगतः।
क्रमेण श्रुतिसन्ध्यर्थं मनुष्यस्तन्त्रमाश्रयेत्।।

इत्यात्रापि पूर्ववदेवाद्यविशेषणद्वयेन तादृशस्य तादृशप्रायश्चित्तात्मकत्वं तद्धर्माचरणस्य प्रतीयते। विवृतञ्च तत्रैव **साम्बपुराणे** प्रायश्चित्तात्मकत्वम् –

'धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणान्तिकम्।
प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम्।।
भयं दुर्बलचित्तानां मरणे जायते भृशम्।
तेषामेवाभिरक्षार्थं खल्वहं तन्त्रमुक्तवान्।।
इति श्रुतिसन्ध्यर्थ'मिति,

च प्रायश्चित्तानन्तरभाविश्रौताधिकाररूपप्रयोजनकीर्तनम्। तथा चात्रोक्तस्यापि तादृशप्रायश्चित्तत्वरूपैकार्थ्यादवैदिकतन्त्रत्वं प्रत्यभिज्ञायते। तथा च विशेषणाभावेऽपि तत्प्रत्यभिज्ञानादवैदिकतन्त्रमेवात्रापि तन्त्रशब्देनोच्यत इति। एवं **कूर्मे** – "पापान्नस्त्रातुमर्हथे"ति प्रायश्चित्तप्रश्नात् नान्यथानिष्कृतिर्हि वः इत्युत्तरेण तत्तन्त्रस्य प्रायश्चित्तत्वप्रतीतेश्चावैदिकतन्त्रत्वप्रत्यभिज्ञानात्तत्राप्यवैदिकं तन्त्रमेव तन्त्रशब्देनोच्यते। एवं "श्रुतिपथगलिताना"मित्यत्रापि दोषसंकीर्तनात्प्रायश्चित्तात्मत्वेनावैदिकतन्त्रप्रत्यभिज्ञानमूह्यम्।

किञ्च श्रुतिपथगलितानामित्यत्र श्रुतिपथगलितशब्दस्य श्रुतिभ्रष्ट इत्यादाविव पातकिशब्दार्थकत्वमङ्गीकृत्य परिहार उक्तः। वस्तुतस्तु नायं शब्दश्शब्दार्थः पातक्यर्थको वा। "प्रायश्चित्ते भयंगत" इत्यादिवदत्र तदर्थतात्पर्यग्राहकोपपदाभावात्, प्रत्युत श्रुतिपथनिरतानामित्युक्त्वा श्रुतिपथगलितानामित्युक्त्या श्रुतिपथनिरतप्रतियोगी श्रुतिपथगलितशब्दार्थः। स च तत्राभिरतिरहित एव। अनभिरतिश्च तत्र गुरूपायत्वादिनाऽपि कर्मविशेषेणापि वा भवति। यथा वैदिकेष्वेव केषाञ्चित्स्मार्तेष्विव पौराणिकेष्विव च वितानसाध्ये ज्योतिष्टोमादौ न रतिः। तथा च एतद्वचने पातकिशप्तादिकारित्वशङ्कैव नास्तीति। एवमन्येष्वपि वचनेष्वत्यन्तमलिनानामित्यादिषूह्यम्। तस्मात्संभवाद्विशेषणात् प्रत्यभिज्ञानाच्चाश्रौत वामादिष्विव शप्तानां पातकिनाञ्चाधिकारः, न श्रौतसिद्धान्तशैवागमेषु। तत्रापि भ्रष्टाधिकारत्वं न शास्त्रान्तरप्राप्तान्याधिकारावरोधकमित्युक्तं प्रागागमप्रामाण्यनिरूपणावसरे। तस्मादभ्रष्टा एव शैवसिद्धान्तेष्वधिकारिणः। तत्रापि चातुर्वर्णिका एव, न तु प्रतिलोमजातयः। "न तु शूद्रान्त्यजाति"ष्विति प्रतिलोमान्त्यजातिनिषेधात्।

किञ्चार्थिकनिषेधानुवादोऽयं निषेधः। तथाहि – विशेषदीक्षायुक्तायाः सामान्यदीक्षाया आगमाध्ययनाङ्गत्वं वक्ष्यते। आगमाध्ययने च न प्रतिलोमजातीनामधिकारः। तेषां संस्कृतपुराणादिश्रवणनिषेधेन भाषाशास्त्र एवाधिकारात्। ततस्तदङ्गभूतायामपि दीक्षायामर्थसिद्धो निषेधः। उक्तञ्च **सूतसंहितायां** ब्राह्मणादिवर्णस्वरूपं प्रतिलोमानुलोमस्वरूपं, प्रतिलोमजस्य चावाक्यत्वं, संस्कृतश्रवणनिषेधेन भाषाशास्त्रैकाधिकारित्वञ्च –

तस्य वेदविदां श्रेष्ठां ब्रह्मणः परमेष्ठिनः।
महादेवाज्ञया पूर्ववासनासहितामुखात्।।
ब्राह्मणाब्राह्मणस्त्रीभिस्सहजातास्तपोधनाः।
तस्य हस्तात्सहस्त्रीभिर्जज्ञिरे पृथिवीभुजः।।
ऊरुभ्यां सहितास्स्त्रीभिर्जाता वैश्याश्शिवाज्ञया।
पद्भ्यां शूद्रास्सहस्त्रीभिर्जज्ञिरे वेदवित्तमाः।।

स्वस्त्रीषु स्वस्य वैधेन मार्गेणोक्तस्स्वयं भवेत्।

ब्राह्मणस्य ब्राह्मण्यां वैधेन मार्गेणोत्पन्नो ब्राह्मणः। एवं वर्णान्तरेष्वपीत्यर्थः।

अवरासूत्तमाज्जातस्त्वनुलोमः प्रकीर्तितः।

ब्राह्मणात्क्षत्रिया वैश्याशूद्रासु क्षत्रियाद्वैश्या शूद्रयोर्वैश्याच्छूद्रायामुत्पन्नोऽनुलोम इत्यर्थः। "उत्तमास्ववराज्जातः प्रतिलोम" इति। ब्राह्मण्यां क्षत्रियवैश्यशूद्रेभ्यः क्षत्रियायां वैश्यशूद्राभ्यां वैश्यायां शूद्रादुत्पन्नः प्रतिलोम इत्यर्थः।

वर्णस्त्रीष्वनुलोमेन जातस्स्यादान्तराळिकः।
वर्णासु प्रतिलोमेन जातो व्रात्य इति स्मृतः।। इति।

एवं प्रतिलोमानुलोमावान्तरजातिभेदोऽपि स्त्रीपुंसयोरुत्कर्षापकर्षभेदेन भेदोऽपि तत्र निरूपितः। तथाऽन्यत्र –

अन्ये च ब्राह्मणा विष्णो राजानश्च तथैव च।
वैश्याश्च तारतम्येन ज्ञानाभ्यासाधिकारिणः।।
द्विजानामपि च श्रौतज्ञानाभ्यासाधिकारिता।
अस्ति शूद्रस्य शुश्रूषा पुराणेनैव वेदनम्।।
वदन्ति केचिद्विद्वांसः स्त्रीणां शूद्रसमानताम्।
अन्येषामपि सर्वेषां ज्ञानाभ्यासो विधीयते।।
भाषान्तरेण कालेन तेषां सोऽप्युपकारकः। इति।

अत्र चान्येषामिति वर्णव्यतिरिक्तसामान्यश्रवणेऽपि स्मृत्यादावनुलोमानां पितृजात्यपेक्षया निकर्षेऽपि मातृजात्यपेयोत्कर्षप्रतिपादनात् क्षत्रियायां ब्राह्मणाज्जातस्यानुलोमवर्णसंज्ञक-जातेरपि जामदग्न्यादेः शूद्रायां ब्राह्मणाज्जातस्यानुलोमपारशवजातेरपि विदुरादेर्यथाक्रमं वेदाध्ययनानुष्ठानादि**भागवतोप**देशादिश्रवणाच्चान्यशब्दः प्रतिलोमरूपान्यपरः। एवञ्च – "न तु शूद्रान्त्यजातिष्वि"ति निषेधेऽप्यन्त्यजातिशब्दः प्रतिलोमसामान्योपलक्षकः। न तु,

शूद्राद्विप्राङ्गनायान्तु चण्डालो नाम जायते।
अस्यामनेन चौर्येण बाह्योप्यन्त्यस्तु जायते।।

इति **सूतसंहितोक्त**ग्रामान्त्यबहिरन्त्यरूपतद्विशेषपर इति ध्येयम्। एवञ्च सति अस्मिन् आगमाध्ययनाङ्गभूतविशेषदीक्षायाम् –

नृपायां ब्राह्मणाज्जातस्सवर्ण इति कीर्तितः।
वैश्यायां ब्राह्मणाज्जातो निषादो वेदवित्तमाः।।
शूद्रायां ब्राह्मणेनोत्थो द्विजाः पारशवः स्मृतः।
वैश्यायां क्षत्रियाज्जातो माहिष्योऽम्बष्ठसंज्ञितः।।
शूद्रायां क्षत्रियाज्जातो दौष्यन्त्याख्यो भवेद्विजाः।
शूद्रायां वैश्यतो जात उग्र इत्युच्यते बुधैः।।

इत्यादि**सूतसंहितोक्तानां** सवर्णनिषादपारशवमाहिष्यदौष्यन्त्योग्राख्यानां षण्णामप्यनुलोमानां

वचनेऽप्यधिकारः। अत एव च प्रतिलोममात्रं व्यवच्छिन्नम्। या त्वागमाध्ययनानङ्गभूता केवलसमयदीक्षा तत्र प्रतिलोमानामप्यधिकार इति ध्येयम्। इदञ्चागमे जातिनिर्णये स्फुटमेव। तथा मलपाकः कर्मसाम्यं शक्तिनिपातश्चाधिकारिविशेषणम्। तदुक्तं **श्रीमत्किरणे** –

समे कर्मणि सञ्जाते कालान्तरवशात्मतः।
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा।। इति।

तत्र कालान्तरवशादित्यस्य कालो मलः तस्यान्तरं पाकः तद्वशादित्यर्थः। तीव्रशक्तिनिपातेनेत्यत्र तीव्रत्वं निर्वाणदीक्षापेक्षया शक्तिनिपातविशेषणं बोद्धव्यम्। अनेनैव ज्ञायते मन्दतरमन्द-शक्तिनिपातस्य सामान्यविशेषदीक्षाधिकारत्वमिति। तथा **पौष्करे** –

परिपाको मलस्यैव किन्त्वनुग्रहकारणम्। इति।

तथा **सूतसंहितायां यज्ञवैभवे चतुस्त्रिंशाध्याये** शिवदीक्षां होत्रीं प्रस्तुत्योक्तम् –

तस्य शिष्यस्य विप्रेन्द्राः कर्मसाम्ये सति द्विजाः।
शाम्भवीशक्तिरत्यन्तं तस्मिन्पतति चित्घनः।। इति।

एवं **वायुसंहिता**यामप्युक्तं द्रष्टव्यम्। तथा **अम्बास्तवेऽपि** –

जन्तोरपश्चिमतनोस्सति कर्मसाम्ये
निश्शेषपाशपटलच्छिदुरा निमेषात्।
कल्याणि देशिककटाक्षसमाश्रयेण
कारुण्यतो भवसि शाम्भवि वैधदीक्षेः।। इति।

तत्र मलस्य पाको नाम दृढसंश्लिष्टात्मनो वृन्तादिव फलस्य विश्लेषौन्मुख्यावस्थाविशेषः। कर्मसाम्यं नाम विरूद्धफलानां समबलानां युगपत्फलोन्मुखानां कर्मणामन्योन्यफलप्रतिबन्धो नाशो वा। एतच्च **पौष्करे** कर्मणां विरोधविशेषणप्रयोजनप्रतिपादनपूर्वकमुक्तम् –

एकस्मिन् भुज्यमाने तु कर्मण्यन्यदुपस्थितम्।
बाधकं प्रबलं तच्चेदविरोधे समुच्चयः।।

तथा च साम्ये विरोधोऽप्यपेक्षणीय इत्यर्थः। विरोधेऽपि कर्मसाम्ये संबद्धत्वमप्यपेक्षणीयमित्याह –

भुज्यमाने तु मानुष्ये शुनो योनिर्यदा भवेत्।
बाधिका प्रबला सा चेन्मानुष्यस्य द्विजोत्तमाः।। इति।

युगपत्फलौन्मुख्यमप्यपेक्षणीयं तत्रेत्याह –

आरब्धमप्यनारब्धं बलेन तु समं यदि।
आरब्धमेव भोग्यं स्याद्रोधयित्र्या निरोधनात्।। इति।

आरब्धानारब्धपदेन युगपत्फलानामौन्मुख्यमुक्तम्। एवञ्च सिद्धमर्थं कथयन् साम्यशब्दार्थ-माह –

विरुद्धयोर्यदारम्भः कर्मणोस्समयोर्बलात्।
तदैव शक्तिपातेन नाश एव तयोर्भवेत्।। इति।

अत्र विरुद्धकर्मणां साम्यवदविरुद्धकर्मणां परिपाकोऽपि परशक्तिनिपातेऽपेक्षणीयः। अन्यथाऽविरुद्धानां फलप्रदानां कर्मणां सत्वे तदर्थविरोधशक्त्यधिकारस्यावश्यकत्वेन तदधिकारनिवृत्त्यधीनपरशक्तिनिपातोऽपि न स्यात्।

तदुक्तं **श्रीमत्पौष्करे** –

किञ्चेष्यद्भोगहेतूनि सन्ति येषामनुग्रहे।
न ते शिवस्य विषयाः किन्तु पक्वास्स्वकर्मणा।।
सकलानाञ्च सर्वत्र कर्मसाम्यं न कारणम्।
यतः कर्मसमत्वेऽपि तदन्येषां तु कर्मणाम्।।
अपाके परमेशाज्ञाऽविरुद्धान्यप्रदा स्थिता।
कर्मणोऽप्यस्य साम्येऽपि पक्वे तदितरेऽपि च।।
तं प्रत्येवैश्वरीशक्तिरुपसर्पति तच्छिदे। इति।

अत्रैकदेशिनः कर्मसाम्यं सर्वेषां न शक्तिनिपातदीक्षाद्यनुग्रहनिमित्तम्। शुद्धाध्ववर्तिनां विज्ञानकेवलानां कर्माभावेऽपि शक्तिनिपातादिश्रवणात्। किन्तु संभवात्सकलानामेव। अनुगताधिकारनिमित्तन्तु मलपाक एव। तथाहि विज्ञानाकलस्य कर्माभावस्तत्र तत्रागमेषु श्रूयते। **सुप्रभेदे** तावत् –

त्रिधा सोऽयमनुग्राह्यस्सकलः प्रळयाकलः।
विज्ञानकल इत्येषां स्वरूपमधुनोच्यते।।
मायाकर्ममलच्छन्नस्सकलस्सोऽभिधीयते।
मलकर्मावृतो यस्तु स भवेत्प्रळयाकलः।।
मलैकबन्धसंबद्धो विज्ञानकल उच्यते। इति।

**पौष्करेऽपि** कर्मसाम्योपपादनपूर्वकम् –

यदाऽन्यत्कर्मसर्वञ्च समं तस्य विनाशिनी।
तदा विज्ञानकैवल्यं पुंसस्स्यात् कर्मनाशतः।। इति।

तथा **तत्रैवान्यत्र** तत्प्रमाणावसरे –

विज्ञानकेवलानान्तु सिद्धौ युक्तिरिहोच्यते।
कलातत्त्वान्तशोधिन्या दीक्षया ज्ञानतोऽपि वा।।
योगेन भोगतो वाऽथ सन्यासाद्वा परिक्षयः।
कर्मणान्तु तदायत्तमायायाश्च परिक्षयात्।।
मल एकोऽवशिष्टस्स्यात्तस्माद्विज्ञानकेवलाः। इति।

**तत्रैवान्यत्र** तल्लक्षणावसरे –

मलोपरुद्धदृक्छक्तिस्तत्प्रसृत्यै कलादिमान्।
भोगाय कर्मसंबद्धस्सकलः परिपठ्यते।।
प्राग्वन्निरुद्धदृक्छक्तिः कर्मपाकात्कलोज्झितः।

कर्मणैष्यत्कलायोग्यो यस्स च प्रळयाकल:।।
मलोपरुद्धशक्तित्वाच्छून्यकल्पस्स्वदृक्क्रिय:।
तृतीय: पठ्यते तन्त्रे नाम्ना विज्ञानकेवल:।। इति।

न चैवं तेषां कर्माभावे कथं भोग इति वाच्यम्। अस्वतन्त्रभोगस्यैव कर्मापेक्षत्वकल्पनात्। शुद्धाध्वनि त्विच्छयोपभोगान्न कर्मापेक्षा। एतदप्युक्तं **पौष्कर** एव –

शुद्धाध्वनि महाभोग: कर्म नास्तीति चोदितम्।
कथं तद्वर्तिनां भोगो विचित्रस्तद्वदेश्वर।।

ईश्वर: –

न कर्मभोगवैचित्र्ये कारणं शुद्धवर्त्मनि।
मलस्य परिपाको यो विचित्रस्सोऽत्र कारणम्।।
किं कर्मणाऽत्र विप्रेन्द्रो यत्रेच्छाभोग इष्यते। इति।

अत: कर्माभावाद्विज्ञानकलानां तत्साम्यं न सर्वेषामधिकारनिमित्तं, किन्तु मलपरिपाक एवानुगतं निमित्तम्। इदमपि शङ्कापूर्वकं **पौष्कर** एवोक्तम् –

अथ कर्मसमत्वेऽणोरनुग्रह इहेष्यते।
कर्मसाम्यञ्च भोगेन कथमेषामनुग्रह:।।

ईश्वर: –

समत्वं कर्मणां नात्र निमित्तं तदनुग्रहे।
परिपाको मलस्यैव किन्त्वनुग्रहकारणम्।।
अनुग्रहे ततो नेष्टं तत्साम्यं मुनिपुङ्गवा:। इति।

एवं च यद्यपि कर्मसाम्यस्यापि शक्तिनिपाताधिकारनिमित्तत्वप्रतिपादकान्युक्तानि वचनानि सन्ति। तथाऽपि उक्तविशेषवचनेन संभवाच्च तानि सकलाभिधानाणुविषयाणीति। तदेतत्पूर्वापरपर्यालोचनावैधुर्यतात्पर्यापरिज्ञानाभ्यां विजृम्भितम्। तथाहि – यदि शुद्धाध्ववर्तिनां कर्म नास्ति यदि च तेषां भोगो न कर्मणासाध्य:, तदा,

यो यत्राभिलषेत्भोगान् स तत्रैव नियोजित:।

सिद्धिभाङ्मन्त्रसामर्थ्यादिति,

प्राप्याणि तानि सर्वैस्तु दीक्षया योजितैर्नृभि:।

इत्यादीनि **सूक्ष्मस्वायंभुवपौष्करादिवचनानि** शुद्धाध्वसु तत्तत्पदयोजना तत्तन्मन्त्रोपास्त्यादीनां तत्तद्विद्येश्वरसदाशिवादितत्तदुपास्तीनाञ्च तत्तत्भुवनप्राप्तिहेतुत्वावेदकानि तान्यप्युपरुध्येरन् पीढ्येरन्। किञ्च – **सुप्रभेदेपि** ज्ञानयोगसन्यासादीनां यानि सदाशिवादितत्तत्सारूप्यादिहेतुत्वावेदकानि तान्यप्युपरुध्येरन्। किञ्च – कर्म विनाऽपि भोगवैचित्र्यसत्वेऽन्यत्रापि तद्विना तद्वैचित्र्यसंभवेन कर्माप्रामाणिकं कर्मनिरपेक्षत्ववादिपाशुपतमतप्रवेशश्च स्यात्। सन्त्येव तेषां शुद्धाध्ववर्तिनामपि शुद्धभोगप्रदानि कर्माणि शुद्धानि, न केवलं तान्येव तेषाम्। किन्तु कलादितत्त्वानि

विना भोगासंभवात् तान्यपि शुद्धानि सन्त्येव तेषामिति। तथाहि – आगमेष्वेव तेषां शुद्धाशुद्धमिश्राध्वव्यापकनिवृत्त्यादिपञ्चकलाव्याप्तशुद्धाशुद्धमिश्रहेतुत्वेन पञ्चकलाभोगतारतम्येन कर्मणः पाञ्चविद्यमुक्तम् –

लौकिकं वैदिकं चेति चाध्यात्ममतिमार्गकम्।
मान्त्रञ्च पञ्चधा कर्मनिवृत्त्यादिकलागतम्।। इति।

तत्र लौकिकं वापीकूपतटाकादिजनितम्। वैदिकं ज्योतिष्टोमादिवेदोक्तकर्मजनितम्। आध्यात्मिकमान्तरं वैराग्याद्यभ्यासजनितम्। अतिमार्गकमिन्द्रियवायुमार्गतिरोधानादिरूपयोगाभ्यासजनितम्। मान्त्रं च शुद्धं मन्त्राभ्यासजनितम्। एतच्च पञ्चविधं कर्मजातं शुद्धाशुद्धसर्वभुवनभोगोत्पत्तिस्थलीभूतनिवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीतकलासु गतम्। कर्मणां कलागतत्वञ्च कृषेरिव क्षेत्रसंस्कारपक्षमभ्युपेत्योक्तम्। पञ्चकलास्वरूपं तासां तत्त्वभुवनाद्याधारत्वं चोत्तरत्र वक्ष्यते। तत्राद्यत्रयं शुद्धमिश्रभुवनाधाराद्यकलात्रयवर्तित्वेन तद्वर्तिभोगप्रदत्वादशुद्धम्। अन्त्यद्वयं चातिमार्गिकमान्त्ररूपं शुद्धाध्वभुवनभोगाधारान्त्यशान्तिशान्त्यतीतकलाधारत्वेन तत्भोगप्रदत्वेन शुद्धमायाकार्यमन्त्रार्जितत्वेन च शुद्धम्। उक्तञ्च **त्रिलोचनशिवाचार्यैरपि** शैवपारीणैरातिमार्गिकमान्त्रकर्मद्वयसाध्यत्वं शुद्धाध्ववर्तिभुवनभोगानाम्।

एवञ्च बह्वागमन्यायसिद्धे शुद्धाध्ववर्तिनां विज्ञानकलानां कर्मादौ यानि तेषां मलैकबन्धवत्वरूपलक्षणप्रतिपादकान्यागमवचनानि यानि च तदुपपादकान्यागमवाक्यानि तानि सर्वाण्युक्तमलीमससुखप्रदाति[27]बन्धकराशुद्धकर्माभावाभिप्रायाणि शुद्धकर्मणान्नान्तरीयकदुःखस्याप्यनुत्पादकत्वेनोत्कृष्टसुखैकोत्पादकत्वेन केवलबन्धकत्वाभावाभिप्रायाणि वा। केवलागमिकमन्त्रयोगादिसाध्यत्वेन शुद्धावर्तिभोगानां तत्प्रशंसापराणि वा कल्प्यन्ते। विशिष्यतूक्त**पौष्करवचने** स्वेच्छायैवानुगृह्णातीति ईश्वरेच्छास्वातन्त्र्यकथनेन पाशुपतमतत्वप्रत्यभिज्ञानान् मन्दमतीनामृषीणां शुद्धाध्वसुखप्रोचनाय पाशुपतमतमाश्रित्य प्रौढिवादेनोक्तमिति न विरोधः। किञ्च **पौष्करे** विज्ञानकलानां मलैकरुद्धदृक्शक्तिरिति मलैकबद्धत्वं लक्षणमुक्त्वा तन्निर्वाहार्थं कार्ममायेयबन्धाभावं मन्दमत्यनुसारेण कलातत्त्वान्तशोधिन्येत्यादिना उपपाद्याऽपि[28] पुनस्तैर्विशेषदर्शनवद्भिः कलादिकं विना कथं भोग इत्याशङ्किते पुनस्तत्रैव तेषां मायेयबन्धकलाद्यवनिपर्यन्ततत्त्वानि विशुद्धानि विज्ञानकलानामपि सन्तीत्युक्तम्। यथा ऋषयः –

अध्वाऽयं[29] भोग्य उद्दिष्टो भोगो रागादिभिः स्थितः।
अत्र तेषामभावेन कथं भोगो महेश्वरः।।

ईश्वरः –

अत्रापि कालमुख्यानि सन्ति तत्त्वान्यधो यथा।
किन्तु तान्यत्र शुद्धानि बैन्दवानि द्विजोत्तमाः।। इति।

---

[27] (पा) प्रसादादि

[28] (पा) उपपद्यापि

[29] (पा) यत्र

ऋषय: –

कलादितत्त्वसंयोगात्सकलत्वमणोस्थितम्।
तेषामत्रापि सद्भावे सकला अकला अपि।।

ईश्वर: –

तेषां कलादियोगेऽपि पारतन्त्र्यं कृतं न तै:।
विज्ञानकेवलास्तस्मात्सकला अकला अपि।। इति।

एवञ्च तुल्यन्यायत्वात् तत्र शुद्धकलादिप्रतिपादनं शुद्धकर्मणोऽप्युपलक्षणम्। एवञ्च त्रिविधानामप्यणूनामस्त्येव मलमायेयकलादिकर्मरूपबन्धत्रयम्। विज्ञानकलप्रळयाकलसकलानां यथाक्रमं मलमायेयकर्मभिरेकद्वित्रिबन्धेन बन्धवत्त्वमिति शास्त्रीयव्यवहारस्तु अशुद्धकलाकर्माभावाभिप्रायेणावश्यकलाद्यभावाभिप्रायेण वेति। एवमाजानविज्ञानकलानामप्यनन्तेशादीनामीश्वरतत्त्ववर्तिब्रह्मविष्णुरुद्रादीनाञ्चास्त्येवानादिशुद्धं कर्मशुद्धञ्च बैन्दवशरीरम्। तस्मात्कर्मसाम्यमलपरिपाकावपि त्रिविधानामणूनामधिकारनिमित्तमेव। तस्मान्मलपाककर्मसाम्यशक्तिनिपाताश्च दीक्षाधिकारनिमित्तम्। अनुग्रहशक्तेश्च पतनन्नाम नाधोदेशगमनं विभाव्यं तस्यास्तदसंभवात्। किन्तु स्वाच्छादकापरिपक्वमलकर्मबन्धयो: परिपाके सति व्यक्तायास्तस्या अनुग्रहौन्मुख्यावस्था विशेष एव। तदुक्तम् –

व्यापिनी परमाशक्ति: पतितेत्युच्यते कथम्।
ऊर्ध्वादधोगति: पातो मूर्तस्यासर्वगस्य च।।
सत्यं सा व्यापिनी नित्या सहजा शिववत्स्थिता।
किन्त्वियं मलकर्मादिपाशबद्धेषु संवृता।।
पक्वपाशेषु सुव्यक्ता पतितेत्युपचर्यत:। इति।

**सूतसंहितायाम्** –

शक्तिपातप्रकारस्य रहस्यांशश्च कश्चन।
मया नोक्तो रहस्यत्वादाज्ञाभङ्गभयादपि।। इति।

अत्र रहस्यांशश्च पूर्वमुक्त एव विवक्षित:। तस्मात्परिपक्वमलस्संपरिपक्वकर्मानिपतितपरशक्तिर्दीक्षायामधिकारीति स्थितम्।।

## ज्ञानोपयोग:

तेषाञ्च ज्ञानोपयोगप्रकार: कथ्यते। पूर्वं सति फलोन्मुखे कर्मण्यत एव चापक्वे मले तिरोहितायाञ्च परशक्तौ रोधशक्त्यधिकारनिवृत्त्यसंभवात् सा पुरुषं स्वाधिकारसिध्यर्थं मलीमसेषु विषयसुखेषु बलात्कृत्य नियुञ्जानाज्ञानसाधनश्रेयो विविदिषा वैराग्यादिप्रतिबन्धिका प्रवर्तते। इदानीं कर्मसाम्येऽत एव पक्वे च मले निवृत्तावरणया परशक्त्या रोधशक्त्यधिकारापेक्षये मोक्षसाधनज्ञानानुकूलविविदिषा वैराग्यादिकं जायत इति। नचेदानीमनधीतागमस्य मुक्तितदितरफलविवेकतत्साधनशिवपरज्ञानादीनामपरिज्ञानात्कथं

तदधीनमुक्तविविदिषादिकमिति वाच्यम्। मूलप्रमाणभूतागमाध्ययनाभावेऽपि तस्य कृतकृत्यत्वेन दैवाद्वा प्रवादागतपैतृकोपदेशाभ्यां वाऽऽपाततोऽतिस्थूलतया तज्ज्ञानसंभवादिति। तदुक्तं **पौष्करे पशुपटले** –

कर्मनाशान्मलस्यापि विपाके सहकारिणः।
पतत्युन्मीलनीशक्तिस्तदानुग्रहरूपिणी।।
तस्यां पतितमात्रायां मलस्याधोनियामिका।
शक्तिर्निवर्तते तस्यां निवृत्तायां महात्मनः।।
वैराग्यं जायते क्षिप्रं संसारात् दुःखसागरात्।
दिदृक्षा जायते शम्भोः पादपङ्कजयोरपि।। इति।

अन्यत्राऽपि –

येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ।।
तन्निपाताच्च तस्येत्थमज्ञस्याप्यभिलाषिणः।
बुद्धिरुत्पद्यतेऽकस्माद्विवेकेनात्मवर्तिना।।
विवेकिनो विरक्तस्य जिज्ञासा चोपजायत। इति।

एतच्च दैवाद्विवेकज्ञानाद्युपपादनं समयविशेषदीक्षाधिकारिणोरपि समयिपुत्रकयोस्स्वस्वोक्तकर्मानुष्ठानेन यथाक्रमं रुद्रेश्वरसालोक्यादिद्वारा परममुक्तिः। अतस्समयविशेषदीक्षयोरपि विवेकवैराग्यादिकमङ्गमिति कृत्वा। वस्तुतस्तु निर्वाणदीक्षायामेवेदमङ्गम्। ततः पूर्वमेव विशेषदीक्षयाऽऽगमस्याधीतव्यत्वात् तदर्थमधीतव्याकरणादिकस्यागमादेव तद्विवेकविज्ञानादिकं भवतीति न दैवाद्यपेक्षा। नचैवमागमेन विचारात्पूर्वमेव विवेकादिज्ञाने विचारवैयर्थ्यम् असंभवश्च विचारान्तरमेव तज्ज्ञाने विवेकज्ञानविषयदोषदर्शनवैराग्यमुमुक्षा शिवज्ञानतत्साधनता ज्ञानविविदिषाद्यनन्तरं विचारे प्रवृत्तिः विचारप्रवृत्त्यनन्तरमेव चोक्तज्ञानादिकमित्यन्योन्याश्रय इति वाच्यम्। अधीतव्याकरणादेः पदपदार्थव्युत्पत्त्यादिरूपोपदे शकलयाऽऽपातत आगमादेव विचारात्पूर्वमेव तज्ज्ञाने पश्चाद्विचाररूपतन्त्रकलया दृढनिश्चयार्थं विचारे प्रवृत्तिरिति न विचारवैयर्थ्यमिति ध्येयम्।

तत्रापि चायंक्रमः – शक्तिनिपातानन्तरं दैवादिभ्यश्शिवाभेदाभिव्यक्तिरूपमुक्तिफलं नित्यमन्यदनित्यमिति विवेकज्ञानं, पश्चादन्यत्र वैराग्यं मुक्तावौत्सुक्यं ततस्तत्साधनशिवज्ञानेच्छाशमदमादय इत्याकरोक्ता द्रष्टव्याः। वैराग्यञ्च विषयस्वरूपस्यापरिज्ञानाद्वा ज्ञानेऽप्यलाभाद्वा लाभेऽपि निगमागमलोकनिन्दया वा, अनिन्दायामपि स्वभावजुगुप्सया वा जायमानन्न ज्ञानाङ्गम्। पुनः स्वरूपपरिज्ञानलाभादौ तदभिलाषसंभवेन तस्यास्थायित्वात्। किन्त्वनित्याशुचिदुःखात्मकत्वेन शान्त्यतीतकलाभुवनभोगपर्यन्तस्याप्यन्यस्य तादृशदोषदर्शनजातमेव वैराग्यं स्थायिज्ञानाङ्गम्। एतत्सर्वमभिप्रेत्योक्तम् –

वैराग्यं जायते तस्मात्संसारात् दुःखसागरात्। इति।

शान्त्यतीतभुवनभोगपर्यन्तरूपात् संसारादार्जनादिना दुःखबहुलाद्वैराग्यं तत्त्वेन

ज्ञानाज्जायत इत्यर्थः। दोषदर्शनप्रकारश्चागमेषु तत्र तत्र **वीरागमादिषु सूतसंहितायाञ्च यज्ञवैभवसप्तदशाध्याये** –

अथातस्संप्रवक्ष्यामि वैराग्यं दुःखनाशनम्।

इत्यारभ्य विस्तरेणोक्तोऽनुसन्धेयः। उक्तविवेकज्ञानादिनाञ्च ज्ञानाङ्गत्वं तत्प्रकरणपाठादिनाऽवगम्यते। एवं सञ्जातवैराग्यश्च, "तस्माद्विद्वान्सर्वमेतद्विहाय श्रद्धायुक्तस्सद्गुरुं सत्यनिष्ठम्। विद्याकोशं वेदवेदान्तदृष्टं गच्छेन्नित्य"मिति। "अर्थं सर्वं क्षेत्रजातं समस्तं दद्यात्तस्मै देशिकेन्द्राय मर्त्यः" इति **सूतसंहिता**वचनेन, "अनुग्राह्यस्य विनय" इति,

कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहंबन्धतः कदा।
को वा दर्शयिता शम्भोरिति सञ्जायते मतिः।।

इति **पौष्कर**वचनेन च प्रदीप्तशिरा इव पश्चात्तापयुतस्समूलतया विशिष्य ज्ञानार्थं सविनयं सोपहारं वक्ष्यमाणलक्षणं गुरुमुपसर्पति। गुरुश्च सामान्यतश्चातुर्वर्णिकः, नानुलोमादयः। तत्रापि ब्राह्मणश्चतुर्वर्णानां, क्षत्रियः क्षत्रियवैश्यशूद्राणामेव, वैश्यो वैश्यशूद्रयोरेव, शूद्रश्शूद्रस्यैव। तदुक्तं **सुप्रभेदे** –

ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्शुद्धकुलोद्भवाः।
आचार्यास्तेषु विज्ञेया नान्येषान्तु कदाचन।। इति।

**द्विशतिकालोत्तरे** -

ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्शुद्धास्तु साधकाः।
स्ववर्णादानुपूर्व्येण आचार्यास्तु षडानना।। इति।

**वायवीये** च –

शिवशास्त्रसमायुक्ताः पशुशास्त्रपराङ्मुखाः।
ब्राह्मणादिचतुर्वर्णा आचार्यास्तु प्रकीर्तिताः।। इति।

यद्यप्युक्तानि वचानान्याचार्याभिषेकयोग्यतापराण्येव, तथाऽपि – "नार्हन्त्यनभिषिक्तास्ते" इत्यादिवचनादस्मिन् शास्त्रे आचार्याभिषेकयुक्तस्य गुरुत्वमिति येऽभिषेकार्हास्ते सर्वेऽपि गुरुत्वार्हा एवेति तादृशैरेभिर्वचनैश्चतुर्णां वर्णानां गुरुत्वमप्युक्तं भवति। यत्तु "वर्णानां ब्राह्मणो गुरु"रिति **स्मृतिवचनं** तच्छास्त्रान्तरानुसारेण ब्राह्मणस्य सर्वगुरुत्वमात्रप्रतिपादनपरं गुरूत्तमत्वप्रतिपादनपरं वा, नेतरवर्णगुरुत्वव्यवच्छेदपरम्। उक्तञ्च **सूतसंहितायां** त्रयाणामपि वर्णानामानुपूर्व्येण गुरुत्वं ब्राह्मणस्योत्तमत्वञ्च –

आचार्यो नाम वेदान्तविचारेणाप्तवेदनः।
तमप्यनेकधा विद्धि श्रद्धया पुरुषोत्तम।।
उत्तमो मध्यमस्तद्वदधमश्चाम्बुजेक्षण।
उत्तमो ब्राह्मणः प्रोक्तो मध्यमः क्षत्रियस्तथा।।
अधमो वैश्य इत्युक्तस्सर्वशास्त्रार्थवेदिभिः।
अधमोऽच्युतवैश्यस्य शूद्रस्यापि गुरुर्भवेत्।।

मध्यमो मध्यमस्यापि तथा वैश्यस्य केशव।
शूद्रस्यापि गुरुः प्रोक्तश्शुश्रूषोरात्मवेदिभिः।।
उत्तमो ब्राह्मणस्यापि क्षत्रियस्य तथैव च।
विशां शूद्रस्य शुश्रूषोर्गुरुरित्युच्यते मया।। इति।

यत्तु,

"शूद्राणाञ्च तथा स्त्रीणां गुरुत्वं न कदाचन" ।।

इति शूद्रस्य गुरुत्वनिषेधकं **सूतसंहिता**वचनं तदुक्त**वायवीयपुराणा**द्यनुसारेणोक्त**सुप्रभेदा**द्यागमानुसारेण चाचार्याभिषेकरहितादग्धशूद्रत्वशूद्रविषयम्। किञ्चागमिकेषु कार्येषु आचार्याभिषेकयुक्तस्य शिवसंस्कारनिर्दग्धसामर्थ्यत्वेन शूद्रत्वं न निषेधकार्यकारि। अत एव **स्कन्दकालोत्तरे** शूद्रे गुरुत्वस्य स्मृत्यादिविरोधं मनस्याशङ्क्य चतुर्णामपि वर्णानां विशेषदीक्षादिकर्मस्वाचार्याभिषेकेण विना द्विजत्वेऽपि गुरुत्वायोग्यत्वात्तस्यैव प्रयोजकत्वमिति शूद्रस्याप्याचार्याभिषेकदग्धजातेरधिकारयोग्यत्वमिति विस्तरेणोक्तम् –

आचार्यत्वं शिवेनाथसिद्धान्ते प्रतिपादिते।
विप्रादयश्चतुर्वर्णानापि योग्यास्स्वकर्मणि।।
दीक्षायां सर्वमर्त्यानां प्रतिष्ठायामथोत्सवे।
स्नपने प्रोक्षणेऽन्यत्र प्रायश्चित्तेऽभिषेचने।।
व्याख्यानादौ च शक्तास्स्युस्स्वार्थबोधपरार्थके।
शूद्रस्यापि गृहस्थस्य नित्यैषा चैव योग्यता।।
अभिषेकस्य यो योग्यः किं पुनः स्थापनादिषु।
गतं शूद्रस्य शूद्रत्वं द्विजत्वं ब्राह्मणस्य च।।
शिवसंस्कारसंबन्धाज्जातिभेदो न विद्यते।
काञ्चनं रजतं ताम्रं लोहञ्चेति चतुष्टयम्।।
तत्प्रयाति सुवर्णत्वं रसभेदप्रभावतः।
रसविद्धं यथा ताम्रं न भूयस्ताम्रतां व्रजेत्।।
पाषाणश्शिवसंस्कारात्भुक्तिमुक्तिप्रदो भवेत्।
पाषाणश्शिवतां याति शूद्रस्तु न कथं भवेत्।।
ज्ञानविद्धस्तथा देही न भूयः पशुतां व्रजेत्। इति।

**देवीकालोत्तरेऽपि** –

आचार्यस्सर्ववर्णानां चातुर्वर्ण्यो गुरुर्भवेत्।
सत्यमेतन्महादेवि शिवशास्त्रेषु चोदितम्।।
वर्णावर्णविचारो यः स नरः पातकी भवेत्। इति।

तथा सर्वाश्रमाणामपि गुरुत्वं **स्कन्दकालोत्तरे** उक्तम् –

शिखा यज्ञोपवीती च जटाधारी च मुण्डितः।
वज्ररोमाभिषिक्तश्च आचार्यस्स इति स्मृतः।। इति।

अत्र शिखायज्ञोपवीतीत्यादिशब्दैर्यथाक्रमं गृहस्थ-वानप्रस्थ-सन्यासी-नैष्ठिका उच्यन्ते। तथा **सुप्रभेदे** – "गृहस्थो देशिकश्रेष्ठ" इति, "भौतिकोऽपि तथैव स्या"दिति च। तत्रापि सन्यासी वानप्रस्थो गृहस्थो ब्रह्मचारी च वर्णवदुत्तमास्स्वाश्रमादानुपूर्व्येणापराश्रमाणां गुरवो भवन्ति। तथा च सन्यासी सन्यासिवानप्रस्थगृहस्थब्रह्मचारिणां, वानप्रस्थश्च वानप्रस्थगृहस्थब्रह्मचारिणां, गृहस्थस्तु गृहस्थब्रह्मचारिणोः, ब्रह्मचारी ब्रह्मचारिण इति। **तदुक्तमागमे** –

सन्यासाश्रममत्यन्तमुत्तमं दीक्षितं भवेत्।

"नैष्ठिको नैष्ठिका"नित्यादि। अत्र सन्यासाश्रमविशेषणेनात्यन्तोत्तमपदेन तत्प्रतियोगितया यथाक्रमम् अत्युत्तमोत्तमापरत्वेन वानप्रस्थगृहस्थब्रह्मचर्याश्रमत्रयं सन्निहित। क्रमादिति चोत्तरार्धस्थमत्र संबध्यते। तथा चात्यन्तोत्तमस्सन्यासाश्रमोऽत्युत्तमो वानप्रस्थाश्रम उत्तमो गृहस्थाश्रमोऽपरो ब्रह्मचर्याश्रमश्च क्रमादानुपूर्व्येण दीक्षितो भवतीत्यस्यार्थ इति्। अयमर्थस्**सूतसंहितायां** विशिष्योक्तः –

उत्तमः पञ्चधा प्रोक्तो गुरुर्ब्रह्मात्मवेदिभिः।
ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः।।
अतिवर्णाश्रमी तेऽपि क्रमाच्छ्रेष्ठा विचक्षणाः।
अश्रेष्ठानां हरे श्रेष्ठा गुरवः परिकीर्तिताः।। इति।

तत्र ब्रह्मचारी द्विविधः। नैष्ठिको भौतिकश्च। तत्र द्वितीयस्य त्वविशेष एव। प्रथमस्य तु विरक्तत्वात्, **अचिन्त्यविश्वसादाख्ये** –

आचार्यौ द्वौ समाख्यातौ विरक्तः प्रथमो भवेत्।
भौतिकस्तु द्वितीयस्स्यात्प्रथमौ तु विशेषकौ।।
आजन्मब्रह्मचारी च यतिश्च तदनन्तर।

इत्याचार्यत्वे यतिना समं तस्य नैष्ठिकस्य प्राथम्यकथनाच्च यतिव्यतिरिक्तानां त्रयाणामपि तस्य गुरुत्वमिति विशेषमाह – **उत्तरश्लोकेन**,

नैष्ठिको नैष्ठिकांश्चैव गृहस्थान् दीक्षयेत्क्रमात्।
भौतिकांस्तु वनस्थांश्च नान्यदीक्षां समाचरेत्।। इति।

अयञ्च नान्यदीक्षामित्याद्युक्तस्य सर्वस्य शेषः। अयञ्चाश्रमनियमः स्वसमोत्तमयोस्संभवेऽन्यस्य ज्ञानानुत्कर्षे च। स्वसमोत्तमयोरसंभवेऽपराश्रमस्य ज्ञानोत्कर्षे चापराश्रमोऽप्युत्तमाश्रमस्य दीक्षोपदेशादिषु गुरुर्भवत्येव। तदुक्तं **सूतसंहितायाम्** –

ब्रह्मचारी गृहस्थस्य वनस्थस्य यतेरपि।
विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा।।
गृहस्थोऽपि वनस्थस्य यतेरप्यम्बुजेक्षणा।
विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा।। इति।

ज्ञानोत्कर्षाभावे ब्रह्मचार्यादीनां स्वोत्तमाश्रमं प्रतिशिष्यत्वमेवेत्यर्थः। एवञ्च सति

यस्त्वतिवर्णाश्रमी निगमागमान्तश्रवणमनननिदिध्यासनसञ्जातदृढशिवाभेदसाक्षात्कारः स सर्वाश्रमाणां गुरुरेव। तदपेक्षया कस्यापि ज्ञानोत्कर्षाभावात्। न कस्यापि शिष्यः। एतदपि **सूतसंहिताया**मतिवर्णाश्रमिलक्षणकथनात् पुरस्तादुक्तम् –

अतिवर्णाश्रमी प्रोक्तो गुरुस्सर्वाधिकारिणाम्।
न कस्यापि भवेच्छिष्यो यथाऽहं पुरुषोत्तम।।
अतिवर्णाश्रमी साक्षात्गुरुणां गुरुरुच्यते।
तत्समो नाधिकश्चास्मिन् लोकेऽस्त्येव न संशयः।।
यश्शरीरेन्द्रियादिभ्यो विभिन्नं सर्वसाक्षिणम्।
परमार्थैकविज्ञानसुखात्मानं स्वयंप्रभम्।।
परतत्त्वं विजानाति सोऽतिवर्णाश्रमी भवेत्।
यो वेदान्तमहावाक्यश्रवणेनैव केशव।।
आत्मानमीश्वरं वेद सोऽतिवर्णाश्रमी भवेत्।
योऽवस्थात्रयनिर्मुक्तमवस्थात्रयसाक्षिणम्।।
महादेवं विजानाति सोऽतिवर्णाश्रमी भवेत्।
वर्णाश्रमादयो देहे मायया परिकीर्तिताः।।
नात्मनो बोधरूपस्य मम ते सन्ति सर्वदा।
इति यो वेदवेदान्तैस्सोऽतिवर्णाश्रमी भवेत्।।
यस्य वर्णाश्रमाचारो गळितस्स्वात्मदर्शनात्।
स वर्णानाश्रमान् सर्वानतीत्य स्वात्मनि स्थितः।।
योऽतीत्य स्वाश्रमान्धर्मानात्मन्येव स्थितः पुमान्।
सोऽतिवर्णाश्रमी प्रोक्तः सर्ववेदार्थवेदिभिः।। इति।

अत एव **देवीकालोत्तरेऽपि** –

सर्वलक्षणहीनोऽपि ज्ञानवान्गुरुरिष्यत। इति।

एवमाश्रमेषु स्वोत्तमासंभवे ज्ञानोत्कर्षे स्वोत्तमाश्रमं प्रत्यपरस्य गुरुत्वमिति स्थितम्। एवं वर्णेष्वपि द्विजेषु स्वाव्यवहितोत्तमवर्णं प्रति तदुत्तमासंभवे स्वस्य च ज्ञानोत्कर्षे गुरुत्वं बालाकेर्ब्रह्मणस्य प्राचीनशालादीनां षण्णां मुनिनाञ्चाजातशत्रुकेकययो राज्ञोरेव गुरुत्वप्रतिपादक **बृहदारण्यकमूलकात्** –

वैश्यस्यापि तथा राज्ञो विद्योत्कर्षबलेन तु।
गुरुत्वं केचिदिच्छन्ति स्वोत्तमं प्रति केशव।।

इति **सूतसंहिता**वचनात्। एवञ्च शूद्रस्यापि स्वाव्यवहितोत्तमवर्णवैश्यं प्रति तदुत्तमासंभवे स्वस्य ज्ञानोत्कर्षेऽपि क्षत्रियवैश्ययोरिव गुरुत्वावचनेऽपि तुल्यन्यायत्वात्गुरुत्वमिति केचित्। अन्ये तु न शूद्रस्य वैश्यं प्रति गुरुत्वम्। द्विजानां शूद्राद्विद्योपादानस्य बहुस्मृतिनिषेधात्। "गतं शूद्रस्य शूद्रत्व"मित्याद्यागमस्य शूद्रस्य गुरुत्वप्रतिपादकस्य शूद्रमनुलोमादिकञ्च प्रत्यपि गुरुत्वप्रतिपादनेनापि चरितार्थत्वादिति। एवञ्च –

आचार्यस्सर्ववर्णानां चातुर्वर्ण्यो गुरुर्भवेत्।

इति **देवीकालोत्तर**स्थमविशेषवचनमप्युक्तश्रुतिस्मृत्यनुसारेणोक्तेऽर्थे योज्यम्। सवर्णादिसंज्ञान् षडप्यनुलोमादीन्प्रति गुरुत्वं न तेषामेव। 'नान्येषान्तु कदाचने'ति चतुर्वर्णव्यतिरिक्तानां सर्वेषामाचार्याभिषेकनिषेधात्।

नार्हन्त्यनभिषिक्तास्ते मूढा दीक्षादिकर्मणाम्।

इत्यनभिषिक्तस्यान्यदीक्षाकर्तृत्वनिषेधात्। अतस्तान् प्रत्यपि वर्णानामेव सामान्यशास्त्रप्राप्तानां गुरुत्वम्। तत्राप्यविशेषाच्चतुर्णामपि वर्णानामिति। तस्मात्स्थितमेतद्वर्णेषु ब्राह्मणो ब्राह्मणादिदशानां, क्षत्रियः क्षत्रियादिनवानां वैश्यो वैश्याद्यष्टानां, शूद्रश्शूद्रादिसप्तानां, तदुत्तमासंभवे स्वस्य ज्ञानोत्कर्षे च वैश्यस्स्वव्यवहितोत्तमक्षत्रियस्य गुरुः, क्षत्रियस्स्वाव्यवहितोत्तमब्राह्मणस्य गुरुः, शूद्रः केषाञ्चिन्मते स्वोत्तमवर्णस्य गुरुरिति। आश्रमेष्वपि सन्यासी स्ववर्णेषु चतुर्णामाश्रमाणां, वानप्रस्थस्सन्यासिव्यतिरिक्तानां त्रयाणां, गृहस्थो गृहस्थब्रह्मचारिणोर्द्वयोरेव, ब्रह्मचार्यपि नैष्ठिकस्सन्यासिव्यतिरिक्तानां त्रयाणां, भौतिकस्तु ब्रह्मचारी भौतिकस्यैव। उक्ता नामसंभवे ज्ञानोत्कर्षे च ब्रह्मचार्यपि गृहस्थवानप्रस्थसन्यासिनां सर्वेषामाश्रमाणामपि, गृहस्थो वानप्रस्थसन्यासिनोरपि, वानप्रस्थस्सन्यासिनोऽपि गुरुः। उक्तातिवर्णाश्रमी तु सर्वदा सर्वाश्रमाणां गुरुरेवेति। एवञ्च गृहस्थभौतिकौ प्रति गृहस्थभौतिकनैष्ठिकसन्यासिनां सर्वेषां गुरुत्वेऽपि भुक्तिद्वारकमुक्तिसाधने कर्मणि गृहस्थभौतिकयोरेव गुरुत्वं केवलमुक्तिसाधने कर्मणीतरयोरिति[30] व्यवस्थोक्ता **सुप्रभेदे** –

गृहस्थो देशिकश्श्रेष्ठो भुक्तिमुक्तिप्रसिद्धये।
भौतिकोऽपि तथैव स्यान्नैष्ठिको मोक्षदो वरः।। इति।

ननु शैवे यतिवानप्रस्थयोरेवाभावात् भावे वा तयोराचार्याभिषेकनिषेधाद्वातयोर्न गुरुत्वम्। तथाहि **ज्ञानरत्नावल्याम्** –

द्वावेवाश्रमिणौ शैवे गृहस्थब्रह्मचारिणौ।
लोकानुग्रहकर्तारौ परिव्राट् तापसौ न हि।। इति।

अत्राश्रमद्वयनिषेधस्तयोरभिषेकप्रयुक्तलोकानुग्रहरूपान्यदीक्षादिकर्तृत्वनिषेधो वा प्रतीयते। **स्कन्दकालोत्तरेऽपि** –

सन्यासी पतितो नग्नष्षण्डो न्यूनाधिकाङ्गुलिः।
नाभिषेकविधौ योग्याः कथिता वै षडानना।। इति।

तथा च कथमुक्तं तयोश्शैवाश्रमिणोर्गुरुत्वमिति चेन्मैवम्। **स्कन्दकालोत्तरे** –

शिखी यज्ञोपवीती च जटाधारी च मुण्डितः।
वज्ररोमाभिषिक्तश्च आचार्यस्स इति स्मृतः।। इति श्रूयते।

तत्र जटाधारी मुण्डित इति शब्दाभ्यां यथाक्रमं वानप्रस्थसन्यासिनावुच्येते। तयोस्तत्र रूढत्वात्। तत्रापि शैवाश्रमिणावेव तावुच्येते, न वैदिकौ। शैवागमवाक्यत्वेनोत्सर्गतः प्रतिपन्न

---

30 (पा) गृहस्थभौतिकयोरिति

शैवाश्रमत्वस्य बाधकाभावात्। शैवाश्रमनैष्ठिकवाचकवज्ररोमाभिषिक्तपदसाहचर्याच्च। किञ्चाचार्यस्स इति स्मृत इति तयोराचार्याभिषेक उच्यते। न च केवलवैदिकयोः तयोराचार्याभिषेकस्संभवति, समयविशेषनिर्वाणदीक्षादिपूर्वकत्वादाचार्याभिषेकस्य। तस्मादुक्तं **स्कन्दकालोत्तर**वचनानुसारेण तावेव शैवाश्रमिणौ वानप्रस्थसन्यासिनौ तयोश्चाचार्याभिषेकोऽपीति। अपि च **अचिन्त्यविश्वसादे** सन्यासिनः आचार्यप्राथम्यमप्युक्तम् –

आचार्यौ द्वौ समाख्यातौ विरक्तः प्रथमो भवेत्।
भौतिकस्तु द्वितीयस्स्यात् प्रथमौ तु विशेषकौ।।
आजन्मब्रह्मचारी च यतिश्च तदनन्तर। इति।

**सूतसंहितायां यज्ञवैभवखण्डे उपरिभागे सूतगीतायामष्टमाध्यायेऽपि** यावन्त आश्रमा वेदे तावन्त आश्रमाश्शैवागमे शिवेनोक्ता इत्युक्तम् –

श्रुतिपथनिरतानामाश्रमा यद्वदुक्ताः।
परगुरुरखिलेशस्तद्वदाहाश्रमांश्च।। इति।

तस्मात्तावेव शैवाश्रमिणौ वानप्रस्थसन्यासिनौ अस्ति च तयोरप्याचार्याभिषेक इति। किञ्च यदुक्तम् – "द्वावेवाश्रमिणौ शैवे गृहस्थब्रह्मचारिणौ। लोकानुग्रहकर्तारावििति", **ज्ञानरत्नावली**वचनेन शैवे वानप्रस्थसन्यासिनोस्तयोराचार्याभिषेकस्य वा निषेध इति तदप्यसङ्गतम्। तत्रोभयनिषेधस्यापदार्थत्वादवाक्यार्थत्वात्। किन्तु लोकानुग्रहरूपपरदीक्षादिकर्तृत्वस्यैव निषेधः। सोऽपि क्रियावतीविषयः। तथाह्युत्तरत्र वक्ष्यते। दीक्षा द्विविधा क्रियावती ज्ञानवती चेति। तत्र क्रियावत्यास्स्ववह्निहोमसाध्याया वानप्रस्थविशेषसन्यासिनोरभावात्तस्या एवायं तयोर्निषेधः। अनुग्रहशब्दस्य क्रियावत्यां रूढत्वाच्च। न तु ज्ञानवत्या अपि निषेधः। दृष्टार्थस्य तदाचार्याभिषेकविधानस्य वैयर्थ्यापत्तेः। यदपि **स्कन्दकालोत्तरे** सन्यासिन आचार्याभिषेकयोग्यता निषेधकं वचनं तदपि क्रियावत्या एवाभिषेकक्रियाया योग्यता निषेधकं, न तु ज्ञानवत्या अपि। तदभिषेकयोग्यता प्रतिपादकपूर्वोक्तवचनविरोधात्, **अचिन्त्यविश्वसादे** यतेः क्रियावत्या निषेधपूर्वकं ज्ञानवत्या विधानाच्च। यथा –

यतीनामनपेक्ष्यैव शिवाग्निविधिमीरितः।
तस्माद्यतेश्च कर्तव्यं शैवमार्गे विशेषतः।।
आचार्याञ्च मध्ये वै यतीनां किञ्चिदन्तरम्।
परहंसयतीनाञ्च तपस्सन्यासिनश्च ये।।
अनयोरग्निकार्येषु योग्यत्वं न विधीयते।
होमं विना तयोरेवमभिषेको विधीयते।। इति।

तद्युक्तं वानप्रस्थसन्यासिनोरप्याचार्याभिषेको गुरुत्वञ्चेति। उक्तानामुत्तमानां वर्णानामाश्रमाणाञ्च योनिवयोलक्षणवृत्तज्ञानादिविशिष्टानामेवाचार्यत्वं गुरुत्वं च, न केवलानाम्। तथाहि – योनिवैशिष्ट्ये तावत् **सुप्रभेदे** –

मातृतः पितृतश्शुद्धाश्शुद्धभावा जितेन्द्रियाः। इति।
वयो वैशिष्ट्यन्तु सामान्यशास्त्रसिद्धमेव।

लक्षणवैशिष्ट्ये **सुप्रभेदे** –

सर्वावयवसंपूर्णस्सर्वलक्षणसंयुतः। इति।

**द्विशतीकालोत्तरे** लक्षणहीनानामाचार्यकायोग्यत्वमुक्तम् –

अतिह्रस्वानतीदीर्घान्कुनखान्कुटिलेक्षणान्।
शिपिविष्टान्घृणापेतान् श्मश्रुभ्रूचक्षुपिङ्गळान्।।
ईदृशान्वर्जयित्वा तु सर्वकर्मबहिष्कृतान्। इति।

**स्कन्दकालोत्तरे** –

"अन्धो मूकस्तु बधिरः पङ्गुर्व्यंघ्रिर्विहस्तकः।
विकर्णो विकृतास्यश्च वक्राङ्गोऽधिकवामनः।।
सन्यासी पतितो नग्नष्षण्डो न्यूनाधिकाङ्गुलिः।
त्वग्दोषी च दुराचारी वामाचारपरायणः।।
नाभीषेकविधौ योग्या" इति।

वृत्तवैशिष्ट्ये **सुप्रभेदे** –

"परोपकारनिरतो जपपूजादितत्परः।
अमोघवचनश्शान्तो वेदवेदार्थपारगः।।
अग्निमान्नीतिमांश्चैव गुर्वाज्ञा परिपालकः।
गृहस्थो देशिकश्श्रेष्ठ" इति।।

**अचिन्त्यविश्वसादे** –

एतेषां देशिकानाञ्च लक्षणं श्रृणु सुव्रत।
अहिंसस्सत्यवादी च विश्वजीवदयापरः।।
क्षमावान्शान्तचित्तश्च निग्रहानुग्रहे क्षमः।
सदाचारयुतो दक्षो जपध्यानपरायणः।।
विज्ञानदीक्षासंयुक्तो गुरुभक्तिविशारदः।
डम्भमायाविनिर्मुक्तः क्षुद्रकर्मविवर्जितः।।
शिष्याणां गुणदोषेषु विज्ञानी च जितेन्द्रियः।
निर्ममो निरहंकारोऽनृशंसो निर्विकल्पकः।। इति।

दुर्वृत्तानां वर्ज्यत्वमपि **द्विशतीकालोत्तरे** –

वर्ज्यमानानतो ज्ञात्वा वर्जयेत्तान् प्रयत्नतः।
नास्तिकान्मत्सरान् रौद्रान्बधिरान्व्रतजीवकान्।।
भिषक्शास्त्रोपभोगांश्च तथा रोगोपजीवितान्।
पिशुनान् क्रूरकर्मज्ञान् चपलान् पारदारिकान्।।
सन्यासिमूकान्यङ्गांश्च कुसङ्गान् शस्त्रजीवकान्।
परापवादशीलांस्तु निर्दयांश्च कपालिकान्।। इति।

निषिद्धपरित्यागी विहितकर्मकर्तेति संग्रहार्थः। ज्ञानवैशिष्ट्येऽपि **वायवीये** –

शिवशास्त्रसमायुक्ताः पशुशास्त्रपराङ्मुखाः। इति।

**द्विशतीकालोत्तरे** –

क्रियापादे तु निपुणश्चर्यापादानुवर्तकः।
योगपादकृताभ्यासो ज्ञानपादानुरञ्जकः।।
एतांश्च गुणसंयुक्तान्गृह्णीयुस्तान्विचक्षणाः। इति।

**सुप्रभेदे** –

सर्वागमानां सारज्ञस्सर्वशास्त्रार्थतत्त्ववित्। इति।

किं बहुना निगमागमान्तश्रवणमननशिवाभेदनिदिध्यासनपरिपाकजनितसाक्षात्कारेण **भ्रमरकीटन्यायेन** संपन्नशिवभाव एवोत्तमो गुरुः। **तदुक्तमचिन्त्यविश्वसादाख्ये** –

"शिवानुभूतिसंयुक्तस्संशयच्छिदसंशयः। इति।
यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते।
यस्यावलोकनाद्यैश्च परानन्दोऽभिजायते।।
गुरुं तमेव वृणुया"दिति।

एवञ्चायं शिव एव। न हि शिवः क्वचिज्जीवव्यतिरिक्ततया केनचिदनुभूयते। किन्तु जीव एव कस्मिंश्चिदुक्तरीत्या तदात्मतयाऽभिव्यज्यतेऽग्निरिव काष्ठादिषु। यदात्मतया शिवोऽभिव्यज्यते स एव शिव इत्युच्यते। किञ्च शिवस्य शिवत्वन्नामा-खण्डानन्दस्वाकारतयाऽभिव्यक्तत्वम्। तच्च तस्यापीत्यतोऽपि स शिव इति। तथा च **देवीकालोत्तरे** –

ज्ञानमूर्तिस्सविग्रहः।
आचार्यश्शिव एवाहुश्शिव आचार्य उच्यते।।

इति यद्वचनम्, यदपि च –

आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः।
भगवाननुगह्णाति स एव सकलानपि।।

इत्यादिगुणविशिष्टस्यानुग्राहकस्य शिवत्वोत्कीर्तनं तदप्याञ्जस्येनोपपद्यते। एतेन यदुक्तमेकदेशिभिर्गुरुमूर्तिमधिष्ठायेति वचनात्गुरुमूर्तिं **भूतावेशन्यायेनाधिष्ठाय** साक्षाच्छिवोऽनुगृह्णातीति तस्यार्थ इति, यदपि चोक्तमन्यैः किञ्चित्ज्ञानादिविशिष्टः पश्ववस्थापन्न एवानुग्रहकर्ता शिवस्य तु तदन्तर्यामितया कुम्भादिष्विव तत्र सन्निधानाद्वो-पचारादनुग्रहकर्तृत्वमुचितमिति[31] तदद्वयं निरस्तम्। तत्राद्ये आचार्यगुणकथनस्य दृष्टार्थस्य गुणविशिष्टानुग्राहकत्ववचनस्य चानाञ्जस्य प्रसङ्गात्। द्वितीये शिवानुग्रहकर्तृत्वोपचारस्यैव दोषत्वादिति। तस्माद्वर्णाश्रमयोनिवयोलक्षणवृत्तज्ञानेषूत्तमा एव गुरव इति। गुणविषये उक्तसर्वगुणानामसंभवे यस्तु बहुगुणोऽल्पदोषस्सगुरुर्ग्राह्यः। तदुक्तं **द्विशतीकालोत्तरे** –

---

31 (पा) उच्यत इति

बहुगुणमल्पदोषं स्वीकुर्यात्स्थापकोत्तमः। इति।।

## शिष्यकर्म

तादृशे आचार्ये शिष्येण कर्तव्यमुच्यते। प्रथमं तावत्शिवबुद्धिः कर्तव्या। तथा तन्निन्दा तदुक्तार्थविस्मृत्यादिकञ्च न कर्तव्यम्। तदुक्तं **सूतसंहितायां मुक्तिखण्डे षष्ठाध्याये** –

गुरोरनिष्टाचरणं गुरोरिष्टविवर्जनम्।
गुरोश्च सेवाऽकरणं ज्ञानानुत्पत्तिकारणम्।।
ईश्वरे वा गुरौ वेदे ज्ञाने चाभक्तिरच्युत।
तथा स्वगुरुसन्ताने ज्ञानानुत्पत्तिकारणम्।।
स्वाचार्याय महाभक्त्या स्वदेहस्यानिवेदनम्।
निवेदनं तथाऽन्यस्मै ज्ञानानुत्पत्तिकारणम्।।
आचार्यनिन्दाश्रवणं तत्बाधायाश्च दर्शनम्।
विवादश्च तथा तेन ज्ञानानुत्पत्तिकारणम्।।
आचार्येऽनीश्वरज्ञानमुपेक्षा च तथैव च।
तदुक्तविस्मृतिश्चापि ज्ञानानुत्पत्तिकारणम्।।
आचार्ये बालबुद्धिश्च नरबुद्धिस्तथैव च।
अशिष्टबुद्धिः श्रीनाथ ज्ञानानुत्पत्तिकारणम्।। इति।

तदुक्तं **देवीकालोत्तरे** –

आचार्यश्शिव एवाहुश्शिव आचार्य उच्यते।
अभेदं यो विजानाति स वै वेदविदुच्यते।।

तथा –

गुरोश्चावमतिं कृत्वा स नरः पातकी भवेत्। इति।

पूर्वोक्तस्वदेहक्षेत्रादिसमर्पणतच्छरीरनिर्वाहादिचिन्तनञ्च कर्तव्यम्। तदुक्तं **सूतसंहितायां उत्तरे दशमे** –

इत्थं ब्रह्मैवात्मभूतं विदित्वा श्रद्धापूतं देहमेतं स्वकीयम्।
अर्थं सर्वं क्षेत्रजातं समस्तं दद्यादस्मै देशिकेन्द्राय मर्त्यः।।
स्वदेशिकस्यैव शरीरचिन्तनं भवेदनन्तस्य शिवस्य चिन्तनम्।
स्वदेशिकस्यैव तु पूजनं तथा भवेदनन्तस्य शिवस्य पूजनम्।।
स्वदेशिकस्यैव तु नामकीर्तनं शिवादिशब्दस्य च कीर्तनं भवेत्।
स्वदेशिकस्यैव तु बोधनं तथा भवेदनन्तस्य शिवस्य बोधनम्।। इति।
किं बहुना विनयादौ यस्मिन्कृते तस्य कृपा भवतीह स कर्तव्यः।

तदुक्तं **शतरत्नसंग्रहे पौष्करे** च –

अनुग्राह्यस्य विनये तथाऽनुग्राहकस्य च।
कारुण्ये स शिवः कर्ता तयोर्योगस्तु दुर्लभः।। इति।

तत एवंभूतस्य शिष्यस्य मन्दतरादिकार्यभूतभक्त्यादितारतम्येन मन्दतरादिशक्ति-निपातादितारतम्यमधिकारविशेषं ज्ञात्वा समयादितत्तदधिकारोचिता दीक्षाः क्रमेण करोति। तथाहि शक्तिनिपातोऽधिकार इत्युक्तम्। स च शक्तिनिपातश्चतुर्विधो मन्दमन्दतरतीव्रतीव्रतरभेदेन। इदञ्च शक्तिनिपातचातुर्विध्यं सकलसंज्ञकानामणूनां, येषां समयविशेषदीक्षे स्तः। विज्ञानप्रळयाकलयोस्तु केवलनिर्वाणदीक्षाविषयत्वेन तदधिकारभूतं तीव्रतीव्रतरशक्तिनिपातद्वयमेव। **तदुक्तमागमे** –

शिवोऽनपेक्षिताचार्यो द्विधा शक्तिनिपातनात्।
स्वयमेवानुगृह्णाति विज्ञानप्रळयाकलान्।।
आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः।
भगवाननुगृह्णाति स एव सकलानपि।। इति।

## उपदेशप्रकारः

अत्र सकलसंज्ञकानामणूनामुपदेशप्रकार उच्यते। तस्य शक्तिनिपातस्य कार्यमपि विवेकज्ञानवैराग्यमोक्षेच्छाशिवभक्तभक्त्यादिकम्। तदुक्तम् –

येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ।।
भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासके विधौ।
बुद्धिरुत्पद्यते तस्माद्विवेकेनात्मवर्तिना।।
विवेकिनो विरक्तस्य जिज्ञासा चोपजायत। इति।

अन्यत्र –

देहपातस्तथा कंपः परमानन्दहर्षणे।
स्वेदो रोमाञ्च इत्येतच्छक्तिपातस्य लक्षणम्।। इति।

**पौष्करेऽपि** –

तस्यां पतितमात्रायां मलस्याधो नियामिका।
शक्तिर्निवर्तते तस्यां निवृत्तायां महात्मनः।।
वैराग्यं जायते क्षिप्रं संसारात् दुःखसागरात्। इति।

एतच्च कार्यजातमुक्तकारणशक्तिनिपातचातुर्विध्येन मन्दमन्दतरतीव्रतीव्रतरभेदेन स्वयमपि न्यायतश्चतुर्विधम्। तच्च कार्यजातं तच्चातुर्विध्यञ्चापरीक्ष्यकरणे दोषश्रवणात्। परीक्षापूर्वकं ज्ञात्वा तेन शिष्ये शक्तिनिपातं तत्तत्तारतम्यञ्चाधिकारमनुमिनोति। तदुक्तं **पौष्करे** –

एतैर्लक्षैरविच्छिन्नैश्शक्तिपातो महात्मभिः।
अनुमेयो न दीक्षैषा शक्तिपातापवित्रितैः।।
अन्ये श्रुत्यादिसंसिद्धाः शिवधर्माश्च देशिकैः।
शिष्याणां शक्तिपातार्थं परीक्षाश्शिवशासने।
अभक्तमद्विजं क्रूरं निर्भयं वा क्रियाच्युतम्।।

दीक्षामदाज्ञाहन्त्येषा इत्याज्ञा पारमेश्वरि। इति।

तदनन्तरं यथाधिकारं दीक्षां करोति।।

## दीक्षालक्षणम्

दीक्षा चागमिकनित्याद्यधिकारमागमश्रवणाधिकारं वा निर्वर्तयितुं समर्थशिवव्यापार:। समयदीक्षा विशेषदीक्षा च शिवारामनिर्माणशिवार्चनादिरूपनित्याधिकारनिर्वर्तनसमर्थे। निर्वाणदीक्षा त्वागमश्रवणाधिकारनिर्वर्तनसमर्था। चातुर्वर्णिकत्वानुलोमत्वादीनामपि नित्याद्यधिकारनिर्वर्तनसामर्थ्यसद्भावात्तत्रातिव्याप्तिवारणाय शिवव्यापार इत्युक्तम्। सृष्ट्यादेरपि शिवव्यापारत्वात्तत्व्यावर्तनाय नित्याधिकारनिर्वर्तनसमर्थ इत्युक्तम्। न च निराधारदीक्षायाश्शिवव्यापारत्वेऽपि साधारदीक्षाया हौत्र्यादिरूपाया यजनहवनादिसाध्याया विशिष्टजीवकर्तृकत्वेन शिवव्यापारत्वाभावादव्याप्ति:। अभिव्यक्तशिवस्यैव गुरुत्वसमर्थनेन तत्रापि शिवव्यापारत्वस्य सद्भावेनास्मन्मते दोषाभावात्। एकदेशिनान्तु लक्षणे तत्राव्याप्तिरेव। तथाहि तैरेव लक्षणमुक्तम् – "पशुत्वक्षयकरीं शिवत्वव्यक्तिं नित्याद्यधिकारित्वं चाणोस्संपादयन्ति शिवव्यापारात्मिका शक्तिर्दीक्षा। शिवत्वव्यक्तिं संपादयन्ति शक्तिर्दीक्षेत्येतावत्यभिहिते समयविशेषदीक्षयोरव्याप्तिस्स्यात्। तन्निवृत्त्यर्थं नित्याद्यधिकारित्वं संपादयन्ति चेत्युक्तम्। न च भौतिकदीक्षायामव्याप्ति:। तत्रापि पशुत्वैकदेशक्षयस्य शिवत्वैकदेशप्राप्तेश्च सत्भावा"दिति।

तत्र हौत्र्यादिदीक्षायामव्याप्ति:। अत्रैकदेशिभिरुक्तं – हौत्र्यादिदीक्षायां नाव्याप्ति:। यजनहवनादेर्देशिकव्यापारस्यापीश्वरव्यापाररूपत्वात्। यतो देशिकरूपेणानुग्राहक: स्रोतो विच्छेदनिवृत्त्यर्थं शिव एव साधिकरणो वर्तते। तथा च शिवाम्नाय: –

कुम्भस्थ: कर्करीस्थश्च कुण्डस्थस्स्थण्डिले स्थित:।
तथा देशिकमूर्तिस्थ: शिष्यस्थ: पाशमोचक:।। इति।

तन्न। गुरुव्यापाररूपाया दीक्षायास्तदीयव्यापारान्तरवदीश्वरपारतन्त्र्यमात्रसद्भावेऽपीश्वर- व्यापारत्वस्य त्वन्मतेऽभावात्। मन्मते तु तदीयव्यापारान्तरमपीश्वरव्यापार एव। अत एव तद्व्यापारस्य न धर्माधर्मजनकत्वमिति वक्ष्यते। तत् व्यापारस्येश्वरव्यापारत्वोपचारे तु लक्षणस्याव्याप्तिर्दृढैव।।

## दीक्षाविभाग:

दीक्षा च प्रथमं द्विविधा। हौत्री अहौत्री च। होमसंयुक्ता हौत्री अहौत्री तद्रहिता। उभयविधा- ऽपि त्रिविधा केवलसमयदीक्षा विशेषदीक्षा निर्वाणदीक्षा चेति। यस्यां पाशच्छेदादिकं नास्ति रुद्रपदयोगश्च सा केवलसमयदीक्षा। विशेषदीक्षा तु सैवेश्वरपदे नियोजनयुता। निर्वाणदीक्षा तु सा यस्यां पाशच्छेदादिकं परतत्त्वे योजनञ्च। उक्तञ्च **सुप्रभेदे** –

'यत्र रुद्रपदे योगो यत्रेश्वरपदे पदे।
शिखाच्छेदो न यत्रास्ति सा दीक्षा सामयी द्विधा।।
यत्र पाशशिखाच्छेदो योगश्शिवपदे भवेत्।

निर्वाणदीक्षाख्या सा तु' इति।।

अत्र पाशच्छेदरहितत्वेन लक्षणेन विशेषदीक्षाया अपि समयदीक्षात्वं रुद्रेश्वर-पदयोजनादिभेदेनान्तराळिकभेदञ्च मत्वा सामयी द्विधेति विशेषदीक्षाया अपि समयदीक्षात्वतत्भेदनिर्देशः। एवमन्यत्रापि द्रष्टव्यम्। तत्र निरुक्ता च केवलसमयदीक्षा विशेषदीक्षा च केवलं स्वतन्त्रा प्रधानभूता। रुद्रेश्वरपदयोजनया स्वतन्त्रतत्पदप्राप्तिरूपफलसाधनत्वात्। निर्वाणदीक्षार्थे च समयविशेषदीक्षे उत्तरत्र वक्ष्येते। तत्राद्या प्रतिलोमादिसर्वाधिकारा। तदुक्तम् – "समयेन विचारये"दिति। तत्र यस्य मन्दतरशक्तिनिपातस्तस्योक्ताधिकारं मन्दतरभक्त्यादिचिह्नेन ज्ञात्वा तदधि-कारोचितां केवलसमयदीक्षां कृत्वा रुद्रपदे च संयोज्य तदुचितं तस्यावश्यकर्तव्यं शिवालयतद्भक्तपरिचरणादिकं धर्मं शिक्षयित्वाऽनुगृह्णाति। अयमेव च समयदीक्षा संस्कृतस्समयीत्युच्यते। द्वितीया विशेषदीक्षा पूर्वोक्ताधिकारैव। सा च योगायोगभेदेन द्विधा भिन्ना। आगमाध्ययनार्थज्ञानानुष्ठानलिङ्गपीठार्चनयोगयोग्यतापादनादिद्वारेण केवललिङ्गपीठार्चनादियोग्यतापादनादिद्वारेण वा ईश्वरपदयोजनात्तत्प्राप्तिसाधनीभूता। तदुक्तम् –

इत्थं समयदीक्षायां भवेद्योग्यश्शिवार्चनः। इति,

एवं समयदीक्षायां विशिष्टायां विशेषतः।

वह्निहोमागमज्ञाने योग्यस्सञ्जायते शिशुः।। इति च।

तथा चानुपनीतानां वेदाध्ययन इव शिवदीक्षारहितस्य शैवागमाध्ययने शैवेन विधिना लिङ्गपीठार्चने च नाधिकारः, अध्ययने दोषश्च। तदुक्तं **सुप्रभेदे** –

शुद्धशैवमिदं तन्त्रं न देयं न प्रकाशयेत्। इति।।
दीक्षितस्य च धीरस्य शिवभक्तिपरस्य च।
श्रावणीयं नचान्यत्र कथनं हि प्रशस्यतः।। इति।

एवञ्च यस्य मन्दशक्तिनिपातस्तस्योक्ताधिकारं मन्दभक्त्यादिचिह्नेन ज्ञात्वा तदधि-कारोचितामुक्तविशेषदीक्षां सामान्यदीक्षापुरस्सरं कृत्वा तद्धर्मभूतं निगमागमाध्ययनादिपुरस्सरं तदपुरस्सरं वा लिङ्गपीठादौ साक्षात् शिवार्चनं योगं वा यथाधिकारं शिक्षयित्वाऽनुगृह्णाति। अयमेव पुत्रक इत्युच्यते। उभावप्येतौ समयिपुत्रकौ यावज्जीवमुक्तस्वधर्मानुष्ठानाद्यथायोजनं रुद्रेश्वरपदप्राप्त्यनन्तरं जन्मान्तरादिषु निर्वाणदीक्षां लब्ध्वा मुक्तौ भविष्यतः। एतच्च द्वादशसूत्रादौ वक्ष्यते। इयञ्च दीक्षाद्वयी नित्यमात्राधिकारत्वान्निरधिकारेत्युच्यते। यस्य तु तीव्रस्तीव्रतरो वा शक्तिनिपातस्तस्योक्ताधिकारं वक्ष्यमाणरीत्या ज्ञात्वा करिष्यमाणनिर्वाणदीक्षार्थमप्रधान-भूते साधिकारे समयविशेषदीक्षे कृत्वा पश्चादस्याधीतागमस्यानुष्ठितशिवपूजादितदर्थस्य तन्त्रोपदेशकलयाऽऽपातप्रतिपन्ननित्यानित्यवस्तुविवेकादेस्तीव्रेषु तीव्रतरेषु च भक्त्यादिषु मुमुक्षा वैराग्यविविदिषादिषु तैर्यथाक्रमं तीव्रं तीव्रतरं च शक्तिनिपातमनुमाय यथाधिकारं निर्वाणदीक्षामागमार्थविचाररूपतन्त्रकलाभूतां करोति। निर्वाणदीक्षा च चाक्षुष्यादिभेदेन सप्तविधा। तदुक्तम् –

चाक्षुषी स्पार्शनी दीक्षा वाचिकी मानसी तथा।
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा।। इति।

चाक्षुष्यादयश्च गुरूणां तारतम्यानुसारेणेति ज्ञेयम्। एवं ज्ञानवत्यादयोऽपि द्रष्टव्याः। चाक्षुष्यादीनाञ्च स्वरूपम् –

चक्षुरुन्मील्य यत्तत्वं ध्यात्वा शिष्यस्समीक्ष्यते।
पाशबन्धविमोक्षाय दीक्षेयञ्चाक्षुषी भवेत्।।
निधाय दक्षिणे हस्ते शिवं ब्रह्माङ्गसंयुतम्।
संस्पृशेच्छिष्यमूर्धादिस्पर्शदीक्षा भवेदियम्।।
तत्त्वे चित्तं समास्थाय बृम्हितान्तरतेजसः।
उच्चरेत्संहितामन्त्रान्वाक् दीक्षेयं प्रकार्तिता।।
मानसं विधिमाश्रित्य मानसीत्यभिधीयते।
शास्त्रस्य संप्रदानेन शास्त्रदीक्षा समीरिता।।
योगेन योगदीक्षास्याच्छिवत्वे सा व्यवस्थिता।
रजः कुण्डवती हौत्रीत्यादिना प्रदर्शितम्।

हौत्र्यपि द्विविधा। ज्ञानवती क्रियावती चेति। तयोरपि स्वरूपम् –

विनेज्यानलकर्मादिमनोव्यापारमात्रतः।
दीक्षा ज्ञानवती प्रोक्ता सम्यक्तत्त्वावबोधिका।।
इज्यानलवती या तु क्रियाकौशलसंभवा।
क्रियावत्यथ सानेकेत्यादिना प्रदर्शितम्।

क्रियावत्यपि द्विविधा। सद्योनिर्वाणदाऽसद्योनिर्वाणदा चेति। तत्र सद्योनिर्वाणदा यत्र प्रारब्धकर्मणोपि नाशः। यद्यपि "प्रारब्धं भोगतो नश्ये"दिति प्रारब्धस्य भोगेनैव नाशः प्रतिपादितस्तथाऽपि स तीव्रवेगप्रारब्धविषयः। तथाहि – प्रारब्धं तीव्रवेगमन्दसुप्तभेदेन चतुर्विधम्। तत्र तीव्रवेगयोर्भोगं विना न कथञ्चिदपि नाशः। मन्दसुप्तयोस्तु दीक्षया नाशः। अत्र च सद्योनिर्वाणदीक्षाविधायकवचनमेव मानम्। तत्रापि मन्दस्य दीक्षायां संयोजनसञ्जननपूर्वकं भोगभोजनेन विनाशः। सुप्तस्य भोगभोजनं विनैवेति विवेकः। एवञ्च यत्रात्यन्तसमर्थेन गुरुणा शिष्यगतं तीव्रतरं शक्तिनिपातं तादृशं मलपाकं सुप्तञ्च प्रारब्धं ज्ञात्वा प्रारब्धस्यापि विनाशाय दीक्षा क्रियते, सा सद्योनिर्वाणदा दीक्षा। द्वितीयाऽपि द्विविधा – देहपातमात्रेण निर्वाणदा कालान्तरनिर्वाणदा चेति। तत्राद्या शिवधर्मिणी। द्वितीया लोकधर्मिणी। तत्र शिवधर्मिण्या लक्षणम् –

धर्माधर्मात्मकं कर्म प्रविभागं[32] विचित्रकम्।
सञ्चिन्त्य शोध्यते यत्र सैवोक्ता शिवधर्मिणि।।

इति कथितम्। इयमेव च नैष्ठिकीत्यपि गीयते। इयञ्च शिवधर्मिणी तीव्रतरं शक्तिनिपातं तादृशञ्च मलपाकं तीव्रप्रारब्धञ्च शिष्यगतं ज्ञात्वा गुरुणा कर्तव्या। लोकधर्मिण्यास्तु लक्षणम् –

[32] (पा) प्रागागामि

धर्ममात्रे तु संशुद्धे द्वितीया लोकधर्मिणि।

इति प्रदर्शितम्। इयमेव भौतिकीत्यपि कथ्यते। इयञ्च लोकधर्मिणी शिष्यगतं तीव्रशक्तिनिपातं तादृशञ्च मलपाकं ज्ञात्वा कर्तव्या। उभे अप्येते सबीजनिर्बीजभेदेन द्विविधे। तत्र समयाचारेण संयुक्ता सबीजा। असमर्थानां समयाचारशोधनेन तद्रहिता निर्बीजा। तदुक्तम् –

समयाचारसंयुक्ता सबीजा जायते नृणाम्।
निर्बीजा त्वसमर्थानां समयाचारवर्जिता।। इति।।

## अध्वा

दीक्षायाञ्च षडध्वशुद्धिः कार्येत्यध्वा निरूप्यते। तत्र कलातत्त्वभुवनवर्णपदमन्त्रा अध्वानः। एतेषाञ्चाध्वव्यपदेशबीजम् –

त्यक्त्वैकमेकं संप्राप्य कलादिष्वजरामरम्।
पदमासाद्यते पुंभिरतोऽध्वानः कलादयः।।

इति **रत्नत्रये** निरूपितम्। तत्र कलानिवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीताख्याः पञ्चविधाः। तत्र निवृत्त्यादीनां प्रवृत्तिनिमित्तम् –

तत्प्रलीनाणुसंघस्य संकल्पो विनिवर्तते।
अनासाद्य फलं तेन निवृत्तिरभिधीयते।।
तत्प्रलीनाणुसंघस्य संकल्पोऽर्थप्रसिद्धये।
प्रतिष्ठितो यतस्तेन प्रतिष्ठा नाम सा कला।।
तत्प्रलीनाणुसंघस्य संकल्पोऽशेषगोचरः।
सर्वार्थद्योतको येन तेन विद्येति गीयते।।
तत्प्रलीनाणुसंघस्य द्वेषरागाद्यभावतः।
संकल्पस्य प्रशान्तत्वाच्छान्तरेषा निगद्यते।।

इत्यादिना **रत्नत्रये**ऽभिहितम्। शान्त्यातीतापदप्रवृत्तिनिमित्तन्तु शान्तिमतिक्रम्य वर्तनात्मकं स्फुटत्वान्नोक्तम्। आसाञ्च स्वरूपं तत्त्वादिनिरूपणसापेक्षत्वादुपरिष्टादभिधास्यते। तत्त्वं तु षट्त्रिंशद्विधं द्वितीयसूत्रे निरूपितम्। भुवनानि पृथिव्यामष्टोत्तरशतम्। तथाहि – शतकोटिविस्तारो ब्रह्माण्डकटाहः। तत्राधः कटाहपरिणाहः कोटिपरिमितः। तदुपरि कल्पान्तार्ककोटिसमतेजसस्तथाविधानेकरुद्रपरिवृतस्य सर्वसंहारकर्तुः कालाग्नेस्सौवर्णगृहं कोटिपरिमितम्। तस्यैव कालाग्नेरूर्ध्वप्रवृत्ता ज्वालादशकोटिमिता:[33]। तदीयो धूमः पञ्च-कोटिमितः। तदुक्तम् –

कपालमर्बुदमस्थौल्यात्ब्रह्मणोऽण्डस्य योजनैः।
तस्यान्तः काञ्चनं धामकालाग्नेस्तावदेहि।।
यत्रान्तकालतीक्ष्णांशुकोटितेजास्तथाविधैः।
रुद्रैराप्तैर्वृतो देवः कालाग्निरिति विश्रुतः।।

---

[33] (पा) परिमितः

सर्वाध्ववर्तिभूतानां यस्मिन्नुद्वृत्ततेजसि।
भयमुत्पद्यते शक्त्या संहर्त्र्या चोदिते प्रभो:।।
तस्य स्वभावतो ज्वाला: प्रवृत्ता दशकोटय:।
योजनानां तदर्धेन धूमस्सान्द्रस्सुदारुण:।। इति।।

## नरकनिरूपणम्

तदूर्ध्वं नरकविस्ताररूपास्त्रयस्त्रिंशत्पुटा: प्रत्येकं नवतिलक्षप्रमाणा:। तेषामन्तराळानि द्वात्रिंशत्प्रत्येकं लक्षपरिमितानि। एतानि च पापीयसां यातनार्थमनन्तेशेन सृष्टानि नरक-महानरक-नरकराजनरकराजेश्वरभेदेन चतुर्विधानि। तत्र रौरवध्वान्तशीतोष्ण-सन्तापाब्जमहाम्बु[34]कालसूत्रसंज्ञान्याद्यानि। सूच्यास्य तालखड्गक्षुरधारा-अम्बरीष-तप्ताङ्गारमहादाहसन्तापाख्यानि द्वितीयानि। लाक्षाप्रलेप-मांसाद-निरुच्छवास-नसोच्छवास-युग्मार्द्र-शल्मली- लोहप्रदीप्त-क्षुत्पिपासक-क्रमिनिचयरूपाणि तृतीयानि। लोहस्तम्ब-विण्मूत्र-वैतरणी- तामिस्रान्ध-तामिस्र-कुम्भीपाक-महारौरवा-वीच्यभिदानानि चतुर्थानि। तदुक्तम् –

ततः पुटास्त्रयस्त्रिंशद्दशलक्षो न कोटिका:।
तदन्तराणि द्वात्रिंशल्लाक्षिकानि दुरात्मनाम्।।
स्थानानि यातनाहेतोर्निर्मितान्यध्ववेधसा।
तानि ते नामभिर्वक्ष्ये द्विजमुख्यनिबोध मे।।
रौरवध्वान्तशीतोष्णसन्तापाब्जमहाम्बुजा:।
काल[35]सूत्राष्टमाह्येते नरका इति विश्रुता:।।
सूच्यास्य तारखड्गाख्यक्षुरधाराम्बरीषका:।
तप्ताङ्गारमहादाहसन्तापाश्चेति ये मुने।।
भवन्त्यष्टौ सुबीभत्सा महाशब्दपदानुगा:।
लाक्षाप्रलेपमांसाद निरुच्छवास न सोच्छवासा:।।
युग्मार्द्रशाल्मलीलोहप्रदीप्तक्षुत्पिपासका:।
क्रमीणां निचयश्चेति राजान: परिकीर्तिता:।।
लोहस्तम्बोऽथ विण्मूत्रस्तथा वैतरणीनदी।
तामिस्रश्चान्धतामिस्र: कुम्भीपाकस्सरौरव:।।
महापदानुगा वीची राजराजेश्वरेश्वरा:। इति।

आहत्य सान्तराळानां पुटानां त्रिंशत्कोटयो लक्षद्वयञ्च प्रमाणम्। तदुक्तम् –

एषां पुटानान्नरकैस्सार्धं योजनसंख्यया।
भवन्ति कोटयस्त्रिंशत् द्वे च लक्षे द्विजोत्तमा।। इति।
तदूर्ध्वं त्रिंशत्सहस्रयोजनो निरालम्बप्रदेश:।

---

[34] (पा) महाम्बुज

[35] (पा) कल

तदुपरि च नवलक्षप्रमाणा उपरितनार्धेन काञ्चनी अधस्तनार्धेनायो मृण्मयी भूमिः। तस्या अधस्तने पुटे प्रळयसूर्यसंकाशः परशुहस्तो भीषणस्तथाविधैर्बहुभिः परिवृतः कूष्माण्डाख्यो द्वात्रिंशन्निरयाधिपतिरास्ते। तदुक्तम् –

त्रयस्त्रिंशत्सहस्राणि त्यक्त्वा भूर्नवलक्षकी।
भवत्ययोमय्यर्धेन पूर्वेणार्धेन काञ्चनी॥
योऽप्यधस्तात्पुटस्तस्य मृदर्धञ्चार्धमायसम्।
तत्र द्वात्रिंशतोऽमीषां निरयाणां पतिस्स्थितः॥
कूष्माण्ड इति विख्यातः प्रळयार्कानलद्युतिः।
कराळवदनः क्रुद्धो वृत्तकोटरलोचनः॥
अङ्कपाणिस्तथा भूतैर्भूतैर्भूयोभिरावृतः। इति।

तदुपरि सप्तपाताळानि सप्तभूमयश्च। तत्राद्यानि षट्पाताळानि प्रत्येकं नवसहस्रपरिमितानि। आद्याश्च षड्भूमयः प्रत्येकं सहस्रप्रमाणाः। सप्तमं पाताळं दशसहस्रमितम्। सप्तमी च भूरष्टाशीतिलक्षाधिकद्विकोटिमिता। तत्राद्ये आभासाख्ये पाताळे शङ्कुश्रुतिकुटिलविकटाख्या दैत्येन्द्रनागराक्षसाः स्थिताः। परतालाख्ये द्वितीये प्रह्लादवासुकिलोहिताक्षाख्याः। नितलाख्ये तृतीये शिशुपालकम्बळयमाख्याः। गभस्तिमत्संज्ञे चतुर्थे च कर्कन्धुककार्कोटकविकटाननाख्याः। महातलाख्ये पञ्चमे हिरण्याक्षकालाङ्गकराळसंज्ञाः। रसाङ्काभिधाने षष्ठे बृहत्भोग–दुर्दर्शभीमनिर्ह्लादसंज्ञाः। पाताळाभिधे सप्तमे बलितक्षकपिङ्गळाख्याः। अस्मिंश्च पाताळे सहस्रयोजनपरिमिते सौवर्णे गृहे यक्षराक्षसदैत्यसुराङ्गनाभिर्लळितैः पदैरभिष्टुतो हाटकेशोऽवस्थितः। तदुक्तम् –

अयोरुक्मपुटादूर्ध्वमष्टमीयं वसुन्धरा।
साहस्रषट्परामध्याव्यर्कलक्षत्रिकोटिकी॥
वसवो[36] नवसाहस्रा परा दशसहस्रकी।
तदासां सप्तकं सद्भिः ख्यातं पाताळसप्तकम्॥
तन्नामतोऽधिपतित उच्यमानं निबोध मे।
आभासं परताळाख्यं नितलञ्च गभस्तिमत्॥
महातलरसांकञ्च पाताळं सप्तमं मुने।
सप्तस्वेतेषु दैत्यैन्द्रभुजङ्गक्षणदाचराः॥
पतयस्सप्त[37]संख्यातास्तानप्यथ[38] निबोध मे।
दैत्याश्शङ्कुश्रुतिः पूर्वे प्रह्लादश्शिशुपालकः॥
कर्कन्धुको हिरण्याक्षो बृहद्गर्भो बलिस्तथा।
काद्रवेयाः प्रवेको[39]ऽथ वासुकिः कम्बलस्तथा॥

---

36 (पा) वसत्यो
37 (पा) सप्त
38 (पा) समा
39 (पा) कुटिको

कार्कोटकोऽथ काळाङ्गो दुर्दर्शस्तक्षकस्तथा।
विकटो लोहिताक्षश्च यमाख्यो विकटाननः।।
कराळो भीमनिर्ह्लादः पिङ्गळश्चेति राक्षसाः।
तेषामुपरि निश्शेषाः पाताळाधिपतीश्वराः।।
साहस्रे काञ्चने धाममण्डले हाटकस्स्थितः।
यं स्तुवन्ति प्रीयप्राप्त्यै यतायतिविभूषणैः।।
दैत्यक्षसुराहीशललनालळितैः पदैः। इति।

अष्टाशीतिलक्षाधिकद्विकोटिपरिमितोच्छ्रायाभूमिस्तिर्यक् शतकोटिविस्तारा। तथाहि – तस्या भुवो लक्षयोजनमितेन क्षाराब्धिना परिवृतं तावत्प्रमाणं जम्बुद्वीपं नाभिस्थानीयम्। तस्य मध्ये तिरस्कृतार्ककिरणस्सिद्धसेवितः काञ्चनमयो मेरुरवस्थितः। स च पृथिव्यां षोडशसहस्राणि योजनानि प्रविष्टस्तदुपरि चतुरधिकाशीतिपरिमितोच्छ्रायो मूले षोडशसहस्रविस्तारश्शिरसि तद्वि-गुणविस्तारः। तस्या भुव उपरि पञ्चविंशतिसहस्रयोजनादूर्ध्वं त्रिसहस्रयोजनपरिमितोच्छ्राया दशसहस्रविस्तारा कटकाकारा नेमिर्विनिर्गता। तस्या अप्युपरि तावत्सहस्रयोजनादूर्ध्वं त्रिसहस्रयोजनपरिमितोच्छ्राया चतुर्दशसहस्रविस्तारा द्वितीया नेमिर्विनिर्गता। ततोऽप्यूर्ध्वं पञ्चविंशतिसहस्राणि त्यक्त्वा त्रिसहस्रोच्छ्रायाऽष्टादशसहस्रयोजनविस्तारा तृतीया चक्रवाळाख्या[40] नेमिर्विनिर्गता। तदुक्तम् –

जम्बूद्वीपं क्षितेर्नाभिस्तद्वृत्तं लक्षयोजनम्।
क्षाराब्धिना परिवृतं परिवृत्तेन तावता।।
तस्य मध्ये स्थितश्शैलराजराजो हिरण्मयः।
तिरस्कृतांशुमज्ज्योतिर्मेरुस्सुरनिवेषितः।।
स षोडशसहस्राणि क्षितौ विष्टोमहीतलात्।
तदूनमुन्नतो लक्षं मूले षोडशविस्तृतः।।
त्रिषु पादान्तरेष्वस्य चतुर्थेषु च पर्वसु।
नेमयः कटकाकारा निर्गता दीप्तिमत्तराः।।
एकादशसहस्रान्यामनुसाहस्रकी परा।
नेमिर्यामस्तकोपान्ते लोकपालसमाश्रया।।
चक्रवाटेति तामाहुस्सर्वारत्नप्रभावतीम्। इति।

तस्याञ्च प्राक्भागे नानाविधमाणिक्यकिरणोज्वला सौवर्णभूतला सिद्धसाध्यसेवितेन्द्रस्यामरावत्याख्या पुरी। तदुक्तम् –

नानारत्नप्रभाजालमण्डलालंकृता हरेः।
सिद्धसाध्यमरुज्जुष्टा रुक्मभूरमरावति।। इति।

पूर्वदक्षिणदिग्भागे रक्तपीतमणिप्रभाभासुरा सौवर्णप्राकारगोपुरोपशोभिता वह्नेस्तेजोवती नाम नगरी। तदुक्तम् –

---

[40] (पा) वाटाख्या

रक्तपीत[41]मणीप्रायहेमप्राकारगोपुरा।
वह्नेस्तेजोवती वह्नितुल्यभूतनिषेविता।। इति।

दक्षिणभागे लोहप्राकारपरिवेष्टिता कालपाशप्रेतव्याधिमारीप्रभृतिसेविता यमस्य संयमिनी संज्ञा पुरी। तदुक्तम् –

मृत्योस्संयमिनी तुङ्गलोहप्राकारमण्डला।
कालपाशपितृव्याधिप्रेतमारी निषेविता।। इति।

दक्षिणपश्चिमभागे इन्द्रनीलप्रभालंकृता निऋतेः कृष्णाभिधाना पुरी। तदुक्तम् –

कृष्णा दैत्यपदे मृत्योर्धामवद्दैत्यसेविता।
नीलरत्नप्रभाजालवितानवरभूषणा।। इति।

पश्चिमभागे स्फाटिकोपलविनिर्मिता शुभ्राभ्रनिलयोपशोभिता नक्रग्राहकूर्मादिसेविता वरुणस्य शुद्धवती नामधेया नगरी। तदुक्तम् –

शुद्धवत्यम्बुनाथस्य स्फटिकोपलनिर्मिता।
पाण्डराभ्रोपमैर्यादस्सेविता भाति धामभिः।। इति।

पश्चिमोत्तरभागे सितपीतध्वजमालाकुलाबलवद्भूतनिवहोपेता विचित्ररत्नप्रभासमलंकृता वायोर्गन्धवत्याह्वया पुरी। तदुक्तम् –

वायोर्गन्धवती तुङ्गश्वेतपीतध्वजाकुला।
बलवत्भूतसङ्घुष्टा सर्वरत्नविनिर्मिता।। इति।

उत्तरभागे मुक्ताचन्द्रकान्तादिविरचिता प्रालेयाद्रिप्रख्यैर्भवनैर्भूषिता सोमस्य महोदयाख्या नगरी। तदाप्युक्तम् –

महोदया चन्द्रमसश्श्वेतामुक्तादिनिर्मिता।
द्विजसंघवृता भाति पुरैर्हिमगिरिप्रभैः।। इति।

उत्तरपूर्वभागे सर्वरत्नभूषिता ललाटदृग्दग्धस्मरस्येशाननाथस्य यशोवत्यभिधाना पुरी। तदुक्तम् -

ज्वलल्ललाटदृग्दग्धस्मरस्येशस्य शोभिता।
पुरी यशोवती सर्वरत्नजा रुद्रसेविता।। इति।

एताश्चाष्टौ पुर्यो नवसहस्रविस्ताराः। तदुक्तम् –

इति सर्वर्तुसुखदाश्चक्रवाटार्धविस्तृताः।
पुर्योऽष्टावनिलोद्धूतपारिजातरजोरुणाः।।
वेधसा निर्मिता लोकपालचक्रानुवर्तिनाम्।
भूतये स्वर्ग इत्येता गीयन्ते कविभिः क्षितौ।। इति।

मध्ये च स्वप्रभाभिररुणीकृतवियन्मार्गा सुरमुनिगणोपसेव्यमाना ब्रह्मणो मनोवती नामधेया

[41] (पा) रत्नवज्र

पुरी। तदुक्तम् –

चतुर्दशसहस्राणि योजनानां स्वयंभुवः।
मध्ये मनोवती नाम पुरी लोकेशवन्दिता।।
या चकारारुणानुच्चैर्वियन्मार्गान्महाश्रिया।
सावित्र्या स्पर्धमानेव स्वर्गकामातिवर्तिनी।।
तस्यामुपासते देवा मुनयश्च महौजसः।
महायोगीश्वरं सिध्यै यमाद्यैर्भूतसेवितम्।। इति।

तस्याश्च मनोवत्या ईशानदिग्भागगते सुदीप्ते ज्योतिष्काख्ये मेरुश्रृङ्गे स्थितैर्ब्रह्माद्यैर्देवैरनेकसाहस्रै रुद्रैः स्कन्दनन्दिमहाकाळगणेशादिभिश्च परिवृत उमासहायः साक्षाद्भगवानवस्थितः। तदुक्तम् –

तदीशभागे तस्याद्रेश्श्रृङ्गमादित्यसन्निभम्।
यत्तत् ज्योतिष्कमित्याहुस्सदा पशुपतेः प्रियम्।।
तस्य सानुषु हैमेषु रत्नचित्रेषु संस्थिताः।
स्कन्दनन्दिमहाकाळगणेशादिगणावराः।।
मूर्ध्नि देवादिदेवस्य स्थानं त्रिपुरविद्विषः।
रुद्रायुतगणैर्जुष्टं ब्रह्माद्यैश्च सुरोत्तमैः।। इति।

एवं विधस्य सुमेरोर्दक्षिणदेशे नवसहस्रान्तरा निषधहेमकूटहिमाचला व्यवस्थिताः। उत्तरदेशे नीलश्वेतश्रृङ्गवदभिधाना गिरयः। एते षडपि सहस्रद्वयविस्तारा दशसहस्रोत्सेधाः पूर्वपश्चिमसमुद्रलग्नपर्यन्ताः। पूर्वदेशे योजनसहस्रविस्तारो दक्षिणोत्तरायतश्चतुस्त्रिंशत्सहस्रायामो नवसहस्रान्तरो माल्यवान्नाम महीधरोऽवस्थितः। पश्चिमदेशे उक्तरूपो गन्धमादनाख्यो गिरिरवस्थितः। तदुक्तम् –

इति मेरुधरोऽस्यान्यो दीक्षु ये भूधरा स्थिताः।
तच्छिष्टानि नवद्वीपवर्षाण्यस्मिन्निबोध मे।।
निषधो हेमकूटश्च हिमवांश्चाचलोत्तमः।
मेरोर्दक्षिणतो नीलश्श्वेतश्श्रृङ्गीति वामतः।।
सहस्रद्वयविष्कम्भा दशोत्सेधा नवान्तराः।
प्रागायतास्सुपर्वाणस्सागराहितकोटयः।।
तदर्धेनार्धविष्कम्भौ माल्यवत्गन्धमादनौ।
याम्योत्तरौ प्राक्प्रतीच्योर्मेरुतस्तावदन्तरौ।। इति।

माल्यवन्निषधगन्धमादननीलानामन्तराळभूमिरिळावृतं वर्षम्। माल्यवतः प्राच्यभूमिर्भद्राश्वाभिधं वर्षम्। गन्धमादनात्पश्चिमा भूमिः केतुमालाख्यं वर्षम्। निषधहेमकूटमध्यगता भूमिर्हरिवर्षम्। हेमकूटहिमाचलमध्यवर्तिनी भूमिः किं पुरुषवर्षम्। हिमाद्रेर्दक्षिणभूमिर्भारतवर्षम्। नीलश्वेतयोरन्तराळभूमिः रम्यकं वर्षम्। श्वेतश्रृङ्गवतोरन्तराळभूर्हिरण्यवर्षम्। नीलगिरेरुत्तरभूमिः कुरुवर्षम्। तदुक्तम् –

पश्चान्माल्यवतः प्राच्यां गन्धमादनशैलतः।
इळावृतं नीलगिरेर्याम्यतो निषधादुदक्।।
भद्राश्वं माल्यवत्प्राच्यां वर्षं भद्रजनाकुलम्।
सुकेतनं केतुमाल्यं प्रतीच्यां गन्धमादनात्।।
निषधाद्धरिवर्षं यत्याम्यतो हेमकूटतः।
नाम्ना किं पुरुषं ख्यातं भारतं हिमवत्गिरेः।।
रम्यकाख्यमुदङ्नीलाद्धिरण्यं श्वेतपर्वतात्।
यदुत्तरं श्रृङ्गवतः कुरुवर्षं तदुच्यते।। इति।

अस्यैव मेरोश्चतसृषु दिक्षु दार्ढ्याय सृष्टाः श्वेतपीतनीलारुणवर्णाः पञ्चाशत्सहस्रयोजनोच्छ्राया मन्दरगन्धमादनविपुलसुपार्श्वाख्या विष्कम्भाद्रयो व्यवस्थिताः।

तदुक्तं –

विष्कम्भशैलाश्चत्वारो मेरोस्स्थैर्याय वेदसा।
लक्षार्धोन्नतयः क्लृप्तास्तेषां पूर्वेण मन्दरः।।
श्वेतो हरिद्राचूर्णाभो याम्यतो गन्धमादनः।
प्रतीच्यां विपुलो नीलस्सुपार्श्वस्सौम्यतोऽरुणः।। इति।

तेषु च सहस्रयोजनोन्नतयः क्रमेण कदम्बजम्ब्वश्वत्थन्यग्रोधाः कल्पवृक्षास्समवस्थिताः। तेष्वपि प्रभावातिशयेन जम्बूद्वीपानां ध्वजोऽभूत्तेनैवेदं द्वीपं जम्बूद्वीपमिति व्यवह्रियते। अस्याश्च जम्ब्वाः फलरसैरुद्भूता स्वीयजलाप्लवपानादिना पक्षिसर्पशाखामृगगजादीनां सौवर्णरूपप्रदा नदी भूमिं कनकीकृत्य सुमेरुमूलमेव प्रविष्टा। तदुक्तम् –

सहस्रयोजनोच्छ्रायाः तेषु कल्पद्रुमास्स्थिताः।
कदम्बजम्ब्वावश्वत्थन्यग्रोधौ चोत्तरान्तिकाः।।
जम्बूफलरसोद्भूता मेरुं पर्येत्य निम्नगा।
विवेशमूलमेवास्य कनकीकृत्य तां महीम्।।
तां पीत्वा पक्षिसर्पाख्य मृगशाखामृगादयः।
बभूवुः काञ्चना ये च सत्वास्तस्यां कृताप्लवाः।।
द्वीपकेतुरभूज्जम्बूः कल्पशाखिषु सत्स्वपि।
प्रभावातिशयात्ख्यातं जम्बूद्वीपमिदं ततः।। इति।

तत्र मन्दराख्यस्य विष्कम्भशैलस्य मूले चैत्ररथाख्यमुपवनमरुणोदकाभिधानञ्च सरः। तदुक्तम् –

प्राच्यां विष्कम्भशैलस्य मूले चैत्ररथं वनम्।
सरोऽरुणोदकं नाम तत्र हेमाब्जमण्डितम्।। इति।

गन्धमादनस्य तु मूले नन्दनाख्यमुपवनम्। मानसाह्वयं सरः। तदुक्तम् –

याम्याद्रिमूले गन्धर्वसुरसिद्धाप्सरोवृतम्।

नन्दनं मानसं तत्र सरो मानसतस्करम्।। इति।

विपुलस्य मूले वैभ्राजाभिधानमुपवनं सितोदाख्यञ्च सरः। तदुक्तम् –

वैभ्राजं वैपुले मूले सितोदश्च ह्रदोत्तमः।
देवैर्निषेव्यते छन्नः कमलैरंशुमत्प्रभैः।। इति।

सुपार्श्वस्य मूले धृतिमन्नामकमुपवनम्। भद्रकाभिधानं सरः। तदुक्तम् –

सौपार्श्वे धृतिमन्नाम काननं भद्रको ह्रदः।
सौगन्धिकाम्बुजच्छन्नस्सेव्यते पितृभिस्सदा।। इति।

तत्रेळावृतवासिनो जना रम्यकान्तयो मेरुप्रकाशोपलब्धार्था जम्बूफलरसाशिनस्त्रयोदशसहस्रायुषः। तदुक्तम् –

त्रयोदशसहस्रायुर्जम्बूफलरसाशनः।
मेर्वालोकोपलब्धार्थो जनस्सुत्वगिळावृतः।। इति।

केतुमालनिवासिनस्तु नीलाब्जरुचयः पनससारभुजो दिव्यदेहा बलिनो दशसहस्रायुषः। तदुक्तम् –

वर्षायुतायुर्नीलाब्जद्युतिः पनससारभुक।
केतुमालजनो दिव्यदेहबन्धस्सुखी बलि।। इति।

भद्राश्ववासिनश्चन्द्रबिम्बकान्तयो नीलाब्जाशना भयशोकरहिता दशसहस्रवर्षायुषः। तदुक्तं –

चन्द्रबिम्बद्युतिर्नीलाब्जाशनो भद्रभाग्जनः।
दशवर्षसहस्रायुर्दुःखशोकभयोज्झितः।। इति।

कुरुवर्षनिवासिनो युग्मप्रसूतयः प्रियङ्गुकुसुमवत् गौरप्रायकान्तय इच्छाविनिर्मितवृक्ष-फलभोजिनस्त्रिंशत्सहस्रायुषः। तदुक्तम् –

त्रिंशदब्दसहस्रायुः कामवृक्षफलाशनः।
युग्मप्रसूतिः कुरुषु श्यामापुष्पद्युतिर्जनः।। इति।

अस्मिंश्च कुरुवर्षे वायव्योत्तरदिशोः क्षारोदधिसामीप्येन पञ्चचत्वारिंशत्सहस्रयोजनविस्तारौ चन्द्रभद्राकरद्वीपौ स्थितौ। तत्र चन्द्रद्वीपे चन्द्ररुचो जना भद्राकरद्वीपे रक्ताब्जरुजः उभयेऽपि फलमूलभोजनास्त्रयोदशसहस्रायुषः। तदुक्तम् –

भूतवेदसहस्रौ द्वावेक[42]दिक्सन्धिलक्षितौ।
सोमवाय्वीशयोस्सिद्धमुनिचरण[43]सेवितौ।।
चन्द्रभद्राकरौ द्वीपौ चन्द्ररक्ताब्जरुग्जनौ।
ऐळावृतं तयोरायुः फलं मूलञ्च भोजनम्।।
अन्तर्भावः कुरुष्वब्धौ सान्निध्यात् कीर्तितौ ततः।। इति।

---

[42] (पा) च वेद

[43] (पा) चारण

हिरण्यवद्वर्षनिवासिनश्शशाङ्कत्विषो लिकुचफलाशिनोऽर्धाधिकद्वादशसहस्रायुषः। तदुक्तम् –

अत्यर्धानि सहस्राणि द्वादशायुर्हिरण्यमत।
जनस्येन्दुत्विषो नित्यमश्नतो लिकुचं फलम्।। इति।

रम्यकवर्षवासिनो नीलोत्पलरुचो न्यग्रोधफलभुजो द्वादशवर्षसहस्रायुषः। तदुक्तम् –

नीलनीरजरम्यस्य रम्यके द्वादशस्थितेः।
जनस्याब्दसहस्राणि न्यग्रोधफलमश्नुत।। इति।

हरिवर्षे रजतधवळाङ्गानामिक्षुभोजनानां द्वादशसहस्रमायुः। तदुक्तम् –

रजतद्युतिदीप्ताङ्गस्तावदायुर्हरौ जनः। इति।

किं पुरुषे प्लक्षफलाशिनां सौवर्णवर्णानां दशसहस्रमायुः। तदुक्तम् –

रौक्मः किं पुरुषे प्लक्षभोजनोऽब्दायुतस्थितिः। इति।

एतेष्वष्टसु वर्षेषु स्थितानां कृतादियुगपरिवर्तनेऽपि नावस्थाभेदः। भारते तु वर्षे युगानुरूपप्रज्ञायुर्बलधनापत्या दुःखत्रयार्ताः कृष्टाकृष्टजातभोजिनो जनाः। एकस्त्वत्र महान्गुणः। यदत्र कर्माण्यार्ज्यन्ते। अन्यत्र तु फलभोगात्तेषां प्रक्षय एव। तदुक्तम् –

इति किं पुरुषादीनि वर्षाण्युक्तानि तानि ते।
न तेष्ववस्थाभेदोऽस्ति विवर्तिषु कृतादिषु।।
युगानुरूपप्रज्ञायुस्तेजोबलधनप्रजः।
कृष्टाकृष्टाशनो दुःखत्रयार्तो भारते जनः।।
गुण एको यदुद्युक्तो नेष्टं किञ्चिन्न साधयेत्।
सर्वासां फलभूमीनां कर्मभूः कारणं यतः।।
कर्मभूमिरियं ब्रह्मन्फलभूमिरतः परा।
इह यत्क्रियते कर्मतत्परत्रोपभुज्यतः।। इति।

अस्मिंश्च भारते वर्षे इन्द्रकशेरुताम्रपर्णगभस्तिमन्नागचान्द्रमसगान्धर्वारुणकुमारिकाख्या नवद्वीपाः। तदुक्तम् –

नवाब्धिस्रोतसि द्वीपाः नव चात्रार्धकस्थले।
इन्द्रद्वीपप्रभृतयो नामतस्तान्निबोध मे।।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान्।
नामद्वीपश्चान्द्रमसो गान्धर्वो वारुणस्तथा।।
कुमारिकाख्यो नवमो नानापर्वतनिम्नगाः।
नानाजातिजनाकीर्णा भारताख्ये प्रकीर्तिताः।। इति।

आग्नीद्ध्रनाम्नो मनुवंशजातस्य जम्बूद्वीपाधिपतेर्भरतादयो नवपुत्राः नवानां वर्षाणां भारतादिसंज्ञा हेतवः। तदुक्तम् –

आग्नीद्ध्रो नाम नृपतिर्जम्बूनाथो मनोः कुले।
तज्जातनृपसंज्ञाभिः कथ्यन्ते भारतादयः।। इति।

एवं क्षाराब्धिना परिवृतो जम्बूद्वीपः कथितः। क्षाराब्धिरपि लक्षद्वयविस्तारेण शाकद्वीपेन परिवृतः। अस्य च शाकाख्या हेतुरुन्नतशाखश्शाकाख्यो वृक्षः। तदुक्तम् –

शाके शाकद्रुमस्तुङ्गश्शाकसंज्ञानिबन्धनम्। इति।

शाकद्वीपोऽपि स्वप्रमाणेन क्षीरवर्द्धिना परिवृतः। सोऽपि चतुर्लक्षविस्तारेण कुशद्वीपेनावृतः। अस्य च कुशाभिधाने निमित्तं हिरण्यगर्भयजनकाले संभूतस्सौवर्णः कुशः। तदुक्तम् –

कुशोऽभूत्काञ्चनः कौशे स्वयंभुवि यियक्षति। इति।

कुशद्वीपोऽपि स्वप्रमाणेन दधिपयोधिना परिवृतः। सोऽप्यष्टलक्षविस्तारेण क्रौञ्चद्वीपेन समावृतः। अस्य च क्रौञ्चसंज्ञानिबन्धनं सौवर्णकन्दरे क्रौञ्चनाम्नी पर्वते शिखिवाहनेन निहतः क्रौञ्चाख्यो दैत्य उपलक्षणीभूतः। तदुक्तम् –

क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे।
स्कन्देन युध्वा सुचिरं चित्रमायी सुमायिना।।
स शैलस्तस्य दैत्यस्य ख्यातश्चित्रेण कर्मणा।
केतुतामगमत्तस्य नाम्ना क्रौञ्चं तदुच्यते।। इति।

क्रौञ्चद्वीपोऽपि स्वप्रमाणेन सर्पिस्समुद्रेणावृतः। सोऽपि षोडशलक्षविस्तारेण शाल्मलीद्वीपेन परिवृतः। अस्य च शाल्मल्याख्या हेतुस्सहस्रयोजनोन्नतस्सूर्यसप्रभश्शल्मलीवृक्षः। तदुक्तम् –

शाल्मले शाल्मलीवृक्षो हैमस्साहस्त्रिकोऽर्कभाः।
प्रियोऽमराणान्तत्केतुस्सतदाख्या निबन्धनम्।। इति।

शाल्मलीद्वीपोऽपि स्वप्रमाणेनेक्षुवारिधिना समावृतः। सोऽपि द्वात्रिंशल्लक्षविस्तारेण गोमेदद्वीपेन परिवृतः। अस्य च गोमेदाख्याने कारणं मनुवंश्यस्य गोपतिनाम्नो राज्ञो गोसवाख्ययज्ञकरणाय स्वयाजकेषू चत्थ्यवंश्येष्विन्द्रयज्ञार्थं गतेषु भृगून् गुरुत्वे वृतवतः समागतेन तद्वृत्तान्ताभिज्ञेनोचत्थ्यवंश्येनाग्नितेजसा गौतमेन शप्तस्य क्षयंगतस्य तत्क्रोधाग्निनैव निर्दग्धानां यज्ञवाटं गतानां गवां मेदसा मही समाच्छन्ना। तदुक्तम् –

गोमेदे गोपतिर्नाम राजाऽभूत्गोसवोद्यतः।
याज्योऽभूद्वह्निकल्पा नामौ चत्थ्यानां मनोः कुले।।
स तेषु हरियज्ञाय प्रवृत्तेषु भृगून् गुरून्।
वव्रेतं गौतमः कोपादशपत् सोऽगमत् क्षयम्।।
यज्ञावाटेऽस्य ता गावो दग्धाः कोपाग्निना मुनेः।
तन्मेदसा महीछन्ना गोमेदस्सततोऽभवत्।। इति।

गोमेदद्वीपोऽपि स्वप्रमाणेन सुरावारिधिना समावृतः। सोऽपि चतुष्षष्टिलक्षविस्तारेण पुष्करद्वीपेन परिवृतः। अस्य च पुष्कराख्या निबन्धनं हेमपद्मपुष्करिण्याख्या सरित्। तदुक्तम् –

नदी पुष्करिणी नाम हेमपुष्करमण्डिता।
तया स पुष्करद्वीपः ख्यापितस्सुरसेवितः।। इति।

पुष्करद्वीपोऽपि स्वप्रमाणेन स्वादूदकेन जलनिधिना समावृतः। शाकादिषु षट्स्वपि द्वीपेषु सर्वेष्वपि युगेषु समावस्थाः क्षीरादिभोजिनो दुःखरहिता दशवर्षसहस्रायुषो जनाः। तदुक्तम् –

यथा किं पुरुषाद्येषु कृतावस्थस्सदा जनः।
शाकद्वीपादिषु तथा क्षीरादिकृतभोजनः।।
हिमेन्दुहिमनीलाब्जसस्यकस्फटिकद्युतिः।
दशवर्षसहस्रायुर्नष्टदुःखैककण्टकः।। इति।

एवं जम्बूद्वीपमध्यादारभ्योत्तरभागे स्वादूदकसमुद्रपर्यन्तं निष्पन्ना योजनसंख्या कोटिद्वयं त्रिपञ्चाशल्लक्षाणि पञ्चाशत्सहस्राणि च। तदुक्तम् –

सप्तमादुदधेरर्वाक् द्वे कोटिसत्रिकन्दळम्।
पञ्चाशच्च सहस्राणि कण्ठाद्धेमाद्रिगर्भतः।। इति।

स्वादूदकसमुद्रोऽपि विविधमाणिक्यपरिष्कृतया सौवर्णया सुराणां विहाराय वेधसा विनिर्मितया दशकोटिविस्तारया भुवा परिवृतः। तदुक्तम् –

ततो हिरण्मयी भूमिर्नानारत्नद्रुमाचला[44]।
क्रीडार्थं वेधसा सृष्टा देवानां दशकोटिकी।।

सोऽपि दशसहस्रयोजनविस्तारेण तुङ्गश्रृङ्गालंकृतेन अतिविप्रकर्षाच्च चन्द्रातप-तुल्याभिरर्कान्तिभिरसन्तापितदेवविहारवेश्मनामन्तर्विद्यमानलोकतया बहिरविद्यमानलोकतया च लोकालोकपदव्यपदेश्येन गिरिणा समावृता। तदुक्तम् –

लोकालोको बहिस्तस्या लोकालोकनियामकः।
योजनायुतविष्कम्भस्तुङ्गश्रृङ्गपरिच्छदः।।
तस्य श्रृङ्गेषु तीक्ष्णांशोर्भासश्चन्द्रातपोपमाः।
न तापयन्ति वैकृष्ट्याद्धामान्या[45]शाभृतां मुदः।। इति।

लोकालोकोऽपि चत्वारिंशत्सहस्राधिकैकोनविंशतिलक्षसहितपञ्चत्रिंशत्कोटिविस्तारेण सूचिभेद्येन[46] तमसा समावृतः। तदुक्तम् –

तमः परस्तान्निबिडं लक्षाण्येकोनविंशतिः।
चत्वारिंशत्सहस्राणि पञ्चत्रिंशच्च कोटयः।। इति।

तदपि सप्तविंशतिलक्षाधिककोटिविस्तारेण गर्भोदाख्येन जलधिना परिवृतम्। तदुक्तम् –

सप्तविंशतिलक्षाणि कोटिश्चैका समुद्रराट्। इति।

सोऽपि कोटिविस्तारेणाण्डकटाहेन। तदुक्तम् –

हैमं कटाहकं कोटिर्गर्भोदात्तु समन्ततः। इति।

एवं जम्बूद्वीपमध्यमारभ्योत्तरेण पञ्चाशत्कोटिः। तथा दक्षिणेनापीति शतकोटिविस्तृताभूमिः।

---

44 (पा) द्रुमालया

45 (पा) सद्मानि

46 (पा) सूच्यभेद्येन

अस्याश्च भुव उपरिध्रुवप्रान्तो भुवर्लोकः पञ्चदशलक्षोच्छ्रायः। तदुक्तम् –

तिथिलक्षो भुवर्लोको ध्रुवप्रान्तो महीतलात्। इति।

तदूर्ध्वं पञ्चाशीतिलक्षोच्छ्रायस्स्वर्लोकः। तदुक्तम् –

तदूनकोटिस्स्वर्लोकस्स्वर्गवर्यसमाश्रयः। इति।

तदुपरि मरीच्यादिमुनिसमाश्रयो महर्लोको द्विकोटिपरिमितोत्सेधः। तदुक्तम् –

महोद्विकोटिर्यत्रास्ते मरीच्यादिमुनिव्रजः। इति।

तदूर्ध्वं पितॄणां जह्नुप्रभृतीनां मुनीनाञ्च निलयो जनलोकोऽष्टकोटिपरिमितोच्छ्रायः। तदुक्तम् –

जनोऽष्टकोट्यवच्छिन्नः पितृजह्नुजनाश्रयः। इति।

ततः परस्तात् ऋभुसनकसनन्दनसनत्कुमारसमाश्रयस्तपोलोको द्वादशकोटिपरिमितोत्सेधः। तदुक्तम् –

तपोर्ककोटिर्यत्रास्ते महायोगी सनन्दनः।<br>
ऋभुस्सनत्कुमारश्च सनकश्च महातपाः॥ इति।

तदूर्ध्वं मूर्तिमत्या सावित्र्या तथाविधैश्च वेदैः परिगतः पद्मासनसमाश्रयस्सत्यलोकष्षोडशकोटिपरिमितोच्छ्रायः। तदुक्तम् –

ततस्सत्यधियस्थानं सत्यलोकस्स्वयंभुवः।<br>
कामातिशयसंपन्नः कोटयो नवसप्त च॥<br>
सावित्री मूर्तिमत्यास्ते यत्र वेदाश्च सानुगाः। इति।

ततः परं विष्णोः स्थानं कोटिचतुष्टयमितोत्सेधम्। तदुपरि त्रिपुरान्तकस्य स्थानं षट्कोटिपरिमितोच्छ्रायं ततोण्डकटाहः कोटिपरिणाह इति ब्रह्माण्डपिण्डस्सर्वतः शतकोटिविस्तारः। तदुक्तम् –

ततश्चतस्रष्षट्चेति मधुत्रिपुरविद्विषोः।<br>
स्थाने ज्योतिष्मती चित्रे कोटिरण्डकटाहकः॥<br>
शतकोटिप्रविस्तीर्ण इति ब्रह्माण्डगोळकः।<br>
भूयसा तुल्य एवायं सर्वस्रोतस्सुमानतः॥ इति।

अस्य च ब्रह्माण्डस्यान्तः कालाग्निकूष्माण्डहाटकब्राह्मवैष्णवरौद्राख्यानि षट् भुवनानि। बहिस्तु प्राच्यां दिशि पालनाय स्थितस्य शक्रस्य,

कपालीशो जटो बुद्ध्नो वज्रदेहः प्रमर्दनः।<br>
विभूतिरव्ययश्शास्ता पिनाकी त्रिदशाधिपः॥

इत्येवं नामानो विचित्रायुधधरैरनेकाकारोदितसूर्यकान्तिभिरनुचरैर्वृता दशरुद्रा नियन्तारस्स्थिताः। तेषां भुवनान्यपि तन्नामानि। एवमुत्तरत्राप्यधिपतिनामान्येव भुवनानामपि नामानीति द्रष्टव्यम्। पूर्वदक्षिणायां दिशि तथाविधस्याग्नेः –

अग्निरुद्रो हुताशनः पिङ्गळः खादको हरः।
ज्वलनो दहनो बभ्रो[47] भस्मान्तकः क्षयान्तकः।।

इत्येवं नामधेयाः पूर्वोदितविशेषणविशिष्टा दशरुद्रा नियन्तारः। दक्षिणायां दिशि यमस्य – याम्यः, मृत्युः, हरः, धाता, विधाता, कर्ता, संयोक्ता, वियोक्ता, धर्मः, धर्मपतिरित्येवं संज्ञा दशरुद्रा नियन्तारः। दक्षिणपश्चिमायां दिशि निऋृतेः –

निऋृतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः।
ऊर्ध्वशेफः विरूपाक्षो दंष्ट्रीको धूम्रलोहितः[48]।।

इत्येवमभिधाना रुद्रा नियन्तारः। पश्चिमायां दिशि वरुणस्य – बलः, अतिबलः, पाशहस्तः, महाबलः, श्वेतः, जयभद्रः, दीर्घबाहुः, जलान्तकः, मेघनादः, सुनाद इत्येवमाह्वया दशरुद्राः नियन्तारः। पश्चिमोत्तरायां दिशि वायोः – शीघ्रः, लघुः, वायुवेगः, सूक्ष्मः, तीक्ष्णः, क्षयान्तकः, पञ्चान्तकः, पञ्चशिखः, कपर्दी, मेघवाहन इत्येवमभिधाना दशरुद्रा नियन्तारः। उत्तरस्यां दिशि सोमयक्षेशयोः – निधीशः, रूपवान्, धन्यः, सौम्यदेहः, जटाधरः, लक्ष्मीधरः, रत्नधरः, श्रीधरः, प्रसादः, प्रकामद इत्येवमाख्या दशरुद्रा नियन्तारः। उत्तरपूर्वायां दिशीशस्य – विद्याधिपः, ईशः, सर्वज्ञः, ज्ञानभुक्, वेदपारगः, सुरेशः, सर्वः, ज्येष्ठः, भूतपालः, बलिप्रिय इत्येवं नामानो नियन्तारः। अधोभागे हरेः – वृषः, वृषधरः, अनन्तः, क्रोधनः, मारुताशनः, ग्रसनः, उदुम्बरः, ईशः, फणीन्द्रः, वज्रदंष्ट्र इत्येवमभिधाना दशरुद्रा नियन्तारः। ऊर्ध्वभागे ब्रह्मणः – शम्भुः, विभुः, गणाध्यक्षः, त्र्यक्षः, त्रिदशः, ईश्वरः[49], संवाहः, विवाहः, नभोलिप्सुः, त्रिलोचन इत्येवं संज्ञा दशरुद्रा नियन्तारः। सर्वोर्ध्वे – वीरभद्रो भद्रकाळी च। इत्येवमष्टोत्तरशतानि पृथिव्यां भुवनानि। इदञ्च पार्थिवं तत्त्वं स्वापेक्षया दशगुणेनाऽऽप्यतत्त्वेन समावृतम्। एवं यावत्प्रधानं पूर्वपूर्वापेक्षया दशगुणानि तत्त्वानि। अस्मिंश्चाप्तत्वेऽमरेशः, प्रभासः, नैमिशः, पुष्करौषधिः, दण्डी, मुण्डी, भारभूमिः, लकुळीश्वरः इत्येवं नामानो गुह्यपदव्यपदेश्या अष्टौ रुद्राः स्थिताः। तेषां भुवनान्यपि तत्संज्ञानि। तेजस्तत्त्वे हरिश्चन्द्रः, श्रीशैलः, कल्पेश्वरः[50], आम्रातकेश्वरः, मध्यमेश्वरः, महाकाळः, केदारः, भैरव इत्येवमाख्या अतिगुह्यपदव्यपदेश्या अष्टौ रुद्राः स्थिताः। वायुतत्त्वे गयः, कुरुक्षेत्रः, नाखलः, नखलः, विमलेश्वरः, अट्टहासः, महेन्द्रः, भीमेश्वर इत्येवमाख्या गुह्यतरव्यपदेश्या अष्टौ रुद्राः स्थिताः। आकाशतत्त्वे च वस्त्रापदः, रुद्रकोटिः, अविमुक्तः, महालयः, गोकर्णः, भद्रकर्णः, स्वर्णाक्षः, स्थाणुरित्येवं संज्ञाः पवित्रपदव्यपदेश्या अष्टौ रुद्राः।

तन्मात्रेन्द्रियगर्भेऽहंकारतत्त्वे छगलण्डः, द्विरण्डः, माकोटः, मण्डलेश्वरः, काळाञ्जरः, शङ्कुकर्णः, स्थूलेश्वरः, स्थलेश्वर इत्येवमाह्वयास्स्थाणुपदव्यपदेश्या अष्टौ रुद्राः। बुद्धितत्त्वे पैशाचं, राक्षसं, याक्षं, गान्धर्वं, ऐन्द्रं, सौम्यं, प्राजेशं, ब्राह्मं इत्येवं नामानि

---

[47] (पा) बभ्रुः

[48] (पा) धूम्रो लोहितो दंष्ट्रिकः।
एतत् पाठं सम्यक् न भवति छन्दोभङ्गस्य कारणात्।

[49] (पा) त्रिदशेश्वरः

[50] (पा) जालेश्वरः

सूक्ष्मपदव्यपदेश्यान्यष्टौ भुवनानि। गुणप्रकृत्योः अकृतं, कृतं, भैरवं, ब्राह्मं, वैष्णवं, कौमारं, औमं, श्रैकण्ठमित्येवमभिधानानि भुवनान्यष्ट। एत दूर्ध्वमशुद्धमायान्तमुत्तरोत्तरं तत्त्वं शतगुणम्। तत्र पुरुषतत्त्वे वामः, भीमः, उग्रः, भवः, ईशानः, एकवीरः इत्येवमाख्याष्षड्रुद्रा अवस्थिताः। रागतत्त्वे प्रचण्डः, उमापतिः, अजः, अनन्तः, एकशिखः इत्येवमभिधाः पञ्चरुद्राः। नियतौ क्रोधः, चण्डः, संवर्तः, ज्योतिः, शूरः इत्येवं नामानः पञ्चरुद्रा व्यवस्थिताः। विद्यायां पञ्चान्तकः एकवीर इत्येवमभिधानौ द्वौ रुद्रौ। कलायां खेदः[51], महातेजाः इत्येवं द्वौ रुद्रौ। काले वामदेवः, भव इति द्वौ रुद्रौ। मायायां उद्भवः, एकपिङ्गळः, एकेक्षणः, ईशानः, अङ्गुष्ठमात्रः इत्येवं नामानः पञ्चरुद्राः। तदूर्ध्वं यावत्सदाशिवं तत्त्वमुत्तरोत्तरं सहस्रगुणम्। तत्र विद्यातत्त्वे वामा, ज्येष्ठा, रौद्री, काळी, कलविकरणी, बलविकरणी, बलप्रमथनी, सर्वभूतदमनी, मनोन्मनी इत्येवं नवभुवनानि। ईश्वरतत्त्वे अनन्तः, सूक्ष्मः, शिवोत्तमः, एकनेत्रः, एकरुद्रः, त्रिमूर्तिः, श्रीकण्ठः, शिखण्डि इत्येवमष्टौ भुवनानि। सदाशिवतत्त्वे सदाशिवाख्यमेकं भुवनम्। तदूर्ध्वमुत्तरोत्तरं लक्षगुणितम्। तत्र शक्तितत्त्वे निवृत्ति, प्रतिष्ठा, विद्या, शान्ति, शान्त्यतीताख्यानि पञ्चभुवनानि। शिवतत्त्वे इन्धिका, दीपिका, रोचिका, मोचिका, ऊर्ध्वगामिनी, व्यापिनि, व्योमरूपा, अनन्ता, अनाथा, अनाश्रिता इत्येवं दशभुवनानि। आहत्य चतुर्विंशत्यधिकद्विशतसंख्यानि भुवनानि। क्वचित्तु षट्त्रिंशदधिक–द्विशतसंख्यानि भुवनान्युक्तानि। तथाहि – बुध्यन्तेषु पूर्ववत्भुवनानि। गुणेऽपि अकृतादीन्यष्टौ पूर्ववदेव। तन्मस्तके तु वामादीनि त्रयोदशभुवनानि। तदुक्तं **श्रीमन्मृगेन्द्रे** –

वामदेवभवानन्तभीमोमापत्यजेश्वराः।
सर्वेशानेश्वरावेकवीरैकशिवसंज्ञितौ।।
उग्रः प्रचण्डधृक् चेशो गुणानां मूर्ध्नि संस्थिताः।
तपसा गुरुणोपास्य क्रोधादीन्गुरुतां गताः।।
स्वाधिकारविधौ तीक्ष्णा रुद्रास्सर्वार्थदृक्क्रियाः। इति।

तत्रैव प्रधानाधिपतीनां भुवनाष्टकम्। उक्तं हि **श्रीमन्मृगेन्द्रे** –

तेभ्यो दशगुणश्रीकान् प्रधानाधिपतीन् श्रृणु।
क्रोधेशश्चण्डसंवर्तज्योतिः पिङ्गळशूरगाः।।
पञ्चान्तकैकवीरौ च शिखेद इति ते स्मृताः।

प्रधाने पुरुषे च भुवनं नास्ति। सर्वेन्द्रियाख्यं भुवनं रागतत्त्वे। नियतौ नियन्तृसंज्ञं भुवनम्। काले कलनशक्तिमत्भुवनम्। रागविद्या गर्भकलातत्त्वे भुवनाष्टकम्।

तदुक्तं **श्रीमन्मृगेन्द्रे** –

सर्वेन्द्रियस्सर्वतनुः सर्वान्तःकरणाश्रयः।
पुरुषे नियतौ यन्ता काले कलनशक्तिमान्।।
भुवनेशमहादेववामदेवभवोद्भवा।
एकपिङ्गेक्षणेशानाङ्गुष्ठामात्राश्च भास्वराः।।

---

[51] (पा) शिखेदः

परमेशोपमा रागविद्यागर्भे कलापदः। इति।

अत्र पुरुषे इत्येतन्**मृगेन्द्र** एवान्यत्रोक्तार्थपरतया व्याख्यातम्। कलाया एव मस्तके मायाधिपतिभुवनाष्टकम्। उक्तञ्च **श्रीमन्मृगेन्द्रे** –

अनन्तस्त्रिकलो गोप्ता क्षेमीशो ब्रह्मणः पतिः।
ध्रुवतेजोधिपौ रुद्रो गहनेशश्च विश्वराट्।।
मायाधिकारिणो रुद्राः मण्डलाधिपतीश्वरा।। इति।

एवमशुद्धाध्वनि चतुरधिकशतद्वयसंख्यानि भुवनानि। शुद्धविद्यातत्त्वे सप्तकोटिमन्त्रेश्वरीणां भृगुणिप्रभृतीनां सप्तविद्याराज्ञीनां तावन्ति भुवनानि। तत्रैव विद्याधिपस्य भुवनम्।

उक्तं **श्रीमन्मृगेन्द्रे** –

भृगुणी ब्रह्मवेताळी स्थाणुमत्यम्बिका परा।
रूपिणी नन्दिनी ज्वाला सप्तसप्तार्बुदेश्वराः।।
विद्याराज्ञ्यस्समाख्याता विद्यायां रुद्रसंज्ञिताः।
तासामुपरि दीप्तश्रीर्देवो विद्याधिपस्स्थितः।। इति।

ईश्वरतत्त्वे पूर्ववदष्टौ भुवनानि। सदाशिवेऽप्येकम्। शक्तितत्त्वे निवृत्त्यादिभुवनचतुष्टयम्। शिवतत्त्वे शान्त्यतीताख्यं भुवनम्। तन्मस्तके इन्धिकाद्यनाश्रितान्तानि दशभुवनानि। एवं शुद्धाध्वनि द्वात्रिंशत्भुवनानि। अत्र च भुवनादिसंख्यासु कालाग्न्यादिभुवनोच्छ्रायेषु च संहितानां परस्परविरोधेऽपि कल्पभेदेन प्रामाण्यनिर्वाहः। दीक्षायां तु तत्तत्संहितानुसारिभिस्तत् तत्संहितोक्तक्रमेणैव शुध्यादिकं कार्यम्। वर्णाः पञ्चाशत्। पदान्येकाशीति। मन्त्रा द्वादश। निवृत्त्यादिकलानां व्याप्तिपञ्चाध्वगर्भतत्त्ववर्णाङ्काधिदेवताभिश्च स्वरूपं निरूप्यते। तत्र निवृत्तिकलायां तत्त्वमेकम्। सा च पृथिवी। अष्टाधिकशतं भुवनानि। तानि कपालीशादीनि भद्रकाळ्यन्तानि। एको वर्णः। स तु क्षकारः। अष्टाविंशतिः पदानि। तानि च **शैवसन्यासपद्धतावस्माभिः** प्रदर्शितानि। द्वौ मन्त्रौ। तौ च सद्योजातहृदयौ। वर्णः पीतः। मण्डलञ्चतुरश्रकम्। गन्धादयो विषयाः। ब्रह्मा कारणम्।

तदुक्तं **रत्नत्रये** –

निवृत्तौ पार्थिवं तत्त्वं पुराण्यष्टोत्तरं शतम्।
तेषां कालानलादीनामन्तरण्डस्य षड्बहिः।।
प्राच्यादिषु दशस्वेकमाशास्वेकैकशो दश।
रुद्राणां शतसंख्यानां वीरभद्रस्य चोपरि।।
भद्रकाळ्याश्च भुवने क्षकारोऽर्णेषु कीर्तितः।
एकाशीतिपदा देवी प्रतिसर्गपदक्रमात्।।
अष्टाविंशतिसंख्यैस्तु पदैरत्र प्रतिष्ठिता।
एकाशीतिपदा देवी व्योमव्याप्यादिलक्षणा।।
मन्त्रावजातहृदयौ तत्र सा तु पराकला।

भुवनादीनभिव्याप्य पञ्चपञ्चसु वर्तते।।
पीतैषा चतुरश्रा च कठिना वज्रलाञ्छिता।
ध्यातव्योद्यदनेकार्चिर्मांसळा हृदयाम्बुजे।।
ब्रह्माऽत्र कारणं मन्त्रस्सद्योजातोऽधिदेवता।

अन्यत्राप्युक्तम् –

पृथ्वी पीताक्षवर्णञ्च मन्त्रौ हृदयसद्यकौ।
नमो द्वयञ्च प्रणतिष्षडक्षरमतः परम्।।
अस्तुतास्तुत इत्येवं ततश्चानर्चितार्चिता।
ब्रह्मविष्ण्वादिकं पश्चात् सर्वसान्निध्यकादिकम्।।
सर्वभूतसुखादिञ्च भवोद्भवपदं तथा।
भवयुग्मं तथा शर्वयुग्मञ्च प्रथमद्वयम्।।
मुञ्चमुञ्चपदं योगाधिपतेश्च पदं भवेत्।
महातेजः पदं सत्भावेश्वरेति प्रकीर्तितम्।।
महादेवपदं पश्चात्पदान्यष्टौ च विंशतिः।
कालाग्निरथ कूष्माण्डं हाटकं ब्राह्मवैष्णवे।।
रौद्रञ्च भुवनान्यन्तर्ब्रह्माण्डस्य स्थितानि षट्।
कपालीशस्तेजो बुध्नो वज्रदेहः प्रमर्दनः।।
विभूतिरव्ययश्शास्ता पिनाकी त्रिदशाधिपः।
अग्निरुद्रो हुताशश्च पिङ्गळः खादको हरः।।
ज्वलनो दहनो बभ्रुर्भस्मान्तकः क्षयान्तकः।
याम्यो मृत्युर्हरो धाता विधाता कर्तृसंज्ञकः।।
संयोक्ता च वियोक्ता च धर्मो धर्मपतिस्तथा।
निरृतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः।।
ऊर्ध्वशेफो विरूपाक्षो धूम्रो लोहितदंष्ट्रिणौ।
बलश्चातिबलश्चैव पाशहस्तो महाबलः।।
श्वेतोऽथ जयभद्रश्च दीर्घबाहुर्जलान्तकः।
मेघनादस्सुनादश्च दशमः परिकीर्तितः।।
शीघ्रो लघुर्वायुवेगस्सूक्ष्मस्तीक्ष्णः क्षयान्तकः।
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः।।
निधीशो रूपवान् धन्यस्सौम्यदेहो जटाधरः।
लक्ष्मीधृग्रत्नधृक् श्रीधृक् प्रसादश्च प्रकामदः।।
विद्याधिपेशस्सर्वज्ञो ज्ञानभुग्वेदपारगः।
सुरेशशर्वौ[52] ज्येष्ठश्च भूतपालो बलिप्रियः।।
वृषो वृषधरोऽनन्तः क्रोधनो मारुताशनः।

---

[52] (पा) सुरेशसर्वौ

ग्रसनोदुम्बरीशश्च फणीन्द्रो वज्रदंष्ट्रिणौ।।
शम्भुर्विभुर्गणाध्यक्षस्त्र्यक्षश्च त्रिदशेश्वरः।
संवाहश्च विवाहश्च नभोलिप्सुस्त्रिलोचनः।।
वीरभद्रो भद्रकाळी सर्वोर्ध्वे भुवनत्रयम्[53]।
कपालीशादयः प्राच्यामग्निरुद्रादयोऽनले।।
याम्याद्या दक्षिणे भागे निऋत्याद्यास्तु नैऋते।
बलाद्या वारुणे भागे शीघ्राद्यावायुगोचरे।।
उत्तरे च निधीशाद्या ईशे विद्याधिपादयः।
वृषादयस्त्वधोभागे शम्भुमुख्या नभोगताः।।
भुवनानां शतञ्चाष्टाधिकमेवन्तु विन्यसेत्।
पार्थिवं मण्डलं  पीतं वज्राङ्कञ्चतुरश्रकम्।।
बीजे अकारलौ नाड्यौ द्वे इळापिङ्गळाह्वये।
प्राणापानावुभौ वायुघ्राणोपस्थौ तथेन्द्रिये।।
गन्धस्तु विषयः प्रोक्तो गन्धादिगुणपञ्चकम्।
स्थानं स्यात्पादहृत् ग्रन्थिरवस्था जाग्रदेव च।
शोध्यो[54] लकार एवात्र शोधको हृदयस्स्मृतः[55]।
अत्रैवान्तर्गता ज्ञेया योनयोऽपि चतुर्दश।।
प्रथमाष्षडदेवतानां अष्टान्या देवयोनयः।
मृगः पक्षी च पशवश्चतुर्थास्तु सरीसृपाः।।
स्थावरं पञ्चमं सर्वं योनिष्षष्ठी तु मानुषी।
पैशाचं राक्षसं याक्षं गान्धर्वञ्चैन्द्रमेव च।।
सौम्यं प्राजेश्वरं ब्राह्ममष्टमं परिकीर्तितम्।
अष्टानां पार्थिवं तत्त्वमधिकारास्पदं मतम्।।
लयस्तु प्रकृतेर्बुद्धौ भोगो ब्रह्मा च कारणम्।। इति।

## प्रतिष्ठाकलातत्त्वानि

प्रतिष्ठाकलायां तत्त्वानि त्रयोविंशतिः। तानि च जलादीनि प्रकृत्यन्तानि भुवनानि षट्पञ्चाशत्तत्त्वान्यमरेशादीनि श्रीकण्ठान्तानि। वर्णास्त्रयोविंशतिः। ते च प्रातिलोम्येन हादयष्टान्ताः। एकविंशतिः पदानि। द्वौ मन्त्रौ। तौ च शरो वामदेवौ। वर्णश्शुक्लः। मण्डलमर्धचन्द्राकारम्। विषया रसादयः। कारणं विष्णुः।

तदुक्तम् –

प्रतिष्ठायान्तु चत्वारि कलायामवनिं विना।
भूतानि पञ्चतन्मात्राः पञ्चकर्मेन्द्रियाणि च।।

---

53 (पा) भुवनद्वयम्

54 (पा) मोच्यो

55 (पा) शोधनो ज्ञमयस्स्मृतः

पञ्चबुद्धीन्द्रियाण्यासन् मनोहंकारबुद्धयः।
अव्यक्तमपि वर्णाश्च हादिटान्ता विलोमतः।।
त्रयोविंशतिराम्नाताष्षट्पञ्चाशत्पुराणि च।
जलतेजो नीलाकाशबुध्यव्यक्तेष्वहंकृतौ।।
अष्टावष्टौ पदान्येकविंशतिस्तत्र संख्यया।
शिरो वामश्च मन्त्रौ द्वौ विष्णुः कारणमुच्यते।।
सा तु शुक्लार्धचन्द्राभा नीलोत्पलदळांकिता।
ध्यातव्या गळपद्मान्तर्बहुळा लोकशालिनी।।
वामदेवो ह्यधिष्ठाता वाच्यमन्त्रात्मको मतः। इति।

अन्यत्राप्युक्तम् –

त्रयोविंशतितत्त्वानि तथाऽप्तेजो मरुद्वियत्।
गन्धरूपरसस्पर्शशब्दोपस्थाश्च पायु च।।
पादौ पाणी च वाङ् नासा जिह्वा चक्षुस्त्वचश्श्रुतिः।
मनोऽहंकारबुद्धी च प्रकृतिश्च ततः परम्।।
तत्त्वानि कथितान्येवं हादिटान्ता विलोमतः।
त्रयोविंशतिवर्णास्तु शिरो वामस्तथैव च।।
अमरेशः प्रभासश्च नैमिशः पुष्करौषधिः।
दण्डी मुण्डी तथा भारभूतिश्च लकुलीश्वरः।।
हरिश्चन्द्रश्च श्रीशैलो जलेशाम्रातकेश्वरौ।
मध्यमेशो महाकाळः केदारो भैरवस्तथा।।
गया चैव कुरुक्षेत्रं नाखलो नखलस्तथा।
विमलेशोऽट्टहासश्च महेन्द्रो भीमकेश्वरः।।
वस्त्रापदो रुद्रकोटिरविमुक्तो महालयः।
गोकर्णो भद्रकर्णश्च स्वर्णाक्षस्थाणुरित्यपि।।
छगलण्डो द्विरण्डश्च माकोटो मण्डलेश्वरः।
कालोञ्जरश्शङ्कुकर्णस्स्थूलेश्वरतलेश्वरौ।।
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च।
सौम्यञ्चैव तथा ज्ञेयं प्राजेशं ब्राह्ममेव च।।
अकृतञ्च कृतञ्चैव भैरवं ब्राह्मवैष्णवौ।
कौमारञ्च तथा चौमं श्रैकण्ठं परमं तथा।।
अमरेशादिचाप्तत्वे हरिश्चन्द्रादितेजसि।
गयादिवायुतत्त्वे च व्योम्नि वस्त्रापदादि च।।
छगलण्डाद्यहंकारे पैशाचाद्यं मतौ स्थितम्।
प्रकृतावकृताद्येवं षट्पञ्चाशत्पुराणि च।।
महेश्वराद्यरूप्यन्ताः पदानामेकविंशतिः।

महेश्वरपदञ्चाद्यं परमात्मा द्वितीयकम्।।
ततश्शर्वपदञ्चोक्तं शिवपदमतः परम्।
निधनोद्भवसंज्ञञ्च निधनाख्यं पदं तथा।।
अनिधनपदञ्चैव ओं स्वः पदमतः परम्।
ओं भुवः पदमन्यच्च ओं भूः पदमतः परम्।।
चतुर्धानि पदञ्चान्यत्तथा नानापदं तथा।
अनादेश्च पदं चान्यदभस्मेति पदं ततः।।
अधूमपदमन्यच्च अनग्नीति पदं ततः।
अरूपपदमन्यच्च ज्योतिर्ज्योतिस्तथैव च।।
तेजस्तेजः पदं प्रोक्तं प्रथमप्रथमेति च।
अरूपिन्पदयुग्मञ्च पदान्येकञ्च विंशतिः।।
विषयस्तु रसो ज्ञेयश्चत्वारस्तु गुणा मताः।
रसादिशब्दपर्यन्ताश्शुभ्रं वर्णमिति स्मृतम्।।
अर्धचन्द्रसमाकारं मण्डलं पङ्कजांकितम्।
शोधकश्च शिरोमन्त्रश्शोध्यो लान्तस्तथैव च।।
उवौ बीजे च नाड्यौ द्वे गान्धारी च सुषुम्नगा।
वायू समानो दानौ च रसना पायुरिन्द्रिये।।
स्वप्नावस्था च ह्वीं बीजं[56] कारणेशश्च केशवः। इति।।

## विद्याकलातत्त्वानि

विद्याकलायां तत्त्वानि सप्त। तानि च पुरुषादीनि मायान्तानि। भुवनानि सप्तविंशतिः। तानि च वामादीन्यङ्गुष्ठमात्रान्तानि। वर्णाश्च सप्त। ते च ञादयो घान्ताः। विंशतिः पदानि। द्वौ मन्त्रौ। तौ च शिखाघोरौ। वर्णश्शोणः। मण्डलं त्रिकोणम्। विषया रूपादयः। कारणं रुद्रः। तदुक्तम् –

विद्यायां सप्तपुरुषो रागो नियतिसंयुतः।
विद्या कला च कालश्च मायातत्त्वानि तत्र तु।।
वामादिभुवनानाञ्च विज्ञेयास्सप्तविंशतिः।
ञादयोऽत्र घकारान्ता वर्णास्सप्तविलोमतः।।
पदानि विंशतिर्मन्त्रौ शिखाघोरौ व्यवस्थितौ।
रुद्रोऽत्र कारणं मन्त्रो बहुरूपो[57]ऽधिदेवता।।
सा तु स्फुरदनेकार्च्चिर्स्त्रिकोणा स्वस्तिकाङ्किता।
ध्यातव्या तालुपद्मान्ते नीलाञ्जनसमद्युतिः।।

---

56 (पा) लं बीजं
(पा) वं बीजं

57 (पा) विश्वरूपो

इति। अन्यत्राप्युक्तम् –

कलया विद्यया व्याप्तः पुरुषश्चादिमो भवेत्।
रागो नियतिविद्ये च कला कालश्च मोहिनी।।
ञकारादिघकारान्ता वर्णास्सप्तविलोमतः।
पदानि विंशतिर्व्यापिन् व्यापिन्निति पदं भवेत्।।
व्योमिन् व्योमिन् पदं पश्चात् ईप्सितस्स्यादचेतनः।
परमेश्वरपरायेति पदञ्चेति पुनर्भवेत्।।
ज्योतीरूपाय संज्ञञ्च सर्वे योगाद्यमेव च।
पदं चानिधनायेति पदं गोप्त्रे प्रकीर्तितम्।।
गुह्यातिगुह्याय पदं पदं स्यादोन्नमोनमः।
पदं ब्रह्माणि पञ्चात्र सद्यादीनि क्रमेण च।।
शिवायेति पदं सर्वप्रभावेति[58] पदं पुनः।
शिवायेति पदं पश्चात् ओन्नमश्च पदं भवेत्।।
ध्यानाहाराय संज्ञं च कीर्तितानि पदानि च।
वामो भीमस्तथोग्रश्च भवेशानैकवीरकाः।।
प्रचण्डोमापतिश्चाजोऽनन्तैकशिव एव च।
क्रोधेशश्चण्डसंवर्तौ ज्योतिश्शूलेश्वरस्तथा।।
पञ्चान्तकैकवीरौ च शिखेदश्च महाद्युतिः।
वामदेवो भवश्चैव उद्भवोऽप्येकपिङ्गळः।।
एके क्षणस्तथेशानस्तथैवाङ्गुष्ठमात्रकः।
षट्पञ्चपञ्चकञ्चैव युग्मयुग्मद्वयं तथा।।
पञ्चकं पुरुषादौ तु मायान्ते तु पुराणि हि।
रूपन्तु विषयः प्रोक्तो गुणारूपादयस्त्रयः।।
वर्णं तु शोणवर्णं स्यात् त्रिकोणं मण्डलं भवेत्।
मरौ बीजे तथा नाड्यौ पूषा स्याद्धस्तिजिह्विका।।
व्याननागौ तथा वायु इन्द्रिये पाणिचक्षुषी।
अवस्थाऽत्र सुषुप्तिस्स्याद्रुद्रो देवस्तु कारणम्।। इति।।

## शान्तिकलातत्त्वानि

शान्तिकलायां तत्त्वानि त्रीणि। तानि विद्यादीनि सदाशिवान्तानि। भुवनान्यष्टादश। तानि वामादीनि सदाशिवान्तानि। वर्णास्त्रयः। ते च गादयः कान्ताः। पदान्येकादश। मन्त्रौ द्वौ। तौ च तत्पुरुषकवचौ। कृष्णो वर्णः। मण्डलं षट्कोणम्। विषयाः स्पर्शादयः। कारणमीश्वरः। तदुक्तम् –

शान्तौ तु त्रीणि तत्त्वानि दशाष्टौ भुवनानि च।

[58] (पा) प्रभवेति

कथितान्यत्र वर्णास्तुगादिकान्तास्त्रयो मताः।।
पदान्येकादशा त्रासन्मन्त्रौ वक्तृतनुच्छदौ।
भुवनादीनभिव्याप्य पञ्चषड्बिन्दुलाञ्छिता।।
षट्कोणोदितकल्पान्तसहस्रकिरणद्युतिः।
ध्यातव्या सा परा शक्तिर्भ्रूमध्यकमलोदरे।।
ईश्वरः कारणं तत्र मन्त्रस्तत्पुरुषाह्वयः।
तदधिष्ठायको ज्ञेयस्तत्पुरुषोधिदेवता।। इति।

अन्यत्राप्युक्तम् –

शान्तौ तु त्रीणि तत्त्वानि विद्येश्वरसदाशिवाः।
गखकाश्च त्रयो वर्णाः मन्त्रौ वक्तृतनुच्छदौ।।
वामा मुख्यपुराण्यष्टादशैव परिसंख्यया।
वामा ज्येष्ठा तथा रौद्री काळी विकरणी तथा।।
बलविकरणी चैव बलप्रमथनीत्यपि।
सर्वभूतदमन्येव मनोन्मन्यपरा भवेत्।।
पुराणि नवविद्यायामनन्तस्सूक्ष्मसंज्ञितः।
शिवोक्तमैकनेत्रौ च एकरुद्रस्त्रिमूर्तिकः।।
श्रीकण्ठश्च शिखण्डी चेत्यवमीशपुराष्टकम्।
सादाख्यभुवनन्तस्मिन् पुराण्यष्टादशैव तु।।
एकादशपदान्यासन्नित्यं योगिन इत्यपि।
योगपीठमथान्यत्स्यात् शाश्वताय पदं पुनः।।
ध्रुवायेति पदञ्चैवानाश्रिताय पदं पुनः।
अनाथाय पदं प्रोक्तमनन्ताय पदं पुनः।।
शिवायेति पदं सर्वव्यापिने च पदं ततः।
व्योमरूपायेति पदं व्योमव्यापिन इत्यपि।।
इन्द्रिये त्वक्पदावस्यां स्पर्शस्तु विषयो मतः।
गुणौ स्पर्शनिनादौ द्वावेकः कारणमीश्वरः।।
तुर्यावस्थेति शान्तिस्थं भावयेत्भुवनादिकम्। इति।।

## शान्त्यतीतकलातत्त्वानि

शान्त्यतीतायां तत्त्वे द्वे। ते च शक्तिशिवाख्ये। भुवनानि पञ्चदश। तानि निवृत्त्यादीन्यनाश्रितान्तानि। वर्णाष्षोडश। ते च विसर्जनीयाद्या अकारान्ताः। पदमेकम्। मन्त्रास्त्रयः। ते च शिवास्त्रेशानाः। वर्णश्श्वेतः। मण्डलं वृत्तम्। विषयाश्शब्दादयः। कारणं सदाशिवः। तदुक्तम् –

पञ्चमी तु परा कला।
शिवतत्त्वात्मकं तत्र पुराणि दशपञ्च च।।
वर्णा विसर्गपूर्वा ये षोडशस्वरसंज्ञकाः।

ओमित्याद्यं पदं मन्त्राश्शिवास्त्रेशानशब्दिताः।।
सा शान्त्यतीता पञ्चाध्वगर्भिणी परमा कला।
चिन्तनीया महाकाशस्वरूपा मूर्धपङ्कजे।।
ईशानो मन्त्रराडेनमधितिष्ठति कारणम्।
देवस्सदाशिवस्तत्र कलाध्वेति प्रकीर्तिता।। इति।

अन्यत्राप्युक्तम् -

शान्त्यतीतकलायान्तु तत्त्वे शक्तिशिवाह्वये।
वर्णाष्षोडशकं मन्त्रा अस्त्रेशानशिवास्त्रयः।।
ओमित्येकं पदं ज्ञेयं पुराणि दशपञ्च च।
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिश्च नाभसी।।
पुराणी बैन्दवानीह पञ्चप्रोक्तान्यतः परा।
इन्धिका दीपिका चैव रोचिका मोचिका ततः।।
ऊर्ध्वगा चेति नादोत्थभुवनानि ततः परम्।
व्यापिनी व्योमरूपा च अनन्ता च ततः परम्।।
अनाथा च तथा प्रोक्ताऽनाश्रिता पञ्चमी तथा।
भुवनानि च शान्तानि[59] पञ्चैव कथितानि हि।।
कुहूश्च शङ्खनी नाड्यौ देवदत्तधनञ्जयौ।
मारुतौ वचनश्रोत्रे इन्द्रिये विषयो रवः।।
शब्दो गुणोह्यवस्था तु तुर्यातीताऽत्र पञ्चमी।
बीजे नादहकारौ स्यात् स्थानं मस्तकमेव च।।
हेतुस्सदाशिवो देव इति तत्त्वादिसञ्चयम्।
सञ्चिन्त्य शान्त्यतीतस्थं विदध्यात्ताडनादिकम्।। इति।

एवं षडप्यध्वानो निरूपिताः। एतेषु च षट्स्वध्वसु कलावर्णपदमन्त्राश्चत्वारोऽध्वानो विशुद्धा एव। तत्त्वभुवनाध्वानौ तु शुद्धाशुद्धव्यामिश्रभेदेन त्रिविधौ। तत्र विद्यादीनि तत्त्वानि तत्रत्यानि भुवनानि च विशुद्धानि। पुरुषादीनि मायान्तानि तत्त्वानि तत्भुवनानि च व्यामिश्राणि। पृथिव्यादीनि तत्त्वानि तत्भुवनानि चाशुद्धानि। तत्र सुखामात्रानुषङ्गश्शुद्धत्वम्। उभयानुषङ्गो व्यामिश्रत्वम्। बाहुळ्येन दुःखानुषङ्गोऽशुद्धत्वम्। एवं त्रिविधत्वव्यपदेशोऽध्वद्वयविषयः। क्वचित्तु शुद्धतदितरत्वमात्रपुरस्कारेण द्वैविध्यव्यपदेशस्तद्विषय एव। एवञ्च पञ्चाध्वगर्भितासु कलासु संयोजनसञ्जननभोगभोजनपाशच्छेदादिक्रियया विशुद्धिः कार्या। शुद्धिश्च शोधनीयानां भिन्नभिन्नरूपा। तत्र मायीयस्य स्थूलशरीरादेस्सर्वात्मना विच्छेदश्शुद्धिः। पुर्यष्टकदेहस्य मायापर्यन्तं भोगप्रदानसामर्थ्यमात्रविच्छेदः। तदूर्ध्वं सर्वात्मना विच्छेदः। कर्मणां भोगेन सर्वदा विच्छेदः। आवरणस्या[60]प्यशुद्धेऽध्वनि न सर्वात्मना विच्छेदः, किन्तु तत्तत्भोगप्रदकर्मसहकारित्वविच्छेदः। एवं शुद्धाध्वन्यपि महामायाकार्यस्याधिकारमलस्य

---

[59] (पा) शाक्तानि

[60] (पा) आणवस्या

शुद्धकर्मणश्च विच्छेदः। रोधशक्तेरप्याणवगताच्छादनशक्तिसहकारित्वविच्छेदश्शुद्धिः। तथा तेषां पुनः प्रसवयोग्यता विच्छेदश्च। नचैकस्य कलाशोधनेऽन्यस्यापि देहाद्युत्पत्तिर्न स्यात्, स्थालीस्थानीयासु कलासु वह्निस्थानीयेन मन्त्रादिना बीजस्थानीयस्य प्ररोहणशक्तेर्विनाशितत्वेन शोधितासु कलासु देहाद्युत्पत्तेरयोगादिति वाच्यम्। असाधारणस्य कार्यस्य[61] साधारणेष्वपि तत्तत्भोगानुकूल्यप्रयोजकसंबन्धस्य च प्ररोहणशक्तिवधेऽप्यन्यस्य देहाद्युत्पत्तेरविरोधात्। एवं च दीक्षायाः सञ्चितकर्मनिर्हरणेनोपयोग[62] इति सुस्थितम्।।

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये अष्टमसूत्रभाष्यम् समाप्तम् ॥**

---

[61] (टि) असाधारणस्य कार्यस्य पुर्यष्टकादेरित्यर्थः। साधारणेष्वपीति। मलादिष्वित्यर्थः।

[62] (पा) सञ्चितकर्मतिरस्करणेनेति

# नवमसूत्रभाष्यम्

गुरुणा बोधितस्तत्पदं प्राप्नोतीति गुरूपदेशरूपविचारसाध्यशिवाभेदनिर्णयस्य तत्प्राप्तिसाधनत्वमुक्तम्। तस्य च न साक्षात्तद्धेतुत्वम्। तथात्वे शाब्दबोधानन्तरमेव विदेहकैवल्येन तदनन्तरं मनननिदिध्यासनसाक्षात्कारजीवन्मुक्त्यादिक्रमप्रतिपादकवचनविरोधात्। अज्ञानरूपमलनिवृत्तिरपि साक्षात्कारं विना केवलशाब्दज्ञानान्न संभवति। अदृष्टेः। किन्तु प्रणाड्या तस्य तद्धेतुत्वमिति वदन् साधनान्तराण्याह –

# नवमसूत्रम्

**चिदृशाऽऽत्मनि दृष्ट्वेशं त्यक्त्वा वृत्ति[1]मरीचिकाम्।**
**लब्ध्वा शिवपदच्छायां ध्यायेत् पञ्चाक्षरीं सुधीः॥ इति।**

तत्र –

यश्शिवस्सोऽहमेवेति अद्वैतं भावयेत्सदा। इति।

"ध्यानात् ज्ञानात्प्रमुच्यत" इति च वचनादद्वैतभावनारूपनिदिध्यासनं मोक्षसाधनम्। अथ एवानुष्टेयञ्चेत्याह – **सुधीरिति**। अत्र सकलास्त्रिविधाः। सांसिद्धिकाः प्राकृतावैनयिकाश्चेति। तत्र सांसिद्धिकानां जातिस्मरतया पूर्वमेव तत्त्वज्ञानसद्भावादुपदेशापेक्षाऽपि नास्ति। प्राकृतानान्त्वतिपक्वतयाऽसंभावनादेरभावात् गुरूपदेशमात्रादेव शिवदर्शनमात्रेण वा स्वप्नादौ शिवोपदेशाद्वा निवृत्तासंभावनं ज्ञानमुत्पन्नमिति न मननाद्यपेक्षा। वैनयिकानान्त्वत्यन्तपाकाभावादसंभावनानिवृत्तये मननादिकं कर्तव्यमिति तद्विषयकमेव सुधीरित्यादिकं बोध्यम्। यत्र च प्रतिबन्धविशेषादिना निदिध्यासनं साक्षात्कारायापर्याप्तं तस्य तत्रार्चिरादिमार्गेण पुण्यलोकप्राप्तिहेतुत्वमिति द्रष्टव्यम्। सुष्टु विविक्तदेशावस्थानादिनाऽव्यासङ्गेन निरन्तरं ध्यायतीति सुधीः। निदिध्यासनं कुर्वन्नित्यर्थः। ध्यानञ्च मननस्याप्युपलक्षणम्। तस्यापि शाब्दनिर्णयवन्न साक्षाद्धेतुत्वम्। तत्रोक्तयुक्तेरेव। किन्तु –

परानन्दमरूपन्तु पश्यन्नानन्दभाग्भवेत्।

इत्यादिवचनात्संभवाच्च साक्षात्कारस्यैव साक्षात्तत्प्राप्तिसाधनत्वम्। निदिध्यासनस्य तु –

अद्वैतभावनायुक्तस्सर्वत्रात्मनि संस्थितः।
सर्वगं सर्वदेहस्थं पश्यते नात्र संशयः॥

इत्याद्यागमात् दूरस्थ सूक्ष्माक्रीडादिसाक्षात्कारे नष्टपुत्रादिसाक्षात्कारे च चित्तैकाग्र्यद्वारा लोके तत्कारणत्वस्यान्वयव्यतिरेकसिद्धत्वाच्च चित्तानैकाग्र्यरूपप्रमातृदोषनिवृत्तिस्वरूपचित्तैकाग्र्यज्ञानादिद्वारैव तद्धेतुत्वमित्याह – "**आत्मनि दृष्ट्वेश**"**मिति**। ईशमात्मनि आत्मतया दृष्ट्वा – **साक्षात्कृत्येत्यर्थः**। साक्षात्कारश्चात्र नोक्तागमवाक्यमात्रेण। तस्य परोक्षज्ञानजनकस्वभावत्वात्। नाप्यागमान्तःकरणाभ्याम्। विरुद्धकार्ययोस्तयोरन्योन्यसाहचर्येणै–

ककार्यकारित्वासंभवात्। दशमस्त्वमसीत्यादिष्वपि दशमत्वसाक्षात्कारः पश्चाच्चक्षुषैव न वाक्येन। अन्यथाऽनुमानस्यापि प्रत्यक्षज्ञानजनकत्वापत्तेः। षड्जादिसाक्षात्कारोऽपि गान्धर्वशास्त्राभ्यासजनितवासनासहकृतेन श्रोत्रेणैव। नापि निदिध्यासनवासितान्तःकरणेन नष्टपुत्रादिसाक्षात्कारवज्जायते। भावनाजन्यत्वे तद्वदेवाप्रामाण्यापत्तेः किन्तु स्वरूपसाक्षात्कार इत्याह – **चिद्दृशेति**।

न च स्वरूपसाक्षात्कारस्य सर्वदा सत्वादभिव्यक्तस्य मलनिवर्तकत्वं वाच्यम्। अभिव्यक्तिश्च मलनिवृत्तिरेवेत्यात्माश्रय इति वाच्यम्। श्रवणमनननिदिध्यासनवासनापरिपाकसहकृतायाः स्वरूपदृशोऽभिव्यक्तसाक्षात्कारतया मलनिवर्तकत्वोपपत्तेः। यद्वा – मलनिवृत्तिसमानकालीनं वैशद्यमभिव्यक्तिः। इयञ्चाभिव्यक्तिर्गुरुकटाक्षेण भवति। नचैवमभिव्यक्तदृशो मलनिवृत्तिपूर्वकालत्वाभावेन कथं तज्जनकत्वमिति वाच्यम्। पूर्ववृत्तित्वाभावेऽपि तमोनिवृत्तौ दीपस्येव तत्र शक्तत्वेन जनकत्वोपपत्तेः। न हि तमोनिवृत्तेः पूर्वभावी दीपः। तथात्वे तमोदीपयोस्सामानाधिकरण्यापत्तेः। तस्मात्दृढशाब्दबोधमनननिदिध्यासनसाक्षात्कारास्साक्षात् प्रणाड्या च साधनानीति स्थितम्। एवं तावत्साधनेषूक्तेषु परिशिष्टस्य फलस्याकाङ्क्षायामवशिष्टेन सोत्तरसूत्रेण मलनिवृत्तिरखण्डानन्दशिवाभिव्यक्तिश्च मुक्तिर्ज्ञानफलमिति प्रतिपाद्यते। तत्राप्येतत्सूत्रावशेषेण जीवन्मुक्तिरुत्तरसूत्रेण विदेहमुक्तिरिति विभागः। यद्यपि पूर्वमेव प्राप्नोति तत्पदमिति शिवस्वरूपप्राप्तिरूपं फलं सामान्यत उक्तं तथाऽपि तस्य नित्यविभुत्वेन नित्यप्राप्ततया तदात्मतया च न तत्प्राप्तेर्मुख्यायाः पुरुषाकाङ्क्षितफलत्वं इत्याशङ्कायां नास्माभिर्मुख्या तत्प्राप्तिः प्राप्नोतीति पदेन फलत्वेन विवक्षिता।

किन्तु विस्मृतग्रैवेयकस्येव नष्टसुवर्णस्येव वा आवरणनिवृत्तिमात्रेण गौणी प्राप्तिरेवेति स्वाभिमतं प्राप्तिशब्दार्थं विवृणोति – **त्यक्त्वावृतीति**। अतो न पुनरुक्तिः। अत्रावृतिरावारको मलः। सैव संसारदुःखकारकत्वान्मरीचिकाग्रैष्मघर्मः। बहुषु स्थलेषु वृत्तिमरीचिकामिति पाठः। तत्रापि वृत्तिशब्दस्स्ववाच्यस्य[1] संसारस्य कारणं मलं लक्षणयोपस्थापयति। अनेन च दुःखसाधनपरिहारत्वात्तत्त्यागस्य स्वतः। पुरुषार्थत्वं अतिदुःखसाधनत्वेन तस्यावश्यनिवर्तनीयत्वञ्च सूचितम्। सुखदुःखाभावयोरिव दुःखसाधनपरिहारस्यापि स्वतः पुरुषार्थत्वात्। लोके हि कण्टादिपरिहारस्य वेदे च प्रायश्चित्तेन पापनाशकस्य च दुःखसाधनपरिहारस्य स्वतः पुरुषार्थत्वावधारणात्। सा च नरकादिसर्वानर्थमूलत्वे न घनानन्दावारकत्वेन च प्रेक्षावताऽवश्यं निवर्तनीया। अन्यथा आत्महैव स्यादिति भावः। त्यक्त्वेत्यत्र त्यागविशेषोऽभिमतः, न नाशः। तस्या एकत्वेन तद्विनाशे एकमुक्तौ सर्वमुक्तिप्रसङ्गात्। न च तस्या अविनाशे पुनरावरणप्रसङ्गः।

तत्तदात्मावरणशक्तेरपि विनाशात् इति केचित्। वस्तुतस्तु तत्तदात्मसंयोगनाशान्न तस्यावरणं न च पुनस्संयोगेऽपि जायतामिति युक्तम्। संयोगकारणस्यान्यतरकर्मादेरभावात्, शिवस्याज्ञानवैरिस्वभावत्वेन तदैक्यापन्नस्य तस्याप्यावरणासम्भवाच्च। लोकेऽपि

---

[1] (टि) वृत्तिशब्दस्स्ववाच्येति। अस्य संसारवाचकत्वं मृग्यम्। त्यक्त्वावृत्तिमरीचिकामिति मूले आवृत्तिमरीचिकामिति पदच्छेदे तु आवृत्तः प्रतियोग्याकांक्षायां जननमरणावृत्तिरिति स्वीकारेण पाठान्तरं सङ्गमयितुं शक्यं भवतीत्यवधेयम्। अथवा तान्त्रिकपारिभाषिकोऽयन्तस्मिन्निति नेयम्।

सौरालोकादिप्रकाशेन बाह्यस्य तमसोऽप्यपसरणमेव न नाशः। अत एव हत्वेति वक्तव्ये तस्य त्यागमात्रमेव न तस्यैव नाश इति कथयितुं त्यक्तेत्युक्तम्। दृष्ट्वा त्यक्त्वेत्यत्र दृष्ट्वेति क्त्वाप्रत्ययस्समानकर्तृकत्वे। तस्यैवाव्यभिचारिमुख्यार्थत्वात्। पूर्वकालत्वन्तु मुखं व्यादाय स्वपितीत्यादौ व्यभिचारेण तस्य न वाच्यार्थः। स्थापितं तु समानकर्तृकत्वस्य क्त्वाप्रत्ययेन पुरतः प्रतीयमानत्वं बृहस्पतिसवाधिकरणे। समानकर्तृकत्वञ्च न गुणप्रधानभावं विना गुणप्रधानभावश्चोपकार्योपकारकभावमात्रेण, साध्यसाधनभावेन वा। प्रकृते तु "युध्वा राज्यमवाप्येते"त्यादाविव साध्यसाधनभावेनैवेति दर्शनस्यावृत्यपसरणहेतुत्वं लभ्यते। न केवलं सकलदुःखनिदानमलनिवृत्तिमात्रं मुक्तिः। किन्तु अखण्डशिवानन्दाभिव्यक्तिरपि।

आनन्दान्तर्गता मुक्तिः केचिदानन्द एव हि। इति,
मोक्षेषु चाक्षयं सौख्यमनन्तं हि निरन्तरम्।।

इति **चाचिन्त्यज्ञानतिलक**वचनानुरोधादित्याह – **"लब्ध्वा शिवपदच्छाया"मिति**। अत्र पद्यते गम्यते इति शिव एव पदम्। तदेव निदाघतप्तस्य निबिडच्छायेव संसारतापदुःखितस्य निवृत्तिचक्षुःपटलस्यापि विषयग्रहण इव शिवस्वरूपग्रहणेऽनुग्रहरूपशिवव्यापार-सापेक्षस्यानुग्रहपूर्वकं स्वस्वरूपनिबिडानन्दसुखप्रदत्वात् छायावत्छाया। तां लब्ध्वेति पूर्वपदोक्तविशिष्टस्वरूपसुखप्रदत्वनान्तरीयकसिद्धतादृशस्वरूपसुखलाभानुवादः। अत्रापि चिद्दृशेति सम्बध्यते। अयंभावः – पूर्वं मलनिवृत्तावपि तावन्मात्रेणाणुस्वरूपचैतन्यं न शिवपरानन्दग्रहणयोग्यम्। चक्षुषः पटलापनयेऽपि पुनस्त्रिरात्रबन्धनादिरूपवैद्यव्यापारं विना सम्यक् बाह्यार्थग्राहकत्वादर्शनात्। तथा च तत्र त्रिरात्रबन्धनादिरिवात्रापि शिवानुग्रहेण सञ्जातपाटवया चिद्दृशा तद्दत्तशिवस्वरूपं लब्ध्वा साक्षात्कृत्य अनुभूयेत्यर्थः। शिवानुग्रहसापेक्षत्वञ्चिद्दृशः –

शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा।
शिवं शक्त्यादिभिस्सार्धं पश्यत्यात्मागतावृतिः।।

इति **मोक्षकारिकायां** प्रतिपादितम्। अथवा छायापदेन निबिडानन्दो लक्ष्यते। तस्मात् स्थितमेतन्मलनिवृत्तिश्शिवानन्दाभिव्यक्तिश्च पुरुषार्थः, स एव प्राप्तिपदार्थ इति। तत्र मुक्तेर्विदेहत्वमेव वा ज्ञानानन्तरमेव मुक्ते उत कञ्चित्कालं सशरीरत्वमपीति विषये,

ज्ञानाग्निस्सर्वकर्माणि भस्मसात् कुरुतेऽर्जुना।

इत्यादिवचनात् ज्ञानात्सर्वकर्मनाशे तन्मूलभोगासम्भवेन तदनन्तरं तत्संपादकशरीरसद्भाव-प्रमाणाभावात्, मलनिवृत्तानावृतज्ञानत्वेनाविर्भूतपरानन्दत्वेन च तस्य शरीरसंबन्ध-तज्जनितसुखदुःखानुभवादिविरोधाच्च ज्ञानान्तरमेव विदेहकैवल्यमित्याहुः। तन्न सम्भवति।

प्रारब्धं भोगतो नश्येच्छेषं ज्ञानेन च।

इत्यादिभिर्वचनैः प्रारब्धस्य भोगैकनाश्यत्वप्रतीतेस्तस्य ज्ञाननाश्यत्वासम्भवात्, शेषस्यैव ज्ञाननाश्यत्वप्रतीतेश्च। तथा चैतद्व्यवस्थावचनानुरोधेन सामान्यविषयस्य ज्ञानाग्निस्सर्वकर्माणीति **भगवद्गीता**वचनस्य प्रारब्धेतरसर्वकर्मविषयत्वं कल्प्यते। तथा च प्रारब्धभोगपर्यन्तं सशरीरत्वमेव मुक्तिः। तदुक्तं **स्कान्दे मुक्तिखण्डे द्वितीयाध्याये** –

यस्य मुक्तिरभिव्यक्ता स्वात्मा शुद्धात्मरूपिणी।
तस्य प्रारब्धकर्मान्तं जीवन्मुक्तिः प्रकीर्तितः॥ इति।

एवं **तत्त्वसारे भगवद्गीतादिषु** च विस्तरेण जीवन्मुक्तिप्रतिपादकवचनं दृष्टम्। न च निवृत्तमलस्य पुनश्शरीरसम्बन्धतदधीनसुखदुःखभोगानुपपत्तिर्मुक्तिविरोधश्चेति युक्तम्। माया तत्कार्याणां सर्वेषां मलनाशेन तत्पूर्ववदाक्रम्य भोजकत्वसामर्थ्यहानावपि प्रारब्धविनाशाय स्वयमेव भोगोपपत्तिः। भोगो हि न तस्य संसारावस्थायामिव देहाद्यभिमानपूर्वकोऽभिषङ्गादिजनितोऽध्यासात्मा। येन मलावरणनिवृत्तौ न स्यात्। किन्त्वसत्येव भोगाभिषङ्गे नृत्तादौ भोगानुकरणवत्सांसारिकभोगसदृशशिवानन्दानुभववत् रोमाञ्चादिजनकत्वहीनः प्रारब्धकर्मक्षयमात्राभिसन्धानेन क्रियमाणः। एतादृशश्च भोगो मलादिनिवृत्तावपि युज्यते। तथा किञ्चिदावृतिवासनाद्यनुवृत्त्या दग्धपटवत्प्रतिभासमात्रमेव तेषामिति न मुक्तिविरोधोऽपीति। तदुक्तं **स्कान्दे** –

तत्रैव स्वतस्सिद्धात्मभूता या मुक्तेरज्ञानहानितः।
अभिव्यक्तिर्महाविष्णो मुक्तत्वं दग्धवस्त्रवत्॥
प्रपञ्चस्य प्रतीतत्वाज्जीवनं पुरुषोत्तम।
फलोपभोगात् प्रारब्धकर्मणस्संक्षयो हरे॥
प्रतिभासो निवर्तेत प्रपञ्चस्य न संशयः। इति।

एवं प्रमाणसिद्धां जीवतो मुक्तिं सिद्धवत्कृत्य तस्य जीवन्मुक्तस्य चरितमाह – "**ध्यायेत् पञ्चाक्षरी**"**मिति**। अत्र प्रविशपिण्डमित्यत्र भक्षय गृहमितिवज्जपेच्छिवमिति चाध्याहार्यम्। तथा च दृष्टदुःखेनानभिभवार्थं स्वस्य पञ्चाक्षरीजपशिवध्यानादिभिरेवा-खण्डानन्दाविर्भावरूपमुक्तिप्राप्तेरिवानृशंस्यार्थञ्च कदाचित्पञ्चाक्षरीं जपन्कदाचित् शिवञ्च ध्यायन्नास्ते। ध्यायेदिति सम्भावनायां लिङ्गविधौ। मुक्तस्य पूर्णकामस्य निर्दोषस्य वर्णाश्रमाद्यभिमानशून्यस्य ज्ञानिनोऽधिकारनियोज्यत्वाभावेन विधेरसम्भवात्। तथा च विहिताकरणेन प्रत्यवायः प्रारब्धवशान्निषिद्धाचरणेऽपि च न दोषः। तदुक्तं **तत्त्वसारे** ज्ञानिनमुपक्रम्य –

दाने च तस्य किं कार्यं पितॄणां तर्पणे न चेत्। इत्यादि।

अथवा पञ्चाक्षरीशब्द तदर्थपरः। तदर्थश्च शिकारस्य शिवः। वाकारस्य तच्छक्तिः। यकारस्यात्मा। मकारस्य बन्धकमलादिः। नकारस्य तादृशबन्धवारकम्।

**तदुक्तमागमे** –

मध्ये शिवस्ततश्शक्तिस्ततोऽस्यात्मेति हि स्मृतः।
तत्पूर्वो बन्धकः प्रोक्तस्तत् पूर्वं तन्निवारकम्॥ इति।

तथा च शिवं स्वशक्त्या आत्मनो मलनिवर्तकत्वेन ध्यायेदित्यर्थः। न च देहाभिमानशून्यस्य नियोज्यत्वमयुक्तम्। यदर्थप्रवृत्तौ देहाभिमानोऽपेक्षितस्तत्र तच्छून्यस्य नियोज्यत्वाभावेऽपि देहाद्यभिमानवासनाक्षयार्थप्रवृत्तौ तदभिमानस्य नियोज्यत्वायानपेक्षितत्वात्। तथा चान्यत्रैव विधिनिषेधादौ नियोज्यत्वाभावः। एवं हसनादिकमपि जीवन्मुक्ताचरितं विस्तरेण, "श्रृणु

तत्त्वं प्रवक्ष्यामि चर्या तस्यैव दुस्तरेत्।" – इत्यादि**तत्त्वसारोक्तमनुसन्धेयम्**।।

॥ **नवमसूत्रसङ्ग्रहभाष्यं समाप्तम्** ॥

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यायते – अष्टमे गुरूपदेशरूपश्रवणनिवृत्तासंभावनो निगमागमादिवाक्यजन्यशिवानन्यत्वानुभवस्तत्प्राप्तिसाधनमित्युक्तम्। तस्य च न साक्षाद्धेतुत्वम्। तथात्वे शाब्दबोधानन्तरमेव विदेहकैवल्ये तदनन्तरं वक्ष्यमाणमनननिदिध्यासनसाक्षात्कारविधायकानि वचनानि पीड्येरन्। न सम्भवति च वक्ष्यमाणरीत्या मननादीनि विना मलनिवृत्तिगर्भतत्प्राप्तिरित्याशङ्क्या मननादीनामपि तत्प्राप्तिसाधनत्वमाह – **चिद्दृशेति**। अत्र सुधीरिति निदिध्यासनं विवक्षितं विधीयते। तथात्वे हि प्रक्रान्तशाब्दज्ञानापेक्षितविधिर्भवति। न तु सम्यक् धीमात्रमनूद्यते। प्रक्रान्तशाब्दज्ञानानपेक्षितत्वात्, अनुपयोगाच्च। निदिध्यासनस्य च साक्षात्कारद्वारा मुक्तिसाधनत्वम्। न तु साक्षात्कारं विना। मलनिवृत्तेस्तावन्मात्रेणासम्भवात्।

> अद्वैतभावना युक्तस्सर्वत्रात्मनि संस्थितः।
> सर्वगं सर्वदेहस्थं पश्यते नात्र संशयः।।

इति वाक्येन साक्षात्काराङ्गत्वप्रतीतेश्च। तस्य च चित्तानैकाग्र्यरूपप्रमातृदोषनिवृत्तिद्वारत्वेऽप्यदृष्टस्यापि संभवात्विधेयत्वम्। नचादृष्टार्थत्वे कञ्चित्कालं तत्करणेऽप्यदृष्टसिद्धिसम्भवेन तदानीं तदुपरमप्रवृत्तौ साक्षात्कारपर्यन्ताभ्यासप्रतिपादकवचनविरोध इति वाच्यम्। दृष्टद्वारस्य चित्तैकाग्र्यस्यानिर्वृत्तेस्तावत्कालपर्यन्ताभ्यासविशिष्टस्यैव निदिध्यासनस्यापूर्वविषयत्वाच्च तावत् पर्यन्तमभ्याससम्भवात्। नचैवमदृष्टकल्पनाऽप्रामाणिकी निष्फला चेति वाच्यम्। अदृष्टस्य च विधेश्च परस्परं व्याप्तत्वात्। निदिध्यासनरूपयोगभ्रष्टस्य प्रतिबन्धवशेनानुत्पन्नसाक्षात्कारस्य पुण्यलोकावाप्तिश्रवणाच्च। यथा **भगवद्गीतायां** योगभ्रष्टस्य का गतिरित्यर्जुनेन पृष्टस्य भगवतो वचनम् –

> न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति।
> प्राप्य पुण्यकृतान्लोकानुषित्वा शाश्वतीस्समा।। इत्यादि।

एवं मननसाक्षात्कारयोरपि वक्ष्यमाणयोरूह्यम्। दृष्ट्वेति च साक्षात्कार उच्यते। स च साक्षात्कारश्शब्दजन्यो मायावादिनामिव न विवक्षितः। तस्य पूर्वसूत्रे पृथगुक्तत्वात्। प्रमाणान्तरस्य चासम्भवात्। नापि निदिध्यासनवासितान्तःकरणजन्यो विवक्षितः। बुद्धिवृत्तिप्रकाश्यत्वस्य षष्ठसूत्रे निरासात्। किन्तु स्वरूपसाक्षात्कार एव विवक्षित इत्याह – **चिद्दृशेति**।

### शाब्दापरोक्षवादः

ननु शब्दादेवापरोक्षज्ञानं युक्तम्। विषयस्यापरोक्षस्वभावत्वात्। अपरोक्षगोचरे परोक्षज्ञानेऽभ्युपगते तस्य भ्रमत्वापत्तेः। न च शब्दस्यापरोक्षज्ञानजनने सामर्थ्यं नास्तीति युक्तम्। शब्दमात्रस्य सामर्थ्याभावेऽप्यपरोक्षविषयशब्दस्य तदभ्युपगमे विरोधाभावात्, दशमस्त्वमसीत्यादौ

तादृशस्य तत्र सामर्थ्यदर्शनाच्च। ननु तत्रापि शब्दस्य नापरोक्षज्ञानजनकत्वम्। तथाहि – वाक्यश्रवणसमनन्तरं दशममात्मानं साक्षात्करोमीति व्यवहारस्य दर्शनेन तस्य वाक्यस्य साक्षात्कारजनकत्वं त्वयाऽभ्युपगम्यते। तत्रेदं वाक्यं यदि स्वात्मनो दशमत्वसाक्षात्कारवन्तं प्रति प्रयुक्तं तदा तस्मिन्नेव साक्षात्कारे तत्समानविषयके परोक्षे शाब्दज्ञाने च मुख्यो गौणो वा सव्यवहार उपपन्न इति न तद्बलेन शब्दस्य साक्षात्कारजनकत्वकल्पना युक्ता।

यदि तु तादृशसाक्षात्काररहितं प्रतिप्रयुक्तं तदा रत्नतत्त्वादिष्विवोदेशसहकृतेनेन्द्रियेण साक्षात्कारः। साक्षात्करोमीति व्यवहारोऽपि तत्गोचर एव। न च रत्नतत्त्वादिष्वपि शाब्द एव साक्षात्कार इति दृष्टान्तासिद्धिः। इन्द्रियासन्निकर्षदशायां शब्दस्य तत्र साक्षात्कारजनकत्वादर्शनात्। तस्मात् दशमस्त्वमसीत्यादेर्न साक्षात्कारजनकत्वमिति। मैवम्। स्वात्मनो दशमत्वमजानानं प्रत्यस्मिन्वाक्ये प्रयुक्ते दशमत्वसाक्षात्कारस्तावदनुभूयते। स नेन्द्रियजन्यः, शब्दाश्रवणदशायामपि तत्प्रसङ्गात्। न च शब्दस्य सहकारिणो विळम्भाद्विळम्भः। अवश्याभ्युपगन्तव्यजनकभावाच्छब्दादेव तदुत्पत्त्युपपत्ताविन्द्रियस्य जनकत्वे मानाभावात्। तद्व्यतिरेकस्य शब्दव्यतिरेकप्रयुक्तत्ववदिन्द्रियव्यतिरेकप्रयुक्तत्वादर्शनात्। न च साक्षात्कारत्वेनेन्द्रियजन्यत्वमनुमेयम्। तद्व्यतिरेकप्रयुक्तव्यतिरेकत्वस्योपाधित्वात्। न च साक्षात्कारत्वावच्छिन्नं प्रत्यनुगतो हेतुर्न सिध्येदिति वाच्यम्।

उक्तयुक्त्या प्रकृते शब्दस्यैव साक्षात्कारजनकतयाऽभ्युपगन्तव्यत्वे नेष्टापत्तेः। न च साक्षात्कारत्वशाब्दत्वयोस्साङ्कर्यं स्यादिति युक्तम्। जात्यनभ्युपगन्तुस्तस्यादोषत्वात्। तदभ्युपगमेऽप्यन्यतरस्य नानात्वादिनापरिहारसम्भवात्। ननु नद्यास्तीर इत्यादिव्यावर्तनायाऽपरोक्षविषयत्वं जनकतावच्छेदकमुक्तम्। तत्रापरोक्षत्वं न तावदपरोक्षज्ञानविषयत्वयोग्यत्वम्। पर्वतो वह्निमानित्यादेरपि वाक्यस्य तत्प्रसङ्गात्। नाप्यपरोक्षज्ञानविषयतापन्नत्वं पुरुषान्तरापरोक्षज्ञानविषयतापन्नत्वस्य वह्न्यादावपि सम्भवात्। अपरोक्षज्ञानस्य तदीयतया विशेषणेऽपि प्रकृते शाब्दज्ञानेनैव तद्विषयत्वाभिधाने आत्माश्रयत्वात्। ज्ञानान्तरस्य चाभावात्। प्रत्यक्षज्ञानेन विषयीक्रियमाणे घटादावपि शब्दात्साक्षात्कारप्रसङ्गाच्च। नाप्यपरोक्षज्ञानरूपत्वम्। दशमत्वादेस्तथात्वाभावात्। न च दशमत्वस्य तथात्वाभावेऽपि तद्धर्मिणस्तथाविधत्वमेव प्रयोजकम्। धर्मवांस्त्वमसीत्यादिनाऽपि वाक्येन धर्मादिगोचरसाक्षात्कारप्रसङ्गात्। तस्मादपरोक्षविषयकत्वस्य नियामकस्य दुर्वचत्वान्न शब्दस्यापरोक्षज्ञानजनकत्वमिति।

मैवम्। यो यस्य स्वतोऽपरोक्षः, अपरोक्षत्वयोग्यस्तद्धर्मो वा, तद्विषयशब्दस्तस्यापरोक्षज्ञानजनकः। स्वात्मा हि सर्वस्य स्वतोऽपरोक्षः। तद्धर्माश्च सुखादयो वर्तमाना अपरोक्षयोग्याः। तद्गोचरेण शब्देन तस्य तद्विषयापरोक्षज्ञानजननेनातिप्रसङ्गः। धर्मवांस्त्वमसि सुखवांस्त्वमभूरित्यादेरनेवंविधत्वान्नापरोक्षज्ञानहेतुता। दशमस्त्वमसि सुखवांस्त्वमसि देहातिरिक्तस्त्वमसीत्यादेस्तूक्तरूपोपेतत्वादपरोक्षज्ञानजनकत्वं युक्तम्। प्रत्यक्षीक्रियमाणे घटादौ घटोऽस्तीत्यादिवाक्यमप्यनेवंविधत्वात्परोक्षज्ञानस्यैव जनकम्। न चैवं तद्वदेव दशम इत्यादेरुदाहृतवाक्यस्यापि परोक्षज्ञानजनकत्वमस्त्विति युक्तम्। तदर्थस्य परोक्षज्ञानविषयत्वाभावात्। त्वमित्युक्तत्वात् संबोध्यस्य जायमानं ज्ञानं अहमित्याकारकम्। न

च तथाविधस्य ज्ञानस्य परोक्षत्वं सम्भवति। संबोध्यसमीपवर्तिनस्त्वयमित्याकारन्तु परोक्षमेव। तं प्रति तस्यापरोक्षैकस्वभावत्वाभावात्। एवञ्चैकमेव वाक्यं पुरुषभेदेन परोक्षमपरोक्षञ्च ज्ञानं जनयति। एवञ्च दशमादिवाक्यं पक्षीकृत्य वाक्यत्वेन परोक्षज्ञानजनकत्वानुमानं प्रत्युक्तम्। चैत्रं प्रत्युक्तस्तस्य वाक्यस्य मैत्रीयपरोक्षज्ञानजनकत्वाऽभ्युपगमेन सिद्धसाधनात्। चैत्रीयपरोक्षज्ञानजनकत्वसाधने बाधादनैकान्तिकत्वाच्च। अत एवैतद्वाक्यजन्यज्ञानपक्षीकारेण परोक्षत्वानुमानं प्रत्युक्तम्। तत्रापि मैत्रीयादिज्ञाने सिद्धसाधनात्।

चैत्रीयज्ञानपक्षीकरणे बाधात्। न च तद्वाक्यं पक्षीकृत्य वाक्यत्वेनापरोक्ष-ज्ञानजनकत्वाभावोऽनुमेयः। तत्राप्युक्तदोषा निस्तारात्। तस्मात् विषयस्वाभाव्यादेवंविधस्य वाक्यस्यापरोक्षज्ञानजनकत्वमभ्युपेयम्।

प्रयोगश्च – एतद्वाक्यजन्यश्चैत्रीयं ज्ञानं अपरोक्षं, तं प्रति स्वतोऽपरोक्षविषयत्वात्, सम्मतवदिति। न च धर्मवांस्त्वमसीत्यादिवाक्यजन्ये ज्ञाने व्यभिचारः। तत्रापि तदंशेऽपरोक्षत्वसम्भवात्। यद्यप्येवं प्रकृतेऽपि तद्विषयकांक्षेऽपरोक्षत्वेनैव प्रकृत-साध्योपपत्त्या दशमत्वाद्यंशेऽपरोक्षत्वन्न साधितं, तथापि तदंशेऽप्यपरोक्षत्वस्य परानभिमतत्वात्प्रदर्शितस्य प्रयोगस्योपपत्तिः। यद्वा – पक्षीकृतं ज्ञानं सर्वत्रापरोक्षं स्वतोऽपरोक्षं स्वतोऽपरोक्षत्वयोग्यतद्धर्मोभयमात्रविषयत्वादिति प्रयोक्तव्यम्।

तस्माच्छब्द एवापरोक्षज्ञानजनकः। न च विषयस्वाभाव्यस्यापरोक्षत्वप्रयोजकत्वा उतादृशेऽपि घटादौ कथमिन्द्रियादपरोक्षज्ञानमिति युक्तम्। विषयस्वाभाव्यरहिते इन्द्रियादेरपरोक्ष्यप्रयोजकत्वात्। तस्मात्स्वतोऽपरोक्षे योग्ये तद्धर्मे च सर्वमपि करणमपरोक्षज्ञानजनकम्। अतादृशीन्द्रियमिति स्थितम्। न च शब्दादेवापरोक्षज्ञानजनने मननिदिध्यासनयोर्वैयर्थ्यम्। असम्भावनाविपरीतभावनानिवृत्तये तयोरपेक्षितत्वात्। तस्माच्छब्दादेवापरोक्षं ज्ञानमिति। अत्र प्रतिविधीयते।।

## शाब्दापरोक्षनिराकरणम्

शब्दस्य हि परोक्षज्ञानजनकत्वमेव क्लृप्तम्। विषयविशेषेऽपरोक्षज्ञानजनकत्वन्तु कल्पनीयम्। न च तत्कल्पनायां प्रमाणमस्ति। सुखवांस्त्वमसीत्यादौ सुखावानहमस्तीति साक्षात्करोमीति व्यपदेशस्य शब्दाजन्यसाक्षात्कारविषयकत्वे नाप्युपपत्तेः। दशमस्त्वमसीत्यादावप्यैन्द्रियक एव साक्षात्कारः। वाक्यन्तु स्वयं गणयितृतया गणनीयस्वगतैकत्वस्य दशत्वसङ्ख्यापूरकत्वमजानानं व्यामुग्धं प्रति तत्गतैकत्वस्यापि तत्पूरकत्वगोचरशाब्दबोधप्रणाडितयाऽपेक्षाबुद्धिसाध्ये दशमत्वसाक्षात्कारे उपयुज्यते। तथा च दशमस्त्वमसीत्यत्र त्वत्गतयैकत्वसंख्यया दशत्वसङ्ख्यापूर्यत इत्यर्थः। अन्यथा व्यामुग्धस्येवान्यस्यापि शब्दापेक्षिसाक्षात्कारस्स्यात्।

एवञ्च परंपरया शब्दापेक्षेणैन्द्रियकेनैव दशमत्वसाक्षात्कारेण दशममात्मानं साक्षात्करोमीति व्यपदेशस्योपपत्त्या न तदनुरोधेनापि शब्दस्य साक्षात्कारजनकत्वकल्पना युक्ता। देहातिरिक्तस्त्वमसीत्यादावपि न देहातिरेकगोचरश्शाब्दसाक्षात्कारः। किन्त्वेतद्वाक्य-श्रवणात्पूर्वं देहातिरेकसाक्षात्कारस्य सत्वे तत्र विश्वासमात्रमनेन वाक्येनाधीयते। असत्त्वे तु

तत्र शाब्द एव बोधो न साक्षात्कारः। तस्मादेवंविधस्थले सर्वत्र साक्षात्कारस्येन्द्रियेणैवोपपत्तेर्न शब्दस्य साक्षात्कारजनकतायां मानम्। नाप्यपरोक्षे परोक्षज्ञानानुपपत्तिस्तत्र मानम्। एकदा अपरोक्षेऽपि घटादावन्यदापरोक्षज्ञानदर्शनात्। परोक्षापरोक्षरूपे घटादावुभयरूपज्ञानसम्भवेऽपि स्वतो परोक्षे न परोक्षज्ञानं सम्भवतीति चेन्न। यत्स्वतोऽपरोक्षं तत्परोक्षज्ञानस्य न विषय इति व्याप्तावुभयसम्मतस्य दृष्टान्तस्याभावात्। ननु दृष्टान्ताभावेऽपि परोक्षस्वभावपर्यालोचनयाऽपरोक्षे प्रवृत्तिर्न सम्भवति।

तथाहि – देशतः कालतः स्वभावतो वा विप्रकृष्टमेव परोक्षं ज्ञानं विषयी करोति। स्वात्मनश्च त्रिविधोऽपि विप्रकर्षो नास्तीति न परोक्षज्ञानविषयतेति चेन्न। त्रिविधविप्रकर्षशून्ये वा पुरोवर्ति घटादौ शब्दात्परोक्षज्ञानदर्शनात्। त्वयाऽपि स्वतोऽपरोक्षयोग्यतद्धर्मोभयविषय एव शब्दादपरोक्षज्ञानस्वीकारात्। अपरोक्षज्ञानविषयभावापन्ने घटे शब्दादपरोक्षज्ञानाभ्युपगमेऽप्यन्धकारवर्तिनि घटे त्रिविधविप्रकर्षशून्ये शब्दात्परोक्षज्ञानोदयात्। न च तत्रापि तमसा व्यवधानाद्देशविप्रकर्षोऽस्तीति युक्तम्। तमसस्तेजोभावत्वपक्षे आच्छादकत्वासम्भवात्। द्रव्यत्वपक्षेऽप्यन्धकारस्थस्य पुरुषस्यालोकमध्यवर्तिघटादिगोचरसाक्षात्कारदर्शनेन तदनाच्छादकभावस्याभ्युपगन्तव्यत्वात्। नचापरोक्षज्ञानहेतुसन्निकर्षाभावो विप्रकर्षस्तत्राप्यस्तीति वाच्यम्। अपरोक्षज्ञानस्वरूपयोग्यसन्निकर्षविरहस्य तत्राप्यभावात्। स्वेतरसकलकारणसहितस्य फलोपहितस्य वा सन्निकर्षस्य त्वया दशमस्त्वमसीत्यादावप्यनङ्गीकारात्। अन्यथा तत्रैन्द्रियकसाक्षात्कारप्रसङ्गात्।

तथाऽपि स्पष्टमवभासमाने स्वात्मनि कथं अविस्पष्टावभासात्मकं परोक्षज्ञानमिति चेत्परोक्षज्ञानविषये घटादावपरोक्षज्ञानवदपरोक्षज्ञानविषयेऽपि परोक्षज्ञानस्योपपत्तेः। दशमत्वाद्यंशे अपरोक्षज्ञानविषयत्वस्याप्यभावाच्च। तस्मादपरोक्षे परोक्षज्ञानानुपपत्त्यापि न शब्दस्य साक्षात्कारजनकत्वकल्पना। नापि शब्दस्यापरोक्षे परोक्षज्ञानजनकत्वेऽप्रमाणत्वप्रसङ्गेनाऽपरोक्षज्ञानजनकत्वकल्पना युक्ता। परोक्षत्वाश्रयज्ञानजनकत्वेऽपि परोक्षत्वप्रकारकज्ञानजनकत्वाभावेनाप्रामाण्यप्रसङ्गाभावात्। तस्मान्मानाभावान्न शब्दस्यापरोक्षज्ञानजननसामर्थ्यम्। शब्दस्यापरोक्षज्ञानजनकत्वाभावे तु दशम इत्यादिवाक्यं न स्वार्थापरोक्षज्ञानजनकं वाक्यत्वात्, एतद्वाक्यजन्यं वाक्यार्थज्ञानं नापरोक्षं वाक्यजन्यवाक्यार्थज्ञानत्वादित्याद्यनुमानं मानम्। अपरोक्षेऽपि परोक्षज्ञानसम्भवस्य प्रतिपादितत्वान्न बाधः।

अत एवैतद्वाक्यजन्यं ज्ञानं सर्वत्रापरोक्षं स्वतोऽपरोक्षयोग्यतद्धर्मोभयमात्रविषयकत्वादिति प्रत्यनुमानमपास्तम्। अप्रयोजकत्वात्। अन्ये तु नष्टपुत्रादिसाक्षात्कारवन्मानस इत्याहुः। तदपि न। बुद्धिवृत्त्याद्यविषयत्वस्य षष्ठसूत्रे प्रतिपादनात्। तद्वदेवायथार्थत्वापत्तेश्च। तस्मात्स्वरूपदृगेव साक्षात्कारः, न मानसो नापि शाब्द इति व्यवस्थितम्। एवंविधसाक्षात्कारेण निवृत्तावरणस्य जीवन्मुक्तस्य चरितमाह – **ध्यायेदिति।** पञ्चाक्षरीम् – शिवशक्त्या मले निवृत्ते जीवश्शिवैक्यं प्राप्नोतीत्येवं रूपं तत्प्रतिपाद्यं दृष्टदुःखानभिभवार्थं ध्यायन्नास्त इत्यर्थः। एतच्च हासादेरप्युपलक्षणम्। तदुक्तं **तत्त्वसारे** –

धृतिधैर्यसमायुक्तस्सदानन्दसमावृतः।
हसते नृत्यते चैव क्रन्दते वल्गतेऽपि च।।

कार्तिकेय उवाच –

हसनादि त्वया प्रोक्तं योगीन्द्राणाञ्च चेष्टितम्।
तस्यार्थं नैव जानामि किमर्थं कुरुते प्रभो।।

ईश्वर उवाच –

अव्यक्तं दूषयित्वा तु विमार्गेण जनो रतः।
तं दृष्ट्वा हसते योगी अहो व्यामोहितं जगत्।।
ज्ञात्वा भवस्य सद्भावं क्रीडन्ते भवमध्यतः।
क्रीडन्तोऽपि न लिप्यन्ते तेन नृत्यन्ति योगिनः।।
रसलुब्धो यथा मत्स्यो लोहशक्तिन्न पश्यति।
सुखलुब्धस्तथा लोको यमलोकं न पश्यति।।
तत्त्वहीनो महादुःखं सहतेऽतीवदारुणम्।
तेनासौ क्रन्दते योगी दृष्ट्वा दुःखं जनस्य च।।
अपारस्य समुद्रस्य पारं हि तरितं मया।
इति मत्वा च गर्वित्वा वल्गन्ते तेन योगिनः।। इति।।

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये नवमसूत्रभाष्यम् समाप्तम् ॥**

# दशमसूत्रभाष्यम्

अष्टमसूत्रे सामान्यत उपक्षिप्तस्य परमुक्तिस्वरूपस्य विशिष्याकाङ्क्षायां तत्स्वरूपवादिनः स्वस्वमत्यनुसारेणाऽन्यथाऽन्यथा वदन्ति। तथाहि – चार्वाकस्तावत् सकलदुःखनिदानभूतदेहरूपात्मविनाश एव परमा मुक्तिरिति[1]। बौद्धास्तु केचिन्निरूपप्लवाचित्तसन्ततिरिति[2]। अन्ये[3] पुनश्चित्तसन्तानप्रागभावसहकृतचित्तसन्तानविच्छेद इति। आर्हतास्तु सततोर्ध्वगमनमिति। साङ्ख्यास्तु प्रकृतितद्विकारोपधानविलये पुरुषस्य स्वरूपेणावस्थानमिति। योगाः पुनस्सात्विकप्रकृतिभोग इति। तत्तत्भक्ताश्च गणपतीन्द्रसूर्यब्रह्मविष्णुरुद्राणां सालोक्यसामीप्यसारूप्यसायुज्यानीति। अन्ये तु[4] जीवस्य परमात्मनि लय इति। नैयायिका आत्यन्तिको दुःखोच्छेद इति। प्राभाकरा आत्यन्तिको दुःखप्रागभाव इति। भाट्टास्तु नित्यसुखाभिव्यक्तिरिति। अकर्तुस्सर्वज्ञादीश्वरान्मुक्तस्याधिक्यमुक्तिवादिनस्सर्वज्ञत्वे सति सर्वकर्तृत्वमिति सर्वकर्तृसर्वज्ञशिवसाम्यमुक्तिवादिष्वपि साम्यं चतुर्धा वदन्ति।

तथाहि – पाशुपता ईश्वरगतसर्वज्ञता सङ्क्रान्तिरिति[5]। महाव्रतास्तु स्वस्य तदा[6] सर्वज्ञतोत्पत्तिरिति। अपरे पुनरीश्वरसर्वज्ञता समावेश इति। शैवैकदेशिनः पुनस्सत्यमलावृतस्वगतसार्वज्ञ्यस्य सर्वकर्तृत्वस्य च मलविदारणेनाभिव्यक्तिरिति। अनिर्वचनीयाविद्यानिवृत्त्याऽऽनन्दावाप्तिरिति मायावादिन इति। तत्र शरीरनाशसन्तानविच्छेदजीवलयस्वरूपावस्थानात्यन्तिकदुःखप्रागभावध्वंसानां न परमपुरुषार्थत्वम्, अवेद्यत्वात्। नावेद्यः पुरुषार्थ इति हि न्यायविदः। अवेद्यत्वञ्चाद्येषु त्रिषु वेत्तुरेवोच्छेदात्। इतरेषु च तदानीं ज्ञानानङ्गीकारात्स्वयंप्रकाशत्वानभ्युपगमाच्च वेदनस्यासम्भवात्। गणाधिपत्यादिसारूप्यादीनाञ्च पुराणागमादिषु मुक्तित्वेनोक्तानामपि शरीरसम्बन्धात् तन्नियतदुःखादेरावश्यकत्वाच्च शरीरस्य कार्यस्यावश्यनाश्यत्वेन मुक्तस्य पुनरावृत्तिप्रसङ्गाच्च नापुनरावृत्तिलक्षणपरमपुरुषार्थत्वरूपपरममुक्तित्वम्। किन्तु गुणमुक्तित्वमेव। अत एव सततोर्ध्वगमनसात्विकप्रकृतिभोगयोर्न परममुक्तित्वम्। तयोरपि शरीरं विनाऽसम्भवेन तत्पक्षोक्तदोषानुषङ्गात्। चित्तसन्ततेरप्यप्रामाणिकत्वात् पुरुषानाकांक्षिततत्वाच्च न परममुक्तित्वम्। शिवाधिक्यस्यासम्भवादेव न मुक्तित्वम्।

सङ्क्रान्तिसाम्यस्य शिवे ज्ञानाभावापादकत्वेनायुक्तत्वान्न मुक्तित्वम्। समुत्पत्तिसाम्यमप्यनित्यत्वप्रसङ्गादनुपपन्नम्। समावेशसाम्यस्यापि स्वीयज्ञानाभि-

---

[1] (टी) परमा मुक्तिरितीति। वदन्तीत्यनुषज्य योजनीयम्। एवमुत्तरत्रापि।

[2] (टी) केचित्योगाचारादयः। चित्तसन्ततिरिति – चित्सन्ततिरित्यर्थः। एवमुत्तरत्रापि।

[3] (टी) अन्ये माध्यमिकाः।

[4] (टी) अन्ये तु पाञ्चरात्रतान्त्रिकाः।

[5] (टी) सङ्क्रान्तिरिति। वक्तृज्ञानस्य यथा बोद्धव्ये सङ्क्रान्तिस्तद्वदिति सङ्क्रान्तिवादिनोऽभिमानः। भूतावेश इव सार्वज्ञ्यावेश इत्यावेशवादिनः सत्यमलावृतेत्येतदद्वैतिमतव्यावृत्तये। मायावादिन इतीतिर्मतगणनपरिसमातौ।

[6] (टी) स्वस्य – जीवस्य। तदा – मुक्तिसमये।

भावकत्वेनानपेक्षितत्वादमुक्तित्वम्। अन्यादृशसाम्यस्याप्येकदेशसाम्यरूपत्वे सर्वसाधारणत्वादसाम्यरूपत्वात्। सर्वथा साम्येऽभेदपर्यवसानादस्मन्मतप्रवेशात्। सर्वेषाञ्च साम्यानां सुखदु:खाभावरूपत्वाभावात्परमपुरुषार्थरूपमुक्तित्वशङ्कापि नास्ति। नित्यसुखाभिव्यक्तिरित्यत्राभिव्यक्तिर्यद्यावरणाभिभवमात्रं तदाऽस्मन्मत प्रवेश एव। यदि ज्ञानं तदा तस्यानादित्वेऽपुरुषार्थत्वम्। जन्यत्वे मोक्षस्यानित्यत्वप्रसङ्ग:। अनिर्वचनीया विद्यायां प्रमाणाभावादेव न मायावाद्यभिमताऽपि मुक्तिरिति। एवं वाद्यन्तराभिमतमुक्तिषु दोषं दृष्ट्वा स्वयमदुष्टत्वात्बहुप्रमाणसिद्धत्वाच्चातुर्थिकन्यायानुग्रहाल्लौकिकदृष्ट्यनुसाराच्चावारक-विक्षेपकमलमायादिपाशक्षये परानन्दशिवतादात्म्याभिव्यक्तिरेव विदेहमुक्तिरिति प्रतिपादयन्पाशक्षयं दर्शयति –

# दशमसूत्रम्

**शिवेनैक्यङ्गतस्सिद्धस्तदधीनस्ववृत्तिक:।**
**मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान्॥ इति॥**

अत्र मलमायाद्यसंस्पृष्टश्शिवेनैक्यं गतस्स्वानुभूतिमान् सिद्धो भवतीति योजना। मलमाये आदिर्यस्य कर्मघटितबन्धसमुदायस्य स मलमायादिरिति तत्गुणसंविज्ञानो बहुव्रीहि:। मलमायाकर्मसमुदायस्समासार्थ:। इयं व्याख्या त्रिबन्धनपक्षे। चतुर्बन्धनपक्षे निरोधशक्त्याऽपि घटित:। पञ्चबन्धनपक्षे कुण्डलिन्याऽपि घटितस्समुदायस्समासार्थो द्रष्टव्य:। तेन मलादिनाऽसंस्पृष्ट इत्यर्थ:।

### मलासंस्पर्शविचार:

तत्र मलस्य तावत्साक्षात्कारेणापसारितत्वादसंस्पर्श:। अत्र मलासंस्पर्शो मलशक्तिविनाश इति केचित्। तन्न। मलशक्तेरव्याप्यवृत्तित्वे तदितरप्रदेशावच्छेदेन प्रकाशप्रसङ्गात्[7]। व्याप्यवृत्तित्वे तादृशीषु शक्तिष्वेकस्य मुक्तावेकस्या अपगमेऽप्यन्यासामवस्थानेन मक्त्यभावप्रसङ्गात्[8]। नचान्याच्छादनशक्तिसत्भावेऽपि तदाच्छादनशक्तेरपगमेन मुक्ति-सम्भव:, आच्छादनशक्तियुक्तनिबिडद्रव्यसम्बन्धे मुक्त्यङ्गीकारस्य युक्तिपराहतत्वात्[9], शक्तिविनाकृतस्याशक्तस्यावस्थानायोगाच्च। तस्मात्संयोगनाशो विश्लेष:। न च संयोगिनोरुभयो: सामीप्येनावस्थाने संयोगनाशोऽनुपपन्न:, व्यापकतया सर्वगतयोरपि जीवमलयो: संयोगात्यन्ताभाववत् व्यापकयोरपि तयोस्संयोगध्वंसस्योपपत्ते:। न च पुनस्संयोगोत्पत्त्याऽऽवरणप्रसङ्ग इति वाच्यम्। संयोगकारणस्यान्यतरकर्मादेरभावात्। शिवस्य[10]

[7] (टी) प्रकाशप्रसङ्गादिति। संसारदशायामित्यादि:।

[8] (टी) मुक्त्यभावप्रसङ्गात् – कस्यचिदपि मुक्तिर्न स्यादित्यर्थ:।

[9] (टी) युक्तिपराहतत्वादिति। इयमस्याच्छादिकेयमस्याच्छादिकेत्यत्र नियमाकभावेन सर्वासां मलशक्तीनां सर्वजीवसाधारण्यावश्यंभावात् निबिडव्यापकद्रव्यस्य मलस्य शक्त्यन्तरविशिष्टस्य मोक्तव्यं विमुच्य विभुं कञ्चनाणुमन्यत्रापसर्तुं तदाच्छादनमात्राद्विरन्तुं वाऽयुक्तत्वाच्छेत्यर्थ:।

[10] (टी) ननु विभुद्वयसंयोग एव नाङ्गीक्रियते। संयोगस्य विभागपूर्वकत्वनियमेन विभुद्वयस्य कदाऽपि पूर्वं विभागासम्भवात्। अङ्गीकारेऽपि न तस्य कर्माद्यपेक्षत्वम्, अनादित्वेनैव तस्य सिद्धे: । न तस्याव्याप्यवृत्तित्वञ्च। विभोर्निरवयवत्वात्। तथा च तदभावोऽपि नास्तीति दृष्टान्ता-सिद्धिरित्याशङ्क्याह – शिवस्येति।

धर्मिग्राहकमानेनागमादिना चावरणरहितस्वभावतया सिद्धत्वेन तदैक्यापन्नस्याप्यावरणासम्भवाच्च[11]। अत एव च मुक्तस्य शिवैक्यमेवाभ्युपेयम्, अन्यथा पुनरावरणप्रसङ्गात्। न च निवर्तकेन दीक्षादिना आवरणस्य निवृत्तत्वान्न पुनरावरणमिति युक्तम्। स्वत आवरणरहितस्वभावेनैक्यं विना पुनरावरणाभावस्यायुक्तत्वात्। दृष्टं हि स्वत आवरणरहितस्वभावस्य सूर्यस्य कदाप्यनाच्छादनम्। दीपप्रभादिसन्निधानात्तु निवृत्ततमसोऽपि चक्षुषः पुनरपि तमसाऽऽच्छादनम्। तस्मात्स्वतोऽनावृतशिवैक्य एव पुनराच्छादनं न युज्यते। तस्मादसम्बन्ध एवासंस्पर्शः। अत्र मायाशब्देन कलाद्यवनिपर्यन्तकार्याकारेण परिणता मायोच्यते। तादृश्या मायाया अपि न संस्पर्शः। कलादिकारणीभूतकर्मणो वक्ष्यमाण्रीत्या क्षये आवृतिविक्षेपवासनाद्वयक्षये च तत्परिणामकलादिनाशात्तत एव कारणाभावान्न पुनः कलाद्युत्पत्तिरिति। न च तथाऽपि किमर्थं मायाया असंस्पर्शोऽपेक्ष्यते मलविदारणेनैव शिवानन्दाभिव्यक्तेरिति वाच्यम्। आवरणनाशेऽपि दीपस्य वायुविक्षेपेणास्पष्टत्ववदत्राप्यावारकमलविदारणेऽपि विक्षेपरूपकलादिसत्वे शिवानन्दस्यास्पष्टताप्रसङ्गात्। तथा च शिवानन्दस्य स्पष्टानुभवार्थं मायेयकलाद्यस्पर्शोऽप्यपेक्ष्यत इति। कर्म च त्रिविधम्। सञ्चितं प्रारब्धमागामि च। तत्र सञ्चितस्य "सञ्चितं हन्ति दीक्षये"त्यादिवचनाद्दीक्षया,

तथा शुभाशुभं कर्म ज्ञानाग्निर्दहति क्षणात्।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात् कुरुतेऽर्जुना।। इति।

---

[11] (टी) आवरणासम्भवाच्चेति ननु यदि शिवाभेदे मुक्तिः तदा स तात्कालिक उतानादिः। नाद्यः। मुक्तेरनित्यत्वापत्तेः। नान्त्यः। यदि सदापि शिवाभिन्न एवाणुः तदा कथं तस्यैव मलेनाच्छादनं न शिवस्येत्येतदुपपन्नं भवतीति चेत् न। अणुस्तु मलावृत एव प्रत्यक्षादिनैव सिद्धः। शिवस्तु तदनावृत एव शास्त्रेण बोधितः। तदभेद एव मुक्तिरिति निगमागमादिना सिद्धमिति किमत्रानुपपन्नं प्रमाणसिद्धे ननु प्रमाणं प्रमेयस्य परिच्छेदकमेव। न तु तस्य कारकमपि। तत्र यद्यणुशिवावाच्छादितानाच्छादिताविष्येते तदा तयोर्भेदेन भवितव्यम्। तत्र कथमभेद इति चेत् न। भेदेऽप्यभेदस्य सम्भवात्। यथा गुणगुणिनोर्भेदेऽपि गुणवान्घट इति सामानाधिकरण्येनपरस्परापेक्षया चाभेदोऽपीष्यते तथा प्रकृतेऽपि नाहमीश्र इति भेदसिद्धावपि शस्त्रबोधितस्याभेदस्याप्यवश्याभ्युपेयत्वात्।

ननु शस्त्रेणापि कथं स्थितविपरीतार्थः प्रत्याययितुं शक्य इति चेन्न। वैपरीत्यासिद्धेः। तथाहि – न हि भेदविपरीतोऽभेदः। समबलत्वे खलु विरोधः। न च भेदाभेदौ समबलौ। येन विरोधस्स्यात्। किन्तु भेदो न्यूनः। न च वैपरीत्यमेव स्यादिति वाच्यम्। न्यूनत्वञ्च कार्याक्षमत्वमितरसन्निधाने। तच्च भेदस्यैवेति स एव न्यूनः। न च तर्हि संसारदशायामपि भेदकार्यन्न स्यादिति वाच्यम्। अभेदासन्निधानात्। न हि तदाऽभेदस्सन्निधत्ते। ननु तदानीमभेदाभावे कथं तस्य मुक्तौ सम्भवः, सम्भवे वा कथं मोक्षस्य नित्यत्वमिति चेत् न। न हि वयमसन्निधानपदेनासत्वं ब्रूमः, येन मोक्षस्यानित्यत्वमापादयेम्। किन्त्वनभिव्यक्तिमसन्निधानमभिव्यक्तिञ्च सन्निधानं ब्रूमः। सत्यप्यभेदे संसारदशायामस्त्यनभिव्यक्तिरूपमसन्निधानं तस्येति निरंकुशमेव भेदस्य तदा कार्यकारित्वमिति। नन्वेवं मुक्तावपि भेदाभिव्यक्त्यावश्यकत्वेनाभेदस्यापि कार्यकारित्वं न स्यादिति चेन्न। इष्टापत्तेः। न हि वयं मुक्तौ शिवाभेदाभिव्यक्त्या स्वस्य सार्वज्ञ्यादिविशिष्टस्वीयशिवस्वरूपस्फुरणमन्तरा किञ्चित् कार्यमभ्युपगच्छाम इति। ननु तर्हि मलविदारणरूपं कार्यमपि न स्यादिति संसारावैलक्षण्यमेव स्यान्मुक्तेरिति चेन्न। तस्याकार्यत्वात्। नह्यालोकेन तमोविदारणरूपन्नाम किञ्चित्कार्यं क्रियते, किन्तु स्वयमेवालोकसन्निधाने विरोधात्तमो नश्यति यथा तथैवेदमपि । न च तथा भेदबुद्धेस्स्वसन्निधानमात्रेण द्ःखाद्युत्पादकत्वं, किन्तु प्रवृत्त्याद्युत्पत्तिद्वारैवेत्यस्ति महद्वैलक्षण्यं भेदाभेदबुध्योरिति।

प्रारब्धं भोगतो नश्येच्छेषं ज्ञानेन दह्यते।

इत्यादिवचनात् ज्ञानेन वा यथा योगन्नाशात्तदस्पर्श इति केचित्। वयन्तु – "सञ्चितस्य दीक्षयैव निवृत्तिः। शेषं ज्ञानेन दह्यत" इत्यादौ ज्ञानशब्देन ज्ञानहेतुत्वाद्दीक्षैवाभिधीयते। दीक्षायास्तत्र निरपेक्षसाधनत्वबोधनेन ज्ञानस्यापि तत्र हेतुत्वाभ्युपगमेऽष्टदोषदुष्टविकल्पप्रसङ्गात्। काशीमरणादिस्थलेऽपि चाक्षुषादिदीक्षया सञ्चितकर्मनिबर्हणसम्भवादिति ब्रूमः। अत्र यदुक्तं **नैयायिकादिभिः** –

अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।।

इत्यादिवचनान्न भोगं विना ज्ञानेन दीक्षया वा कर्मणो नाशः, कर्मणो ज्ञानादिनाश्यत्ववचनन्तु ज्ञानादिना कायव्यूहे सति परंपरया भोगेन नाश्यमित्येवं परम्। अत एव **सौभर्यादीनां** ज्ञानिनामपि कायव्यूहेन भोगः पुराणेषु श्रूयमाण उपपद्यत इति तदपाकृतं भवति।

ज्ञानाग्निस्सर्वकर्माणि भस्मसात् कुरुतेऽर्जुना। इति।
प्रारब्धं भोगतो नश्येच्छेषं ज्ञानेन दह्यते। इति,

कर्मणां ज्ञाननाश्यत्वस्वारस्य व्यवस्थावचनानुसारेणावश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभमित्यादिकर्मणां भोगैकनाश्यत्ववचनस्य प्रारब्धकर्मविषयत्वेनैव संकोचस्य कर्तुं युक्तत्वात्। किञ्च त्वयाऽपि भोगं विनाऽपि कीर्तनकर्मनाशापारागमनप्रायश्चित्तादिभिः कर्मणां नाशाभ्युपगमादवश्यकर्तव्ये संकोचे शब्दबोधितनाशकानाश्यकर्मविषयत्वेनैव तद्वचनसंकोचः क्रियते। न तु कीर्तनादितत्तदनाश्यकर्मविषयत्वेन, गौरवात्। अशक्यपरिगणनत्वाच्च। अन्यथाज्ञानानाश्येत्यपि तद्विशेषणीयमेव। तुल्यत्वात्। प्रारब्धकर्मनानात्वेन बहुजन्मानुवृत्तेः कायव्यूहादिकमप्युपपद्यते। प्रारब्धकर्मणस्तु भोगेनैव क्षयात्तेनाप्यसंस्पर्शः। यद्यपि "ज्ञानाग्निस्सर्वकर्माणी"ति सर्वकर्मणां ज्ञाननाश्यत्वं **भगवतीतायां** श्रूयते। यद्यपि च **शिवज्ञानागमे** – "यथा वह्निर्महादीप्त" इत्यादावपि। तथाऽपि सर्वकर्माणीति न सामान्यपरम्। किन्तु महान्त्यपि ब्रह्महत्यादीनि नश्यन्तीत्येवं परम्।

किञ्च प्रारब्धं भोगतो नश्येदिति विशेषव्यवस्थावचनानुरोधेन जीवन्मुक्तिप्रतिपादकवचनानुरोधेन च तत्र सर्वशब्दस्याप्रारब्धसर्वविषयत्वं कल्प्यते। तिरोधानशक्तिरपि मलस्यापसारितत्वात् भोगसाधनस्य कर्मणो नष्टत्वेन तदर्थस्य पुनरावारकत्वास्यासम्भवात्तस्मिन् साकुण्ठितैव न पुनः प्रवर्तत इति तस्याप्यसंस्पर्शः। एवं कुण्डलिन्या अपि। यद्यपि कुण्डलिनीप्रभवतत्त्वेषु परमो भोगः, तथाऽपि तस्यापि परममुक्तिनिरोधनिबन्धनत्वात्तन्निवृत्तिरपेक्षिता। एवं आगामीतरपाशक्षयं सिद्धवत् कृत्यागामिकर्मपाशासंस्पर्शे हेतुमाह – **तदधीनस्ववृत्तिक इति।** तदधीना शिवकर्तृत्वेनैव निर्वर्त्यमाना स्वीयावृत्तिर्धर्माधर्मात्मककर्मानुष्ठानं यस्येति विग्रहः। तस्य धर्माधर्मात्मककर्मानुष्ठानेऽपि न धर्माधर्मादिसंस्पर्शः। तस्य मलनिवृत्त्या शिवैक्यापन्नत्वेन तदाचरणस्य शिवाचरणरूपत्वात् शिवाचरणस्य च धर्माधर्महेतुत्वाभावात्। किञ्च – प्रारब्धकर्मवासनाभ्यां विहितनिषिद्धयोः कृतयोरपि तत्त्वज्ञानसद्भावेनाङ्गेन भित्त्यां लाक्षाकलिकायाश्चित्र इव न धर्माधर्मयोर्जनकतेति तत्र तत्र विस्तरेणोक्तम्। किञ्च

मूलभूतस्यानादिकर्मणो विनाशादागामिकर्मासंस्पर्शः।

तथाहि – सञ्चितप्रारब्धागामिभेदेन त्रिविधस्य प्रवाहानादिकर्मणो मूलभूतं स्वतोऽनादिप्रतिपुरुषनियतं किञ्चित्कर्मास्ति। तदनङ्गीकारे नानाविधानां कर्मणां उत्पत्त्ययोगात्। नानाविधस्य कार्यस्य तादृशैककारणजन्यतायाः प्रपञ्चे दर्शनात्। देहादेस्तत्तदीयत्वप्रतिनियमप्रयोजकेऽवश्यवाच्ये कर्मान्तरणगततदीयभावायत्ततत्तदीयभावस्य कर्मणः प्रयोजकत्वकल्पने गौरवेण स्वत एव तदीयस्य कस्यचित्कर्मणो नियामकत्वौचित्याच्च। यथोक्तं **श्रीमत्किरणे** –

यथाऽनादिर्मलस्तस्य कर्माप्येवमनादिकम्। इति।

अत्र स्वत एवानादेः मलस्य दृष्टान्तीकरणात्कर्मणोऽपि स्वतोऽनादित्वमेव प्रतीयते। न प्रवाहानादित्वम्। एवञ्च मूलभूतस्य कर्मणो दीक्षया शोधनेन विनाशे आगामिकर्मणां नोत्पत्तिः। न चैवं प्रारब्धस्यापि कर्मणोऽपगमप्रसङ्गः। छिन्नमूलस्य वृक्षस्य पल्लवाद्यनुत्पत्तावपि निष्पन्नस्य पत्रादेः कतिपयदिनपर्यन्तमवस्थानवत्कतिपयकालं प्रारब्धस्याप्यवस्थानोपपत्तेः। न च कर्मासंस्पर्शः किमर्थमपेक्षित इति वाच्यम्। कर्मसत्वे मलमायाद्यसंस्पर्शस्याप्यसम्भवात्तदर्थं कर्मासंस्पर्शस्यापि पुरुषार्थतयापेक्षोपपत्तेः। एवं पाशक्षयं प्रतिपाद्य सर्वदुःखनिदानभूताशेषपाशक्षय एव न केवलमपवर्गः, किन्तु वाय्वपगमे तरङ्गादीनां समुद्र इवाखण्डानन्दरूपे शिव एकीभावेनावस्थानमपीत्याह – **शिवेनेति।** शिवशब्देन च प्रयोजनत्वेकाङ्क्षिताखण्डानन्दस्वरूपमुच्यते। अत्रैक्यशब्देन घटाकाशमहाकाशयोरिव बिम्बप्रतिबिम्बयोरिव च स्वत एवात्यन्ताभिन्नयोर्जीवशिवयोरुपाधिनिवृत्तिमात्रकृतमैक्यं न विवक्षितम्। सिद्धान्तशैवागमेषु तत्र तत्र बन्धमुक्त्याद्यव्यवस्थाप्रसङ्गेनैकाम्यनिषेधात्। नापि समुद्रगताया नद्या इव नीरक्षीरयोरिव वा पूर्वसिद्धभेदनाशेनैक्यं विवक्षितम्। जीवलयमुक्तिपक्षोक्तदोषप्रसङ्गात् –

शिवं शक्त्यादिभिस्सार्धं पश्यत्यात्मागतावृतिः।

इति मुक्त्यवस्थायामपि मुक्तशिवयोः कर्तृकर्मभावेन भेदश्रवणाच्च। नाप्यत्यन्तभिन्नयोरेव सर्वविषयज्ञानक्रियाशक्तिमत्वधर्मैक्येनैक्यम्। तत्र तत्र बहुभिरुपपत्तिभिरनुगृहीतधर्म्यैक्यप्रतिपादकपूर्वोक्तनिगमागमादीनामनाञ्जस्यप्रसङ्गात्। तस्मात्गुणगुणिनोरिव प्रकाशाश्रययोरिव मुक्तावपि सत्येवेषत्भेदेऽभेदस्तत्पर्यायस्तादात्म्यम्। वैशिष्ट्यमेवैक्यं प्रकृते विवक्षितम्। तत्रापि गतशब्देन तप्तायःपिण्डस्याग्नितादात्म्यमिव पूर्वमसदिदानीं जायत इति न विवक्षितम्। उत्पन्नस्य भावस्य विनाशित्वनियमेन मुक्तेरनित्यत्वप्रसङ्गात्, संसारावस्थायामपि तस्य सत एवावृतत्वप्रतीतेश्च। किन्तु अरणिप्रभृतिषु काष्ठेषु तादात्म्येनावस्थितस्यैव काष्ठाकारतिरोहितस्य वह्नेः पश्चान्मथनक्रियादग्धावारकगुरुकठिनद्रवपार्थिवाप्यावयवरूपकाष्ठाकारस्याभिव्यक्तिरिवाभिव्यक्तिमात्रमेवैक्यं विवक्षितम्। न च तत्र काष्ठेषु कर्षणादिना अविद्यमानवह्निरेव तत्रोत्पद्यते। पूर्वसत्वेऽपि वा वह्नेर्न काष्ठतादात्म्यम्। अनुपादानोपादेययोर्द्रव्ययोः काष्ठाग्न्योस्तादात्म्ये प्रमाणाभावात्।

तथा च दृष्टान्तासिद्धिरिति वाच्यम्। वर्तिष्वपूर्ववह्न्युत्पादकवह्न्यन्तरसंयोगस्येवात्र वह्न्यन्तरसंयोगस्याभावेनाविद्यमानवह्न्यन्तरोत्पत्तिकल्पनासम्भवात्। तस्य पूर्वं सत्वेऽपि

मथनान्वयव्यतिरेकस्य मणिरूपे शाणघर्षणान्वयव्यतिरेकस्येवावारकनिरासविषयतया-ऽन्यथासिद्धत्वात्। न च तादृशतादात्म्ये प्रमाणाभावोऽपि पिण्डीभूतो वह्निरित्यादि वह्निकाष्ठसामानाधिकरण्यप्रतीतिव्यवहारयोरेव तत्र मानत्वात्। यथा चतुष्कोणो-ऽग्निरित्यत्र नह्युपादानोपादेययोरपि मृद्घटयोस्तादात्म्ये मृत्घट इति सामानाधि-करण्यबुद्धिव्यपदेशाभ्यामन्यत्प्रमाणमस्तीति। तस्मात्सुखरूपेण शिवेनैक्यमीषत्भेदगर्भाभेदः। तच्च नित्यम्। तत्गत इवावरणापनयादिति शिवेनैक्यंगत इत्यस्यार्थ इति। एवञ्च सति वैदिकेन महाकाशघटाकाशदृष्टान्तेनागमिकेन समुद्रनदीदृष्टान्तेन च क्षीरे क्षीरं जले जलमिति क्षीरनीरक्षिप्तक्षीरनीरदृष्टान्तेनापि चोक्ततादात्म्यमात्रसाधर्म्यविवक्षया मुक्तस्योक्तशिवैक्यमेव प्रतिपाद्यते। नत्वात्यन्तिकाभेदांशपूर्वसिद्धभेदहान्यंशावपि दृष्टान्तदार्ष्टान्तिकयोस्तत्र विवक्षितौ। न हि दृष्टान्तदार्ष्टान्तिकयोस्तत्र सर्वात्मना साम्यं विवक्षणीयम्। तयोरभेदापत्तेरिति ध्येयम्।

अनेन मुक्तौ शिवानन्दाविर्भावप्रदर्शनेन दुःखाभावतत्साधनपरिहारयोः पुरुषार्थयोरपि सुखसंवळितयोरेव पुरुषार्थत्वम्। न केवलयोः। न च दुःखाभावादिस्थले विषयसम्बन्धा-भावात्सुखबाध इति वाच्यम्। विषयसम्बन्धवत् प्राप्तदुःखतत्साधनपरिहारस्यापि सुखहेतुत्वात्। अत एवोढतृणकाष्ठादिभारस्य तत्त्यागानन्तरं सुखानुभवोऽबाधितः। तथा च तव केवलाया मलनिवृत्तेस्सुखानुत्पादिकाया न परमपुरुषार्थत्वमिति यद्दूषणं तदपाकृतम्। ननु सुखरूपशिवैक्याभिव्यक्तावपि न तावता पुरुषार्थत्वम्। वस्तुतो निवृत्तावरणस्यापि ग्रैवेयकस्य तत्साक्षात्कारं विना लोके पुरुषार्थत्वादृष्टेर्नावेद्यः पुरुषार्थ इति न्यायविदां वचनाच्चेत्याशङ्क्य स्वरूपदृशा तदनुभवोऽप्यस्तीत्याह – **स्वानुभूतिमानिति।** स्वानुभूतिरुक्तशिवानुभवः। न च शिवानुभवः कथं स्वानुभूतिपदेनाभिधीयत इति युक्तम्। शिवैक्यापत्त्या शिवस्य स्वपदेन बोधनसम्भवात्। स च स्वरूपचिदेव। तस्या एव शिवतादात्म्यात्। न तु चिच्छक्तिः, तस्या बाह्यगोचरस्वभावत्वात्। प्रमाणजन्यज्ञानन्तु तदानीं न सम्भवत्येव। मतुबपि कल्पितभेदमाश्रित्य।

अत्र स्वानुभूतिपदेन च शिवस्वरूपसुखस्य लालाजलरसवत् स्वानुभवैक-वेद्यत्वमेव न तु परिच्छेत्तुं वक्तुं वा शक्यत इति सूच्यते। तादृशविषय एव स्वानुभूतिशब्दप्रसिद्धेः। तस्मान्मलमायाकर्मतिरोधानशक्तिकुण्डलिनीनां यथार्हमसंस्पर्शे स्वरूपचिद्दृशानुभूयमानाविर्भूतपरशिवानन्द एव परममुक्तिः फलमिति स्थितम्। अत्रानुभूतिमानित्यनेन मुक्तौ ज्ञानानङ्गीकर्तॄणां चार्वाकबौद्धैकदेशिनैयायिकप्राभाकरादीनां मतस्य निरासः स्वार्थेन स्वपदेन सङ्क्रान्तिसमुत्पत्तिसमावेशवादिनामानन्दस्वरूपार्थेन शिवपदेन मुक्तौ ज्ञानमभ्युपेत्यानन्दमनभ्युपगच्छतां सांख्यशैवैकदेशिनां कलासंस्पृष्ट इत्यनेन कर्ममात्रविनाशमभ्युपगच्छत ऐकभाविकस्य मायाद्यसंस्पृष्ट इत्यनेनाभिव्यक्तेरुत्पत्तिवादिनां **भट्टादीनां** देहसाहित्येन भोगाङ्गीकर्तॄणां योगादीनामिति द्रष्टव्यम्।।

**। दशमसूत्रसङ्ग्रहभाष्यं समाप्तम् ।**

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यायते –

एवं पूर्वसूत्रे जीवन्मुक्तिस्वरूपं निरूपितम्। अधुना परममुक्तिस्वरूपाकाङ्क्षायां मुक्तौ ज्ञानानङ्गीकर्तॄणां चार्वाकबौद्धैकदेशिनैयायिकप्राभाकरादीनां ज्ञानमभ्युपेत्यानन्द-मनभ्युपगन्तॄणां साङ्ख्यशैवैकदेशिनामानन्दमभ्युपेत्य तदभिव्यक्तेरुत्पत्तिमभ्युपगच्छतां **भट्टादीनां** देहसाहित्येन भोगमभ्युपगच्छतां योगादीनां परमशिवज्ञानसङ्क्रमादिवादिनाञ्च मतनिरासपूर्वकं स्वाभिमतां परममुक्तिं दर्शयन् पाशक्षयमाह – **शिवेनेति।**

अत्रानुभूतिमानित्यनेन मुक्तौ ज्ञानानभ्युपगन्तॄणां मतं निरस्तम्। स्वानुभूतिमानित्यनेन स्वा स्वीया सहजा अनभूतिर्यस्य स स्वानुभूतिमान् न तु परकीयाऽनुभीतिः समाविष्टा सङ्क्रान्ता वा नापि नूतनतयोत्पन्नेत्यर्थप्रतिपादकेन सङ्क्रान्तिसमावेशोत्पत्तिवादिनां आनन्दस्वरूपार्थेन शिवपदेन सुखानङ्गीकर्तॄणां मलासंस्पृष्ट इत्यनेन कर्ममात्रविनाशान्मुक्तिमभ्युपगच्छत ऐकभविकस्य मायाद्यसंस्पृष्ट इत्यनेनाभिव्यक्तेरुत्पत्तिवादिनां देहसाहित्येन भोगाङ्गीकर्तॄणाञ्च मतं निरस्तम्। तत्र च हेतुगर्भं विशेषणं तदधीनस्ववृत्तिक इति। अयंभावः – ज्ञानाभावे तस्य पुरुषार्थत्वमेव नास्ति, **"नावेद्यः पुरुषार्थ" इति न्यायात्**। तथा सुखाभावेऽपि न पुरुषार्थत्वम्। अभिव्यक्तेरुत्पत्तेर्वाभ्युपगमे देहाद्यभ्युपगमे च मुक्तस्य परावृत्तिः प्रसज्यते। परकीयज्ञानादेस्समावेशेऽपि स्वीयज्ञानाभिभवेनापुरुषार्थत्वमेव। तस्मान्न पराभिमता मुक्तिर्युज्यत इति। एवं परपक्षेषु निरस्तेषु स्वाभिमतं पक्षमाह – **शिवेनैक्यं गत इति**। शिवैक्यमेव परममुक्तिरित्यर्थः। परमुक्तिनिरासप्रकारश्च प्रसज्यते।।

### चार्वाकमुक्तिनिरासः

तथाहि – चार्वाकस्तावद्देहस्यैव दुःखनिदानत्वात्तद्विनाशे दुःखानुत्पत्तेर्देहनाशमेव मोक्षमाहुः। तन्न। तन्मते देहस्यैवात्मत्वेनात्मनाशस्यापुरुषार्थत्वात्। पुरुषार्थो हि तत्प्रेप्सुना भुज्यमानस्सन्नेव पुरुषार्थः। न च स्वात्मनाशस्स्वेन भुज्यते। देहस्य दुःखनिदानत्ववत् सुखनिदानत्वस्यापि सत्भावेन तन्नाशस्योद्देश्यत्वायोगाच्च।।

### साङ्ख्यमुक्तिनिरासः

साङ्ख्यास्तु प्रकृतिपुरुषविवेकख्यातौ प्रकृतिकार्यमहदाद्यनुपाधानेनावस्थानरूपं कैवल्यं मोक्षमाचक्षते। तथाहि प्रकृतिपुरुषसंयोगकृतो महदादिसर्गः, योगश्च न सम्बन्धमात्रम्। किन्तु भोक्तृभोग्यतारूपः। तस्यैवाचेतनप्रवृत्तिप्रयोजकत्वात्। भोक्तृत्वञ्च पुरुषस्याविवेककृतं, बुद्धेरेव स्वतो भोक्तृत्वेन निर्लेपस्यात्मनो भोगाभावात्। अतोऽविवेकदशायामेव भोगरूपपुरुषार्थसम्भवात्तत्र युक्तो महदादिसर्गः। विवेकबोधे तु पुरुषार्थाभावान्महदाद्यनिष्पत्तेः तदुपधानविरहेणैवावस्थानम्। एवञ्च यद्यपि महदादिसम्बन्धतदभावात्मकौ बन्धमोक्षौ प्रकृतेरेव, तथाऽपि भृत्यगतौ जयपराजयौ स्वामिनीव पुरुष उपचर्येते इति। तदुक्तमभियुक्तैः –

ततः प्रकृतिभोक्तृत्वे निवृत्ते सति सर्वथा।
कैवल्यं मोक्षमित्याहुरेवं साङ्ख्या निरीश्वराः।। इति।

**उक्तञ्चेश्वरकृष्णेन** –

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थित स्वस्थः।।
दृष्टा मयेत्युपेक्षेतैको द्रष्टाऽहमित्यन्याः।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य।।
तस्मान्न बध्यते नापि मुच्यते
नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च
ते च पुरुषाश्रया प्रकृतिः।। इति।

तेन पूर्वोक्तेन तत्त्वज्ञानेनेत्यर्थः। अर्थवशात्विवेकज्ञानस्य विषयोऽर्थः तद्वशात् – **तत्सामर्थ्यादित्यर्थः।** सप्तरूपविनिवृतां तत्त्वज्ञानव्यतिरिक्ताबुद्धिधर्मास्सप्तरूपाणि धर्मादीनि – **तैर्विहीनामित्यर्थः**। प्रकृतिं तत्कार्यां बुद्धिमित्यर्थः। प्रेक्षकवदवस्थितः – **उदासीनतयाऽवस्थित** इत्यर्थः। ननु भोक्तृत्वयोग्यतायाश्चेतनताया भोग्यत्वयोग्यताया जडतायाश्च सत्भावेन विवेकख्यातिसत्वेपि भोक्तृभोग्यसम्बन्धस्य सर्गहेतोस्सत्भावात् कथं प्रसवनिवृत्तिरिति शङ्कापरिहारमाह – **दृष्टा मयेति**। विवेकबोधे सत्यविवेकनिबन्धनभोक्तृत्वाभावेन प्रयोजनाभावान्न पुनस्सर्ग इत्यर्थः। तदयुक्तं, चैतन्यप्रकाशविरहेण पाषाणताकल्पेऽस्मिन् कैवल्ये तत्तत्भुवनभोगपरित्यागेन लिप्सायाः अनुदयात्। किञ्च त्वन्मते गुणपुरुषविवेकदर्शनमप्ययुक्तम्। तथाहि – किं बुद्धिस्था गुणास्स्वविवेकं दर्शयन्ति। अथवा पुरुषस्स्वयमेव पश्यति। नाद्यः। अपरिमितानां परिमितायां बुद्धौ साकल्येन प्रतिफलनासम्भवेन एकदेशेन प्रतिफलने मिथ्याज्ञानत्वेन मोक्षोपायत्वासम्भवात्। न द्वितीयः। बुध्युपारूढ एव पुरुषेण दृश्यत इत्युक्तत्वात्सिद्धान्तविरोधात्। तदुक्तं **मोक्षकारिकायाम्** –

मुक्त्वा योगफलं रम्यं भोगान् सांसारिकानपि।
अचैतन्यं कथञ्चान्ये कैवल्यं मोक्षमूचिरे।।
स्वचैतन्यविनाशाय स्वतस्सन्तः कथञ्च ते।
विवेकदर्शनाभ्यासप्रयासं कुर्वतेऽन्वहम्।।
विवेको नाम वैधर्म्यं गुणानां पुरुषस्य च।
तत्र यद्दर्शनं तत्तु विचारेनोपपद्यते।।
कर्तृप्रसवङ्कीर्णधर्मका हि गुणावयम्।
त्वन्नेति पुरुषस्यैवं बुद्धिस्था दर्शयन्ति ते।।
तथा दर्शितदर्शित्वे मिथ्यादर्शी पुमान् भवेत्।
मिथ्यादर्शनसाध्यत्वं मोक्षस्येति सुदुर्घटम्।।
कर्तृत्वादिगुणा ह्येते गुणानाहमितीदृशि।
दर्शने पुरुषस्येष्टे हता दर्शितदर्शिताः।। इति।

अत्र योगफलं सादाशिवं भोगमित्यर्थः। सन्त इति सम्बोधनम्। कर्तृप्रसवसङ्कीर्ण-धर्मकाः – **कर्तृसङ्कीर्णशब्दौ भावपरौ**। कर्तृत्वं प्रसवसङ्कीर्णत्वञ्च धर्मा

येषान्ते तथोक्ताः। अत एवोत्तरत्र कर्तृत्वादिगुणा इत्युक्तम्। तत्रादिशब्देन प्रसवसङ्कीर्णत्वं निर्दिश्यते। किञ्च गुणपुरुषविवेकेन गुणतत्त्वपर्यन्तभोक्तृत्वं निवर्तनाम्। तदुपरिस्थितसाङ्ख्या परिदृष्टरागविद्यादितत्त्वविषयाणां भोगभावेनापरिक्षया तत्तत्भोक्तृत्वसम्भवेन कैवल्यं युक्तम्। न च गुणनिवृत्त्या बुध्यादीनामपि निवृत्तेः कथं करणैर्विना भोग इति वाच्यम्। करणसम्बन्ध-गुणप्रवृत्तेः कारणत्वानङ्गीकारात्कर्मणां कारणत्वोपपत्तेः। तदुक्तम् –

कर्मतश्च शरीराणि विषयाः करणानि च। इति।

कर्माणि च रागादितत्त्वभोग्यानि न निवृत्तानीति युक्तं करणसम्बन्ध इति भोक्तृत्वं सम्भवत्येव। तदुक्तं **परमोक्षनिरासकारिकायाम्** –

गुणतत्त्वोर्ध्वभोग्यस्य कर्मणेऽनुपलब्धितः।
कैवल्यमपि साङ्ख्यानां नैव युक्तमसङ्क्षयात्।। इति।

अनुपलब्धितः – **अभोगेनेत्यर्थः**।

### माध्यमिकमोक्षनिरासः

ज्ञानसन्ततिविच्छेदो मोक्ष इति पक्षोऽपि चार्वाकमतनिरासेन निरस्तः।।

### योगाचारमोक्षनिरासः

विषयोपरागाभावेन निरुपप्लवा ज्ञानसन्ततिर्मोक्ष इति मतमप्ययुक्तम्। ज्ञानहेतोश्शरीरादेरभावात्। न च विषयावच्छिन्नज्ञान एव शरीरस्य हेतुता। लाघवेन ज्ञानमात्र एव तस्य हेतुत्वात्, ज्ञानस्य क्षणिकतायास्तृतीयसूत्रे निरस्तत्वाच्च।।

### नैयायिकमोक्षनिरासः

नैयायिकास्तु आत्यन्तिको दुःखोच्छेदो मोक्ष इत्याहुः। आत्यन्तिकत्वञ्च समानाधिकरणदुः-खप्रागभावासमानकालीनत्वम्। समानाधिकरणत्वं समानदेशत्वं दुःखस्य तत्प्रागभावस्य वा विशेषणम्। न च[12] दुःखस्यानुत्पत्तौ तद्ध्वंसनमशक्यं उत्पत्तौ तु तद्ज्ञानादेव नाश इति पुरुषप्रवृत्तिवैफल्यमिति वाच्यम्। उक्तरूपस्य दुःखध्वंसस्य मूलोच्छेदनद्वारा[13] पुरुषयत्नसाध्यत्वात्। असति हि पुरुषयत्ने तत्त्वज्ञानानिष्पत्त्या रागाद्यनिवृत्तौ पुनः पुनर्धर्मा-धर्मार्जने तादृशो दुःखध्वंसो न निष्पद्येत। सति तु तस्मिन् तत्त्वज्ञानेन रागादिनिवृत्त्या दोषाधी-नयोर्धर्माधर्मयोरनिष्पत्तौ सञ्चितानाञ्च कायव्यूहोत्पादनेन भोगद्वारा क्षये सति निष्पद्यते। तदुक्तं **न्यायसूत्रकृता भगवताऽक्षपादेन** – "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग" इति। न च सुखस्यापि हानेनास्यापुरुषार्थत्वम्। सुखदुःखाभावयोः पृथक् पुरुषार्थत्वेनैकतराभावस्यान्यार्थप्रवृत्तावप्रतिबन्धकत्वात्।

सुखस्य दुःखानुषङ्गनियमेन दुःखभीरुणा विषसम्पृक्तमधुभोजनवत्त्याज्यत्वाच्चेति। तदपि

---

[12] (टि) यथा श्रुतार्थग्राही योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वमवलम्ब्य शङ्कते – न चेति।

[13] (टि) मूलमत्र मिथ्याज्ञानं शरीरादावात्मत्वभ्रमः।

न। दुःखाभावस्य सतोऽपि तदानीमज्ञायमानत्वेनापुरुषार्थत्वात्। ननु दुःखाभावस्य स्वरूपेण पुरुषार्थत्वम्, न तु ज्ञायमानतया। न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः। अपि तु दुःखं मे मा भूत् दुःखं म इदानीं जायमानं नश्यत्वित्येवम्। सुखादावपि स्वरूपेणैव पुरुषार्थत्वं, ज्ञानन्तु नान्तरीयकमेवेति चेन्न। अज्ञायमानस्य दुःखाभावस्य मूर्च्छादिसाधरण्येनापुरुषार्थत्वात्। तदा ज्ञानाभावप्रतिसन्धावतां तत्रेच्छाविरहात्। न च दुःखाभावोऽपि तदा ज्ञायत इति युक्तम्। तथा सति तत्र[14] दुःखाभावस्य जनकत्वेन तत्प्रागभावसमानकालीनतयोक्तरूपत्वानापत्तेः[15] सुखान्तमुक्तौ[16] सुखदशायामपि मुक्तिप्रसङ्गपरिहाराय दुःखप्रागभावेत्यत्र दुःखपदस्यैकविंशतिप्रभेदभिन्नदुःखपरत्वस्यावश्यकत्वात्।

न च दुःखदशोत्पन्नेन विनश्यदवस्थेन दुःखाभावो विषयीक्रियत इति वाच्यम्। तस्य विषयाजन्यतया लौकिकसाक्षात्कारत्वविरहेण पुरुषार्थत्वाप्रयोजकत्वात्। तदुक्तम् –

दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते।
न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते[17] सुधीः।। इति।

एतेनात्यन्तिको दुःखसाधनध्वंसो मुक्तिरिति न्यायैकदेशिमतमप्यपास्तम्।।

## प्राभाकरमोक्षनिरासः

प्राभाकरास्तु – "आत्यन्तिको दुःखानुत्पादो मोक्षः, आत्यन्तिकत्वञ्च प्रतियोग्यनुत्पादकत्वम्। तदपि प्रतियोग्युत्पादकध्वंससाहित्यम्[18]। अतो न संसारदशायामपि मोक्षप्रसङ्गः। नचानुत्पादस्य प्रागभावरूपत्वेन प्रतियोग्युत्पत्त्यापत्तिः। सहकार्यभावेनाजनकत्वोपपत्तेः। न च प्रतियोगिजनकत्वाभावे तस्य प्रागभावलक्षणासम्भवः, "प्रतियोगिजननयोग्यत्वेन प्रागभावत्वोपपत्ते"रित्याहुः। तन्न। प्रतियोगिजनकत्वे तस्यावच्छेदकं महाप्रळयसमयानवस्थायित्वे सति तद्विरहत्वमिति[19] नित्यत्वे[20] स्वरूपयोग्यताया अप्यभावात् कदाऽप्यनिष्पत्तौ प्रतियोगिनोऽप्रामाणिकत्वापाताच्च। प्रसक्तस्य[21] कण्टकादिवेधस्य निरासे तज्जन्यदुःखानुत्पादस्याप्यात्यन्तिकत्वेन संसारदशायामपि मुक्तिप्रसङ्गाच्च।।

---

[14] (टि) तत्र – दुःखाभावप्रत्यक्षे। न च परोक्षमेव तदा तज्ज्ञानमिष्यतामिति वाच्यम्। तस्य संसारदशायामपि सम्भवेन पुरुषार्थत्वाप्रयोजकत्वात्।

[15] (टि) उक्तरूपत्वानापत्तेरिति। दुःखप्रागभावासमानकालीनदुःखध्वंसरूपत्वानापत्तेरित्यर्थः।

[16] (टि) ननु मुक्तौ प्रत्यक्षीक्रियमाणो दुःखाभावस्तद्ध्वंसस्तदत्यन्ताभावो वाऽस्तु। तथा च नायन्दोष इत्याशङ्क्याह – सुखान्तेति।

[17] (टि) सुधीति। ननु नैयायिकेन नवीनेन केवलदुःखप्रागभावासमानाकालीनः प्रत्यक्षी क्रियमाणश्च दुःखध्वंस एव मोक्ष इतीष्यते चेत्किमुत्तरमिति चेत्सुखदुःखध्वंसादिप्रत्यक्षादिकमपि रागादिप्रयुक्तमिति मुक्तौ तदभावेन तथाऽभ्युपगन्तुमशक्यमित्येवोत्तरमिति गृहीतव्यम्।

[18] (टि) प्रतियोग्युत्पादकमन्ततो महाप्रळयव्यतिरिक्तकालादिकम्।

[19] (टि) तद्विरहत्वम् – प्रतियोग्यसमानाकालिकत्वम्।

[20] (टि) नित्यत्वे प्रागभावस्य महाप्रळयसमयानवस्थायित्वाभावात् योग्यत्वाभाव इति भावः।

[21] (टि) ननु दुःखत्वेन रूपेण प्रतियोगिनः प्रमाणसिद्धत्वात् तादृशदुःखव्यक्तेरनिष्पत्तावपि प्रसक्तिसम्भवात् महाप्रळयानवस्थायित्वमित्यस्य तदतिरिक्तकालवृत्तित्वमित्यर्थकत्वा च कुतो न योग्यताप्रागभावस्येत्याशङ्क्याह – प्रसक्तस्येति।

## आर्हतमोक्षनिरासः

आर्हतास्तु – मोहादिविगमेन सततोर्ध्वगमनं मोक्ष इत्याहुः। तथाहि – तत्र तावज्जीवाजीवास्रवसंवरनिर्जर–बन्धमोक्षास्सप्तपदार्थाः। तत्र जीवस्त्रिविधः। अनादिसिद्धबद्धमुक्तभेदात्। तत्रार्हन्ननादिसिद्धः। मोहाद्यावृतो बद्धः। व्यपेतबन्धो मुक्तः। अजीवोऽपि चतुर्विधः। पुद्गलाकाशधर्माधर्मास्तिकाय–भेदात्। एतेषु कालत्रयसम्बन्धात् कायवदनेकप्रदेशवत्वाच्चास्तिकायव्यपदेशः। तत्र पुद्गलास्तिकायष्षड्विधः, पृथिव्यादिचतुष्टयस्थावरजङ्गमभेदात्। तृणगुल्मलतादिस्थावरम्। जरायुजाण्डजस्वेदजोत्भिजभिन्नं जङ्गमम्। आकाशास्तिकायो द्विविधः। लोकाका–शास्तिकायोऽलोकाकाशस्तिकायश्चेति। लोकान्तर्गत आकाशः प्रथमः। बहिर्भूतो द्वितीयः। यत्र गमनं मोक्षः। अभ्युदयहेतुर्धर्मास्तिकायः। तद्विपरीतहेतुरधर्मास्तिकायः। आस्रावयति पुरुषं विषयेष्वितीन्द्रियप्रवृत्तिरास्रवः। संवृणोति निरुध्यास्रावमितीन्द्रियसमसमयमलब्धप्रतिष्ठं ध्यानं संवरः। तप्तशिलाधिरोहणकेशोल्लुञ्छनादितपसस्सञ्चयः कर्मणां जीर्णताहेतुतया निर्जरः। मोहादिस्वातन्त्र्यविघातकत्वात्बन्धः। मोक्षस्तूक्त एव। एते च पदार्थाः किं सन्तः, उदासन्त इति प्रश्ने सप्तभङ्गीनयोऽवतरणीयः। इह वादिनस्सत्वासत्वोभयरूपत्वानिर्वचनीयत्वा–श्रयणेन चतुर्विधाः। अनिर्वचनीयत्ववादिनोऽपि सदादिव्यामिश्रणात्[22] त्रिविधाः। तान् प्रत्युच्यते। स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति। स्याच्छब्दोऽयन्तिङन्तप्रतिरूपकोऽनैकान्तद्योतकः। ततश्च स्यादस्ति – तस्य सत्वमनैकान्तिकमित्यर्थः।

एवमुत्तरत्रापि। यदि ह्येतेषां सत्वादिकमैकान्तिकं स्यात्तदा सर्वत्र सर्वदा सर्वात्मना सत्वादसत्वादेश्च प्रवृत्तिनिवृत्त्यादिकमनुपपन्नं स्यात्। प्रवृत्तिविषयस्य प्रवृत्तेः पूर्वमपि लाभात्[23]। प्रवृत्तावप्यलाभाच्चेत्यनैकान्तिकत्वमेवास्थेयम्[24]। संसारदशायामधोगमनञ्चालघुभूतस्य कर्मबन्ध–नेन लोहपञ्जरान्तस्थितस्यालाबुकस्य जले क्षिप्तस्येव युक्तम्। ऊर्ध्वगमनमपि केवलस्य तस्यैव युक्तमेव।

तदुक्तम् –

> लोहपञ्जरसम्बद्धं यथा क्षिप्तं जलाशये।
> अलाबुकमधो याति तद्वज्जीवस्सबन्धनः।।
> लोहपञ्जरविच्छेदात् प्लवतेऽलाबुकं यथा।
> आरोहति तथा मोक्षं जीवो मोहादिसंक्षयात्।। इति।

तदयुक्तम्। ऊर्ध्वगमनस्य सुखदुःखाभावेतरत्वेनापुरुषार्थत्वात् आत्मनोऽणुपरिमाणस्य मध्यमपरिमाणस्य च तृतीयसूत्रे निरस्तत्वेन गमनासम्भवाच्च। अनैकान्तवादस्य विरोध–पराहतत्वाच्च।।

---

[22] (टि) त्रिविधा इति। केवलानिर्वचनीयत्ववादिव्यतिरिक्तास्त्रिविधा इत्यर्थः। यथा श्रुते सप्तभङ्गानुपपत्तेः।

[23] (टि) पूर्वमपि लाभादिति। सत्वैकान्तिकत्व इत्यादिः। लाभसम्भवादित्यर्थः।

[24] (टि) अलाभाच्चेति। असत्वैकान्तिकत्व इत्यादिः।

## भाट्टमोक्षनिरासः

भाट्टास्तु नित्यसुखाभिव्यक्तिर्मुक्तिरित्याहुः। तदपि न। नित्यत्वस्य सुखविशेषणत्वेऽभिव्यक्तिरनित्या नित्या वा। नाद्यः। पुनस्संसारप्रसङ्गात्। नापि द्वितीयः। पुरुषप्रवृत्तिवैफल्यापत्तेः। एतेनैव नित्यत्वस्याभिव्यक्तिविशेषणत्वमपि निरस्तम्।।

## मायावादिमोक्षनिरासः

अनिर्वचनीयाविद्यानिवृत्तिर्मुक्तिरिति केचित्। तदप्ययुक्तम्। अविद्यायां तैरेव प्रमाणोपदर्शनेन तस्याऽनिर्वचनीयत्वायोगात्।।

## सत्वभुक्तिमुक्तिनिरासः

केचित्तु पुरुषस्य प्रकृतिभोक्तृत्वमनादि। सादित्वे ततः पूर्वं पुरुषस्यापि सत्वे मानाभावेन तस्यापि सादित्वप्रसङ्गात्। नचानादेर्निवृत्तिः कल्पयितुं युक्ता। पुरुषस्यापि निवृत्त्यापत्तेः। ततो मुक्तिदशायामप्यस्यैव भोक्तृत्वम्। इयांस्तु भेदः। यत्संसारदशायां कर्मवशेन दुःखमोहान्तरितसुखरूपा प्रकृतिर्भोग्या, मुक्तौ कर्मणामभावान्निरतिशयानन्दात्मरूपा प्रकृतिर्भोग्येति सत्वभुक्तिरेव मुक्तिरित्याहुः। एतदपि भाट्टमतनिरासेनैव निरस्तम्।।

## क्षुद्रपक्षनिरासः

गाणाधिपत्यसूर्यादिसाम्यनक्षत्रलोकस्थित्यादयस्तु पक्षाः क्षुद्रतया निरासस्याप्यनर्हाः।।

## पाञ्चरात्रमुक्त्युपन्यासः

पाञ्चरात्रास्तु यथा साङ्ख्यैर्मृदन्वितघटादिदृष्टान्तेन सुखाद्यन्वितेषु कार्यकरणादिषु तद्रूपप्रधानकारणकत्वमनुमीयते, तथा आत्मप्रधानादिष्वपि सद्रूपान्वयेन सत्कारणकत्वमनुमेयम्। ननु कार्यत्वे सति तदन्वितत्वं तदुपादानकत्वानुमापकं, न तु तदन्वितत्वमात्रं, तच्चासिद्धमिति चेत् न। अनेकत्वेनात्मनामपि कार्यत्वसिध्यविरोधात्। अचेतनत्वस्य वैयर्थ्येन हेतुकोटिनिवेशायोगात्। तदेव च कारणमीश्वरः क्षेत्रज्ञजडात्मना परिणममानं महाविभूतिः परप्रकृतिरिति चाभिधीयते। तत्र च जीवात्मनां विलयो मोक्ष इत्याहुः।।

## पाञ्चरात्रमुक्तिनिरासः

तन्न। प्रळये परमकारणे विलीनस्य जगत इव मुक्तस्यापि परावृत्तिप्रसङ्गात्। ननु प्रळये बद्धामुक्ताश्च प्रकृतौ लीनाः। तथापि बद्धा एव परावृत्तिहेत्वविद्यावासनादियोगात्परावर्तन्ते, न मुक्ताः तद्धेत्वभावादिति चेन्न। तदा बद्धमुक्तविभागस्य त्वन्मतेऽयोगात्। अविभागावस्थाया एव प्रकृतित्वात्। तत्रापि बद्धमुक्तविभागे विभागस्याविभागपूर्वकत्वेन प्रकृत्यन्तरकल्पनायां परत्वविघातापत्तेः। आत्मनां विलयाभ्युपगमे चार्वाकपक्षोक्तदोषप्रसङ्गाच्च। आत्मन उत्पत्तिविनाशाभावस्य तृतीयसूत्रे समर्थितत्वाच्च। उत्पत्त्यनुमानस्यागमबाधितत्वात्।।

## जीवस्याकर्तृत्वपक्षनिरासः

केचित्तु सर्वगोचरदृगभिव्यक्तिमात्रं मुक्तिः, कर्तृत्वन्तु कदापि तस्य नास्ति, मुक्तिदशायामिव

संसारदशायामपि कर्तृत्वाभावस्यानुमातुं शक्यत्वात्। न च मुक्तिदशायामपि कर्तृत्वाभावोऽसिद्धः। तदा कर्तृत्वे प्रमाणाभावात्। क्षित्यादिकार्यस्येश्वरेणैवोपपत्तेः तदन्यथानुपपत्तेः प्रमाणत्वायोगाच्च। न च मुक्तत्वेन हेतुना शिवदृष्टान्तेन कर्तृत्वमनुमेयम्। शिवस्य बन्धाभावेन मुक्तत्वासिध्या दृष्टान्तस्य साधनवैकल्यात्। अप्रयोजकत्वाच्च। अत एवात्मत्वहेतुरपि परास्तः। जीवकर्तृकत्वेनाभिमते घटादावुपादानस्यैव कर्तृत्वमित्याहुः। तन्न। उपादानस्य परिणममानत्वमात्रेणोपयोगित्वेऽपि प्रेक्षापूर्वकारित्वायोगेन जीवस्यैव तदौचित्यात्। जीवस्य कर्तृत्वाभावे दृष्टान्ताभावेनेश्वरस्याप्यसिद्धप्रसङ्गाच्च, कर्तृशक्तेरनभिव्यक्तौ तद्युक्तेन शिवेन साम्याभिलाषस्यापि निवृत्त्या मुक्तत्वायोगाच्च।।

## मुक्तावप्यस्वातन्त्र्यपक्षनिरासः

केचित्तु परमेश्वरप्रेर्यत्वानिवृत्तावपि सिद्धगोचर[25]दृक्क्रियाशक्त्यभिव्यक्तिरेव मुक्तिः, अत एव संसारदशायां न मुक्तिप्रसङ्गः। पारतन्त्र्यन्तु न निवर्तते, स्वाभाविकत्वादित्याहुः। तदपि न। प्रेर्यत्वानिवृत्तौ मुक्तेरपुरुषार्थत्वप्रसङ्गात्। न च प्रेर्यत्वस्य स्वाभाविकत्वादनिवृत्तिः, मलाधीनत्वेन स्वाभाविकत्वासिद्धेः स्वाभाविकत्वस्यानन्याधीनत्वात्मकत्वात्। यदि तु स्वाभाविकत्वं पारमार्थिकत्वमात्रं तदा घटादौ व्यभिचारस्स्यात्। नचानादित्वेनानिवृत्तिरनुमेया। प्रागभावमलादौ व्यभिचारात्।।

## मलनिवृत्तिमात्रपक्षनिरासः

केचित्तु मलनिवृत्तिमात्रमेव मोक्षः, न तु सर्वगोचरदृक्क्रियाभिव्यक्तिरपि। प्रागनभिव्यक्ततत्सत्वे मानाभावात्। मुक्तिकालीनाभिव्यक्तिबलेन तत्साधनस्यान्योन्याश्रयपराहतत्वात्। न च मुक्तोऽभिव्यक्तसर्वार्थदृक्क्रियः बन्धहीनत्वात् शिववदित्यनुमानेनाभिव्यक्तिसिद्धिरिति वाच्यम्। घटादौ व्यभिचारात्। हीनत्वस्य ध्वंसाधिकरणार्थकत्वे दृष्टान्ते साधनवैकल्यात्। चेतनत्वविशेषितस्य हेतुत्वेऽप्रयोजकत्वात्। संसारिवैषम्यस्य मलाभावमात्रेणाप्युपपत्तेः। त्वयाऽपि सर्वगोचरदृक्क्रियाभिव्यक्त्यर्थं मलविगमस्यावश्याभ्युपगन्तव्यत्वात्। यदि तु सर्वथा ज्ञानविरहे मलविरहोऽपि नापेक्षितस्तदा स्वात्ममात्रप्रकाशोऽस्तु, न तु सर्वगोचरदृक्क्रियाशक्त्यभिव्यक्तिरित्याहुः। तदयुक्तम्। मुक्तात्मनोऽभिव्यक्तसर्वार्थदृक्क्रियाया आत्मत्वे सति मलबन्धशून्यत्वादित्यनुमानेन सिद्धेः। तत्काले सर्वार्थदृक्क्रियोत्पत्तावनित्यत्वापत्त्याऽभिव्यक्तेरेव वक्तव्यत्वात्, अभिव्यक्तेश्च मलाच्छादननिवृत्तिरूपत्वेनोत्पत्तिमत्वेऽपि नित्यत्वसम्भवात्। नचाप्रयोजकत्वम्। सर्वथा प्रकाशाभावे मलनिवृत्तिमात्रस्यापुरुषार्थत्वात्। न च स्वात्मप्रकाशमात्रेण पुरुषार्थत्वोपपत्तेः सर्वगोचरत्वानवश्यंभावः, विषयप्रतिनियमहेतोस्तत्तदर्थसम्बन्धकारणजन्यत्वस्याभावेन सर्वविषयत्वोपपत्तेः। नचैवमपि क्रियाशक्त्यंशेऽनुमानस्याप्रयोजकत्वम्, एकस्या एव शक्तेर्ज्ञानक्रियारूपत्वेन मलनिवृत्तेर्ज्ञानाभिव्यक्त्यर्थमभ्युपगमे तयैव क्रियाभिव्यक्तेरप्यवश्यकर्तव्यत्वात्। किञ्च मुक्तौ सर्वार्थगोचरदृक्क्रियाभिव्यक्त्यनभ्युपगमे मलस्यैवासिध्या तद्विगमोऽपि मुक्तिर्न भवेत्। मलस्य तादृशदृक्क्रियाच्छादकत्वेनैव

[25] (पा) सर्वगोचर

सिद्धेर्वक्तव्यत्वात्, दृक्क्रिययोरपरिलोपप्रतिपादकनिगमागमादिना मुक्तावपि तत्सत्भावस्य सिद्धत्वाच्च।।

## मुक्तस्य जगद्व्यापारपक्षनिरासः

अन्ये तु मुक्तौ न केवलं क्रियाशक्त्यभिव्यक्तिमात्रमात्मनाम्, अपि तु क्रियाऽपि शिवस्य स्वात्मतुल्येन मुक्तेनैव जगन्निष्पत्तिसम्भवप्रतिसन्धानेन कर्तृत्वायोगात् शिवस्यापि कर्तृत्वाभ्युपगमे कर्तृवैमत्यसम्भवेन जगन्निर्माणानिष्पत्त्यापत्त्या पुरुषार्थत्वासिद्धिप्रसङ्गाच्च। न च जीवस्य कर्तृत्वे कलाद्यपेक्षाप्रसङ्गः। आवरणकालीनकर्तृत्व एव तदपेक्षणात्। मुक्तौ चावरणाभावात्। कालाया आवरणनिवृत्तिद्वारा हेतुत्वेन साक्षादहेतुत्वादित्याहुः। तदपि न मनोरमम्। ईश्वरस्याकर्तृत्वे बीजाभावात्। अन्यथासिद्धिप्रतिसन्धानस्य बीजत्वे कदाचिदपि तस्य कर्तृत्वन्न स्यात्। सर्वदा यस्य कस्यापि मुक्तस्य सद्भावात्। मुक्तस्य जगन्निर्माणक्रियाया अनङ्गीकारेणान्यथासिद्धेरभावाच्च। अत एव कर्त्रनेकत्वे मतिभेदेन कार्यवैशसं स्यादिति परास्तम्। मुक्तस्य कर्तृत्वानङ्गीकारात्, अनेकेषां एकदा मुक्तौ तावतां कर्तृत्वे कार्यवैशसस्य दुर्वारत्वाच्च।।

## मुक्तस्य शिवादाधिक्यपक्षनिरासः

अपरे तु शिवादाधिक्यं मोक्षः। तथाहि – परमेशस्य लयाद्यधिकाराभ्युपगमेन पशुत्वमनपेतमेव। मुक्तस्य तु लयाद्यधिकाररहितस्य समस्तबन्धनोत्तीर्णस्य सर्वथैवानुपाधेः प्रकृष्टत्वम्। तदुक्तम् –

अनुग्रहतिरोभावौ द्वौ पाशौ तु सदाशिवः। इति,

"पशुराद्यस्सदाशिव" इति चेत्याहुः। तदपि न सम्भवति। लयाद्यधिकारस्य दुःखहेतुत्वाभावेन पशुत्वप्रयोजकत्वाभावात्। पशुत्वोक्तिस्त्वाभिमानिकभेदकल्पनया शक्त्यन्तरप्रकाशनपरा[26]। अणु सदाशिवपरा वा। किञ्च मुक्तस्य परमेश्वरादाधिक्ये तस्यानीश्वरत्वं सिद्धस्य चेश्वरत्वं अन्यस्य मुक्तौ तस्याप्यनीश्वरत्वमित्यव्यवस्था स्यात्। मोक्षार्थिनां प्रवृत्तिश्च व्यर्था भवेत्।।

## साम्यपक्षनिरासः

तस्मात् शिवसाम्यमेव मोक्षः। तदप्यभिव्यक्त्या साम्यम्। न तु शिवगुण-सङ्क्रान्तिसमुत्पत्तिसमावेशैरित्येकदेशिनः। तथाहि – अत्र केचित् संसार-दशाव्यावृत्तशिवसाम्यान्यथानुपपत्त्या तत्काले सार्वज्ञ्याद्युत्पत्तिमाहुः। अन्ये तु कस्तूरिकामोदस्य पटादाविवेश्वरस्थस्य सार्वज्ञ्यादेरत्र सङ्क्रान्त्या साम्यमाचक्षते। अपरे तु स्वाश्रयस्थैरेवेश्वरगुणैस्सिद्धस्समाविश्यते ग्रहैरिव पुरुष इत्यावेशेन साम्यं वदन्ति। उक्तञ्चाभियुक्तैः –

यथा कस्तूरिकामोदः पटादिषु तथाऽऽत्मनि।
शिवस्य तत्गुणान्मुक्तौ सङ्क्रामस्समुदीरितः।।
इति पाशुपता मुक्तिं स्वकीयां परमां विदुः।

---

[26] (टि) आभिमानिकभेदकल्पनया शक्त्यन्तरेति। लयाधिकाराभिमानवतः परशिवात्भेदकल्पनया तत्र पशुत्वोक्तिस्ततः प्रकृष्टशक्त्यन्तरं प्रकाशयतीत्यर्थः।

निजाश्रयस्थितैरेव तदानीमैश्वरैर्गुणैः।।
अयमाविश्यते सिद्धः पुरुषस्तु ग्रहैरिव।
इत्थं चैव तु कापालास्तत्साम्यं मुक्तिमूचिरे।।
शिवतुल्यः पूर्वमेव समुत्पद्यत इत्यतः।
उत्पत्तिसमता पक्षो महाव्रतिभिरुच्यत।। इति।

तदेतत् त्रयमपि न युक्तम्। तथाहि –

## उत्पत्तिसाम्यनिरासः

न तावत्सार्वज्ञ्यस्योत्पत्तिस्सम्भवति। उत्पत्तिमत्वेऽनित्यत्वप्रसङ्गात्। नित्यत्वेऽप्युत्पत्तिमत्वं प्रमाणबलादिहैव कल्प्यत इति चेन्न। पूर्वमपि सत एव मलाच्छादनेनानभिव्यक्तस्याभिव्यक्तिमात्रेण साम्योपपत्त्या प्रमाणाभावात्। अक्लृप्तमलधर्मिकल्पनापेक्षया नित्यस्यापि सार्वज्ञ्यस्योत्पत्तिरूपधर्ममात्रकल्पनैव लघीयसीति चेत्, ममापि प्रथममनभिव्यक्तिमात्रकल्पनेऽनन्तरं तद्धेतुत्वेन मलकल्पनेऽपि पूर्वं गौरवोपस्थित्यभावात्।।

## सङ्क्रान्तिसाम्यनिरासः

सङ्क्रान्तिरपि किं स्वाश्रयपरित्यागेनाश्रयान्तरप्राप्तिरुत तदपरित्यागेनान्यत्राभिव्यक्तिः। नाद्यः शिवज्ञानं नान्यत्र सङ्क्रमते गुणत्वात् इत्यनुमानेन सङ्क्रान्त्यभावसाधनात्। नचाप्रयोजकत्वम्। गुणिपरित्यागेन गुणस्यान्यत्र गमने तादात्म्यभङ्गप्रसङ्गेन गुणत्वस्यैवायुक्तत्वात्। तदुक्तम् –

त्यक्त्वा स्वगुणिनं यान्ति न च गुण्यन्तरं गुणाः।
गच्छताञ्च व्यवस्थेयं पदार्थानां विरुध्यतः।। इति।

न च वक्तृज्ञानस्य बोद्धव्ये पुरुषे सङ्क्रमणदर्शनाद्व्यभिचारः। तत्र वक्तृज्ञानसमानविषयकस्य ज्ञानान्तरस्यैवोत्पादनात्। समानविषयत्वेनात्यन्तसादृश्येन बोधकज्ञानं बोधनीये सङ्क्रान्तमिति व्यपदेशस्योपपत्तेः। बोधकज्ञानस्यैवात्र सङ्क्रमणे बोधकस्य ज्ञानशून्यतापत्तेः। ननु **स्वायम्भुवादावाचार्याभिषेके** –

अद्य सङ्क्रामितो योऽयमधिकारो मया त्वयि।
स कर्तव्यस्त्वया तावद्यावत् सङ्क्रामितोऽन्यत।।

इति ज्ञानसङ्क्रान्तिश्श्रूयत इति चेन्न। गुरुनियोगेन गुरुवद्व्याख्यानादौ स्वातन्त्र्यस्यैव सङ्क्रान्तिशब्दार्थत्वात्। न च –

निन्दनाद्द्विजसाधूनां पापानामथ सेवनात्।
पापं सङ्क्रमते पुंसां स्वपुण्यमपयाति च।।
क्षमावतित्वनाक्रोशात्पुण्यवत्भिसस्सहस्थितेः।
पुण्यं सङ्क्रमते पुंसां पापं याति ततोऽन्यत्।।

इति **स्मृत्यादौ** पापपुण्यादेस्सङ्क्रमणप्रतिपादनाद्व्यभिचारः। तत्राप्यपूर्वयोः पुण्यपाप-

योस्सजातीयोरुत्पत्तेरेव सङ्क्रान्तिपदाभिधेयत्वात्। न च कस्तूरिकामोदादेः पटे सङ्क्रान्तिदर्शनाद्व्यभिचारः। तत्रापि कस्तूरिकावयवानामेव सङ्क्रान्तेः। तत्र च गुणत्वाभावेन हेतोरभावात्। एतेन वर्त्यन्तरे दीपस्य सङ्क्रान्तिदर्शनाद्व्यभिचार इति परास्तम्। हेतोरेवाभावात्, पूर्वाश्रयेऽप्यनुवृत्तिदर्शनेन परिमाणतारतम्यदर्शनेन च दीपान्तरस्योत्पत्त्या सङ्क्रान्त्यभावेन साध्यसत्वाच्च। एवं केदाराभिधानतीर्थपानीयस्य तदुपयोक्तृपुरुषसहभुजिपुरुषान्तरे सङ्क्रमणदर्शनाद्व्यभिचार इत्यपि प्रतिक्षिप्तम्।

ननु मृदादिसङ्क्रान्ते कुलालज्ञानादौ व्यभिचारः। तत्र सङ्क्रान्त्यनङ्गीकारे मृदादेः कार्यकारित्वायोगात्। दृश्यते च कुम्भकारज्ञानादिविषयीकृतस्य तस्य कार्यकारित्वम्। अतस्तत्र तत्सङ्क्रान्तिरावश्यकीति चेन्न। स्वाश्रयस्थस्यैव विकारवत्याश्रयान्तरेऽवस्थितिं विनाऽपि विषयविषयिभावसम्बन्धमात्रेण विकारविकारित्वोपपत्तेस्सङ्क्रमणकल्पनस्यायोगात्। अन्यथा कर्मकरणादेरपि कर्तृत्वापत्तेः। न च वह्निगतस्यौष्ण्यस्य जले सङ्क्रान्तिर्दृश्यते, अन्यथा जलसम्बन्धेकरादौ दाहो न स्यादिति व्यभिचार इति वाच्यम्। तत्रापि जलस्थस्यानुद्भूतरूपवह्नेरेव दाहकत्वात्। ननु जलादौ वह्नौष्ण्यसङ्क्रान्तिरेवेष्यताम्। अनुद्भूतरूपवह्न्यन्तरकल्पनायां गौरवात्। जलमुष्णमिति ज्ञानस्य बाधकं विना भ्रान्तित्वकल्पनायोगात्। न च सति शीतस्पर्शे कथमौष्ण्यस्य तद्विरुद्धस्य सङ्क्रान्तिरिति युक्तम्। अग्निसम्बन्धेन शीतस्पर्शनाशे औष्ण्यस्य सङ्क्रमणोपपत्तेः। तव तु शीतस्पर्शस्याविनाशादनुद्भूतरूपवह्निस्पर्शवत्तस्यापि ग्रहापत्तेः। न च सौरालोकमध्यगतस्य दीपप्रभादेरिवाभिभवादनुपलम्भोपपत्तिः। दीपप्रभादावपि भेदमात्रस्यैवानुपलम्भाभ्युपगमादनुपलम्भासिद्धेः। नचेहापि तथा। शीतस्पर्शस्वरूपस्यैवानुपलम्भात्। अन्यथा तत्कार्यस्योद्वेगादेरुत्पत्त्यापत्तेः।

एवं केतकीकुसुमादिवासिते पटादौ तत्गन्धसङ्क्रान्तिरभ्युपेया। अवयवसङ्क्रान्तिकल्पने मानाभावात्। विधूननादिना तत्परागनिवृत्तावपि तत्गन्धोपलब्धेः। यदि हि गुणसङ्क्रान्त्यभावः प्रमाणेनावसितस्स्यात्, तदाऽवयवसङ्क्रमणकल्पनं युक्तं स्यात्। न च तत्र प्रमाणमस्ति। तस्मादेतादृशस्थले गुणसङ्क्रान्तिरेव युक्तेति। मैवम् – जलादावनुद्भूतरूपस्य वह्नेरेवोत्पत्तिर्युक्ता। नत्वौष्ण्यस्य सङ्क्रान्तिः। न च सौरालोकस्यौष्ण्यस्योपलम्भात्तथा। सिकतासम्बद्धजले तदीयोष्ण-स्पर्शापेक्षया तीव्रस्योष्णस्पर्शस्योपलम्भात्। न च प्रातरारभ्य मध्याह्नपर्यन्तं सौरालोकसम्बद्धे सिकतादौ स्पर्शभेदेन भिन्नतयाऽङ्गीकर्तव्यानामालोकानां स्पर्शसमुदायसङ्क्रान्त्याधिक्यप्रतीतिः। एवं सिकतासम्बद्धजलेऽपि सिकतौष्ण्यसमुदायसङ्क्रान्तेराधिक्यप्रतीतिर्युक्तेति वाच्यम्। एकस्मिन्वस्तुनि एकदैकावच्छेदेनैकजातीयनानागुणसमवायस्यापरिदृष्टत्वात्। जलगतस्य शीतस्पर्शस्य विनाशेऽनन्तरं तत्र तदुपलम्भस्यानुपपत्तेः। न च तत्काले शीतस्पर्श उत्पद्यत इति वक्तुं युक्तम्। तदुत्पादकत्वेनाभिमतस्यावयवशीतस्पर्शस्यापि विनाशात्। न च पवनादिरेव तदुत्पादकः। तदुत्पादकस्पर्शवत्वस्य कल्पनीयत्वात्। न च शीतस्पर्शस्याविनाशे उपलम्भापत्तिः। तीव्रकटुकमरीच्यादिषु प्रक्षिप्ते स्वल्पे मधुरद्रव्ये माधुर्यस्येवाभिभवादनुपलम्भोपपत्तेः। सौरालोकमध्यगते दीपप्रभादावुपलभ्यमानस्य रूपादेरनुपलम्भस्याभिभवप्रयुक्तत्वावश्यंभावाच्च। सौरालोकदीपप्रभयोस्संवलनेन भेदानुपलम्भमात्रं, स्वरूपग्रहस्तूभयोरप्यस्तीत्यङ्गीकारे सौरालोक इव दीपेऽप्यभिभावकत्वव्यपदेशापाताच्च। एवञ्च जलगतत्वेन प्रतीयमानस्यौष्ण्यस्य

द्रव्यान्तरगतत्वावश्यंभावात्तस्य तत्गतत्वेन प्रतीतिर्भ्रान्तिरेव। न च विशेषदर्शने सति कथं भ्रमोदय इति वाच्यम्। प्रत्यक्षस्यैव प्रत्यक्षग्राह्याभावज्ञानस्य प्रतिबन्धकत्वात्तस्य च तत्राभावात्। एवं गन्धस्यापि न सङ्क्रान्तिः। असुरभिद्रव्यस्य सुरभिद्रव्यसम्पर्के द्विविधस्यापि गन्धस्योपलम्भात्। एकदैकत्रैकजातीय नानागुणसमावेशाभावस्योक्तत्वात्।

मन्मते तु द्रव्यद्वयगतमेव गन्धद्वयं प्रतीयत इति न काप्यनुपपत्तिः। किञ्चेश्वरज्ञानस्य मुक्ते सङ्क्रान्त्यभ्युपगमे ईश्वरस्य ज्ञानं न स्यात्, ज्ञानस्यान्यत्र सङ्क्रमात्। ज्ञानस्य निरंशत्वेनांशेन सङ्क्रमस्यायोगात्। तस्मान्नाद्यः पक्षः। नापि द्वितीयः। तस्य सङ्क्रान्तिशब्दार्थत्वाभावात्। गुणत्वेनैवास्यापि सङ्क्रमस्य निरसितुं शक्यत्वाच्च। गोत्वादौ सामान्ये गुणत्वस्याभावेन व्यभिचाराभावात्। ननु कस्तूरिकादिद्रव्यैकदेशस्य सङ्क्रान्तिवत् सार्वज्ञादिगुणोपेतस्येश्वरैकदेशस्य सङ्क्रान्तिर्भविष्यतीति चेन्न। ईश्वरस्य सावयवत्वेऽनित्यत्वाप्रसङ्गात्। ईश्वरस्यानेकद्रव्यारब्धत्वमनेकद्रव्यसमूहरूपत्वं वा कल्पनीयम्। अवयवस्यापि सार्वज्ञ्यादिधर्मवत्वं अवयवस्य सिद्धे सङ्क्रमश्च कल्प्य इति कल्पनागौरवप्रसङ्गाच्च। तस्मान्न सङ्क्रान्त्याऽपि साम्यं युज्यते।।

### आवेशसाम्यनिरासः

नाप्यावेशेन साम्यम्। तथा सति भूताविष्टस्येवास्वातन्त्र्यापत्त्या पुरुषार्थत्वायोगात्।।

### अभिव्यक्तिसाम्यनिरासः

तस्माज्जीवस्य स्वगतमेव सार्वज्ञ्यादिकं प्राङ्मलरुद्धं मलविगमेन शिवस्येव प्रकाशत इत्यभिव्यक्तिसाम्यपक्षमङ्गीकुर्वन्ति। तदुक्तं **परमोक्षनिरासकारिकासु** –

स्वमतैर्वादिभिस्त्वेवं विमुक्तिः परिकल्पिता।
दृष्टा नैव हि मोहान्धैस्सदेश्वरसमानता।।
समता च समुत्पत्तिसङ्क्रान्त्यावेशपक्षतः।
नाभिव्यक्तिः परा गीता बद्धवाचामगोचरा।। इति।

ननु अभिव्यक्तिर्नित्या अनित्या वा। नाद्यः। पुरुषयत्नमन्तरेणाऽपि। तत्सत्वेनापुरुषार्थत्वप्रसङ्गात्। संसारदशायामपि तत्सत्वे संसारिणोऽपि मुक्तत्वप्रसङ्गाच्च। न द्वितीयः। तन्नाशे मुक्तिपरावृत्तिप्रसङ्गात्, मुक्तौ शरीराद्यभावेन तदुत्पत्त्ययोगाच्चेति चेन्न। मलावरणविगमस्याभिव्यक्तित्वेन नित्यत्वेऽपि पुरुषयत्नसाध्यत्वोपपत्तेः। तदुक्तं **मोक्षकारिकायाम्** –

मलादिपाशविच्छित्तिस्सर्वज्ञानक्रियोद्भवः।
मोक्षस्तत्कारणं शम्भुस्स्वशक्तिः करणं विभोः।।
पशवात्मा मोच्यमानत्वात्कर्मकारकमिष्यते।
नित्यमुक्ततया कर्तुर्मोक्षाख्या कर्मगा कृतिः।। इति।

सर्वज्ञानक्रियोद्भव इति मलादिपाशविच्छित्तेर्विशेषणम्। सार्वज्ञ्यसर्वकर्तृत्वाभिव्यक्तिरूपा मलादिसम्भवत्सर्वपाशनिवृत्तिर्मोक्ष इत्यर्थः। विज्ञानकेवलानां मलमात्रं पाशः। प्रळयकेवलानां मलकर्मणी इति। सकलानां मलकर्ममायाः। ततस्तेषां तत्तत्पाशनिवृत्तिर्मोक्ष इत्यर्थः।

मोक्षे पुरुषः कर्ता ज्ञानं करणमिति मतन्निरसितुमाह – **तत्कारणं शम्भुस्स्वशक्तिः करणमिति**। कारणं कर्तेत्यर्थः। अत एवोत्तरत्र नित्यमुक्ततया कर्तुरित्युक्तिः। स्वशक्तिस्स्वव्यापाररूपा दीक्षेत्यर्थः। साङ्ख्यमत इव नास्मन्मतेऽपि मोचकगतो मोक्ष इत्याह – **"नित्यमुक्ततये"ति**। क्वचित्तु "सर्वज्ञानक्रियोद्भवा" इति पाठान्तरम्। तत्र साक्षात्कारव्यतिरिक्तानि श्रवणादीनि सर्वज्ञानशब्देनोच्यन्ते। क्रियाशब्देन नित्यनैमित्तिकानि कर्माणि। साक्षात्कारस्तु न मुक्तौ कारणम्। सति मलाच्छादने निवृत्ताच्छादनप्रकाशात्मकस्य साक्षात्कारस्यानुदयेन मलनिवृत्तिगर्भस्य साक्षात्कारस्य मलनिवृत्तौ कारणत्वायोगात्। अनेन ज्ञानकर्मसमुच्चयो दर्शितः। तथा **श्रीमन्मृगेन्द्रेऽप्युक्तम्** –

तमश्शक्त्यधिकारस्य निवृत्तेस्तत्परिच्युतौ।
व्यनक्तिदृक्क्रियावत्वं जगद्बन्धुरणोश्शिवः।। इति।

अत्र तमस आणवमलस्य शक्तेश्च शिवसम्बन्धिन्या नियामिकाख्यायारोधशक्तेरधि-कारस्याच्छादनव्यापृतेर्निवृत्त्या तत्परिच्युतौ आच्छादनपरिच्युतावित्यर्थः। तथा **रत्नत्रयेऽप्युक्तम्** –

विमुक्ते सर्वथा बन्धे गळिते चाणवे मले।
सर्वार्थद्योतिका शक्तिश्शिवस्येव विजृम्भिता।। इति।

अत्राणवस्य पृथगुपादानात्बन्धशब्देन कार्मो मायीयश्च बन्धो विवक्षितः। साङ्ख्यानां तदा प्रकृत्यन्तस्य मायीयबन्धस्य तत्सम्बद्धभोगहेतोश्च कर्मबन्धस्य विगळनमस्तीति तद्व्युदासाय सर्वथेत्युक्तम्। बन्धशब्देनाणवस्याप्युपादानसम्भवेऽपि पृथङ्निर्देशस्त्वाणवस्य दर्शनान्तराप्रसिद्धत्वेन तन्निरासोपायस्य तत्राभावात्तद्विगमात्मामोक्षस्सिद्धान्तागमैकलभ्य इति दर्शयितुम्। तस्माच्छिवसाम्यमेव मुक्तिरिति। तदयुक्तम्। शिवैक्यस्यैव मोक्षत्वात्। अमलसाक्षात्कारस्यैव मोक्षहेतुत्वाच्च। तथाहि – मोक्षस्तावन्न शिवसाम्यरूपः। ज्ञानक्रियाभिव्यक्त्यात्मनस्तस्य सुखदुःखभावेतरत्वेन स्वतः पुरुषार्थत्वायोगात्। न च तत्कालीनो दुःखाभावः पुरुषार्थः। तस्य त्वया मोक्षत्वेनानङ्गीकारात्। ज्ञानक्रियाभिव्यक्तेरेव साम्यपदाभिधेयायास्तथात्वेनाभ्युपगमात्। विविधतत्तत्भुवनभोगहानेन तुल्याय व्ययतया तस्य पुरुषार्थत्वायोगाच्च। मुक्तस्य शिवसाम्यस्य शिवानभिमतत्वाच्च। तदुक्तम् – "घातयन्ति हि राजानो राजाऽहमिति वादिनः।" इति शिवेनैक्यन्तु मुक्तगतं शिवस्येष्टमेव। तस्योत्कर्षाविरोधित्वात्। मुक्तस्य पारतन्त्र्यनिवृत्तौ शिवस्य सर्वेश्वरत्वविघातापत्तेश्च। मुक्तानां पारतन्त्र्यनिवृत्तौ जगत्करणशक्तौ च स्वयमपि जगन्निर्माणप्रसङ्गाच्च। न च रागाभावादकरणम्। तत्रापि शक्त्यात्मनो रागस्य सत्वात्। वृत्त्यात्मनश्च तस्येश्वरेऽप्यसत्वात्। शिवमुक्तयोरुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामविशेषेऽप्येकस्य जगत्कारणत्वमन्यस्य तदभाव इत्युक्तेरर्थराहित्याच्च। अत एवान्यथासिद्धिप्रतिबन्धनादकर-णमिति परास्तम्। अनिष्पत्तेरकरणशब्दार्थत्वे ईश्वरकर्तृकाया अपि निष्पत्तेरभावप्रसङ्गात्। उपादानगोचरयत्नाभावस्य तदर्थत्वेऽभिव्यक्तस्य यत्नस्य मुक्तेऽपि सत्वाङ्गीकारेण तस्य तत्र प्रतिबन्धकत्वायोगात्। न च शक्तियोगिन्यपि दण्डादावुदासीनावस्थापन्न इवाजनकत्वोपपत्तिरिति वाच्यम्। तदनुकूलभ्रम्याद्यभावेन तस्याजनकत्वोपपत्तेः।

इह तु तदनुकूलव्यापारोऽपरोक्षज्ञानादिरस्तीति नाजनकत्वोपपत्तिः। नन्वस्तु मुक्तानामपि जगन्निर्मातृत्वम्। न च तेषां मतिभेदेन जगन्निर्माणावेशप्रसङ्गः। सर्वेषां सर्वज्ञत्वेन मतिभेदाभावादिति चेन्न। त्वया तेषां जनकत्वानङ्गीकारात्। तेषामपि तज्जनकत्वे शिवव्यावृत्तधर्माभावेन भेदायोगाच्च। न च संसारोपलक्षितत्वेन मुक्तस्य परमशिवात्भेदः। उपलक्ष्यगतविशेषाभावे उपलक्षणस्य भेदकत्वायोगात्। न च विशेषकृतो भेदः। तस्यानङ्गीकारात्। न च संसारध्वंसकृतो भेदः आत्मगतस्योत्पत्तिमतस्संसारस्याभावात्। नचानादेरेव मलसंयोगस्य ध्वंसेन भेदः। मुक्तानां परस्परभेदाभावप्रसङ्गात्। मलसंयोगध्वंसस्य सर्वत्राविशेषात्। तदुक्तं **सूतसंहितायाम्** –

केनचित्साधनेनैव मुक्तश्शिवसमो भवेत्।
इत्येवं केचिदिच्छन्ति वादिनो मुनिपुङ्गवाः।।
वार्तामात्रमिदं प्रोक्तं सर्वथा न तदर्थवत्।
एकदेशेन वा जीवः किं वा सर्वात्मना समः।।
एकदेशेन चेत्सर्वे शिवास्संसारवर्तिनः।
एकदेशेन सर्वेषामस्ति साम्यं शिवेन हि।।
सर्वात्मना चेत्साम्येन सर्वथा शिव एव सः।
भेदकाकारशून्यत्वात् भेदाभावाच्च वस्तुनः।।
तस्माज्जीवस्स्वतस्साक्षाच्छिवस्सत्यादिलक्षणः। इति।

**श्रीमत्सर्वज्ञानोत्तरे** – "स्वस्मिन्[27] परमशिवाभेदज्ञानस्य मोक्षहेतुत्वेन बोधित-तया साम्यस्यायुक्त"त्वाच्च। नचारोपरूपं ज्ञानं मोक्षसाधनमिति युक्तम्। त्वयैव "मिथ्यादर्शनसाध्यत्वं मोक्षस्येति सुदुर्घट"मिति मिथ्याज्ञानस्य तद्धेतुत्वनिषेधात्। एकदेशिभिस्तु **सर्वज्ञानोत्तरवचनमन्यथा**व्याख्यातम्। तथाहि –

योऽसौ सर्वगतो देवस्सर्वात्मासर्वतोमुखः।
सर्वतत्त्वमयोऽचिन्त्यः सर्वस्योपरिसंस्थितः।।
सर्वतत्त्वव्यतीतश्च वाङ्मनो नामवर्जितः।
सोऽहमेवमुपासीतनिर्विकल्पेन चेतसा।।
यदेवं निष्कळं ज्ञानं शाश्वतं ध्रुवमव्ययम्।
निर्विकल्पमनिर्देश्यं हेतुदृष्टान्तवर्जितम्।।
अलिङ्गमक्षरं शान्तं विषयातीतगोचरम्।
अविभाव्यमसन्देहं तदहं नात्र संशयः।।
अहमेव परो देवस्सर्वमन्त्रमयश्शिवः।
सर्वमन्त्रव्यतीतश्च सृष्टिसंहारवर्जितः।।
मया व्याप्तमिदं सर्वं दृश्यादृश्यं चराचरम्।
अहमेव जगन्नाथो मत्तस्सर्वं प्रवर्तते।।
अनेकाकारसंभिन्नं विश्वं भुवनसञ्चयम्।

---

[27] (पा) स्वात्मनः

शिवाद्यवनिपर्यन्तं तत्सर्वं मयि संस्थितम्।।
यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
बहिरन्तर्विभागेन तत्सर्वं व्यापितं मया।।
अहमात्मा शिवो ह्यन्यः परमात्मेति यस्स्मृतः।
एवं यो भावयेन्मोहान्न शिवत्वमवाप्नुयात्।।
शिवोऽन्यस्त्वहमप्यन्यः पृथग्भावं विवर्जयेत्।
यश्शिवस्सोहमेवेति अद्वैतं भावयेत्सदा।।
अद्वैतभावना युक्तः सर्वत्रात्मनि संस्थितः।
सर्वगं सर्वदेहस्थं पश्यते नात्र संशयः।।
एवमेकात्मभावेन संस्थितस्य तु योगिनः।
सर्वज्ञत्वं प्रकल्प्येत विकल्परहितस्य च।।
योऽसौ सर्वेषु शास्त्रेषु पठ्यते ह्यज ईश्वरः।
अकायो निर्गुणो ह्यात्मा सोऽहमस्मि न संशयः।।
अविज्ञातः पशुस्सोहि सृष्टिधर्मं समाश्रितः।
विज्ञातश्शाश्वतश्शुद्धस्सशिवोऽत्र न संशयः।।
तस्मादात्मा सदावेद्यस्सुविचार्यविचक्षणैः।

अत्र शिवादिशब्देनात्मन एव मोक्षदशावर्तिस्वरूपमुच्यते। तेन च स्वरूपेण सह बन्धदशायां परिदृश्यमानस्यात्मस्वरूपस्यैक्यमनेन प्रकरणेन प्रतिपाद्यते। न तु परमशिवेनात्मन ऐक्यं बोध्यते। तस्य सर्वसिद्धान्तागमविरोधात्, अपसिद्धान्तात्, युक्तिविरोधाच्च। तथाहि – सर्वसंहितासु जीवपरमात्मनो रूपास्योपासकभावादिनाभेदस्तदैक्यनिरासश्च दृश्यते। परमशिवस्य मुक्तस्य चाभेदे तस्यैव संसारिणाऽप्यभेदेन नित्यमुक्तत्वविरोधश्च। अक्षरार्थस्तु – योऽसौ देवनशीलत्वाद्देवः स्वयंप्रकाशते स्वसंवेदनेन दृश्यते। तथा च सर्वगोऽपि सन् संसारावस्थायां सर्वेषु पश्वादिषु स्वकर्मार्जितेषु योनिभेदेष्वात्मत्वेन वर्तत इति सर्वात्मा। सर्वतत्त्वमयः – तत्तत्भुवनजदेहेषु तत्तत् तत्त्वस्वभावस्तेन सहाविविक्तमात्मानं जानाति। सर्वतोमुखः – सर्वत्राध्वनि भोगार्थमभिमुखः। मुक्तिदशायां सर्वतत्त्वव्यतीते तत्त्वे सर्वोपरिसंस्थितः। पशूनामवाङ्मनसगोचरश्च। एवं विधस्सोऽहमेवेति निस्सन्दिग्धेन मनसाऽऽत्मानमुपासीत भावयेत्।

इदानीं धर्मधर्मिणोरभेदविवक्षया स्वात्मभावनामाह – **यदेवेति**। यदेवं विधं शिवज्ञानसदृशं विशिष्टं ज्ञानं तदहं तन्मयोऽहमित्यर्थः। अहमेवेति। अहमेव शुद्धाध्वनि मलपाकतारतम्यात्सर्वमन्त्रमयः सर्वेषु शुद्धविद्यादिभुवनेषु दीक्षाकाले तत्तन्मन्त्रेश्वरादिसदृशशक्तिः। देवो ज्ञानक्रियाप्रकाशयुक्तः। सर्वमन्त्रव्यतीतश्च। क्रमात्तत्तत्पदेभ्योऽप्युत्तीर्णः। अत एव शिवः सर्वज्ञत्वसर्वकर्तृत्वात्मकशिवत्वगुणयोगी च। किञ्चैतावतानैवात्मनः[28] परमशिवाद्विशेषो यच्छक्तोऽप्ययं तेनैव कार्यनिर्वाहात् सृष्ट्यादिभिः

[28] (टि) ननु मुक्तिदशायां जगद्व्यापारशक्त्यभावेन कथं मुक्तस्य परमशिवेनात्यन्तसाम्यमित्याशङ्क्याह – किञ्चैतावतेति शक्त एवायं जगद्व्यापारे। तथाऽपि शिवेनैव जगद्व्यापारनिर्वाहात्तद्विवर्जित →

कृत्यैर्वर्जितः। मयेति तदानीमितरदशावैलक्षण्येन व्याप्तिस्साक्षात्क्रियत इत्यर्थः। अहमेवेति। यदाऽहं विशिष्टपुण्यादिवशात् ब्रह्मादिपदं प्राप्तस्तदा अहमेव जगन्नाथः मन्तश्च सर्वं त्रैलोक्यादिरूपं जगत्प्रवर्तत इत्यर्थः। अनेकाकारसंभिन्नमित्यादिकं मया व्याप्तमित्यस्यैव प्रपञ्चः। अहमात्मेति। अहमात्मा – आत्मशब्दवाच्यः। यस्तु परमात्मेति शास्त्रेषु स्मृतश्शिवः मुक्तश्शिव इत्यर्थः। अनादिमुक्तस्य परमशिवस्यात्मशब्देन व्यवहारादर्शनात्। सोऽयं परमात्मसंज्ञश्शिवो मुक्त इति यो मोहात्भावयेत् स दीक्षितोऽप्यात्मविषयविवेकाभावात् शिवत्वं सर्वज्ञानक्रियारूपं परं मोक्षन्नाप्नुयादित्यर्थः।

अहमात्मेत्यस्यापरा व्याख्या – प्रागुक्तपारमार्थिकशिवसदृशात्मस्वरूपभावनोपदेशात्परम-शिवस्यात्मनश्चैक्यभ्रान्तिर्माभूदिति तयोर्भेदोऽनेन सूत्रेणोच्यते। हीति यस्मादर्थे। आत्मा अहं प्रतिपुरुषं स्वसंवेदनेनाहं प्रत्ययवेद्यः परमात्मेति यस्स्मृतः सशिवस्त्वन्य एव। योगिप्रत्यक्षानुमानागमैर्ग्राह्यत्वात्पर इत्यर्थः। तस्माद्योऽहमित्येवं परमात्मानं भावयेत् स शिवत्वन्नाप्नुयात्सर्वज्ञत्वसर्वकर्तृत्वादिरूपं मोक्षं नाप्नुयादित्यर्थः। अत एवाह – **शिवोऽन्य इति**। विशब्दः प्रतिषेधवाची। न वर्जयेदित्यर्थः। यश्शिव इति। यो मोक्षदशायां शिवस्सर्वज्ञस्सर्वकर्तृत्वात्मना शिवत्वेन युक्तस्सोऽहमेवेत्यात्मनः संसारमोक्षदशयोरैक्यं भावयेदित्यर्थः। अद्वैतभावनाफलमाह – **अद्वैतेति**। एवं बद्धमुक्तिदशयोस्सर्वत्र सर्वासु च पञ्चावस्थासु देहभेदेऽप्यात्मन ऐक्यभावनायुक्तो योगी स्वात्मनि विषये सम्यक् ज्ञाने नावस्थितस्सन् सर्वदेहस्थं सर्वेषु प्राकाम्यशक्त्यादिनिर्मितेषु देहेष्ववस्थितं सर्वगतञ्चात्मानं साक्षात्करोति। पुनरपि भावनामेवोपदिशति योऽसाविति। योऽसौ सर्वेषु शास्त्रेषु ईश्वरो ज्ञानक्रियासामर्थ्येन सर्वाधिष्ठानशक्तिमान्नित्यत्वादिगुणश्चात्मोच्यते, स एवाहमस्मि। न तु परमेश्वरशब्दवाच्यश्शिव इति भावः। अत्रात्मनोऽज्ञताया उपपत्तिमाह – **अविज्ञात इति**। तदेतद्व्याख्यानं न सचेतसाञ्चेतस्समारोहति।

तथाहि – एतद्वचनगतानां देवसर्वात्मसर्वतत्त्वमयसर्वमन्त्रमय जगन्नाथपरमात्मसर्वदेह-स्थेश्वरादिशब्दानां संकोचयोगादिकल्पनया[29] व्याख्याने कारणं किं संहितान्तरविरोधः, अथवा पूर्वप्रकरणविरोधः, उत युक्तिविरोधः, किं वा अपसिद्धान्तः। न तावदाद्यः एतद्वि-रोधेन संहितान्तरस्य वा गौणार्थत्वेन व्याख्यानोपपत्तेः। न च भेदप्रतिपादकस्य संहितान्तरस्य बाहुल्यात् **त्यजेदेकं कुलस्यार्थ** इति **न्याये**नास्या एव गौणाद्यर्थतया नयनं युक्तमिति वाच्यम्। कर्मब्रह्मकाण्डयोरिवाधिकारिभेदेन संहिताद्वयस्याप्युपचारादिकल्पनां विनैवार्थबोध-कत्वे सम्भवति। क्लिष्टकल्पनया व्याख्यानस्यायुक्तत्वात्। अत एव **ज्ञानतिलके** –

क्रौञ्चादिषु सुरैस्सर्वैर्महामायाविमोहितैः।
ऋषिभिश्चैव भोगार्तै[30]र्मोक्षमार्गपराङ्मुखैः।।

← इत्यर्थः। अहमात्मेति श्लोकस्य प्रथमव्याख्याने आत्मशब्दवाच्योऽहं शास्त्रेषु परमात्मेत्यन्यत्वेन स्मृतो यश्शिवस्सोऽहमित्यात्मनि शिवाभेदं भावयेत् न तु सोऽहमिति तस्मिन्नात्माभेदम्। तथा सति न शिवत्वरूपा मुक्तिरित्यर्थः। द्वितीयव्याख्या तु स्फुटैव।

29 (टि) सङ्कोचयोगादिकल्पनया – सङ्कोचकल्पनया योगकल्पनया क्वचिल्लक्षणकल्पनयेत्यर्थः।

30 (पा) भोगार्थै

पृष्टोऽहं तन्त्रमन्त्राणि तपश्चर्या व्रतानि च।
सिद्धान्तमन्त्रवादांश्च तेऽपि तन्त्राण्यनेकधा।।
अनेकभेदभिन्नन्तु द्वैतं पार्वतिनन्दन।
अद्वैतञ्च तथाप्यन्ये द्वैताद्वेते तथापरे।।
पृच्छकानां वशेनैव उक्तं शास्त्रमनेकधा।
साधनानि विचित्राणि मन्त्राणां मन्त्रजातयः।।
यो यत्पृच्छति भावेन तस्य तत्कथयाम्यहम्।
किमन्यत् पृच्छमानस्यान्यत् कथयामि षण्मुख।।
मया विमोहितास्सर्वे अनेकैश्शास्त्रसङ्ग्रहैः।

इत्यधिकारिभेदेन संहितानां प्रवृत्तिरुक्ता। अत एव चास्यास्संहितायास्संहितान्तरेभ्यो वैलक्षण्येन मुख्याधिकारिविषयतां दर्शयितुं **सर्वज्ञानोत्तरमिति** नामधेयं कृतम्। एवं **देवीकालोत्तरेऽपि** अभेदभावनाया एव मोक्षहेतुत्वमुक्तम्। **सुप्रभेदे** च –

यथा जलं जले क्षिप्तं क्षीरे क्षीरं घृते घृतम्।
अविशेषं भवेत्तद्वदात्माऽपि परमात्मनि।।

इति मुक्तस्य परमशिवेनैक्यमेव प्रतिपादितम्। **रौरवे** –

यथा जलं जले क्षिप्तं क्षीरे क्षीरमिवार्पितम्।
तथैव ह्येकतां याति दीक्षामन्त्रेण मन्त्रवित्।।

इत्यादिनैक्यमेव प्रकटितम्। अतोऽभेदप्रतिपादिकानामपि संहितानां बाहुल्यमस्त्येव। अतस्सर्वसंहितानामविरोधाय **ज्ञानतिलके** स्वयं शिवेनोक्ताऽधिकारिभेदेन व्यवस्थैव ग्राह्या। न तु क्लिष्टार्थस्य स्वबुध्या कल्पना युक्ता। अत एव न चतुर्थः। उक्तरीत्याऽभेदस्यैव सिद्धान्तागमसिद्धतयाऽपसिद्धान्ताभावात्। नापि द्वितीयः। पूर्वप्रकरणे संसारदशायां प्रतीयमानस्य भेदस्य कथनात्तद्विरोधाभावात्। नापि तृतीयः। अभेदनिरासिकाया युक्तेरभावात्। तथाहि – न तावत्सर्वज्ञत्वे किञ्चिज्ज्ञत्वादिविरुद्धधर्माद्यध्यासानुपपत्तिरभेदबाधिका। किञ्चिज्ज्ञत्वस्यावरणकृतत्वेन स्वाभाविकत्वाभावात्। नचाभेदस्वीकारे जीवस्येव शिवस्याप्यावरणं स्यादिति वाच्यम्। गुणगुणिनोरभेदेऽपि गुणस्यैव धर्मत्वं गुणिन एव धर्मित्वमिति व्यवस्थावत् जीवशिवयोरावरणानावरणस्य व्यवस्थोपपत्तेः। अत एव शिवस्य नित्यमुक्तत्वविरोधोऽपि निरस्तः। गुणस्य धर्मैकरूपत्ववच्छिवस्य नित्यमुक्तत्वोपपत्तेः। अत एव च जीवगतः दुःखादिभाक्त्वमपि शिवस्य स्यादिति परास्तम्। प्रत्युताभेद एव –

सायुज्यरूपा परमामुक्तिर्जीवपरात्मनोः।
पारमार्थिकतादात्म्यरूपं ह्यज्ञाननाशतः।।

इति **स्कान्दवचन**मनुकूलम्। तथा युक्तिरप्यनुकूला। जीवः परमात्माभिन्न आत्मत्वात् परमात्मवदित्यनुमानस्याभेदसाधकस्य सत्वात्। न च जीवो न परमात्माभिन्नः। किञ्चिज्ज्ञत्वादिति प्रतिरोधः। दृष्टान्ताभावात्। परमात्मनो व्यतिरेकदृष्टान्ताभावे तु घटादेस्सपक्षाद्व्यावृत्तत्वेनासाधारण्यात्। तस्मात् **सर्वज्ञानोत्तरादिवचनस्य** यथाश्रुतार्थपरत्वे सम्भवति क्लिष्टकल्पनया

व्याख्यानमनादरणीयमेव।।

## अभिव्यक्तपरानन्दशिवाभेदरूपसिद्धान्तमुक्तिनिरूपणम्

ननु शिवैक्यमपि न मोक्षः। स्वतः पुरुषार्थत्वाभावात्। नचानन्दानुभवेन पुरुषार्थत्वम्। आनन्दसत्भावे मानाभावात्। आनन्दभोगसत्भावे भोगस्याध्यासरूपत्वेन संसारित्वापत्तेः। क्वचिदानन्दादिश्रवणस्य पूर्णत्वादिपरत्वादिति चेन्न।

निस्तत्त्वे निष्कळीभूते विन्दत्यात्मनि यत्सुखम्।
निर्विकल्पमचिन्त्यञ्च हेतुदृष्टान्तवर्जितम्।।
तत्सुखं परमं प्रोक्तमात्यन्तिकमनौपमम्।
निरस्य विषयासङ्गं मनोवृत्तिं विवर्जयेत्।।
यदा यात्युन्मनीभावं तदा तत्परमं सुखम्।

इति **सर्वज्ञानोत्तरगतवचनेन** सुखस्य प्रतिपादनात्। अत्र दुःखनिवृत्त्यात्मकं सुखमिति केषाञ्चि-द्व्याख्यानं यथाश्रुतार्थपरित्यागहेतोरनुपन्यासादनुपपन्नमेव। न च सुखस्य जन्यत्वनियमात् सुखानुपपत्तिः। एवं सति ज्ञानस्याप्यभावप्रसङ्गात्। प्रमाणबलान्नित्यज्ञानाभ्युपगमे नित्यसुखस्याप्यविरोधात्। अत एव सुखभोक्तृत्वे संसारित्वं स्यादिति परास्तम्। अनित्यसुखभोक्तृत्व एव संसारित्वोपगमात्। नचानन्दस्य सर्वदा सत्वे तादर्थ्येन कथं पुरुषप्रवृत्तिरिति वाच्यम्। तदाच्छादकपाशनिवृत्तौ कृतिसाध्यत्वपर्यवसानात्। पाशश्च मलमायाकर्मरोधशक्तिबिन्दुभेदेन पञ्चविधः। तदुक्तं **कामिके** –

मलः कर्म च माया च शक्तिश्चापि निरोधिका।
बिन्दुश्च पशुभेदेन यैरेभिर्बध्यते पशुः।। इति।

तत्र मलस्वरूपं तत्प्रमाणञ्च चतुर्थसूत्रे प्रदर्शितम्। इतरेषां स्वरूपं तत्प्रमाणञ्च द्वितीयसूत्रे। क्वचित्पाशचातुर्विध्योक्तिः शक्तेस्सर्वानुग्राहकत्वेन बन्धकत्वाभावविवक्षया। तदुक्तं **श्रीमन्मृगेन्द्रे** –

तासां माहेश्वरीशक्तिस्सर्वानुग्राहिका शिवा।
धर्मानुवर्तनादेव पाश इत्युपचर्यतः।। इति।

अत्र तासां पूर्वं प्रकृतानां मलशक्तीनां धर्मः चित्क्रियासन्निरोधकत्वम्। तस्यानुवर्तनं मलशक्त्यधिष्ठानद्वारा सम्पादनम्। तस्मात्पारमेश्वरीशक्तिः पाशतयोच्यत इत्यर्थः। केचित्तु बिन्दोरपि पाशत्वन्नेच्छन्ति। तद्योगस्य विद्येश्वरादिपदप्राप्तिहेतुत्वेनापरमुक्तित्वात्। पाञ्चविद्यादीनां परममुक्त्यपेक्षया पाशत्वमित्यविरोध इति। तस्मात्पाशक्षये परशिवा-नन्दाभिव्यक्तिरेव परममुक्तिरिति सिद्धम्।।

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये दशमसूत्रभाष्यम् समाप्तम् ॥**

# एकादशसूत्रभाष्यम्

ननु पृष्टानि शिवस्वरूपलक्षणप्रमाणयुक्तिसाधनफलान्युक्तान्येव। किमन्यद्वक्तुमवशिष्यते। यदर्थमुत्तरसूत्रद्वयं स्यादिति चेत् उच्यते – अस्ति तावत्भगवतः श्रीकण्ठनाथस्य वक्तव्यमवशिष्टं हृत्गतम्। तथाहि – पूर्वमष्टमसूत्रे शिवस्वरूपप्रमाणलक्षणनिरूपणानन्तरं साधनाकाङ्क्षायां क्रमप्राप्तायां "बोधितस्तत्पदं प्राप्नोती"ति बोधस्य तत्प्राप्तिसाधनत्वे उपदिष्टे तर्हि दीक्षायास्तदन्येषां श्रौतस्मार्तागमिकानाञ्च कर्मणां यानि मोक्षसाधनत्वावेदकवचनानि तानि सर्वाण्यपि पीड्येरन्नित्या शङ्कायान्निर्वाणदीक्षायाः प्रधानभूतसाधनज्ञानतुल्यतया तदंशे तस्याः परिहारं धन्य इति पदेनोक्त्वा प्रधानतयोपक्रान्तशेषतयोपदिष्टशाब्दबोधसाधनत्वनिर्वाहकतया[1] च साधनान्तरोपदेशव्यग्रमनस्कतया निर्वाणदीक्षाव्यतिरिक्तकर्मांशे तामाशङ्कां शिष्यस्यावधानशून्यस्य मतिविभ्रमो मा भूदिति पश्चाद्वक्ष्यामिति तदानीमुपेक्ष्य प्रसक्तसाधनान्तरमनननिदिध्यासनादिकमुपदिश्य प्रधानत्वात्फलमप्युपदिष्टवान्।

इदानीं प्रधानस्य सर्वस्याप्युपदिष्टत्वेन प्राप्तावसरत्वात् पूर्वमुपेक्षिताया निर्वाणदीक्षादिव्यतिरिक्तश्रौतस्मार्तागमिकानां कर्मणां मोक्षसाधनत्वावेदकानि वचनानि पीड्येरन्नित्याशङ्कायास्तेषामपि ज्ञानद्वारा मोक्षसाधनत्वान्नोक्तदोष इति सार्धसूत्रेण परिहारं वदन् प्राधान्येन शिवभक्तेरन्तरङ्गसाधनत्वं शिवभक्तपूजादेश्च बहिरङ्गसाधनत्वं चाह –

# एकादशसूत्रम्

**दृशोर्दर्शयिते[2] वात्मा[3] तस्य दर्शयिता शिवः।**
**तस्मात्तस्मिन्परां भक्तिं कुर्यादात्मोपकारके॥ इति।**

तथा च – वैदिककर्मणां मतभेदेन मोक्षसाधनत्वावेदकं वाक्यद्वयं वैदिकं संस्कारवाक्यं वा। तत्र यस्यैतेऽष्टाचत्वारिंशत्संस्कारा इति संस्कारवाक्यम्। तत्र तावत् संस्काराणाम् उपकार्यकारणाकांक्षायां ज्ञानद्वारत्वलाभः। तथाहि – संस्काराणां प्रोक्षणादिजन्यसंस्कारवत् संस्कारस्वभावत्वादेव स्वतः फलकारणत्वाभावेन कारणोपकारकत्वेनैव फलकारणत्वादत्रापि तेषां स्वोपकार्य[4]शिवसायुज्यरूपमुक्तिफलकारणाकांक्षायाम् –

ज्ञानादेव तु कैवल्यमित्याह परमश्रुतिः।

इत्यादि**स्मृत्युपस्थापितं** शिवाभेदज्ञानमेव तदुपकार्यकारणत्वेन संबद्यते। मानान्तरप्राप्त्योपस्थितं कारणं परित्यज्यानुपस्थिताप्राप्तकारणकल्पने गौरवात्। तथा च संस्कारपक्षे

---

[1] (टि) प्रधानतयोपक्रान्तशाब्दबोधशेषत्वं कर्मादीनामविशिष्टमित्याशङ्क्यारादुपकारकेभ्यस्तेभ्यो मननादेः सन्निपत्योपकारकरूपं विशेषं वक्तुमाहोपदिष्टेति। उपदिष्टस्य शाब्दबोधस्य यन्मुक्तिसाधनत्वं तन्निर्वाहकतया चेत्यर्थः। अवधानशून्यस्य शिष्यस्य साधनान्तरकर्मोपदेशे तत्र व्यग्रमनस्कतया मतिविभ्रमस्स्यात्, मननादिषु सम्यग्व्युत्पत्तिर्न स्यात्। अतस्तदुपेक्ष्यमननादिकमुपदिश्येत्यर्थः।

[2] (पा) दृशो दर्शयिते

[3] (पा) चात्मा

[4] (टि) स्वोपकार्यं यच्छिवसायुज्यरूपमुक्तिफलकारणं तदाकांक्षायामित्यर्थः।

यस्यैतेऽष्टाचत्वारिंशत्संस्कारस्स तदुपकृतज्ञानेन ब्रह्मणस्सायुज्यमाप्नोतीति संस्कारवाक्यार्थे आकाङ्क्षाया ज्ञानद्वारत्वलाभ इति। विविदिषा वाक्यन्तु –

वेदानुवचनेनापि यज्ञेनाध्ययनेन च।
ज्ञानेन तपसा देवास्तथैवानशनेन च।।
वेत्तुमिच्छति यो विद्वान् समुनिर्नेतरो जनः। इति।

तत्र कर्मणां वाक्यान्तरेण मोक्षसाधनत्वप्रतीतावपि स्ववाक्य एव तेषामश्वेन गन्तुमिच्छतीत्यत्र शब्दतोऽप्रधानेऽपि गमनेऽर्थतः प्राधान्यादश्वस्येव वेदानुवचनादीनां **"सर्वापेक्षा च यज्ञादिश्रुतेरश्ववव"दिति न्यायेन** वेदने सम्बन्धाच्छब्दतः प्राधान्याश्रयणे-ऽपि[5] तादृशेच्छाद्वारा वेदनसम्बन्धाद्वा लौकिकव्युत्पत्त्याश्रयणेऽपि ज्ञानद्वारत्वलाभः। मीमांसाशास्त्रीयव्युत्पत्त्याश्रयणे[6] तु इच्छतीति तिङ्प्रत्ययस्य वेदानुवचनादिसम्बन्धे पञ्चम-लकारत्वकल्पने च सति विविदिषुर्वेदमनुब्रूयात् यजेतेत्याद्यर्थे पञ्चमलकारेण मोक्षसाध-नज्ञानद्वारलाभ इति संस्कारपक्षविविदिषा पक्षयोरुभयोरपि वैदिकानां कर्मणां ज्ञानद्वारत्वम्[7]। शैवानान्तु क्रियाचर्याख्यानां कर्मणां तादृशानाम्[8] –

ज्ञानोत्पत्तिनिमित्तन्तु क्रियाचर्या प्रकीर्तिता।

**इत्यागमवचनेन** ज्ञानद्वारकत्वलाभः। एवञ्च पक्षद्वयेऽपि ज्ञानद्वारलाभान्न श्रौतस्मार्ता-गमिकक्रियाचर्याकर्मांशेऽपि मोक्षसाधनत्वावेदकवाक्यानां पूर्वोक्ताप्रामाण्यदोषो यद्यपि। तथाऽपि संस्कारपक्षापेक्षयाऽस्ति विविदिषापक्षे गुणः। संस्कारपक्षे हि चत्वारिंशत्संस्कारव्यतिरिक्तानां कर्मणां मोक्षसाधनशिवज्ञानहेतुत्वं श्रुत्या प्रतीयते। तथा च "वेदैस्सर्वैश्शिवो वेद्य" इत्यादिवचनैः प्रतिपन्नस्य साक्षाद्वा संस्कारद्वारा वा शिवस्य सर्वनिगमागमस्मृतीतिहासपुराणादिवेद्यत्वस्यानाञ्जस्यम्। इतरेषां प्रकृतिविकृत्यादिभावनादीनाञ्च चत्वारिंशत् संस्कारान्तर्भावकल्पने[9] स एव महान् क्लेशः।

किञ्चास्मिन् पक्षेऽनुष्ठितानां कर्मणां वैराग्यादिकमपीतरकारणं[10] सम्पाद्यावश्यं ज्ञानोत्पादकत्वमिति न नियमः। विविदिषा संयोगेनाविधानेन तदर्थतयाऽननुष्ठानात्। किन्तु तत्तत्फलार्थतयाऽनुष्ठितानि तानि स्वस्वकारणेन[11] वैराग्यादौ सति ज्ञान-मुत्पाद्य मोक्षं जनयन्ति। अन्यथा तत्तत्फलमेवोत्पादयन्ति। विविदिषापक्षे तु पूर्वोक्तरीत्योत्पत्तिस्थ सर्वयज्ञाद्यनुवादेन[12] ज्ञानोपयोगविधानान्न तद्वदन्तर्भावक्लेशादिदोषः। विविदिषा संयोगेन विधानाद्विद्यार्थतयाऽनुष्ठानेन स्वर्गार्थतयाऽनुष्ठितानां यागानां

5 (टि) लौकिकव्युत्पत्त्याश्रयणेऽपीति। तदाश्रयणे उक्तप्रकारद्वयेन ज्ञानद्वारत्वलाभः।

6 (टि) अपि नासमुच्चितं व्युत्पत्त्यन्तरमाह – मीमांसेति।

7 (टि) ज्ञानद्वारत्वमिति। ज्ञानद्वारकत्वमित्यर्थः।

8 (टि) तादृशानाम् – मोक्षसाधनानाम्।

9 (टि) चत्वारिंशत्संस्कारव्यतिरिक्तेति। यमनियमाद्यष्टसंस्काराणां कर्मत्वाभावात्तथोक्तिः।

10 (टि) वैराग्यादि यत् ज्ञानं प्रतीतरकारणं तत्सम्पाद्येत्यर्थः।

11 (टि) स्वस्वकारणेनेति। वैराग्यादेर्यत्स्वस्वीयं कारणं तेन तस्मिन् सतीत्यर्थः। आदिना शमादिपरिग्रहः।

12 (टि) सर्वं यज्ञादि तदनुवादेन।

स्वर्गजनक[13]शरीरलोकादिकमप्यवश्यमुत्पाद्य स्वर्गजनकत्ववत्तेषां वैराग्यादिकमपीतरकारणं सम्पाद्यापि तादृशज्ञानोत्पादकत्वनियमश्च भवतीत्यतो विविदिषापक्ष एव ज्यायान्। तत्रापि स्मार्तविविदिषावाक्ये वाराणसीप्रयाणादीनामन्तर्भावे शङ्का स्यात्। अतः कुर्यादिति प्रकृत्या श्रौतस्मार्तगर्भाधानाद्यागमिकचर्याक्रियायोगलौकिकोच्छ्वासाभक्ष्यभक्षणादिसर्वकर्माण्यनूद्य दर्शनार्थिना प्राधान्येन शिवभजनत्वेनान्तरंगसाधनतया कर्तव्यतां विधातुं प्रथमम्। ननु यस्तु यत्प्रदानसमर्थो भवति तदर्थिना स भजनीयः। न च शिवस्य ज्ञानप्रदानसामर्थ्यम्। प्रमाणाभावात्। स्वत एव चेतनत्वेन प्रज्ञानसम्भवाच्च।

अतस्तदर्थिनस्तत्भजनतया सर्वकर्मविधानमसङ्गतमित्याशङ्क्य "शङ्करात् ज्ञानमन्विच्छे"दित्यादिबहुश्रुतिस्मृतीतिहासपुराणसिद्धं, शिवस्य ज्ञानप्रदत्वं युक्तितोऽप्याह – **दृशो दर्शयिते वेति**। अत्र दृश इतीन्द्रियपर्यायो दृक्शब्दः। जातावेकवचनम्। दृशोरिति पाठे बाह्यान्तरिन्द्रिययोरवयुत्यनिर्देशः। दृशो बुध्यर्थत्वात् "गतिबुद्धिप्रत्यवसानार्थे"त्यादि**व्याकरणसूत्रेण** कर्मसंज्ञायां षष्ठ्येवेयम्। तथा चायमर्थः यथेन्द्रियाणामर्थस्य दर्शयिताऽऽत्मा तेषामचेतनत्वात्तथा तस्यापि स्वस्वरूपस्य दर्शयिता शिव इत्यर्थः। एतदनुमानप्रकारोपपादनञ्च पञ्चमसूत्र उक्तमनुसन्धेयम्। पुनर्वचनञ्चात्र न केवलं तिरोधानशक्त्या मलीमसविषयादिभोगरूपज्ञानप्रदत्वं, अपि तु परमपरुषार्थसाधनशिवज्ञानप्रदातृत्वमपि तस्यानुग्रहशक्त्येति द्योतयितुम्। अत एव तत्रार्थानित्युक्तम्। अत्रत्वात्मोपकारके आत्मानं ज्ञेयत्वेनोपकुर्वतीत्येवोक्तम्। तस्माद्दर्शनप्रदत्वात्।

अत्रात्मोपकारक इत्युक्ते विशेष्यापेक्षायां प्रकरणौचित्याभ्यां शिव इति सिद्धेऽपि पुनस्तस्मिन्निति ग्रहणं स्वरूपज्ञानप्रदातृत्वेन बहुनिगमागमस्मृतीतिहासपुराणादिसिद्धत्वप्रत्यभिज्ञानार्थम्। तस्मिन् ज्ञानप्रदातृत्वेन निगमादिसिद्ध इत्यर्थः। परां स्वस्ववाक्योक्तासाधारणफलाभिसन्धिरहिताम्। अत्र ज्ञानप्रदे भक्तिं कुर्यादिति हेतूक्त्या ज्ञानार्थी लभ्यते[14]। यथा धनदमुपासीतेत्यत्र धनार्थी। कुर्यादिति प्रकृत्या निगमागमेषु कर्तव्यतया चोदितसर्वकर्मानुवादः। तस्मिन् परां भक्तिमिति गुणसम्बन्धः। तथा चायमत्र वाक्यार्थः। वैदिकमागमिकञ्च यत्कर्मनित्यनैमित्तिककाम्यतया ब्रह्मविष्णुप्रभृतियजनत्वेन च विहितं यच्च गर्भाधानादि यच्च तत्राविहितं निमेषादि यच्च तत्र प्रतिषिद्धं जन्तुवधादिकर्म करोति तत् ज्ञानार्थी शिवे भक्तिं शिवभजनात्मकं तत्रापि तस्मिन् शिवे तत्रापि परां कुर्यादिति[15]। अत्र तस्मादिति वक्तव्ये तस्मिन् भक्तिमिति वदन् प्राधान्येन शिवभक्तेर्ज्ञानं प्रत्यन्तरङ्गसाधनतयाऽवश्यकर्तव्यत्वाञ्चाह। शिवस्य ज्ञानप्रदातृत्वे प्रमाणं **सूतसंहितायां मुक्तिखण्डे** –

---

13 (टि) स्वर्गजनकेति। स्वर्गजनकं चन्द्रमण्डले अम्मयशरीरं लोकः चन्द्रमण्डलप्राप्तिरित्यर्थः।

14 (टि) ज्ञानार्थी लभ्यत इत्यस्याधिकारीति शेषः।

15 (टि) सूत्रस्थस्य तस्मिन्नित्यस्य तात्पर्यमाह – तत्रापि तस्मिन्निति। सवेषां विहिताविहितनिषिद्धकर्मणां भजनत्वेन करणेऽपि न पुनर्यस्मिन् कस्मिंश्चिदपि। अपि तु शिव इत्यर्थः। तत्रापि परामिति। शिवभक्तित्वेन करणेऽपि परा या भक्तिस्तादृग्रूपेणैव करणं मोक्षसाधनमित्यर्थः। यथा तस्मिन्नित्युक्तिर्भजनीयान्तरं व्यवच्छिनत्ति, तद्वत्प्रकरणवाशच्छिव इति लाभेऽपि तस्मादित्यनुक्त्वा तथोक्तिश्शिवभजनस्य ज्ञानं प्रत्यन्तरङ्गतयावश्यकर्तव्यत्वञ्चाहेत्याहात्र तस्मादित्यादिना। प्रसादादेव मेऽच्युतेति प्रमाणमित्यन्वयः। अस्तीति शेषः।

बहूनां जन्मनामन्ते तथा पुण्यवतां नृणाम्।
प्रसादादेव मे वाक्यज्ञानं सम्यग्विजायते।।
तस्मात् ब्राह्मात्मविज्ञानं दृढं चरमविग्रहे।
जायते मुक्तिदं शुद्धं प्रसादादेव मेऽच्युते।। इति।

**स्मृतावपि –**

"आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात्।
शङ्करात् ज्ञानमन्विच्छे" दिति,

**सूतसंहितायां यज्ञवैभवखण्डे तृतीयाध्याये** नित्यनैमित्तिककाम्यकर्मणां यथायोग्यं काम्यशुध्यादिप्रधाननान्तरीयकफलान्यभिधाय तत्र कामनया करणे निन्दामुक्त्वा केवलं विहितमिति करणे मन्दफलकारित्वमुक्त्वा तत् त्रिविधमपि कर्मप्राधान्येन शिवाराधनबुध्यैव कर्तव्यं शीघ्रफलप्राप्तय इत्युक्तम् –

शिवाराधनबुध्या ये यजन्ते श्रद्धया सह।
येषु यज्ञेषु ते शीघ्रं विमुक्तिफलमाप्नुयुः।। इति।

अन्येषां विष्णवादीनां येषु कर्मसु यष्टव्यत्वेन स्ववाक्य एव चोदनं सामान्यतो वा तेष्वपि तेषां प्राधान्येन यष्टव्यता बुद्धिनिन्दापूर्वकं शिवस्यैव कर्मसु प्राधान्येन यष्टव्यत्वं तत्रैवोक्तम् –

विष्णुं ब्रह्माणमिन्द्रं वा देवतान्तरमेव वा।
प्रधानबुध्या ये यज्ञैर्यजन्ते मोहतोऽपि वा।।
ते यान्ति नरकं घोरं यावदाभूतसंप्लवम्।
नामतश्चार्थतो यस्तु महादेवो महेश्वरः।।
स एव साम्बस्सर्वज्ञ इज्यस्सर्वमहामखैः। इति।

तथा तत्रैव श्रुतीतिहासपुराणागमेष्वविहितनिषिद्धयोरपि कर्मणोश्शिवाराधनबुध्या कृतयोर्ज्ञानसाधनत्वमुपपत्तिपूर्वकमुक्तम् –

यानि लोके निषिद्धानि कर्माण्यविहितानि च।
तानि शम्भोः परा पूजेत्येतत् ज्ञानं महासुखम्।।
यानि कर्माणि सर्वाणि निषिद्धानि श्रुतौ स्मृतौ।
तानि चाराधनं शम्भोरिति ज्ञानं महासुखम्।।
ईश्वरार्थधिया पापान्यपि कर्माणि सुव्रताः।
भवन्ति पूतान्यत्यन्तं सत्यमेव न संशयः।।
आर्द्रं काष्ठं महानग्निश्शुष्कं कृत्वा दहेद्यथा।
तथेश्वरधिया पापं शुद्धविज्ञानदं भवेत्।। इति।

तान्त्रिका अपि द्विविधाः। वेदानुसारिणो वेदबाह्याश्च। तत्राद्यानां श्रौतत्वादेव श्रौतस्य शिवोपासनत्वकथनेन तेषामपि शिवाराधनत्वेन कर्तव्यत्वमुक्तमेव। वेदबाह्यबुद्धार्हतादि-धर्माणामपि शिवाराधनत्वमैच्छिकदेवताराधनस्यापि शिवयज्ञत्वं वदता **कैमुतिकन्यायेन**

**तत्रैवोक्तम्** –

वैदिकं तान्त्रिकं हित्वा मार्गं स्वप्रज्ञया द्विजाः।
सोऽपि यज्ञ इति प्रोक्तो मया वेदार्थवित्तमाः।।
श्रद्धया सहितं सर्वं श्रेयसे भूयसे भवेत्। इति।

तथा चात्र नैमित्तिककाम्यनिषिद्धविहिता प्रतिषिद्धकर्मणामैच्छिकाराधनानां च शिवयज्ञत्वेन कृतानां कायिकानां ज्ञानसाधनत्वे प्रमाणमुक्तम्। एवं वाचिकमानसिकानां मातृकादिजपसाम्बध्यानादीनामपि तत्त्वे प्रमाणं चतुर्थाध्यायादिकमनुसन्धेयम्[16]।

एवमुक्तं कायिकं वाचिकं मानसिकं च त्रिविधमपि कर्म प्रत्येकं द्विविधम्। साक्षात् शिवविषयं विष्ण्वादिविषयं च। तत्र कायिकं शिवविषयं शिवार्चनशिवक्षेत्रवासादि। वाचिकं पञ्चाक्षरजपशिवासाधारणनामोच्चारणादि। मानसिकं शिवासाधरणमूर्ति-साम्बध्यानशिवस्मरणादि। विष्ण्वादिविषयञ्च कायिकं विष्ण्वाद्यर्चनविष्ण्वादिक्षेत्रवासादि। वाचिकमष्टाक्षर्यादिजपविष्ण्वादिनामोच्चारणादि। मानसिकं च नारायणादिमूर्तिध्यानस्मरणादि। तेष्वपि शिवविषयाण्येवाव्यवधानेन सिद्धिदानि। अन्यविषयाणि तु क्रमेण। अन्यविषयाणामपि शिवाराधनत्वेन[17] करणं ज्ञानसाधनमित्यतस्साक्षात्तद्विषयाणामौत्कृष्ट्यमुक्तं सूचितमेव। आगमेषु चेदं स्पष्टमेव। **सूतसंहितायां पराशरोपपुराणे** चेदं तत्र तत्रोक्तम्। अत्र साधनीयस्यार्थस्याभावात् न विस्तरः।।

**।। इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये एकादशसूत्रभाष्यम् समाप्तम् ।।**

---

16 (पा) चतुर्धाध्यानादिकम्
(टि) चतुर्धाध्यानादिकमिति प्रामादिकम्। चतुर्थाध्यायादिकमिति भवितव्यम्। तथा च सूतसिंहताया यज्ञवैभवखण्डे चतुर्थाध्यायादिकं प्रमाणमित्यर्थः।

17 (पा) शिवाराधनत्वेन उक्तमौत्कृष्ट्यं सूचितमेवेत्यन्वयः।

# द्वादशसूत्रभाष्यम्

एवं पूर्वसूत्रे सर्वकर्मणां शिवाराधनत्वेन कृतानां ज्ञानसाधनत्वोपदेशोऽपि तत्रैव विहितनिषिद्धसाधारण्येन कर्तव्यत्वोपदेशेन[1] शैवेषु दासप्रपन्नसन्मार्गवर्त्यधिकारेषु त्रिविधेषु कर्मसु तादृशप्रपन्नधर्मस्य प्राधान्येन शिवज्ञानोपयोगोऽप्युक्त एव। अष्टमसूत्रे च निर्वाणदीक्षादेस्सन्मार्गवर्तिकर्मणोऽन्तरङ्गतरस्योपयोग उक्तः। इदानीं दासकर्मणो बहिरङ्गभक्त्यात्मकस्य द्वादशसूत्रस्य पूर्वार्धेन ज्ञाने उपयोगमाह –

# द्वादशसूत्रम्

**मुक्त्यै प्राप्य सतस्तेषां भजेद्वेषं शिवालयम्।**
**इत्थं विद्याच्छिवज्ञानबोधे शैवार्थनिर्णयम्।। इति।।**

यद्वा – शैवाधिकारिणश्चतुर्विधाः समयिपुत्रकसाधकाचार्यभेदेन। तत्र समयिनो धर्मो बहिरङ्गभक्तिभूता समयदीक्षापुरस्सरं शिवालयशिवभक्तादिपरिचर्यैव।

पुत्रकस्य धर्मो विशेषदीक्षागमाध्ययनादिपुरस्सरमन्तरङ्गभूता लिङ्गे शिवार्चनादि-रूपा शिवभक्तिः। साधकाचार्ययोस्तु निर्वाणदीक्षापुरस्सरमन्तरङ्गमन्त्रोपास्त्या-दिर्गुरुमुखादागमार्थविचाररूपं श्रवणं च। तत्राष्टमसूत्रे तादृशसाधकाचार्यधर्मस्य ज्ञानोपयोग उक्तः। एकादशसूत्रे शिवार्थमिति वक्तव्ये शिवे भक्तिमिति प्रयुञ्जानेन तादृशस्यापि पुत्रकधर्मस्यान्तरङ्गस्य प्राधान्येन ज्ञानोपयोग उक्त एव। इदानीं परिशिष्टस्य समयिधर्म-स्यान्तरङ्गस्य गुरुजङ्गमशिवालयपरिचर्यात्मकस्यापि बहिरङ्गस्य ज्ञानोपयोगो द्वादश-सूत्रस्य पूर्वार्धेनोच्यते।

तथाहि – अत्र त्रिविधेषु शिवधर्मेषु निर्वाणदीक्षादिपुरस्सर आद्यस्तस्मिन् जन्मनि मुक्तिप्रदः। द्वितीयस्त्वेकजन्मव्यवधानेन। तृतीयो जन्मद्वयव्यवधानेनापि। तत्राद्ये आगमाः प्रमाणमुक्तमेव[2]। उक्तं च **सूतसंहितायामपि** निर्वाणदीक्षामधिकृत्य –

शक्तिपातेन सा युक्ता विद्या वेदान्तवाक्यजा।
यदा यस्य तदा तस्य विमुक्तिर्नास्ति संशयः।। इति।

तृतीये[3] तु **शिवधर्मोत्तरमुक्तम्** –

इति यः कुरुते भक्तिं सततं शिवयोगिनाम्।
स द्वितीये तृतीये वा देहे योगमवाप्नुयात्।। इति।

द्वितीयस्त्वर्थसिद्ध[4] एव। पूर्वसूत्रसिद्धश्च। एवमुपकारक्रमं मनसि निधायात्रोपयोगोपदेशक्रमो

---

1 (टि) कर्तव्यत्वोपदेशेनेति। कुर्यात् भक्तिमित्यनेनेत्यर्थः। सन्मार्गवर्त्यधिकारेषु ताद्यधिकारके-ष्वित्यर्थः।

2 (टि) आगमः बह्वागमरूपं प्रमाणमुक्तमेवेत्यर्थः।

3 (टि) तृतीयेत्विति धर्म इति शेषः। विषयसप्तमी।

4 (टि) अर्थसिद्ध एवेति। तृतीयस्यापि द्वितीयतृतीयजन्मनि योगप्रदत्वकथनेनार्थात् द्वितीयस्य तत्प्रदत्वं सिध्यत्येवेत्यर्थः।

द्रष्टव्यः। अत्र सूत्रे ज्ञानार्थिपदं पूर्वसूत्रे न्यायलब्धमनुवर्तते। सच्छब्देन चात्र शैवाश्रमिणोऽन्ये वा भस्मरुद्राक्षधारिणश्शिवज्ञानरता गुरुजङ्गमा[5] उच्यन्ते –

उद्धूळनं त्रिपुण्ड्रं च यैस्समाचरितं मुदा।
त एव शिष्टा विद्वांसो नेतरे मुनिपुङ्गवाः।।

इति **स्कान्दवचनात्** –

जङ्गमन्तु गुरुर्लिङ्गं त्रिविधं लिङ्गमुच्यते।
ब्राह्मणो वाऽपि चण्डालस्सुगुणो दुर्गुणोऽपि वा।।
भस्मरुद्राक्षसच्चिह्नश्शिव एव न संशयः।

इति **सुप्रभेदवचनाच्च**। सतां वेषधारणस्य वक्ष्यमाणस्य तत्प्राप्तिं। विनाऽपि[6] सम्भवेनासम्भवददृष्टार्थायाः प्राप्तेर्दृष्टतदुपकाररूपप्रयोजनाकांक्षायां शास्त्रान्तरेण समयि-धर्मत्वेन प्राप्तं शिवभक्तजङ्गमगुरुपादसंवहनादितत्परिचर्याजातमुच्यते। तथा चायमर्थः। समयीमुक्त्यर्थं ज्ञानार्थी शिवयोगिनः प्राप्य पादसंवहनादिभिस्तान् परिचरेदिति। तदुक्तं **शिवधर्मोत्तरे** –

अथ ये सततं भक्त्या भजन्ति शिवयोगिनः।
ते विन्दन्ति महाभोगानन्ते योगं च शाङ्करम्।।
भोगयोगार्थिभिस्तस्मात्ते पूज्याश्शिवयोगिनः।
प्रतिश्रयान्नपानेन[7] शय्यावस्त्रासनादिभिः।।
यो वाऽत्र स्थानशुश्रूषां प्रकुर्याच्छिवयोगिनाम्।
दरिद्रस्सततं भक्त्या तस्य पुण्यफलं श्रुणु।।
सूर्यतेजः प्रतीकाशैर्विमानैस्सर्वगामिकैः।
मृतश्शिवपुरं गच्छेत् त्रिसप्तकुलसंयुतः।।
तत्र दिव्यैर्महाभागैस्त्रीसहस्रैर्मनोरमैः।
कल्पायुतशतं दिव्यं[8] सेव्यमानस्स तिष्ठति।।
तदन्ते विष्णुभवने तावत्कालं वसेत् पुनः।
वैष्णवैर्विविधैर्भोगैः स्त्रीसहस्रैश्च पूजितः।।
विष्णुलोकाच्च्युतो ब्राह्मं प्राप्य संक्रीडते पुनः।
भोगैस्तु विविधैस्सूक्ष्मैस्तावत्कालमनुत्तमैः।।
प्रजापतीन्द्रगन्धर्वयक्षलोकेष्वनुक्रमात्।
भोगान्नानाविधान् भुक्त्वा पृथिव्यां जायते क्रमात्।।
कुले महति विप्राणां प्राज्ञश्शीलगुणान्वितः।

---

5 (टि) शिवज्ञानरता गुरुजङ्गमा इति। शिवज्ञानरतास्तु केवलं जङ्गमा एव। तेषां सञ्चारादिमात्रेण पाषाणादिस्थावरवैलक्षण्यम्। तथा च स्थावरसदृश एवेत्यर्थः। "धिग्विद्यामशिवाश्रया"मिति विद्यान्तरशीलिनामपि निन्दित्वादिति भावः।

6 (टि) तत्प्रातिं विनापि – सत्प्रातिं विनाऽपि।

7 (टि) प्रतिश्रेयो वासगृहम्। स्थानशुश्रूषां – गृहशुश्रूषाम्।

8 (टि) दिव्यं – देवसम्बन्धि।

ततस्स सर्वभावेन योगीन्द्रसमुपासन[9]।।
तत्संपर्काच्छिवज्ञानं प्राप्य योगं निषेवते।
योगाद्विरक्तस्संसारात्[10] प्राप्नोति परमं पदम्।।
इति यः कुरुते भक्तिं सततं शिवयोगिनाम्।
स द्वितीये तृतीये वा देहे योगमवाप्नुयात्।। इति।

एवमन्यत्रापि **सूतसंहितादिषु** शिवभक्तपूजाप्रकारो द्रष्टव्यः। तेषां सतां वेषो भस्मोद्धूळनत्रिपुण्ड्ररुद्राक्षधारणादिः। स्मृतिषु[11] बोधायनभरद्वाजविष्णुयमशातातपस्मृतिस्मृतिरत्नावळीस्मृतिधर्मसारस्मृतिसुधानिधिस्मृतिभास्करस्मृतिसारसमुच्चयनारदीयलोकाक्ष्याख्यादिषु महापुराणेषु च ब्राह्मस्कान्दकौर्मबृहन्नारदीयगारुडवायवीयलैङ्गमात्स्यादिषु उपपुराणेषु च पाराशरशिवधर्मवासिष्ठलैङ्गदानवेष्वितिहासे च भारते कल्पसूत्रेषु च बौधायनादिष्वागमेषु च शिवधर्मोत्तरादिक्रियासारमानवीयसंहिताशिवराघवसंवादशिवरहस्यादिष्वेतेषु च सर्वेषु यथायथमथर्वशिरश्वेताश्वतरतैत्तिरीयकैवल्याद्युपनिषन्मूलेषु यथायथं भस्मोद्धूळनत्रिपुण्ड्राद्यश्रद्धाद्वेषादिषु त्रिपुण्ड्रव्यतिरिक्तेषु चोर्ध्वत्रिशूलवर्तुळचतुरश्रार्धचन्द्रादिपुण्ड्रेषु तत्पूर्वभाविषु च शङ्खचक्रादिलाञ्छनेषु तच्छ्रद्धादिषु च कारणत्वेन सामान्यपापोपपातकस्वयोनिवंशसाङ्कर्यादि गर्भादानादिद्विजसंस्काराराहित्यमोहब्रह्मशापगौतमादिषण्मुनिशापादिदोषसङ्कीर्तनरूपनिन्दापुरस्सरं साक्षात्तन्निषेधपूर्वकं कार्यत्वेन च पातित्यादिदोषसङ्कीर्तनरूपनिन्दापुरस्सरञ्च जन्मान्तरकृतानेकपुण्यफलत्वेन त्रिपुण्ड्रश्रद्धादिष्विति पूर्वं नित्यशब्दसदाशब्दफलानुत्कीर्तनाऽत्यागचोदनाऽकरणे दोषकीर्तनवीप्सावचनवर्णाश्रमधर्मत्वकीर्तनादिभिर्नित्यतया क्वचित्, क्वचित् पापनाशार्थं प्रायश्चित्ततया, क्वचिन्नित्यस्यैव कर्मणस्समृद्धिशिवलोकादिफलसंयोगेन काम्यतया, क्वचिन्मुमुक्षोरव्यवधानेन ज्ञानसाधनतया च सार्थवादं विधानाद्वैदिकस्य शैवस्य च विशिष्टाधिकारिणः केवलभस्मोद्धूळनत्रिपुण्ड्रादेर्वेषस्य विहितत्वेन तस्यैव सद्वेषत्वादत्र तं वेषं भजेदेव तमेव च वेषं भजेत् नत्वत्यन्ततामसानां **पाञ्चरात्रतन्त्र**विहितमूर्ध्वपुण्ड्रं शङ्खचक्राङ्कनादिकं, तस्य पाद्मादिपुराणेषूक्तत्वेऽपि प्रत्यक्षश्रुतिमूलोक्तस्मृतिपुराणादिषु निषिद्धत्वेन तादृशपुराणवचनानां[12] तन्त्रार्थप्रत्यभिज्ञानसम्भवात्तन्त्रमूलतया च वेदमूलत्वाभावात्। नापि गोपी[13]चन्दनाद्यूर्ध्वपुण्ड्रविशेषम्।

---

[9] (पा) योगीन्द्रं समुपासते
(टि) योगीन्द्रं समुपासत इति प्रमादपतितम्। योगीन्द्रसमुपासन इति पाठस्साधुः।

[10] (टि) योगाद्विरक्त इत्यत्र योगादिति हेतौ पञ्चमी। नत्ववधौ। तत्र संसारादिति वर्तते पञ्चमी।

[11] (टि) भस्मोद्धूळनादेरेव सद्वेषत्वमित्येतद्व्यवस्थापयति स्मृतिष्वित्यादिना। त्रिपुण्ड्राद्यश्रद्धा पुण्ड्रान्तरादिश्रद्धयोः कारणत्वेन सामान्यपापादिषण्मुनिशापान्तदोषाणां सङ्कीर्तनरूपा निन्दा। साक्षात्तादृशश्रद्धाश्रद्धादिनिषेधपूर्वकं तत्कार्यत्वेन पातित्यादिदोषसङ्कीर्तनरूपा निन्देत्यर्थः। जन्मान्तरेत्यारभ्य भस्मोद्धळनादेस्सद्वेषत्वे प्रामाणिकत्वोपन्यासः। तस्य पाद्मादीत्यारभ्य वेदमूलत्वाभावादित्यन्तेन छिद्रपुण्ड्रादेस्सप्रमाणत्वनिरासः।

[12] (टि) तादृशपुराणवचनानां – पाद्मादिपुराणवचनानाम्। तत्र तन्त्रार्थप्रत्यभिज्ञानसम्भवात् तन्त्रमूलकत्वनिश्चये इति शेषः।

[13] (टि) नापि गोपीत्यारभ्य गोपीपुंड्रादेः प्रमाणस्यान्यथानयनेन त्रिपुण्ड्रादपकर्षप्रतिपादनम् ।

तस्य तन्त्रप्रत्यभिज्ञानरहितेषु व्याससत्यव्रतमन्वादिस्मृतिवचनेषु बृहन्नारदीयब्राह्मपुराणादिषु वैदिकाह्निकप्रकरणेषु विधानेऽपि वैदिकस्य शैवस्य च सामान्यत ऊर्ध्वपुण्ड्रनिषेधेन प्रकरणेऽसमवेततया प्रकरणादुत्कृष्यत्वात्, प्रकरणे सङ्गतत्वेऽपि त्रिपुण्ड्रापेक्षयाऽपकृष्टत्वाच्च। तथाहि बोधायनविष्णुयमशातातपस्मृतिषु ब्राह्मस्कान्दबृहन्नारदीयादित्यपुराणादिषु पराशरोपपुराणवासिष्ठलैङ्गमानवोपपुराणादिषु च तत्र तत्र यथायथं वैदिकस्य तावत्भस्मोद्धूळनत्रिपुण्ड्राश्रद्धादौ ऊर्ध्वपुण्ड्रत्रिशूलवर्तुळचतुरश्रार्धचन्द्राकृतिरूपपुण्ड्रतप्तचक्राद्यङ्कनश्रद्धादिषु च यथायथं पापोपातकस्वयोनिवंशसाङ्कर्यादिद्विजसंस्काराभावमोहब्रह्मशापगौतमादिषण्मुनिशापादयो दोषाः कारणत्वेन कार्यत्वेन च पातित्यादयो दोषा निन्दार्थं सङ्कीर्त्यन्ते। निषिध्यन्ते च साक्षादुक्तोर्ध्वपुण्ड्राङ्कनादयो वैदिकस्य शैवाश्रमिणश्च। स्तूयन्ते चोद्धूळनादय उक्तविशिष्टाधिकारिणो विधानार्थम्। पातकं तावत् **स्कान्दे सूतसंहितायाम्** –

त्रिपुण्ड्रोद्धूळनादौ च तन्मानश्रवणेऽपि च।
वाञ्छा न जायते येषां ते महापापसंयुताः।।
शङ्खचक्रगदापद्मवज्रपाशाङ्कुशादिभिः।
अङ्किताश्च भविष्यन्ति मनुष्याः पापकर्मिणः।।

**वासिष्ठलैङ्गे** स्वयोनिवंशसाङ्कर्यादयो द्विजसंस्काराभावश्च –

येषां भस्मनि विद्वेषो वर्तते हृदये सदा।
सङ्कीर्णा सा भवेत् ब्रह्मन् तेषां वंशपरंपरा।।
येषां क्रोधो भवेत् ब्रह्मन् ललाटे भस्मदर्शनात्।
तेषामुत्पत्तिसाङ्कर्यमनुमेयं विपश्चिता।।
येषां श्रद्धा मुने नास्ति श्रौतभस्मनि सर्वदा।
गर्भाधानादिसंस्कारस्तेषां नास्तीति निश्चयः।।

ब्रह्मशापः **पराशरोपपुराणे** –

त्वद्भक्ता ब्राह्मणास्साक्षात् त्रिपुण्ड्रे भस्मकुण्ठने।
भवेयुर्विमुखा नित्यं वेदसिद्धे विमुक्तिदे।।
त्रिशूले चतुरश्रे वा वेणुपत्रोपमे तथा।
पुण्ड्रान्तरे रता नित्यं भवेयुस्तान्त्रिका द्विजाः।।
आयुधैश्शङ्खचक्राद्यैस्त्वदीयैरङ्किता जना। इति।

षण्मुनिशापास्तु **सङ्ग्रहेणादित्यपुराणे** –

दुर्वाससो मुनेश्शापात्कुपितस्य महात्मनः।
कण्वशापात् भृगोश्शापादुपमन्योश्च शापतः।।
दधीचेश्च मुनेश्शापात्गौतमस्य च शापतः।
विप्राणां दाक्षिणात्यानां पापिष्ठानामचेतसाम्।।
शिवे भस्मनि रुद्राक्षे किञ्चिच्छ्रद्धा न विद्यते।

विशिष्य गौतमशापः **कौर्मे स्कान्दे** च –

केनापि हेतुना ज्ञात्वा शशापातीवकोपनः।
भविष्यथ त्रयी बाह्या महापातकिभिस्समा।। इति।
महादेवस्य चोत्कर्षे त्रिपुण्ड्रोद्धूळनादिषु।
भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः।।

इत्यादिभिरुक्तो द्रष्टव्यः।

**पराशरोपपुराणे** साक्षादूर्ध्वपुण्ड्रचक्राङ्कनादिनिषेधः –

ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुळञ्चतुरश्रकम्।
अर्धचन्द्राकृतिं लिङ्गं वेदनिष्ठो न धारयेत्।।
न दाहयेत् द्विजश्रेष्ठं न दहेच्चक्रपूर्वकैः।
अङ्कितो यस्स्वदेशात्तं राजा शीघ्रं प्रवासयेत्।।

तथा **स्कान्दे सूतसंहितायां** पुण्ड्रान्तरचक्राद्यङ्कनिषेधः तत्र मोहश्च –

नाङ्कनं विग्रहे कुर्याद्वेदपन्थानमाश्रितः।
पुण्ड्रान्तरं भ्रमाद्वाऽपि ललाटे नैव धारयेत्।।
ऊर्ध्वपुण्ड्रं ललाटे तु वर्तुळञ्चतुरश्रकम्।
धारयिष्यन्ति मोहेन पाषण्डोपहता जनाः।।
शङ्खचक्रगदापद्मैरङ्कनं विग्रहे स्वके।
मोहेनैव करिष्यन्ति पाषण्डोपहता जनाः।।

**मानवोपपुराणे चतुर्दशाध्याये** शङ्खचक्राद्यङ्कनिषेधः –

आयुधैश्शङ्कचक्राद्यैर्न दहेच्च कदाचन।
मनुष्याणान्तु नाम्नैव न दहेच्चोरसि भ्रमात्।।

**ब्राह्मपुराणे गोपीचन्दनमाहात्म्ये** तप्तमुद्रानिषेधः –

तप्तमुद्रात्वन्त्यजाय हरिणा निर्मिता पुरा।
गोपीचन्दनसंसिक्तफलकाऽप्यन्त्यजातये।।

चिह्नं कृत्वा विमूढधीः। इह जन्मनि शूद्रस्स्यात्प्रेत्य च श्वा भविष्यति।।

**बोधायनस्मृतावङ्कनिषेधः** –

नाङ्कनाय दहेद्देहे न दहेत्कामकारत। इति।

**शातातपस्मृतौ** –

अङ्गेषु नाङ्कयेद्विप्रो देवतायुधलाञ्छनैः। इति।

**यमस्मृतौ** –

नाङ्कयेन्न दहेत्गात्रं देवतायुधलाञ्छनैः। इति।

**स्कान्दे यज्ञवैभवखण्डे** –

वेदजमार्गैकनिष्ठस्तु मोहेनाप्यङ्कितो यदि।
पतत्येव न सन्देहस्तथा पुण्ड्रान्तरादपि।। इति।

**विष्णुस्मृतौ** –

शङ्खं चक्रं मृदा यस्तु कुर्यात्तप्तायुधेन च।
स शूद्रवत्बहिष्कार्यस्सर्वस्माद्द्विजकर्मणः।। इति।

**वीरे** –

चक्राङ्कितस्य विप्रस्य चण्डालस्सदृशो भवेत्।
दर्शने स्पर्शने चैव सचेलस्नानमाचरेत्।।
शङ्खचक्रधरा ये तु दृष्टिमात्रेण दूरतः।
अवलोक्य मुखं तेषामादित्यमवलोकयेत्।। इति।

तथा **स्कान्दे पराशरोपपुराणे** च महापुण्यफलत्वेन त्रिपुण्ड्रादिश्रद्धास्तूयते –

वेदोत्कर्षे शिवोत्कर्षे विद्योत्कर्षे तथैव च।
त्रिपुण्ड्रोद्धूळनोत्कर्षे श्रद्धा पुण्यवतो भवेत्।।
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम्।
वेदोक्तेनैव मार्गेण त्रिपुण्ड्रे जायते मतिः।। इति।

एवं यथायथं त्रिपुण्ड्रमूर्ध्वपुण्ड्रान्तरश्रद्धानिन्दानिषेधादिपूर्वकं त्रिपुण्ड्रादिश्रद्धां स्तुत्वोक्त-न्नित्यशब्दादिभिः। **पराशरोपपुराणे स्कान्दे** च तावत्भस्मोद्धूळं त्रिपुण्ड्रादिकं केवलवैदिकस्य शैवाश्रमिणश्च नित्यतया विधीयते। तत्र **पाराशरे** नित्यशब्दः –

ब्राह्मणो विधिनोत्पन्नं त्रिपुण्ड्रं भस्मनैव तु।
ललाटे धारयेन्नित्यं तिर्यक् भस्मावकुण्ठनम्।।

**स्कान्दे** –

त्रिपुण्ड्रं धारयेन्नित्यं गृहस्थाश्रममाश्रितः। इति।

**पराशरोपपुराणे** सदाशब्दः –

आदिब्राह्मणभूतेन त्रिपुण्ड्रं भस्मना धृतम्।
यतोऽत एव विप्रस्तु त्रिपुण्ड्रं धारयेत्सदा।। इति।

**स्कान्दे** च –

"धारयेत् ब्राह्मणस्सदे"ति।

**पराशरोपपुराणे** अत्यागचोदना –

भस्मना वेदसिद्धेन त्रिपुण्ड्रं देहकुण्ठनम्।
रुद्रलिङ्गार्चनञ्चापि मोहतो वापि न त्यजेत्।।

**स्कान्दे** च –

त्रिपुण्ड्रं धारयेत्भक्त्या मनसाऽपि न लङ्घयेत्। इति।

**पराशरोपपुराणे** त्यागदोषः –

भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
विना वेदोदिताचारः स्मार्तश्चानर्थकारणम्।। इति।

**स्कान्दे** च –

श्रुत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत्। इति।

**पराशरोपपुराणे** वर्णाश्रमधर्मतया सङ्कीर्तनम् –

वर्णधर्मतया प्राज्ञाः प्रवदन्ति महर्षयः।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।।
आश्रमाणाञ्च सर्वेषां धर्मत्वेनाहुरास्तिकाः।

फलाश्रुतिश्चोभयत्रापि। एवं **कौर्मे गारुडे मानवेऽपि** च –

ब्राह्मणो विधिनोत्पन्नं त्रिपुण्ड्रं भस्मनैव तु।
ललाटे धारयेन्नित्यं तिर्यक् भस्मावकुण्ठनम्।।

इत्यादिषु नित्यशब्दादयो नित्यत्वावेदका द्रष्टव्याः। तथा **बौधायने स्मृतिभास्करे** च प्रायश्चित्तरूपत्वं भस्मधारणस्य –

मध्यमानामिकाङ्गुष्ठैर्ललाटे यत् त्रिपुण्ड्रकम्।
तत् त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्।। इति।
वनस्पतिगते सोमे भस्मोद्धूळितविग्रहः।
अचितं शङ्करं दृष्ट्वा सर्वैः पापैः प्रमुच्यत।। इति।

एवं **बोधायनस्मृतौ** कर्मसमृध्यादिफलकत्वमपि –

एतदाग्नेयकं स्नानमुदितं परमर्षिभिः।
सर्वकर्मसमृध्यर्थं कुर्यादादाविदं बुधः।। इति।

**धर्मसारसुधानिधौ** –

त्रिपुण्ड्रकं सदा कुर्यान्मन्त्रपूतेन भस्मना।
वेदोक्तेन विधानेन शिवसायुज्यमाप्नुयात्।। इति।

तथा ज्ञानसाधनत्वमपि **वासिष्ठलैङ्गे** –

बहुनाऽत्र किमुक्तेन धारणं मोक्षसाधनम्।
भस्मनो नित्ययुक्तस्य ज्ञानमुत्पद्यतेऽचिरात्।। इति।

एवमुक्तस्मृतिषु नित्यत्वकाम्यत्वमोक्षसाधनज्ञानसाधनत्वावेदकानि बहूनि वचनानि द्रष्टव्यानि। आगमेष्वपि **शिवधर्मे** नित्यशब्दः –

यस्स्नानमाचरेन्नित्यमाग्नेयं स जितेन्द्रियः। इति।

**वीप्साकालोत्तरे** –

त्रिसन्ध्यं भस्मना स्नानं त्रिपुण्ड्रं वा समाचरेत्। इति।

फलश्रुतिश्च सर्वत्र। **सुप्रभेदे** सदाशब्दः –

जलेन मिश्रितं भस्मत्रिपुण्ड्रं धारयेत्सदा। इति।

**वीरे** –

भस्मस्नानं प्रवक्ष्यामि शृणुष्व कमलासन।
भर्त्सनात्सर्वपापानां भस्मेति परिकीर्तितम्।। इत्यादि।

**द्विशतिकालोत्तरे** –

समयीपुत्रकश्चैव साधकाचार्य एव च।
त्रिपुण्ड्रैकविधानेन सर्वरक्षा विधीयते।। इति।

त्रिशूलाद्यूर्ध्वपुण्ड्रं तप्तशङ्खचक्रादिलाञ्छनञ्च पाञ्चरात्रेषु तामसाधिकारिणां विहितम्। अत एव चाविशिष्टवेषं विशिष्टो वैदिकश्शैवाश्रमी वा न भजेत्। अपि च वेदतन्मूलविहितं वैदिकेन कर्तव्यम्। सिद्धान्तशैवाश्रमिणाऽपि वेदविहितं सिद्धान्तशैवाश्रमविहितञ्च कर्तव्यम्। नचैतद्वेदतन्मूलस्मृतिपुराणादिषु न वा शैवागमेषु विहितम्। अतस्त्रिशूलाद्यूर्ध्वपुण्ड्रं तप्तचक्रादिलाञ्छनञ्च वैदिकेन सिद्धान्तशैवाश्रमिणा च न कर्तव्यम्। ननु वैदिकेष्वेव **पाद्मादिपुराणेषु** –

ब्राह्मणः क्षत्रियो वैश्यश्शूद्रो नारी तथेतरः।
चक्राद्यैरङ्कयेत् गात्रमात्मनः परया मुदा।।
शिखोपवीतवत्धार्यमूर्ध्वपुण्ड्रं द्विजन्मनाम्। इति।

द्विजातीनामेवाङ्कनादिकं विधीयते, तैश्च स्मृत्यधिकरणन्यायेन मूलभूतश्रुत्यनुमानाद्वैदिकेनापि तद्धार्यमेव। नचोक्तस्मृत्यादिषु प्रत्यक्षश्रुतिमूलेषूर्ध्वपुण्ड्राङ्कनादेस्तदर्थस्य निषेधान्न तैः पुराणैर्बुद्धाद्यागमेनैव विरोधाधिकरणन्यायेन श्रुत्यनुमानमिति वाच्यम्। त्रिपुण्ड्रादिकमारभ्य पुण्ड्रान्तरनिषेधकानां तन्निन्दकानाञ्चोक्तवाक्यानामुदितानुदितहोमनिन्दावाक्यवद्वाक्यभेदभयेन प्रकरणिस्तुत्यर्थत्वेन निषेधकत्वाभावादिति चेन्मैवम्। प्रत्यक्षश्रुतिमूलोक्तबोधायनस्मृत्यादावनारभ्यापि तन्निषेधस्य श्रुतत्वेन निषिद्धार्थस्मृतिपुराणादिना श्रुत्यनुमानाभावात्। अपि च –

सच्छिद्रन्तु त्रिशूलस्य मध्ये रेखा हरिद्रतः।

इति पूर्वापरपर्यालोचनया तन्त्रैकार्थप्रत्यभिज्ञानसम्भवात्तन्त्रमूलकतया हेतुदर्शनाच्चेति न्यायेन वा न वेदमूलकान्युक्तपुराणानि। किन्तु **पाञ्चरात्रागम**मूलानि सन्ति च तन्त्रमूलान्यपि स्मृतिपुराणानि। अत एतान्यपि तामसपाञ्चरात्रतान्त्रिकविषयाण्येव। अतो नैतेषां प्रामाण्यापत्तिरपि। तदुक्तम् **स्कान्दे सौरसंहितायाम्** –

तन्त्रावलम्बनेनैव पुराणानि च कानिचित्।<br>
साक्षाद्वेदविरुद्धार्थं प्रवदन्ति क्वचित् क्वचित्।।<br>
अधिकारिविभेदेन नैवं वेदपरंपरा। इति।

न च तथाऽपि **पाञ्चरात्रतन्त्रे** ब्राह्मणादीनामनधिकारात्तत्रोक्तपुराणानन्वय इति वाच्यम्। आगमप्रामाण्यावसरे तत्र त्रैवर्णिकानामप्यशुद्धसत्वानामधिकारस्य स्थापितत्वात्। यत्तूक्तं **ब्रह्मानन्दभारतीभि**र्जन्मना लब्धजातीनां ब्राह्मणादीनां तत्रानधिकार एव तेषामुक्तनिषेधात्। उक्तपुराणेषु ब्राह्मणादिशब्दाश्च पाञ्चरात्रोक्तब्राह्मण्यादियोजनादिकर्मलब्धजातिपरा इति, तन्न। संस्कारविधायकवाक्ये प्रकृते भाविब्राह्मणजातेः स्वतः परामर्शासम्भवात्, जन्मना लब्धब्राह्मण्यानामपि तत्राधिकारस्य पूर्वं स्थापितत्वाच्च। नन्वस्त्वेवं सच्छिद्रोर्ध्वपुण्ड्रादिकमङ्कनादिकञ्च **पाद्माद्युक्तं** पाञ्चरात्रतान्त्रिकविषयम्। तथापि गङ्गामृत्तिकागोपीचन्दनादिकृतमच्छिद्रोर्ध्वपुण्ड्रादिकन्तु वैदिकविषयमेव। तत्रोक्तदोषाभावात्। तथाहि – वैदिकाह्निकप्रकरणे **व्याससत्यव्रतमन्वादिस्मृतिषु ब्रह्माण्डनारदीयपुराणेषु** च तद्विधीयते –

जाह्नवीतीरसम्भूतां मृदं मूर्ध्ना बिभर्ति यः।<br>
बिभर्तिरूपं सोऽर्कस्य तमोनाशाय वै स्थितम्।। इति।<br>
ऊर्ध्वपुण्ड्रो मृदा शुभ्रो ललाटे यस्य दृश्यते।<br>
स चण्डालोऽपि शुद्धात्मा पूत एव न संशयः।। इति।<br>
ऊर्ध्वपुण्ड्रं मृदा धार्यं विप्रेण ब्रह्मवादिना। इति।<br>
ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा चोभौ वा धारयेद्द्विजः।<br>
ऊर्ध्वपुण्ड्रे त्रिपुण्ड्रं स्यात्त्रिपुण्ड्रे नोर्ध्वपुण्ड्रकम्।। इति।<br>
यज्ञो दानं तपो होमस्स्वाध्यायः पितृतर्पणम्।<br>
वृथा भवति विप्रेन्द्रा ऊर्ध्वपुण्ड्रं विना कृतम्।।

इत्यादि**बृहन्नारदीयवचनानि** बहूनि। **ब्राह्मे** च विशिष्य –

गोपीचन्दनलिप्ताङ्गो यं यं पश्यति चक्षुषा।

इत्यादीनि बहूनि वचनानि। **ब्रह्माण्डेऽपि** –

अशुचिर्वाऽप्यनाचारो मनसा पापमाचरन्।<br>
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्राङ्कितो नरः।।

इति सप्रयोगं विधायकानि बहूनि श्रूयन्ते। अत्र च ब्रह्मवादिनेति विशेषणाद्वैदिकाह्निकप्रकरणे

श्रुतत्वाच्चैतदनुसारेण –

ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुलञ्चतुरश्रकम्।
अर्धचन्द्राकृतिञ्चैव वेदनिष्ठो न धारयेत्।। इति।
वेदपन्थानमाश्रितः।
पुण्ड्रान्तरं भ्रमाद्वापि ललाटे नैव धारयेत्।।

इति च वैदिकस्योर्ध्वपुण्ड्रसामान्यनिषेधस्याप्युक्तगोपीचन्दनाद्यूर्ध्वपुण्ड्रव्यतिरिक्तहरि-पदाकृतित्रिशूलाद्यूर्ध्वपुण्ड्रनिषेधपरत्वात्। अतस्स्वार्थस्य निषेधाभावादिमानि वचनानि श्रुत्यनुमापकान्येव। एतेन यदुक्तं **ब्रह्मानन्दभारतीभि**रुक्तवचनाभ्यामूर्ध्वपुण्ड्रसामान्यनिषेधादि-मान्यपि वचनानि न श्रुत्यनुमापकानीति तदपि पराकृतम्। अपि चोर्ध्वपुण्ड्रं त्रिशूलं चेत्यत्र पाञ्चरात्रादिसच्छिद्रोर्ध्वपुण्ड्रवाचि त्रिशूलपदसाहचर्यात्तादृशस्य सच्छिद्रस्य विष्णुपदाकृत्यूर्ध्वपु-ण्ड्रकस्यैवोर्ध्वपुण्ड्रपदेन ग्रहणम्। "पुण्ड्रान्तरं भ्रमा"दित्यत्रापि। विष्ण्वागमादिष्विति विशेषणाच्च तादृशस्यैव ग्रहणम्। तथा चोर्ध्वपुण्ड्रे कृते तदविच्छेदेन तदुपरि त्रिपुण्ड्रकरणे विरोधाभावादपि न गुरूक्तविरोधाधिकरणन्यायेन श्रुत्यननुमापकत्वमुक्तानां वचनानाम्। तथा च विरोधाभावादुभौ वा धारयेदित्यूर्ध्वपुण्ड्रे त्रिपुण्ड्रं स्यादिति च समुच्चयविधानाच्च समुच्चय एव साधारणवैदिकस्य युक्तः। "ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वे"ति विकल्पवचनन्तु विरोधं शून्यललाटतापरिहाररूपदृष्टफलत्वं वाऽङ्गीकृत्य। यत्तु –

गोपीचन्दनधारी तु शिवं स्पृशति यो द्विजः।
स स्वैकविंशतिकुलस्सोऽक्षयं नरकं व्रजेत्।। इति।
गोपीचन्दनसंयुक्तं भूत्या तिर्यक् त्रिपुण्ड्रकम्।
षष्टिर्वर्षसहस्राणि।

इति च गोपीचन्दनतत्रिपुण्ड्रसमुच्चयनिषेधवचनञ्च तदुक्तयुक्त्यादिभिश्शैवाश्रमिविषयम्। शैवाश्रमिणश्शिवशास्त्रे विशिष्योर्ध्वपुण्ड्रनिषेधात्। पुराणेऽपि –

पुण्ड्रान्तरनिषेधो यो वेदमार्गैकवर्तिनः।
स समानस्तान्त्रिकस्य शैवस्यापि न संशयः।।

इति निषेधाच्च। एवञ्च वैदिकाह्निकप्रकरणे पठितस्यापि पुण्ड्रसमुच्चयप्रकरणे निषेधा-दनन्वयेन पाञ्चरात्रिकाह्निकप्रकरणे उत्कर्ष इति यदुक्तं **ब्रह्मानन्दभारतीभिस्तदपि** न्यायौचित्यानभिज्ञानविजृम्भितम्। तस्माद्वैदिकस्य साधारणस्य सच्छिद्रपुण्ड्राङ्कस्य निषेधेऽपि गोपीचन्दनाद्यूर्ध्वपुण्ड्रसमुच्चयात्कथं तस्य न सद्वेषत्वमिति चेत् – अस्त्वेवं, तथाऽपि मिश्रस्य केवलवैदिकस्य च शैवाश्रमिणोऽतिविशिष्टस्य त्वद्दृशाऽपि गोपीचन्दनादिकमपि न धार्यमेव। उक्तवैदिकस्यापि पुण्ड्रद्वयमध्ये तिर्यक्पुण्ड्रस्यैव प्रत्यक्षबहुश्रुत्यर्थवादोपबृम्हितत्वादिना श्रेष्ठत्वाच्छ्रेष्ठत्वमभिप्रेत्यैव भस्मधारणस्यैव सद्वेष-त्वमुक्तम्। न च **वायवीये** प्रत्यभिज्ञातशैवार्थे आगमे च **कालोत्तरे** –

लिङ्गदीपार्धचन्द्राभं चतुरश्रञ्च वर्तुळम्।
त्रिपुण्ड्रञ्चेति कथितं षड्विधं शिवशासनम्।।

इति षड्विधस्यापि पुण्ड्रस्य शिवसाधनत्वविधानाच्छैवस्यापि कथं केवलं त्रिपुण्ड्रधारणमिति वाच्यम्। तस्य शिवपदस्य **कूर्मस्कान्दशैवागमा**द्यनुरोधेन योगवृत्त्या मूर्तित्रयपरत्वादिति। तस्मात्भस्मोद्धूळनत्रिपुण्ड्रादिकं सद्वेषत्वात् ज्ञानार्थिना धार्यमिति स्थितम्। एवं रुद्राक्षधारणमपि सद्वेषत्वात् ज्ञानार्थिनाऽवश्यं कर्तव्यमिति। तथाहि – महापुराणेषु **स्कान्दपाद्मब्राह्मनारदीयगारुडवायवीयेषूपपुराणेषु च मानवपराशरवासिष्ठलैङ्गेषु** आगमेषु च सर्वेषु यथायथं रुद्राक्षधारणाश्रद्धोक्तनिन्दा तच्छ्रद्धास्तुतिपुरस्सरं नित्य-शब्दसदाशब्दाधारणे दोषकीर्तनफलाश्रुतिभिर्नित्यतया क्वचिन्मुखादिभेदेन काम्यतया, प्रायश्चित्ततया, शिवज्ञानसाधनतया च विहितत्वात्। तथाहि षण्मुनिशापादयो दोषाः पूर्वमुक्ता एव। धारणश्रद्धास्तुति**र्बृहन्नारदीये** –

बहूनां जन्मनामन्ते महादेवप्रसादतः।
रुद्राक्षधारणे श्रद्धा स्वभावादेव जायते।। इति।

नित्यशब्दः **स्कान्दे** –

कण्ठे मूर्ध्न्युपवीते वा कर्णे करयुगेऽथवा।
रुद्राक्षं धारयेन्नित्यं भक्त्या परमयायुतः।। इति।

**तत्रैवा**करणे दोषः –

अरुद्राक्षधरो भूत्वा यत् किञ्चित् कर्मवैदिकम्।
कुर्वन् विप्रस्तु मोहेन नरके पतति ध्रुवम्।। इति।

सदाशब्दो **वायवीये** –

नाभक्त्या धारयेदक्षं सदा भक्त्यैव धारयेत्। इति।

फलाश्रुतिश्च सर्वत्र। प्रायश्चित्तत्वमपि **मानवे** –

रुद्राक्षं धारयेत्पापं कुर्वन्नपि च मानवः।
सर्वं तरति पाप्मानं जाबालश्रुतिराह हि।। इति।

काम्यत्वमपि **गारुडे** –

"रुद्राक्षतरूसम्भूतवातोद्धूततृणान्यपि।
पुण्यलोकं गमिष्यन्ती"ति।

शिवज्ञानसाधनत्वञ्च **स्कान्दे** ईश्वरः –

जाबालोपनिषत्साध्वी मम ज्ञानस्य सिद्धये।
प्रधानसाधनान्याह प्राणिनामादरेण तु।।

इत्यारभ्य –

रुद्राक्षधारणं साक्षाच्छिवशब्दजपस्तथा। इति।

एवमस्मिन्नर्थे बहूनि वचनान्युक्तपुराणेषु द्रष्टव्यानि। शिवालयञ्चालेपनमार्जनाराम-करणादिभिर्भजेत्मुक्त्यै ज्ञानार्थीति। इदमपि **सूतसंहितादिषु वीराद्यागमेषु** चोक्तं द्रष्टव्यम्। इयता प्रबन्धेनोक्तं शैवार्थनिर्णयं लाघवेन व्यवहारायोपादेयताप्रतिपत्तये द्वादश-सूत्रात्मकस्यैतच्छास्त्रस्यान्वर्थन्नामसिद्धवन्निर्दिशन्नेव निगमयति –

**मूलम् –**

**इत्थं विद्याच्छिवज्ञानबोधे शैवार्थनिर्णयम्**।। इति।

ज्ञायतेऽनेनेति ज्ञानं, शिवस्य ज्ञानं शिवज्ञानं, शैवागमः तेन विरोधादिना कस्यचिदर्थस्यानिर्णाय-केन बोधो विषयव्यवस्थादिना असन्दिग्धाविपर्यस्तार्थनिर्णयो यस्मात् स **शिवज्ञानबोध** इति विग्रहः। शिवज्ञानेभ्यो बोधो येन शिवज्ञानानां पूर्वोक्त युक्त्या प्रथमं मुक्तानां बोधः प्रबोधक उत्तेजक इति वा अस्मिन् शिवज्ञानबोधे शैवागमस्यार्थेषु पूर्वोक्तयुक्त्या विप्रतिपन्नेषु निर्णयं निर्णीयत इति निर्णयः, अबाधितमुख्यैककोटिः यश्शास्त्रादौ पृष्टस्तं इत्थं विद्यात् इत्थं भूतं उक्तसन्देहमालापरिशिष्टकोटिं विद्यादिति। यद्वा शैवार्थस्य मुख्यस्याबाधितस्य निर्णयं निश्चयं इत्थं विद्यात्। उक्तप्रकारं विद्यादिति। शिवज्ञानबोधमिति पाठे तु इत्थं विद्याच्छैवार्थनिर्णयमिति पूर्वं सम्बन्धः। पुनश्च तत्प्रतिपादकञ्च शास्त्रं शिवज्ञानबोधनामकं विद्यादिति सम्बन्धः। यद्वा निर्णयशब्दो निर्णायकवाची। शैवार्थस्य निर्णयोऽनेनेति बहुव्रीहिर्वा। तेन शिवज्ञानबोधं शैवार्थनिर्णयं विद्यादिति सामानाधिकरण्येन युगपदेव सम्बन्धः।।

**। इति द्वादशसूत्रसंग्रहभाष्यं समाप्तम् ।**

## अथ विस्तृतभाष्यम्

विस्तरेणापि व्याख्यायते –

एवं पूर्वसूत्रे सर्वकर्मणां ज्ञानोपयोगित्वकथनेऽपि भक्तिशब्दप्रयोगेन शिवे साक्षात्भक्तेरन्तरङ्गभूतायाः प्राधान्येन ज्ञानोपयोगित्वमुक्तम्। तेन च सामयिकेषु तादृशपुत्रकधर्मस्य ज्ञानोपयोग उक्त एव। निर्वाणदीक्षाचर्यादेः साधकाचार्यधर्मस्योपयोगोऽष्टमसूत्र एवोक्तः। इदानीं परिशिष्टसमयिधर्मस्य गुरुजङ्गमशिवालयपरिचर्यात्मकस्य बहिरङ्गस्यापि ज्ञानोपयोगित्वं द्वादशसूत्रस्य पूर्वार्धेनाह – **मुक्त्यै प्राप्येति**। तथाहि – शैवेषु त्रिविधो धर्मः। एको निर्वाणदीक्षापुरस्सरचर्यायोगादिरन्तरङ्गतरस्साधकाचार्यधर्मः। तस्मिन्नेव जन्मनि मोक्षसाधनत्वात्। अत्र च प्रमाणमष्टमसूत्रे उक्तम्। अन्यो विशेषदीक्षा पुरस्सरनिगमागमाध्ययनशिवलिङ्गार्चनादिर्विरक्तोन्तरङ्गः पुत्रकधर्मः। परस्तु गुरुजङ्गमशिवालयपरिचर्यादिर्बहिरङ्गस्समयिधर्मः। उभयत्र प्रमाणं **शिवधर्मोत्तरे** –

इति यः कुरुते भक्तिं सततं शिवयोगिनाम्।
स द्वितीये तृतीये वा देहे योगमवाप्नुयात्।। इति।

एवमुपयोगतारतम्यं हृदि निधायैवोपयोगोपदेशक्रमोऽपीति द्रष्टव्यम्। अत्रापि पूर्वसूत्रेऽर्थलब्धं ज्ञानार्थीति पदमनुषज्यते। अत्र सच्छब्देन शैवाश्रमिणोऽन्ये वा भस्मरुद्राक्षधारिणश्शिवज्ञानरता

गुरुजङ्गमा उच्यन्ते –

उद्धूळनं त्रिपुण्ड्रञ्च यै यस्समाचरितं मुदा।
त एव शिष्टा विद्वांसो नेतरे मुनिपुङ्गवाः।।

इति **स्कान्दवचनात्**,

एका मूर्तिस्त्रयो भागा गुरुर्लिङ्गं तु जङ्गमम्।
जङ्गमन्तु गुरुर्लिङ्गं त्रिविधं लिङ्गमुच्यते।।
ब्राह्मणो वाऽपि चण्डालस्सुगुणो दुर्गुणोऽपि वा।
भस्मरुद्राक्षसंछन्नश्शिव एव न संशयः।।

इति **सुप्रभेदवचनाच्च** तेषामेव सत्वात्। अत्र वक्ष्यमाणसद्वेषभजनस्य सतां प्राप्तिं विनापि सम्भवेन निर्दिश्यमानायास्सत्प्राप्तेस्सम्भवद्दृष्टार्थायाः प्रयोजनाकाङ्क्षायां शास्त्रान्तरप्राप्तगुरुजङ्गमशिवभक्तपरिचर्यादिकमेव प्रयोजनत्वेन सम्बध्यते। अथवा भजेदित्येतदत्राप्यपकृष्यते। सतः प्राप्य स्वयमेवोपचारेणोपसृत्य तान् पादसंवाहनादिभिः भजेदित्यर्थः। **सुप्रभेदे** –

द्विविधं तत्समाख्यातं चरञ्चाचरमेव च।
चरे सदा वसत्येव प्रीतियुक्तो महेश्वरः।।
अचरे मन्त्रसंस्कारात् सत्यमेव सदाशिवः।
न शब्दं स्थावरञ्चैव शब्दो मन्त्रोपदेशतः।।
लोकपूज्यकरं देवि श्रेष्ठं लिङ्गाच्च जङ्गमम्।
लिङ्गार्पितं न कर्तव्यं कर्तव्यं जङ्गमार्पितम्।।
आरग्वधे च बिल्वे च लिङ्गे च गुरुविग्रहे।
शिवयोगिशरीरे च नित्यं सन्निहितश्शिवः।।
माहेश्वरपदाविष्टं स्थानं यत्सम्पदां पदम्।
दधीचेन पुरा ख्यातं विष्णोर्वक्षश्श्रियास्पदम्।।
श्वपचोऽप्येति सन्देशाद्यत्र माहेश्वरस्थितिः।
तत्र योजनविस्तीर्णं शिवक्षेत्रं विधीयते।।
स्वयंभूर्यत्र वा लिङ्गं यत्र वा शिवयोगिनः।
तत्र योजनपर्यन्तं वाराणस्यविशेषतः।।
धन्यानि तानि नगराणि निरामयानि
नित्योत्सवानि विजयोत्तरभूपतीनि।
एकोऽपि यानि सुमनाश्शिवयोगशाली
पद्भ्यां पवित्रयति पावनपादुकाभ्याम्।।

**शिवधर्मे** –

सुदूरमपि गन्तव्यं यत्र माहेश्वरो जनः।
प्रयत्नेनापि द्रष्टव्यस्तत्र सन्निहितो हरः।।
चण्डालवाटिकायां वा यस्य भक्तिस्थिरा मयि।
तच्छ्रेणी शिवलोकस्स्यात्तत्ग्रहं शिवमन्दिरम्।।
मद्भक्तजनवात्सल्यं मत्पूजाञ्चानुमोदनम्।
स्वयमभ्यर्चनं भक्त्या मदर्थे चाङ्गवेष्टनम्।।
मत्कथाश्रवणे भक्तिस्स्वरनेत्राङ्गविक्रियाः।
ममानुस्मरणं नित्यं सर्वथामय्यकैतवम्।।
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते।
स विप्रेन्द्रो मुनिः श्रीमान् स यतिस्स च पण्डितः।।
न मे प्रियश्चतुर्वेदी मद्भक्तश्श्वपचोऽपि यः।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्।।
ललाटे भस्म वै यस्य कण्ठे रुद्राक्षमालिका।
रुद्रलोकात्परिभ्रष्टः स रुद्रो नात्र संशयः।।
कण्ठे यस्य च रुद्राक्षः फाले भस्म विराजते।
वाचि पञ्चाक्षरीमन्त्रः स विज्ञेयस्सदाशिवः।।
मृन्मयालाबुपात्राद्यं सुवृत्तं भैक्षभाजनम्।
निवेद्य शिवयोगिभ्यः क्षितिदानफलं लभेत्।।

**शिवधर्मोत्तरे** –

पलाशपद्मपत्रैर्वा यः कृत्वा पुटकानि तु।
प्रदद्याच्छिवयोगिभ्यस्ताम्रपात्रफलं लभेत्।।
यस्ताम्रपात्रं सुकृतं प्रदद्याच्छिवयोगिने।
स्वर्णपात्रप्रदानस्य फलमाप्नोति मानवः।।
रौप्यपात्रं सुवर्णं वा निवेद्य शिवयोगिने।
कोटिकोटिं सकल्पानां शिवलोके प्रमोदते।।
यस्थूलमतिविस्तीर्णं दद्याद्वस्त्रमसूकरम्।
मृदुचर्मकृतं वाऽपि सितवस्त्रावकुण्ठितम्।।
कृष्णाजिनोपरिस्थाप्य पुष्पधूपादिवासितम्।
शिवध्यानाभियुक्तानां श्रद्धया विनिवेदयेत्।।
तत्तूलवस्त्रतन्तूनां रौम्णां सङ्ख्या हि यावती।
तावद्युगसहस्राणि शिवलोके महीयते।।
तदन्ते सर्वलोकेषु भुक्त्वा भोगाननुक्रमात्।
ततः क्षितिं समासाद्य सिंहासनपतिर्भवेत्।।

**शिवधर्मेऽन्यत्र** –

योगपट्टपवित्राणि निवेद्य शिवयोगिने।
वस्त्रयुग्मसहस्रस्य दत्तस्य फलमाप्नुयात्।।
मध्यमोत्तमवस्त्राणि यो दद्यात्तु नवानि च।
एतत्समासतो ज्ञेयं वस्त्रदानस्य लक्षणम्।।
कौपीनाच्छादनं वासो निवेद्य शिवयोगिने।
युगकोटिसहस्राणि रुद्रलोके महीयते।।
कल्माषदण्डं यो दद्यादन्यं वा शिवयोगिने।
बलावष्टम्भयुक्तात्मा स स्याद्दण्डाग्रनायकः।।
त्रिविष्कम्भसमायुक्तं यः प्रदद्यात्कमण्डलुम्।
महासरांसि यः खात्वा पुण्यं तत्सकलं भवेत्।।
शिवभक्ताय यो दद्यादुपानत्काष्ठपादुके।
सुराश्वेभसहस्रस्य दत्तस्य फलमाप्नुयात्।।
तालवृन्तातपत्रं वा यो दद्याच्छिवयोगिने।
एकच्छत्रान्तु भुञ्जीत पृथिवीं स नराधिपः।। इति।

**सोमशम्भौ** –

अनुग्रहाय लोकानां श्रद्धामपि परीक्षितुम्।
चरन्त्यतिथिरूपेण देवा एव हि भूतले।।
अस्य पुण्यात्मनश्चक्षुर्गोचरे पतिता नराः।
न यान्ति भवसन्तापं शिवलोकं व्रजन्त्यमी।।
शिवयोगिनमायान्तं दृष्टैव गृहसंस्थिताः।
क्रीडन्त्योषधयस्सर्वा यास्यामस्स्वर्गमक्षयम्।।
तस्मादतिथिमायान्तमधिगच्छेत् कृताञ्जलिः। इति।

**सूतसंहितायामपि षष्ठाध्याये** –

नैमिशीया ऊचुः –

भगवन् शिवभक्तस्य कथं पूजा प्रकीर्तिता।
फलञ्च कीदृशं प्रोक्तं पूजायास्तद्वदादरात्।।

सूतः –

वक्ष्ये पूजाविधिं विप्राश्शिवभक्तस्य सादरम्।
श्रुणुध्वं श्रद्धयोपेताः कुरुध्वं यत्नतस्सदा।।
येन येन प्रकारेण शिवभक्तस्य जायते।
मनस्तृप्तिस्तथा कुर्यात् पूजा सैव मयोदिता।।
शुद्धतोयं समादाय शिवभक्तस्य सादरम्।
पादं प्रक्षाळयेत् साऽपि पूजा विप्रा गरीयसी।।

तैलाभ्यङ्गं तथा पूजां प्रवदन्ति मनीषिणः।
गात्रमर्दनमप्यन्ये शिवभक्तस्य सुव्रताः।।
अन्नपानप्रदानञ्च प्रोक्ता पूजा गरीयसी।
अर्थदानञ्च पूजा स्याद्वस्त्रदानमपि द्विजाः।।
स्रक्चन्दनादिदानञ्च वनितादानमेव च।
भूमिदानञ्च गोदानं तिलदानमपि द्विजाः।।
शिवभक्तस्य पूजेति प्रवदन्ति मनीषिणः।
जलपात्रप्रदानञ्च गृहदानं तथैव च।।
ताळवृन्तप्रदानञ्च पात्रदानं तथैव च।
छत्रपादुकयोर्दानं शय्यादानं तथैव च।।
शिवभक्तस्य पूजेति प्रवदन्ति विपश्चितः।
पुरा कश्चिद्द्विजावैश्यस्समृद्धोऽभून्महीतले।।
तस्य पुत्रास्समुत्पन्नाश्चत्वारो वेदवित्तमाः।
तेषां ज्येष्ठतमः पुत्रस्सत्यवादी जितेन्द्रियः।।
सर्वभूतानुकम्पी च ब्रह्मचर्यपरायणः।
शिवभक्तस्सदा विप्राः प्रसन्नो नियताशयः।।
जन्ममृत्युभयाक्रान्तस्त्वरमाणो विमुक्तये।
श्रीमद्वाराणसीमेत्य ब्रह्मविष्ण्वादिसेविताम्।।
स स्वयं शिवभक्तेभ्यः प्रदत्वा श्रद्धया सह।
पूजया शिवभक्तानां विमुक्तः कर्मबन्धनात्।। इति।

तेषां सतां वेषो भस्मोद्धूळनत्रिपुण्ड्ररुद्राक्षधारणादिः। स्मृतिषु **बोधायनभारद्वज-विष्णुयमशातातपीयस्मृतिरत्नावलिस्मृतिधर्मसारसुधानिधिस्मृतिभास्करस्मृति-सारसमुच्चयनारदीयलोकाक्ष्यादिषु** महापुराणेषु **ब्राह्मस्कान्दकौर्मबृहन्नारदीय-गारुडशैवमानव्यसंहितावायव्यलैङ्गमात्स्यादित्यपुराणादिषु** चोपपुराणेषु च **पाराशरशिवधर्मवासिष्ठलैङ्गमानवेष्वितिहासे च भारते कल्पसूत्रेषु च बौधायनादिष्वागमेषु च शिवधर्मकालोत्तरादिषु क्रियासारशिवराघवसंवादशिवरहस्यादिषु** चैतेषु सर्वेषु च **यथायथमथर्वशिरश्वेताश्वतरतैत्तिरीयकैवल्याद्युपनिषन्मूलेषु** यथायथं भस्मोद्धूळनत्रिपुण्ड्राद्यश्रद्धाद्वेषादिषु त्रिपुण्ड्रव्यतिरिक्तेषु चोर्ध्वपुण्ड्रत्रिशूलवर्तुळचतुरश्रार्ध-चन्द्रादिपुण्ड्रेषु तत्पूर्वभाविषु च तप्तशङ्खचक्रादिलाञ्छनेषु तच्छ्रद्धादिषु च कारणत्वेन सामान्यपापपातकस्वयोनिवंशसाङ्कर्यादिगर्भाधानादिद्विजसंस्काराराहित्यमोहब्रह्मशापगौतमादिष-ण्मुनिशापादिदोषसङ्कीर्तनरूपनिन्दापुरस्सरं साक्षात्तन्निषेधपूर्वकं कार्यत्वेन च पाति-त्यादिदोषसङ्कीर्तनरूपनिन्दापुरस्सरं च जन्मान्तरकृतानेकपुण्यफलत्वेन त्रिपुण्ड्रश्रद्धा-दिस्तुतिपूर्वं नित्यशब्दसदाशब्दफलानुत्कीर्तनाऽत्यागचोदनाकरणे दोषकीर्तनवीप्सावचन-वर्णाश्रमधर्मत्वकीर्तनादिभिर्नित्यतया, क्वचित्पापनाशार्थं प्रायश्चित्ततया क्वचिन्नित्यस्यैव कर्मसमृद्धिशिवलोकादिफलसंयोगेन काम्यतया, क्वचिन्मुमुक्षोरव्यवधानेन ज्ञानसाधनतया च

सार्थवादं सविधानं वैदिकस्य शैवस्य च विशिष्टाधिकारिणो भस्मोद्धूळनत्रिपुण्ड्रादेर्वेषस्य विहितत्वेन तस्यैव सद्वेषत्वात्। अत्र तं वेषं भजेदेव तमेव च वेषं भजेत्। नत्वत्यन्ततामसानां **पाञ्चरात्रतन्त्र**विहितमूर्ध्वपुण्ड्रशङ्खचक्राङ्कनादिकं, तस्य **पाद्मादि**पुराणेषूक्तत्वेऽपि प्रत्यक्षश्रुतिमूलोक्तस्मृतिपुराणादिनिषिद्धत्वेन तादृशपुराणवचनानां तन्त्रार्थप्रत्यभिज्ञानेन सम्भवत्तन्त्रमूलतया वेदमूलत्वाभावात्। नापि गोपीचन्दनाद्यूर्ध्वपुण्ड्रविशेषम्।

तस्य तन्त्रप्रत्यभिज्ञानरहितेषु **व्याससत्यव्रतमन्वादिस्मृति**वचनेषु **बृहन्नारदीयब्राह्मपुराणादिषु** च वैदिकाह्निप्रकरणे विधानेऽपि वैदिकस्य शैवस्य सामान्यत ऊर्ध्वपुण्ड्रनिषेधेन प्रकरणेऽसमवेततया प्रकरणादुत्कृष्यत्वात्। प्रकरणे सङ्गतत्वेऽपि त्रिपुण्ड्रापेक्षयाऽपकृष्टत्वाच्च। तथाहि – **बोधायन-विष्णुयमशातातपस्मृतिषु स्कान्दब्राह्मबृहन्नारदीयादित्यपुराणेषु पराशरोपपुराण-वासिष्ठलैङ्गमानवोपपुराणादिषु** च तत्र तत्र यथायथं वैदिकस्य तावत् भस्मोद्धूळनत्रिपुण्ड्रादावश्रद्धोर्ध्वपुण्ड्रत्रिशूलवर्तुळचतुरश्रार्धचन्द्राकृतिरूपपुण्ड्रतप्तचक्राद्यंकनश्रद्धादिषु यथायथं पापोपातकस्वयोनिवंशसाङ्कर्यद्विजसंस्काराभावमोहब्रह्मशापगौतमादिषण्मुनिशापादयो दोषाः कारणत्वेन कार्यत्वेन च पातित्यादयो दोषानिन्दार्थं सङ्कीर्त्यन्ते। निषिध्यन्ते च साक्षादुक्तोर्ध्वपुण्ड्राङ्कनादयो वैदिकस्य शैवाश्रमिणश्च। स्तूयन्ते चोद्धूळनादय उक्तविशिष्टाधिकारिणो विधानार्थम्। पातकं तावत् **स्कान्दे सूतसंहितायाम्** –

श्रुतौ चैव महादेवे त्रिपुण्ड्रे भस्मकुण्ठने।
श्रद्धां न कुरुते मर्त्यः पुण्यलेशविवर्जितः॥
पापिष्ठानां मनुष्याणां त्रिपुण्ड्रोद्धूळने श्रुतौ।
महादेवे च विद्वेषस्स्वत एव हि जायते॥
अविरोधे तु वेदानां पुरोक्तेनैव वर्त्मना।
वेदानुसारिस्मृत्यादौ पापिष्ठस्य न हि स्पृहा॥
विष्ण्वादेश्शिवसाम्ये च वेदसाम्ये परस्य च।
कुर्वन्तीच्छामविद्वांसः पापमेवात्र कारणम्॥
वेदानामपकर्षे च त्रिपुण्ड्रादेस्तथैव च।
तथा शिवापकर्षे च यतन्ते पापयोनयः॥
महादेवश्च वेदाश्च तथा तिर्यक् त्रिपुण्ड्रकम्।
व्यर्थमित्याहुरत्यर्थं पाषण्डाः पापयोनयः॥
पापवह्निपरिदग्धमानसो
देवरुद्रशिवशङ्करादिषु।
क्रोधमेति मुनयस्त्वहो नरः
कीटपूर्वजनिरेव तस्य तु॥
उद्धूळनं त्रिपुण्ड्रञ्च श्रद्धया नाचरन्ति ये।
ते महापातकैर्युक्ता इति शास्त्रस्य निर्णयः॥
त्रिपुण्ड्रोद्धूळने श्रद्धा येषां नैवोपजायते।
उपपातकदोषेण दुष्टास्ते नात्रसंशयः॥

त्रिपुण्ड्रोद्धूळनादौ च तन्मानश्रवणेऽपि च।
वाञ्छा न जायते येषां ते महापापसंयुताः।।
येषां क्रोधो भवेत्भस्मधारणे तत्प्रमाणके।
ते महापातकैर्युक्ता इति मे निश्चिता मतिः।।
महापातकयुक्तानां जन्तूनां पूर्वजन्मसु।
त्रिपुण्ड्रोद्धूळनद्वेषो जायते सुदृढं बुधाः।।

तथा **पराशरोपपुराणे** –

महापापवतां नृणां वेदसिद्धे महेश्वरे।
त्रिपुण्ड्रोद्धूळनादौ च प्रद्वेषश्च प्रजायते।।
वेदसिद्धेन मन्त्रेण त्रिपुण्ड्रं भस्मकुण्ठनम्।
नैव कुर्वन्ति मोहेन मनुष्याः पापकर्मिणः।।
ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुळञ्चतुरश्रकम्।
धारयन्ति ललाटे तु मनुष्याः पापकर्मिणः।।
शङ्खचक्रगदापद्मवज्रपाशाङ्कुशादिभिः।
अङ्किताश्च भवन्त्येव मनुष्याः पापकर्मिणः।।
त्यजन्ति सकलं कर्म सदा विध्युक्तमास्तिकाः।
निषिद्धं कर्म कुर्वन्ति मनुष्याः पापकर्मिणः।।
त्यजन्ति वेदं वेदोक्तं तथा स्मृतिपुराणकम्।
वेदाङ्गानि च मोहेन मनुष्याः पापकर्मिणः।।
पाञ्चरात्रे च कापाले पाषण्डेष्वपरेषु च।
दीक्षिताश्च भवन्त्येव मनुष्याः पापकर्मिणः।।
वेदमार्गपरिभ्रंशं वेदबाह्यपरिग्रहम्।
कुर्वन्ति स्वात्ममोहेन मनुष्याः पापकर्मिणः।।
यस्य स्यात्पितरि द्वेषश्शर्वे वा जगतां गुरौ।
उत्पत्तौ तस्य साङ्कर्यमनुमेयं विपश्चिता।।
यस्य स्यात्भस्मनि द्वेषस्त्रिपुण्ड्रोद्धूळनेऽपि च।
उत्पत्तौ तस्य साङ्कर्यमनुमेयं विपश्चिता।।
पापानामपि बाहुल्यात् श्रौतलिङ्गं न रोचते।
प्रत्युत भ्रान्तिविज्ञानादश्रौतञ्चोर्ध्वपुण्ड्रकम्।।
ब्राह्मणाः क्षत्रियावैश्याश्शूद्राः कुर्वन्ति चापरे। इति।

**वासिष्ठलैङ्गे** स्वयोनिवंशसाङ्कर्यादयो द्विजसंस्कारराहित्यञ्च –

येषां भस्मनि विद्वेषो वर्तते हृदये सदा।
सङ्कीर्णा तु भवेत् ब्रह्मस्तेषां वंशपरंपरा।।
येषां क्रोधो भवेत् ब्रह्मन्ललाटे भस्मदर्शनात्।

तेषामुत्पत्तिसाङ्कर्यमनुमेयं विपश्चिता।।
ये भस्मधारिणं दृष्ट्वा वाचा निन्दन्ति मानवाः।
तेषां शूद्रेण सम्भूतिरनुमेया विपश्चिता।।
ये भस्मधारिणं दृष्ट्वा नराः कुर्वन्ति ताडनम्।
तेषां चण्डाळतो जन्मब्रह्मन्नूह्यं विपश्चिता।।
येषां श्रद्धा मुने नास्ति श्रौतभस्मनि सर्वदा।
गर्भादानादिसंस्कारस्तेषां नास्तीति निश्चयः।।

ब्रह्मशापः **पराशरोपपुराणे** –

रुद्राधिक्यमविज्ञाय ब्रह्मनारायणौ पुरा।
अहं ब्रह्मत्वहं चेति विभ्रान्त्याऽकुरुतां रणम्।।
क्रोधेन महता युक्तो ब्रह्मा सर्वजगत्पतिः।
शशाप विष्णुं गर्भस्थो भगवन्तं विमोहितः।।

तत्र गर्भस्थत्वं ब्रह्मणो मोहादिकञ्च विष्णुना स्वस्याधिक्यप्रदर्शनार्थं मदुदरे सर्वान्लोकान् दर्शयिष्यामीत्युक्तस्तत्परीक्षार्थं तदुदरं प्रविष्टस्तदनन्तरं मुखादिद्वारेषु विष्णुना पिहितेषु हरिणा स्वोत्कर्षज्ञापनार्थमिदं कृतमिति ब्रह्माव्यामुमोहेत्यादि**लैङ्गकौर्मपुराणोक्त**मनुसन्धेयम् –

त्वद्भक्ता ब्राह्मणास्साक्षात् त्रिपुण्ड्रे भस्मकुण्ठने।
भवेयुर्विमुखा नित्यं वेदसिद्धे विमुक्तिदे।।
त्रिशूले चतुरश्रे वा वेणुपत्रोपमे तथा।
पुण्ड्रान्तरे रता नित्यं भवेयुस्तान्त्रिका द्विजाः।।
आयुधैश्शङ्खचक्राद्यैस्त्वदीयैरङ्किता जनाः।
अग्नितप्तैर्महामोहाद्भवेयुश्चांसयोर्द्वयोः।।
वेदसिद्धेन मार्गेण त्वदीयाराधने द्विजाः।
त्वद्भक्ता विमुखा नित्यं भवेयुः परिमोहिताः।।
त्वदीये पाञ्चरात्रे च तन्त्रे भागवते तथा।
दीक्षिताश्च द्विजा नित्यं भवेयुर्निर्भया हरे।।
श्रौतस्मार्तसमाचरे सद्यो मुक्तिकरे शुभे।
त्वद्भक्ता विमुखा नित्यं भवेयुः परिमोहिताः।। इति।

षण्मुनिशापस्तु सङ्ग्रहेण **आदित्यपुराणे** –

दुर्वाससो मुनेश्शापात्कुपितस्य महात्मनः।
कण्वशापात् भृगोश्शापादुपमन्योश्च शापतः।।
दधीचस्य मुनेश्शापाद्गौतमस्य च शापतः।
विप्राणां दाक्षिणात्यानां पापिष्ठानामचेतसाम्।।
शिवे भस्मनि रुद्राक्षे किञ्चिच्छ्रद्धा न विद्यते।

इति। विशिष्य **कौर्मस्कान्दयो**र्गौतमस्य शापः। **कौर्मे चतुर्दशाध्याये** –

पुरा दारुवने पुण्ये मुनयो गृहमेधिनः।
ईश्वराराधनार्थाय तपश्चेरुस्सहस्रशः।।
ततः कदाचिन्महतीकालयोगेन दुस्तरा।
अनावृष्टिरतीवोग्रा ह्यासीत्भूतविनाशिनी।।
समेत्य सर्वे मुनयो गौतमं तपसां निधिम्।
अयाचन्त क्षुधाविष्टा ह्याहारं प्राणधारणम्।।
स तेभ्यः प्रददावन्नं मृष्टं बहुतरं बुधः।
सर्वे बुभुजिरे विप्रा निर्विशङ्केन चेतसा।।
गतेऽथ द्वादशे वर्षे कल्पान्त इव शङ्करी।
बभूव वृष्टिर्महती यथापूर्वमभूज्जगत्।।
ततस्सर्वे मुनिवरास्समामन्त्र्य परस्परम्।
महर्षिं गौतमं ब्रुयुः गच्छाम इति वेगतः।।
निवारयामास स तान्कञ्चित्कालं यथासुखम्।
उषित्वा मत्गृहेऽवश्यं गन्तव्यमिति पण्डिताः।।
ततो मायामयीं सृष्ट्वा कृशां गां सर्व एव ते।
समीपं प्रापयामासुर्गौतमस्य महात्मनः।।
सोऽनुवीक्ष्य कृपाविष्टस्तस्यास्संरक्षणोत्सुकः।
गोष्ठे तां बन्धयामास स्पृष्टमात्रे ममार सा।।
स शोकेनाभिसन्तप्तः कार्याकार्यं महामुनिः।
न पश्यतिस्म सहसा तादृशं मुनयोऽब्रुवन्।।
गोहत्येयं मुनिश्रेष्ठ यावत्तव शरीरगा।
तावन्न तेऽन्नं भोक्तव्यं गच्छामो वयमेव हि।।
तेन ते मुदितास्सर्वे देवदारुवनं शुभम्।
जग्मुः पापवशं नीताः तपश्चर्तुं यथा पुरा।।
स तेषां मायया जातां गोवध्यां गौतमो मुनिः।
केनापि हेतुना ज्ञात्वा शशापातीवकोपनः।।
भविष्यथ त्रयी बाह्या महापातकिभिस्समाः।
बभूवुस्ते तथा तेऽपि जायमानाः पुनः पुनः।।

अत्र त्रयी बाह्या इति त्रयी प्रतिपाद्यभस्मरुद्राक्षधारणादिविमुखा इत्यर्थः। अयञ्च शापप्रकारो विस्तरेण च –

ब्राह्मणैश्च पुनस्सर्वैर्गौतमेन सुरक्षितैः।

इत्यादि**सूतसंहिता**स्थागमप्रामाण्यसाधन उदाहृतोऽनुसन्धेयः। **पराशरोपपुराणे** ऊर्ध्वपुण्ड्रचक्राङ्कनादिनिषेधः –

ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुळञ्चतुरश्रकम्।

अर्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत्।।
जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः।
पुण्ड्रान्तरं भ्रमाद्वाऽपि ललाटे नैव धारयेत्।।
ख्यातिलाभादिसिध्यर्थमपि विष्ण्वागमादिषु।
स्थितं पुण्ड्रान्तरन्नैव धारयेद्वैदिको जनः।।
तिर्यक् त्रिपुण्ड्रं सन्त्यज्य श्रौतं पुण्ड्रान्तरं भ्रमात्।
ललाटे धारयन् मर्त्यः पतत्येव न संशयः।।
न दाहयेत् द्विजश्रेष्ठं न दहेच्चक्रपूर्वकैः।
अङ्कितो यस्स्वदेशात्तं राजा शीघ्रं प्रवासयेत्।।
अतीवपतितानां हि श्वपदाद्यङ्कितं नृणाम्।
अतीव तेन शुद्धानामङ्गं शुद्धन्नचाङ्कयेत्।।
अध्यापने चाध्ययने श्रौतस्मार्तेषु कर्मसु।
सम्भाषणे च सम्बन्धेनाधिकारी च लाञ्छितः।। इति।

तथा **सूतसंहितायां** पुण्ड्रान्तरनिषेधस्तत्र मोहश्च –

नाङ्कनं विग्रहे कुर्यात् वेदपन्थानमाश्रितः।
पुण्ड्रान्तरं भ्रमाद्वाऽपि ललाटे नैव धारयेत्।।
देवानाञ्च मनुष्याणां तथाऽन्येषाञ्च लाञ्छनम्।
न कुर्यान्मोहतो वाऽपि यदि कुर्यात्पतत्यधः।।
कस्यचिल्लाञ्छितो मर्त्यो न साक्षी सर्वथा भवेत्।
श्रौतस्मार्तसदाचारे नाधिकारी च लाञ्छितः।।
लाञ्छिताश्च न सम्भाष्या न स्पृश्याश्च कदाचन।
न दर्शनीयास्तान् राजा देशाच्छीघ्रं प्रवासयेत्।।
वेदोक्तेनैव मार्गेण भस्मेनैव त्रिपुण्ड्रकम्।
धूळनं नाचरिष्यन्ति पाषण्डोपहता जनाः।।
ऊर्ध्वपुण्ड्रं ललाटे तु वर्तुळञ्चार्धचन्द्रकम्।
धारयिष्यन्ति मोहेन पाषण्डोपहता जनाः।। इति।
शङ्खचक्रगदापद्मैरङ्कनं विग्रहे स्वके।
मोहेनैव करिष्यन्ति पाषण्डोपहता जनाः।।
मनुष्याणाञ्च नाम्ना तु तेषामाकारतोऽपि च।
लाञ्छिताश्च भविष्यन्ति पाषण्डोपहता जना।। इति।

तथा **पराशरोपपुराणे नारदीये च पुण्ड्रान्तराङ्कनाधिकरणे** वैदिकस्य पातित्यादि-दोषाः –

तिर्यक् पुण्ड्रं परित्यज्य श्रौतं पुण्ड्रान्तरं सदा।
धारयेद्यदि मोहाद्वा पतत्येव न संशयः।। इति।
यस्तु सन्तप्तशङ्खादिलिङ्गाङ्किततनुर्नरः।

स सर्वयातनाभोगी चण्डालो जन्मकोटिषु।।
द्विजस्संतप्तशङ्खादिलिङ्गाङ्किततनुन्नरम्।
सम्भाष्य नरकं याति यावदिन्द्राश्चतुर्दश।।
चक्राङ्किततनुर्यत्र तत्र कोऽपि न संवसेत्।
यदि तिष्ठेन्महापापी सहस्रब्रह्महा भवेत्।।
गङ्गास्नानरतो वाऽपि चाश्वमेधरतोऽपि वा।
चक्राङ्किततनुं दृष्ट्वा रौरवं नरकं व्रजेत्।।
चक्राङ्किततनुं दृष्ट्वा पश्येत्सूर्यं जपेन्नरः।
जनेशपौरुषं सूक्तमन्यथा रौरवं व्रजेत्।।
लिङ्गाङ्किततनुं दृष्ट्वा पश्येत्सूर्यं जपेन्नरः।
जनेश शतरुद्रीयमन्यथा रौरवं व्रजेत्।।
ब्राह्मणस्य तनुर्ज्ञेया सर्वदेवसमाश्रया।
सा चेत्सन्तापिता राजन् किं वक्ष्यामि महैनसः।।

**मानवोपपुराणे चतुर्दशाध्याये** शङ्खचक्राद्यङ्कनिषेधः –

आयुधैश्शङ्खचक्राद्यैर्न दहेच्च कदाचन।
मनुष्याणान्तु नाम्नैव न लिखेच्चोरसि भ्रमात्।।
दग्धाङ्गश्चायुधैर्दिव्यैर्लिखितो नरनामतः।
श्रौतस्मार्तसमाचारे नाधिकारी कदाचन।।
दग्धाङ्गा लिखिताङ्गाश्च न सम्भाष्या द्विजातिभिः।
न द्रष्टव्याश्च तान् राजा देशाच्छीघ्रं प्रवासयेत्।। इति।

**ब्राह्मपुराणे गोपीचन्दनमाहात्म्ये** तप्तमुद्रानिषेधः –

तप्तमुद्रात्वन्त्यजाय हरिणा निर्मिता पुरा।
गोपीचन्दनसंसिक्तफलकाऽप्यन्त्यजातये।।
भूदेवस्तप्तमुद्राञ्च चिह्नं कृत्वा विमूढधीः।
इह जन्मनि शूद्रस्स्यात् प्रेत्य च श्वा भविष्यति।।

**बोधायनस्मृता**वङ्गनिषेधः –

नाङ्कनाय दहेद्देहे चेद्दहेत् कामकारतः।
नाधिकुर्वन्ति दग्धाङ्गाः श्रौतस्मार्तेषु कर्मसु।।

**शातातपस्मृतौ** –

अङ्गेषु नाङ्कयेद्विप्रो देवतायुधलाञ्छनैः।
दहनाल्लेखनाद्विप्रः पातित्यं याति तत्क्षणात्।।

**यज्ञवैभवखण्डे** –

वेदमार्गैकनिष्ठस्तु कुर्यात्तप्तायसेन वा।
स शूद्रवत् बहिष्कार्यस्सर्वस्मात् द्विजकर्मणः।।
यथा श्मशानगं काष्ठमनर्हं सर्वकर्मसु।
तथा चक्राङ्कितो विप्रः सर्वकर्मबहिष्कृतः।।

तथा **स्कान्दे पराशरोपपुराणे** महापुण्यफलत्वेन त्रिपुण्ड्रादिश्रद्धा स्तूयते –

वेदोत्कर्षे शिवोत्कर्षे विद्योत्कर्षे तथैव च।
त्रिपुण्ड्रोद्धूळनोत्कर्षे श्रद्धा पुण्यवतो भवेत्।। इति।
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम्।
वेदोक्तेनैव मार्गेण त्रिपुण्ड्रे जायते रतिः।। इति।

एवं यथायथं त्रिपुण्ड्राश्रद्धापुण्ड्रान्तरश्रद्धानिन्दानिषेधादिपूर्वकं त्रिपुण्ड्रादिश्रद्धां स्तुत्वोक्तनित्यशब्दादिभिः **पराशरोपपुराणे स्कान्दे** च भस्मोद्धूळनत्रिपुण्ड्रादिकेवलवैदिकस्य नित्यतया विधीयते।

तत्र **पराशरे** नित्यशब्दः –

ब्राह्मणो विधिनोत्पन्नं त्रिपुण्ड्रं भस्मनैव तु।
ललाटे धारयेन्नित्यं तिर्यक् भस्मावकुण्ठनम्।।

**स्कान्दे** –

त्रिपुण्ड्रं धारयेन्नित्यं गृहस्थाश्रममाश्रितः।
धारयेत् भिक्षुको नित्यमिति जाबालिकी श्रुतिः।।

**पराशरोपपुराणे** सदाशब्दः –

आदिब्राह्मणभूतेन त्रिपुण्ड्रं भस्मना धृतम्।
यतोऽत एव विप्रस्तु त्रिपुण्ड्रं धारयेत्सदा।।

**स्कान्दे** तथा –

धारयेत् ब्राह्मणस्सदा।

**पराशरोपपुराणे**ऽत्यागचोदना –

भस्मना वेदसिद्धेन त्रिपुण्ड्रं देहकुण्ठनम्।
रुद्रलिङ्गार्चनं चापि मोहतो वाऽपि न त्यजेत्।।

तथा **स्कान्दे** –

त्रिपुण्ड्रं धारयेत् भक्त्या मनसाऽपि न लङ्घयेत्।

**पराशरोपपुराणे**त्यागदोषाः –

भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
विना वेदोदिताचारस्स्मार्तश्चानर्थकारणम्।।

**स्कान्दे** च –

श्रुत्या विधीयते यस्मात् तत्त्यागी पतितो भवेत्।

तथा **पराशरपुराणे** वर्णाश्रमधर्मतया सङ्कीर्तनम् –

ब्राह्मणानामयं धर्मो यत् त्रिपुण्ड्रस्य धारणम्।
मन्त्रध्यानादिसंयुक्तं नैव वर्णान्तरस्य तु।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
आश्रमाणाञ्च सर्वेषां धर्मत्वेनाहुरास्तिकाः।।
फलश्रुतिश्चोभयत्रापि।

तथा **वासिष्ठलैङ्गे** नित्यशब्दस्त्यागेऽनिष्टकीर्तनञ्च नित्यत्वसाधकम् –

उद्धूळनं त्रिपुण्ड्रं च नित्यं भक्त्या समाचरेत्।
ये भस्मधारणं त्यक्त्वा श्रौतस्मार्तानुवर्तिनः।।
ते यान्ति नरकं घोरं यावच्चन्द्रदिवाकरौ।

एवमन्यत्रापि नित्यशब्दसदाशब्दवर्णाश्रमधर्मत्वाकरणदोषसङ्कीर्तनात्यागचोदनादिभिः नित्यत्वमेवावसेयम्।

तथा **बौधायने स्मृतिभास्करे** च प्रायश्चित्तरूपनैमित्तिकत्वम् –

मध्यमानामिकाङ्गुष्ठैर्ललाटे यत्त्रिपुण्ड्रकम्।
तत्त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्।। इति।
वनस्पतिगते सोमे भस्मोद्धूळितविग्रहः।
अर्चितं शङ्करं दृष्ट्वा सर्वपापैः प्रमुच्यत।। इति।

तथा **वासिष्ठलैङ्गे** मोक्षसाधनज्ञानसाधनत्वमपि –

बहुनोक्तेन किं भस्मधारणं मोक्षसाधनम्।
भस्मना नित्ययुक्तस्य ज्ञानमुत्पद्यतेऽचिरात्।। इति।

**सूतसंहितायाञ्च** –

उद्धूळनं त्रिपुण्ड्रञ्च ज्ञानाङ्गत्वेन केवलम्।
आमनन्ति मुनिश्रेष्ठाः श्वेताश्वतरशाखिनः।।
उद्धूळनं त्रिपुण्ड्रञ्च ज्ञानाङ्गत्वेन केवलम्।
आमनन्ति मुनिश्रेष्ठा अथर्वशिरसि स्थिताः।।
उद्धूळनं त्रिपुण्ड्रञ्च साक्षात्कैवल्यशाखिनः।
अतोऽपि पाशविच्छेदलाभाय ज्ञानसिद्धये।।
उद्धूळनं त्रिपुण्ड्रञ्च मुमुक्षुस्सम्यगाचरेत्। इति।

एवं स्मृतिष्वपि। **बोधायनस्मृतौ** तावत् –

एतदाग्नेयकं स्नानमुदितं परमर्षिभिः।
सर्वकर्मसमृद्ध्यर्थं कुर्यादादाविदं बुधः।।
धृतमेतत्त्रिपुण्ड्रं स्यात्सर्वकर्मसु पावनम्।
त्रिपुण्ड्रं धारयेन्नित्यं सर्वपापविशुद्धये।। इति।

**स्मृतिरत्नावल्यां** –

तत्त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्। इति।

**धर्मसारसुधानिधौ** –

त्रिपुण्ड्रकं सदा कुर्यान्मन्त्रपूतेन भस्मना।
वेदोक्तेन विधानेन शिवसायुज्यमाप्नुयात्।। इति।

एवमुक्तस्मृत्यादिषु त्रिपुण्ड्रोद्धूळनादेर्यथायथं सविधानं सार्थवादं स्पष्टार्थं कानिचिन्नित्य-त्वकाम्यत्वप्रायश्चित्तत्वमोक्षसाधनज्ञानसाधनत्वावेदकानि वचनान्युक्तक्रमेण लिख्यन्ते।

**बोधायनस्मृतौ** –

सद्येन गोशकृत् ग्राह्यं वामेन त्वभिमन्त्रयेत।
अघोरेण दहेत्पिण्डं ग्राहयेत्पुरुषेण तु।।
स्नानमीशादिमन्त्रेण कुर्याच्चूडादिपादतः।
आचम्य कूर्च्व आसीनश्शिवो भूत्वा शिवं जपेत्।।

**भरद्वाजस्मृतौ** –

प्राङ्मुखश्चरणौ तावत्प्रक्षाल्याचम्य पूर्ववत्।
प्राणानायम्य सङ्कल्प्य भस्मस्नानं समाचरेत्।।
आदाय भसितं श्वेतमग्निहोत्रसमुद्भवम्।
ईशानेन तु मन्त्रेण स्वमूर्धनि विनिक्षिपेत्।।
तत आदाय तत्भस्ममुखे तत्पुरुषेण तु।
अघोराख्येन हृदये गुह्ये वामाह्वयेन च।।
सद्योजाताभिधानेन भस्मपादद्वये क्षिपेत्।
सर्वाङ्गं प्रणवेनैव मन्त्रेणोद्धूळयेत्ततः।।
एतदाग्नेयकं स्नानमुदितं परमर्षिभिः।
सर्वकर्मसमृद्ध्यर्थं कुर्यादादाविदं बुधः।।
ततः प्रक्षाळ्य हस्तादीनुपस्पृश्य यथाविधि।
तिर्यक् त्रिपुण्ड्रं विधिना ललाटे हृदये गळे।।
धृत्वाग्निहोत्रजेनैव भस्मना तु प्रसन्नधीः।
पञ्चभिर्ब्रह्मभिर्वाऽपि कृतेन भसितेन च।।

धृतमेतत् त्रिपुण्ड्रं स्यात्सर्वकर्मसु पावनम्।
त्रिपुण्ड्रं धारयेन्नित्यं सर्वपापविशुद्धये।।
शूद्रहस्तस्थितं भस्म न हि धार्यं द्विजातिभिः।
शूद्रैरन्त्यजहस्तस्थं न धार्यं भस्म जातु चित्।।
अतोऽग्निहोत्रजेनैव भस्मना तु त्रिपुण्ड्रकम्।
तत् त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्।।

**धर्मसारसुधानिधौ** –

नित्यं द्विजोऽप्रमादेन कुर्यात्कर्मविवृद्धये।
अन्यथा सर्वकर्माणि न फलन्ति कदाचन।।

**स्मृतिरत्नावल्याम्** –

मध्यमानामिकाङ्गुष्ठैर्ललाटे यत्त्रिपुण्ड्रकम्।
तत् त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्।।

**धर्मसारसुधानिधौ** –

त्रिपुण्ड्रकं सदा कुर्यान्मन्त्रपूतेन भस्मना।
वेदोक्तेन विधानेन शिवसायुज्यमाप्नुयात्।।

**स्मृतिभास्करे** –

वनस्पतिगते सोमे भस्मोद्धूळितविग्रहः।
अर्चितं शङ्करं दृष्ट्वा सर्वपापैः प्रमुच्यते।।
भासनात्भसितं प्रोक्तं भस्मकल्मषभक्षणात्।
भूतिर्भूतिकरी पुंसां रक्षा रक्षकरीपरम्।।

**स्मृतिसारसमुच्चये** –

अशुचिर्वाऽप्यनाचारो मनसा पापमाचरन्।
शुचिरेव भवेन्नित्यं त्रिपुण्ड्रस्य तु धारणात्।।

**नारदीयस्मृतौ** –

त्रिपुण्ड्रं परमं पुण्यं ब्रह्मविष्णुशिवात्मकम्।
ये घोरा राक्षसाः प्रेता ये चान्ये क्षुद्रजन्तवः।।
त्रिपुण्ड्रधारिणं दृष्ट्वा पलायन्ते न संशयः।
मद्यं पीत्वा गुरुदारांश्च गत्वा
स्तेयं कृत्वा ब्रह्महत्याञ्च कृत्वा।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्राध्यायी मुच्यते पातकेभ्यः।।

सत्यं शौचं जपो होमस्तीर्थदेवादिपूजनम्।
तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्ड्रं न धारयेत्।।

**लोकाक्षिस्मृतौ** –

मध्यमानामिकाङ्गुष्ठैर्ललाटे भस्मना कृतः।
स त्रिपुण्ड्रो भवेच्छस्तो महापातकनाशनः।।
त्रिपुण्ड्रं धारयेद्यस्तु शिवप्रणतमानसः।
भूर्भुवस्स्वस्त्रयो लोका धृतास्तेन महात्मना।।
त्रिपुण्ड्रधृत् विप्रवरो यो रुद्राक्षधरश्शुचिः।
स हन्ति रोगदुरितव्याधिदुर्भिक्षतस्करान्।।
प्राप्नोति परमं ब्रह्म यतो नावर्तते पुनः।
स पङ्क्तिपावनश्श्राद्धे पूज्यो विप्रैस्सुरैरपि।।
श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने।
धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जयति मानवः।।
त्रिपुण्ड्रं यद्यधृत्वा तु कुर्याद्यत्कर्म तद्वृथा। इति।

**स्कान्दे सूतसंहितायाम्** –

ललाटे चैवदोर्द्वन्द्वे तथैवोरसि बुद्धिमान्।
त्रिपुण्ड्रं धारयेन्नित्यं भुक्तिमुक्तिफलप्रदम्।।
वर्णानामाश्रमाणाञ्च मन्त्रतोऽमन्त्रतोऽपि वा।
त्रिपुण्ड्रोद्धूळनं प्रोक्तं जाबालैरादरेण तु।।
उद्धूळनं त्रिपुण्ड्रञ्च ज्ञानाङ्गत्वेन सादरम्।
आमनन्ति मुनिश्रेष्ठाश्श्वेताश्वतरशाखिनः।।
अयमत्याश्रमो धर्मो यैस्समाचरितो मुदा।
तेषामेव शिवज्ञानं संसारच्छेदकारणम्।।
उद्धूळनं त्रिपुण्ड्रञ्च मायापाशनिवृत्तये।
आमनन्ति मुनिश्रेष्ठा अथर्वशिरसि स्थिताः।।
व्रतं पाशुपतं येन सम्यगाचरितं बुधाः।
तस्य ज्ञानं विजायेत तेन पाशविमोचनम्।।
उद्धूळनं त्रिपुण्ड्रञ्च ज्ञानाङ्गत्वेन केवलम्।
आमनन्ति मुनिश्रेष्ठास्साक्षात् कैवल्यशाखिनः।।
अतोऽपि पाशविच्छेदलाभाय ज्ञानसिद्धये।
उद्धूळनं त्रिपुण्ड्रञ्च मुमुक्षुस्सम्यगाचरेत्।।
सद्यादिभिः पराभूतिस्ततस्तिर्यक् त्रिपुण्ड्रकम्।
धूळनञ्चाचरेदेव मुमुक्षुर्ज्ञानसिद्धये।।
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।

प्रमादादपि मोक्षार्थी न त्यजेदिति हि श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
महापातकनाशाय विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
रक्षार्थं सर्वभूतानां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
मङ्गळार्थञ्च सर्वेषां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
माहेश्वराणां लिङ्गार्थं विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
ज्ञानार्थञ्चैव सर्वेषां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
व्रतत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
दानत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
तपस्त्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
तपस्त्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
यज्ञत्वेनैव सर्वेषां विधत्ते वैदिकी श्रुतिः॥
भस्मनोद्धूळनञ्चैव तथा तिर्यक्त्रिपुण्ड्रकम्।
सर्वधर्मतया पुंसां विधत्ते वैदिकी श्रुतिः॥
शिवेन विष्णुना चैव ब्रह्मणा वज्रिणा तथा।
देवताभिर्धृतं भस्मत्रिपुण्ड्रोद्धूळनात्मना॥
यक्षराक्षसगन्धर्वसिद्धविद्याधरादिभिः।
मुनिभिश्च धृतं भस्मत्रिपुण्ड्रोद्धूळनात्मना॥
ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैरपि च सङ्करैः।
अपभ्रंशैर्धृतं भस्मत्रिपुण्ड्रोद्धूळनात्मना॥
उद्धूळनं त्रिपुण्ड्रञ्च यैस्समाचरितं मुदा।
त एव शिष्टा विद्वांसो नेतरे मुनिपुङ्गवाः॥
उद्धूळनं त्रिपुण्ड्रञ्च श्रद्धया नाचरन्ति ये।
तेषां नास्ति विनिर्मोक्षस्संसाराज्जन्मकोटिभिः॥
उद्धूळनं त्रिपुण्ड्रञ्च श्रद्धया नाचरन्ति ये।
तेषां नास्ति शिवज्ञानं कल्पकोटिशतैरपि॥

भस्मधारणमाहात्म्यं मया वक्तुं न शक्यते।
गुरुणाऽपि च मे विप्राः कल्पकोटिशतैरपि।।
ब्रह्मणा विष्णुना वाऽपि रुद्रेणापि मुनीश्वराः।
भस्मधारणमाहात्म्यमशक्यं परिभाषितुम्।।
अहो मोहस्य माहात्म्यं मुनीन्द्रा ब्रह्मवादिनः।
यन्नरा भस्मसन्त्यज्य कुर्वन्त्यन्यत्समाहिताः।।

**संहितान्तरे** –

यथा सर्वपुराणेषु पुरी वाराणसी शुभा।
तथा शुभ्रत्रिपुण्ड्रञ्च सर्वपुण्ड्रेषु कथ्यते।।
यथा विश्वाधिको रुद्रस्सर्ववेदेषु गीयते।
तथा सर्वपुराणेषु त्रिपुण्ड्रमपि गीयते।।
त्रिपुण्ड्रधारिणः पादौ प्रक्षाळयति यः पुमान्।
सर्वपातकयुक्तोऽपि स सद्यः पूयते नरः।।
त्रिपुण्ड्रधारिणे भिक्षाप्रदानेन हि केवलम्।
सर्वपातकयुक्तोऽपि पूयते मानवोऽचिरात्।।
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम्।
येन विप्रेण शिरसि त्रिपुण्ड्रं भस्मना धृतम्।।
कृतं स्यादकृतं तेन श्रुतमप्यश्रुतं भवेत्।
अधीतमच्छलेनाह त्रिपुण्ड्रस्य प्रशस्तिकम्।।
ससर्ज ललाटं हि तिर्यङ्नोर्ध्वं न वर्तुळम्।
तिर्यग्रेखाः प्रकाशन्ते ललाटे सर्वदेहिनाम्।।
तथाऽपि मानवा मुर्खा न कुर्वन्ति त्रिपुण्ड्रकम्।
न तद्ध्यानं न तद्दानं न तत्ज्ञानं न तत्तपः।।
विना तिर्यक् त्रिपुण्ड्राङ्कं विप्रेण यदनुष्ठितम्।
वेदस्याध्ययने शूद्रो नाधिकारी यथा भवेत्।।
त्रिपुण्ड्रेण विना विप्रो नाधिकारी शिवार्चने।
न दानेन न यज्ञेन न तपोभिस्सुदुस्तरैः।।
न तीर्थयात्रया पुण्यं यत्त्रिपुण्ड्रेण लभ्यते।
दानं यज्ञाश्च धर्माश्च तीर्थयात्राश्च नारद।।
ध्यानं तपस्त्रिपुण्ड्रस्य कलां नार्हन्ति षोडशीम्।
यथा राजा स्वचिह्नाङ्कं स्वजनं मन्यते सदा।।
तथा शिवस्त्रिपुण्ड्राङ्कधरं स्वमिव मन्यते।
द्विजातिर्वाऽन्त्यजातिर्वा सितशुद्धेन भस्मना।।
धारयेद्यस्त्रिपुण्ड्राङ्कं रुद्रस्तेन वशीकृतः।
त्यक्तवर्णाश्रमाचारो लुप्तसर्वक्रियोऽपि यः।।

सकृत्तिर्यक्त्रिपुण्ड्राङ्कं धारयेत सोऽपि पूज्यते।
नास्मिन् ज्ञानं परीक्षेत न कुलं न व्रतं तथा।।
त्रिपुण्ड्राङ्कितफालोऽसौ पूज्य एव हि नारद।
श्रीभूतिमात्रमाहात्म्यं वक्तुं ब्रह्मा न शक्नुयात्।।
कः पुनस्संस्कृताग्न्युक्थभूतिं वक्तुं समुत्सहेत्।
शिवमन्त्रात्परो मन्त्रस्तत्त्वञ्चापि शिवात्परम्।।
शिवार्चनात्परं पुण्यं न हि तीर्थञ्च भस्मनः।
रुद्राग्नेर्यत्परं वीर्यं तत्भस्मपरिकीर्तितम्।।
ध्वंसनं सर्वदुःखानां सर्वपापविशोधनम्।
अन्त्यजो वाऽधमो वाऽपि मूर्खो वा पण्डितोऽपि वा।।
यस्मिन् देशे वसेन्नित्यं भूतिस्नानेन संयुतः।
तस्मिन्सदाशिवस्सोमस्सर्वभूतगणैर्वृतः।।
सर्वतीर्थैश्च संयुक्तस्सान्निध्यं कुरुते सदा।
यस्मिन् देशे वसेन्नित्यं भूतिस्नानेन संयुतः।।
सोऽपि देशो भवेत्पूतः किं पुनस्तस्य मन्दिरम्।

**बृहन्नारदीये** –

शिवप्रियाश्शिवासक्ताश्शिवपादार्चने रताः।
त्रिपुण्ड्रधारिणो ये च ते वै भगवतः प्रियाः।।
योगी सर्वाङ्गकस्नानमापादतलमस्तकम्।
त्रिसन्ध्यमाचरेन्नित्यमाशुयोगमवाप्नुयात्।।
यस्स्नानमाचरेन्नित्यमाग्नेयं संयतेन्द्रियः।
सर्वपापविनिर्मुक्तः प्राप्नोति परमां गतिम्।।
भस्मस्नानं जलस्नानादसङ्ख्येयगुणान्वितम्।
तस्माद्वारुणमुत्सृज्य स्नानमाग्नेयमाचरेत्।।
सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम्।
तत्फलं लभते सर्वं भस्मस्नानान्न संशयः।।
महापातकयुक्तो वा युक्तो वा चोपपातकैः।
भस्मस्नानेन तत्सर्वं दहत्यग्निरिवेन्धनम्।।
भस्मस्नानात्परं स्नानं पवित्रं नैव विद्यते।
उक्त्वैवं मुनिदेवेभ्यः स्नातो देवश्शिवस्स्वयम्।।
तदा प्रभृति ब्रह्माद्या मुनयश्च शिवार्थिनः।
सर्वकर्मसु यत्नेन भस्मस्नानं प्रचक्रिरे।।
तस्मादेतच्छिवस्नानमाग्नेयं यत्समाचरेत्।
अनेनैव शरीरेण स रुद्रो नात्र संशयः।।

दुश्शीलश्शीलयुक्तो वा यो वा को वा फलार्थिभिः।
भूतिस्नानसमायुक्तस्सम्पूज्यो राजपुत्रवत्॥

**गारुडे** –

पञ्चाक्षरजपं भस्मस्नानं लिङ्गार्चनं त्रयम्।
कदाचिदपि न त्याज्यं यथाशक्तिसमाचरेत्॥

**वायवीये** –

भस्मच्छन्नो द्विजो विद्वान्महापातकसम्भवैः।
दोषैर्विमुच्यते सद्यो मुच्यते च न संशयः॥
तस्मात्सर्वेषु लोकेषु वीर्यवान्भस्मसंयुतः।
रुद्राग्नेर्यत्परं वीर्यं तत्भस्म परिकीर्तितम्॥
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसम्भवात्।
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः॥
भस्मना लिप्तसर्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः।
भस्मशायी च पुरुषो भस्मनिष्ठ इति स्मृतः॥
भूतप्रेतपिशाचाद्या रोगाश्चातीव दुस्सहाः।
भस्मनिष्ठस्य सान्निध्यात् विद्रवन्ति न संशयः॥
किमन्यदिह वक्तव्यं भस्ममाहात्म्यकारणम्।
व्रतीव भस्मना स्नातस्स्वयं देवो महेश्वरः॥
परमास्त्रञ्च शैवानां भस्मैतत्पारमेश्वरम्।
धौम्याग्रजस्य तपसि व्यापदोयन्निवारिताः॥

**लैङ्गे** –

स्मरणादेव रुद्रस्य यथा पापं प्रणश्यति।
तथाऽस्य धारणादेव सर्वं पापं विनश्यति॥
यद्यत्कार्यसहस्राणि कृत्वा यस्स्नाति भस्मना।
तत्सर्वं दहते भस्म यथाऽग्निस्तेजसा वनम॥

**मात्स्ये** –

किं यज्ञैः किमनेकतीर्थगमनैः किं वेद पाठश्रमैः।
किं क्रूरैर्विविधैस्तपोभिरमलैः किं देवताराधनैः॥
किं ध्यानैः किमनेकदाननिकरैः किं साङ्ख्ययोगभ्रमैः।
मोक्षार्थी सितभस्मना च निपुणः कुर्यात् त्रिपुण्ड्रं बुधः॥
भस्मना वेदमन्त्रेण त्रिपुण्ड्रञ्चावकुण्ठनम्।
यस्य सिध्येत्प्रयत्नेन ब्राह्मण्यं तस्य पुष्कलम्॥

वेदवेदान्तनिष्ठानां भस्मनैव त्रिपुण्ड्रकम्।
सम्यक् ज्ञानप्रदं शीघ्रं सत्यमुक्तन्न संशयः।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
महापातकसङ्घाततमसश्चण्डभास्करः।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
सर्वपापहरं प्रोक्तं सत्यमेव न संशयः।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
शिवस्य विष्णोर्देवानां ब्रह्मणस्तृप्तिकारणम्।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
पार्वत्याश्च महालक्ष्म्या भारत्यास्तृप्तिकारणम्।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
विना मुक्तिर्मनुष्याणां देवानाञ्च न सिध्यति।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
विना वेदान्तविज्ञानं जायते नैव कस्यचित्।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
सतां मार्गतया प्राज्ञाः प्रवदन्ति महर्षयः।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम्।
रक्षार्थं मङ्गळार्थञ्च प्रवदन्ति महर्षयः।।
त्रिपुण्ड्रधारणं मुक्त्वा मुक्तिमिच्छति यः पुमान्।
विषपानेन नित्यत्वं कुरुते ह्यात्मनो हि सः।।
वेदोदितेन मार्गेण भस्मनोद्धूळनेन च।
त्रिपुण्ड्रधारणेनैव ज्ञानं सम्यग्विजायते।।
ब्राह्मणेनादिभूतेन शिवेन परमात्मना।
आदरेण धृतं भस्मत्रिपुण्ड्रोद्धूळनात्मना।।
आदिब्राह्मणभूतस्य धर्मं तिर्यक् त्रिपुण्ड्रकम्।
ब्राह्मणो धारयेन्नित्यं भुक्तिमुक्तिफलप्रदम्।।
वेदसिद्धेषु धर्मेषु त्रिपुण्ड्रं भस्मकुण्ठनम्।
रुद्रलिङ्गार्चनञ्चैव मुख्यमाहुर्द्विजास्तिकाः।।
सर्वागमेषु निष्ठानां त्रिपुण्ड्रं भस्मकुण्ठनम्।
वरिष्ठं सर्वलिङ्गेभ्य इति सत्यं मयोदितम्।।
भस्मश्रेयोर्थिभिस्सर्वैर्जन्मना लब्धजातिभिः।
धार्यं त्रिपुण्ड्ररूपेण भस्मना चावकुण्ठनम्।।
ब्राह्मणो यस्सितेनैव भस्मना चावकुण्ठनम्।
त्रिपुण्ड्राङ्गुळिभिर्दीप्तश्शिवलोके महीयते।।
भस्मनाच्छन्नसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम्।

ये निन्दन्ति नरं राजा हन्यात्तां न विचारतः।।
सत्यमेव मया प्रोक्तं सफलं तस्य जीवितम्।
उद्धूळनं त्रिपुण्ड्रं च येन नाचरितं शुभम्।।
न तस्य ब्रह्मविज्ञानं जायते जन्मकोटिभिः।
उद्धूळनं त्रिपुण्ड्रञ्च येनैवाचरितं मुदा।।
तस्यैव ब्रह्मविज्ञानं भवेच्छान्त्यादिभिस्सह।
उद्धूळनं त्रिपुण्ड्रं च श्रौतं नित्यं समाचरेत्।।
महानदीषु शुद्धासु तटाके वा यथाविधि।
स्नायात्पापविशुध्यर्थं भस्मना वा शिवे रतः।।
यथा विशिष्टे मानुष्ये ब्राह्मण्ये शुचिविग्रहे।
यज्ञदानाद्यनुष्ठानं दुर्लभं सर्वदेहिनाम्।।
तथा श्रौतेषु सर्वेषु त्रिपुण्ड्रं भस्मकुण्ठनम्।
रुद्रलिङ्गार्चनञ्चापि दुर्लभं हि शरीरिणाम्।।
त्रिपुण्ड्रधारणं तिर्यग्भस्मनैवावकुण्ठनम्।
सुदुर्लभमिति ज्ञात्वा खलु सर्वेश्वरोऽकरोत्।।
निर्दुःखो निर्मलस्साक्षात् नित्यानन्दो जगत्पतिः।
किमर्थमकरोत् ब्रूहि शिवस्साक्षान्निरामयः।।
अनियोज्यस्सदा कर्ता सदा भोगो महेश्वरः।
किमर्थमकरोत् ब्रूहि शिवस्साक्षान्निरामयः।।
अनियोज्यस्सदाऽकर्ता सदाऽभोगो महेश्वरः।
किमर्थमकरोत् ब्रूहि साधकस्योदितं मुने।।
तस्मात्सुदुर्लभं नृणामिति ज्ञात्वा महेश्वरः।
त्रिपुण्ड्रधारणं भस्मकुण्ठनञ्चाकरोत्सदा।।
अनिष्पन्नस्य कर्तव्यं त्रिपुण्ड्रादेस्तु धारणम्।
विशेषेण स्वलाभाय नान्यलाभाय सत्तम।।
स्वलाभमन्तरेणापि ह्युपचारार्थमास्तिकाः।
निष्पन्नेनापि कर्तव्यं यथा सर्वेश्वरेण तु।।

**वासिष्ठलैङ्गे** –

एवं भस्मधृतं येन तस्य पुण्यफलं श्रृणु।
महापातकसङ्घाश्च पातकान्यपराणि च।।
नश्यन्ति मुनिशार्दूल सत्यं सत्यञ्च नान्यथा।
ब्रह्मचर्याश्रमस्थानां स्वाध्यायप्रदमेव च।।
गृहस्थानाञ्च सर्वेषां सर्वसम्पत्प्रदं मुने।
शूद्राणां पुण्यदं नित्यमन्येषां पापनाशनम्।।

येन भस्मोक्तमार्गेण न धृतं मुनिपुङ्गव।
तस्य विद्धि मुने जन्मनिष्फलं सौकरं यथा।।
ये भस्मधारिणं दृष्ट्वा परितृप्ता भवन्ति ते।
देवासुरमुनीन्द्रैश्च पूज्या नित्यमसंशयम्।।
भस्मसञ्छन्नसर्वाङ्गं दृष्ट्वा तिष्ठति यः पुमान्।
तं दृष्ट्वा देवराजोऽपि दण्डनं न करिष्यति।।
अभक्ष्यभक्षणं येषां भस्मधारणपूर्वकम्।
तेषां तत्भक्ष्यमेव स्यान्मुने नात्र विचारणा।।
यस्स्नाति भस्मना नित्यं जले स्नात्वा ततः परम्।
ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवाऽऽदरात्।।
सर्वपापविनिर्मुक्तस्य याति परमां गतिम्।
आग्नेयं भस्मना स्नानं यतिभ्यस्तु विधीयते।।
आर्द्रस्नानाद्वरं भस्मत्वार्द्रे जन्तुवधो ध्रुवम्।
आर्द्रन्तु प्रकृतिं विद्यात्प्रकृतिं बन्धनं विदुः।।
प्रकृतेस्तु प्रहाणार्थं भस्मना स्नानमिष्यते।
अहो मोहस्य माहात्म्यं मया वक्तुं न शक्यते।।
यन्नरो भस्मसूपायं त्यक्त्वाऽन्यत्र विचेष्टते।
बहुनोक्तेन किं भस्मधारणं मोक्षसाधनम्।।
भस्मना नित्ययुक्तस्य ज्ञानमुत्पद्यतेऽचिरात्।
पातकी पातकान्मुक्तो भविष्यति न संशयः।।
भस्मना सदृशं ब्रह्मन्नास्ति लोकत्रयेष्वपि।
रक्षार्थं मङ्गळार्थञ्च पवित्रार्थं मया पुरा।।
भस्मं दृष्ट्वा मुने श्रौतं दत्तं देव्यै प्रियेण तु।

**मानवोपपुराणे** –

भूत्या अग्निसमुत्थायास्तथा देहावकुण्ठनात्।
ललाटे हृदिदोर्दण्डे त्रिपुण्ड्रस्य च धारणात्।।
नैव प्रमदितव्यं वैभ्रमाद्वाऽपि कदाचन।
त्रिपुण्ड्रधारणं भूत्या तथा देहावकुण्ठनम्।।
यो न कुर्यात्तु मन्त्रेण स साक्षात्पतितो भवेत्।
भूत्या च कुण्ठनं तिर्यक् त्रिपुण्ड्रस्य च धारणम्।।
वरिष्ठं सर्वधर्मेभ्यस्ततस्तन्नित्यमाचरेत्।

**महाभारते** –

आयुष्कामोऽथवा राजन् भूतिकामोऽथवा नरः।
नित्यं वै धारयेत् भस्ममोक्षकामी च वै द्विजः।।

**बोधायनसूत्रे** अथाप्युदाहरन्ति –

मध्यमानामिकाङ्गुष्ठैस्त्रिपुण्ड्रं भस्मना धृतम्।
तत्त्रिपुण्ड्रं भवेच्छस्तं महापातकनाशनम्।।

पूतो भवति। दशपूर्वान्दशावरानात्मानञ्चैकविंशतिं पङ्क्तिञ्च पुनाति। ब्रह्मणस्सायुज्यं सलोकतां यातीत्याह भगवन् बोधायनः।

**शिवधर्मे** –

रुद्राग्नेर्यत्परं वीर्यं तत्भस्म परिकीर्तितम्।
ध्वंसनं सर्वदुःखानां सर्वपापविशोधनम्।।
योगी सर्वाङ्गकस्नानमापादतलमस्तकम्।
त्रिसन्ध्यमाचरेन्नित्यमाशुयोगमवाप्नुयात्।।
यस्स्नानमाचरेन्नित्यमाग्नेयं स जितेन्द्रियः।
कुलैकविंशमुत्तार्य स गच्छेत्परमं पदम्।।
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम्।
तत्फलं लभते सर्वं भस्मस्नानान्न संशयः।।
उक्तं तत्सर्वदेवेभ्यस्स्नातो येन शिवस्स्वयम्।
तदा प्रभृति ब्रह्माद्या मुनयश्च शिवार्थिनः।।
सर्वपर्वसु यत्नेन भस्मस्नानं प्रचक्रिरे।
तस्मादेवं शिवस्नानमाग्नेयं यस्समाचरेत्।।
अनेनैव शरीरेण स रुद्रो नात्र संशयः।

**कालोत्तरे** –

तस्मादेतच्छिवस्नानमाग्नेयं यस्समाचरेत्।
भवपाशैश्च निर्मुक्तश्शिवलोके महीयते।।
ज्वररक्षः पिशाचाश्चाप्यसुरा यातुधानकाः।
कुमारग्रहभूताश्च कूश्माण्डा डाकिनी गणाः।।
ब्रह्मराक्षसमुख्याश्च पूतनाः कुष्ठगुल्मकाः।
भगन्दराणि सर्वाणि अशीतिर्वातरोगकाः।।
चतुष्षष्टिः पित्तरोगाश्श्लेष्मास्सप्तत्रिपञ्चकाः।
व्याघ्रसर्पभयाश्चैवाप्यन्ये दुष्टमृगा अपि।।
भस्मस्नानेन नश्यन्ति सिंहेनेव यथा गजाः।

**क्रियासारे** –

शुद्धशीतलजलेनैव भस्मना च त्रिपुण्ड्रकम्।
यो धारयेत्परंब्रह्म स प्राप्नोति न संशयः।।

धिक् भस्मरहितं फालं धिग्ग्राममशिवालयम्।
धिगनीशार्चनं जन्म धिग्विद्यामशिवाश्रयाम्।।
किमत्र बहुनोक्तेन वर्ण्यते च पुनः पुनः।
मुक्त्वा त्रिपुण्ड्रं मोक्षस्य साधनं न हि विद्यते।।

**मानवीयसंहितायाम्** –

प्रातः काले च मध्याह्ने सायाह्ने च त्रिपुण्ड्रकम्।
सितेन भस्मना कुर्यात् स रुद्रो नात्र संशयः।।

**शिवराघवसंवादे** –

कण्ठोपरिकृतं पापं नष्टं स्याच्छिखिधारणात्।
कण्ठे च धारणात्कण्ठभोगादिकृतमञ्जसा।।
बाहोर्बाहुकृतं पापं वक्षसो मनसा कृतम्।
नाभ्यां शिश्नकृतं पापं पृष्ठे गुदकृतं हरेत्।।
पार्श्वयोर्धारणाद्राम परस्त्र्यालिङ्गनादिकम्।
तत्भस्मधारणं शस्तं सर्वं तद्वत् त्रिलिङ्गकम्।।
ब्रह्मविष्णुमहेशानां त्रिमुनीनाञ्च धारणम्।
गुणलोकत्रयाणाञ्च धारणं तेन वै कृतम्।।
धार्यं पञ्चदशस्थाने शुद्धं भस्माभिमन्त्रितम्।
कोष्ठयुग्मे बाहुयुगे कोष्ठो परियुगे तथा।।
धारणं सर्वदेवानां पूजायै धर्मसंयुतम्।
भस्मस्नाना भस्मशय्या भस्मोद्धूळितविग्रहाः।।
भस्मस्नानात्सदा पापैर्मुच्यन्ते नात्र संशयः।

**अन्यत्र** –

दधीचिमन्दिरं प्राप्य मृत्योरास्यगतोऽपि सः।
तस्य भित्तिसमीपे तु भस्मास्तेत्यभिमन्त्रितम्।।
भस्मन्येव पपातास्मिन् ममार च गतो यमम्।
यमस्संपूज्यावनतो भवान् पुण्यतमो मुनिः।।
मत्गेहे भवतस्थानं न योग्यं गम्यतां बहिः।
इत्युक्त्वानथ बहिर्गत्वा तस्थौ स कुक्कुरः।।
नारदश्शङ्करायै तद्विज्ञाप्यानीय तत्र तम्।
भक्त्या प्रणम्य देवेशं देवायाथ व्यजिज्ञपत्।।
अयं माहेश्वरो देव कुरुष्वैनं गणं पितः।
तथेति च शिवः प्राह गणश्वानमुखोऽभवत्।।

**शिवरहस्ये** –

समस्ततीर्थौघमयी च काशी
विश्वेश्वरस्सर्वसुरोत्तमस्स्यात्।
समस्ततत्त्वैकरसाविभूतिस्तथैव
पुण्ड्रौघमयं त्रिपुण्ड्रम्॥
कश्चित्कण्ठगतप्राणः कालं प्राप्तो मृतोपमः।
शेते श्मशाने विवशो दस्युशस्त्रनिपातितः॥
तत्राययौ शृगालस्य श्वानुगः कश्चिदेव हि।
धावन्वेगात्तदन्तस्थ भस्मपुञ्ज इतस्ततः॥
तच्छयानललाटाग्रन्यस्ताङ्घ्रिश्च ततो ययौ।
एतस्मिन्नन्तरे नेतुं कालदूता यदाऽऽगताः॥
तदानीमेव गणपानानाप्रहरणोद्यताः।
विमानेऽप्सरसां बृन्दैस्तं मृतं पर्यवारयन्॥
ततस्ते धर्मराट् प्रेष्या दृष्ट्वा तान्भयविह्वलाः।
प्रदुद्रुवुर्दिशस्ते तं निन्युश्शिवपुरं गणाः॥

तथा शैवागमेष्वपि। **सुप्रभेदे** तावत् –

जलस्नानं पुरा कृत्वा भस्मस्नानं ततः परम्।
जलस्नाने त्वशक्तश्चेत् भस्मस्नानं समाचरेत्॥
ईशानेन शिरोद्धूळय मुखं तत्पुरुषेण तु।
बहुरूपेण हृदयं नाभिं वामेन कीर्तितम्॥
सर्वाङ्गं सद्यमन्त्रेण समुद्धूळ्य विचक्षणः।

**सोमशम्भौ** –

अथातो विधिसिद्धेन संहिता मन्त्रितेन च।
निवृत्त्यादिविशुद्धेन भस्मना स्नानमाचरेत्॥
शिरसः पादपर्यन्तं हुंफडन्तशराणुना।
तेन कृत्वा मलस्नानं विधिस्नानं समाचरेत्॥
ईशतत्पुरुषाघोरवामाजैर्मस्तकादिकम्।

**कारणे** –

उद्धूळने न शक्तश्चेत् त्रिपुण्ड्रं सर्वसन्धिषु।
द्वात्रिंशत्सन्धिभेदेषु अथवा षोडशेषु च॥
अष्टसन्धिषु वा मन्त्रिन् त्रिपुण्ड्रं विधिना कुरु।
मूर्धा ललाटः कण्ठौ च चक्षुषी घ्राणकौ तथा॥
आस्य ग्रीवे च अंसौ च बाहू कूर्परकौ तथा।
मणी च हृदयं नाभिर्मेढ्रः पायुस्तथैव च॥

ऊरू च जानुकौ जङ्घे स्फिजौ द्वौ च तथैव च।
पादौ द्वात्रिंशदित्येते पठ्यन्ते सन्धयः क्रमात्।।
प्रियं वै चाष्टमूर्तीनां विद्येशानां तथैव च।
दिक्पालानां वसूनाञ्च मूर्धादिपरिकल्पयेत्।। इति।

**कालोत्तरे** –

त्रिसन्ध्यं भस्मना स्नानं त्रिपुण्ड्रं वा समाचरेत्।
सर्वपापविशुद्धात्मा शिवेन सह मोदते।।

**द्विशतीकालोत्तरे** –

समयी पुत्रकश्चैव साधकाचार्य एव च।
त्रिपुण्ड्रैकविधानेन सर्वेषां तत् विधीयते।।
अर्धपुण्ड्रमनायुष्यं दीर्घपुण्ड्रं तपः क्षयम्।
नेत्रपुण्ड्रं प्रमाणेन त्रिपुण्ड्रं धारयेत्बुधः। इति।

**वीरे** –

भस्मस्नानं कथं देव तत्स्नायी कीदृशो भवेत्।
एतत्सर्वं समासेन ब्रूहि मे परमेश्वर।।

ईश्वर उवाच –

भस्मस्नानं प्रवक्ष्यामि शृणुष्व कमलासन।
भर्त्सनात्सर्वपापानां भस्मेति परिकीर्तितम्।।
क्रूरग्रहाश्च भूताश्च असुरा यातुधानकाः।
पिशाचो गुह्यकादिश्च डाकिन्यो विविधास्तथा।।
सर्वरोगसमुत्पन्नं व्याघ्रसर्पभवं भयम्।
अन्यैर्दुष्टमृगैस्सर्वं भस्मस्नानेन नश्यति।। इति।

ननु पाद्मादिपुराणेष्वेव त्रैवर्णिकानामेव चक्राद्यङ्कनं त्रिशूलाद्यूर्ध्वपुण्ड्रधारणञ्च यथायथं पुण्ड्रान्तरनिषेधपूर्वकं नित्यादिशब्दैस्सर्वकर्माङ्गतया च क्वचित्फलसाधनतया च सप्रयोगं विधीयते –

ऊर्ध्वपुण्ड्रं द्विजः कुर्याद्दण्डाकारं सुशोभनम्।
सान्तराळमृजुं सौम्य सुपार्श्वं सुमनोहरम्।।
यः करोत्यूर्ध्वपुण्ड्रं स मम लोके महीयते।
अमलान्यूर्ध्वपुण्ड्राणि सान्तराळानि यो नरः।।
करोति विपुलं तत्र मन्दिरं मे करोति सः।
ऊर्ध्वपुण्ड्रस्य मध्ये तु विशालेऽतिमनोहरे।।
लक्ष्म्या सार्धं समासीनो रमे नित्यमहं मुदा।

निरन्तराळं यः कुर्यादूर्ध्वपुण्ड्रं द्विजाधमः।।
स हि तत्र स्थितं विष्णुं श्रियञ्चैव व्यपोहति।
अच्छिद्रमूर्ध्वपुण्ड्रन्तु यः करोति विमूढधीः।।
सपर्यायेण तानेति नरकानेकविंशतिम्।
ऋजूनि स्फुटपार्श्वानि सान्तराळानि विन्यसेत्।।
ऊर्ध्वपुण्ड्राणि दण्डाब्जदीपमत्स्यनिभानि च।
बहुना किं प्रलापेन हृदयं सौम्यं सुदर्शनम्।।
ऋजुं सुपार्श्वमूर्ध्वाग्रं कुर्यादत्यच्छमुत्तमम्।
शिखोपवीतवद्धार्यमूर्ध्वपुण्ड्रं द्विजन्मना।।
विना कृताश्चेत् विफलाः क्रियास्सर्वा महामुने।
तस्मात्सर्वेषु कार्येषु धार्यं विप्रस्य धीमतः।।
रक्षाकरं दुर्ग्रहाणां संसारग्रहनाशनम्।
ऊर्ध्वपुण्ड्राद्वरं नान्यत्दृष्टं ज्ञातं श्रुतं मया।।
धारयेदूर्ध्वपुण्ड्रांश्च विष्णोः प्रीतिकरांस्तथा।
जपहोमार्चनध्यानदानादिषु विशेषतः।।
नश्यन्ति सकलाः क्लेशा नराणां पापसम्भवाः।
अभीष्टान्यखिलानि स्युरूर्ध्वपुण्ड्रस्य धारणात्।।
त्रयोदशद्वादश वा ह्यूर्ध्वपुण्ड्राणि धारयेत्।
एकञ्चत्वारिषट्सप्ताष्टापि वाञ्छन्ति केचन।।
प्रणवेन तथा व्यूहैष्षडष्टद्वादशाक्षरैः।
पुण्यतीर्थोद्धृतश्वेतमृत्स्नाविरचितैश्शुभैः।।
ऊर्ध्वपुण्ड्रैर्द्वादशभिस्सौम्यैरावृतविग्रहम्।
स्वस्थानविधृताशेषपञ्चायुधविभूषितम्।।
गाधिसूनुं महात्मानं विश्वामित्रं तपोधनम्।
अभ्येत्य काश्यपो नाम कदाचिदृषिसत्तमः।।
प्रणम्योपान्तिके तस्थौ शिरस्याधाय चाञ्जलिम्।
धृतोर्ध्वपुण्ड्रस्सततं शस्तया श्वेतमृत्स्नया।।
शङ्खचक्रादिभिश्चिह्नैस्स्वेषु स्थानेषु लाञ्छितः।
एवं लक्षणसंयुक्तो यस्स आचार्य उच्यते।।
धृतोर्ध्वपुण्ड्रतिलकस्सदा द्वादशनामभिः।
प्रशस्तोज्वलवेषश्च शङ्खचक्रादिलाञ्छनः।।
एवमादिगुणैर्युक्तः स्थिरधीश्शिष्य उच्यते।
प्रशस्तवैष्णवक्षेत्रजातया श्वेतमृत्स्नया।।
मूर्तीनां केशवादीनां नामोच्चारणपूर्वकम्।
ललाटादिषु यत्गात्रं ऊर्ध्वपुण्ड्रस्य धारणम्।।

तत्पार्थिवं भवेत् स्नानं योगिवर्यैर्निषेवितम्।
पवित्राण्यब्जबीजानि शङ्खचक्राङ्कनं तथा।।
धारयन्नोपहन्येत कदाचित्किङ्करादिभिः।
ब्राह्मणः क्षत्रियो वैश्यश्शूद्रो नारी तथेतरः।।
चक्राद्यैरङ्कयेत्गात्रमात्मनः परया मुदा।
अनिष्टानां निवृत्त्यर्थमैकान्त्याय जगत्पतौ।।
सिध्यर्थं कर्मणाञ्चैव धार्यञ्चक्रादिलाञ्छनम्।
शङ्खचक्रोर्ध्वपुण्ड्राद्यैश्चिह्नैः प्रियतमैर्हरेः।।
रहितस्सर्वधर्मेभ्यः प्रच्युतो नैनमाप्नुयात्।
दासभूतं यदात्मानं बुध्येत परमात्मनः।।
तदैव गात्रं कुर्वीत शङ्खचक्रादिलाञ्छितम्।
अङ्कितः क्वचिदप्यङ्गे चक्रेणैकेन केवलम्।।
अनिष्टानान्तु भूतानां न तावद्वशगो भवेत्।
विष्णोरायतनाग्नौ वा गुरोरात्मन एव वा।।
हुतहोमादिभिस्तप्तैस्सरूपैरर्चितैः क्रमात्।
चक्राम्बुजगदाशाङ्र्गखड्गैर्मन्त्रेण दाहयेत्।।
अङ्कितश्शङ्खचक्राभ्यां सर्वैरङ्कित एव वा।
शङ्खचक्रप्रधानं हि सर्वमन्यत्गदादिकम।।
अग्नीषोमौ हि चक्राब्जे सर्व एव तदात्मकाः।
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।।
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः।
सुदर्शनमहाज्वालकोटिसूर्यसमप्रभा।।
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय।
भगवन् सर्वविजयसहस्रारापराजित।।
शरणं त्वां प्रपन्नोऽस्मि श्रीकरं श्रीसुदर्शनम्।
पाञ्चजन्यनिजध्वानध्वस्तपातकसञ्चय।।
पाहि मां पापिनं घोरं संसारार्णवपातितम्।
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।।
नमितस्सर्वदेवैश्च पाञ्चजन्य नमोस्तुते। इति।

एतैश्च **पाद्मादिवचनैः** स्मृत्यधिकरणन्यायेन स्वमूलभूतो वेदोनुमीयते। तथा च त्रिशूलाद्यूर्ध्वपुण्ड्रचक्राङ्कनादेरपि वेदोक्तत्वाद्वैदिकेन शैवाश्रमिणापि तद्धार्यमेव। ननूक्तप्रत्यक्षश्रुतिमूलस्मृतिपुराणादिभिस्त्रिशूलोर्ध्वपुण्ड्राङ्कनादेर्निषिद्धत्वेन निषिद्धार्थकोक्त**पाद्मादि**वचनैर्विरोधाधिकरणन्यायेन बौद्धाद्यागमैरिव न श्रुत्यनुमानमिति चौन्मैवम् – पूर्वोक्ताङ्कनत्रिशूलोर्ध्वपुण्ड्रनिन्दादिनिषेधकवाक्यानां त्रिपुण्ड्रमारभ्याधीतत्वेनोदितानुदितनिन्दावाक्यवद्वाक्यभेदभयेन प्रकरणीभूतत्रिपुण्ड्रस्थापकत्वेनान्यनिषेध–

परत्वाभावादिति। अत्रोच्यते – अस्त्वेवमारभ्याधीतेषु। सन्ति चानारभ्याधीतान्यपि **बोधायनस्मृत्यादि**षूर्ध्वपुण्ड्रनिन्दानिषेधकवचनानि प्रत्यक्षश्रुतिमूलानि। तानि च निषेधपराण्येव। ततो न तन्निषिद्धार्थकोक्त**पाद्मादि**पुराणवचनैर्मूलभूतवेदानुमानम्। अपि चोक्त**पाद्मपुराण**वचनानां **पाञ्चरात्रतन्त्रै**कार्थ्यप्रत्यभिज्ञानात्सम्भवत्तन्त्रमूलतया हेतुदर्शनाच्चेति न्यायेन वैसर्जनीयवासोग्रहणादिस्मृतिवन्न वेदमूलत्वमेषां वचनानाम्। अपि तु **पाञ्चरात्रतन्त्र**मूलत्वमेव। सन्ति च तन्त्रमूलान्यपि स्मृतिपुराणानि। तदुक्तम् **स्कान्दे सौरसंहितायाम्** –

> तन्त्रावलम्बनेनैव पुराणानि च कानिचित्।
> साक्षाद्वेदविरुद्धार्थं प्रवदन्ति क्वचित् क्वचित्।। इति।

अतः **पाञ्चरात्रागमा**धिकारिविषयाण्येवोक्तपाद्मादिवचनानि। ननु **पाद्मपुराणा**दिषु ब्राह्मणादीनाञ्चक्रादिलाञ्छनं श्रूयते। न च पाञ्चरात्रतन्त्रे ब्राह्मणादीनामधिकारः –

> तप्तमुद्राऽप्यन्त्यजाय हरिणा निर्मिता पुरा।

इत्यादि**ब्राह्मपुराणवचनात्**। तथा च कथमुक्त**पाद्म**वचनानां पाञ्चरात्राधिकारिविषयत्वमिति चेन्न। पाञ्चरात्रेष्वेव ब्राह्मणानां तप्तमुद्रादिष्वधिकारश्रवणेन तदनुरोधेन तदधिकारव्यवस्थापकोक्त**ब्राह्म**वचनेऽन्त्यजशब्दस्य तामसाधिकारिपरत्वेन तद्वचनस्य वैदिकप्रशंसापरत्वेन वा ब्राह्मणादीनामपि तत्राधिकारसम्भवेन तद्वचनानां पाञ्चरात्राधिकारिविषयत्वसम्भवात्। उक्तञ्च तत्रैव पाञ्चरात्रवैष्णवविषयत्वं **पाद्मादिपुराणे** ऊर्ध्वपुण्ड्रचक्राङ्कनादेः –

> विष्ण्वागमोक्तमार्गेण श्रद्धया सह दीक्षिताः।
> एकान्त्याद्या बहुविधा वैष्णवाः परिकीर्तिताः।।
> सच्छिद्रमथवाच्छिद्रं द्विविधं चोर्ध्वपुण्ड्रकम्।
> उच्यते दृश्यते चैतत् शास्त्रेऽप्यनुभवेपि च।।
> त्रिशूलाभं हरिपदाकारञ्चेति पुनर्द्विधा।
> सच्छिद्रन्तु त्रिशूलस्य मध्यरेखा हरिद्रतः।।
> सच्छिद्रमुक्तमेकान्तिपरमैकान्तिनः प्रति।
> पाञ्चरात्रे भगवताऽच्छिद्रं प्रत्यन्यवैष्णवान्।।
> एकान्तिनो महाभाग मत्स्वरूपविदोऽमलाः।
> सान्तराळं प्रकुर्वीरन् पुण्ड्रान् मम पदाकृतीन्।।
> परमेकान्तिनोप्येवं मत्पदैकपरायणाः।
> हरिद्राचूर्णसंयुक्तान् शूलाकारांस्तु वा मलान्।।
> अन्ये तु वैष्णवाः पुण्ड्रानच्छिद्रानपि भक्तितः।
> प्रकुर्वीरन् दीपलिङ्गवेणुपत्रोपमाकृतीन्।।
> अच्छिद्रानथ सच्छिद्रान् कुर्युः केवलवैष्णवाः।
> अच्छिद्रकरणे तेषां प्रत्यवायो न विद्यते।।
> एकान्तिनां प्रपन्नानां परमैकान्तिनामपि।

अच्छिद्रपुण्ड्रकरणे प्रत्यवायो महान् भवेत्।। इति।

नन्वस्त्वेवं सच्छिद्रोर्ध्वपुण्ड्रत्रिशूलादिचक्रांकनादिकञ्च **पाद्माद्युक्तं** पाञ्चरात्रतान्त्रिकविषयम्। तथापि गङ्गामृत्तिकागोपीचन्दनादिसाध्यमच्छिद्रोर्ध्वपुण्ड्रन्तु वैदिकविषयमेव। तद्विधायकवाक्येषु **पाद्मोक्त**दोषस्याभावात्। तथाहि – **व्याससत्यव्रतमन्वादिस्मृतिषु ब्रह्माण्डब्राह्मबृहन्नारदीय-पुराणे**षु च वैदिकाह्निकप्रकरणे चोक्तोर्ध्वपुण्ड्रं सप्रयोगं विधीयते –

जाह्नवीतीरसम्भूतां मृदं मूर्ध्ना बिभर्ति यः।
बिभर्ति रूपं सोऽर्कस्य तमो नाशाय वै स्मृतम्।। इति,
ऊर्ध्वपुण्ड्रो मृदा शुभ्रो ललाटे यस्य दृश्यते।
स चण्डालोपि शुद्धात्मा पूत एव न संशयः।। इति,
ऊर्ध्वपुण्ड्रं मृदा धार्यं विप्रेण ब्रह्मवादिना। इति,
ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा योभौ वा धारयेद्विजः।
ऊर्ध्वपुण्ड्रे त्रिपुण्ड्रं स्यात् त्रिपुण्ड्रेनोर्ध्वपुण्ड्रकम्।। इति।

**बृहन्नारदीये** –

ऊर्ध्वपुण्ड्रं यः करोति तुळसीमूलमृत्तिकाम्।
तत्रैव नेत्रं तस्य स्यात् मूर्ध्नेन्दोर्बिभृयात्कलाम्।।
यज्ञो दानं तपो होमस्वाध्यायः पितृतर्पणम्।
वृथा भवति विप्रेन्द्रा ऊर्ध्वपुण्ड्रं विना कृतम्।।

**ब्रह्माण्डपुराणे** –

ऊर्ध्वपुण्ड्रप्रमाणानि द्रव्याण्यङ्गुळिभेदतः।
वर्णानि मन्त्रदेशांश्च प्रवक्ष्यामि फलानि च।।
पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः।
सिन्धुतीरे च वल्मीके तुळसीमूलमाश्रिते।।
मृद एतास्तु संग्राह्या वर्जयेदन्यमृत्तिकाः।
श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत्।।
श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते।
अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्।।
अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी।
एतैरङ्गुलिभेदैस्तु कारयेन्न नखैस्स्पृशेत्।।
वर्तिदीपाकृतिं वापि वेणुपत्राकृतिं तथा।
पद्मस्य मुकुळाकारं तथैव कुमुदस्य च।।
मत्स्यकूर्माकृतिं वाऽपि शङ्खाकारं ततः परम्।
दशाङ्गुलप्रमाणं तदुत्तमोत्तममुच्यते।।
नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमतः परम्।
सप्तषट्पञ्चभिः पुण्ड्रं मध्यमं त्रिविधं स्मृतम्।।

चतुस्त्रिद्व्यङ्गुलैः पुण्ड्रं कनिष्ठं त्रिविधं भवेत्।
ललाटे केशवं विद्यान्नारायणमथोदरे।।
माधवं हृदि विन्यस्य गोविन्दं कण्ठकूपके।
उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते।।
तत्पार्श्वे बाहुमध्ये मधुसूदनमनुस्मरेत्।
त्रिविक्रमं कण्ठदेशे वामे कुक्षौ तु वामनम्।।
श्रीधरं बाहुके वामे हृषीकेशन्तु कण्ठके।
पृष्ठे तु पद्मनाभन्तु ककुद्दामोदरं स्मरेत्।।
द्वादशैतानि नामानि वासुदेवेति मूर्धनि।
पूजाकाले च होमे च सायं प्रातस्समाहितः।।
नाम्न्युच्चार्य विधिना धारयेदूर्ध्वपुण्ड्रकम्।
अशुचिर्वाप्यनाचारो मनसा पापमाचरन्।।
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्राङ्कितो नरः।
ऊर्ध्वपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित्।।
श्वपाकोपि विमानस्थो मम लोके महीयते।

**ब्रह्माण्डेऽपि** –

अशुचिर्वाप्यनाचारो मनसा पापमाचरन्।
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्रांकितो नरः।। इति।

**ब्राह्मे च गोपीचन्दनमाहात्म्ये** –

गोपीचन्दनलिप्ताङ्गो यं यं पश्यति चक्षुषा। इत्यादि।

तत्रैतेषां वचनानां निषिद्धार्थत्वेन **शाक्यादिस्मृतिवत् भट्टरीत्या** विरोधाधिकरणन्यायेन किं वेदाननुमापकत्वम्, उत त्रिपुण्ड्रश्रुत्यादिविरुद्धार्थकत्वेनौदुम्बरीयसर्ववेष्टनस्मृतिवत्गुरूक्तरीत्या विरोधाधिकरणन्यायेन वा। अथवा हेतुदर्शनाच्चेति न्यायेन सम्भवल्लोभमूलवैसर्जनीयवासो ग्रहणस्मृतिवत्सम्भवत्तन्त्रमूलतया वा। नाद्यः, असिद्धेः।

ऊर्ध्वपुण्ड्रं त्रिशूलञ्च वर्तुळञ्चतुरश्रकम्।
अर्धचन्द्राकृतिञ्चैव वेदनिष्ठो न धारयेत्।। इति,
जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः।
पुण्ड्रान्तरं भ्रमाद्वाऽपि ललाटे नैवधारयेत्।।

इत्यादिवचनेषु वैदिकस्योर्ध्वपुण्ड्रसामान्यनिषेधश्रवणेप्यत्र वेदनिष्ठपदवदुक्तोर्ध्वपुण्ड्रवाक्येष्वपि ब्रह्मवादिन इति श्रवणाद्वैदिकाह्निकप्रकरणाच्चागत्या तन्निषेधस्य पदाकृतित्रिशूलाद्यूर्ध्वपुण्ड्र-विशेषनिषेधपरत्वस्यावश्याभ्युपगन्तव्यत्वात्। न द्वितीयः। कृतेप्युक्तोर्ध्वपुण्ड्रे तदविघातेन तदुपरित्रिपुण्ड्रकरणसम्भवेन विरोधाभावात्। अत एव च –

ऊर्ध्वपुण्ड्रे त्रिपुण्ड्रं स्यात्त्रिपुण्ड्रे नोर्ध्वपुण्ड्रकम्। इति,

ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा योभौ वा धारयेद्विजः।

इति च पुण्ड्रद्वयसमुच्चयवचनमपि सङ्गच्छते। न तृतीयः। उक्तोर्ध्वपुण्ड्रस्य पाञ्चरात्रेषु तान्त्रिकवैष्णवान्प्रत्यविहितत्वेन तन्त्रैकार्थ्यप्रत्यभिज्ञाभावेन सम्भवन्तन्त्रमूलत्वासिद्धेः प्रकरणविरोधात्। ब्रह्मवादिशब्दविरोधाच्च। यत्त्वच्छिद्रं प्रत्यन्यवैष्णवानिति,

अच्छिद्रं वाथ सच्छिद्रं कुर्युः केवलवैष्णवाः।

इति च **पाद्मवचनम**च्छिद्रोर्ध्वपुण्ड्रस्यापि केवलवैष्णवविषयत्वप्रतिपादकं तत्र केवलवैष्णवान्यवैष्णवशब्दाभ्यामतान्त्रिकवैदिकमहावैष्णवा एवोच्यन्ते। तस्यापवादाभावात्। पूर्वोक्तगोपीचन्दनाद्यूर्ध्वपुण्ड्रवचनानि स्मृत्यधिकरणन्यायेनोत्सर्गेण स्वमूलभूतवेदानुमापकान्येवेति वैदिकेन गोपीचन्दनादिभिरच्छिद्रोर्ध्वपुण्ड्रं धार्यम्। अतो वैदिकस्य पुण्ड्रद्वयसमुच्चय एव। अदृष्टार्थत्वात्। यत्तु –

गोपीचन्दनधारी तु शिवं स्पृशति यो द्विजः।
स स्वैकविंशतिकुलस्सोक्षयं नरकं व्रजेत्।। इति,
गोपीचन्दनसंयुक्तं भूत्या तिर्यक् त्रिपुण्ड्रकम्।
षष्टिर्वर्षसहस्राणि नरकं तत्प्रवेशयेत्।।

इति च पुण्ड्रसमुच्चयनिषेधवचनं तत्सर्वमुक्तयुक्तवचनाभ्यां वैदिकविषयत्वासम्भवात् तन्त्रान्तरेषु चोर्ध्वपुण्ड्रस्य विहितत्वात्परिशेषादाचाराच्च,

पुण्ड्रान्तरनिषेधो यो वेदमार्गैकवर्तिनः।
स समानस्तान्त्रिकस्य शैवस्यापि न संशयः।।

इति **पुराणेषु** शैवाश्रमिण ऊर्ध्वपुण्ड्रनिषेधाच्च शैवाश्रमिविषयमेवेति चेन्न। वैदिकाह्निकप्रकरणे आम्नातोप्युक्तपुण्ड्रसमुच्चयो वैदिकस्योर्ध्वपुण्ड्रसामान्यनिषेधानुसारेण प्रकरणेऽसमवेतार्थतया द्वादशोपसत्तादिवत्पाञ्चरात्राह्निकप्रकरण उत्कृष्यत इत्येके। तावतासाधारणवैदिकस्य पुण्ड्रसमुच्चयेऽपि शुद्धवैदिकशैवस्योक्तनिषेधानुसारेण भस्मत्रिपुण्ड्रमेवेत्यपरे। वैदिकस्योक्तोर्ध्वपुण्ड्रसमुच्चयेऽपि त्रिपुण्ड्रस्योक्तप्रत्यक्षश्रुत्यादिभिस्साक्षात् ज्ञानसाधनतया विहितत्वेनोक्तोर्ध्वपुण्ड्रापेक्षया विशिष्टवेषत्वात्तदभिप्रायेण भस्मधारणस्य सद्वेषत्वमुक्तमित्यपरे। अस्तु वैदिकस्य यत्किञ्चित्। शैवाश्रमिणस्तु त्रिपुण्ड्रमेव धार्यमिति तदभिप्रायेणेदं वचनं मृत्युजपः। तस्मात् भस्मोद्धूळनत्रिपुण्ड्रादिकं सद्वेषत्वात् ज्ञानार्थिना धार्यमिति स्थितम्। एवं रुद्राक्षधारणमपि सद्वेषत्वात् ज्ञानार्थिनावश्यं कर्तव्यमेव। **जाबालोपनिष्मूलेषु स्कान्दपाद्मबृहन्नारदीयगारूडवायवीयेषु** महापुराणेषु **मानवपाराशरवासिष्ठलैङ्गेषु** चोपपुराणेषु सर्वेषु चागमेषु यथायथं भस्मधारणवद्रुद्राक्षधारणाश्रद्धानिन्दा तत्स्तुतिपुरस्सरं नित्यशब्दसदाशब्दाधारणे दोषकीर्तनफला श्रुतिभिर्नित्यतया क्वचिन्मुखसङ्ख्याभेदात् फलभेदकथनेन काम्यतया क्वचित् प्रायश्चित्ततया क्वचित् शिवज्ञानसाधनतया मन्त्रध्यानाद्यङ्गपुरस्सरं विहितत्वात्। तथाहि – षण्मुनिशापादयो हेतुतया रुद्राक्षाधारणे पूर्वमुक्ता एव।

नित्यशब्दश्चाकृते तु प्रत्यवायश्च दारुणः।
रुद्राक्षधारणविधौ फलकीर्तनवर्जनम्।।
नित्यत्वगमका एते प्रोक्ताः स्कान्दे शिवप्रिये।

**स्कान्दे** –

कण्ठे मूर्ध्न्युपवीते वा कर्णे करयुगेऽथवा।
रुद्राक्षं धारयेन्नित्यं भक्त्या परमया युतः।।
किमत्र बहुनाऽनेन वर्णनेन पुनः पुनः।
रुद्राक्षधारणं नित्यं तस्मादेव प्रशस्यते।।
स्नाने दाने जपे होमे वैश्वदेवे सुरार्चने।
प्रायश्चित्ते तथा श्राद्धे दीक्षाकाले विशेषतः।।
अरुद्राक्षधरो भूत्वा यत्किञ्चित्कर्मवैदिकम्।
कुर्वन् विप्रस्तु मोहेन नरके पतति ध्रुवम्।।
रुद्राक्षं धारयेद्विप्रस्सन्ध्यादिषु च कर्मसु।
दाने तपसि यज्ञे च प्रायश्चित्ते सुरार्चने।।

**तत्रैवान्यत्र** –

रुद्राक्षोत्पत्तितत्भेदमुखोचितफलानि च।
प्रत्यङ्गं धार्यरुद्राक्षसङ्ख्यान्युक्तानि सादरम्।।
जपमालालक्षणं तत्प्रतिष्ठा चात्र कीर्त्यते।
तान्त्रिकेण प्रतिष्ठा सा ग्राह्या नो वैदिकेन तु।।

ईश्वरः –

श्रृणु षण्मुख तत्त्वेन कथयामि समासतः।
त्रिपुरो नाम दैत्यस्तु पुरासीत्सर्वदुर्जयः।।
हतास्तेन सुरास्सर्वे ब्रह्मविष्ण्वग्निदेवताः।
तैस्सर्वैः कथिते तस्मिंस्तदाहं त्रिपुरं प्रति।।
अचिन्त्यं महाशस्त्रं सर्वशस्त्रमनोहरम्।
सर्वदेवमयं दिव्यं ज्वलन्तं घोररूपिणम्।।
त्रिपुरस्य वधार्थाय देवानां त्राणनाय च।
सर्वविघ्नोपशमनमघोरास्त्रमचिन्तयम्।।
दिव्यवर्षसहस्रन्तु चक्षुरुन्मीलितं मया।
पश्चान्ममाकुलाक्षिभ्यः पतिता जलबिन्दवः।।
तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः।
ममाज्ञया महासेन मर्त्यानां हितकाम्यया।।

स्कन्दः –

कतिभेदाः कतिमुखाः कावाधिष्ठातृदेवताः।
गुणास्तु कीदृशास्तेषां कथयस्व यथार्थतः।।

ईश्वरः –

श्रृणु षण्मुख तत्त्वेन तत्सर्वं कथयामि ते।
बभूवुस्ते च रुद्राक्षा ह्यष्टस्त्रिंशत् प्रभेदतः।।
सूर्यनेत्रोद्भवा भेदाः कपिला द्वादशस्मृताः।
सोमनेत्रोत्थिता श्वेतास्ते षोडशाविधाः क्रमात्।।
वह्निनेत्रोद्भवाः कृष्णा दशभेदा भवन्ति हि।
श्वेतवर्णन्तु रुद्राक्षं जातितो ब्राह्ममुच्यते।।
क्षात्रं रक्तं तथा मिश्रं वैश्यं कृष्णन्तु शूद्रकम्।
एकवक्त्रश्शिवस्साक्षात् ब्रह्महत्यां व्यपोहति।।
द्विवक्त्रो देवदेवस्स्यात्गोवधं नाशयेद्ध्रुवम्।
त्रिवक्त्रस्तु शिवस्साक्षात् स्त्रीहत्यां दहति क्षणात्।।
चतुर्वक्त्रस्स्वयं ब्रह्मा नरहत्यां व्यपोहति।
पञ्चवक्त्रस्स्वयं रुद्रः कालाग्निर्नाम नामतः।।
अभक्ष्यभक्षणोद्भूतैरगम्यागमनोद्भवैः।
मुच्यते सर्वपापैस्तु पञ्चवक्त्रस्य धारणात्।।
षड्वक्त्रः कार्तिकेयस्तु तद्धार्यं दक्षिणे करे।
ब्रह्महत्यादिकैः पापैः मुच्यते नात्र संशयः।।
सप्तवक्त्रो महानागो ह्यनन्तो नाम नामतः।
तद्धारणान्मुच्यते हि स्वर्णस्तेयादिपातकैः।।
अष्टवक्त्रो महासेन साक्षाद्देवो विनायकः।
अन्नकूटं कूलाकूटं स्वर्णकूटं तथैव च।।
दुष्टचित्तस्त्रियं वाऽथ संस्पृशेद्वा गुरुस्त्रियम्।
एवमादीनि पापानि घ्नन्ति सर्वाणि धारणात्।।
विघ्नास्तस्य प्रशाम्यन्ति याति चान्ते परं पदम्।
भवन्त्येते गुणास्सर्वे ह्यष्टवक्त्रस्य धारणात्।।
नववक्त्रो भैरवस्तं धारयेद्वामबाहुके।
भुक्तिमुक्तिप्रदः प्रोक्तो मम तुल्यबलो भवेत्।।
भ्रूणहत्या सहस्राणि ब्रह्महत्याशतानि च।
तत्सर्वं नश्यति क्षिप्रं नववक्त्रस्य धारणात्।।
दशवक्त्रस्तु देवेशस्साक्षाद्देवो जनार्दनः।
ग्रहाश्चैव पिशाचाश्च वेताळा ब्रह्मराक्षसाः।।
पन्नगाश्च प्रशाम्यन्ति दशवक्त्रस्य धारणात्।
वक्त्रैकादशरुद्राक्षं रुद्रैकादशकं स्मृतम्।।

शिखायां धारयेद्यो वै तस्य पुण्यफलं श्रृणु।
अश्वमेधसहस्रस्य वाजपेयशतस्य च।।
गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम्।
तत्फलं शीघ्रमाप्नोति वक्त्रैकादशधारणात्।।
रुद्राक्षं द्वादशास्यञ्च कण्ठदेशे तु धारयेत्।
आदित्यास्तोषिता नित्यं द्वादशास्यव्यवस्थिता:।।
गोमेधे चाश्वमेधे च यत्फलं तदवाप्नुयात्।
शृङ्गिणां शस्त्रिणां चैव व्याघ्रादीनां भयं नहि।।
नचैवाधिभयं तस्य न च व्याधि: प्रवर्तते।
न च किञ्चित्भयं तस्य सुखी चैवेश्वरो भवेत्।।
हस्त्यश्वमृगमार्जारसर्पमूषिकदर्दुरान्।
खरांश्च श्वसृगालांश्च हत्वा बहुविधानपि।।
मुच्यते नात्र सन्देहो वक्त्रद्वादशधारणात्।
वक्त्रत्रयोदशं वत्स रुद्राक्षं यदि लभ्यते।।
कार्तिकेयसमं ज्ञेयं सर्वकामार्थसिद्धिदम्।
रसो रसायनं चैव पादुका चैव सिध्यति।।
तस्यैव सर्वभोग्यानि नात्र कार्या विचारणा।
मातरं पितरं चैव भ्रातरं चापि हन्ति य:।।
मुच्यते सर्वपापेभ्यस्त्रयोदशमुखस्य च।
त्रयोदशाक्षो रुद्राक्षो लभ्यते यदि पुत्रक।।
धारयेत्सततं मूर्ध्नि तस्य पुण्यं शिवस्य तु।
किं पुनर्बहुनानेन वर्णनेन पुन: पुन:।।
पूज्यते सततं देवै: प्राप्यते च परा गति:।
रुद्राक्षमेकं शिरसि धार्यं भक्त्या द्विजोत्तमै:।।
षट्त्रिंशत्भिश्शिरोमाला धारणीया मनीषिभि:।
द्वात्रिंशत्भि: कण्ठमाला पञ्चाशद्धृदयेन तु।।
कलाक्षैर्बाहुवलयमर्काक्षैर्मणिबन्धनम्।
अष्टोत्तरशतेनापि पञ्चाशत्भिष्षडानन।।
अथवा सप्तविंशत्या कृत्वा रुद्राक्षमालिकाम्।
धारणाद्वा जपाद्वापि ह्यनन्तफलमश्नुते।।
अष्टोत्तरशतैर्माला रुद्राक्षैर्धार्यते यदि।
क्षणे क्षणेऽश्वमेधस्य फलं प्राप्नोति षण्मुख।।
त्रिसप्तकुलमुधृत्य शिवलोके महीयते।
लक्षणं जपमालायाश्शृणु वक्ष्यामि षण्मुख।।
रुद्राक्षस्य मुखं ब्रह्मा बिन्दू रुद्र इतीरित:।

विष्णुः पुच्छं भवेच्चैव भोगमोक्षफलप्रदः।।
पञ्चविंशतिभिश्चाक्षैः पञ्चवक्त्रैस्सकण्टकैः।
रक्तवर्णैरसम्मिश्रैः कृतरन्ध्रविदर्भितैः।।
अक्षसूत्रं प्रकर्तव्यं गोपुच्छवलयाकृति।
वक्त्रं वक्त्रेण संयोज्य पुच्छं पुच्छेन योजयेत्।।
मेरुमूर्ध्वमुखं कुर्यात्तदूर्ध्वं नागपाशकम्।
अङ्गुष्ठदेशिनीभ्यान्तु मध्यमायां व्यवस्थितम्।।
प्रक्षाल्य गन्धतोयेन पञ्चगव्येन चोपरि।
ततश्शिवाम्भसा प्रोक्ष्य तत्तन्मन्त्रगणान्न्यसेत्।।
स्पृष्ट्वा शिवास्त्रमन्त्रेण कवचेनावकुण्ठयेत्।
मूलमन्त्रं न्यसेत्पश्चात्पूजयेत्पूर्ववद्यथा।।
त्रिवृत्सूत्रेण सम्प्रोक्ष्य यावदष्टोत्तरं शतम्।
मूलमन्त्रं समुच्चार्य शुद्धभूमौ निधाय च।।
तस्योपरिन्यसेत्साङ्गं शिवं परमकारणम्।
प्रतिष्ठिता भवेन्माला सर्वकामफलप्रदा।।
यस्य मन्त्रस्य यो मन्त्रस्तत्तेनैवाभिपूजयेत्।
मूर्ध्नि कण्ठेऽथवा कर्णे न्यसेद्वा जपमालिकाम्।।
रुद्राक्षमाला चैवं हि जप्तव्या नियतात्मना।।

तथा प्रायश्चित्तत्वमपि **वासिष्ठलैङ्गे** –

रुद्राक्षधारणाद्रुद्रो भवत्येव न संशयः।
पश्यन्नपि निषिद्धांश्च तथा श्रृण्वन्नपि स्मरन्।।
जिघ्रन्नपि तथा चाश्नन् प्रलपन्नपि सन्ततम्।
कुर्वन्नपि तथा गच्छन् विसृजन्नपि मानवः।।
रुद्राक्षधारणादेव सर्वैः पापैः प्रमुच्यते।

तथा ज्ञानसाधनत्वमपि **पुराणे** –

ईश्वरः –

जाबालोपनिषत्साध्वी मम ज्ञानस्य सिद्धये।
प्रधानसाधनान्याह प्राणिनामादरेण तु।।
अविमुक्तं मम क्षेत्रं मन्नामपरमं शुभम्।
शतरुद्रीयसंज्ञञ्च तथा सन्यासमुत्तमम्।।
भस्मनोद्धूळनं तद्वत् त्रिपुण्ड्रस्य च धारणम्।
रुद्राक्षधारणं साक्षात् शिवशब्दजपस्तथा।।
भस्मसम्पदनुध्यानं ममैव परमस्य च।
एतान्याह प्रधानानि साधनानि प्रियेण तु।।

एतत्सर्वं मया ख्यातं मम विज्ञानसिद्धये।
एषु धर्मेषु यश्श्रद्धां नित्यं कुर्याद्द्विजोत्तमः।।
अचिराल्लभते ज्ञानं संसारच्छेदकारणम्।
एषु धर्मेषु यो धर्मो विकलो यस्य धर्मिणः।।
न तस्य ब्रह्मविज्ञानं जायते न हि संशयः।

तथा उक्तेष्वर्थेषु स्पष्टार्थमुक्तपुराणादिष्वेव कानिचिद्वचनानि लिख्यन्ते।

**गारुडे** –

रुद्राक्षतरुसम्भूतवातोद्धूततृणान्यपि।
पुण्यलोकं गमिष्यन्ति पुनरावृत्तिदुर्लभम्।।

**मानवे** –

रुद्राक्षधारणात्पापं कुर्वन्नपि च मानवः।
सर्वं तरति पाप्मानं जाबालश्रुतिराह हि।।
पशवोपि हि रुद्राक्षधारणाद्यान्ति रुद्रताम्।
किमु ये धारयन्तिस्म नरा रुद्राक्षमालिकाः।।

**पाद्मे** –

रुद्राक्षं शिरसा ह्येकं धार्यं रुद्रपरैस्सदा।
ध्वंसनं सर्वदुःखानां सर्वपापविशोधनम्।।

**बृहन्नारदीये** –

व्याहरन्ति च नामानि ये शम्भोः परमात्मनः।
रुद्राक्षालङ्कृता ये च ते वै भागवतोत्तमाः।।

**पराशरे** –

रुद्राक्षधारणं कार्यं सर्वैश्श्रेयोर्थिभिर्नृभिः।
कर्णपाशे शिखायाञ्च कण्ठे हस्ते च सर्वदा।।
महादेवश्च विष्णुश्च ब्रह्मा तेषां विभूतयः।
देवाश्चान्ये सदा भक्त्या खलु रुद्राक्षधारिणः।।
गोत्रर्षयश्च सर्वेषां कूटस्थाश्शुद्धलक्षणः।
वेदोक्तवर्त्मना नित्यं खलु रुद्राक्षधारिणः।।
तेषां वंशप्रसूताश्च मुनयस्सकला अपि।
श्रौतधर्मपराश्शुद्धाः खलु रुद्राक्षधारिणः।।
पापिष्ठानां मनुष्याणां रुद्राक्षाणाञ्च धारणे।
श्रद्धा न जायते साक्षाद्वेदसिद्धे विमुक्तिदे।।

बहूनां जन्मनामन्ते महादेवप्रसादतः।
रुद्राक्षधारणश्रद्धा स्वभावेनैव जायते।।
अङ्गुल्या शङ्खमणिना पुत्रजीवेन वा बुधः।
पद्माक्षैस्स्फटिकैर्वापि कुशग्रन्थ्याथवा जपेत्।।
रुद्राक्षेणैव वा नित्यं जपेन्मन्त्रमतन्द्रितः।
रुद्राक्षेण जपन्मर्त्यस्साक्षाद्रुद्रसमो भवेत्।।
रुद्राक्षस्य तु माहात्म्यं जाबालैरादरेण तु।
पठ्यते मुनिभिस्सर्वैश्शिवेनापि महात्मना।।
अङ्गुल्या जप एकस्स्याद्रेखयाऽष्टगुणो भवेत्।
जपस्तु शङ्खमणिना शतमष्टोत्तरं भवेत्।।
जपस्तु पुत्रजीवेन भवेदेव शतत्रयम्।
पद्माक्षेण सहस्रं स्यात् स्फटिकेनायुतत्रयम्।।
कोटिसङ्ख्या कुशग्रन्थ्या रुद्राक्षेणान्तवर्जितः।
अतस्सर्वप्रयत्नेन रुद्राक्षैस्सर्वदा जपेत्।।

**स्कान्दे** –

रुद्राक्षस्य फलं स्कन्द त्रिषु लोकेषु विश्रुतम्।
फलस्य दर्शनात्पुण्यं स्पर्शात्कोटिगुणं लभेत्।।
शतकोटिगुणं पुण्यं धारणाल्लभते नरः।
लक्षकोटिसहस्राणि लक्षकोटिशतानि च।।
जपात्तु लभते पुण्यं नात्र कार्या विचारणा।
हस्ते चोरसिकण्ठे च कर्णयोर्मस्तके तथा।।
रुद्राक्षं धारयेद्यस्तु स रुद्रो नात्र संशयः।
अवध्यस्सर्वभूतानां रुद्रवद्विचरेद्भुवि।।
सुराणामसुराणाञ्च वन्दनीयो यथा शिवः।
रुद्राक्षधारी सततं वन्दनीयस्तथा नरैः।।
उच्छिष्टो वा विकर्मस्थो युक्तो वा सर्वपातकैः।
मुच्यते सर्वपापेभ्यो रुद्राक्षस्य तु धारणात्।।
कण्ठे रुद्राक्षमाबध्य श्वानो वा म्रियते यदि।
सोपि रुद्रत्वमाप्नोति किं पुनर्मानुषादयः।।
जपध्यानविहीनोपि रुद्राक्षं यदि धारयेत्।
सर्वपापविनिर्मुक्तस्स याति परमां गतिम्।।
मृन्मयं वापि रुद्राक्षं कृत्वा यत्नेन धारयेत्।
कुलैकविंशमुधृत्य रुद्रलोके महीयते।।
महासेन कुशग्रन्थिः पुत्रजीवादयः परे।
रुद्राक्षस्य तु चैकस्य कलां नार्हन्ति षोडशीम्।।

पुरुषाणां यथा विष्णुर्ग्रहाणान्तु यथा रविः।
नदीनान्तु यथा गङ्गा मुनीनां काश्यपो यथा।।
उच्चैश्श्रवा यथाऽश्वानां देवानामीश्वरो यथा।
देवीनान्तु यथा गौरी तद्वच्छ्रेष्ठमिदं भवेत्।।
नातः परतरं स्तोत्रं नातः परतरं व्रतम्।
अक्षयेषु तु दानेषु रुद्राक्षन्तु विशिष्यते।।
शिवभक्ताय दान्ताय दद्याद्रुद्राक्षमुत्तमम्।
तस्य पुण्यफलस्यान्तन्न चाहं वक्तुमुत्सहे।।
धृतरुद्राक्षकण्ठा ये ते पश्यन्ति गृहे शुभम्।
अपदुष्कृतकर्माणस्ते यान्ति परमां गतिम्।।
धृतरुद्राक्षकण्ठाय यस्त्वन्नं संप्रयच्छति।
त्रिसप्तकुलमुधृत्य रुद्रलोकं स गच्छति।।
न विभूतिर्यस्य फाले नाङ्गे रुद्राक्षधारणम्।
न शम्भोर्भवने पूजा स विप्रश्श्वपचाधमः।।
खादन्मांसं पिबन्मद्यं सङ्गच्छन्नन्त्यजामपि।
पातकेभ्यो विमुच्येत रुद्राक्षे शिरसि स्थिते।।
सर्वयज्ञतपोदानवेदाभ्यासैश्च यत्फलम्।
तत्फलं लभते सद्यो रुद्राक्षस्य तु धारणात्।।
वेदैश्चतुर्भिर्यत्पुण्यं पुराणपठनेन च।
यत्पुण्यमितिहासाद्यैस्सर्वैरप्यागमैस्तथा।।
तत्पुण्यं लभते सर्वं रुद्राक्षस्य तु धारणात्।
प्रयाणकाले रुद्राक्षं भक्षयित्वा म्रियेद्यदि।।
स रुद्रत्वमवाप्नोति पुनर्जन्म न विद्यते।
रुद्राक्षं धारयन् कण्ठे बाह्योर्वा म्रियते यदि।।
कुलैकविंशमुत्तार्य रुद्रलोके वसेदयम्।
अपातकी पातकी वा दुर्गुणस्सुगुणोऽपि वा।।
भस्मरुद्राक्षधारी यः स देहान्ते शिवं व्रजेत्।
शुचिर्वाप्यशुचिर्वाथाप्यभक्ष्यस्य च भक्षकः।।
म्लेच्छो वाप्यथ चण्डालो युक्तो वा सर्वपातकैः।
रुद्राक्षधारणादेव स रुद्रो नात्र संशयः।।
शिरसा धारिते कोटिः कर्णयोर्दशकोटयः।
शतकोटिर्गले बद्धे मूर्ध्निकोटिसहस्रकम्।।
अयुतं चोपवीते तु लक्षकोटिर्भुजे धृते।
अमेयं मणिबन्धे तु रुद्राक्षं मोक्षसाधनम्।।
रुद्राक्षधारको भूत्वा यत्किञ्चित् कर्मवैदिकम्।

कुर्वन्विप्रस्सदा भक्त्या महदाप्नोति तत्फलम्।।
रुद्राक्षमालिकां कण्ठे धारयेत्भक्तिवर्जितः।
पापकर्मऽपि यो नित्यं समुक्तस्सर्वबन्धनात्।।
रुद्राक्षार्पितचेता यो रुद्राक्षं तेन धारितम्।
असौ महेश्वरो लोकैर्नमस्स तु लिङ्गवत्।।
अभिज्ञो वाऽनभिज्ञो वा रुद्राक्षस्य तु धारणात्।
शिवलोकं प्रपद्येत कीकटे गर्दभो यथा।।

स्कन्दः –

रुद्राक्षमदधाद्देव गर्दभः केन हेतुना।
कीकटं केन वा चाप्तं सर्वज्ञपरमेश्वर।।

ईश्वरः –

श्रृणु पुत्र पुरावृत्तं गर्दभो विन्ध्यपर्वते।
धत्ते रुद्राक्षभारन्तु वाहितः पथिकेन वै।।
श्रान्तोऽसमर्थस्तत्भारं वोढुं पतितवान्भुवि।
त्यक्तः प्राणैस्त्रिणेत्रस्तु शूलपाणिर्महेश्वरः।।
मत्प्रसादान्महासेन मदन्तिकमुपागतः।
यावद्वक्त्रस्य सङ्ख्यानां रुद्राक्षाणां स गर्दभः।।
तावद्युगसहस्राणि शिवलोके महीयते।
रुद्राक्षधारणात् श्रेष्ठं न किञ्चिदिह विद्यते।।
अमन्त्रधारणस्यैव गुणा एते प्रकीर्तिताः।
यः पुनर्मन्त्रसंयुक्तं धारयेत्भक्तितो नरः।।
गुणानां तस्य माहात्म्यं कथितुं नैव शक्यते।
एते चैव गुणा वत्स तव प्रीत्या मयोदिताः।।
स्वशिष्येभ्यस्तु वक्तव्या नाशिष्येभ्यः कदाचन।
अभक्तस्यापि मूर्खस्य न कदाचित्प्रकाशयेत्।। इति।

शिवालयञ्चालेपनमार्जनारामकरणादिभिर्भजेन्मुक्त्यै ज्ञानार्थीति। इयता प्रबन्धेनोक्तं शैवार्थनिर्णयं लाघवेन व्यवहारायोपादेयताप्रतिपत्तये च द्वादशसूत्रात्मकस्यैतच्छास्त्रस्यान्वर्थन्नामसिद्धवन्निर्दिशन्नेव निगमयति – इत्थं विद्याच्छिवज्ञानबोधे शैवार्थनिर्णयमिति। ज्ञायतेऽनेनेति ज्ञानं, शिवस्य ज्ञानं शिवज्ञानं शैवागमः। तेन विरोधादिना कस्यचिदर्थस्यानिर्णायकेन बोधो विषय व्यवस्थादिनाऽसन्दिग्धाविपर्यस्तार्थनिर्णयो यस्मात् स **शिवज्ञानबोध** इति विग्रहः। शिवज्ञानेभ्यो बोधो येन शिवज्ञानानां पूर्वोक्त्युक्त्या प्रथमं मूकानां बोधः प्रबोधकः उत्तेजक इति वा। अस्मिन् शिवज्ञानबोधे शैवागमस्यार्थेषु पूर्वोक्त्युक्त्या विप्रतिपन्नेषु निर्णयः निर्णीयत इति निर्णयः अबाधितमुख्यैककोटिः यश्शास्त्रादौ पृष्टः, तमित्थं विद्यात् इत्थं भूतं

उक्तसन्देहमालापरिशिष्टकोटिं विद्यादिति। यद्वा शैवार्थस्य मुख्यस्याबाधितस्य निर्णयं निश्चयं इत्थं विद्यात् उक्तप्रकारकं विद्यादिति। शिवज्ञानबोधमिति पाठे तु इत्थं विद्याच्छैवार्थनि-र्णयमिति पूर्वं सम्बन्धः। पुनश्च तत्प्रतिपादकञ्च शास्त्रं शिवज्ञानबोधनामकं विद्यादिति सम्बन्धः। यद्वा निर्णयशब्दो निर्णायकवाची। शैवार्थस्य निर्णयोऽनेनेति बहुव्रीहिर्वा। तेन शिवज्ञानबोधं शैवार्थनिर्णयं विद्यादिति सामानाधिकरण्येन युगपदेव सम्बन्ध इति।

आचार्यादाप्ततत्त्वो निगममनुगतानागमान्वीक्ष्य शश्वत् वाचो युक्त्या सयुक्त्या विमतमतगणानप्रशस्यानपास्य व्याकार्षीत् सिद्धबोधः परशिवकृपया श्रीशिवज्ञानबोधं प्राज्ञानां कौतुकाय प्रथितशुभगुणः श्रीशिवाग्रो मुनीन्द्रः।।

**॥ इति श्रीसूर्यनार्कोयिलाधीनस्थैः श्रीमदतिवर्णाश्रमाचार्यवर्यशैवसमयपरिपालक श्रीशिवाग्रयोगीन्द्रज्ञानशिवाचार्यस्वामिभिः विरचिते शिवज्ञानबोधभाष्ये द्वादशसूत्रभाष्यम् समाप्तम् ॥**

## ॥ समाप्तोऽयं ग्रन्थः ॥

# श्लोकानुक्रमणिका


अकस्माज्जायते कश्चित् 267
अकृतञ्च कृतञ्चैव 324
अक्षसूत्रं प्रकर्तव्यं 418
अग्नितप्तैर्महामोहात् 62
अग्निमान्नीतिमांश्चैव 300
अग्निरुद्रो हुताशनः 319
अग्निरुष्णो जलं शीतं 39
अग्निहोत्रं त्रयो वेदाः 72
अग्निहोत्रगृहे शान्ताः 64
अग्नीषोमौ हि चक्राब्जे 410
अग्नेश्शिवस्य माहात्म्यं 110
अङ्कपाणिस्तथा भूतैः 309
अङ्कितश्शङ्खचक्राभ्यां 410
अङ्किताश्श्रद्धया यूयं 61
अङ्गानि वेदाश्चत्वारो 70
अङ्गुल्या जप एकस्स्यात् 420
अङ्गुल्या शङ्खमणिना 420
अङ्गुष्ठोदरमात्रन्तु 275
अङ्गेषु नाङ्कयेद्विप्रो 375, 392
अचरे मन्त्रसंस्कारात् 383
अचिन्त्यं महाशस्त्रं 415
अचिराल्लभते ज्ञानं 419
अचेतनं जगद्विप्राः 28
अचेतनस्य मायादेः 28
अच्छिद्रं वाथ सच्छिद्रं 414
अच्छिद्रानथ सच्छिद्रान् 411
अज्ञानान्धस्य मे नित्यं 410
अज्ञो जन्तुरनीशोऽयं 244
अत ऊर्ध्वमहंकारतत्त्वं 185
अत एव हि भूतानां 130
अत एव हि राजेन्द्र 64
अतः पक्षद्वयेनापि 70
अतिवर्णाश्रमी तेऽपि 296
अतिवर्णाश्रमी प्रोक्तो 297
अतिवर्णाश्रमी साक्षात् 297
अतिह्रस्वानतीदीर्घान् 300
अतीव ज्ञापयामास 116
अतीव सुखदं शुद्धं 112
अतीवपतितानां हि 391
अतो नैव विचारोऽत्र 63
अतो मार्गान्तरे जाता 77
अतो हि निर्भयो विद्वान् 261
अतोऽग्निहोत्रजेनैव 396
अतोऽपि पाशविच्छेद 397
अतोऽस्ति बुद्धिमान्कश्चित् 30
अत्यन्तमलिनानां तु 283
अत्यर्धानि सहस्राणि 315
अत्युत्कटैः पुण्यपापैः 155
अत्रापि कालमुख्यानि 291
अत्रापि तेषां हेतुत्वे 206
अथ कर्मसमत्वेऽणोः 290
अथ ये सततं भक्त्या 372
अथ वैराग्यभेदोऽपि 267
अथ व्यक्तान्तरात् 128
अथ व्यक्तान्तरात् बुद्धेः 186
अथ शेषार्थसिध्यर्थं 129
अथवा सप्तविंशत्या 417
अथाणोः कलितस्यैव 126, 175
अथातस्संप्रवक्ष्यामि 32, 71, 294
अथातो विधिसिद्धेन 407
अथात्मधर्मभावस्स्यात् 264
अथाशक्यं यतश्शक्यं 169
अथेन्द्रियशरीरार्थैः 39
अथोपलभ्य देहादि 28, 48
अदृश्यञ्चेदसद्भावो 247
अदेहस्यापि कर्तृत्वं 29

अद्य सङ्क्रामितो यो 355
अद्वैतभावना युक्तः 360
अद्वैतभावनायुक्तः 331, 335
अधमो वैश्य इत्युक्तः 294
अधर्मं धर्ममिति या 110
अधस्स्रोतोद्भवाद्धर्मात् 74
अधस्स्रोतोद्भवाद्धर्मो 74
अधिकारिविभेदेन 379
अधिष्ठातृतया भेदं 154
अधूमपदमन्यच्च 325
अध्यापने चाध्ययने 391
अध्वाऽयं भोग्य उद्दिष्टो 291
अनन्तरन्तु वक्त्रेभ्यो 70
अनन्तस्त्रिकलो गोप्ता 320
अनया नियतं तच्च 179
अनयोरग्निकार्येषु 299
अनाथा च तथा प्रोक्ता 328
अनादिमुक्तश्चेत्कर्ता 29
अनाप्तयोगाच्छब्दस्य 69
अनामिकान्नदा नित्यं 412
अनिच्छन्नहि भुञ्जानो 126, 175
अनित्यः काल उद्दिष्टः 178
अनिधनपदञ्चैव 325
अनियोज्यस्सदा कर्ता 403
अनियोज्यस्सदाऽकर्ता 403
अनिष्टानान्तु भूतानां 410
अनिष्पन्नस्य कर्तव्यं 403
अनुग्रहतिरोभावौ 354
अनुग्रहाय लोकानां 385
अनुग्राह्यस्य विनये 302
अनुपादाय संभारं 138
अनुमानं दृढव्याप्त्या 100
अनुष्टुप्छन्दसा पूर्वं 25
अनेक भेदभिन्नानि 71
अनेकजन्मसिद्धानां 116, 274, 376, 393
अनेकभेदभिन्नन्तु 362
अनेकभेदभिन्नानि 33
अनेकाकारसंभिन्नं 359
अनेकैः पापसंघातैः 276
अनेन चित्रकृत्येन 107
अनेनेदं जगत्सर्वं 117
अनेनैव शरीरेण 405
अन्तःकरणवृत्तिर्या 252
अन्तर्बहिश्च विप्रेन्द्रो 116
अन्तर्भावः कुरुष्वब्धौ 314
अन्तस्संज्ञल्परूपा 160
अन्धाः कुब्जा जडा 63
अन्धो मूकस्तु बधिरः 300
अन्नपानप्रदानञ्च 386
अन्यत्र तत्त्वा संसृष्टिः 225
अन्यथाऽयं कथं मुक्तो 29
अन्यस्यान्यत्र धर्मस्तु 69
अन्यस्यान्यत्र सद्भाव 122
अन्यस्सन् व्याप्तितोऽनन्यः 121
अन्यानि चैव शास्त्राणि 33, 76, 284
अन्यानि शैवशास्त्राणि 83
अन्याश्च वृत्तयो बिन्दोः 163
अन्ये च ब्राह्मणा विष्णो 287
अन्ये तु कथयन्त्यत्र 167
अन्ये तु वैष्णवाः पुण्ड्रान् 411
अन्ये श्रुत्यादिसंसिद्धाः 303
अन्योऽपि मार्गो वेदादिः 57
अप एव सर्जादौ 106
अपाके परमेशाज्ञा 289
अपारस्य समुद्रस्य 339
अपि चान्यैः प्रियतमो 114
अभक्तमद्विजं क्रूरं 303
अभक्ष्यभक्षणं येषां 404
अभक्ष्यभक्षणोद्भूतैः 416
अभवद्रसतन्मात्रात् 132, 200
अभिज्ञो वाऽनभिज्ञो वा 422
अभिषेकस्य यो योग्यः 295
अमद्यपास्तु ये शूद्राः 75, 281
अमन्त्रधारणस्यैव 422
अमरेशः प्रभासश्च 324
अमरेशादिचाप्तत्वे 324
अमलेऽपि स चेत्सक्त्यै 224
अयं माहेश्वरो देव 406
अयं धर्मोऽनवद्योऽपि 64
अयः कीलमये मार्गे 65

अयमत्याश्रमो धर्मो 397
अयमाविश्यते सिद्धः 355
अयुतं चोपवीते तु 421
अयोरुक्मपुटादूर्ध्वं 309
अरुद्राक्षधरो भूत्वा 381, 415
अर्धचन्द्रसमाकारं 325
अर्धपुण्ड्रमनायुष्यं 408
अलिङ्गमक्षरं शान्तं 359
अवध्यस्त्वमजय्यश्च 115
अवरासूत्तमाज्जातः 287
अवश्यमनुभोक्तव्यं 344
अवस्थामपरे बिन्दोः 166
अविज्ञातः पशुस्सोहि 360
अविन्दन्नरके घोरे 32
अविभागेन वर्णानां 160
अविमुक्तं मम क्षेत्रं 418
अविरोधे तु वेदानां 387
अविवेकावसायोत्थं 264
अविशिष्टेऽपि भोक्तृत्वे 155
अविशुद्धजडत्वेन 162
अव्यक्तं दूषयित्वा तु 339
अव्यक्तादभवत् स्थाणुः 107
अशुचिर्वाऽप्यनाचारो 379, 396, 413
अष्टवक्त्रो महासेन 416
अष्टसन्धिषु वा मन्त्रिन् 407
अष्टादशपुराणानां 79, 284
अष्टादशानमेतासां 70
अष्टावष्टौ पदान्येक 324
अष्टाविंशतिसंख्यैस्तु 321
अष्टोत्तरशतैर्माला 417
असंख्या विलयं यान्ति 117
असंख्याताश्च कालाख्या 117
असत्त्वान्नास्ति संबन्धः 169
असृजत् सलिलं पूर्वं 109
अस्ति रुद्रस्य विप्रेन्द्रो 116
अस्तुतास्तुत इत्येवं 322
अस्त्वात्मनीनो मोक्षो 264
अस्मात् प्रविततात् बन्धात् 265
अस्य पुण्यात्मनश्चक्षुः 385
अस्यात्ममोचने शक्तिः 265
अस्यैव चानुजो रुद्रो 107
अस्यैवाज्ञालवाकृष्टं 117
अहं ब्रह्मत्वहं चेति 62
अहं यथावदाराध्यः 114
अहंकारात्तु भूतादेः 130, 190
अहंकाराभिभूतश्च 117
अहमात्मा शिवो ह्यन्यः 259, 360
अहमात्मैकरूपस्तु 186
अहमेव जगत्कर्ता 116
अहमेव परो देवः 359
अहो मोहस्य माहात्म्यं 399

आगच्छद्ध्वं सहानेन 85
आग्नीद्ध्रो नाम नृपतिः 315
आग्नेयीं मूर्तिमाश्रित्य 118
आचरन्ति महामूढा 31, 60
आचार्यत्वं शिवे नाथ 295
आचार्यनिन्दाश्रवणं 302
आचार्यमूर्तिमास्थाय 301, 303
आचार्यश्शिव एवाहुः 301, 302
आचार्यस्सर्ववर्णानां 295, 298
आचार्याञ्च मध्ये वै 299
आचार्ये बालबुद्धिश्च 302
आचार्येऽनीश्वरज्ञानं 302
आचार्यैस्तैरशेषाध्व 166
आचार्यो नाम वेदान्त 294
आचार्यौ द्वौ समाख्यातौ 296, 299
आजन्मब्रह्मचारी च 296, 299
आत्मा मलावृतस्सर्व 224
आत्माऽन्तःकरणादन्यो 221
आत्माऽप्यविषयो यस्य 252
आत्मानं परमो भूत्वा 258
आत्मानमीश्वरं वेद 297
आत्मानात्मान्तरात् बाध्यो 233
आत्मेन्द्रियार्थनैकट्ये 129
आत्मेन्द्रियार्थनैकृष्ट्ये 187
आदाय भसितं श्वेतं 395
आदिब्राह्मणभूतस्य 402
आदिब्राह्मणभूतेन 376, 393

आदिमध्यान्तरहिता 152
आदेशं प्रत्यपद्यन्त 59
आद्योऽनद्यवसायात्मा 185
आध्यात्मिकाश्चतस्रः 128, 184
आनन्दाद्वर्धते तत्तु 249
आनन्दान्तर्गता मुक्तिः 333
आनन्दो ब्रह्म एवैतत् 134, 143
आपो नारा इति प्रोक्तो 109
आप्तोक्तिरत्र सिद्धान्तः 80
आमुष्मिकत्वात्किन्तूर्ध्वं 156
आम्नायान्तैकसंवेद्यम् 53
आयुधैश्शङ्कचक्राद्यैः 374-75, 389, 392
आयुर्वेदो धनुर्वेदो 70
आयुष्कामोऽथवा राजन् 404
आरग्वधे च बिल्वे च 383
आरब्धमप्यनारब्धं 288
आराधयादरेणैव 117
आरोग्यं भास्करादिच्छेत् 368
आर्जने रक्षणे चोर 267
आर्द्रं काष्ठं महानग्निः 133, 368
आर्द्रस्नानाद्वरं भस्म 404
आर्हागमोदिताद्धर्मात् 74
आलोचने यत्करणं 172
आश्रमाणाञ्च सर्वेषां 377
आसं प्रथममेवाहं 106
आसीद्राजा चित्रनामा 31, 63
आस्य ग्रीवे च अंसौ च 407

इज्यानलवती या तु 306
इति किं पुरुषादीनि 315
इति पञ्चसु शब्दोऽयं 131, 199
इति पाशुपता मुक्तिं 354
इति बुद्धिप्रकाशोऽयं 89
इति मायादिकालान्त 158
इति मेरुधरोऽस्यान्यो 312
इति यः कुरुते भक्तिं 371, 373, 382
इति वर्णाश्रमाचारान् 75, 82, 285
इति वार्तापि वार्तैव 69
इति संस्तूयमानस्तु 115
इति सञ्चोदिता ब्रह्मन् 32, 67
इति सर्वर्तुसुखदाश्चक्र 311
इतिहासपुराणाभ्यां 71
इत्थं नग्नप्रणीतांस्तान् 64
इत्थं ब्रह्मैवात्मभूतं 302
इत्थं विद्याच्छिवज्ञान 382
इत्थं समयदीक्षायां 305
इत्यहं मानसंछन्नः 116
इत्युक्ता यमराजेन 67
इत्युक्त्वा कथयामास 84
इत्युक्त्वा भगवान् रुद्रः 113
इत्युक्त्वा भगवान् विष्णुः 66
इत्येतदुभयं विप्र 126
इत्येतदुभयं विप्रसंभूय 171
इदं विष्णुपदं लब्धं 117
इन्द्रद्वीपः कशेरुश्च 315
इन्द्रिये त्वक्पदावस्यां 327
इष्टानमप्यनिष्टानां 85
इष्यते स कथं कर्ता 244

ईदृग्भूतो दुराधर्षः 275
ईदृशान्वर्जयित्वा तु 300
ईशतत्पुरुषाघोर 29, 407
ईशानेन शिरोद्धूळ्य 407
ईशानो मन्त्रराडेनं 328
ईशाविद्याद्यपेक्षित्वात् 158
ईश्वरः कारणं तत्र 327
ईश्वरस्य तु कोट्यंशात् 124
ईश्वरस्य सहस्रांशात् 124
ईश्वरस्य स्वरूपे च 78
ईश्वराराधनबलात् 82
ईश्वरार्थधिया पापान् 133, 368
ईश्वरे वा गुरौ वेदे 302

उक्तं तत्सर्वदेवेभ्यः 405
उग्रः प्रचण्डधृक् चेशो 320
उच्चैश्श्रवा यथाऽश्वानां 421
उच्छिष्टो वा विकर्मस्थो 420
उत्क्षेपणादिव्यापार 131, 200
उत्तमः पञ्चधा प्रोक्तो 296
उत्तमो ब्राह्मणस्यापि 295
उत्तमो मध्यमस्तद्वत् 294
उत्तरे च निधीशाद्या 323

उत्पादयति सा माया 136
उद्धूळनं त्रिपुण्ड्रञ्च 372, 383, 387, 394, 397-98
उद्धूळने न शक्तश्चेत् 407
उद्वहन् भस्म चाङ्गेषु 64
उपादानं शरीराणां 166
उपास्यन्ति महाभक्त्या 275
उमादेव्युत्तरे पार्श्वे 124
उवौ बीजे च नाड्यौ 325

ऊरुभ्यां सहितास्स्त्रीभिः 286
ऊरू च जानुकौ जङ्घे 408
ऊर्ध्वगा चेति नादोत्थ 328
ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा 379, 412, 414
ऊर्ध्वपुण्ड्रं त्रिशूलञ्च 62, 375, 380, 388, 390, 413
ऊर्ध्वपुण्ड्रं द्विजः कुर्यात् 408
ऊर्ध्वपुण्ड्रं मृदा धार्यं 379, 412
ऊर्ध्वपुण्ड्रं यः करोति 412
ऊर्ध्वपुण्ड्रं ललाटे तु 375, 391
ऊर्ध्वपुण्ड्रप्रमाणानि 412
ऊर्ध्वपुण्ड्राणि दण्डाब्ज 409
ऊर्ध्वपुण्ड्रे त्रिपुण्ड्रं स्यात् 379, 413
ऊर्ध्वपुण्ड्रैर्द्वादशभिः 409
ऊर्ध्वपुण्ड्रो मृदा शुभ्रो 379, 412
ऊर्ध्वशेफो विरूपाक्षो 322
ऊर्ध्वाधोविषयालोको 164
ऊहश्शब्दोऽध्ययनं 183

ऋजुं सुपार्श्वमूर्ध्वाग्रं 409

एकदेशेन चेत्सर्वे 359
एकद्वित्रिचतुः पञ्च 196
एकरूपपरामुक्तिः 77
एकस्मिन् भुज्यमाने 288
एका मूर्तिस्त्रयो भागा 383
एकादशपदान्यासन् 327
एकादशसहस्रान्यां 310
एकादशेन्द्रियवधाः 128
एकान्तिनां प्रपन्नानां 411
एकान्तिनो महाभाग 411
एकार्णवे तु त्रैलोक्ये 105
एके क्षणस्तथेशानः 326
एकेन लोहमणिना 140
एकैवानेकतां याति 123, 151
एको नारायणो ह्यासीन्न 106
एतच्चेन्द्रियसापेक्षं 97
एतत्सर्वं मया ख्यातं 419
एतदाग्नेयकं स्नानं 377, 395
एतांश्च गुणसंयुक्तान् 301
एतेषां देशिकानाञ्च 300
एतैर्लक्षैरविच्छिन्नैः 303
एतौ द्वौ विबुधश्रेष्ठौ 107
एवं चान्येऽप्यसंख्येया 276
एवं प्रसाधिते चान्तः 193
एवं भस्मधृतं येन 403
एवं भूतमिदं वस्तु 151
एवं मुक्त्यभिधानेन 118
एवं मुनीन्द्रेण कृते 61
एवं व्यक्त क्रियाशक्तिः 126, 171
एवं संबोधितो रुद्रो 58
एवं संसारतो भीतं 266
एवं समयदीक्षायां 305
एवमादिगुणैर्युक्तः 409
एवमेकात्मभावेन 360
एवमेतदिति ज्ञेयं 151
एवमेतान् शिवेनोक्तान् 268
एवमेतेषु पापेषु 66
एष देवो महादेवो 107
एष पाशुपतो योगः 284
एष लोकगुरुर्ब्रह्मा 107
एषां पुटानान्नरकैः 308

ओमित्येकं पदं ज्ञेयं 328

कः पुनस्संस्कृताग्न्युक्थ 400
कण्ठे मूर्ध्न्युपवीते वा 381, 415
कण्ठे यस्य च रुद्राक्षः 384
कण्ठे रुद्राक्षमाबध्य 420
कण्ठोपरिकृतं पापं 406

कतिभेदाः कतिमुखाः 416
कथ्यन्तेतान्यहंकारात् 193
कदा द्रक्ष्यामि देवेशं 266, 294
कपालमर्बुदमस्थौल्यात् 307
कपालीशो जटो बुद्ध्नो 318
कमण्डलुधरा नित्यं 275
कमण्डल्वक्षमालाधृत् 124
कराळो भीमनिर्ह्लादः 310
करावलम्बनं को मे 84
करोति विपुलं तत्र 408
कर्कन्धुको हिरण्याक्षो 309
कर्ता महेश एवेष्टः 29
कर्तृ प्रसवङ्कीर्ण 348
कर्तृत्वादिगुणा ह्येते 348
कर्तृशक्तिरणोर्नित्या 42, 126, 171
कर्मचिद्रहितं तस्मात् 28
कर्मणाऽपि न च ज्ञान 224
कर्मणैव हि संसिद्धिं 270
कर्मतश्च शरीराणि 349
कर्मनाशान्मलस्यापि 293
कर्मभूमिरियं ब्रह्मन् 315
कर्मैवास्तु शरीरादि 127, 178
कलया विद्यया व्याप्तः 326
कलाक्षैर्बाहुवलयं 417
कलादिक्षितिपर्यन्तं 125, 168
कलादितत्त्वसंयोगात् 292
कलादिभिस्त्रिभिस्तत्त्वैः 176
कलोद्बलितचैतन्यो 174
कल्प्यते न स पुंसस्स्यात् 158
कल्माषदण्डं यो दद्यात् 385
कश्चित्कण्ठगतप्राणः 407
कस्यचिल्लाञ्छितो मर्त्यो 391
कानिचिद्वेदवाक्यानि 118
कापालं लाकुळञ्चैव 33, 71
कामिकं प्रणवाख्यस्य 25
कामुकस्तु स्त्रियां दृष्ट्वा 267
कारणात्गुणसंक्रान्तिः 132, 200
कारुण्ये स शिवः कर्ता 267
कार्कोटकोऽथ काळाङ्गो 310
कार्तिकेयसमं ज्ञेयं 417
कार्यता चास्य विश्वस्य 27
कार्यभेदादधिष्ठान 152
कार्या दीक्षा च सर्वेषां 82
काल एको यदीष्येत 177
काल एको विभुर्नित्य 177
कालस्सृजति भूतानि 40
कालावच्छेदशून्यत्व 178
काश्चिद्भयाज्जटाधारा 65
काष्ठैर्दार्ह्यैर्न दाहस्य 253
किं कर्मणाऽत्र विप्रेन्द्रो 290
किं दानैः किं व्रतैर्घोरैः 63
किं ध्यानैः किमनेकदान 401
किं यज्ञैः किमनेकतीर्थ 401
किञ्च पक्षीकृतस्सोऽपि 28
किञ्च प्रपातटाकादि 156
किञ्च बाल्ये च वार्धक्ये 205
किञ्च भोगप्रवृत्तौ तौ 225
किञ्च भोगैकहेतुस्तत् 225
किञ्च मायाप्रयोज्येन 162
किञ्च यस्य तु यो धर्मः 205
किञ्च सास्नादिमत्पिण्डे 129, 189
किञ्चाजडं जडन्नो चेत् 233
किञ्चाजडं जडेनैव 233
किञ्चायं मलिनो नो चेत् 223
किञ्चावकाशदं प्राहुः 163
किञ्चेष्यद्भोगहेतूनि 289
किञ्चैतदन्यथाज्ञानं 224
किमत्र बहुनाऽनेन 415
किमत्र बहुनोक्तेन 406
किमन्यदिह वक्तव्यं 401
किमीश्वरस्य सर्वकार्य 51
कुमारिकाख्यो नवमो 315
कुमार्गेणापि शाण्डिल्य 66
कुम्भस्थः कर्करीस्थश्च 264, 304
कुर्वन्ति तानि मानानि 33, 71
कुर्वन्ति यत्र संस्कारं 158
कुले महति विप्राणां 372
कुलैकविंशमुत्तार्य 421
कुशोऽभूत्काञ्चनः कौशे 316
कुहूश्च शङ्खिनी नाड्यौ 328

कूश्माण्ड इति विख्यातः 309
कृच्छ्रचान्द्रायणादौ च 60
कृतं स्यादकृतं तेन 399
कृष्णा दैत्यपदे मृत्योः 311
कृष्णाजिनोपरिस्थाप्य 384
केचित्समुच्चितं कर्म 274
केचिद्बौद्धं प्रशंसन्ति 59
केचिन्नियामकं कर्म 127, 178
केनचित्साधनेनैव 359
केनापि हेतुना ज्ञात्वा 375
को वा वर्णाश्रमाचारं 66
को हि त्वं भीषणाकारः 84
कोटिसङ्ख्या कुशग्रन्थ्या 420
कौपीनाच्छादनं वासो 385
क्रियमाणेन धर्मेण 258
क्रियापादे तु निपुणः 301
क्रूरग्रहाश्च भूताश्च 408
क्रोधेन महता युक्तो 389
क्रौञ्चादिषु सुरैस्सर्वैः 361
क्रौञ्चे क्रौञ्चो हतो दैत्यः 315
क्वचित्ब्रह्मा क्वचिद्विष्णुः 119
क्वासौ विष्णुः क्व कृष्णो 64
क्षमावतित्वनाक्रोशात् 355
क्षमावान्शान्तचित्तश्च 300
क्षात्रं रक्तं तथा मिश्रं 416
क्षेत्रज्ञचित्तप्राणैस्तु 223

खादन्मांसं पिबन्मद्यं 421
ख्यातिलाभादिसिध्यर्थं 391

गङ्गास्नानरतो वाऽपि 392
गतेऽथ द्वादशे वर्षे 390
गन्धः क्षितावसुरभिः 131, 199
गन्धस्तु विषयः प्रोक्तो 323
गमागमादिव्यापारो 131, 199
गया चैव कुरुक्षेत्रं 324
गवां शतसहस्रस्य 417
गाधिसूनुं महात्मानं 409
गुण एको यदुद्युक्तो 315
गुणतत्त्वात्परा बुद्धिः 185
गुणतत्त्वोर्ध्वभोग्यस्य 349
गुणा एव समावस्थां 127, 182
गुणाद्यवनिपर्यन्तं 182
गुणानां तस्य माहात्म्यं 422
गुणी चाकाशमित्युक्तं 131, 199
गुणेषु येऽप्यनेकान्तस्यात् 80
गुरुं तमेव वृणुयात् 301
गुरोरनिष्ठाचरणं 302
गुरोश्चावमतिं कृत्वा 302
गुह्यातिगुह्याय पदं 326
गुह्याद्गुह्यतमं सूक्ष्मं 76
गृहस्थानाञ्च सर्वेषां 403
गृहस्थो देशिकश्श्रेष्ठो 298
गृहस्थोऽपि वनस्थस्य 296
गोत्रर्षयश्च सर्वेषां 419
गोपीचन्दनधारी तु 380, 414
गोपीचन्दनलिप्ताङ्गो 379, 413
गोपीचन्दनसंयुक्तं 380, 414
गोमेदे गोपतिर्नाम 316
गोमेधे चाश्वमेधे च 417
गोहत्येयं मुनिश्रेष्ठ 390
गौर्हता गौतमेनेति 60
ग्राह्यं करणसापेक्षं 172

घटास्संजायमानोऽयं 40
घातयन्ति हि राजानो 358

चक्रवाटेति तामाहुः 310
चक्राङ्किततनुं दृष्ट्वा 392
चक्राङ्किततनुर्यत्र 392
चक्राङ्कितस्य विप्रस्य 376
चक्राद्यैरङ्कयेत्गात्रं 410
चक्षुराद्युक्तविषयं 55
चक्षुरुन्मील्य यत्तत्वं 306
चण्डालवाटिकायां वा 384
चतस्रो वृत्तयस्तस्य 160
चतुर्दशसहस्राणि 312
चतुर्धा निष्कळं ह्येवं 124
चतुर्धानि पदञ्चान्यत् 325
चतुर्वक्त्रस्स्वयं ब्रह्मा 416

चतुष्षष्टिः पित्तरोगाः 406
चतुस्त्रिद्व्यङ्गुलैः पुण्ड्रं 413
चन्द्रबिम्बद्युतिर्नीलाब्ज 314
चन्द्रभद्राकरौ द्वीपौ 314
चाक्षुषी स्पार्शनी दीक्षा 306
चितिरेवं मताऽम्लान 152
चिदात्मैव हि देवोऽन्त 138
चिदृशाऽऽत्मनि दृष्ट्वेशं 331
चिद्विवर्तस्तथाऽसत्यो 149
चिन्महोदधिगाम्भीर्यं 250
चेतनश्चेन्न भोग्यत्वात् 204
चेतनाचेतनास्सर्वे 266

छगलण्डाद्यहंकारे 324
छगलण्डो द्विरण्डश्च 324
छित्वा भित्वा च भूतानि 133

जगाम पार्थिवो लोकम् 65
जङ्गमन्तु गुरुर्लिङ्गं 372
जटिलैर्वेदबाह्यैस्तैः 63
जटी मुण्डी शिखी वाऽपि 63
जडेनैवाजडं तस्मात् 233
जनकं धारकं भोग्यं 158
जननी मोहिनी माया 166
जनोऽष्टकोट्यवच्छिन्नः 318
जन्तोरपश्चिमतनोः 288
जन्मना लब्धजातिस्तु 391, 413
जन्मनोऽस्य दुरन्तस्य 84
जन्ममृत्युभयाक्रान्तः 386
जपध्यानविहीनोपि 420
जपमालालक्षणं तत् 415
जपस्तु पुत्रजीवेन 420
जपाकुसुमलौहित्यं 69
जपात्तु लभते पुण्यं 420
जम्बूद्वीपं क्षितेर्नाभिः 310
जम्बूफलरसोद्भूता 313
जलस्नानं पुरा कृत्वा 407
जलेन मिश्रितं भस्म 378
जाग्रन्नेत्रस्थितं विद्यात् 222
जाबालोपनिषत्साध्वी 381, 418
जायते तच्छिवज्ञानं 270
जायतेऽध्वायतश्शुद्धो 124, 160
जायन्ते मानुषे लोके 58
जाह्नवीतीरसम्भूतां 379, 412
जिघ्रन्नपि तथा चाश्नन् 418
जिह्वा घ्राणं च पञ्चेति 193
ज्ञत्वकर्तृत्वयोर्व्यक्तिं 263
ज्ञात्वा भवस्य सद्भावं 339
ज्ञानं तदक्षयोगात् 129
ज्ञानं तदक्षयोगात्तत् 187
ज्ञानं प्रधानं न तु 271
ज्ञानं लब्ध्वाऽचिरादेव 274
ज्ञानं विना प्रयागेऽस्मिन् 257
ज्ञानक्रियाख्य शक्त्योः 165
ज्ञानचर्यान्वितो बुद्धो 79
ज्ञानमूर्तिस्सविग्रहः 301
ज्ञानमेव महाविष्णो 270, 274
ज्ञानयोगः प्रधानत्वात् 275
ज्ञानविद्धस्तथा देही 295
ज्ञानाग्निस्सर्वकर्माणि 283, 333, 344
ज्ञानोत्पत्तिनिमित्तन्तु 258, 281, 366
ज्येष्ठसाम्नां त्रयेणैव 114
ज्योतिर्गणा नामाकाश 163
ज्योतीरूपाय संज्ञञ्च 326
ज्वररक्षः पिशाचाश्च 405
ज्वलनो दहनो बभ्रुः 322
ज्वलल्ललाटदृग्दग्धः 311

ञकारादिघकारान्ता 326

तं दृष्ट्वा यमराजोऽपि 85
तं प्रत्यैवैश्वरीशक्तिः 289
तच्चैतन्यमिति प्रोक्तं 205
तच्छयानललाटाग्रन्य 407
तच्छरीरं त्रिधा ज्ञेयं 123
तच्छ्रुत्वा समुनिश्श्रीमान् 60
तत आदाय तत्भस्म 395
ततः कदाचिन्महती 390
ततः पुटास्त्रयस्त्रिंशत् 308
ततः प्रकृतिभोक्तृत्वे 347

ततः प्रक्षाळ्य हस्तादीन् 395
ततः प्राधानिकं तत्त्वं 182
ततश्चतस्रष्षट्चेति 318
ततश्शर्वपदञ्चोक्तं 325
ततस्ते धर्मराट् प्रेष्या 407
ततस्त्रिद्रव्यजा सा 194
ततस्स भगवान् विष्णुः 58
ततस्सत्यधियस्थानं 318
ततस्सर्वे मुनिवराः 390
ततस्सृष्टिं प्रकुरुते 162
ततो नियतिसापेक्ष 178
ततो नियतिसापेक्षमस्तु 127
ततो बुध्याद्युपादानं 128, 182
ततो मायामयीं सृष्ट्वा 390
ततो मायी हरिर्ब्रह्मन् 66
ततो विद्याकलातत्त्व 172
ततो विश्वमयो विष्णुः 66
ततो हिरण्मयी भूमिः 317
ततोऽगच्छत्सुपर्णाक्षं 114
ततोऽन्वपश्यत् गिरीशस्य 115
तत्तत्कल्पान्तवृत्तान्तं 119
तत्तूलवस्त्रतन्तूनां रौम्णां 384
तत्त्रिपुण्ड्रं भवेच्छस्तं 395
तत्त्वहीनो महादुःखं 339
तत्त्वादीनामतो बिन्दोः 166
तत्त्वानि कथितान्येवं 324
तत्त्वान्तरोक्तवृत्तिभ्यो 129, 187
तत्त्वे चित्तं समास्थाय 306
तत्पार्थिवं भवेत् स्नानं 410
तत्पार्श्वे बाहुमध्ये 413
तत्पुण्यं लभते सर्वं 421
तत्प्रयाति सुवर्णत्वं 295
तत्प्रलीनाणुसंघस्य 307
तत्प्रसादात्क्रमान् 73
तत्र ग्राहकनिष्ठोऽयं 175
तत्र दिव्यैर्महाभागै 372
तत्र सा वैखरी श्रोत्र 160
तत्राश्रुबिन्दवो जाता 415
तत्रैव कारणं तेषां 80
तत्रैव ये प्रपञ्चान्ये 79
तत्रैव स्वतस्सिद्धात्मभूता 334
तत्संपर्काच्छिवज्ञानं 373
तत्संस्पर्शसुखैकाग्र 154
तत्सुखं परमं प्रोक्तं 363
तथा दर्शितदर्शित्वे 348
तथा शिवस्त्रिपुण्ड्राङ्क 399
तथा शुभाशुभं कर्म 343
तथा श्रौतेषु सर्वेषु 403
तथा समासमात्मिय 267
तथाऽपि भक्तवात्सल्यात् 58
तथाऽपि मानवा मुर्खा 399
तथाऽपि वेदो मार्गाणां 72
तथाहि तां समाश्रित्य 152
तथाहि मायाया तेषां 162
तथाहि विमलोदार 154
तथैव चक्रुः पापिष्ठं 85
तथैव प्रकृतीस्तेषां 166
तदनुग्राहकं तत्त्वं 126, 171
तदन्ते विष्णुभवने 372
तदन्ते सर्वलोकेषु 384
तदभिव्यक्तचिच्छक्तिः 126, 174
तदर्थं क्षोभयित्वेशः 126, 171
तदर्धेनार्धविष्कम्भौ 312
तदा पार्श्वस्थितं विष्णुं 58
तदा प्रभृति ब्रह्माद्या 400
तदाधाराणि कार्याणि 169
तदानीमेव गणपाना 407
तदीशभागे तस्याद्रेः 312
तदूनकोटिस्स्वर्लोक 318
तदूर्ध्वं त्रिंशत्सहस्र 308
तदेकं सर्वभूतानाम् 37
तदेकमशिवं बीजं 167
तदैव गात्रं कुर्वीत 410
तद्देशं तु परित्यज्य 65
तद्विनाशे प्रवृत्ते यत् 127
तद्विनाशे प्रवृत्तेयं 179
तद्व्यक्तिर्जननं नाम 169
तन्त्रावलम्बनेनैव 379, 411
तन्त्वादिकारकादीनां 169

तन्न प्रमातृमेयादि 89
तन्नामतोऽधिपतित 309
तन्निपाताच्च तस्येत्थं 293
तन्निवृत्तौ स्वयं शुद्ध 266
तन्मनः कथ्यते तन्त्रे 130, 189
तन्मात्रण्यपि कथ्यन्ते 195
तन्मात्रपञ्चकाज्जातं 132, 200
तन्मात्रेष्वाप्यमाहुर्ये 80
तपोर्ककोटिर्यत्रास्ते 318
तप्तमुद्रात्वन्त्यजाय 375, 392, 411
तमः परस्तान्निबिडं 317
तमपृच्छंस्ततो देवाः 106
तमश्शक्त्यधिकारस्य 358
तमेव वाणीं सूक्ष्माख्यं 161
तयोः प्रसरतोस्साम्ये 165
तयोर्व्यक्तिं प्रकुर्वन्ति 263
तर्कैरेते हि मार्गास्तु 33, 71
तर्हि तन्त्राप्रामाणत्वं 72
तस्माच्चैव सहस्रांशात् 124
तस्माज्जीवस्स्वतस्साक्षात् 359
तस्मात् ब्राह्मात्मविज्ञानं 368
तस्मात्त्वं पाञ्चरात्रोक्त 66
तस्मात्सर्वेषु लोकेषु 401
तस्मात्सुदुर्लभं नृणां 403
तस्मात्स्थूलोऽहमित्यादिः 204
तस्मादतिथिमायान्तं 385
तस्मादनेन रागेण 175
तस्मादाकाशमेष्टव्यं 131, 199
तस्मादात्मा सदावेद्यः 360
तस्मादुक्तेन मार्गेण 78
तस्मादेतच्छिवस्नानं 400, 405
तस्मादेनं तु पापिष्ठं 67
तस्माद्दशैकभागेन 124
तस्माद्वै वेदबाह्यानां 58, 282
तस्मान्न बध्यते नापि 348
तस्मान्न विष्णुनामापि 64
तस्मान्मार्गान्तराणान्तु 77
तस्मिन्नभ्यधिकां प्रीतिं 114
तस्मै प्रथमपुत्राय 70
तस्य देहादयोऽप्येव 29
तस्य पुत्रास्समुत्पन्नाः 386
तस्य प्रदेशवर्तित्वात् 158
तस्य मध्ये स्थितश्शैल 310
तस्य वेदविदां श्रेष्ठां 286
तस्य शक्तिं समाहृत्य 117
तस्य शिष्यस्य विप्रेन्द्राः 288
तस्य श्रृङ्गेषु तीक्ष्णांशोः 317
तस्य सानुषु हैमेषु 312
तस्य स्वभावतो ज्वालाः 308
तस्या एव यदीष्येत 177
तस्यां पतितमात्रायां 266-67, 293, 303
तस्यामुपासते देवा 312
तस्यैव ब्रह्मविज्ञानं 403
तस्यैव वामपार्श्वे तु 124
तस्यैव सर्वभोग्यानि 417
तस्योक्तिः पौरुषैस्स्थूलैः 283
तस्योपरिन्यसेत्साङ्गं 418
तां पीत्वा पक्षिसर्पाख्य 313
तालवृन्तातपत्रं वा यो 385
ताळवृन्तप्रदानञ्च 386
तावत्कालञ्च कर्तव्यं 260
तावद्युगसहस्राणि 422
तासां माहेश्वरीशक्तिः 363
तिथिलक्षो भुवर्लोको 318
तिर्यक् त्रिपुण्ड्रं सन्त्यज्य 391
तिर्यक् पुण्ड्रं परित्यज्य 391
तुर्यातीतं वस्तिपद्मे 222
तुर्यावस्थेति शान्तिस्थं 327
ते यान्ति नरकं घोरं 368, 394
ते स्थिता मुक्तिभेदोऽयं 79
तेजस्तेजः पदं प्रोक्तं 325
तेन ते मुदितास्सर्वे 390
तेन निवृत्तप्रसवामर्थ 348
तेन प्रकाशरूपेण 126, 171
तेन प्रदीपकल्पेन 38, 126, 171
तेन स्वभावसिद्धेन 29
तेनाधीतं श्रुतं तेन 399
तेनैकेन तु तद्व्याप्तं 123
तेभ्यो जटिलदुष्टेभ्यः 64
तेभ्यो दशगुणश्रीकान् 320

तेषां कलादियोगेऽपि 292
तेषां तु व्यतिरेकेण 89
तेषां पापानि नश्यन्ति 115
तेषां वंशप्रसूताश्च 419
तेषामेवोपभेदांश्च 33, 71
तेषु रुद्रो वरिष्ठश्च 115
तैजसादप्यहंकार 190
तैजसादप्यहंकारान्मनो 130
तैजसो वैकृतो योऽन्यो 129
तैलाभ्यङ्गं तथा पूजां 386
त्यक्त्वा व्रतं तथा दानं 65
त्यक्त्वा स्वगुणिनं यान्ति 355
त्यक्त्वाऽऽप्तगम्यविषयं 164
त्यक्त्वैकमेकं संप्राप्य 307
त्यजन्ति वेदं वेदोक्तं 62, 388
त्यजन्ति सकलं कर्म 62, 388
त्रयस्त्रिंशत्सहस्राणि 309
त्रयोगुणास्तथाऽप्येकं 128, 182
त्रयोदशद्वादश वा 409
त्रयोदशसहस्रायुः 314
त्रयोविंशतितत्त्वानि 324
त्रयोविंशतिराम्नाताः 324
त्रिंशदब्दसहस्रायुः 314
त्रिधा सोऽयमनुग्राह्यः 289
त्रिपुण्ड्रं धारयेत्भक्त्या 377, 393
त्रिपुण्ड्रं धारयेद्यस्तु 397
त्रिपुण्ड्रं धारयेन्नित्यं 376, 393
त्रिपुण्ड्रं परमं पुण्यं 396
त्रिपुण्ड्रं यद्यधृत्वा तु 397
त्रिपुण्ड्रकं सदा कुर्यान् 377, 395-96
त्रिपुण्ड्रधारणं तिर्यक् 403
त्रिपुण्ड्रधारणं मुक्त्वा 402
त्रिपुण्ड्रधारिणं दृष्ट्वा 396
त्रिपुण्ड्रधारिणः पादौ 399
त्रिपुण्ड्रधारिणे भिक्षा 399
त्रिपुण्ड्रधृत् विप्रवरो 397
त्रिपुण्ड्राङ्कितफालोऽसौ 400
त्रिपुण्ड्रेण विना विप्रो 399
त्रिपुण्ड्रोद्धूळनादौ च 374, 387-88
त्रिपुण्ड्रोद्धूळने श्रद्धा 387
त्रिपुरस्य वधार्थाय 415
त्रिविष्कम्भसमायुक्तं 385
त्रिवृत्सूत्रेण सम्प्रोक्ष्य 418
त्रिशूलाभं हरिपदा 411
त्रिशूले चतुरश्रे वा 374, 389
त्रिषु पादान्तरेष्वस्य 310
त्रिसन्ध्यं भस्मना स्नानं 378, 408
त्रिसप्तकुलमुधृत्य 417
त्रुट्यादिप्रत्ययस्यार्थः 126, 176
त्वगिन्द्रियमयुक्तार्थ 194
त्वदीये पाञ्चरात्रे च 389
त्वद्भक्ता ब्राह्मणास्साक्षात् 374, 389
त्वद्भक्ता विमुखा नित्यं 62-63

दग्धाङ्गश्चायुधैः 392
दग्धाङ्गा लिखिताङ्गाश्च 392
दधीचस्य मुनेश्शापात् 389
दधीचिमन्दिरं प्राप्य 406
दधीचेश्च मुनेश्शापात् 374
दर्शयामास पार्थाय 114
दर्शयित्वा तथा क्षुद्रं 78
दशवक्त्रस्तु देवेशः 416
दाने च तस्य किं कार्यं 334
दाह्याभिभाव्यधर्माणः 253
दिव्यवर्षसहस्रन्तु 415
दीक्षा कार्या हि सर्वेषां 281
दीक्षा कार्याहि सर्वेषां 74
दीक्षायां सर्वमर्त्यानां 295
दीक्षितस्य च धीरस्य 305
दीक्षिताश्च द्विजा नित्यं 62
दीक्षैव मोचयत्यूर्ध्वं 257
दीक्षैव मोचिनी शैवी 63
दीयते ज्ञानसद्भावः 269
दुःखाभावोऽपि नावेद्यः 350
दुर्वाससो मुनेश्शापात् 374, 389
दुश्शीलश्शीलयुक्तो वा 401
दुष्टचित्तस्त्रियं वाऽथ 416
दुष्पूरोऽयमतो हेतोः 267
दृशो दर्शयिते वात्मा 365
दृष्टं कारणपूर्वत्वं तत्तु 182

दृष्टं कारणपूर्वत्वं 127
दृष्टा मयेत्युपेक्षेतैको 348
दृष्टो रुद्रेण देवेशः 107
देव प्रवर्तकं शीघ्रचारि 129, 187
देवताराधनाकारान् 74
देवदेवजगन्नाथ 21
देवदेवस्त्वचिन्त्यात्मा 114
देवदेवौ महादेवौ 58
देवद्युतिरधीयानः 84
देवप्रवर्तकं शीघ्र 187
देवभक्ति तदास्तिक्ये 60
देवानां प्रथमं देवं 107
देवानाञ्च मनुष्याणां 391
देवार्चनादिचर्याभिः 275
देशादिना स सिद्धोऽध्वा 162
देहपातस्तथा कंपः 303
देहाकारेण चौकत्वे 118
देहे सत्यपि चैतन्यं 205
दैत्यक्षसुराहीश 310
द्वादशैतानि नामानि 413
द्वावेवाश्रमिणौ शैवे 298-99
द्विजस्संतप्तशङ्खादि 392
द्विजानामपि च श्रौतज्ञान 287
द्विधा सा सन्निधावेका 123
द्विवक्त्रो देवदेवस्स्यात् 416
द्विविधं तत्समाख्यातं 383
द्वीपकेतुरभूज्जम्बूः 313
द्वयौर्मूर्धानो विभोस्तस्य 114

धन्यानि तानि नगराणि 383
धर्ममात्रे तु संशुद्धे 307
धर्मशास्त्रे पुराणे च 286
धर्माधर्मात्मकं कर्म 225, 306
धर्मेऽधर्मे शिवे चैव 53
धारणं सर्वदेवानां 406
धारयन्नोपहन्येत 410
धारयेत् ब्राह्मणस्सदा 376, 393
धारयेत्सततं मूर्ध्नि 417
धारयेदूर्ध्वपुण्ड्रांश्च 409
धारयेद्यस्त्रिपुण्ड्राङ्कं 399
धार्यं पञ्चदशस्थाने 406
धिक् भस्मरहितं फालं 406
धिक्धिक् शाण्डिल्य दुर्बुद्धे 66
धृतमेतत् त्रिपुण्ड्रं स्यात् 396
धृतमेतत्त्रिपुण्ड्रं 395-96
धृतरुद्राक्षकण्ठा ये 421
धृतिधैर्यसमायुक्तः 339
धृतोर्ध्वपुण्ड्रतिलक 409
धृत्वाग्निहोत्रजेनैव 395
ध्यानं तपस्त्रिपुण्ड्रस्य 399
ध्यानाहाराय संज्ञं च 326
ध्रुवायेति पदञ्चैव 327
ध्वंसनं सर्वदुःखानां 400

न कर्म स्वफलं पुंसां 180
न कर्मकरणीयं हि 272
न कर्मभोगवैचित्र्ये 290
न किञ्चिदपरस्तस्य 155
न गर्हन्ति प्रजास्तञ्च 65
न गुणानां समावस्था 127
न गुणानां समावस्था 182
न च वर्षति पर्जन्यो 65
न चायं भावनासंज्ञः 162
न जातु देवा वेदा वा 258
न तदस्ति जगत्यस्मिन् 182
न तदस्ति पृथिव्यां वा 110
न तस्य ब्रह्मविज्ञानं 403, 419
न तीर्थयात्रया पुण्यं 399
न तेषां तत्पदं शान्तं 258, 276
न तेषामसितो मार्गः 166
न दानं मन्यते दातुं 64
न दानैर्न तपोयज्ञैः 272
न दाहयेत् द्विजश्रेष्ठं 375, 391
न देवैर्ब्रह्मणो वाक्यं 58
न ध्यानं न तपः पूजा 272
न पश्यन्नशनं तोयम् 84
न पुंभिरार्षकं वाक्यं 80, 283
न पुंसां मोचने शक्तिः 263
न प्राप्तमपि कर्मादि 194
न बुद्धेः परिणामोऽयं 162

न भस्मसदृशं पुण्यं 63
न मे प्रियश्चतुर्वेदी 384
न लिङ्गं नाश्रमाचारः 272
न विभूतिर्यस्य फाले 421
न वेदबाह्ये पुरुषे 58, 82
न शैवं वैष्णवेनापि 80, 283
न सोऽस्ति प्रत्ययो लोके 97
न स्वर्गो नापवर्गो वा 72
न हि कल्याणकृत् कश्चित् 335
न हृष्यत्युपकारेण 267
नचैवाधिभयं तस्य 417
नदी पुष्करिणी नाम 316
ननु न स्यात्कुतो मानं 34, 88
ननु प्रमेयसंसिद्धौ 89
नमितस्सर्वदेवैश्च 410
नरकं कालसूत्रञ्च 66
नववक्त्रो भैरवस्तं 416
नवाङ्गुलं मध्यमं 412
नवाब्धिस्रोतसि द्वीपाः 315
नश्यन्ति मुनिशार्दूल 403
नश्यन्ति सकलाः क्लेशा 409
नाकाले जायते कश्चिन् 40
नाकाशाज्जायते वायुः 132, 200
नाङ्कनं विग्रहे कुर्यात् 375, 391
नाङ्कनाय दहेद्देहे 375, 392
नाङ्कयेन्न दहेत्गात्रं 376
नाचिच्चित्सन्निधौ किन्तु 255
नातः परतरं स्तोत्रं 421
नात्मनो बोधरूपस्य 297
नाध्यक्षं नापि तल्लैङ्गं 248, 251
नाध्यक्षन्नापि तल्लैङ्गं 247
नानारत्नप्रभाजाल 310
नानाविधेषु दानेषु 60
नानैकान्तिकता हेतोः 28
नान्यश्शरणदः कश्चित् 258, 270
नाप्ययस्कान्तदृष्टान्तः 28
नाप्येतदन्यथाज्ञानं 224
नाप्येवं सुप्रतीतत्वात् 206
नाभक्त्या धारयेदक्षं 381
नाभीषेकविधौ योग्या 300
नाभुक्तं क्षीयते कर्म 264
नाम्न्युच्चार्य विधिना 413
नारदश्शङ्करायै 406
नारायणं भजन्ते ये 64
नार्हन्त्यनभिषिक्तास्ते 298
नाव्यापको न क्षणिको 207
नासतः क्रियते व्यक्तिः 169
निर्ऋतिर्मारणो हन्ता 319
नित्यं तथा सर्वगतं 141
नित्यं दानपरो राजा 63
नित्यं द्विजोऽप्रमादेन 396
नित्यकर्माद्यनुष्ठाने 60
नित्यत्वगमका एते 415
नित्यत्वेनागमानां 81
नित्यशब्दश्चाकृते तु 415
नित्यसत्वाभवन्त्यन्ये 39
नित्यस्नायि शिखाच्छेदि 275
नित्यान्नित्योऽहमनघो 106
नित्यैका व्यापिनी वस्तु 167
नित्यैषाऽशेषकार्याणां 152
निधाय दक्षिणे हस्ते 306
निधाय पीड्य पादैस्तं 67
निधीशो रूपवान् धन्यः 322
निन्दनाद्द्विजसाधूनां 355
निन्दा स्मृतिपुराणेषु 82
निमित्तमीश्वराख्यं 138
नियतार्थतयाऽक्षाणि 194
नियमोऽपि न तस्यास्ति 272
नियोज्यत्वाच्छरीरादि 162
निरयान्निरयं याति 65
निरावरणनिर्द्वन्द्व 151–52
निर्दयो निष्ठुरः क्रूरः 65
निर्दुःखो निर्मलस्साक्षात् 403
निर्ममः करुणोपेतः 262
निर्मितं हि मया पूर्वं 83, 284
निर्मूलोऽपि स्वबुद्धैव 73
निर्विकल्पमचिन्त्यञ्च 250
निर्विकल्पे परे तत्त्वे 116
निवर्तयति भूतानि 164

निवर्त्यत्वेनात्मधर्मः 264
निवारयामास स तान् 390
निवार्यमाणस्स्फोटोऽयं 235
निवृत्तस्य गतिर्भूयो 164
निवृत्तिजानुज 152
निवृत्तौ पार्थिवं तत्त्वं 321
निषधाद्धरिवर्षं 313
निषधो हेमकूटश्च 312
निष्कळन्तु चुतुर्भेदं 123
निष्पादने कलादीनां 162
निस्तत्त्वे निष्कळीभूते 363
नीलनीरजरम्यस्य 315
नृपायां ब्राह्मणाज्जातः 287
नेतितो ममतोद्रेकात् 203
नैव प्रमदितव्यं 404
नैव सन्ति विना शैवं 59, 63
नैष्ठिको नैष्ठिकांश्चैव 296
नोचेत्तदवकाशाख्यं 131, 199
न्यग्भवति कर्तृशक्तिः 166
न्यग्भवति यत्र शक्तिः 166

पक्वपाशेषु सुव्यक्ता 292
पञ्चकं पुरुषादौ तु 326
पञ्चकृत्यानि कुर्वन्ति 154
पञ्चबुद्धीन्द्रियाण्यासन् 324
पञ्चमन्त्रतनुः श्रीमान् 80
पञ्चमी तु परा कला 327
पञ्चविंशतिभिश्चाक्षैः 418
पञ्चविपर्ययभेदा भवन्ति 128
पञ्चाक्षरजपं भस्म 401
पञ्चान्तकैकवीरौ च 320, 326
पतयस्सप्तसंख्याताः 309
पदानि विंशतिर्मन्त्रौ 325
पदान्येकादशा त्रासन् 327
पन्नगाश्च प्रशाम्यन्ति 416
परतत्त्वं विजानाति 297
परतश्च न दोषोस्ति 69
परदारान् समागम्य 66
परमास्त्रञ्च शैवानां 401
परमेकान्तिनोप्येवं 411
परमेशोपमा राग 321
परव्योम्नि शिखान्तस्थो 136
परस्परविरुद्धत्वे 72
परस्परविरोधेन 79, 267
परांश्च सुबहून्लेभे 114
परानन्दमरूपन्तु 270, 331
परिगृह्य पुनर्विष्णुं 66
परिणामी पुमान् भोग्यः 252
परिपाको मलस्यैव 288
परोपकारनिरतो 300
पर्यवस्यन्ति विप्रेन्द्रा 118
पर्वताग्रे नदीतीरे 412
पलाशपद्मपत्रैर्वा यः 384
पशवोपि हि रुद्राक्ष 419
पश्चान्माल्यवतः प्राच्यां 313
पश्यामीति दृशा लोके 96
पश्वात्मा मोच्यमानत्वात् 357
पाञ्चरात्रं प्रशंसन्ति 59
पाञ्चरात्रादि मार्गाणां 58, 77
पाञ्चरात्रे च कापाले 31, 61-62, 388
पादौ पाणी च वाङ् नासा 324
पापवह्निपरिदग्ध 387
पापानां फलमाश्चर्यं 85
पापानामपि बाहुल्यात् 62, 388
पापिष्ठानां मनुष्याणां 387, 419
पार्श्वयोर्धारणाद्राम 406
पाशागम्यो महेशान 253
पाशाभावे पारतन्त्र्यं 223
पाषण्डेषु तथाऽन्येषु 61
पाषाणशतसाहस्रं 274
पाषाणश्शिवसंस्कारात् 295
पाहि मां पापिनं घोरं 410
पीड्यान्धकूपे निक्षिप्य 67
पीतैषा चतुरश्रा च 322
पुण्ड्रान्तरं भ्रमाद्वापि 380
पुण्ड्रान्तरनिषेधो यो 414
पुण्ड्रान्तरनिषेधो 380
पुण्ड्रान्तरे रता नित्यं 62
पुनश्चायमतिक्रुद्धो 67
पुनश्चैवान्धतामिस्रे 65

पुनातिसाधिकारेण 266
पुरा दारुवने पुण्ये 390
पुरा मैनाकमाश्रित्य 115
पुरा विष्णुर्जगन्नाथः 116
पुरा विष्ण्वादयो देवा 112
पुरा शाण्डिल्यसंज्ञस्तु 32, 66
पुराणं बाध्यते वेदैः 81
पुराणं सर्वशास्त्राणां 109
पुराणि नवविद्यायां 327
पुराणी बैन्दवानीह 328
पुरुषाणां यथा विष्णुः 421
पुरोधसं पुरस्कृत्य 63
पूज्यते सततं देवैः 417
पूर् संज्ञे तु शरीरेऽस्मिन् 113
पूर्वापरत्वतो युक्तं 252
पृच्छकानां वशेनैव 362
पृथ्वी पीताक्षवर्णञ्च 322
पृष्टोऽहं तन्त्रमन्त्राणि 362
पैशाचं राक्षसं याक्षं 324
प्रकृतेस्तु प्रहाणार्थं 404
प्रक्षाल्य गन्धतोयेन 418
प्रचण्डोमापतिश्चाजो 326
प्रजापतीन्द्रगन्धर्व 372
प्रणम्योपान्तिके तस्थौ 409
प्रणवेन तथा व्यूहैष्ट् 409
प्रणिपत्य महादेवं 113
प्रतिभासो निवर्तेत 334
प्रतिष्ठायान्तु चत्वारि 323
प्रत्यक्षं त्रिविधं प्रोक्तं 97
प्रत्यक्षं त्रिविधं प्रोक्तम् 35, 97
प्रत्यक्षत्वेऽस्मदादीनां 196
प्रत्यक्षमनुमानञ्च 96
प्रत्यक्षविषयत्वेन 130
प्रत्यक्षेणानुमानेन 101
प्रत्ययो योऽहमात्माऽत्र 186
प्रथमं स्फोटकृद्वह्निः 235
प्रथमाष्षडदेवतानां 323
प्रपञ्चस्य प्रतीतत्वात् 334
प्रभावश्श्रूयतां राजन् 63
प्रमाणमेकं तद्वाक्यं 95
प्रयोक्तृणामियं प्रायः 160
प्रयोक्त्र्यादिमहीप्रान्तं 132, 200
प्रयोजनमनुद्दिश्य 159
प्रळये लीनदेहस्य 125, 167
प्रवर्तमानो देहादिः 204
प्रविष्टोऽथ महाभीमं 66
प्रवृत्तिञ्च निवृत्तिञ्च 110
प्रसादादेव रुद्रस्य 33, 71
प्राकृतत्वाविशेषेण 89
प्राग्वन्निरुद्धदृक्छक्तिः 289
प्राङ्मुखश्चरणौ तावत् 395
प्राच्यां विष्कम्भशैलस्य 313
प्राच्यादिषु दशस्वेक 321
प्राजापत्यागमप्रोक्त 74
प्राणापानसमानादि 132, 200
प्राणोऽपानस्समान 223
प्रातः काले च मध्याह्ने 406
प्राप्तये परिहाराय 67
प्राप्नोति परमं ब्रह्म 397
प्राप्याणि तानि सर्वैस्तु 290
प्रामाण्यं सर्वमार्गणां 72
प्रारब्धं भोगतो नश्येत् 264, 333, 344
प्रारब्धकर्मणां भोगात् 283
प्रियं वै चाष्टमूर्तीनां 408
प्रीत्यप्रीतिविषादात्मकाः 183
प्रेतावासरता नित्यं 275
प्लक्षप्रस्रवणारण्यं 84

बद्ध्वा पाशेन शाण्डिल्यं 67
बलविकरणी चैव 327
बहिः कर्मरता यद्वत् 275
बहुगुणमल्पदोषं 302
बहुनाऽत्र किमुक्तेन 378
बहुनोक्तेन किं भस्म 394
बहुनोक्तेन किं सर्वं 115
बहुनोक्तेन किं साक्षात् 61
बहूनां जन्मनामन्ते 368, 381, 420
बाध्यमूर्ध्वोर्ध्व 58
बाहोर्बाहुकृतं पापं 406
बाह्येन्द्रियपरिच्छेद्य 130

बिन्दुरेव विकल्पाख्यां 162
बीजे अकारलौ नाड्यौ 323
बुद्धागमोदिताद्धर्मात् 74
बुद्धितत्त्वं ततो नाना 184
बुद्धितत्त्वे स्थिता बौद्धा 79
बुद्धिपूर्वं परित्यक्ता 85
बुद्धिबोधप्रकाश्यत्वं 252
बुद्धिवृत्तौ क्षणध्वंसि 80
बुद्धीन्द्रियाणि कथ्यन्ते 130
बुद्धौ मितायान्नेशस्य 252
बुद्ध्यादीनां न चात्मत्वं 206
बुध्यगम्येऽपि सद्वाक्यात् 201
बुध्यन्तैर्निश्चितार्थैः 172
बुध्यादिभोग्यजननी 166
बोधयामास सर्वज्ञः 117
बौद्धधर्मप्रवृत्ताश्च 275
बौद्धे चाप्यार्हते चैव 61
ब्रह्मचारी गृहस्थस्य 296
ब्रह्मणा विष्णुना वाऽपि 399
ब्रह्मराक्षसमुख्याश्च 405
ब्रह्मविष्णुमहेशानां 406
ब्रह्मविष्णुमहेशेषु 63
ब्रह्मा विष्णुश्च रुद्रश्च 118
ब्रह्माऽत्र कारणं मन्त्रः 322
ब्रह्मेशानाच्युतेशाय 114
ब्राह्मणः क्षत्रियो वैश्यः 378
ब्राह्मणस्य तनुर्ज्ञेया 392
ब्राह्मणाः क्षत्रिया वैश्याः 294
ब्राह्मणाः क्षत्रियावैश्याः 62, 388
ब्राह्मणानामयं धर्मो 394
ब्राह्मणाब्राह्मणस्त्रीभिः 286
ब्राह्मणेनादिभूतेन 402
ब्राह्मणैः क्षत्रियैर्वैश्यैः 398
ब्राह्मणैश्च पुनस्सर्वैः 60, 390
ब्राह्मणो यस्सितेनैव 402
ब्राह्मणो वाऽपि चण्डालः 383
ब्राह्मणो विधिनोत्पन्नं 376-77, 393
ब्राह्ममेव कृते चाद्ये 109
ब्रूयाद्यदि समं शम्भुं 115
भक्तिरष्टविधा ह्येषा 384
भक्तिश्च शिवभक्तेषु 266, 303
भगवन् शिवभक्तस्य 385
भगवन् श्रोतुमिच्छामः 274
भगवानिति शब्दोऽयं 113
भगवान्कस्सुरैस्सर्वैः 116
भद्रकाळ्याश्च भुवने 321
भद्राश्वं माल्यवत्प्राच्यां 313
भयं दुर्बलचित्तानां 286
भवत श्रद्धया सार्द्धं 61
भवतानुन्मुखा यूयं 60
भवन्ति सर्वकर्माणि 85
भवन्त्यष्टौ सुबीभत्सा 308
भविनां भवखिन्नानां 105
भविष्यथ त्रयी बाह्या 390
भवेयुर्विमुखा नित्यं 62
भस्मं दृष्ट्वा मुने श्रौतं 404
भस्मच्छन्नो द्विजो विद्वान् 401
भस्मधारणमाहात्म्यं 399
भस्मनाच्छन्नसर्वाङ्गं 402
भस्मना नित्ययुक्तस्य 404
भस्मना लिप्तसर्वाङ्गो 401
भस्मना वेदमन्त्रेण 377, 394, 401-02
भस्मना वेदसिद्धेन 377, 393
भस्मना सदृशं ब्रह्मन् 404
भस्मनिष्ठस्य दह्यन्ते 401
भस्मनोद्धूळनं तद्वत् 418
भस्मनोद्धूळनञ्चैव 397-98
भस्मन्येव पपातास्मिन् 406
भस्मरुद्राक्षधारी यः 421
भस्मरुद्राक्षसच्चिह्नः 372
भस्मश्रेयोर्थिभिस्सर्वैः 402
भस्मसञ्छन्नसर्वाङ्गं 404
भस्मसम्पदनुध्यानं 418
भस्मस्नानं कथं देव 408
भस्मस्नानं जलस्नानात् 400
भस्मस्नानं प्रवक्ष्यामि 378, 408
भस्मस्नानात्परं स्नानं 400
भस्मस्नानात्सदा पापैः 406

भस्मस्नानेन नश्यन्ति 405
भावयन्ति यतो बुद्धिं 128
भावा बुद्धिगुणा धर्म 128, 185
भाषान्तरेण कालेन 287
भाषितं लक्षमात्रेण 25
भासनात्भसितं प्रोक्तं 396
भास्वदग्नौ जले शुक्लं 131, 199
भिषक्शास्त्रोपभोगांश्च 300
भुक्त्यर्थञ्च विमुक्त्यर्थं 116
भुङ्क्ते तत्र स्थितो 174
भुज्यमाने तु मानुष्ये 288
भुवनानां शतञ्चाष्ट 323
भुवनेशमहादेव 320
भूतप्रेतपिशाचाद्या 401
भूतवेदसहस्रौ द्वावेक 314
भूतानि चाहं स्थिर 141
भूतेषु येऽपि चैतन्य 80
भूत्या अग्निसमुत्थाया: 404
भूदेवस्तप्तमुद्राञ्च 392
भृगुणी ब्रह्मवेताळी 321
भैरवे मारतन्त्रे च 276
भोक्तुमिच्छा यदैकस्य 132
भोगयोगार्थिभिस्तस्मात्ते 372
भोगसाधनमाक्षिप्य 105
भोगायाभिप्रवृत्तस्य 127, 179
भोग्यविशेषे रागे न हि 175
भोजयित्वा महादु:ख 67
भ्रान्तिविज्ञानसम्पन्ना 61
भ्रूणहत्या सहस्राणि 416

मत्कथाश्रवणे भक्ति: 384
मत्गेहे भवतस्थानं 406
मत्प्रसादान्महासेन 422
मत्स्यकूर्माकृतिं वाऽपि 412
मद्भक्तजनवात्सल्यं 384
मद्यं पीत्वा गुरुदारांश्च 396
मध्यमानामिकाङ्गुष्ठै: 377, 394, 396-97, 405
मध्यमो मध्यमस्यापि 295
मध्यमोत्तमवस्त्राणि 385
मध्ये शिवस्ततश्शक्ति: 334
मन: पूर्वमधस्तत्त्वं 186
मनसीन्द्रियवृत्तौ ये 80
मनीषितानामर्थानां 115
मनुष्याणाञ्च नाम्ना तु 391
मनोहङ्कारबुद्धी च 223
मन्त्राभावविशिष्टोऽग्नि: 235
मन्त्रावजातहृदयौ 321
मन्त्रेशं शुद्धविद्यायां 79
मन्त्रौषधं समाश्रित्य 59
मम शक्तिविलासोऽयं 116
मया विमोहितास्सर्वे 362
मया व्याप्तमिदं सर्वं 359
मल एकोऽवशिष्टस्स्यात् 289
मल: कर्म च माया च 363
मलस्य क्षीयते शक्ति: 267
मलादिपाशविच्छित्ति: 357
मलाद्यसम्भवात् शाक्तं 29
मलैकबन्धसंबद्धो 289
मलोपरुद्धदृक्छक्ति: 289
मलोपरुद्धशक्तित्वात् 290
महाकारुणिको देव: 78
महातलरसांकञ्च 309
महादेवं विजानाति 297
महादेवपदं पश्चा 322
महादेवश्च विष्णुश्च 419
महादेवश्च वेदाश्च 387
महादेवस्य चोत्कर्षे 375
महादेवस्य रूपे च 60
महादेवस्य विज्ञाने 60
महादेवापदाने च 60
महानदीषु शुद्धासु 403
महापदानुगा वीची 308
महापातकयुक्तानां 388
महापातकयुक्तो वा 400
महापापवतां नृणां 62, 116, 388
महाभूतानि जायन्ते 131, 199
महासेन कुशग्रन्थि: 420
महेशमलमायादि 264
महेश्वराद्यरूप्यन्ता: 324

महेश्वरो महानेष 153
महोदया चन्द्रमसः 311
महोद्विकोटिर्यत्रास्ते 318
मातृतः पितृतश्शुद्धाः 299
माधवं हृदि विन्यस्य 413
मानसं विधिमाश्रित्य 306
मायाकर्ममलच्छन्नः 289
मायातत्त्वं जगत्बीजं 167
मायाधिकारिणो रुद्राः 321
मार्गा वेदविरुद्धा ये 72
मार्गाणां ये विरुद्धांशा 78
माहेश्वरपदाविष्टं 383
मुक्त्यै प्राप्य सतस्तेषां 371
मुक्त्वा प्रसादं देवस्य 29
मुक्त्वा योगफलं रम्यं 348
मुच्यते नात्र सन्देहो 417
मुच्यते सर्वपापेभ्यः 417
मुञ्चमुञ्चपदं योग 322
मुनयश्च मनुष्याश्च 33, 71
मुनिनो दण्डधारिण्यो 275
मूर्तास्सावयवा येऽर्थाः 30
मूर्तीनां केशवादीनां 409
मूर्ध्नि देवादिदेवस्य 312
मूलक्षयकारीं प्राहुः 40
मूलप्रकृतिरविकृतिः 181
मृताद्देहात् प्रवर्तेत 28
मृत्योस्संयमिनी तुङ्ग 311
मृद एतास्तु संग्राह्या 412
मृन्मयं वापि रुद्राक्षं 420
मृन्मयालाबुपात्राद्यं 384
मेरुमूर्ध्वमुखं कुर्यात् 418
मोक्षार्थी पुरुषस्तस्मात् 274
मोक्षेषु चाक्षयं सौख्यं 250, 333
मोचकस्तत्क्रियाकृच्च 164
मोहनानि च शास्त्राणि 59
मोहिता मायया शम्भोः 117
म्लेच्छो वाप्यथ चण्डालो 421

यः करोत्यूर्ध्वपुण्ड्रं 408
यः पठेद्विष्णुनामापि 64
यक्षराक्षसगन्धर्व 398
यच्च किञ्चिज्जगत्यस्मिन् 360
यज्ञदानादिकर्माणि 274
यज्ञावाटेऽस्य ता गावो 316
यज्ञो दानं तपो होमः 379, 412
यतस्सर्वाणिभूतानि 109
यतीनामनपेक्ष्यैव 299
यत्तत्र कारणं कालः 40
यत्तत्र हेतुः कर्मेति 155
यत्तत्रापि च सामान्यं 130
यत्नेन तापसैर्विष्णुः 64
यत्र पाशशिखाच्छेदो 304
यत्र रुद्रपदे योगो 304
यत्रान्तकालतीक्ष्णांशु 307
यत्संबन्धेन यो भावो 69
यथा कस्तूरिकामोदः 354
यथा किं पुरुषाद्येषु 317
यथा जलं जले क्षिप्तं 362
यथा मधूच्छिष्टमृदोः 267
यथा मृत्कलशादीनां 162
यथा वह्निर्महादीप्तः 283
यथा विशिष्टे मानुष्ये 403
यथा विश्वाधिको रुद्रः 399
यथा वैश्वानरेणे 117
यथा शिवस्तथा नायं 224
यथा श्मशानगं काष्ठं 393
यथा सर्वपुराणेषु 399
यथाऽनादिर्मलस्तस्य 345
यथाऽन्तरुपचारेण 275
यथाऽन्नं मधुसंयुक्तं 271
यथेहान्तश्चरा राज्ञां 275
यदा यात्युन्मनीभावं 363
यदा सा शङ्करेणोक्ता 70
यदा साऽनादि भूतैव 69
यदाऽन्यत्कर्मसर्वज्ञ 289
यदि क्लेशेन महता 274
यदेवं निष्कळं ज्ञानं 359
यद्यत्कार्यसहस्राणि 401
यद्यत्तु रुद्रसंबन्धि 60
यद्यदश्नाति लोकोऽयं 132, 200

यद्यनागन्तुकं तर्हि 224
यन्नरो भस्मसूपायं 404
यन्मेऽस्ति सुकृतं किञ्चित् 84
यन्मेयं न हि तन्मानं 34
यन्मेयन्नहि तन्मानं 89
यया धर्ममधर्मञ्च 110
यया यादृश्या जड 167
यश्चतुर्वेदविद्विप्रः 71
यश्शरीरेन्द्रियादिभ्यो 297
यश्शिवस्सोऽहमेवेति 259, 276, 331
यस्ताम्रपात्रं सुकृतं 384
यस्तु प्रवर्तकस्सोऽयं 204
यस्तु सन्तप्तशङ्खादि 391
यस्थूलमतिविस्तीर्णं 384
यस्मात्सर्वमिदं ब्रह्म 107
यस्मिन् कल्पे तु यत्प्रोक्तं 110
यस्मिन् देशे वसेन्नित्यं 400
यस्मिन् सुविदिते सर्वं 140
यस्मिन्वर्णे स्थितो दीक्षां 74, 285
यस्य मन्त्रस्य यो मन्त्रः 418
यस्य मुक्तिरभिव्यक्ता 334
यस्य वर्णाश्रमाचारो 297
यस्य श्रवणमात्रेण 140
यस्य स्मरणमात्रेण 70
यस्य स्यात्पितरि द्वेषः 62, 388
यस्य स्यात्भस्मनि द्वेष 388
यस्यानन्दस्य भूतानि 117
यस्यानुभवपर्यन्ता 301
यस्यामुत्क्रममाणस्य 274
यस्संकल्पविकल्पात्मा 187
यस्सङ्कल्पविकल्पात्मा 129
यस्स्नाति भस्मना नित्यं 404
यस्स्नानमाचरेन्नित्यं 378, 400, 405
या चकारारुणानुच्चैः 312
या तत्र कारणं विप्राः 130
या तु कुण्डलिनी शम्भो 136
या सा शक्तिर्जगद्धेतुः 151
यानि कर्माणि सर्वाणि 368
यानि लोके निषिद्धानि 368
याम्याद्या दक्षिणे भागे 323
याम्याद्रिमूले गन्धर्व 313
युगानुरूपप्रज्ञायुः 315
युग्मार्द्रशाल्मलीलोह 308
युष्माकं वंशजातानां 61
युष्माकं वंशजाताश्च 61
ये पुनस्तीर्थयात्राभिः 275
ये भस्मधारिणं दृष्ट्वा 389, 404
येन केन प्रकारेण 73
येन भस्मोक्तमार्गेण 404
येन येन प्रकारेण 385
येन सर्वमिदं व्याप्तं 134, 141
येषां क्रोधो भवेत् ब्रह्मन् 374, 388
येषां क्रोधो भवेत्भस्म 388
येषां भस्मनि विद्वेषो 374, 388
येषां शरीरिणां शक्तिः 266, 293, 303
येषां श्रद्धा मुने नास्ति 374, 389
येषाञ्चिद्धर्मकाद्धेतोः 143
यो न कुर्यात्तु मन्त्रेण 404
यो मां ब्रह्मादिभिस्तुल्यं 115
यो यत्पृच्छति भावेन 362
यो यत्राभिलषेत्भोगान् 290
यो यस्मिन्नाश्रमे तिष्ठन् 75, 285
यो वाऽत्र स्थानशुश्रूषां 372
योऽतीत्य स्वाश्रमान्धर्मान् 297
योऽत्र प्रवर्तकश्शक्तः 28
योऽप्यधस्तात्पुटस्तस्य 309
योऽयं बुद्धिगतो रागः 175
योऽर्चयेद्दैवतं विष्णुं 64
योऽसौ सर्वगतो देवः 359
योऽसौ सर्वेषु शास्त्रेषु 360
योगपट्टपवित्राणि 385
योगी योगेश्वरस्स्वामी 80
योगी सर्वाङ्गकस्नानं 400, 405
योगेन भोगतो वाऽथ 289
योगेन योगदीक्षास्यात् 306

रक्तपीतमणीप्राय 311
रक्षाकरं दुर्ग्रहाणां 409
रजतद्युतिदीप्ताङ्गः 315
रम्यकाख्यमुदङ्नीलात् 313

रसलुब्धो यथा मत्स्यो 339
रहितस्सर्वधर्मेभ्यः 410
रागेण सह संपृक्ता 175
रागोऽस्ति कारणं सक्तेः 224
राजाज्ञामन्तरा यद्वत् 127, 179
रुद्रः परमकारुण्यात् 112
रुद्रस्यानादिसंज्ञस्य 25
रुद्राक्षं द्वादशास्यञ्च 417
रुद्राक्षं धारयेत्पापं 381
रुद्राक्षं धारयेद्यस्तु 420
रुद्राक्षं धारयेद्विप्रः 415
रुद्राक्षं शिरसा ह्येकं 419
रुद्राक्षतरूसम्भूत 381, 419
रुद्राक्षधारको भूत्वा 421
रुद्राक्षधारणं कार्यं 419
रुद्राक्षधारणं साक्षात् 381
रुद्राक्षधारणात्पापं 419
रुद्राक्षधारणादेव 418
रुद्राक्षधारणाद्रुद्रो 418
रुद्राक्षधारणे रुद्र 60
रुद्राक्षमदधाद्देव 422
रुद्राक्षमाला चैवं 418
रुद्राक्षमालिकां कण्ठे 422
रुद्राक्षस्य तु माहात्म्यं 420
रुद्राक्षस्य फलं स्कन्द 420
रुद्राक्षस्य मुखं ब्रह्मा 417
रुद्राक्षार्पितचेता यो 422
रुद्राक्षेणैव वा नित्यं 420
रुद्राक्षोत्पत्तितत्भेद 415
रुद्राग्नेर्यत्परं वीर्यं 405
रुद्राधिक्यमविज्ञाय 389
रोधशक्त्यधिकारस्य 265
रौक्मः किं पुरुषे प्लक्ष 315
रौद्रं लिङ्गं महाविष्णुः 115
रौद्रञ्च भुवनान्यन्तः 322
रौप्यपात्रं सुवर्णं वा 384
रौरवध्वान्तशीतोष्ण 308
रौरवादिषु सर्वेषु 85

लक्ष्म्या सार्धं समासीनो 408
लब्धविद्येन तेनापि 70
लयस्तु प्रकृतेर्बुद्धौ 323
ललाटे चैवदोर्द्वन्द्वे 397
ललाटे भस्म वै यस्य 384
लाकुलं केचिदिच्छन्ति 59
लाञ्छिताश्च न सम्भाष्या 391
लिङ्गदीपार्धचन्द्राभं 380
लिङ्गाङ्कितनुं दृष्ट्वा 392
लोकपूज्यकरं देवि 383
लोकायतं तर्कशास्त्रं 33, 71
लोकालोको बहिस्तस्या 317
लोहपञ्जरविच्छेदात् 351
लोहपञ्जरसम्बद्धं 351
लोहस्तम्बोऽथ विण्मूत्रः 308
लौकिकं वैदिकञ्चेति 159, 291

वक्त्राद्वै ब्रह्मणा जाता 114
वक्ष्यामि परमं गुह्यं 270
वक्ष्ये पूजाविधिं विप्राः 385
वचनादानगमनो 223
वदन्ति केचिद्विद्वांसः 287
वनस्पतिगते सोमे 377, 394, 396
वरिष्ठं सर्वधर्मेभ्यः 404
वरिष्ठो मुनयेस्साक्षात् 116
वर्ज्यमानानतो ज्ञात्वा 300
वर्णं तु शोणवर्णं स्यात् 326
वर्णधर्मतया प्राज्ञाः 377
वर्णस्त्रीष्वनुलोमेन 287
वर्णा विसर्गपूर्वा ये 327
वर्णानामाश्रमाणाञ्च 397
वर्णावर्णविचारो यः 295
वर्तध्वमप्रमादेन 58
वर्तमानादिरूपैस्तु 177
वर्तामि च भविष्यामि 113
वर्तिदीपाकृतिं वापि 412
वर्षायुतायुर्नीलाब्ज 314
वल्कलाम्बरधारिण्यः 275
वसवो नवसाहस्रा 309
वसुधादिस्तत्त्वगणः प्रति 200
वस्तुरूपाः कला ज्ञेयाः 163

वस्त्रापदो रुद्रकोटिः 324
वह्निजार्कजलौहित्यं 69
वह्निनेत्रोद्भवाः कृष्णा 416
वागादीनां पदान्यत्वं 130, 195
वाञ्छामात्रानुगुण्येन 78
वामं पाशुपतं सोमं 83, 284
वामं पाशुपतञ्चैव 33, 76
वामदेवभवानन्त 320
वामदेवो ह्यधिष्ठाता 324
वामा मुख्यपुराण्यष्टा 327
वामादिभुवनानाञ्च 325
वायुरग्निस्तथा तोयं 131, 199
वायोर्गन्धवती तुङ्ग 311
वार्तामात्रमिदं प्रोक्तं 359
वासुदेवं कुमार्गेण 32
विचित्रानन्तरकर्मा 72
विज्ञानकेवलानान्तु 289
विज्ञानदीक्षासंयुक्तो 300
विदधातीह यद्विप्राः 129, 187
विदन्त्यक्षाणि पुंसाऽर्थां 239
विदार्य शक्तिशूलेन 266
विद्याधिपेशस्सर्वज्ञो 322
विद्यायां सप्तपुरुषो 325
विद्याराज्ञ्यस्समाख्याता 321
विद्याव्यक्ताणुचिच्छक्ति 173
विद्युत्पुञ्जनिभो देवः 124
विधिरत्यन्तमप्राप्ते 280
विधिरपि मनुजानां 283
विघ्नास्तस्य प्रशाम्यन्ति 416
विना कृताश्चेत् विफलाः 409
विना तिर्यक् त्रिपुण्ड्राङ्कं 399
विनिवर्तेत निरोधात् 265
विनेज्यानलकर्मादि 306
विभूतिरव्ययश्शास्ता 322
विमुक्तास्तु हि कर्तारो 29
विमुक्ते सर्वथा बन्धे 358
विरुद्धकारणात्कार्यं 204
विरुद्धयोर्यदारम्भः 288
विरोधे गुणवादस्स्यात् 37
विवादाध्यासितं विश्वं 27, 47
विवेकिनो विरक्तस्य 293, 303
विवेको नाम वैधर्म्यं 348
विशुद्धेनात्मतत्त्वेन 253
विशेषवत्वाच्छब्द 196
विश्वं हि क्रियाशक्ति 28
विश्वामित्रः क्षत्रियोऽपि 63
विश्वेश्वरमुमाकान्तं 115
विश्वेश्वरशिवाचार्यं 21
विषयस्तु रसो ज्ञेयः 325
विषयाध्यवसायो यः 186
विषयाभिमुखी बुद्धिः 186
विष्कम्भशैलाश्चत्वारो 313
विष्णवागमोक्ताद्धर्माच्च 74
विष्णुं ब्रह्माणमिन्द्रं वा 368
विष्णुद्वेषश्च लोकेऽबूत् 65
विष्णुप्रद्वेषमात्रेण 84
विष्णुरात्मा भगवतो 108, 113
विष्णुर्दर्शनमात्रेण 64
विष्णुलोकाच्च्युतो ब्राह्मं 372
विष्णो विश्वजगन्नाथ 117
विष्णोस्सकाशादुद्भूतं 109
विष्ण्वागमोक्तमार्गेण 411
विष्ण्वादेश्शिवसाम्ये च 387
वीरभद्रो भद्रकाळी 323
वृकैर्दंष्ट्राकराळैश्च 65
वृक्षानारोप्य वर्तन्ते 65
वृत्तिस्तत्त्वात्मिका चास्य 164
वृषो वृषधरोऽनन्तः 322
वेत्तुमिच्छति यो विद्वान् 366
वेदजमार्गैकनिष्ठस्तु 376
वेदमार्गजनितन्तु 73
वेदमार्गपरिभ्रंशं 62, 388
वेदमार्गपरिभ्रष्टः 83, 282, 285
वेदमार्गैकनिष्ठस्तु 393
वेदवेदान्तनिष्ठानां 402
वेदसिद्धेन मन्त्रेण 62, 388
वेदसिद्धेन मार्गेण 389
वेदसिद्धेषु धर्मेषु 402
वेदांश्च सर्वशास्त्राणि 33, 71
वेदानामपकर्षे च 387

वेदानामप्रमाणत्वं 72
वेदानुवचनेनापि 366
वेदान्ते शङ्करस्साक्षात् 77
वेदान्तैश्च कुळाम्नायैः 250
वेदैश्चतुर्भिर्यत्पुण्यं 421
वेदोऽनादिश्शिवस्तस्य 70
वेदोक्तेनैव मार्गेण 391
वेदोत्कर्षे शिवोत्कर्षे 376, 393
वेदोदितेन मार्गेण 402
वेधसा निर्मिता लोक 311
वेमदिनाऽपनीयाथ 169
वैदिकं तान्त्रिकं हित्वा 369
वैदिकन्तु पुरस्कृत्य 82
वैदिकीन्तु पुरस्कृत्य 285
वैदिकेन विधानेन 65
वैभ्राजं वैपुले मूले 314
वैराग्यं जायते क्षिप्रं 266, 293, 303
वैराग्यं जायते तस्मात् 293
वैश्यस्यापि तथा राज्ञो 297
वैश्याश्चोरुप्रदेशात्तु 114
वैष्णवेषु पुराणेषु 118
वैष्णव्यः प्रतिमास्सर्वाः 65
व्याख्यानादौ च शक्ताः 295
व्याननागौ तथा वायु 326
व्यापिनी परमा शक्तिः 292
व्याप्तिश्च तादृशी ज्ञेया 167
व्याहरन्ति च नामानि 419
व्यूहोऽवकाशदानञ्च 131, 199
व्योमप्रभञ्जनाग्न्यम्बु 131, 199
व्योमिन् व्योमिन् पदं 326
व्रतं पाशुपतं येन 397

शक्तिः प्रथमसंभूता 134
शक्तितत्त्वे तदद्वैत 79
शक्तिपातप्रकारस्य 292
शक्तिपातेन सा युक्ता 371
शक्तिरप्रतिघोदार 152
शक्त्यादि च पृथिव्यन्तं 134
शङ्खं चक्रं मृदा यस्तु 376
शङ्खचक्रगदापद्म 374, 388
शङ्खचक्रगदापद्मैः 375, 391
शङ्खचक्रधरा ये तु 376
शङ्खचक्रादिभिश्चिह्नैः 409
शतकोटिगुणं पुण्यं 420
शतकोटिप्रविस्तीर्ण 318
शब्दः स्पर्शाश्च रूपञ्च 201
शब्दस्य ग्रहणं श्रोत्र 98
शब्दस्स्पर्शश्च रूपं च 196
शब्दाश्चतुर्विधास्तेपि 160
शब्दैकग्रहाकं श्रोत्रं 194
शब्दो गुणोह्यवस्था तु 328
शम्भुर्विभुर्गणाध्यक्षः 323
शरणं त्वां प्रपन्नोऽस्मि 410
शशाप विष्णुं गर्भस्थो 62
शाके शाकद्रुमस्तुङ्गः 316
शाण्डिल्यस्संहिताञ्चक्रे 66
शान्तिदान्त्यादिविज्ञान 60
शान्तोदितप्रपञ्चादि 152
शान्तौ तु त्रीणि तत्त्वानि 326-27
शान्त्यतीतकला मूर्धा 152
शान्त्यतीतकलायान्तु 328
शान्त्यतीता च पञ्चैताः 163
शाम्भवं केचिदिच्छन्ति 59
शाल्मले शाल्मलीवृक्षो 316
शिखा यज्ञोपवीती च 295, 298
शिखायां धारयेद्यो वै 417
शिखोपवीतवत्धार्यं 378
शिरसः पादपर्यन्तं 407
शिरसा धारिते कोटिः 421
शिवं पूर्ववदावाह्य 136
शिवं शक्त्यादिभिस्सार्धं 345
शिवतत्त्वसहस्रांशात् 124
शिवतत्त्वात्मकं तत्र 327
शिवतत्त्वाह्वयं तत्र 165
शिवतुल्यः पूर्वमेव 355
शिवप्रियाश्शिवासक्ताः 400
शिवभक्तस्य पूजेति 386
शिवभक्ताय दान्ताय 421
शिवभक्ताय यो दद्यात् 385
शिवभक्तेन निश्शङ्कं 64

शिवयोगिनमायान्तं 385
शिवशास्त्रसमायुक्ताः 294, 301
शिवसंस्कारसंबन्धात् 295
शिवात्सत्यपरानन्द 134
शिवानुभूतिसंयुक्तः 301
शिवायेति पदं सर्व 326-27
शिवाराधनबुध्या ये 368
शिवार्कशक्तिदीधित्या 253, 333
शिवार्चनात्परं पुण्यं 400
शिवे भस्मनि रुद्राक्षे 374, 389
शिवेन निभृतात्मीय 154
शिवेन विष्णुना चैव 398
शिवेनैक्यङ्गतस्सिद्धः 342
शिवोऽनपेक्षिताचार्यो 303
शिवोऽन्यस्त्वहमप्यन्यः 360
शिष्याणां गुणदोषेषु 300
शिष्यानध्यापयामासुः 59
शीघ्रो लघुर्वायुवेगः 322
शुचिरेव भवेन्नित्यं 413
शुद्धतोयं समादाय 385
शुद्धवत्यम्बुनाथस्य 311
शुद्धशीतलजलेनैव 405
शुद्धशैवमिदं तन्त्रं 305
शुद्धाध्वनि महाभोगः 290
शुद्धान्येतानि तत्त्वानि 164
शुद्धेऽध्वनि शिवः कर्ता 153
शूद्रहस्तस्थितं भस्म 396
शूद्राणाञ्च तथा स्त्रीणां 295
शूद्राद्विप्राङ्गनायान्तु 287
शूद्रायां क्षत्रियाज्जातो 287
शूद्रायां ब्राह्मणेनोत्थो 287
शूलदण्डधराः क्रुद्धाः 67
शृणुध्वमृषयस्सर्वे 73
शैवाः पाशुपता ये च 275
शैवागमोऽपि द्विविधः 76, 284
शैवागमोगदितोधर्मो 74
शोध्यो लकार एवात्र 323
श्यामवर्णस्सुरक्ताक्षः 124
श्रद्धया सहितं सर्वं 369
श्रद्धाभावस्तेन जातो 61
श्राद्धे यज्ञे जपे होमे 397
श्रान्तोऽसमर्थस्तत् 422
श्रीकण्ठश्च शिखण्डी 327
श्रीकरं पीतमित्याहुः 412
श्रीधरं बाहुके वामे 413
श्रीमच्चिदम्बरं नत्वा 21
श्रुणु तत्त्वं प्रवक्ष्यामि 334
श्रुतयश्च पुराणानि 118
श्रुतिपथगलितानां 282
श्रुतिपथनिरतानां 282-83, 299
श्रुतिभ्रष्टस्स्मृतिप्रोक्त 282, 285
श्रुतिरपि मनुजानां 282
श्रुतिसारमयोऽन्यस्तु 76, 284
श्रुतिस्मृतिपुराणोक्त 60
श्रुतिस्मृतिसदाचार 85
श्रुतिस्सनातनी शम्भोः 69
श्रुतिस्सनातनी साध्वी 136
श्रुतौ चैव महादेवे 387
श्रुत्या विधीयते यस्मा 377
श्रुत्या विधीयते यस्मात् 394
श्रुत्वा तद्वचनं तेषां 64
श्रुत्वैतद्वचनं प्रीतः 84
श्रृणु पुत्र पुरावृत्तं 422
श्रृणु षण्मुख तत्त्वेन 416
श्रोतव्यमेतदाप्तोक्त्या 268
श्रोत्रं त्वक्चुक्षुषी जिह्वा 223
श्रोत्रवाक्छब्दवचन 223
श्रौतस्मार्तसमाचरे 389
श्वपचोऽप्येति सन्देशात् 383
श्वपाकोपि विमानस्थो 413
श्वेतो हरिद्राचूर्णाभो 313
श्वेतोऽथ जयभद्रश्च 322

षट्कोणोदितकल्पान्त 327
षट्त्रिंशत्भिश्शिरोमाला 417
षड्वक्त्रः कार्तिकेयस्तु 416

स एव सर्वजन्तूनां 117
स एव साम्बस्सर्वज्ञ 368
स च त्रिविध उद्दिष्टः 129, 186

स च त्रेधा स्थितो लोके 132, 200
स च बुद्धिगतो रागः 175
स तु मानस एवेष्टः 129, 187
स तेन रञ्जितो भोग्यं 126, 175
स तेभ्यः प्रददावन्नं 390
स तेषां मायया जातां 390
स तेषु हरियज्ञाय 316
स देहस्यापि कर्तृत्वं 29
स रुद्रत्वमवाप्नोति 421
स शैलस्तस्य दैत्यस्य 316
स शोकेनाभिसन्तप्तः 390
स षोडशसहस्राणि 310
स स्वयं शिवभक्तेभ्यः 386
स हि तत्र स्थितं विष्णुं 409
स हि सर्वजगन्नाथ 70
संकीर्णास्सात्विकाश्चैव 110
संक्षेपेणैव तत्रादौ 21
संबन्धस्य परिच्छेद 101
संयोक्ता च वियोक्ता च 322
संशयादिविनिर्मुक्ता 34, 89
संसारावलयो भुक्तानि 117
सकलाणूपभोग्यत्व 162
सकलानाञ्च सर्वत्र 289
सकृत्तिर्यक्त्रिपुण्ड्राङ्कं 400
सङ्गातञ्च सकाकोलं 66
सच्छिद्रन्तु त्रिशूलस्य 379
सच्छिद्रमथवाच्छिद्रं 411
सच्छिद्रमुक्तमेकान्ति 411
सञ्चितं हन्ति दीक्षया 281
सञ्जीवने महावीचौ 66
सतावदनुसन्धत्ते 206
सत्यं न सा स्वतः किन्तु 180
सत्यं शौचं जपो होमः 397
सत्यं सा व्यापिनी नित्या 292
सत्यन्नेद्ध्रियते देहः 267
सत्यमेव मया प्रोक्तं 403
सत्वात्सञ्जायते ज्ञानं 110
सत्वेनोत्कृष्टभागो यस्स 186
सत्वेनोत्कृष्टभागो 129
सदाशिवोऽपि भगवान् 57
सद्यादिभिः पराभूतिः 397
सद्येन गोशकृत् ग्राह्यं 395
सद्योजाताभिधानेन 395
सन्तुष्टस्सर्वकार्येषु 267
सन्यासाश्रममत्यन्तं 296
सन्यासिमूकान्यङ्गांश्च 300
सन्यासी पतितो नग्नः 298, 300
सपर्यायेण तानेति 409
सप्तमादुदधेरर्वाक् द्वे 317
सप्तवक्त्रो महानागो 416
सप्तविंशतिलक्षाणि 317
समता च समुत्पत्ति 357
समत्वं कर्मणां नात्र 290
समयाचारसंयुक्ता 307
समयीपुत्रकश्चैव 378, 408
समस्ततीर्थौघमयी च 407
समहागिरिराजे वै 84
समाना वेदमन्त्राणां 72
समूलेषु च धर्मेषु 74
समे कर्मणि सञ्जाते 268, 288
समेत्य सर्वे मुनयो 390
सर्वं कार्ष्णाय संज्ञातं 140
सर्वकारणमीशानः 118
सर्वज्ञं सर्वकर्तारं 136
सर्वज्ञत्वादियोगेऽपि 164
सर्वज्ञस्सर्वकर्तृत्वात् 30, 53
सर्वज्ञस्सर्वतत्त्वानां 113
सर्वज्ञस्सशिवो यद्वत् 268
सर्वतत्त्वव्यतीतश्च 359
सर्वतीर्थेषु यत्पुण्यं 400, 405
सर्वतीर्थैश्च संयुक्तः 400
सर्वतो युगपत् वृत्तेः 200
सर्वदुःखप्रशमनं 164
सर्वदोत्पन्नमानोऽसौ 252
सर्वदोषविशिष्टस्य 70
सर्वदोषविहीनस्य 70
सर्वपर्वसु यत्नेन 405
सर्वपापविनिर्मुक्तस्य 404
सर्वभूतसुखादिञ्च 322
सर्वभूतानुकम्पी च 386

सर्वयज्ञतपोदानवेद 421
सर्वरोगसमुत्पन्नं 408
सर्वलक्षणहीनोऽपि 297
सर्वविज्ञानरत्नानां 117
सर्वस्मादधिकं ब्रूयात् 115
सर्वागमानां तेनोक्तं 80
सर्वागमानां सारज्ञः 301
सर्वागमेषु निष्ठानां 402
सर्वाङ्गं सद्यमन्त्रेण 407
सर्वात्मना चेत्साम्येन 359
सर्वाध्ववर्तिभूतानां 308
सर्वावयवसंपूर्णः 300
सर्वे संप्राप्य देवेशं 32, 58
सर्वेन्द्रियस्सर्वतनुः 320
सव्ये तु शङ्खं बिभृयात् 410
सससर्ज ललाटं हि 399
सहस्रद्वयविष्कम्भा 312
सहस्रयोजनोच्छ्राया: 313
सहस्रशीर्षा पुरुषः 108
सहस्राणां त्रयेणाथ 25
सा तु शुक्लार्धचन्द्राभा 324
सा तु संविदशेषार्थ 153
सा तु स्फुरदनेकार्च्चिः 325
सा बुद्धिरुदिता तन्त्रे 185
सा शान्त्यतीता पञ्चाध्व 328
सांख्यं योगः पाञ्चरात्रं 33, 71
सांख्यादीन्यप्रमाणानि 80
सांप्रतकालं बाह्यं 194
साङ्ख्यज्ञानेऽपि मिथ्यात्वं 127
सात्विकेष्वपि कल्पेषु 110
साधु साधु महाप्राज्ञाः 116
साफल्यमसदुत्पत्ता 169
सायुज्यरूपा परमा 362
सावित्री मूर्तिमत्यास्ते 318
साहस्रे काञ्चने धाम 310
सिद्धान्त एव सिद्धान्तः 80
सिध्यर्थं कर्मणाञ्चैव 410
सिसृक्षुर्जगतस्सृष्टे 25
सुखानि यानि लोकेऽस्मिन् 250
सुदूरमपि गन्तव्यं 384
सुराणामसुराणाञ्च 420
सुवर्णमिव कर्मारं 162
सूच्यास्य तारखड्गाख्य 308
सूर्यतेजः प्रतीकाशैः 372
सूर्यनेत्रोद्भवा भेदाः 416
सृष्टिकाले महेशानः 80
सृष्टेस्तु प्रागिदं सर्वं 106
सृष्ट्यनन्तरमेवेश 25
सृष्ट्यर्थमैक्षत प्राज्ञा 140
सृष्ट्वा तानूचतुर्देवौ 58
सैषा शिवाश्रया शक्तिः 151
सोऽनुवीक्ष्य कृपाविष्टः 390
सोऽनुशास्ति जनं 65
सोऽपि तं प्रेक्ष्य दुर्बुद्धिं 67
सोऽपि देशो भवेत्पूतः 400
सोऽब्रवीद्भगवान् रुद्रो 107
सौपार्श्वे धृतिमन्नाम 314
सौम्यं प्राजेश्वरं ब्राह्मं 323
स्त्रीपुन्नपुंसकादित्वात् 27
स्त्रैणः कामी तथा लुब्धः 64
स्थानानि यातनाहेतोः 308
स्थापितायान्तु शाण्डिल्यः 66
स्थावरं पञ्चमं सर्वं 323
स्थित्वा सहेन्द्रियव्याधैः 257
स्नानमीशादिमन्त्रेण 395
स्नाने दाने जपे होमे 415
स्निग्धाद्वियुज्यमानस्तु 267
स्पृष्ट्वा शिवास्त्रमन्त्रेण 418
स्मरणादेव रुद्रस्य 401
स्मार्तेभ्यश्श्रौतधर्माश्च 74
स्यादेव वा न स्यादेव वा 217
स्रक्चन्दनादिदानञ्च 386
स्रष्टा पालयिता हन्ता 85
स्वकारणनिवृत्त्यैव 264
स्वचैतन्यविनाशाय 348
स्वतः प्रमाणभूतेन 59
स्वतन्त्रस्याप्रयोज्यत्वं 155
स्वतो दोषो न शब्दस्य 69
स्वतो धूळ्यात्मकत्वेन 132, 200
स्वदारगमनेष्वेव 60

स्वदेशिकस्यैव तु नाम 302
स्वदेशिकस्यैव शरीर 302
स्वप्नावस्था च ह्रीं बीजं 325
स्वमतैर्वादिभिस्त्वेवं 357
स्वमनीषिकयोत्पन्नो 73
स्वयंभूर्यत्र वा लिङ्गं 383
स्वरूपज्योतिरेवान्तः 160
स्वलाभमन्तरेणापि 403
स्वशिष्येभ्यस्तु वक्तव्या 422
स्वसंवेद्यं परंज्योतिः 249
स्वस्त्रीषु स्वस्य वैधेन 287
स्वाकाररञ्जितां पाशाः 263
स्वाचार्याय महाभक्त्या 302
स्वाधिकारविधौ तीक्ष्णा 320
स्वापे विपाकमभ्येति 158
स्वार्जितेष्वेव नेहान्यैः 127, 179

हतास्तेन सुरास्सर्वे 415
हरिश्चन्द्रश्च श्रीशैलो 324
हरिश्श्रेष्ठो हरश्श्रेष्ठ 116
हसनादि त्वया प्रोक्तं 339
हस्त्यश्वमृगमार्जार 417
हाहतोऽस्तीति चक्रन्द 84
हिमेन्दुहिमनीलाब्ज 317
हुतहोमादिभिस्तप्तैः 410
हेतुस्सदाशिवो देव 328
हैमं कटाहकं कोटिः 317

# शिवज्ञानबोधभाष्ये उदाहृत–ग्रन्थग्रन्थकर्तृसूचिः


Aṁbāstava 81, 288

*Acintyāgama* 121, 134, 143, 247, 249, 251

*Acintyaviśvasādākhya* 296, 299-301

Aghoraśivācārya 276

*Atharvaśikhā* 107-08, 113

Atharvaśira 35, 81, 108, 112, 386

*Ādityahṛdaya* 114

*Āditya Purāṇa* 109, 114-15, 374, 386, 389

Bhaṭṭapāda 57, 73, 159, 280

Bādarāyaṇa 106, 155, 279

*Bhagavadgītā* 109, 114, 344

*Bharadvājasmṛti* 386, 395

*Bhāgavata* 73, 283, 287

*Bodhāyanasmṛti* 375, 377, 386, 392, 394-95, 405, 411

*Brahmamīmāṁsā* 107

*Brahma Purāṇa* 110, 375, 379, 381, 386-87, 392, 411-13

Brahmaśambhu 152

*Brahmāṇḍa Purāṇa* 379, 412, 413

*Brahmānandabhāratī* 379-80

*Bṛhadāraṇyaka* 57, 69-70, 78-79, 81-82, 297

*Bṛhannāradīya Purāṇa* 379, 381, 386-87, 400, 412, 419

*Caturlakṣaṇī* 34, 143

*Chāndogya* 106

*Devīkālottara* 75, 78, 141, 143, 258, 262, 272, 281, 295, 297-98, 301-02, 362

*Dharma Saṁhitā* 110

*Dharmasārasudhānidhi* 377, 395-96

*Dvādaśalakṣaṇī* 85

*Dviśatīkālottara* 294, 300-301, 378, 408

*Garuḍa Purāṇa* 377, 381, 386, 401, 419

*Gautamadharmasūtra* 270

*Harivaṁśa* 115

Īśvarakṛṣṇa 128, 181, 194, 348

*Īśānaśruti* 113

Jaimini 37, 85

*Jābālopaniṣad* 414

*Jñānaratnāvalī* 298-99

*Jñānatilaka* 75, 134, 141, 250, 258, 269, 271, 275, 360, 362

Kaiyaṭa 139

Kālidāsa 68-69

*Kālottara* 201, 380, 386, 405, 408

*Kāmikāgama* 74, 162, 165, 284-85,

363
*Kāraṇāgama* 407
*Kāśikā* 139
Kātyāyana 211
*Kiraṇāgama* 268, 288, 345
*Kūrma Purāṇa* 32, 34, 57-59, 76, 82-83, 119, 282, 284-86, 375, 377, 381, 386, 390
*Kriyāsāra* 386, 405

*Liṅga Purāṇa* 35, 106-07, 114, 117, 401
*Lokākṣismṛti* 386, 397
Lokāyata 72

Madhva 239
*Mahābhārata* 33, 35, 57, 71, 81, 85, 107-09, 114, 118, 386, 404
*Mahānārayaṇopaniṣad* 107-08
*Mahopaniṣad* 106, 108
*Manusmṛti* 109-10, 387
*Matsya Purāṇa* 109-10, 119, 386, 401
*Mālinīvijaya* 25, 151
*Mānavopapurāṇa* 106, 375, 377, 381, 386, 392, 404, 406, 419
Mataṅga 25, 28, 283
*Mohaśūrottara* 136
*Mokṣakārikā* 252, 348, 357
*Mṛgendrāgama* 27, 29-30, 39, 42, 48, 53, 75, 80, 89, 105, 126-31, 143, 150-51, 155, 158, 163-64, 167, 169-71, 173-74, 176, 178, 182, 184, 186-87, 194-96, 199-201, 204, 206-07, 223, 264, 266, 320-21, 358, 363

*Nāradīyasmṛti* 379, 386, 396
*Nyāyakusumāñjali* 27
*Nyāyasūtra* 349

*Padma Purāṇa* 31, 63, 84, 378-79, 381, 387, 410-12, 414, 419
*Parākhya* 28, 30, 74, 281
*Parāmokṣanirāsakārikā* 80, 349, 357
*Parāśaropa Purāṇa* 53, 61, 115, 118, 282, 369, 374-77, 381, 387-91, 393-94, 419
*Pañcapādikāvivaraṇa* 256
*Pāñcarātra Saṁhitā* 106, 373
Pāṇini 211
Puruṣasūkta 108, 113-14
*Puruṣārthaprabodha* 72
*Pauṣkarāgama* 27-29, 40, 47, 57, 88-89, 96-98, 100-101, 125-27, 129-32, 136, 155-57, 160-61, 163-64, 167, 172, 175-79, 182, 185-86, 189-90, 193, 195, 199, 204-06, 223-24, 233, 235, 266, 288-91, 293-94, 302-03
Prābhākara 251

*Ṛgveda* 69
*Ratnatraya* 124, 151-54, 160-63, 165, 250, 267, 307, 321, 358
*Rauravavṛttiviveka* 79
*Rauravāgama* 25, 362
Rāmakaṇṭhācārya 79
Rāmānuja 222
*Rāmāyaṇa* 109, 114
*Rudrādhyāya* 108, 114
*Rurutantra* 75

Śabarasvāmi 73
*Sadyojyoti* 128
*Śaivasaṁnyāsapaddhati* 25, 321

*Sāmba Purāṇa* 82, 285
*Sāṁkhyakārikā* 169, 183
*Śāṅkarabhāṣya* 135
*Sarvadarśanasaṁgraha* 216
*Sarvajñānottara* 74, 79-80, 250, 258-59, 272, 283, 359, 362-63
*Śataratnasaṁgraha* 302
*Śātātapasmṛti* 375, 386-87, 392
*Saurasaṁhitā* 379, 415
*Siddhāntasārāvalī* 105, 225
*Siddhāntāgama* 136, 284
*Siddhārthasamuccaya* 81
*Śivadharma* 53, 382-83
*Śivadharmottara* 272, 274, 371-72, 378, 384, 405
*Śivajñānāgama* 283, 344
*Śiva Rāghava Saṁvāda* 386, 406
*Śiva Purāṇa* 107, 386
*Śivarahasya* 386, 406
*Skandakālottara* 295, 298-300
*Skanda Purāṇa* 32, 85, 106, 109, 113, 115-19, 270, 273-74, 362, 372, 375-77, 379, 381, 383, 386-87, 393
*Somaśambhupaddhati* 136, 385, 407
*Smṛtidharmasāra* 386
*Smṛtibhāskara* 386, 394, 396
*Smṛtiratnāvali* 386, 395-96, 411
*Smṛtisārasamuccaya* 386, 396
*Smṛtisudhānidhi* 386
Śrīkaṇṭhācārya 75-76, 121, 134, 143
*Subālopaniṣad* 106, 108, 113
*Sūkṣmāgama* 290
*Suprabhedāgama* 75, 123, 133, 283, 289-90, 294-96, 298-301, 304-05, 362, 372, 378, 383, 407
*Sūta Saṁhitā* 53, 57-58, 60, 69, 71, 73, 77-79, 81-83, 133-34, 136, 140-41, 282-84, 286-88, 292, 294-97, 299, 302, 359, 367-69, 371-72, 374-75, 382, 385, 387, 390-91, 394, 397
*Śvetāśvatara* 35, 57, 69, 71, 82, 108, 113, 386
*Svāyambhuvāgama* 265, 268, 290, 355

*Tantra Bhāgavata* 283
*Tattvanirṇaya* 265
*Tattvaprakāśa* 165
*Tattvasaṁgraha* 200
*Tattvasāra* 334-35, 338
*Taittirīya* 107-08, 113, 386
Trilocanaśivācārya 105, 158, 225, 291

Udayanācārya 101

Vyāsa 34, 259
*Vātulāgama* 74
*Vāsiṣṭhalaiṅga Purāṇa* 31-32, 59, 66, 83, 374, 377, 381, 386, 388, 394, 403, 418
*Vāsiṣṭha Rāmāyaṇa* 117
*Vāyu Purāṇa* 57, 70, 78-79, 109, 143, 295
*Vāyavīya Saṁhitā* 69, 76, 81-82, 121, 134, 284-85, 294, 301, 380
*Vijayāgama* 25
*Viṣṇu Purāṇa* 108-09, 114
*Viṣṇusmṛti* 376, 386-87
*Vīpsākālottara* 378
*Vīrāgama* 294, 376, 378, 382, 408

*Yamasmṛti* 375, 386-87